धारण किये हुए गरुड़जी बड़ी नम्रता से हाथ जोडकर उनके समक्ष खडे थे॥ १३॥ योगनिद्रा से उठकर वे अपनी स्वच्छ और पवित्र दृष्टि से उन भृगु आदि ऋषियों को अनुगृहीत कर रहे थे, जो उनसे पूछ रहे थे—'भगवन्! आप सानन्द सो चुके?'॥ १४॥ तब देवताओं ने दैत्यों को नष्ट करने वाले विष्णु भगवान् को प्रणाम किया और उन प्रशंसनीय विष्णु की स्तुति करने लगे, जिन तक न वाणी की पहुँच होती है और न मन ही वहाँ पहुँच सकता है। वे बाले—॥ १५॥ हे प्रभो! पहले विश्व को बनाने वाले, फिर उसका पालन करने वाले और अंत में उसका संहार करने वाले— ये तीन रूप आप धारण किये रहते हैं। आपको हमारा प्रणाम है॥ १६॥ एक ही स्वाद वाला वर्षा का जल अलग-अलग देशों में बरस कर जैसे अलग-अलग स्वादवाला हो जाता है, वैसे ही आप सब प्रकार के विकारों से दूर रहते हुए भी सत्त्व, रज और तम इन तीनों गुणों के सहारे अनेक रूप धारण कर लेते हैं॥ १७॥ हे भगवन्! आप कितने बडे हैं, यह कोई नहीं नाप सकता। किन्तु आपने सब लोक नाप डाले हैं। आपको कोई नहीं जीत सकता, परन्तु आपने सबको जीत लिया है। आप किसी को नहीं दीखते, परन्तु आपने ही इस दृश्यमान संसार को उत्पन्न किया है॥ १८॥ हे भगवन्! विद्वानों का कहना है कि आप सबके हृदय में रहते हुए भी सबसे दूर हैं। आपकी कोई इच्छा नहीं है, फिर भी नर-नारायण के रूप से बदरिकाश्रम में तपस्या करते हैं। आप दयालु हैं, परन्तु आपको शोक नहीं होता। आपको लोग पुराणपुरुष कहते हैं, परन्तु आप कभी भी बूढे नहीं होते॥ १९॥ आप सबको जानते हैं, परन्तु आपको कोई नहीं जानता। आपने सम्पूर्ण सृष्टि उत्पन्न की है, परन्तु आपको किसी ने नहीं उत्पन्न किया है। आप सबके स्वामी हैं, परन्तु आपका कोई भी स्वामी नहीं है और एक रूप होते हुए भी आप सारे संसार के सब रूप धारण किये हुए हैं॥ २०॥ विद्वानों का कथन है कि सामवेद के सातों प्रकार के गीतों में आपके ही गुण गाये गये हैं। आप ही सातों समुद्रों के जल में निवास करते हैं। सातों प्रकार की अग्नियाँ आपके ही मुख हैं और सातों लोकों के आधार एकमात्र आप ही हैं॥ २१॥ आपके ही चारों मुखों से धर्म, अर्थ, काम और मोक्ष देने वाला ज्ञान उत्पन्न हुआ है। चारों युगों में बँटा हुआ समय भी आपने ही उत्पन्न किया है और चार वर्णों वाला यह संसार भी आपका ही बनाया हुआ है॥ २२॥ प्राणायाम आदि के द्वारा मन को वश में करके मुक्ति पाने के लिए योगी लोग अपने हृदय में बैठे हुए ज्योतिस्वरूप आपकी ही सदा खोज करते रहते हैं॥ २३॥ हे भगवन्! आप अजन्मा कहलाते हुए भी जन्म लेते हैं और अकर्मा होकर भी शत्रुओं का संहार करते हैं। योगनिद्रा में सोते हुए भी आप जागते रहते हैं। तब आपका यथार्थ स्वरूप भला कौन जान सकता है?॥ २४॥ कृष्ण आदि के रूपों में आप शब्द,

बहुधाऽप्यागमैर्भिन्नाः पन्थानः सिद्धिहेतवः । त्वय्येव निपतन्त्योघा जाह्नवीया इवार्णवे ॥ २६ ॥
त्वय्यावेशितचित्तानां त्वत्समर्पितकर्मणाम् । गतिस्त्वं वीतरागाणामभूयः सन्निवृत्तये ॥ २७ ॥
प्रत्यक्षोऽप्यपरिच्छेद्यो महाँदिर्महिमा तव । आप्तवागनुमानाभ्यां साध्यं त्वां प्रति का कथा ॥
केवलं स्मरणेनैव पुनासि पुरुषं यतः । अनेन वृत्तयः शेषा निवेदितफलास्त्वयि ॥ २९ ॥
उदधेरिव रत्नानि तेजांसीव विवस्वतः । स्तुतिभ्यो व्यतिरिच्यन्ते दूराणि चरितानि ते ॥ ३० ॥
अनवाप्तमवाप्तव्यं न ते किञ्चन विद्यते । लोकानुग्रह एवैको हेतुस्ते जन्मकर्मणोः ॥ ३१ ॥
महिमानं यदुत्कीर्त्य तव संह्रियते वचः। श्रमेण तदशक्त्या वा न गुणानामियत्तया ॥ ३२ ॥
इति प्रसादयामासुस्ते सुरास्तमधोक्षजम् । भूतार्थव्याहृतिः सा हि न स्तुतिः परमेष्ठिनः ॥ ३३ ॥
तस्मै कुशलसम्प्रश्नव्यञ्जितप्रीतये सुराः । भयमप्रलयोद्वेलादाचख्युर्नैर्ऋतोदधेः ॥ ३४ ॥
अथ वेलासमासन्नशैलरन्ध्रानुनादिना । स्वरेणोवाच भगवान् परिभूतार्णवध्वनिः ॥ ३५ ॥
पुराणस्य कवेस्तस्य वर्णस्थानसमीरिता । बभूव कृतसंस्कारा चरितार्थैव भारती ॥ ३६ ॥
बभौ सदशनज्योत्स्ना सा विभोर्वदनोद्गता । निर्यातशेषा चरणाद्गङ्गेवोर्ध्वप्रवर्तिनी ॥ ३७ ॥

स्पर्श, रूप, रस, गन्ध आदि का भोग करते हैं। नर-नारायण रूप से कठोर तप करते हैं। राम आदि का रूप धारण करके प्रजा का पालन करते हैं और शान्त रूप धारण करके आप उन सबसे उदासीन भी बन जाते हैं॥ २५ ॥ जैसे गंगाजी की सभी धाराएँ समुद्र में जा गिरती हैं, उसी प्रकार सिद्धि (परमानन्द) पाने के जितने मार्ग बतलाये गये हैं, अलग-अलग शास्त्रों में अलग-अलग रूप से बतलाये जाने पर भी वे सब मार्ग आपके ही पास जाते हैं॥ २६ ॥ जो लोग सदा आपका ही ध्यान धरते हैं, जिन्होंने अपने सब कर्म आपको ही अर्पित कर दिये हैं और जो राग-द्वेष से दूर हैं, उनको आप ही जन्म-मरण के बन्धन से छुड़ाते हैं॥ २७ ॥ यद्यपि पृथ्वी आदि को देखने से आपकी महिमा प्रकट होती है, परन्तु उतने से ही आपका वर्णन नहीं किया जा सकता। तब वेदों के वर्णन तथा अनुमान से आपका ज्ञान कैसे हो सकेगा ? ॥ २८ ॥ आपके स्मरणमात्र से लोग पवित्र हो जाते हैं। फिर यदि उन्हें आपका दर्शन मिल जाय, वे आपका चरण छूकर तथा आपकी वाणी सुनकर जो उन्हें पुण्य होगा, उसका वर्णन कौन कर सकता है ? ॥ २९ ॥ जैसे समुद्र के रत्न और सूर्य की किरणें नहीं गिनी जा सकतीं, वैसे ही स्तुति करके आपके पूरे चरित्र का वर्णन नहीं किया जा सकता॥ ३० ॥ संसार में प्राप्त करने योग्य ऐसी कोई भी वस्तु नहीं है, जो आपके हाथ में न हो। फिर भी आप जो जन्म लेते और कर्म करते हैं, उसका उद्देश्य यही है कि आप संसार पर कृपा करना चाहते हैं॥ ३१ ॥ आपके महत्त्व की प्रशंसा करके जो हम चुप हो रहे हैं, सो इसलिए नहीं कि हमने आपके सब गुण बखान डाले, बल्कि इसलिए कि हम अब थक गये और आगे बोलने की शक्ति हममें नहीं रह गयी है॥ ३२ ॥ जो भगवान् किसी भी इन्द्रिय से नहीं प्राप्त होते, उनकी स्तुति करके देवताओं ने उन्हें प्रसन्न कर लिया। वह स्तुति भी उनकी झूठी प्रशंसा नहीं थी, अपितु सब बातें यथार्थ थीं॥ ३३ ॥ तब विष्णु भगवान् ने प्रसन्न होकर उनसे कुशल-मंगल पूछा। जिसके उत्तर में देवताओं ने कहा कि आजकल ऐसे-ऐसे राक्षसरूपी समुद्र उत्पन्न हो गये हैं, जिन्होंने बिना प्रलयकाल के ही सारे संसार की मर्यादा भंग करके चारों ओर हाहाकार मचा रखा है॥ ३४ ॥ यह सुना तो समुद्र से भी बढकर गंभीर ध्वनि में भगवान् बोले। तब क्षीरसागर के तट पर विद्यमान पहाड़ों की गुफाओं में पहुँचकर उनके शब्द गूँज उठे॥ ३५ ॥ भगवान् विष्णु तो सबसे पुराने कवि हैं। इसलिए जब उनके कण्ठ, तालु, दाँत तथा होठ आदि उच्चारण के स्थानों से भली-भाँति वाणी निकली, तब जैसे सरस्वतीजी अपने जन्म लेने का फल पा गयीं॥ ३६ ॥ उनके दाँतों की द्युति से जगमगाती हुई उनकी वाणी जब मुख से निकली, तब वह ऐसी सुन्दर लगी कि जैसे उनके चरणों से निकलकर गंगाजी ऊपर आकाश को चली जा रही हों॥ ३७ ॥ विष्णु भगवान् ने कहा—हे देवताओ ! जैसे संसार

जाने वो रक्षसाक्रान्तावनुभावपराक्रमौ । अङ्गिनां तमसेवोभौ गुणौ प्रथममध्यमौ ॥ ३८ ॥
विदितं तप्यमानं च तेन मे भुवनत्रयम् । अकामोपनतेनेव साधोर्हृदयमेनसा ॥ ३९ ॥
कार्येषु चैककार्यत्वादभ्यर्थ्योऽस्मि न वज्रिणा । स्वयमेव हि वातोऽग्नेः सारथ्यं प्रतिपद्यते ॥ ४० ॥
स्वासिधारापरिहृतः कामं चक्रस्य तेन मे । स्थापितो दशमो मूर्धा लभ्यांश इव रक्षसा ॥ ४१ ॥
स्रष्टुर्वरातिसर्गात्तु मया तस्य दुरात्मनः । अत्यारूढं रिपोः सोढं चन्दनेनेव भोगिनः ॥ ४२ ॥
धातारं तपसा प्रीतं ययाचे स हि राक्षसः । दैवात्सर्गादवध्यत्वं मर्त्येष्वास्थापराङ्मुखः ॥ ४३ ॥
सोऽहं दाशरथिर्भूत्वा रणभूमेर्बलिक्षमम् । करिष्यामि शरैस्तीक्ष्णैस्तच्छिरःकमलोच्चयम् ॥ ४४ ॥
अचिराद्यज्वभिर्भागं कल्पितं विधिवत्पुनः । मायाविभिरनालीढमादास्यध्वे निशाचरैः ॥ ४५ ॥
वैमानिकाः पुण्यकृतस्त्यजन्तु मरुतां पथि । पुष्पकालोकसङ्क्षोभं मेघावरणतत्पराः ॥ ४६ ॥
मोक्ष्यध्वे स्वर्गबन्दीनां वेणीबन्धानदूषितान् । शापयन्त्रितपौलस्त्यबलात्कारकचग्रहैः ॥ ४७ ॥
रावणावग्रहक्लान्तमिति वागमृतेन सः । अभिवृष्य मरुत्सस्यं कृष्णमेघस्तिरोदधे ॥ ४८ ॥
पुरुहूतप्रभृतयः सुरकार्योद्यतं सुराः । अंशैरनुययुर्विष्णुं पुष्पैर्वायुमिव द्रुमाः ॥ ४९ ॥
अथ तस्य विशाम्पत्युरन्ते काम्यस्य कर्मणः । पुरुषः प्रबभूवाग्नेर्विस्मयेन सहर्त्विजाम् ॥ ५० ॥

के जीवों के सतोगुण और रजोगुण को उनका तमोगुण दबा देता है, वैसे ही आपके तेज और बल को रावण ने दबा दिया है ॥ ३८ ॥ जैसे अनजान में किये हुए पाप से सज्जन का मन घबरा जाता है, वैसे ही रावण के अत्याचारों से तीनों लोक घबरा उठे हैं ॥ ३९ ॥ अतएव रावण को मिटा डालने का काम जैसे इन्द्र का है, वैसा ही मेरा भी है। एतदर्थ इन्द्र ने जो मेरी प्रार्थना की है, उसकी मैं कोई आवश्यकता नहीं समझता। क्योंकि आग की सहायता के लिए वायु से कहना नहीं पड़ता, वह तो स्वयं आग को भडका देता है ॥ ४० ॥ शिवजी को प्रसन्न करने के लिए रावण ने पूर्वकाल में अपने नौ सिर काटकर चढा दिये थे। अब ऐसा लगता है कि उस राक्षस ने अपना दसवाँ सिर मेरे चक्र से कटने के लिए ही बाकी रख छोडा है ॥ ४१ ॥ ब्रह्माजी ने जो उसे वरदान दे दिया था, उसी से मैंने उस दुष्ट का दिन-प्रतिदिन ऊपर चढना उसी प्रकार सह लिया है, जैसे अपने ऊपर चढते हुए साँप को चन्दन का पेड सह लिया करता है ॥ ४२ ॥ ब्रह्माजी जब उसकी तपस्या से प्रसन्न हुए, तब उसने यही वरदान माँगा था कि मैं देवताओं के हाथ से न मारा जा सकूँ। क्योंकि मनुष्यों को वह कुछ समझता ही नहीं है ॥ ४३ ॥ इसीलिए मैं राजा दशरथ के यहाँ पुत्ररूप में जन्म लेकर अपने तीखे बाणों से उसके सिरों को कमल के सदृश उतार कर रणभूमि में भेंट चढाऊँगा ॥ ४४ ॥ हे देवताओ ! यजमानों द्वारा विधि से तुम्हें दिया हुआ यज्ञभाग अब राक्षस लोग नहीं खा सकेंगे। वह आप ही लोग पायेंगे ॥ ४५ ॥ अब निडर होकर आप लोग अपने-अपने विमानों पर चढकर आकाश में घूमिए और रावण का पुष्पक विमान देख और उससे डरकर बादलों में छिपना छोड़ दीजिए ॥ ४६ ॥ स्वर्ग की जिन स्त्रियों को रावण ने अपने यहाँ बन्दी बना लिया है, उनके जूडों पर नल-कूबर के शाप के डर से उसने हाथ नहीं लगाया है। अब आप ही लोग उन स्त्रियों के पवित्र जूडे अपने हाथों से खोलिएगा ॥ ४७ ॥ जैसे सूखे के समय कोई बादल धान के खेत पर जल बरसाकर चला जाय, वैसे ही रावण के डर से सूखे हुए देवताओं पर अपना मधुर वचनामृत बरसाकर विष्णु भगवान् अन्तर्धान हो गये ॥ ४८ ॥ वायु के चलने पर जैसे वन के वृक्ष स्वयं उसके पीछे न जाकर अपने फूल उसके साथ भेज देते हैं, वैसे ही जब भगवान् विष्णु देवताओं का कार्य करने को चले, तब इन्द्र आदि देवताओं ने भी अपने-अपने अंश उनके साथ भेज दिये ॥ ४९ ॥ इधर जैसे राजा दशरथ का पुत्रेष्टि यज्ञ समाप्त हुआ, वैसे ही यज्ञ के अग्निकुण्ड से एक पुरुष प्रकट हुआ, जिसे देखकर यज्ञ करने वाले सभी ऋत्विक् बडे आश्चर्य में पड़ गये ॥ ५० ॥ उस पुरुष के हाथों

हेमपात्रगतं दोर्भ्यामादधानः पयश्चरुम् । अनुप्रवेशादाद्यस्य पुंसस्तेनापि दुर्वहम्॥५१॥
प्राजापत्योपनीतं तदन्नं प्रत्यग्रहीन्नृपः । वृषेव पयसां सारमाविष्कृतमुदन्वता॥५२॥
अनेन कथिता राज्ञो गुणास्तस्यान्यदुर्लभाः । प्रसूतिं चकमे तस्मिंस्त्रैलोक्यप्रभवोऽपि यत्॥५३॥
स तेजो वैष्णवं पत्न्योर्विभेजे चरुसंज्ञितम् । द्यावापृथिव्योः प्रत्यग्रमहर्पतिरिवातपम्॥५४॥
अर्चिता तस्य कौसल्या प्रिया केकयवंशजा । अतः सम्भावितां ताभ्यां सुमित्रामैच्छदीश्वरः॥
ते बहुज्ञस्य चित्तज्ञे पत्न्यौ पत्युर्महीक्षितः । चरोरर्धार्धभागाभ्यां तामयोजयतामुभे॥५६॥
सा हि प्रणयवत्यासीत्सपत्न्योरुभयोरपि । भ्रमरी वारणस्येव मदनिस्यन्दरेखयोः॥५७॥
ताभिर्गर्भः प्रजाभूत्यै दध्रे देवांशसम्भवः । सौरीभिरिव नाडीभिरमृताख्याभिरन्वयः॥५८॥
सममापन्नसत्त्वास्ता रेजुरापाण्डुरत्विषः । अन्तर्गतफलारम्भाः सस्यानामिव सम्पदः॥५९॥
गुप्तं ददृशुरात्मानं सर्वाः स्वप्नेषु वामनैः । जलजासिगदाशार्ङ्गचक्रलाञ्छितमूर्तिभिः॥६०॥
हेमपक्षप्रभाजालं गगने च वितन्वता । उह्यन्ते स्म सुपर्णेन वेगाकृष्टपयोमुचा॥६१॥
बिभ्रत्या कौस्तुभन्यासं स्तनान्तरविलम्बिनम्। पर्युपास्यन्त लक्ष्म्या च पद्मव्यजनहस्तया॥६२॥
कृताभिषेकैर्दिव्यायां त्रिस्रोतसि च सप्तभिः । ब्रह्मर्षिभिः परं ब्रह्म गृणद्भिरुपतस्थिरे॥६३॥
ताभ्यस्तथाविधान्स्वप्नाञ्छ्रुत्वा प्रीतो हि पार्थिवः। मेने परार्ध्यमात्मानं गुरुत्वेन जगद्गुरोः॥
विभक्तात्मा विभुस्तासामेकः कुक्षिष्वनेकधा । उवास प्रतिमाचन्द्रः प्रसन्नानामपामिव॥६५॥

में खीर से भरा हुआ स्वर्णपात्र था। उस खीर में सारे ब्रह्माण्ड को सँभालने वाले विष्णु भगवान् समाये हुए थे। इसलिए वह दिव्य पुरुष उस पात्र को वड़ी कठिनाई से सँभाले हुए था॥५१॥ इन्द्र ने जैसे समुद्र में से निकले अमृतकलश को ले लिया था, वैसे ही राजा दशरथ ने भी उस दिव्य पुरुष के हाथ से वह खीर ले ली॥५२॥ उस पुरुष ने राजा के असाधारण गुणों की ऐसी प्रशंसा की कि त्रिलोकी के जनक विष्णु को भी उनके यहाँ जन्म लेने की इच्छा हो गयी॥५३॥ सूर्यनारायण जैसे अपनी नयी धूप पृथ्वी और आकाश दोनों में वाँट देते हैं, वैसे ही खीर के रूप में पाये हुए विष्णु के तेज को राजा दशरथ ने कौसल्या और कैकेयी में वरावर-वरावर वाँट दिया॥५४॥ कौसल्या उनकी वड़ी रानी और कैकेयी उनकी प्यारी थी। अतएव वे चाहते थे कि दोनों रानियाँ स्वयं अपने-अपने भाग में से कुछ अंश देकर सुमित्रा का सम्मान करें॥५५॥ तदनुसार सर्वज्ञ राजा दशरथ की इच्छा जानकर उन दोनों रानियों ने अपनी-अपनी खीर का कुछ भाग सुमित्रा को दे दिया॥५६॥ हाथी के दोनों कपोलों से वहने वाले मद की दोनों धाराओं से जैसे भ्रमरी प्रेम करती है, वैसे ही सुमित्रा भी अपनी दोनों सौतों से वरावर प्रेम करती थी॥५७॥ जैसे जल वरसाने वाली अमृता नाम की सूर्य की किरणें संसार के कल्याणार्थ जल धारण किये रहती हैं, वैसे ही उन तीनों रानियों ने लोककल्याणार्थ विष्णु के अंशस्वरूप गर्भ को धारण किया॥५८॥ एक साथ गर्भ धारण करने वाली वे रानियाँ गर्भ से पाली पडकर दानाभरे अनाज की वालों जैसी पीली लगती थीं॥५९॥ वे यह स्वप्न देखती थीं कि कमल, तलवार, गदा, शार्ङ्ग धनुष और चक्र लिये हुए कोई वौना-सा पुरुष उनकी रक्षा कर रहा है॥६०॥ अपने स्वर्णपंखों से प्रकाश फैलाता और वेग के कारण वादलों को भी साथ खींचकर ले जाता हुआ गरुड़ हमें आकाश में उड़ाये लिये जा रहा है॥६१॥ अपने वक्षःस्थल पर लटकने वाला कौस्तुभमणि पहने हुए लक्ष्मी हाथ में कमल का पंखा लेकर हमारी सेवा कर रही हैं॥६२॥ उनके अतिरिक्त आकाशगङ्गा में स्नान करके सप्तर्षि भी वेद-पाठ करते हुए हमारी ही उपासना करते हैं॥६३॥ रानियों ने जव राजा को अपने ये स्वप्न सुनाये, तव वे वहुत प्रसन्न हुए और उन्होंने समझ लिया कि अव संसार में मुझसे वढकर भाग्यवान् कोई नहीं है। क्योंकि मैं विष्णु भगवान् का भी पिता वनूँगा॥६४॥ यद्यपि विष्णु भगवान् का

अथाग्र्यमहिषी राज्ञः प्रसूतिसमये सती । पुत्रं तमोपहं लेभे नक्तं ज्योतिरिवौषधिः ॥ ६६ ॥
राम इत्यभिरामेण वपुषा तस्य चोदितः । नामधेयं गुरुश्चक्रे जगत्प्रथममङ्गलम् ॥ ६७ ॥
रघुवंशप्रदीपेन तेनाप्रतिमतेजसा । रक्षागृहगता दीपाः प्रत्यादिष्टा इवाभवन् ॥ ६८ ॥
शय्यागतेन रामेण माता शातोदरी बभौ । सैकताम्भोजबलिना जाह्नवीव शरत्कृशा ॥ ६९ ॥
कैकेय्यास्तनयो जज्ञे भरतो नाम शीलवान् । जनयित्रीमलञ्चक्रे यः प्रश्रय इव श्रियम् ॥ ७० ॥
सुतौ लक्ष्मणशत्रुघ्नौ सुमित्रा सुषुवे यमौ । सम्यगाराधिता विद्या प्रबोधविनयाविव ॥ ७१ ॥
निर्दोषमभवत्सर्वमाविष्कृतगुणं जगत् । अन्वगादिव हि स्वर्गो गां गतं पुरुषोत्तमम् ॥ ७२ ॥
तस्योदये चतुर्मूर्तेः पौलस्त्यचकितेश्वराः । विरजस्कैर्नभस्वद्भिर्दिश उच्छ्वसिता इव ॥ ७३ ॥
कृशानुरपधूमत्वात् प्रसन्नत्वात् प्रभाकरः । रक्षोविप्रकृतावास्तामपविद्धशुचाविव ॥ ७४ ॥
दशाननकिरीटेभ्यस्तत्क्षणं राक्षसश्रियः । मणिव्याजेन पर्यस्ताः पृथिव्यामश्रुबिन्दवः ॥ ७५ ॥
पुत्रजन्मप्रवेश्यानां तूर्याणां तस्य पुत्रिणः । आरम्भं प्रथमं चक्रुर्देवदुन्दुभयो दिवि ॥ ७६ ॥
सन्तानकमयी वृष्टिर्भवने चास्य पेतुषी । सन्मङ्गलोपचाराणां सैवादिरचनाऽभवत् ॥ ७७ ॥
कुमाराः कृतसंस्कारास्ते धात्रीस्तन्यपायिनः । आनन्देनाग्रजेनेव समं ववृधिरे पितुः ॥ ७८ ॥
स्वाभाविकं विनीतत्वं तेषां विनयकर्मणा । मुमूर्च्छ सहजं तेजो हविषेव हविर्भुजाम् ॥ ७९ ॥

एक ही रूप है, परन्तु जैसे निर्मल जल में चन्द्रमा के बहुत-से प्रतिबिम्ब दीखते हैं, वैसे ही वे भगवान् भी तीनों रानियों के गर्भों में अलग-अलग रह रहे थे ॥ ६५ ॥ जैसे पर्वत की अनेक जड़ी-बूटियों में रात को अँधेरा दूर करने वाला प्रकाश आ जाता है, वैसे ही राजा की पटरानी कौसल्या ने तमोगुण को दूर करने वाला एक तेजस्वी पुत्र उत्पन्न किया ॥ ६६ ॥ उस बालक के सुन्दर शरीर को देखकर वसिष्ठजी ने उसका संसार में प्रथम मङ्गलकारी 'राम' नाम रख दिया ॥ ६७ ॥ रघुवंश को उजागर करने वाले उस बालक का इतना प्रखर तेज था कि उसके समक्ष सौरीघर के दीपकों की ज्योति मन्द पड गयी ॥ ६८ ॥ प्रसव से दुबली माता कौसल्या नन्हें-से राम को लिये पलंग पर लेटी हुई ऐसी सुन्दर दीखती थी, जैसे शरद् ऋतु में पतली धारावाली गङ्गाजी के तट पर पूजारूप में चढाया हुआ नीलकमल रखा हो ॥ ६९ ॥ उधर कैकेयी ने भरत को जन्म दिया। उन्हें पाकर वह ऐसी सुन्दर लग रही थी, जैसे लक्ष्मी के साथ विनय शोभित होता है ॥ ७० ॥ जैसे अभ्यास से प्राप्त विद्या द्वारा ज्ञान और विनय दोनों मिल जाते हैं, वैसे ही सुमित्रा के लक्ष्मण और शत्रुघ्न नाम के दो जुड़वाँ पुत्र उत्पन्न हुए ॥ ७१ ॥ उस समय सारे संसार के दोष भाग गये और चारों ओर गुण ही गुण फैल गये। जैसे विष्णु भगवान् के साथ-साथ स्वर्ग भी पृथ्वी पर उतर आया हो ॥ ७२ ॥ दसों दिशाओं में विना धूल की जो स्वच्छ हवा चलने लगी, वह ऐसी लगती थी कि जैसे रावण से भयभीत कुबेर आदि दिक्पालों ने पृथ्वी पर चार रूपों में अवतरित भगवान् को पाकर सन्तोष की साँस ली हो ॥ ७३ ॥ रावण द्वारा मताये हुए अग्नि का धुआँ निकल गया और सूर्य भी निर्मल हो गये। जैसे उन दिनों उनका शोक दूर हो गया हो ॥ ७४ ॥ उसी समय सहसा रावण के मुकुट से निकल कर कुछ मणि पृथ्वी पर ऐसे गिर पडे जैसे राक्षसों की राजलक्ष्मी के आँसू चू पड़े हों ॥ ७५ ॥ पुत्रवान् दशरथ के घर पुत्र-जन्म के समय नगाडे आदि बाजे बाद में बजे, उसके पहले देवताओं ने स्वर्ग में बधाई की दुंदुभी बजा दी ॥ ७६ ॥ उनके राजमहल पर आकाश से कल्पवृक्षों के फूलों की जो वर्षा हुई, उसी से उन चारों पुत्रों के माङ्गलिक संस्कारों का श्रीगणेश हुआ ॥ ७७ ॥ जातकर्म आदि संस्कार हो जाने पर धाय का दूध पी-पीकर जैसे-जैसे वे राजकुमार बढने लगे, वैसे ही वैसे राजा का आनन्द भी बढने लगा। जैसे वह आनन्द भी उन चारों भाइयों का बड़ा भाई हो ॥ ७८ ॥ जैसे घी आदि की आहुति पड़ने से हवन की अग्नि का तेज बढ जाता है, वैसे ही शिक्षा पाने से उन

परस्परविरुद्धास्ते तद्रघोरनघं कुलम् । अलमुद्द्योतयामासुर्देवारण्यमिवर्तवः ॥ ८० ॥
समानेऽपि हि सौभ्रात्रे यथोभौ रामलक्ष्मणौ । तथा भरतशत्रुघ्नौ प्रीत्या द्वन्द्वं बभूवतुः ॥ ८१ ॥
तेषां द्वयोर्द्वयोरैक्यं बिभिदे न कदाचन । यथा वायुविभावस्वोर्यथा चन्द्रसमुद्रयोः ॥ ८२ ॥
ते प्रजानां प्रजानाथास्तेजसा प्रश्रयेण च । मनो जह्रुर्निदाघान्ते श्यामाभ्रा दिवसा इव ॥ ८३ ॥
स चतुर्धा बभौ व्यस्तः प्रसवः पृथिवीपतेः । धर्मार्थिकाममोक्षाणामवतार इवाङ्गभाक् ॥ ८४ ॥
गुणैराराधयामासुस्ते गुरुं गुरुवत्सलाः । तमेव चतुरन्तेशं रत्नैरिव महार्णवाः ॥ ८५ ॥

सुरगज इव दन्तैर्भग्नदैत्यासिधारैर्नय इव पणबन्धव्यक्तयोगैरुपायैः ।
हरिरिव युगदोर्घैर्दोर्भिरंशैस्तदीयैः पतिरवनिपतीनां तैश्चकाशे चतुर्भिः ॥ ८६ ॥

इति महाकविकालिदासकृतौ रघुवंशे महाकाव्ये
रामावतारो नाम दशमः सर्गः ॥ १० ॥

चारों राजकुमारों की स्वाभाविक विनम्रता और भी अधिक बढ़ गयी ॥ ७९ ॥ जैसे छहों ऋतुएँ नन्दन वन को देदीप्यमान कर देती हैं, वैसे ही पारस्परिक प्रेम से उन चारों कुमारों ने पवित्र रघुकुल को जगमगा दिया ॥ ८० ॥ यद्यपि चारों भाइयों में परस्पर बहुत प्रेम था, फिर भी विशेष प्रेम के कारण जैसे राम और लक्ष्मण की एक जोड़ी बन गयी थी, वैसे ही भरत और शत्रुघ्न की भी जोड़ी बन गयी ॥ ८१ ॥ जैसे वायु और अग्नि का तथा चन्द्रमा और समुद्र का जोड़ा कभी नहीं बिछुड़ता, वैसे ही राम और लक्ष्मण का तथा भरत और शत्रुघ्न का साथ कभी नहीं छूटता था ॥ ८२ ॥ प्रजाजनों के स्वामी उन राजकुमारों ने अपने तेज और नम्र व्यवहार से अपनी प्रजा का मन उसी प्रकार हर लिया, जैसे गर्मी के अंत में काले बादल लोगों का मन हर लेते हैं ॥ ८३ ॥ राजा की वे चारों संतानें ऐसी सुन्दर लग रही थीं जैसे धर्म, अर्थ, काम और मोक्ष— ये चारों पदार्थ अवतरित हो गये हों ॥ ८४ ॥ उन चारों पितृभक्त राजकुमारों ने राजा दशरथ को अपने गुणों से उसी प्रकार मोह लिया, जैसे चारों समुद्रों ने विविध रत्न देकर चारों दिशाओं के स्वामी राजा दशरथ को मोह लिया था ॥ ८५ ॥ असुरों की तलवारों की धार कुंठित करने वाले अपने चार दाँतों से जैसे ऐरावत शोभित होता है; जैसे साम, दाम, दण्ड और भेद—इन चार उपायों से राजनीति शोभित होती है और रथ के जुए के समान अपनी लम्बी-लम्बी चार भुजाओं से जैसे विष्णु भगवान् शोभित होते हैं, वैसे ही दशरथ भी अपने चारों सुयोग्य पुत्रों से सुशोभित हुए ॥ ८६ ॥

इस प्रकार रघुवंशमहाकाव्य में रामावतार नामक
दशवाँ सर्ग समाप्त ॥ १० ॥

एकादशः सर्गः

कौशिकेन स किल क्षितीश्वरो राममध्वरविघातशान्तये।
काकपक्षधरमेत्य याचितस्तेजसां हि न वयः समीक्ष्यते॥ १॥
कृच्छ्रलब्धमपि लब्धवर्णभाक् तं दिदेश मुनये सलक्ष्मणम्।
अप्यसुप्रणयिनां रघोः कुले न व्यहन्यत कदाचिदर्थिता॥ २॥
यावदादिशति पार्थिवस्तयोर्निर्गमाय पुरमार्गसंस्क्रियाम्।
तावदाशु विदधे मरुत्सखैः सा सपुष्पजलवर्षिभिर्घनैः॥ ३॥
तौ निदेशकरणोद्यतौ पितुर्धन्विनौ चरणयोर्निपेततुः।
भूपतेरपि तयोः प्रवत्स्यतोर्नम्रयोरुपरि बाष्पबिन्दवः॥ ४॥
तौ पितुर्नयनजेन वारिणा किञ्चिदुक्षितशिखण्डकावुभौ।
धन्विनौ तमृषिमन्वगच्छतां पौरदृष्टिकृतमार्गतोरणौ॥ ५॥
लक्ष्मणानुचरमेव राघवं नेतुमैच्छदृषिरित्यसौ नृपः।
आशिषं प्रयुयुजे न वाहिनीं सा हि रक्षणविधौ तयोः क्षमा॥ ६॥
मातृवर्गचरणस्पृशौ मुनेस्तौ प्रपद्य पदवीं महौजसः।
रेजतुर्गतिवशात्प्रवर्तिनौ भास्करस्य मधुमाधवाविव॥ ७॥
वीचिलोलभुजयोस्तयोर्गतं शैशवाच्चपलमप्यशोभत।
तोयदागम इवोद्धचभिद्यययोर्नामधेयसदृशं विचेष्टितम्॥ ८॥

तदनन्तर एक दिन विश्वामित्रजी राजा दशरथ के पास आये और उन्होंने कहा कि मेरे यज्ञ की रक्षा के लिए आप काकपक्षधारी राम को हमारे साथ भेज दें। क्योंकि जो तेजस्वी होते हैं, उनके लिए यह नहीं सोचा जाता कि वे उम्र में छोटे हैं या बड़े॥ १॥ यद्यपि राजा दशरथ ने राम और लक्ष्मण को बड़ी तपस्या से पाया था, किन्तु वे विद्वानों के इतने भक्त थे कि उन्होंने तत्काल राम-लक्ष्मण को मुनि के साथ भेज दिया। क्योंकि रघुकुल की सदा से यह रीति रही है कि यदि कोई उनसे प्राण भी माँगे तो उसे विमुख नहीं करते थे॥ २॥ राजा दशरथ उनकी विदाई के लिए सडक सजाने की आज्ञा दे ही रहे थे कि इतने में वायु ने फूल और बादलों ने जल लाकर उन सडकों पर बरसा दिया॥ ३॥ अपने पिता की आज्ञा का पालन करने को प्रस्तुत होकर दोनों धनुर्धर राजकुमार राम-लक्ष्मण अपने पिता के चरणों में प्रणाम करने को झुके, वैसे ही दशरथजी की आँखों से उन दोनों पर आँसुओं की बूँदें टपक पड़ीं॥ ४॥ उन आँसुओं से दोनों राजकुमारों की चोटियाँ भींग गयीं। धनुष लेकर जब दोनों भाई विश्वामित्रजी के पीछे-पीछे चले, उस समय उन्हें देखते हुए पुरवासियों की आँखें ऐसी लग रही थीं, जैसे उन नेत्रों की बंदनवारें बाँध दी गयी हों॥ ५॥ महर्षि विश्वामित्र केवल राम और लक्ष्मण को ही ले जाना चाहते थे। अतएव राजा ने उनकी सहायता के लिए केवल अपना आशीर्वाद दिया, सेना नहीं। क्योंकि उनका आशीर्वाद ही उनकी रक्षा के लिए पर्याप्त था॥ ६॥ अपनी माताओं के चरण छूकर दोनों राजकुमार उन तेजस्वी मुनि के पीछे चलते हुए ऐसे शोभित हो रहे थे, जैसे सूर्य के पीछे-पीछे चैत्र और वैशाख मास चले जा रहे हों। बचपन के कारण लहरों के समान चंचल बाँहों वाले उन दोनों

तौ बलातिबलयोः प्रभावतो विद्ययोः पथि मुनिप्रदिष्टयोः।
मम्लतुर्न मणिकुट्टिमोचितौ मातृपार्श्वपरिवर्तिनाविव॥ ९॥
पूर्ववृत्तकथितैः पुराविदः सानुजः पितृसखस्य राघवः।
उह्यमान इव वाहनोचितः पादचारमपि न व्यभावयत्॥ १०॥
तौ सरांसि रसवद्भिरम्बुभिः कूजितैः श्रुतिसुखैः पतत्त्रिणः।
वायवः सुरभिपुष्परेणुभिश्छायया च जलदाः सिषेविरे॥ ११॥
नाम्भसां कमलशोभिनां तथा शाखिनां च न परिश्रमच्छिदाम्।
दर्शनेन लघुना यथा तयोः प्रीतिमापुरुभयोस्तपस्विनः॥ १२॥
स्थाणुदग्धवपुषस्तपोवनं प्राप्य दाशरथिरात्तकार्मुकः।
विग्रहेण मदनस्य चारुणा सोऽभवत्प्रतिनिधिर्न कर्मणा॥ १३॥
तौ सुकेतुसुतया खिलीकृते कौशिकाद्विदितशापया पथि।
निन्यतुः स्थलनिवेशिताटनी लीलयैव धनुषी अधिज्यताम्॥ १४॥
ज्यानिनादमथ गृह्णती तयोः प्रादुरास बहुलक्षपाच्छविः।
ताडका चलकपालकुण्डला कालिकेव निबिडा बलाकिनी॥ १५॥
तीव्रवेगधुतमार्गवृक्षया प्रेतचीवरवसा स्वनोग्रया।
अभ्यभावि भरताग्रजस्तया वात्ययेव पितृकाननोत्थया॥ १६॥

राजकुमारों का चुलबुलापन ऐसा सुन्दर लग रहा था, जैसे वर्षा ऋतु में दो उद्धच और भिद्य नदियाँ लहराती, इठलाती और तटों को ढाती हुई बहती चली जा रही हों॥ ७–८॥ अब तक उन बालकों ने कभी घर से बाहर पैर नहीं रखा था। अतएव विश्वामित्रजी ने मार्ग में ही उन्हें बला और अतिबला नाम की दोनों विद्याएँ सिखा दीं। जिससे ऊबड़-खाबड़ वन्य मार्ग में चलते समय उन्हें वैसा ही सुख हो रहा था, जैसे वे अपने मणिजटित भवनों में अपनी माता के आस-पास घूम रहे हों॥ ९॥ जो राम और लक्ष्मण सदा दिव्य रथों पर चढ़कर चलते थे, उन्हें पैदल चलने में तनिक भी थकावट नहीं हुई। क्योंकि उनके पिता के मित्र विश्वामित्रजी उन्हें मार्ग में अनेक पुरानी कथाएँ सुनाते चलते थे॥ १०॥ मार्ग के सरोवरों ने अपना मीठा जल पिलाकर, पक्षियों ने मधुर गीत सुनाकर, वायु ने सुगन्धित पराग फैलाकर और बादलों ने शीतल छाया देकर उन दोनों की बहुत बडी सेवा की॥ ११॥ कमलों से भरे सरोवरों तथा थकावट हरने वाले वृक्षों की छाया को देख करके भी आश्रम के तपस्वी उतने हर्षित कभी नहीं हुए थे, जितने इन दोनों राजकुमारों को देखकर हर्षित हुए॥ १२॥ शिवजी ने जिस तपोवन में कामदेव को भस्म किया था, वहाँ सुन्दर शरीर वाले राम धनुष लिये हुए जब पहुँचे, तब ऐसा लगा कि जैसे वे वहाँ कामदेव की केवल सुन्दरता के प्रतिनिधि बनकर आये हों, उसके कार्यों के प्रतिनिधि नहीं॥ १३॥ मार्ग में उन्हें सुकेतु की कन्या वह ताडका राक्षसी मिली, जिसने सारा मार्ग उजाड़ बना डाला था और विश्वामित्र ने जिसके शाप की कथा पहले ही राम को सुना दी थी। उसे देखा तो उन दोनों भाइयों ने अपने धनुषों को पृथ्वी पर टेक कर प्रत्यंचा चढा ली॥ १४॥ उनके धनुष की प्रत्यंचा की टंकार सुनते ही कानों में लटकती हुई मनुष्य की खोपड़ियों का कुण्डल हिलाती हुई और अमावास्या की रात्रि के समान काली-कलूटी ताड़का उनके समक्ष आकर इस तरह खड़ी हो गयी, जैसे बगुलों की पाँतों से भरी काली बदली छा गयी हो॥ १५॥ बड़े वेग से मार्ग के वृक्षों को ढाती, प्रेतों के वस्त्र पहने, भयंकर गर्जन करने वाली तथा श्मशान से उठे हुए बवंडर के समान आकृति वाली ताडका राम पर सहसा टूट पडी॥ १६॥ वृक्ष की शाखा जैसी अपनी बाँह उठाये और कमर में आँतों की करधनी

उद्यतैकभुजयष्टिमायतीं श्रोणिलम्बिपुरुषान्त्रमेखलाम्।
तां विलोक्य वनितावधे घृणां पत्त्रिणा सह मुमोच राघवः॥ १७॥
यच्चकार विवरं शिलाघने ताडकोरसि स रामसायकः।
अप्रविष्टविषयस्य रक्षसां द्वारतामगमदन्तकस्य तत्॥ १८॥
बाणभिन्नहृदया निपेतुषी सा स्वकाननभुवं न केवलाम्।
विष्टपत्रयपराजयस्थिरां रावणश्रियमपि व्यकम्पयत्॥ १९॥
राममन्मथशरेण ताडिता दुःसहेन हृदये निशाचरी।
गन्धवद्रुधिरचन्दनोक्षिता जीवितेशवसतिं जगाम सा॥ २०॥
नैर्ऋतघ्नमथ मन्त्रवन्मुनेः प्रापदस्त्रमवदानतोषितात्।
ज्योतिरिन्धननिपाति भास्करात्सूर्यकान्त इव ताडकान्तकः॥ २१॥
वामनाश्रमपदं ततः परं पावनं श्रुतमृषेरुपेयिवान्।
उन्मनाः प्रथमजन्मचेष्टितान्यस्मरन्नपि बभूव राघवः॥ २२॥
आससाद मुनिरात्मनस्ततः शिष्यवर्गपरिकल्पितार्हणम्।
बद्धपल्लवपुटाञ्जलिद्रुमं दर्शनोन्मुखमृगं तपोवनम्॥ २३॥
तत्र दीक्षितमृषिं ररक्षतुर्विघ्नतो दशरथात्मजौ शरैः।
लोकमन्धतमसात्क्रमोदितौ रश्मिभिः शशिदिवाकराविव॥ २४॥
वीक्ष्य वेदिमथ रक्तबिन्दुभिर्बन्धुजीवपृथुभिः प्रदूषिताम्।
सम्भ्रमोऽभवदपोढकर्मणामृत्विजां च्युतविकङ्कतसुचाम्॥ २५॥

पहने उस ताड़का को देखकर राम ने स्त्री को मारने की घृणा और अपना बाण दोनों एक साथ छोड़ दिया॥ १७॥ राम के उस बाण ने पत्थर की चट्टान जैसी कठोर ताडका की छाती में जो छेद किया, वह, मानो राक्षसों के उस देश में यमराज को प्रविष्ट होने के लिए द्वार खोल दिया, जहाँ अभी वे जा नहीं सके थे॥ १८॥ रामबाण के आघात मे ताडका की छाती फट गयी और वह जब नीचे गिरी, तब उसके गिरने से वह जङ्गल ही नहीं, बल्कि तीनों लोकों को जीतकर प्राप्त रावण की राजलक्ष्मी भी काँप उठी॥ १९॥ राम के बाण से बिंधकर दुर्गन्धित रुधिर से लिपटी ताड़का इस प्रकार सीधे यमलोक चली गयी, जैसे काम के बाण से घायल कोई अभिसारिका चन्दन का लेप करके अपने प्रेमी के घर जा पहुँची हो॥ २०॥ सूर्य जैसे लकड़ी जलाने का तेज सूर्यकान्त मणि को दे देता है, वैसे ही ताड़का के मरने से प्रसन्न महर्षि विश्वामित्र ने राक्षसों का संहार करने वाला मंत्रसहित दिव्य अस्त्र राम को दे दिया॥ २१॥ वहाँ से चलकर रामचन्द्र भगवान् वामन के उस पवित्र आश्रम में गये, जिसके विषय में विश्वामित्रजी ने उन्हें पहले ही सब बता दिया था। वहाँ अपने पूर्वजन्म के वामनावतार की लीलाओं का ठीक-ठीक स्मरण न होने पर भी वे कुछ उत्कंठित जैसे हो उठे॥ २२॥ वहाँ से विश्वामित्र अपने आश्रम पहुँचे, जहाँ शिष्यों ने पूजा की सब सामग्री इकट्ठी कर रखी थी। वहाँ के वृक्ष पत्तों की अञ्जली बाँधे खड़े थे और मृग बड़ी उत्सुकता से उन्हें निहार रहे थे॥ २३॥ सूर्य और चन्द्रमा जैसे बारी-बारी से अपनी किरणों द्वारा पृथ्वी का अँधेरा दूर करते हैं, वैसे ही आश्रम में राम और लक्ष्मण बारी-बारी से यज्ञ करने वाले ऋषि विश्वामित्र के विघ्नों को दूर कर रहे थे॥ २४॥ उसी समय यज्ञ की वेदी पर दुपहिया के फूल के जैसी बड़ी-बडी रक्त की बूँदें देखकर ऋषियों को बडा आश्चर्य हुआ। उन्होंने यज्ञ बन्द करके अपने-अपने खैर के स्रुवे धरती पर रख दिये॥ २५॥ तत्काल राम ने अपने तूणीर से बाण निकाला और ऊपर मुँह करके आकाश की ओर देखा तो गिद्ध के पंखों की वायु से हिलती हुई

उन्मुखः सपदि लक्ष्मणाग्रजो बाणमाश्रयमुखात्समुद्धरन्।
रक्षसां बलमपश्यदम्बरे गृध्रपक्षपवनेरितध्वजम्॥ २६॥
तत्र यावधिपती मखद्विषां तौ शरव्यमकरोत्स नेतरान्।
किं महोरगविसर्पिविक्रमो राजिलेषु गरुडः प्रवर्तते॥ २७॥
सोऽस्त्रमुग्रजवमस्त्रकोविदः सन्दधे धनुषि वायुदैवतम्।
तेन शैलगुरुमप्यपातयत् पाण्डुपत्रमिव ताडकासुतम्॥ २८॥
यः सुबाहुरिति राक्षसोऽपरस्तत्र तत्र विससर्प मायया।
तं क्षुरप्रशकलीकृतं कृती पत्त्रिणां व्यभुजदाश्रमाद्बहिः॥ २९॥
इत्यपास्तमखविघ्नयोस्तयोः सांयुगीनमभिनन्द्य विक्रमम्।
ऋत्विजः कुलपतेर्यथाक्रमं वाग्यतस्य निरवर्तयन्क्रियाः॥ ३०॥
तौ प्रणाममचलकाकपक्षकौ भ्रातराववभृथाप्लुतो मुनिः।
आशिषामनुपदं समस्पृशद् दर्भपाटिततलेन पाणिना॥ ३१॥
तं न्यमन्त्रयत सम्भृतक्रतुर्मैथिलः स मिथिलां व्रजन्वशी।
राघवावपि निनाय बिभ्रतौ तद्धनुःश्रवणजं कुतूहलम्॥ ३२॥
तैः शिवेषु वसतिर्गताध्वभिः सायमाश्रमतरुष्वगृह्यत।
येषु दीर्घतपसः परिग्रहो वासवक्षणकलत्रतां ययौ॥ ३३॥
प्रत्यपद्यत चिराय यत्पुनश्चारु गौतमवधूः शिलामयी।
स्वं वपुः स किल किल्बिषच्छिदां रामपांसुरजसामनुग्रहः॥ ३४॥

ध्वजाओं वाली राक्षसों की सेना खड़ी दिखलायी दी॥ २६॥ तब राम ने और सबको छोड़कर उन्हीं दो राक्षसों को बाण मारे, जो उस सेना के सेनापति थे और यज्ञ मे घृणा करते थे। बड़े-बड़े सर्पो पर आक्रमण करने वाला गरुड़ क्या कभी जल के छोटे-छोटे साँपों पर आक्रमण करता है?॥ २७॥ दिव्य अस्त्रों को चलाने में राम का हाथ ऐसा सधा हुआ था कि उन्होंने तुरन्त अपने धनुष पर वायव्य अस्त्र चढाया और पर्वत से भी बड़े ताड़का के पुत्र मारीच को उस बाण से इस तरह उड़ा दिया, जैसे कोई सूखा पत्ता उडा दे॥ २८॥ सुबाहु नाम का दूसरा राक्षस अपनी माया से इधर-उधर घूम रहा था। उसे राम ने अपने बाणों से टुकड़े-टुकड़े करके आश्रम के बाहर फेंक दिया, जिसे पक्षियों ने आपस में बाँटकर खा लिया॥ २९॥ यज्ञ करने वाले ऋषियों ने जब देखा कि थोडे ही समय में राम ने सारे विघ्न दूर कर दिये तो उन्होंने राम और लक्ष्मण के पराक्रम की भूरि-भूरि प्रशंसा की और मौन धारण किये हुए महामुनि विश्वामित्र ने विधिवत् अपना यज्ञ सम्पन्न कर लिया॥ ३०॥ यज्ञ समाप्त हो जाने पर अवभृथ स्नान करके महर्षि विश्वामित्र ने उन राम और लक्ष्मण को बहुत बड़ा आशीर्वाद दिया, जिनके बालों की लटें प्रणाम करते समय हिल रही थीं। कुशा से छिली हुई अपनी हथेली उनके सिर पर रखकर ऋषि ने अपना स्नेह दिखलाया॥ ३१॥ उन्हीं दिनों मिथिलेश जनक ने धनुषयज्ञ का आयोजन कर रखा था। उसमें उन्होंने मुनियों को भी आमंत्रित किया। धनुषयज्ञ की बात सुनकर दोनों राजकुमारों को बड़ा कुतूहल हुआ। अतएव विश्वामित्रजी उन दोनों को साथ लेकर मिथिलापुरी की ओर चल पडे॥ ३२॥ वे कुछ ही दूर चले थे कि साँझ हो गयी, जिससे वे उस आश्रम के सुन्दर वृक्षों के नीचे टिक गये, जहाँ महान् तपस्वी गौतम की स्त्री अहल्या थोड़ी देर के लिए इन्द्र की पत्नी बन गयी थी॥ ३३॥ राम के चरणों की धूल सब पापों को हरने वाली थी। इसलिए उसके छूते ही पति के शाप से पत्थर बनी हुई अहल्या को इतने दिनों बाद फिर वही पहले वाला सुन्दर शरीर प्राप्त हो गया॥ ३४॥

राघवान्वितमुपस्थितं मुनिं तं निशम्य जनको जनेश्वरः।
अर्थकामसहितं सपर्यया देहवद्धमिव धर्ममभ्यगात्॥ ३५॥
तौ विदेहनगरीनिवासिनां गां गताविव दिवः पुनर्वसू।
मन्यते स्म पिवतां विलोचनैः पक्ष्मपातमपि वञ्चनां मनः॥ ३६॥
यूपवत्यवसिते क्रियाविधौ कालवित्कुशिकवंशवर्धनः।
राममिष्वसनदर्शनोत्सुकं मैथिलाय कथयाम्बभूव सः॥ ३७॥
तस्य वीक्ष्य ललितं वपुः शिशोः पार्थिवः प्रथितवंशजन्मनः।
स्वं विचिन्त्य च धनुर्दुरानमं पीडितो दुहितृशुल्कसंस्थया॥ ३८॥
अब्रवीच्च भगवन्मतङ्गजैर्यद्बृहद्भिरपि कर्म दुष्करम्।
तत्र नाहमनुमन्तुमुत्सहे मोघवृत्ति कलभस्य चेष्टितम्॥ ३९॥
क्ष्वेपिता हि बहवो नरेश्वरास्तेन तात! धनुषा धनुर्भृतः।
ज्यानिघातकठिनत्वचो भुजान्स्वान्विधूय धिगिति प्रतस्थिरे॥ ४०॥
प्रत्युवाच तमृषिर्निशम्यतां सारतोऽयमथवा गिरा कृतम्।
चाप एव भवतो भविष्यति व्यक्तशक्तिरशनिर्गिराविव॥ ४१॥
एवमाप्तवचनात् स पौरुषं काकपक्षकधरेऽपि राघवे।
श्रद्दधे त्रिदशगोपमात्रके दाहशक्तिमिव कृष्णवर्त्मनि॥ ४२॥
व्यादिदेश गणशोऽथ पार्श्वगान्कार्मुकाभिहरणाय मैथिलः।
तैजसस्य धनुषः प्रवृत्तये तोयदानिव सहस्रलोचनः॥ ४३॥

राजा जनक को जब यह समाचार मिला कि विश्वामित्रजी के साथ राम और लक्ष्मण भी आये हुए हैं, तब वे पूजा की सामग्री लेकर उनकी अगवानी करने चले। जनकजी को वे दोनों भाई ऐसे लगे, मानो मूर्तिमान् धर्म के साथ अर्थ और काम भी चले आये हों॥ ३५॥ वे दोनों राजकुमार ऐसे सुन्दर लग रहे थे, जैसे दो पुनर्वसु नक्षत्र पृथ्वी पर उतर आये हों। जनकपुर के निवासी तो ऐसे मगन होकर अपनी आँखों से उनका रूपामृत पी रहे थे कि पलकों का गिरना भी उन्हें बहुत अखर रहा था॥ ३६॥ धनुषयज्ञ की यज्ञसम्बन्धी सब क्रियाएँ जब समाप्त हो गयीं, तब ठीक अवसर समझकर मुनि विश्वामित्र ने जनक से कहा कि राम भी वह धनुष देखना चाहते हैं॥ ३७॥ किन्तु जनक ने जब एक ओर प्रसिद्ध वंश में उत्पन्न बालक राम का कोमल शरीर देखा और दूसरी ओर अपने उस धनुष पर दृष्टि डाली, जिसे बड़े-बड़े वीर भी नहीं झुका सके थे, तब उन्हें इस बात का बड़ा पछतावा हुआ कि मैंने अपनी कन्या के विवाह के निमित्त यह धनुष तोडने की प्रतिज्ञा क्यों की॥ ३८॥ उन्होंने विश्वामित्रजी से कहा—भगवन्! बडे-बडे मतवाले गजराज जो काम नहीं कर सकते, उसे हाथी के बच्चे से कराना व्यर्थ की बात है। अतएव मेरा मन तो नहीं चाहता कि इनसे धनुष उठवाया जाय॥ ३९॥ इस धनुष को उठाने में बडे-बड़े धनुर्धारी राजा भी लजाकर रह गये और अपनी उन भुजाओं को धिक्कारते हुए चले गये, जिन पर धनुष की डोरी के बडे-बडे घट्ठे पड़े हुए थे॥ ४०॥ यह सुनकर मुनि बोले—राजन्! इनकी शक्ति मैं आपको बतलाऊँगा, परन्तु कहने से क्या होता है। जैसे वज्र की शक्ति की परीक्षा पहाड़ पर होती है, वैसे ही इनकी शक्ति की परीक्षा उस धनुष पर ही हो लेने दी जाय॥ ४१॥ मुनि के कथन से जनकजी को कुछ-कुछ विश्वास हो चला कि जैसे वीरबहूटी के बराबर छोटी-सी चिनगारी में भी जलाने की महती शक्ति छिपी रहती है, वैसे ही काकपक्षधारी राम में भी धनुष उठाने की शक्ति हो सकती है॥ ४२॥ अतएव जनकजी ने उसी प्रकार अपने सेवकों को धनुष लाने की आज्ञा

तत्प्रसुप्तभुजगेन्द्रभीषणं वीक्ष्य दाशरथिराददे धनुः।
विद्रुतक्रतुमृगानुसारिणं येन बाणमसृजद् वृषध्वजः॥ ४४॥
आततज्यमकरोत् स संसदा विस्मयस्तिमितनेत्रमीक्षितः।
शैलसारमपि नातियत्नतः पुष्पचापमिव पेशलं स्मरः॥ ४५॥
भज्यमानमतिमात्रकर्षणात् तेन वज्रपरुषस्वनं धनुः।
भार्गवाय दृढमन्यवे पुनः क्षत्रमुद्यतमिव न्यवेदयत्॥ ४६॥
दृष्टसारमथ रुद्रकार्मुके वीर्यशुल्कमभिनन्द्य मैथिलः।
राघवाय तनयामयोनिजां रूपिणीं श्रियमिव न्यवेदयत्॥ ४७॥
मैथिलः सपदि सत्यसङ्गरो राघवाय तनयामयोनिजाम्।
सन्निधौ द्युतिमतस्तपोनिधेरग्निसाक्षिक इवातिसृष्टवान्॥ ४८॥
प्राहिणोच्च महितं महाद्युतिः कोसलाधिपतये पुरोधसम्।
भृत्यभावि दुहितुः परिग्रहाद्दिश्यतां कुलमिदं निमेरिति॥ ४९॥
अन्वियेष सदृशीं स च स्नुषां प्राप चैनमनुकूलवाग्द्विजः।
सद्य एव सुकृतां हि पच्यते कल्पवृक्षफलधर्मि काङ्क्षितम्॥ ५०॥
तस्य कल्पितपुरस्क्रियाविधेः शुश्रुवान् वचनमग्रजन्मनः।
उच्चचाल बलभित्सखो वशी सैन्यरेणुमुषितार्कदीधितिः॥ ५१॥
आससाद मिथिलां स वेष्टयन्पीडितोपवनपादपां बलैः।
प्रीतिरोधमसहिष्ट सा पुरी स्त्रीव कान्तपरिभोगमायतम्॥ ५२॥

दी, जैसे देवराज इन्द्र बादलों को अपना धनुष प्रकट करने की आज्ञा देते हैं॥ ४३॥ तदनुसार धनुष लाया गया। वह ऐसा दीखता था कि मानो कोई बड़ा भारी अजगर सोया हुआ हो। राम ने देखते-देखते उस शिवधनुष को उठा लिया, जिसे हाथों में लेकर शङ्करजी ने मृग का रूप धरकर भागने वाले यज्ञदेवता के ऊपर बाण बरसाये थे॥ ४४॥ यह देखकर सभी सभासदों को बड़ा आश्चर्य हुआ कि राम ने इस पर्वत जैसे विशाल धनुष पर वैसी ही सरलता से डोरी चढ़ा दी, जैसे कामदेव अपने फूलों के धनुष पर डोरी चढाता है॥ ४५॥ तदनन्तर राम ने धनुष को इतनी जोर से तानां कि वह वज्र के समान भयङ्कर शब्द करके कड़कड़ाता हुआ टूट गया। ऐसा करके जैसे उसने महाक्रोधी परशुराम को यह सूचना दे दी कि क्षत्रिय लोग अब फिर सिर उठाने लगे हैं॥ ४६॥ जब राजा जनक ने देखा कि धनुष तोड़कर राम ने अपना पराक्रम दिखला दिया है, तब उन्होंने उनका बड़ा आदर किया और पृथ्वी से उत्पन्न अपनी कन्या जानकी उसी प्रकार राम के हाथों सौंप दी, मानो साक्षात् अपनी राज्यलक्ष्मी ही उन्हें दे डाली हो॥ ४७॥ अपनी प्रतिज्ञा सत्य करने वाले जनक ने विश्वामित्रजी को ही विवाह का साक्षी अग्नि समझ लिया और उन्हीं के आगे राम को सीता समर्पित कर दी॥ ४८॥ तब राजा जनक ने अपने पूज्य पुरोहित द्वारा दशरथजी के पास यह सन्देश भेजा कि मेरी पुत्री सीता को स्वीकार करके आप इस निमि-कुल पर वैसी ही कृपा कीजिये, जैसे अपने सेवकों पर कृपा करते हैं॥ ४९॥ उधर राजा दशरथ यह सोच ही रहे थे कि योग्य पतोहू मेरे घर में आये। इतने में ही जनकजी के पुरोहित उनकी इच्छा पूर्ण होने का समाचार लेकर जा पहुँचे। ठीक ही है, पुण्यवानों की अभिलाषा कल्पवृक्ष के समान तत्काल फल देती है॥ ५०॥ इन्द्र के मित्र और जितेन्द्रिय दशरथ ने जनक के पुरोहित का बड़ा सत्कार किया। उनकी बातें सुनकर वे अपने साथ इतनी बड़ी सेना लेकर चले कि उससे उठी हुई धूल ने सूर्य को भी ढँक दिया॥ ५१॥ वे ऐसे ठाट-बाट से मिथिला पहुँचे कि मानो उसे घेरते हुए आये हों। मिथिला

तौ समेत्य समये स्थितावुभौ भूपती वरुणवासवोपमौ।
कन्यकातनयकौतुकक्रियां स्वप्रभावसदृशीं वितेनतुः॥५३॥
पार्थिवीमुदवहद् रघूद्वहो लक्ष्मणस्तदनुजामथोर्मिलाम्।
यौ तयोरवरजौ वरौजसौ तौ कुशध्वजसुते सुमध्यमे॥५४॥
ते चतुर्थसहितास्त्रयो बभुः सूनवो नववधूपरिग्रहाः।
सामदानविधिभेदनिग्रहाः सिद्धिमन्त इव तस्य भूपतेः॥५५॥
ता नराधिपसुता नृपात्मजैस्ते च ताभिरगमन्कृतार्थताम्।
सोऽभवद् वरवधूसमागमः प्रत्ययप्रकृतियोगसन्निभः॥५६॥
एवमात्तरतिरात्मसम्भवांस्तान्निवेश्य चतुरोऽपि तत्र सः।
अध्वसु त्रिषु विसृष्टमैथिलः स्वां पुरीं दशरथो न्यवर्तत॥५७॥
तस्य जातु मरुतः प्रतीपगा वर्त्मसु ध्वजतरुप्रमाथिनः।
चिक्लिशुर्भृशतया वरूथिनीमुत्तटा इव नदीरयाः स्थलीम्॥५८॥
लक्ष्यते स्म तदनन्तरं रविर्बद्धभीमपरिवेषमण्डलः।
वैनतेयशमितस्य भोगिनो भोगवेष्टित इव च्युतो मणिः॥५९॥
श्येनपक्षपरिधूसरालकाः सान्ध्यमेघरुधिरार्द्रवाससः।
अङ्गना इव रजस्वला दिशो नो बभूवुरवलोकनक्षमाः॥६०॥
भास्करश्च दिशमध्युवास यां तां श्रिताः प्रतिभयं ववासिरे।
क्षत्त्रशोणितपितृक्रियोचितं चोदयन्त्य इव भार्गवं शिवाः॥६१॥

के उपवनों को तो उनकी सेना ने रौंद ही डाला। परन्तु इस प्रेम के घेरे को उस नगरी ने वैसे ही सह लिया, जैसे स्त्री अपने प्रियतम के कठोर सम्भोग को सह लेती है॥५२॥ तदनन्तर वरुण और इन्द्र के समान प्रतापी उन दोनों राजाओं ने मिलकर शास्त्रीय विधि से ऐश्वर्य के अनुरूप अपने-अपने पुत्रों और कन्याओं का विवाह सम्पन्न कर दिया॥५३॥ राम का सीता से और लक्ष्मण का सीता की छोटी बहन उर्मिला से विवाह हुआ। जनकजी के छोटे भाई कुशध्वज की माण्डवी और श्रुतकीर्ति नाम की कन्याओं से भरत और शत्रुघ्न का विवाह हो गया॥५४॥ वे चारों भाई उन नयी बहुओं के साथ ऐसे सुशोभित हुए, जैसे राजा दशरथ को साम, दाम, दण्ड और भेद— इन चारों उपायों की सिद्धियाँ मिल गयी हों॥५५॥ उन चारों राजकुमारों को पाकर राजकन्याएँ और राजकन्याओं को पाकर वे राजकुमार निहाल हो गये। वरों और वधुओं का वह मिलन ऐसा जँचा कि जैसे शब्द के मूलरूप में प्रत्यय जुड़ गये हों॥५६॥ इस प्रकार महाराज दशरथ ने चारों बेटों का विवाह करके मार्ग में तीन पड़ाव आगे पहुँच कर वहाँ से जनकजी को लौटा दिया और स्वयं बड़े प्रसन्न मन से अयोध्या की ओर चल पडे॥५७॥ बढ़ी हुई नदी की धारा जैसे आस-पास की भूमि को उजाड देती है, वैसे ही एक दिन मार्ग में सेना के ध्वजारूपी वृक्षों को झकझोर देने वाली वायु ने सारी सेना को बहुत क्लेश दिया॥५८॥ तदनन्तर सूर्य के चारों ओर एक बडा भारी मण्डल बन गया। वह ऐसा लगने लगा कि जैसे गरुड़ द्वारा मारा हुआ कोई साँप अपने सिर से गिरे हुए मणि के चारों ओर कुण्डली मारकर बैठा हुआ हो॥५९॥ जैसे रूखे और मैले बालों तथा रक्त से लाल कपडों वाली रजस्वला स्त्री देखने में अच्छी नहीं लगती, उसी प्रकार उस समय वे चारों दिशाएँ भी आँखों को अच्छी नहीं लग रही थीं, जिनमें मटमैले बाजों के पंख उड़ रहे थे और सन्ध्या के लाल बादल छाये हुए थे॥६०॥ महसा सूर्य की ओर मुख करके सियारिनें रोने लगीं। जैसे वे क्षत्रियों के रक्त से अपने पिता का तर्पण करनेवाले परशुराम को पुकार रही हों॥६१॥

तत्प्रतीपपवनादि वैकृतं प्रेक्ष्य शान्तिमधिकृत्य कृत्यवित्।
अन्वयुङ्क्त गुरुमीश्वरः क्षितेः स्वान्तमित्यलघयत्स तद्दृयाम्॥ ६२॥
तेजसः सपदि राशिरुत्थितः प्रादुरास्त किल वाहिनीमुखे।
यः प्रमृज्य नयनानि सैनिकैर्लक्षणीयपुरुषाकृतिश्चिरात्॥ ६३॥
पित्र्यमंशनुपवीतलक्षणं मातृकं च धनुरूर्जितं दधत्।
यः सलोम इव घर्मदीधितिः सट्टिजिह्व इव चन्दनद्रुमः॥ ६४॥
येन रोषपरुषात्मनः पितुः शासने स्थितिभिदोऽपि तस्थुषा।
वेपमानजननीशिरश्छिदा प्राग्जीयत घृणा ततो महो॥ ६५॥
अक्षबीजवलयेन निर्बभौ दक्षिणश्रवणसंस्थितेन यः।
क्षत्रियान्तकरणैकविंशतेर्व्याजपूर्वगणनामिवोद्वहन्॥ ६६॥
तं पितुर्वधभवेन मन्युना राजवंशनिधनाय दीक्षितम्।
बालसूनुरवलोक्य भार्गवं स्वां दशां च विषसाद पार्थिवः॥ ६७॥
नाम राम इति तुल्यमात्मजे वर्तमानमहिते च दारुणे।
हृद्यमस्य भयदायि चाभवद् रत्नजातमिव हारसर्पयोः॥ ६८॥
अर्घ्यमर्घ्यमिति वादिनं नृपं सोऽनवेक्ष्य भरताग्रजो यतः।
क्षत्रकोपदहनार्चिषं ततः सन्दधे दृशमुदग्रतारकाम्॥ ६९॥
तेन कार्मुकनिषक्तमुष्टिना राघवो विगतभीः पुरोगतः।
अङ्गुलीविवरचारिणं शरं कुर्वता निजगदे युयुत्सुना॥ ७०॥

विपरीत वायु आदि अशकुन देखकर उनकी शान्ति के लिए दशरथजी ने अपने गुरु से पूछा—"अब क्या करना चाहिए?" गुरुजी ने कहा—"चिन्ता की कोई बात नहीं है। इनका फल अच्छा ही होगा।" यह सुनकर दशरथजी के मन को कुछ ढाढ़स बँधा॥ ६२॥ उसी समय सहसा एक ऐसा प्रकाशपुञ्ज सेना के आगे उठता दिखलाई दिया, जिसे देखकर सब सैनिकों की आँखें चौंधिया गयीं। जब उन्होंने आँखें मलकर देखा, तब वह प्रकाशपुञ्ज एक पुरुष के रूप में परिवर्तित दीखा॥ ६३॥ उस तेजस्वी पुरुष के शरीर पर ब्राह्मण पिता के अंग का सूचक यज्ञोपवीत और कन्धे पर क्षत्रिय माता का अंगसूचक धनुष लटका हुआ था। इस वेश में वह ऐसा लगता था कि जैसे सूर्य के साथ चन्द्रमा हो या चन्दन के पेड़ में साँप लिपटे हों॥ ६४॥ उन्होंने जब क्रोध से कठोरहृदय और उचित-अनुचित का विचार छोड़ देने वाले पिता की आज्ञा मानकर अपनी काँपती हुई माता का सिर काट लिया था, उस समय उन्होंने पहले घृणा को जीता और फिर सम्पूर्ण पृथ्वी जीत ली॥ ६५॥ उनके दाहिने कान पर इक्कीस दाने की रुद्राक्ष की माला लटक रही थी। जैसे इक्कीस बार क्षत्रियों के विनाश को गिनती करने के लिए ही उन्होंने वह माला पहन ली हो॥ ६६॥ दशरथजी ने जब उन परशुराम को देखा, जिन्होंने अपने पिता के मारे जाने पर क्रोध से क्षत्रियों का नाश करने की प्रतिज्ञा कर ली थी, तब उन्हें अपनी दशा देखकर बड़ी चिन्ता हुई। क्योंकि उनके पुत्र अभी निरे बच्चे ही थे॥ ६७॥ उनके पुत्र राम और परशुराम दोनों में राम नाम विद्यमान था। इसलिए जैसे गले के हार और सर्प दोनों में रहने वाला मणि आनन्द भी देता है और भय भी, वैसे ही अपने पुत्र और परशुराम दोनों में आये हुए राम नाम से उन्हें भय भी हुआ और आनन्द भी॥ ६८॥ यद्यपि दशरथजी कहते ही रह गये कि आपके सत्कार के लिए यह अर्घ्य है, किन्तु परशुरामजी ने उधर ध्यान न देकर क्षत्रियों को जलाने वाली अपनी टेढ़ी नजर से राम को देखा॥ ६९॥ युद्ध के लिए उद्यत और मुट्ठी में धनुष पकड़कर उँगलियों में बाण नचाते हुए परशुरामजी

क्षत्त्रजातमपकारवैरि मे तन्निहत्य बहुशः शमं गतः।
सुप्तसर्प इव दण्डघट्टनाद्रोषितोऽस्मि तव विक्रमश्रवात्॥७१॥
मैथिलस्य धनुरन्यपार्थिवैस्त्वं किलानमितपूर्वमक्षणोः।
तन्निशम्य भवता समर्थये वीर्यशृङ्गमिव भग्नमात्मनः॥७२॥
अन्यदा जगति राम इत्ययं शब्द उच्चरित एव मामगात्।
व्रीडमावहति मे स सम्प्रति व्यस्तवृत्तिरुदयोन्मुखे त्वयि॥७३॥
बिभ्रतोऽस्त्रमचलेऽप्यकुण्ठितं द्वौ रिपू मम मतौ समागसौ।
धेनुवत्सहरणाच्च हैहयस्त्वं च कीर्तिमपहर्तुमुद्यतः॥७४॥
क्षत्त्रियान्तकरणोऽपि विक्रमस्तेन मामवति नाजिते त्वयि।
पावकस्य महिमा स गण्यते कक्षवज्ज्वलति सागरेऽपि यः॥७५॥
विद्धि चात्तबलमोजसा हरेरैश्वरं धनुरभाजि यत्त्वया।
खातमूलमनिलो नदीरयैः पातयत्यपि मृदुस्तटद्रुमम्॥७६॥
तन्मदीयमिदमायुधं ज्यया सङ्गमय्य सशरं विकृष्यताम्।
तिष्ठतु प्रधनमेवमप्यहं तुल्यबाहुतरसा जितस्त्वया॥७७॥
कातरोऽसि यदि वोद्गतार्चिषा तर्जितः परशुधारया मम।
ज्यानिघातकठिनाङ्गुलिर्वृथा वध्यतामभययाचनाञ्जलिः॥७८॥

ने अपने आगे निडर खडे राम से कहा—॥७०॥ मेरे पिता का वध करके क्षत्रियों ने मुझसे शत्रुता मोल ले ली है। उन्हें बहुत बार मारकर मुझे कुछ शान्ति मिली थी। परन्तु जैसे डंडे से छेड देने पर साँप फुफकार उठता है, वैसे ही तुम्हारे पराक्रम का हाल सुनकर मेरे शरीर में क्रोध की आग भड़क उठी है॥७१॥ राजा जनक के जिस धनुष को कोई राजा झुका भी नहीं सका था, उसी को तुमने तोड़ डाला है। यह सुनकर मैंने यही समझा है कि आज तक जो मैं सबसे बढकर बलवान् समझा जाता था, वह मेरा यश आज नष्ट हो गया॥७२॥ संसार में पहले राम कहने से लोग मुझे ही समझते थे, परन्तु ज्यों-ज्यों तुम ऊँचे चढते चले जा रहे हो, त्यों-त्यों वह अर्थ तुम्हारे नाम के साथ लगता चला जा रहा है। यह देखकर मुझे लज्जा आने लगी है॥७३॥ जिस परशुराम के अस्त्र पहाड़ों से टकरा करके भी कुण्ठित नहीं होते, उसके दो ही शत्रु आज तक समान अपराधी हुए हैं। उनमें से पहला तो था सहस्रबाहु, जो मेरे पिता से कामधेनु का बछडा छीन ले गया था और दूसरे तुम हो, जो मेरी कीर्ति छीनने को उद्यत हो॥७४॥ अतः क्षत्रियों को नष्ट करने वाला मेरा पराक्रम तब तक मुझे अच्छा नहीं लगेगा, जब तक मैं तुम्हें न जीत लूँ। क्योंकि आग का प्रताप तभी सराहनीय होता है, जब वह समुद्र में भी वैसे ही भडककर जले, जैसे सूखी घास के ढेर में जलती है॥७५॥ और फिर शिवजी के जिस धनुष को तोड़कर तुम इतरा रहे हो, उसकी कठोरता तो भगवान् विष्णु ने पहले ही हर ली थी, उसे तोड़कर तुमने कोई वीरता नहीं की है। क्योंकि जिस वृक्ष की जड़ नदी की प्रचण्ड धारा ने पहले ही खोखली कर दी हो, वह तो वायु के तनिक-से झोंके में ही ढह जाता है॥७६॥ देखो राम! युद्ध तो बाद में होगा, पहले तुम मेरे धनुष पर डोरी चढा तथा बाण रखकर इसे खींचो। यदि तुम इतना भी कर लोगे तो मैं समझूँगा कि तुम मेरे ही समान बलवान् हो। बस, मैं इतने से ही हार मान लूँगा॥७७॥ और यदि तुम मेरे फरसे की चमकती हुई धार को देखकर डर गये होओ तो अपने उन हाथों को जोड़कर मुझसे अभय की भीख माँगो, जिनकी उँगलियों में धनुष की डोरी चढ़ाने से व्यर्थ घट्ठे पड़े हुए हैं॥७८॥ भयङ्कर वेश वाले परशुरामजी ने जब यह कहा तो राम ने हँसते-हँसते

एवमुक्तवति भीमदर्शने भार्गवे स्मितविकम्पिताधरः।
तद्धनुर्ग्रहणमेव राघवः प्रत्यपद्यत समर्थमुत्तरम्॥ ७९॥
पूर्वजन्मधनुषा समागतः सोऽतिमात्रलघुदर्शनोऽभवत्।
केवलोऽपि सुभगो नवाम्बुदः किं पुनस्त्रिदशचापलाञ्छितः॥ ८०॥
तेन भूमिनिहितैककोटि तत्कार्मुकं च बलिनाऽधिरोपितम्।
निष्प्रभश्च रिपुरास भूभृतां धूमशेष इव धूमकेतनः॥ ८१॥
तावुभावपि परस्परस्थितौ वर्धमानपरिहीनतेजसौ।
पश्यति स्म जनता दिनात्यये पार्वणौ शशिदिवाकराविव॥ ८२॥
तं कृपामृदुरवेक्ष्य भार्गवं राघवः स्खलितवीर्यमात्मनि।
स्वं च संहितममोघमाशुगं व्याजहार हरसूनुसन्निभः॥ ८३॥
न प्रहर्तुमलमस्मि निर्दयं विप्र! इत्यभिभवत्यपि त्वयि।
शंस किं गतिमनेन पत्त्रिणा हन्मि लोकमुत ते मखार्जितम्॥ ८४॥
प्रत्युवाच तमृषिर्न तत्त्वतस्त्वां न वेद्मि पुरुषं पुरातनम्।
गां गतस्य तव धाम वैष्णवं कोपितो ह्यसि मया दिदृक्षुणा॥ ८५॥
भस्मसात्कृतवतः पितृद्विषः पात्रसाच्च वसुधां ससागराम्।
आहितो जयविपर्ययोऽपि मे श्लाघ्य एव परमेष्ठिना त्वया॥ ८६॥
तद्गतिं मतिमतां वरेप्सितां पुण्यतीर्थगमनाय रक्ष मे।
पीडयिष्यति न मां खिलीकृता स्वर्गपद्धतिरभोगलोलुपम्॥ ८७॥

इस तरह वह धनुष हाथ में ले लिया, मानो परशुरामजी के वचनों का वही उचित उत्तर हो॥ ७९॥ जैसे ही राम ने वह अपने पिछले जन्म वाला धनुष हाथ में लिया, वैसे ही उनकी शोभा और भी बढ गयी। क्योंकि एक तो नया बादल यों ही सुन्दर लगता है. फिर यदि उसमें इन्द्र-धनुष भी उदित हो जाय, तब तो उसकी शोभा का कहना ही क्या है॥ ८०॥ पराक्रमी राम ने उस धनुष की एक छोर पृथ्वी पर टेककर जैसे ही उस पर डोरी चढायी, वैसे ही क्षत्रियों के शत्रु परशुरामजी उस अग्नि के समान निस्तेज हो गये, जिसमें केवल धुआँ भर शेष रह गया हो॥ ८१॥ आमने-सामने खड़े राम और परशुराम में से एक का तेज बढा और दूसरे का घट गया। इस प्रकार वे दोनों ऐसे दीखने लगे, जैसे सन्ध्याकालीन चन्द्रमा और सूर्य हों॥ ८२॥ कार्तिकेय के समान तेजस्वी एवं दयालु रामचन्द्रजी ने एक बार उन निस्तेज परशुरामजी को और उसके बाद धनुष पर चढे हुए अपने अंचूक बाण को देखकर फिर बोले—॥ ८३॥ यद्यपि आपने हमारा बहुत बड़ा अपमान किया है, परन्तु आप ब्राह्मण हैं, अतएव मैं निर्दयी होकर आपको मारूँगा नहीं। किन्तु यह तो बताइए कि अब इस बाण से मैं आपकी गति रोकूँ या आपके उन दिव्य लोकों को नष्ट कर दूँ, जो आपने यज्ञ कर-करके जीते हैं॥ ८४॥ परशुरामजी बोले—ऐसी बात नहीं है कि आपको देखते ही मैंने न पहचाना हो कि आप ही साक्षात् पुरातन पुरुष हैं, किन्तु मैंने यह जानने के लिए आपको कुपित किया था कि देखूँ, आप विष्णु भगवान् का कितना तेज लेकर पृथ्वी पर अवतरित हुए हैं॥ ८५॥ पिता के शत्रुओं को नष्ट करने और सागर तक फैली हुई पृथ्वी ब्राह्मणों को दान देने वाले मुझ परशुराम के लिए आप परम पुरुष के हाथों हारना भी बड़े महत्त्व की बात है॥ ८६॥ अतएव आप मेरी गति न रोकिए, जिससे मैं पवित्र तीर्थों में आ जा सकूँ। मुझे भोग की इच्छा नहीं है। अतएव यदि स्वर्ग न भी मिले तो मुझे कुछ भी दुःख नहीं होगा॥ ८७॥ यह सुना तो राम ने परशुरामजी का कहना मानकर पूर्व दिशा की ओर मुँह करके वह बाण छोड़ दिया।

प्रत्यपद्यत तथेति राघवः प्राङ्मुखश्च विससर्ज सायकम्।
भार्गवस्य सुकृतोऽपि सोऽभवत्स्वर्गमार्गपरिघो दुरत्ययः॥ ८८॥
राघवोऽपि चरणौ तपोनिधेः क्षम्यतामिति वदन्समस्पृशत्।
निर्जितेषु तरसा तरस्विनां शत्रुषु प्रणतिरेव कीर्तये॥ ८९॥
राजसत्त्वमवधूय मातृकं पित्र्यमस्मि गमितः शमं यदा।
नन्वनिन्दितफलो मम त्वया निग्रहोऽप्ययमनुग्रहीकृतः॥ ९०॥
साधयाम्यहमविघ्नमस्तु ते देवकार्यमुपपादयिष्यतः।
ऊचिवानिति वचः सलक्ष्मणं लक्ष्मणाग्रजमृषिस्तिरोदधे॥ ९१॥
तस्मिन्गते विजयिनं परिरभ्य रामं स्नेहादमन्यत पिता पुनरेव जातम्।
तस्याभवत्क्षणशुचः परितोषलाभः कक्षाग्निलङ्घिततरोरिव वृष्टिपातः॥ ९२॥
अथ पथि गमयित्वा क्लृप्तरम्योपकार्ये कतिचिदवनिपालः शर्वरीः शर्वकल्पः।
पुरमविशदयोध्यां मैथिलीदर्शनीनां कुवलयितगवाक्षां लोचनैरङ्गनानाम्॥ ९३॥

इति महाकविकालिदासकृतौ रघुवंशे महाकाव्ये सीता-
विवाहवर्णनं नामैकादशः सर्गः॥ ११॥

यद्यपि परशुरामजी ने बहुत पुण्य किये थे, तथापि वह बाण सदा के लिए परशुरामजी के द्वारा अर्जित स्वर्ग का मार्ग रोककर खडा हो गया॥ ८८॥ तदनन्तर राम ने परशुराम से क्षमा माँगते हुए उनके श्रीचरणों का स्पर्श किया। क्योंकि कोई भी पराक्रमी जब अपने बल से शत्रु को जीत लेता है, तब वह यदि नम्रता भी दिखलाये तो उसकी कीर्ति ही बढती है॥ ८९॥ परशुराम ने कहा—मुझे यह दण्ड देकर आपने मेरा बहुत बडा उपकार किया है। इससे मेरा सबसे बड़ा लाभ तो यह हुआ कि आपने क्षत्रिय माता से प्राप्त मेरे रजोगुण को दूर करके मुझे मेरे पिता का सतोगुण दे दिया है॥ ९०॥ अब मैं जाता हूँ। आप देवताओं का जो कार्य करने धरती पर आये हैं, वह बिना विघ्न के पूरा हो। राम और लक्ष्मण से यह कहकर परशुरामजी तत्काल अन्तर्धान हो गये॥ ९१॥ इस प्रकार परशुराम के चले जाने पर विजयी राम को दशरथजी ने गले से लगा लिया और वे स्नेहसिक्त होकर यह समझने लगे कि राम का दूसरा जन्म हुआ है। इस अल्पकालीन दुःख के पश्चात् उन्हें ऐसा संतोष मिला, जैसे जङ्गल की आग से झुलसे हुए वृक्ष को वर्षा का जल मिल जाय॥ ९२॥ तब शिव के समान राजा दशरथ ने कुछ रातें तो उस मार्ग में ही बितायीं, जहाँ उनके लिए सुन्दर डेरे बने हुए थे। तदनन्तर वे उस अयोध्या नगरी में पहुँचे, जहाँ सीताजी को देखने के लिए उत्सुक नगर की सुन्दरी स्त्रियों की आँखें झरोखों में कमल जैसी दीख रही थीं॥ ९३॥

इस प्रकार रघुवंशमहाकाव्य में सीताविवाह-वर्णन नामक
ग्यारहवाँ सर्ग समाप्त॥ ११॥

द्वादशः सर्गः

निर्विष्टविषयस्नेहः स दशान्तमुपेयिवान् । आसीदासन्ननिर्वाणिः प्रदीपार्चिरिवोषसि ॥ १ ॥
तं कर्णमूलमागत्य रामे श्रीर्न्यस्यतामिति । कैकेयीशङ्क्येवाह पलितच्छद्मना जरा ॥ २ ॥
सा पौरान्पौरकान्तस्य रामस्याभ्युदयश्रुतिः । प्रत्येकं ह्लादयाञ्चक्रे कुल्येवोद्यानपादपान् ॥ ३ ॥
तस्याभिषेकसम्भारं कल्पितं क्रूरनिश्चया । दूषयामास कैकेयी शोकोष्णैः पार्थिवाश्रुभिः ॥ ४ ॥
सा किलाश्वासिता चण्डी भर्त्रा तत्संश्रुतौ वरौ । उद्ववामेन्द्रसिक्ता भूर्बिलमग्नाविवोरगौ ॥ ५ ॥
तयोश्चतुर्दशैकेन रामं प्राव्राजयत्समाः । द्वितीयेन सुतस्यैच्छद्वैधव्यैकफलां श्रियम् ॥ ६ ॥
पित्रा दत्तां रुदन्रामः प्राङ्महीं प्रत्यपद्यत । पश्चाद्वनाय गच्छेति तदाज्ञां मुदितोऽग्रहीत् ॥ ७ ॥
दधतो मङ्गलक्षौमे वसानस्य च वल्कले । ददृशुर्विस्मितास्तस्य मुखरागं समं जनाः ॥ ८ ॥
स सीतालक्ष्मणसखः सत्यादृगुरुमलोपयन् । विवेश दण्डकारण्यं प्रत्येकं च सतां मनः ॥ ९ ॥
राजाऽपि तद्वियोगार्तः स्मृत्वा शापं स्वकर्मजम् । शरीरत्यागमात्रेण शुद्धिलाभममन्यत ॥ १० ॥
विप्रोषितकुमारं यद्राज्यमस्तमितेश्वरम् । रन्ध्रान्वेषणदक्षाणां द्विषामामिषतां ययौ ॥ ११ ॥
अथानाथाः प्रकृतयो मातृबन्धुनिवासिनम् । मौलैरानाययामासुर्भरतं स्तम्भिताश्रुभिः ॥ १२ ॥

जब राजा दशरथ ने सब सुख भोग लिये और बूढ़े हो चले, तब उनकी दशा प्रातःकाल के उस दीपक जैसी हो गयी, जिसका तेल चुक गया हो और वह बुझने ही वाला हो ॥ १ ॥ उनकी कनपटी के पासवाले बाल पक गये थे, जिससे ऐसा प्रतीत होता था कि मानो बुढापा कैकेयी से सशंक होकर राजा के कान में कह रहा था कि अब राम को राज्य सौंप दीजिए ॥ २ ॥ जैसे पानी की गूल से सिंचकर पूरे उद्यान के वृक्ष हरे-भरे हो जाते हैं, वैसे ही लोकप्रिय राम के राज्याभिषेक का समाचार सुनकर अयोध्या का प्रत्येक निवासी फूला नहीं समाया ॥ ३ ॥ किन्तु निष्ठुर कैकेयी ने ऐसा चक्र रचा कि राज्याभिषेक का सारा उत्साह शोकसन्तप्त राजा दशरथ के आँसुओं में बह गया ॥ ४ ॥ उस कठोर स्वभाववाली कैकेयी को जब राजा दशरथ ने बहुत समझाया, तब उसने वे दो वर माँगे, जिनके लिए राजा दशरथ पहले से ही वचन दे चुके थे। वे दोनों वर ऐसे ही थे, जैसे वर्षा से भीगी हुई पृथ्वी के छेदों में से सहसा दो साँप निकल आये हों ॥ ५ ॥ उनमें से कैकेयी ने एक वर तो यह माँगा कि चौदह वर्ष के लिए राम वन को चले जायँ। दूसरा यह कि मेरे बेटे भरत को राज्य मिले। किन्तु ये वर माँगने का एकमात्र फल यही हुआ कि कैकेयी विधवा हो गयी ॥ ६ ॥ दशरथजी राम को जब राजगद्दी दे रहे थे, तब राम ने आँखों में आँसू भरके उसे स्वीकार किया था, किन्तु जब उनसे कहा गया कि 'वन चले जाओ', तब उन्होंने इस आज्ञा को हँसते-हँसते अंगीकार कर लिया ॥ ७ ॥ यह देखकर लोगों के आश्चर्य का ठिकाना नहीं रहा कि राम के मुँह का भाव राज्याभिषेक के रेशमी वस्त्र पहनते समय जैसे था, ठीक वैसा ही भाव वन जाने के लिए पेड़ की छाल के वस्त्र पहनते समय भी था ॥ ८ ॥ अपने पिता की बात सत्य करने के लिए वे सीता और लक्ष्मण के साथ केवल दण्डक वन में ही नहीं, बल्कि अपने इस शुभ व्यवहार से सज्जनों के मन में भी पैठ गये ॥ ९ ॥ उनके वियोग में राजा दशरथ को बड़ा दुःख हुआ। उसी समय उन्हें श्रवण के पिता का शाप स्मरण हो आया और उन्होंने समझ लिया कि अब प्राण देकर ही मेरी आत्मा की शुद्धि होगी ॥ १० ॥ उनके शत्रु तो ऐसे अवसर की ताक में थे ही। जब उन्होंने देखा कि अवधेश स्वर्ग चले और राजकुमार भी राज्य छोड़कर चल दिये तो उन्होंने झट अयोध्या पर आक्रमण करने का निश्चय कर लिया ॥ ११ ॥ तब अयोध्या की अनाथ प्रजा ने उन कुल-मंत्रियों को भेजकर भरत

श्रुत्वा तथाविधं मृत्युं कैकेयीतनयः पितुः । मातुर्न केवलं स्वस्याः श्रियोऽप्यासीत्पराङ्मुखः ॥
ससैन्यश्चान्वगाद्रामं दर्शितानाश्रमालयैः । तस्य पश्यन्ससौमित्रेरुदश्रुर्वसतिद्रुमान् ॥ १४ ॥
चित्रकूटवनस्थं च कथितस्वर्गतिर्गुरोः । लक्ष्म्या निमन्त्रयाञ्चक्रे तमनुच्छिष्टसम्पदा ॥ १५ ॥
स हि प्रथमजे तस्मिन्नकृतश्रीपरिग्रहे । परिवेत्तारमात्मानं मेने स्वीकरणाद्ध्रुवः ॥ १६ ॥
तमशक्यमपाक्रष्टुं निदेशात्स्वर्गिणः पितुः । ययाचे पादुके पश्चात्कर्तुं राज्याधिदेवते ॥ १७ ॥
स विसृष्टस्तथेत्युक्त्वा भ्रात्रा नैवाविशत्पुरीम् । नन्दिग्रामगतस्तस्य राज्यं न्यासमिवाभुनक् ॥ १८ ॥
दृढभक्तिरिति ज्येष्ठे राज्यतृष्णापराङ्मुखः । मातुः पापस्य भरतः प्रायश्चित्तमिवाकरोत् ॥ १९ ॥
रामोऽपि सह वैदेह्या वने वन्येन वर्तयन् । चचार सानुजः शान्तो वृद्धेक्ष्वाकुव्रतं युवा ॥ २० ॥
प्रभावस्तम्भितच्छायमाश्रितः स वनस्पतिम् । कदाचिदङ्के सीतायाः शिश्ये किञ्चिदिव श्रमात ॥
ऐन्द्रिः किल नखैस्तस्या विददार स्तनौ द्विजः । प्रियोपभोगचिह्नेषु पौरोभाग्यमिवाचरन् ॥ २२ ॥
तस्मिन्नास्थदिषीकास्त्रं रामो रामावबोधितः । आत्मानं मुमुचे तस्मादेकनेत्रव्ययेन सः ॥ २३ ॥
रामस्त्वासन्नदेशत्वाद्भरतागमनं पुनः । आशङ्क्योत्सुकसारङ्गं चित्रकूटस्थलीं जहौ ॥ २४ ॥

उपर्युक्त उपवन में पहुँचकर राम अपनी दोनों माताओं से मिले, जो पति के मर जाने से वैसे ही उदास लग रही थीं, जैसे वृक्ष के कट जाने पर उसके सहारे सटी हुई लताएँ कुम्हला जाती हैं॥ १॥ पराक्रमी राम और लक्ष्मण ने बारी-बारी से कौसल्या और सुमित्रा को प्रणाम किया। अपने पुत्रों को देखते ही दोनों माताओं की आँखों में आँसू उमड आये, इसलिए वे आँख भर उन्हें देख भी नहीं सकीं, परन्तु पुत्रों के स्पर्शजनित आनन्द से उन्हें पहचान गयीं॥ २ जैसे गर्मी के दिनों में हिमालय का शीतल जल गङ्गा और सरयू के गर्म जल को ठंडा कर देता है, वैसे ही उन दोनों रानियों की आँखों से बहे हुए आनन्द के ठंडे आँसुओं ने शोक के गरम आँसुओं को ठंडा कर दिया॥ ३॥ पुत्रों के शरीर के जिन अंगों पर राक्षसों के शस्त्रों के घाव लगे थे, उन्हें वे दोनों माताएं इस प्रकार सहलाने लगीं, मानो वे घाव अभी ताजे ही हों। उस समय अपने पुत्रों की चोटें देखकर वे इतनी व्याकुल हो गयीं कि उन्हें वीर पुत्र की माता कहलाना भी अच्छा नहीं लगा॥ ४॥ 'मैं ही पति को कष्ट देने वाली कुलक्षणा सीता हूँ' यह कहते हुए सीताजी ने एक जैसी भक्ति के साथ स्वर्गवासी ससुर की दोनों रानियों के चरण छुए॥ ५॥ उन माताओं ने सीताजी को उठाते हुए बडी प्यारी और सच्ची बात कही—'उठो बेटी! तुम्हारे ही पातिव्रत के प्रभाव से राम और लक्ष्मण इस बड़े भारी संकट को पार कर सके हैं॥ ६॥ राम के जिस राज्याभिषेक का आरम्भ माताओं के हर्षभरे आसुओं से हुआ था, वह अभिषेक सोने के घडों में भरे और तीर्थों से लाये हुए जल से राम को नहला कर बूढे मन्त्रियों ने सम्पन्न कर दिया॥ ७॥ राक्षसों और वानरों के नायकों ने नदियों, समुद्रों और सरोवरों से जो जल लाकर दिया, वह अभिषेक के समय राम के सिर पर वैसे ही गिर रहा था, जैसे विन्ध्याचल की चोटी पर बादलों का जल बरसता है॥ ८॥ तपस्वी के वेश में भी जो राम बहुत सुन्दर लगते थे, वे अब राजसी वस्त्र पहनकर और भी

तपस्विवेषक्रिययाऽपि तावद् यः प्रेक्षणीयः सुतरां बभूव।
राजेन्द्रनेपथ्यविधानशोभा तस्योदिताऽऽसीत्पुनरुक्तदोषा ॥ ९ ॥
स मौलरक्षोहरिभिः ससैन्यस्तूर्यस्वनानन्दितपौरवर्गः।
विवेश सौधोद्गतलाजवर्षामुत्तोरणामन्वयराजधानीम् ॥ १० ॥
सौमित्रिणा सावरजेन मन्दमाधूतबालव्यजनो रथस्थः।
धृतातपत्रो भरतेन साक्षादुपायसङ्घात इव प्रवृद्धः ॥ ११ ॥
प्रसादकालागुरुधूमराजिस्तस्याः पुरो वायुवशेन भिन्ना।
वनान्निवृत्तेन रघूत्तमेन मुक्ता स्वयं वेणिरिवावभासे ॥ १२ ॥
श्वश्रूजनानुष्ठितचारुवेषां कर्णीरथस्थां रघुवीरपत्नीम्।
प्रासादवातायनदृश्यबन्धैः साकेतनार्योऽञ्जलिभिः प्रणेमुः ॥ १३ ॥
स्फुरत्प्रभामण्डलमानुसूयं सा बिभ्रती शाश्वतमङ्गरागम्।
रराज शुद्धेति पुनः स्वपुर्यै सन्दर्शिता वह्निगतेव भर्त्रा ॥ १४ ॥
वेश्मानि रामः परिबर्हवन्ति विश्राण्य सौहार्दनिधिः सुहृद्भ्यः।
बाष्पायमाणो बलिमन्निकेतमालेख्यशेषस्य पितुर्विवेश ॥ १५ ॥
कृताञ्जलिस्तत्र यदम्ब! सत्यान्नाभ्रश्यत स्वर्गफलाद्गुरुर्नः।
तच्चिन्त्यमानं सुकृतं तवेति जहार लज्जां भरतस्य मातुः ॥ १६ ॥
तथैव सुग्रीवविभीषणादीनुपाचरत्कृत्रिमसंविधाभिः ।
सङ्कल्पमात्रोदितसिद्धयस्ते क्रान्ता यथा चेतसि विस्मयेन ॥ १७ ॥

सुन्दर लगने लगे ॥ ९ ॥ तदनन्तर वृद्ध मन्त्रियों, राक्षसों और वानरों को साथ लेकर राम अपनी सेना के साथ उस राजधानी अयोध्या में गये, जो बन्दनवारों से सजायी गयी थी। जहाँ के श्वेत भवनों पर से धान का लावा बरस रहा था और जहाँ के निवासी तुरेही आदि वाद्य सुन-सुनकर प्रसन्न हो रहे थे ॥ १० ॥ उस समय लक्ष्मण-शत्रुघ्न राम पर चँवर डुला रहे थे और भरत हाथ में छत्र लिये हुए थे। इस प्रकार जब राम भाइयों के साथ अयोध्या में प्रविष्ट हुए, तब चारों भाई ऐसे लग रहे थे कि जैसे साम, दाम, दण्ड और भेद—ये चारों उपाय एकत्र हो गये हों ॥ ११ ॥ वहाँ के भवनों पर वायु से छितराया हुआ काले अगर का धुआँ ऐसा लग रहा था कि जैसे लौटकर राम ने अयोध्यापुरी का जूड़ा अपने हाथ से खोलकर बिखेर दिया हो ॥ १२ ॥ उन भवनों के झरोखों में आँख पसारे दीखने वाली अयोध्या की महिलाओं ने हाथ जोड़कर उन सीताजी को प्रणाम किया, जो उस समय पालकी पर चल रही थीं और जिन्हें कौसल्या आदि सासुओं ने बडे मनोहर ढंग से वस्त्र और आभूषणों द्वारा सजाया था ॥ १३ ॥ सीताजी के तन पर अब भी वह अमिट कान्ति वाला अङ्गराग लगा हुआ था, जो अनसूयाजी ने उनके शरीर में लगाया था। उससे अग्नि के सदृश देदीप्यमान उनका शरीर ऐसा दीख रहा था कि जैसे पुरवासियों को सीताजी की पवित्रता दिखलाने के लिए राम ने उन्हें फिर अग्नि में बैठा दिया हो ॥ १४ ॥ मित्रप्रेमी राम ने पहले सुग्रीव आदि मित्रों को सभी सामग्रियों से सजे भवनों में ठहराया। तब वे अपने पिताजी के निजी घर में गये। वहाँ दशरथजी का चित्रमात्र देखकर राम की आँखों में आँसू उमड पड़े ॥ १५ ॥ कैकेयी उदास बैठी थी। राम ने हाथ जोड़कर कहा—'माँ! तुम्हारे ही पुण्य-प्रताप से हमारे पिताजी अपने उस सत्य से नहीं डिगे, जिससे स्वर्ग मिलता है। यदि तुम उनसे वरदान न माँगती तो उन्होंने जो तुम्हें वरदान देने की प्रतिज्ञा की थी, वह झूठी हो जाती।' सो सुनकर कैकेयी के मन में जो आत्मग्लानि भरी हुई थी कि 'राम मेरे विषय में न जाने क्या सोचते होंगे और मैं उन्हें कैसे मुँह दिखलाऊँगी।' वह सब ग्लानि दूर हो गयी ॥ १६ ॥ वहाँ से लौटकर उन्होंने सुग्रीव-विभीषण आदि मित्रों का भलीभाँति

सभाजनायोपगतान्स दिव्यान्मुनीन्पुरस्कृत्य हतस्य शत्रोः।
शुश्राव तेभ्यः प्रभवादि वृत्तं स्वविक्रमे गौरवमादधानम्॥ १८॥
प्रतिप्रयातेषु तपोधनेषु सुखादविज्ञातगतार्धमासान्।
सीतास्वहस्तोपहृताग्र्यपूजान्रक्षःकपीन्द्रान्विससर्ज रामः॥ १९॥
तच्चात्मचिन्तासुलभं विमानं हृतं सुरारेः सह जीवितेन।
कैलासनाथोद्वहनाय भूयः पुष्पं दिवः पुष्पकमन्वमंस्त॥ २०॥
पितुर्नियोगाद्वनवासमेवं निस्तीर्य रामः प्रतिपन्नराज्यः।
धर्मार्थिकामेषु समां प्रपेदे यथा तथैवावरजेषु वृत्तिम्॥ २१॥
सर्वासु मातृष्वपि वत्सलत्वात्स निर्विशेषप्रतिपत्तिरासीत्।
षडाननापीतपयोधरासु नेता चमूनामिव कृत्तिकासु॥ २२॥
तेनार्थवाँल्लोभपराङ्मुखेन तेन घ्नता विघ्नभयं क्रियावान्।
तेनास लोकः पितृमान्विनेत्रा तेनैव शोकापनुदेव पुत्री॥ २३॥
स पौरकार्याणि समीक्ष्य काले रेमे विदेहाधिपतेर्दुहित्रा।
उपस्थितश्चारु वपुस्तदीयं कृत्वोपभोगोत्सुकयेव लक्ष्म्या॥ २४॥
तयोर्यथाप्रार्थितमिन्द्रियार्थानासेदुषोः सद्मसु चित्रवत्सु।
प्राप्तानि दुःखान्यपि दण्डकेषु सञ्चिन्त्यमानानि सुखान्यभूवन्॥ २५॥
अथाधिकस्निग्धविलोचनेन मुखेन सीता शरपाण्डुरेण।
आनन्दयित्री परिणेतुरासीदनक्षरव्यञ्जितदोहदेन॥ २६॥

स्वागत-सत्कार किया। उन मित्रों को यह देखकर बड़ा आश्चर्य हुआ कि 'हम जो चाहते हैं, वह तुरन्त मिल जाता है'॥ १७॥ तदनन्तर राम ने उन अगस्त्य आदि ऋषियों का सत्कार किया, जो उन्हें बधाई देने आये थे। उन ऋषियों को बैठाकर उन्होंने अपने शत्रु रावण के जन्म से लेकर मृत्यु तक का वह सब वृत्तान्त सुना, जो राम का गौरव बढाने वाला था॥ १८॥ ऋषियों के चले जाने पर राम ने उन राक्षसों और सेनापतियों को विदा किया, जो अयोध्या में इतने आनन्द से रहे कि उन्हें पता ही नहीं चला कि आधा महीना कब बीत गया। चलते समय सीताजी ने स्वयं अपने हाथों से उनकी पूजा की॥ १९॥ तब राम ने उस स्वर्ग के फूल जैसे पुष्पक विमान को भी कुबेर के पास जाने की आज्ञा दे दी, जो इच्छा करते ही उनकी सेवा के लिए आ जाता था और जिसे उन्होंने रावण से उसके प्राण के साथ-साथ छीन लिया था॥ २०॥ इस तरह पिता की आज्ञा से वनवास की अवधि बिताकर राम ने अपने पिता का राज्य पाया। जैसे वे धर्म, अर्थ और काम के साथ समान व्यवहार करते थे, वैसे ही वे अपने भाइयों के साथ भी समान प्रेम का बर्ताव करते थे॥ २१॥ वे निर्लोभ थे, इसीलिए उन्होंने प्रजा पर कोई कर नहीं लगाया। जिसका फल यह हुआ कि थोड़े ही दिनों में प्रजा धनी हो गयी। वे कहीं भी विघ्न नहीं आने देते थे, इसलिए सब लोग प्रसन्नता से यज्ञ आदि सत्कर्म करने लगे। वे सबको ठीक मार्ग पर चलाते थे, अतएव सब उन्हें पिता के समान मानते थे और विपत्ति पडने पर वे सबकी सहायता करते थे, इसलिए वे प्रजा के पुत्र भी थे॥ २२-२३॥ वे ठीक समय पर प्रजा का सब काम देख-भालकर सीताजी के साथ रमण भी करते थे। इसी से ऐसा लगता था कि मानो राज्यलक्ष्मी ने ही राम के साथ रमण करने की इच्छा से सीता का सुन्दर रूप धर लिया है॥ २४॥ उस भवन में वे दोनों इच्छानुसार भोग-विलास करते थे, जिसमें वनवासकालीन चित्र टँगे थे। उन चित्रों को देख-देखकर दण्डक वन के दुःखों का स्मरण करके भी उन्हें सुख ही मिलता था॥ २५॥ अब धीरे-धीरे सीताजी के नेत्रों की शोभा बढने लगी और उनका मुख पके सरपत (मूँज) जैसा पीला पडने लगा। गर्भ के इन लक्षणों को देखकर

तामङ्कमारोप्य कृशाङ्गयष्टिं वर्णान्तराक्रान्तपयोधराग्राम्।
विलज्जमानां रहसि प्रतीतः पप्रच्छ रामां रमणोऽभिलाषम्॥ २७॥
सा दष्टनीवारबलीनि हिंस्रैः सम्बद्धवैखानसकन्यकानि।
इयेष भूयः कुशवन्ति गन्तुं भागीरथीतीरतपोवनानि॥ २८॥
तस्यै प्रतिश्रुत्य रघुप्रवीरस्तदीप्सितं पार्श्वचरानुयातः।
आलोकयिष्यन्मुदितामयोध्यां प्रासादमभ्रंलिहमारुरोह॥ २९॥
ऋद्धापणं राजपथं स पश्यन्विगाह्यमानां सरयूं च नौभिः।
विलासिभिश्चाध्युषितानि पौरैः पुरोपकण्ठोपवनानि रेमे॥ ३०॥
स किंवदन्तीं वदतां पुरोगः स्ववृत्तमुद्दिश्य विशुद्धवृत्तः।
सपीधिराजोरुभुजोऽपसर्पं पप्रच्छ भद्रं विजितारिभद्रः॥ ३१॥
निर्बन्धपृष्टः स जगाद सर्वं स्तुवन्ति पौराश्चरितं त्वदीयम्।
अन्यत्र रक्षोभवनोषितायाः परिग्रहान्मानवदेव देव्याः॥ ३२॥
कलत्रनिन्दागुरुणा किलैवमभ्याहतं कीर्तिविपर्ययेण।
अयोघनेनाय इवाभितप्तं वैदेहिबन्धोर्हृदयं विदद्रे॥ ३३॥
किमात्मनिर्वादकथामुपेक्षे जायामदोषामुत सन्त्यजामि।
इत्येकपक्षाश्रयविक्लवत्वादासीत् स दोलाचलचित्तवृत्तिः॥ ३४॥
निश्चित्य चानन्यनिवृत्ति वाच्यं त्यागेन पत्न्याः परिमार्ष्टुमैच्छत्।
अपि स्वदेहात्किमुतेन्द्रियार्थविद्यशोधनानां हि यशो गरीयः॥ ३५॥

रान वहुत प्रसन्न हुए॥ २६॥ जब उन्हें पूरा विश्वास हो गया कि सीताजी गर्भिणी हैं, तब वे दुबली तथा काले स्तनोंवाली लजीली सीताजी को एकान्त में गोद में बैठाकर पूछने लगे—'बतलाओ, तुम्हारी क्या-क्या इच्छा है॥ २७॥ सीताजी बोलीं—'मैं गङ्गाजी के तटवर्ती उन तपोवनों को देखना चाहती हूँ, जहाँ के हिंसक जन्तु मांस न खाकर नीवार ही खाते हैं। जहाँ मेरी सखियाँ तपस्वियों की कन्याएँ रहती हैं और जहाँ कुशा की झाड़ियाँ चारों ओर फैली हुई हैं॥ २८॥ रामचन्द्रजी ने कहा—'अच्छी बात है। मैं तुम्हें उस तपोवन में अवश्य भेजूँगा'। वहाँ से उठकर वे अपने सेवकों के साथ सुन्दर अयोध्या की छटा निहारने के लिए आकाश से बातें करने वाले अपने ऊँचे राजमहल की छत पर चढ गये॥ २९॥ वहाँ पर से उन्होंने देखा कि राजमार्ग की दूकानें धन-धान्य से भरी हुई हैं, सरयू में नावें चल रही हैं और अयोध्या के उद्यानों में विलासी नागरिक प्रसन्न होकर विहार कर रहे हैं॥ ३०॥ अयोध्या की वह शोभा देखकर वक्ताओं में श्रेष्ठ, सदाचारी और शेषनाग जैसी बड़ी-बड़ी बाँहों वाले शत्रुजयी राम ने अपने भद्र नाम के गुप्तचर से पूछा—'भद्र! हमारे विषय में प्रजा की क्या धारणा है?'॥ ३१॥ यह सुनकर पहले तो भद्र चुप रहा, परन्तु जब राम ने आग्रहपूर्वक पूछा, तब वह बोला—'हे नरश्रेष्ठ! जनता आपकी सब बातों की तो प्रशंसा करती है, किन्तु आपने रावण के घर में रही हुई देवी सीता को जो फिर से स्वीकार कर लिया है, उसे लोग अनुचित समझते हैं'॥ ३२॥ अपनी पत्नी पर लगे हुए इस भीषण कलङ्क को सुनकर सीतापति राम का हृदय वैसे ही फट गया, जैसे घन की चोट से तपाया हुआ लोहा फट जाय॥ ३३॥ वे सोचने लगे कि 'अब दो ही मार्ग हैं। या तो मैं इस बात को अनसुनी करके टाल दूँ या फिर निर्दोष पत्नी को सदा के लिए त्याग दूँ।' उस समय उनका मन डगमगा गया और वे निश्चय ही नहीं कर पा रहे थे कि क्या करें और क्या न करें॥ ३४॥ किन्तु वह कलङ्क मिटाने का कोई दूसरा उपाय नहीं था। इसलिए उन्होंने निश्चय कर लिया कि सीता को त्याग कर

स सन्निपात्यावरजान् हतौजास्तद्विक्रियादर्शनलुप्तहर्षान् ।
कौलीनमात्माश्रयमाचचक्षे तेभ्यः पुनश्चेदमुवाच वाक्यम्॥ ३६॥
राजर्षिवंशस्य रविप्रसूतेरुपस्थितः पश्यत कीदृशोऽयम्।
मत्तः सदाचारशुचेः कलङ्कः पयोदवातादिव दर्पणस्य॥ ३७॥
पौरेषु सोऽहं बहुलीभवन्तमपां तरङ्गेष्विव तैलबिन्दुम्।
सोढुं न तत्पूर्वमवर्णमीशे आलानिकं स्थाणुमिव द्विपेन्द्रः॥ ३८॥
तस्यापनोदाय फलप्रवृत्तावुपस्थितायामपि निर्व्यपेक्षः।
त्यक्ष्यामि वैदेहसुतां पुरस्तात् समुद्रनेमिं पितुराज्ञयेव॥ ३९॥
अवैमि चैनामनघेति किन्तु लोकापवादो बलवान्मतो मे।
छाया हि भूमेः शशिनो मलत्वेनारोपिता शुद्धिमतः प्रजाभिः॥ ४०॥
रक्षोवधान्तो न च मे प्रयासो व्यर्थः स वैरप्रतिमोचनाय।
अमर्षणः शोणितकाङ्क्षया किं पदा स्पृशन्तं दशति द्विजिह्वः॥ ४१॥
तदेष सर्गः करुणार्द्रचित्तैर्न मे भवद्भिः प्रतिषेधनीयः।
यद्यर्थिता निर्हृतवाच्यशल्यान्प्राणान्मया धारयितुं चिरं वः॥ ४२॥
इत्युक्तवन्तं जनकात्मजायां नितान्तरूक्षाभिनिवेशमीशम्।
न कश्चन भ्रातृषु तेषु शक्तो निषेद्धुमासीदनुमोदितुं वा॥ ४३॥
स लक्ष्मणं लक्ष्मणपूर्वजन्मा विलोक्य लोकत्रयगीतकीर्तिः।
सौम्येति चाभाष्य यथार्थभाषी स्थितं निदेशे पृथगादिदेश॥ ४४॥

ही इस कलङ्क को मिटाया जाय। क्योंकि यशस्वियों को अपना यश शरीर से भी अधिक प्रिय होता है। फिर स्त्री आदि भोग की वस्तुओं की तो बात ही न्यारी है॥ ३५॥ निस्तेज राम ने तुरन्त भाइयों को बुलाया। वे भी इनकी दशा देखकर सन्न रह गये। कलंक की बात बतलाते हुए राम ने कहा—॥ ३६॥ 'यद्यपि मैं सदाचारी और पवित्र हूँ, फिर भी जैसे बरसाती हवा लगने से स्वच्छ दर्पण भी धुँधला हो जाता है, वैसे ही सूर्यवंशी राजर्षियों के कुल पर मेरे कारण कैसा कलंक लग रहा है॥ ३७॥ पानी की लहरों पर जैसे तेल की बूँद फैल जाती है, वैसे ही इस समय घर-घर मेरी निन्दा हो रही है। सो जैसे हाथी अपने बन्धन के खूँटे से खींचकर उसे उखाड़ने की चेष्टा करता है, वैसे ही मैं भी इस कलंक को नहीं सह सकूँगा॥ ३८॥ यद्यपि इस समय सीता गर्भिणी है, तथापि अपने कलंक को मिटाने के लिए मैं सब मोह तोडकर उसे वैसे ही छोड दूँगा, जैसे पिताजी की आज्ञा से मैंने राज्य त्याग दिया था॥ ३९॥ मैं जानता हूँ कि वह निर्दोष है, परन्तु बदनामी सत्य से भी अधिक बलवती होती है। देखो न, निर्मल चन्द्रबिम्ब पर पडी हुई पृथ्वी की छाया को लोग चन्द्रमा का कलङ्क कहते हैं और झूठ होने पर भी सारा संसार इसे ठीक मानता है॥ ४०॥ अब तुम शायद यह कहोगे कि 'यदि ऐसा ही था तो राक्षसों का क्यों मारा?' उसका उत्तर यह है कि सीता को छुडाने के लिए मैंने जो राक्षसों को मारा, मेरा वह प्रयत्न सीता को निकाल देने से बेकार नहीं कहा जायगा। क्योंकि वह तो मैंने अपनी स्त्री के अपहरण का उन राक्षसों से बदला लिया था। क्योंकि जब साँप पैर से दब जाता है, तब वह रक्त के लोभ से नहीं, बल्कि बदला लेने के लिए ही डँसता है॥ ४१॥ अतएव यदि तुम लोग इस कलंक रूपी बाण को मेरे हृदय मे निकालकर मुझे जीवित रखना चाहते हो तो केवल सीता की दशा पर दया दिखलाते हुए उसका पक्ष लेकर मेरे इस निश्चय का विरोध न करो॥ ४२॥ जब भाइयों ने देखा कि राजा राम नितान्त निठुराई करना चाहते हैं, तब भाइयों में से न तो किसी ने उनका समर्थन ही किया और न विरोध॥ ४३॥ तीनों लोकों में प्रसिद्ध यशस्वी और अपनी बात के धनी राम

प्रजावती दोहदशंसिनी ते तपोवनेषु स्पृहयालुरेव।
स त्वं रथी तद्वयपदेशनेयां प्रापय्य वाल्मीकिपदं त्यजैनाम्॥ ४५॥
स शुश्रुवान्मातरि भार्गवेण पितुर्नियोगात्प्रहृतं द्विषद्वत्।
प्रत्यग्रहीदग्रजशासनं तदाज्ञा गुरूणां ह्यविचारणीया॥ ४६॥
अथानुकूलश्रवणप्रतीतामत्रस्नुभिर्युक्तधुरं तुरङ्गैः।
रथं सुमन्त्रप्रतिपन्नरश्मिमारोप्य वैदेहसुतां प्रतस्थे॥ ४७॥
सा नीयमाना रुचिरान्प्रदेशान्प्रियङ्करो मे प्रिय इत्यनन्दत्।
नाबुद्ध कल्पद्रुमतां विहाय जातं तमात्मन्यसिपत्रवृक्षम्॥ ४८॥
जुगूह तस्याः पथि लक्ष्मणो यत्सव्येतरेण स्फुरता तदक्ष्णा।
आख्यातमस्यै गुरु भावि दुःखमत्यन्तलुप्तप्रियदर्शनेन॥ ४९॥
सा दुर्निमित्तोपगताद्विषादात्सद्यःपरिम्लानमुखारविन्दा।
राज्ञः शिवं सावरजस्य भूयादित्याशशंसे करणैरबाह्यैः॥ ५०॥
गुरोर्नियोगाद्वनितां वनान्ते साध्वीं सुमित्रातनयो विहास्यन्।
अवार्यतेवोत्थितवीचिहस्तैर्जह्नोर्दुहित्रा स्थितया पुरस्तात्॥ ५१॥
स्थात्स यन्त्रा निगृहीतवाहात्तां भ्रातृजायां पुलिनेऽवतार्य।
गङ्गां निषादाहृतनौविशेषस्ततार सन्धामिव सत्यसङ्गः॥ ५२॥
अथ व्यवस्थापितवाक्कथञ्चित्सौमित्रिरन्तर्गतबाष्पकण्ठः।
औत्पातिको मेघ इवाश्मवर्ष महीपतेः शासनमुज्जगार॥ ५३॥

ने जब देखा कि लक्ष्मण उनकी आज्ञा मानने को तैयार हैं, तब वे उनसे बोले— 'लक्ष्मण! तुम बड़े अच्छे हो'। यह कहकर उन्हें एकान्त में ले गये और कहने लगे—॥ ४४॥ तुम्हारी गर्भिणी भाभी तपोवन देखना चाहती ही हैं। सो तुम उन्हें इसी बहाने रथ पर बिठाकर वाल्मीकिजी के आश्रम पर छोड़ आओ॥ ४५॥ लक्ष्मण ने सुन रखा था कि पिता की आज्ञा से परशुरामजी ने अपनी माता को वैसे ही निर्दयतापूर्वक मार डाला था, जैसे कोई अपने शत्रु को मारे। सो उन्होंने पिता के समान राम की आज्ञा मान ली। क्योंकि बड़ों की आज्ञा में मीन-मेख निकालना ठीक नहीं होता॥ ४६॥ उधर सीताजी यह सुनकर प्रसन्न हुईं कि लक्ष्मण हमें तपोवन दिखाने ले जायेंगे। तदनुसार लक्ष्मणजी उन्हें ऐसे रथ पर चढ़ाकर ले चले, जिसे स्वयं सुमन्त्र हाँक रहे थे और जिसके घोड़े ऐसे सुशिक्षित थे कि रथ के चलते समय गर्भिणी सीता को तनिक भी हचक नहीं लगती थी॥ ४७॥ मनोहर प्रदेशों में होकर रथ पर जाती हुई सीताजी यह सोचकर बड़ी प्रसन्न थीं कि मेरे प्राणप्रिय पति सदा मेरे मन की ही बात करते हैं। उन्हें क्या पता कि इस समय वे मेरे लिए मनोरथ पूरा करने वाले कल्पवृक्ष के बदले उस असिपत्र के वृक्ष सदृश कष्टदायक हो गये हैं, जिसके पत्ते तलवार की धार जैसे तीक्ष्ण होते हैं॥ ४८॥ लक्ष्मण ने सीताजी को मार्ग में कुछ नहीं बतलाया कि 'तुम पर क्या विपत्ति आने वाली है' परन्तु सीताजी के दाहिने नेत्र ने फड़क कर आने वाले दुःख की सूचना दे ही दी॥ ४९॥ यह असगुन देखते ही उनका मुँह उतर गया और वे मनाने लगीं कि भाइयों के साथ राम सदा सुखी रहें॥ ५०॥ मार्ग में गङ्गाजी पड़ीं। उनमें जो लहरें उठ रही थीं, वे बड़े भाई की आज्ञा से पतिव्रता सीता को वन में छोड़ने के लिए ले जाते हुए लक्ष्मण से मानो हाथ हिला-हिलाकर कह रही थीं कि 'ऐसा न करो'॥ ५१॥ गङ्गातट पर पहुँचकर सारथी ने रास खींच ली। तब प्रतिज्ञा के सच्चे लक्ष्मण ने सीताजी को रेती पर उतारा और केवट जो नाव लाया, उस पर चढ़कर सीताजी के साथ गङ्गाजी से पार हो गये। साथ ही उस प्रतिज्ञा से भी पार हो गये, जो उन्होंने सीता को गङ्गापार छोड़ने के लिए राम से की थी॥ ५२॥ उस पार पहुँच तथा

ततोऽभिषङ्गानिलविप्रविद्धा प्रभ्रश्यमानाभरणप्रसूना।
स्वमूर्तिलाभप्रकृतिं धरित्रीं लतेव सीता सहसा जगाम॥५४॥
इक्ष्वाकुवंशप्रभवः कथं त्वां त्यजेदकस्मात्पतिरार्यवृत्तः।
इति क्षितिः संशयितेव तस्यै ददौ प्रवेशं जननी न तावत्॥५५॥
सा लुप्तसंज्ञा न विवेद दुःखं प्रत्यागतासुः समतप्यतान्तः।
तस्याः सुमित्रात्मजयत्नलब्धो मोहादभूत्कष्टतरः प्रबोधः॥५६॥
न चावदद्भर्तुरवर्णमार्या निराकरिष्णोर्वृजिनादृतेऽपि।
आत्मानमेव स्थिरदुःखभाजं पुनः पुनर्दुष्कृतिनं निनिन्द॥५७॥
आश्वास्य रामावरजः सतीं तामाख्यातवाल्मीकिनिकेतमार्गः।
निघ्नस्य मे भर्तृनिदेशरौक्ष्यं देवि! क्षमस्वेति बभूव नम्रः॥५८॥
सीता तमुत्थाप्य जगाद वाक्यं प्रीताऽस्मि ते सौम्य! चिराय जीव।
बिडौजसा विष्णुरिवाग्रजेन भ्रात्रा यदित्थं परवानसि त्वम्॥५९॥
श्वश्रूजनं सर्वमनुक्रमेण विज्ञापय प्रापितमत्प्रणामः।
प्रजानिषेकं मयि वर्तमानं सूनोरनुध्यायत चेतसेति॥६०॥
वाच्यस्त्वया मद्वचनात्स राजा वह्नौ विशुद्धामपि यत्समक्षम्।
मां लोकवादश्रवणादहासीः श्रुतस्य किं तत्सदृशं कुलस्य॥६१॥
कल्याणबुद्धेरथवा तवायं न कामचारो मयि शङ्कनीयः।
ममैव जन्मान्तरपातकानां विपाकविस्फूर्जथुरप्रसह्यः॥६२॥

आँसू रोककर लक्ष्मण ने रुँधे हुए गले से सीताजी को राजा राम की आज्ञा इस तरह सुनायी, जैसे कोई भयंकर बादल ओले बरसाता हो॥५३॥ लू लगने से जैसे लता के फूल झड़ जाते हैं और लता सूखकर पृथ्वी पर गिर पड़ती है, वैसे ही यह अपमानजनक बात सुनकर सीता के आभूषण गिर गये और वे स्वयं अपनी माँ पृथ्वी की गोद में गिर पडीं॥५४॥ पृथ्वी ने उस समय सीताजी को जैसे इस दुविधा से अपने भीतर नहीं समेट लिया कि इक्ष्वाकुवंशी और सदाचारी पति राम इस प्रकार सीताजी को अचानक क्यों छोड़ेंगे॥५५॥ मूर्च्छा आ जाने से उन्हें उस समय तो दुःख नहीं हुआ, परन्तु जब वे मूर्च्छा से जागीं, तब उनके हृदय में बडी व्यथा हुई। जब लक्ष्मण ने प्रयत्न करके उनकी मूर्च्छा दूर की तो वह बात उन्हें मूर्च्छा से भी अधिक अखरी॥५६॥ सीताजी इतनी साध्वी थी कि निरपराध पत्नी को घर से निकालने वाले अपने पति को उन्होंने कुछ भी नहीं कहा, बल्कि बार-बार वे नित्य दुःखदायी अपने आप को ही कोसने लगीं॥५७॥ तब लक्ष्मण ने उन्हें बहुत समझाया और वाल्मीकि के आश्रम का मार्ग दिखाकर कहा—'देवि! मैं पराधीन हूँ। अतएव स्वामी की आज्ञा से मैंने आपके साथ जो कठोर व्यवहार किया है, उसे क्षमा कीजिए'। इस प्रकार कहकर वे सीता के पैरों पर लोट गये॥५८॥ सीताजी ने लक्ष्मण को उठाया और बोलीं— 'हे सौम्य! मैं तुम पर प्रसन्न हूँ। तुम बहुत दिनों तक जियो। क्योंकि जैसे इन्द्र के छोटे भाई विष्णु सदा अपने बड़े भाई की आज्ञा मानते हैं, वैसे ही तुम भी अपने बड़े भाई की आज्ञा मानते हो॥५९॥ यहाँ से जाकर तुम सभी सासुओं से मेरा प्रणाम कहकर कहना कि 'मेरे गर्भ में आपके पुत्र का जो तेज है, आपलोग हृदय से उसका कुशल मनाते रहियेगा'॥६०॥ बाद में अयोध्या के राजा से मेरी जबानी कहना कि—"आपने अपने सामने ही मुझे अग्नि में शुद्ध किया था। सो इस समय अपयश के डर से जो आपने मुझे छोड दिया है वह क्या उस प्रसिद्ध कुल के अनुरूप है, जिसमें आपने जन्म लिया है?॥६१॥ परन्तु नहीं, आप तो सबकी

उपस्थितां पूर्वमपास्य लक्ष्मीं वनं मया सार्धमसि प्रपन्नः।
तदास्पदं प्राप्य तयाऽतिरोषात्सोढास्मि न त्वद्भवने वसन्ती॥ ६३॥
निशाचरोपप्लुतभर्तृकाणां तपस्विनीनां भवतः प्रसादात्।
भूत्वा शरण्या शरणार्थमन्यं कथं प्रपत्स्ये त्वयि दीप्यमाने॥ ६४॥
किं वा तवात्यन्तवियोगमोघे कुर्यामुपेक्षां हतजीविते ऽस्मिन्।
स्याद्रक्षणीयं यदि मे न तेजस्त्वदीयमन्तर्गतमन्तरायः॥ ६५॥
साऽहं तपः सूर्यनिविष्टदृष्टिरूर्ध्वं प्रसूतेश्चरितुं यतिष्ये।
भूयो यथा मे जनन्तरेऽपि त्वमेव भर्ता न च विप्रयोगः॥ ६६॥
नृपस्य वर्णाश्रमपालनं यत्स एव धर्मो मनुना प्रणीतः।
निर्वासिताऽप्येवमतस्त्वयाऽहं तपस्विसामान्यमवेक्षणीया॥ ६७॥
तथेति तस्याः प्रतिगृह्य वाचं राजानुजे दृष्टिपथं व्यतीते।
सा मुक्तकण्ठं व्यसनातिभाराच्चक्रन्द विग्ना कुररीव भूयः॥ ६८॥
नृत्यं मयूराः कुसुमानि वृक्षा दर्भानुपात्तान्विजहुर्हरिण्यः।
तस्याः प्रपन्ने समदुःखभावमत्यन्तमासीद्रुदितं वनेऽपि॥ ६९॥
तामभ्यगच्छद्रुदितानुसारी कविः कुशेध्माहरणाय यातः।
निषादविद्धाण्डजदर्शनोत्थः श्लोकत्वमापद्यत यस्य शोकः॥ ७०॥
तमश्रु नेत्रावरणं प्रमृज्य सीता विलापाद् विरता ववन्दे।
तस्यै मुनिर्दोहदलिङ्गदर्शी दाश्वान् सुपुत्राशिषमित्युवाच॥ ७१॥

भलाई करते हैं। आप अपने मन से हमारे साथ ऐसा व्यवहार नहीं कर सकते। यह सब मेरे पूर्वजन्म के पापों का ही असह्य फल है॥ ६२॥ कुछ समय पहले आप जिस राज्यलक्ष्मी को ठुकराकर मेरे साथ वन में चले गये थे, वह राज्यलक्ष्मी मुझसे रूठ गयी है और उसे आपके घर में मेरा रहना असह्य हो गया है॥ ६३॥ पिछली बार वनवास के समय आपकी कृपा से मैंने बहुत-सी ऐसी तपस्विनियों को अपने आश्रम में आश्रय दिया था, जिनके पतियों को राक्षसों ने मार डाला था। अब आप ही बतलाइये कि आपके रहते मैं शरणार्थिनी बनकर किस मुँह से उन्हीं तपस्विनियों के पास जाऊँगी?॥ ६४॥ मेरे गर्भ में आया हुआ आपका वह तेज यदि बाधक न होता, जिसकी रक्षा करना आवश्यक है, तो मैं आपसे सदा के लिए बिछुडे हुए अपने प्राण भी त्याग देती॥ ६५॥ किन्तु पुत्र हो जाने पर मैं सूर्य में दृष्टि लगाकर ऐसी तपस्या करूँगी कि अगले जन्म में भी आप ही मेरे पति हों। तब आपसे मुझे अलग न होना पडेगा॥ ६६॥ मनु ने कहा है कि—'राजाओं का धर्म वर्णों और आश्रमों की रक्षा करना है'। इसलिए घर से निकाल देने पर भी आप यह समझकर मेरी देख-भाल करते रहियेगा कि सीता भी एक साधारण तपस्विनी है॥ ६७॥ यह सुनकर लक्ष्मण ने कहा— 'मैं सब कुछ कह दूँगा'। यह कहकर वे ज्यों ही-वहाँ से चलकर आँखों से ओझल हुए, त्यों ही उन महती विपत्ति के भार से व्याकुल होकर सीताजी डरी हुई कुररी के समान रोने लगीं॥ ६८॥ उनका रुदन सुनकर मोरों ने नाचना बन्द कर दिया, वृक्ष फूल के आँसू गिराने लगे और हरिणियों ने मुँह में भरी हुई घास का ग्रास त्याग दिया। इस प्रकार महारानी सीताजी के दुःख से दुःखी होकर सारा वन रोने लगा॥ ६९॥ जिन वाल्मीकि ऋषि का शोक व्याध के हाथ से मारे हुए क्रौंच को देखकर श्लोक बनकर निकल पडा था, वे उस समय कुशोत्पाटन को निकले थे। रोदन का शब्द सुनकर वे सीताजी के पास आये॥ ७०॥ उन्हें देखा तो सीताजी ने आँसू पोंछकर चुपचाप प्रणाम किया। गर्भ के चिह्न देखकर ऋषि ने उन्हें आशीर्वाद दिया कि 'तुम पुत्रवती

जाने विसृष्टां प्रणिधानतस्त्वां मिथ्यापवादक्षुभितेन भर्त्रा।
तन्मा व्यथिष्ठा विषयान्तरस्थं प्राप्तासि वैदेहि! पितुर्निकेतम्॥७२॥
उत्खातलोकत्रयकण्टकेऽपि सत्यप्रतिज्ञेऽप्यविकत्थनेऽपि।
त्वां प्रत्यकस्मात् कलुषप्रवृत्तावस्त्येव मन्युर्भरताग्रजे मे॥७३॥
तवोरुकीर्तिः श्वशुरः सखा मे सतां भवोच्छेदकरः पिता ते।
धुरि स्थिता त्वं पतिदेवतानां किं तन्न येनासि ममानुकम्प्या॥७४॥
तपस्विसंसर्गविनीतसत्त्वे तपोवने वीतभया वसास्मिन्।
इतो भविष्यत्यनघप्रसूतेरपत्यसंस्कारमयो विधिस्ते॥७५॥
अशून्यतीरां मुनिसन्निवेशैस्तमोपहन्त्रीं तमसां वगाह्य।
तत्सैकतोत्सङ्गबलिक्रियाभिः सम्पत्स्यते ते मनसः प्रसादः॥७६॥
पुष्पं फलं चार्तवमाहरन्त्यो बीजं च बालेयमकृष्टरोहि।
विनोदयिष्यन्ति नवाभिषङ्गमुदारवाचो मुनिकन्यकास्त्वाम्॥७७॥
पयोघटैराश्रमबालवृक्षान् संवर्धयन्ती स्वबलानुरूपैः।
असंशयं प्राक्तनयोपपत्तेः स्तनन्धयप्रीतिमवाप्स्यसि त्वम्॥७८॥
अनुग्रहप्रत्यभिनन्दिनीं तां वाल्मीकिरादाय दयार्द्रचेताः।
सायं मृगाध्यासितवेदिपार्श्वं स्वमाश्रमं शान्तमृगं निनाय॥७९॥
तामर्पयामास च शोकदीनां तदागमप्रीतिषु तापसीषु।
निर्विष्टसारां पितृभिर्हिमांशोरन्त्यां कलां दर्श इवौषधीषु॥८०॥

होओ'। उसके बाद वे बोले—॥७१॥ "बेटी वैदेहि! मैंने योगबल से जान लिया है कि तुम्हारे पति ने झूठे अपयश से डरकर तुम्हें घर से निकाल दिया है। पुत्री! तुम अपने पिता के ही घर आ गयी हो, अब शोक त्याग दो॥७२॥ यद्यपि राम ने तीनों लोकों का दुःख दूर कर दिया है, वे अपनी प्रतिज्ञा के पक्के हैं और कभी अपने मुँह से अपनी बड़ाई नहीं करते, फिर भी तुम्हारे साथ उन्होंने जो यह अनुचित व्यवहार किया है, इसे देखकर मुझे उन पर बडा क्रोध आ रहा है॥७३॥ तुम्हारे यशस्वी ससुर दशरथजी मेरे मित्र थे और तुम्हारे पिता जनकजी भी ज्ञानोपदेश देकर बहुत से सज्जनों को संसार के बन्धन से छुडाते रहते हैं। तुम स्वयं भी पतिव्रताओं में सर्वश्रेष्ठ हो। तब फिर क्या कारण है कि जिससे मैं तुम्हारे ऊपर कृपा न करूँगा॥७४॥ तपस्वियों के संसर्ग में रहते-रहते यहाँ के सभी जीव बडे सीधे हो गये हैं। ये किसी को नहीं छेडते। सो इसी आश्रम में तुम भी निर्भय भाव से रहो। तुम्हारी पवित्र सन्तान का जातकर्म आदि संस्कार यहीं होगा॥७५॥ तमोगुण मिटानेवाली जिस तमसा के तट पर तपस्वी लोग सदा रहते हैं, उसमें स्नान करके तुम उसकी रेती पर देवताओं की पूजा करो। इससे तुम्हारा मन प्रसन्न रहा करेगा॥७६॥ आश्रम की मुनि-कन्याएँ तुम्हें सब ऋतुओं के फूल-फल और पूजा के योग्य तिन्नी आदि अन्न लाकर दिया करेंगी और मीठी-मीठी बातें करके तुम्हारा मन बहलायेंगी॥७७॥ जो तुमसे उठ सके, ऐसे घड़े लेकर तुम आश्रम के पौधों को प्रेम से सींचो। इससे लाभ यह होगा कि बच्चा पैदा होने के पहले ही तुम यह सीख लोगी कि बच्चों को प्यार कैसे करना चाहिए"॥७८॥ उनकी कृपा को सराहती हुई सीता को दयालु वाल्मीकि अपने साथ आश्रम में ले गये। साँझ हो जाने के कारण बहुत से मृग वहाँ वेदी को घेरे बैठे थे और सिंह आदि जन्तु चुपचाप आँखें मूँदे हुए पड़े थे॥७९॥ अमावास्या जैसे जडी-बूटियों और लता-वृक्षों को चन्द्रमा की वह सारहीन एवं अन्तिम कला सौंप देती है, जिसका अमृत पितर खींच चुके रहते हैं, वैसे ही ऋषि ने भी शोक से व्याकुल सीता

ता इङ्गुदीस्नेहकृतप्रदीपमास्तीर्णमेध्याजिनतल्पमन्तः ।
तस्यै सपर्यानुपदं दिनान्ते निवासहेतोरुटजं वितेरुः ॥ ८१ ॥
तत्राभिषेकप्रयता वसन्ती प्रयुक्तपूजा विधिनाऽतिथिभ्यः ।
वन्येन सा वल्कलिनी शरीरं पत्युः प्रजासन्ततये बभार ॥ ८२ ॥
अपि प्रभुः सानुशयोऽधुना स्यात्किमुत्सुकः शक्रजितोऽपि हन्ता ।
शशंस सीतापरिदेवनान्तमनुष्ठितं शासनमग्रजाय ॥ ८३ ॥
बभूव रामः सहसा सबाष्पस्तुषारवर्षीव सहस्यचन्द्रः ।
कौलीनभीतेन गृहान्निरस्ता न तेन वैदेहसुता मनस्तः ॥ ८४ ॥
निगृह्य शोकं स्वयमेव धीमान्वर्णाश्रमावेक्षणजागरूकः ।
स भ्रातृसाधारणभोगमृद्धं राज्यं रजोरिक्तमनाः शशास ॥ ८५ ॥
तामेकभार्यां परिवादभीरोः साध्वीमपि त्यक्तवतो नृपस्य ।
वक्षस्यसङ्गदृसुखं वसन्ती रेजे सपत्नीरहितेव लक्ष्मीः ॥ ८६ ॥
सीतां हित्वा दशमुखरिपुर्नोपयेमे यदन्यां तस्या एव प्रतिकृतिसखो यत्क्रतूनाजहार ।
वृत्तान्तेन श्रवणविषयप्रापिणा तेन भर्तुः सा दुर्वारं कथमपि परित्यागदुःखं विषेहे ॥ ८७ ॥

इति महाकविकालिदासकृतौ रघुवंशे महाकाव्ये
सीतापरित्यागो नाम चतुर्दशः सर्गः ॥ १४ ॥

को आश्रम की उन तपस्विनियों के हाथों सौंप दिया, जो सीताजी के आगमन से बहुत प्रसन्न थीं ॥ ८० ॥ पूजा हो जाने के बाद उन तपस्विनियों ने सीता को रहने के लिए एक पर्णकुटी दे दी, जिसमें हिंगोट के तेल का दीपक जल रहा था और मृगचर्म बिछा हुआ था ॥ ८१ ॥ सीताजी प्रतिदिन स्नान करतीं और बड़े संयम से वहाँ रहती थीं। वे विधिवत् अतिथियों की पूजा करतीं, वृक्षों की छाल के कपड़े पहनतीं और केवल पति का वंश चलाने की इच्छा से कन्द-मूल खाकर शरीर धारण किये हुए थीं ॥ ८२ ॥ वन में सीताजी ने रो-रोकर जो बातें कही थीं, अयोध्या पहुँचकर मेघनाद-विजयी लक्ष्मणजी ने राम से यह सोचकर वह सब बातें कह दीं कि देखें, राम अब भी पछताते हैं या नहीं ॥ ८३ ॥ यह सुनकर ओस बरसाने वाले पूस के चन्द्रमा जैसे राम की आँखों से आँसू टपकने लगे। क्योंकि उन्होंने सीताजी को अपने मन से नहीं, बल्कि कलंक के डर से घर-बाहर किया था ॥ ८४ ॥ तदनन्तर वर्णाश्रम धर्म के रक्षक बुद्धिमान् राम संसार के सुखों का मोह छोड़ और शोक को रोककर भाइयों के साथ अपने भरे-पूरे राज्य का पालन करने लगे ॥ ८५ ॥ कलङ्क के डर से राजा राम ने अपनी सच्चरित्र नारी को भी छोड़ दिया था। इसीलिए मानो बिना सौत की होकर राज्यलक्ष्मी उनके हृदय में सुख से रहने लगी ॥ ८६ ॥ राजा राम ने सीता को त्यागकर किसी अन्य स्त्री मे विवाह नहीं किया, बल्कि अश्वमेध यज्ञों को करते समय उन्होंने सीताजी की स्वर्णमयी मूर्ति को ही अपने बाँयीं बगल बैठाया था। जब सीताजी ने अपने पति के इस व्यवहार का समाचार सुना, तब उनके मन में जो पति द्वारा त्यागे जाने का दुःख था, वह दुःसह होते हुए भी सह्य हो गया ॥ ८७ ॥

इस प्रकार रघुवंशमहाकाव्य में सीता का परित्याग नामक
चौदहवाँ सर्ग समाप्त ॥ १४ ॥

पञ्चदशः सर्गः

कृतसीतापरित्यागः स रत्नाकरमेखलाम् । बुभुजे पृथिवीपालः पृथिवीमेव केवलाम्॥ १ ॥
लवणेन विलुम्पेज्यास्तामिस्रेण तमभ्ययुः । मुनयो यमुनाभाजः शरण्यं शरणार्थिनः॥ २ ॥
अवेक्ष्य रामं ते तस्मिन्न प्रजह्रुः स्वतेजसा । त्राणाभावे हि शापास्त्राः कुर्वन्ति तपसो व्ययम्॥३॥
प्रतिशुश्राव काकुत्स्थस्तेभ्यो विघ्नप्रतिक्रियाम् । धर्मसंरक्षणार्थैव प्रवृत्तिर्भुवि शार्ङ्गिणः॥ ४ ॥
ते रामाय वधोपायमाचख्युर्विबुधद्विषः । दुर्जयो लवणः शूली विशूलः प्रार्थ्यतामिति॥ ५ ॥
आदिदेशाथ शत्रुघ्नं तेषां क्षेमाय राघवः । करिष्यन्निव नामास्य यथार्थमरिनिग्रहात्॥ ६ ॥
यः कश्चन रघूणां हि परमेकः परन्तपः । अपवाद इवोत्सर्गं व्यावर्तयितुमीश्वरः॥ ७ ॥
अग्रजेन प्रयुक्ताशीस्ततो दाशरथी रथी । ययौ वनस्थलीः पश्यन्पुष्पिताः सुरभीरभीः॥ ८ ॥
रामादेशादनुगता सेना तस्यार्थसिद्धये । पश्चादध्ययनार्थस्य धातोरधिरिवाभवत्॥ ९ ॥
आदिष्टवर्त्मा मुनिभिः स गच्छंस्तपतां वरः । विरराज रथप्रष्ठैर्वालखिल्यैरिवांशुमान्॥ १०॥
तस्य मार्गवशादेका बभूव वसतिर्यतः । रथस्वनोत्कण्ठमृगे वाल्मीकीये तपोवने॥ ११॥
तमृषिः पूजयामास कुमारं क्लान्तवाहनम् । तपःप्रभावसिद्धाभिर्विशेषप्रतिपत्तिभिः॥ १२॥
तस्यामेवास्य यामिन्यामन्तर्वत्नी प्रजावती । सुतावसूत सम्पन्नौ कोशदण्डाविव क्षितिः॥ १३॥

सीताजी को छोड़ने के बाद राजा रामचन्द्रजी ने केवल समुद्रों से परिवेष्टित पृथ्वी का ही भोग किया, किसी दूसरी स्त्री के सम्पर्क की बात भी नहीं सोची॥ १॥ तभी एक दिन यमुनातटनिवासी कुछ तपस्वी शरणागतवत्सल राम के पास शरण माँगने आये। क्योंकि तामसी लवणासुर नामक राक्षस के उपद्रवों से उनकी यज्ञ आदि क्रियाएँ बन्द हो गयी थीं॥ २॥ यदि तपस्वी चाहते तो अपने तेज से ही लवणासुर को नष्ट कर डालते, किन्तु उन्होंने ऐसा करना ठीक नहीं समझा। क्योंकि जिनमें शाप देकर नष्ट करने की शक्ति होती है, वे तपस्या से अर्जित तेज को तभी ऐसे काम में लगाते हैं, जब कोई उनका दूसरा रक्षक सुलभ न हो॥ ३॥ राम ने उनके विघ्न दूर करने का वचन दे दिया। क्योंकि धर्म की रक्षा के लिए ही तो भगवान् संसार में अवतार लेते हैं॥ ४॥ उन्हीं मुनियों ने राम को उसके वध का उपाय बतलाते हुए कहा कि जब तक लवणासुर के हाथ में त्रिशूल रहेगा, तब तक उसको मारना कठिन है। अतः उस पर ऐसे समय प्रहार करना चाहिए कि जब उसके हाथ में त्रिशूल न रहे॥ ५॥ तब राम ने शत्रुघ्न को उन मुनियों की रक्षा का आदेश दिया। जैसे उनके हाथों में शत्रु का संहार कराकर वे उनका 'शत्रुघ्न' नाम सार्थक करना चाहते थे॥ ६॥ जैसे व्याकरणशास्त्र में कोई अपवादवाला सूत्र व्यापक नियमवाले सूत्र को भी उलट देता है, वैसे ही रघु के वंश का प्रत्येक व्यक्ति शत्रु को पछाड़ सकता था॥ ७॥ निर्भय शत्रुघ्न जब रथ पर चढकर चले, तब राम ने उन्हें आशीर्वाद दिया और वे सुगन्धित वनों की शोभा निहारते हुए चले॥ ८॥ शत्रुघ्न के साथ राम की आज्ञा से जो सेना गयी थी, वह वैसे ही व्यर्थ थी, जैसे अध्ययन शब्द में इङ् धातु में लगा हुआ अधि उपसर्ग व्यर्थ होता है। इसी प्रकार लवणासुर को अकेले शत्रुघ्न जीत सकते थे॥ ९॥ रथ पर चढे हुए सूर्य को जैसे वालखिल्य ऋषि मार्ग दिखलाते हुए चलते हैं, वैसे ही रथ पर बैठे शत्रुघ्न को भी वे मुनि लोग मार्ग दिखलाते हुए चल रहे थे॥ १०॥ मार्ग में जाते समय उन्होंने पहली रात वाल्मीकिजी के उस आश्रम पर बितायी, जहाँ के मृग रथ का शब्द सुनकर बड़े चाव से उनको देखने लगे थे॥ ११॥ शत्रुघ्नजी के घोडे थक गये थे। इसलिए रुकना आवश्यक हो गया था। अपनी तपस्या के प्रभाव से आतिथ्य की विशिष्ट सामग्री जुटाकर वाल्मीकिजी ने शत्रुघ्न का बड़ा सत्कार किया॥ १२॥ उसी रात में उनकी गर्भिणी भाभी सीता ने दो तेजस्वी पुत्रों को जन्म दिया, जैसे पृथ्वी अपने राजा के लिए धन तथा सेना उत्पन्न करती है॥ १३॥

सन्तानश्रवणाद्भ्रातुः सौमित्रिः सौमनस्यवान्। प्राञ्जलिर्मुनिमामन्त्र्य प्रातर्युक्तरथो ययौ॥ १४॥
स च प्राप मधूपघ्नं कुम्भीनस्याश्च कुक्षिजः। वनात्करमिवादाय सत्त्वराशिमुपस्थितः॥ १५॥
धूमधूम्रो वसागन्धी ज्वालाबभ्रुशिरोरुहः। क्रव्याद्गणपरीवारश्चिताग्निरिव जङ्गमः॥ १६॥
अपशूलं तमासाद्य लवणं लक्ष्मणानुजः। रुरोध सम्मुखीनो हि जयो रन्ध्रप्रहारिणाम्॥ १७॥
नातिपर्याप्तमालक्ष्य मत्कुक्षेरद्य भोजनम्। दिष्ट्या त्वमसि मे धात्रा भीतेनेवोपपादितः॥ १८॥
इति सन्तर्ज्य शत्रुघ्नं राक्षसस्तर्जिघांसया। प्रांशुमुत्पाटयामास मुस्तास्तम्बमिव द्रुमम्॥ १९॥
सौमित्रेर्निशितैर्बाणैरन्तरा शकलीकृतः। गात्रं पुष्परजः प्राप न शाखी नैर्ऋतेरितः॥ २०॥
विनाशात्तस्य वृक्षस्य रक्षस्तस्मै महोपलम्। प्रजिघाय कृतान्तस्य मुष्टिं पृथगिव स्थितम्॥ २१॥
ऐन्द्रमस्त्रमुपादाय शत्रुघ्नेन स ताडितः। सिकतात्वादपि परां प्रपेदे परमाणुताम्॥ २२॥
तमुपाद्रवदुद्यम्य दक्षिणं दोर्निशाचरः। एकताल इवोत्पातपवनप्रेरितो गिरिः॥ २३॥
कार्ष्णेन पत्त्रिणा शत्रुः स भिन्नहृदयः पतन्। आनिनाय भुवः कम्पं जहाराश्रमवासिनाम्॥ २४॥
वयसां पङ्क्तयः पेतुर्हतस्योपरि विद्विषः। तत्प्रतिद्वन्द्विनो मूर्ध्नि दिव्याः कुसुमवृष्टयः॥ २५॥
स हत्वा लवणं वीरस्तदा मेने महौजसः। भ्रातुः सोदर्यमात्मानमिन्द्रजिद्वधशोभिनः॥ २६॥
तस्य संस्तूयमानस्य चरितार्थैस्तपस्विभिः। शुशुभे विक्रमोदग्रं व्रीडयाऽवनतं शिरः॥ २७॥

भाई के पुत्र होने की बात सुनकर शत्रुघ्न बहुत प्रसन्न हुए और अगले दिन तड़के ही उन्होंने हाथ जोड़कर मुनि से आज्ञा ली तथा रथ जोतकर आगे बढे॥ १४॥ जिस समय वे लवणपुर में पहुँचे, उसी समय रावण की बहन कुम्भीनसी का पुत्र लवणासुर अनेक पशुओं को मारकर वन से इस प्रकार लौटा था, जैसे वन ने उसे वह सब कर के रूप में दिया हो॥ १५॥ उसकी देह धुएँ जैसी काली थी, उसमें से चर्बी की गन्ध निकल रही थी, आग की लपटों के समान लाल और उसके बाल बिखरे हुए थे। मांसाहारी कुत्ते, गिद्ध, मांसभक्षी पशु-पक्षी उसके चारों ओर चल रहे थे। इस तरह वह उस चिता की जंगम अग्नि जैसा लग रहा था॥ १६॥ शत्रुघ्न ने देखा कि यह अवसर ठीक है। क्योंकि इसके हाथ में त्रिशूल नहीं है। बस, तुरन्त उन्होंने लवणासुर को घेर लिया। क्योंकि शक्तिहीन शत्रु पर प्रहार करने वाला वीर अवश्य विजयी होता है॥ १७॥ शत्रुघ्न को देखकर लवणासुर बोला—आज मेरे भोजन की सामग्री कम थी, यह देख विधाता ने डरकर मेरा भोजन पूरा करने के लिए ही तुम्हें यहाँ भेजा है॥ १८॥ ऐसा कहकर उसने शत्रुघ्न को मारने के लिए अनायास एक बड़ा भारी पेड़ उखाड़ लिया, जैसे मोथा घास का मुट्ठा उखाड़ लिया हो॥ १९॥ ज्यों ही लवणासुर ने वह वृक्ष शत्रुघ्न पर फेंका, त्यों ही अपने बाणों से शत्रुघ्न ने उसे बीच में ही काटकर टुकडे-टुकड़े कर डाला। इस प्रकार वह वृक्ष तो उनके शरीर पर नहीं पहुँच सका, केवल उसके फूलों का पराग भर उन तक पहुँच पाया॥ २०॥ वृक्ष के टूक-टूक हो जाने पर उस राक्षस ने एक ऐसी भयंकर शिला शत्रुघ्न पर फेंकी, जैसे वह यमराज का घूँसा हो॥ २१॥ किन्तु शत्रुघ्न ने अपना ऐन्द्र अस्त्र चलाकर उसे धूल से भी महीन चूर्ण कर डाला॥ २२॥ तब वह अपना दाहिना हाथ उठाकर शत्रुघ्न की ओर लपका। उस समय वह ऐसा लगा, जैसे बवंडर द्वारा उड़ाया हुआ कोई ऐसा पहाड़ चला आ रहा हो, जिसकी चोटी पर ताड़ का एक पेड़ खड़ा हो॥ २३॥ किन्तु शत्रुघ्न-प्रेरित वैष्णव बाण लगते ही लवणासुर धराशायी हो गया। उसके गिरने से ऐसी धमक हुई कि धरती काँप उठी, किन्तु आश्रमवासियों का भय से काँपना दूर हो गया॥ २४॥ उस मरे हुए शत्रु के ऊपर गिद्ध आदि मांसभक्षी पक्षी टूट पड़े और उसके प्रतिद्वन्द्वी शत्रुघ्न पर फूलों की वर्षा होने लगी॥ २५॥ जब शत्रुघ्नजी लवणासुर को मार चुके, तब उन्हें यह सन्तोष हुआ कि अब मैं मेघनादघाती तेजस्वी लक्ष्मण का सगा भाई हूँ॥ २६॥ जब तपस्वियों का काम पूरा हो गया, तब वे वीर शत्रुघ्न

उपकूलं स कालिन्द्याः पुरीं पौरुषभूषणः । निर्ममे निर्ममोऽर्थेषु मथुरां मधुराकृतिः ॥ २८ ॥
या सौराज्यप्रकाशाभिर्बभौ पौरविभूतिभिः । स्वर्गाभिष्यन्दवमनं कृत्वेवोपनिवेशिता ॥ २९ ॥
तत्र सौधगतः पश्यन्यमुनां चक्रवाकिनीम् । हेमभक्तिमतीं भूमेः प्रवेणीमिव पिप्रिये ॥ ३० ॥
सखा दशरथस्यापि जनकस्य च मन्त्रकृत् । सञ्चस्कारोभयप्रीत्या मैथिलेयौ यथाविधि ॥ ३१ ॥
स तौ कुशलवोन्मृष्टगर्भक्लेदौ तदाख्यया । कविः कुशलवावेव चकार किल नामतः ॥ ३२ ॥
साङ्गं च वेदमध्याप्य किञ्चिदुत्क्रान्तशैशवौ । स्वकृतिं गापयामास कविप्रथमपद्धतिम् ॥ ३३ ॥
रामस्य मधुरं वृत्तं गायन्तौ मातुरग्रतः । तद्वियोगव्यथां किञ्चिच्छिथिलीचक्रतुः सुतौ ॥ ३४ ॥
इतरेऽपि रघोर्वंश्यास्त्रयस्त्रेताग्नितेजसः । तद्योगात्पतिवत्नीषु पत्नीष्वासन्द्विसूनवः ॥ ३५ ॥
शत्रुघातिनि शत्रुघ्नः सुबाहौ च बहुश्रुते । मथुराविदिशे सून्वोर्निदधे पूर्वजोत्सुकः ॥ ३६ ॥
भूयस्तपोव्ययो मा भूद्वाल्मीकेरिति सोऽत्यगात् । मैथिलीतनयोद्गीतनिःस्पन्दमृगमाश्रमम् ॥
वशी विवेश चायोध्यां रथ्यासंस्कारशोभिनीम् । लवणस्य वधात्पौरैरीक्षितोऽत्यन्तगौरवम् ॥
स ददर्श सभामध्ये सभासद्भिरुपस्थितम् । रामं सीतापरित्यागादसामान्यपतिं भुवः ॥ ३९ ॥
तमभ्यनन्दत्प्रणतं लवणान्तकमग्रजः । कालनेमिवधात्प्रीतस्तुराषाडिव शार्ङ्गिणम् ॥ ४० ॥

की प्रशंसा करने लगे। अपनी बडाई सुनकर शत्रुघ्न का सिर लाज से झुककर सुशोभित हुआ ॥ २७ ॥ तदनन्तर पराक्रमी, संयमी और धन से निस्पृह शत्रुघ्न ने यमुना के तट पर मधुरा (मथुरा) नाम की नगरी बसायी ॥ २८ ॥ अच्छा राजा पाकर उस नगरी के लोग ऐसे धनी और सुखी हो गये कि जैसे स्वर्ग में जनसंख्या बढ जाने से वहाँ के कुछ लोग यहाँ लाकर बसा दिये गये हों ॥ २९ ॥ तब शत्रुघ्न ने मधुरा के एक ऊँचे भवन पर चढकर उस नीले जल वाली यमुना को देखा, जिसमें अनेक चकवे चहक रहे थे। उस समय यमुना उन्हें ऐसी सुन्दर दीखी कि जैसे वह पृथ्वी की सुनहरी फुन्दोंवाली चोटी हो ॥ ३० ॥ इधर दशरथ के मित्र और जनक के परामर्शदाता होने के कारण मन्त्रद्रष्टा वाल्मीकिजी ने सीताजी के दोनों पुत्रों के विधिवत् जातकर्म आदि संस्कार सम्पन्न किये ॥ ३१ ॥ ज्येष्ठ पुत्र लव के उत्पन्न होते समय सीताजी की प्रसव-पीडा गाय के पूँछ के बाल से और छोटे पुत्र की उत्पत्ति के समय वह पीड़ा कुशा से दूर हुई थी। इसीलिए वाल्मीकिजी ने दोनों बच्चो का नाम इन्हीं दोनों वस्तुओं के नाम पर लव और कुश रखा ॥ ३२ ॥ जब वे बच्चे कुछ बड़े हुए, तब ऋषि ने उन दोनों को वेद-वेदाङ्ग पढाकर अपनी रचना आदिकाव्य रामायण का गायन सिखाया ॥ ३३ ॥ अब उन दोनों बालकों ने अपनी माता सीता के आगे राम का यश गा-गाकर उनकी वियोगजनित व्यथा कुछ कम कर दी ॥ ३४ ॥ दाक्षिणात्य, गार्हपत्य और आहवनीय, इन तीनों अग्नियों के सदृश तेजस्वी भरत, लक्ष्मण और शत्रुघ्न—इन तीनों भाइयों ने भी अपनी-अपनी पत्नियों से दो-दो पुत्र उत्पन्न किये ॥ ३५ ॥ अधिक समय बाहर रहने के कारण शत्रुघ्न अपने बड़े भाइयों से मिलने को आतुर थे। अतएव उन्होंने शत्रुघाती बहुश्रुत और सुबाहु नामक अपने दो पुत्रों को मधुरा और विदिशा का का राज्य सौंप दिया ॥ ३६ ॥ शत्रुघ्नजी लौटते समय वाल्मीकि के उस तपोवन में नहीं गये, जहाँ के मृग शान्तभाव मे लव और कुश के गीत सुना करते थे। क्योंकि शत्रुघ्न ने सोचा कि मेरे जाने पर वाल्मीकिजी अपनी तपस्या के बल से मेरे सत्कार की सामग्री जुटाने लगेंगे, जिससे व्यर्थ उनका तपोबल क्षीण होगा ॥ ३७ ॥ इस प्रकार वहाँ से चलकर जितेन्द्रिय शत्रुघ्न उस अयोध्या में पहुँचे जहाँ की सडकें उनके स्वागत में बडे अच्छे ढंग से सजायी गयी थीं। वे लवणासुर को मारकर लौटे थे, इसलिए सभी पुरवासी उन्हें बडे आदर की दृष्टि से देख रहे थे ॥ ३८ ॥ उन्होंने राजसभा में पहुँचकर देखा कि राम बैठे हैं और बहुत मे सभासद उनकी स्तुति कर रहे हैं। सीताजी को छोड़ देने पर अब वे एकमात्र पृथ्वी के ही पति रह गये थे ॥ ३९ ॥ जैसे कालनेमि को मारनेवाले विष्णु का इन्द्र ने प्रसन्नतापूर्वक स्वागत किया था, वैसे ही लवणासुर को मारनेवाले शत्रुघ्नजी

स पृष्टः सर्वतो वार्तमाख्यद्राज्ञे न सन्ततिम्। प्रत्यर्पयिष्यतः काले कवेराद्यस्य शासनात्॥ ४१॥
अथ जानपदो विप्रः शिशुमप्राप्तयौवनम्। अवतार्याङ्कशय्यास्थं द्वारि चक्रन्द भूपतेः॥ ४२॥
शोचनीयाऽसि वसुधे! या त्वं दशरथाच्च्युता। रामहस्तमनुप्राप्य कष्टात्कष्टतरं गता॥ ४३॥
श्रुत्वा तस्य शुचो हेतुं गोप्ता जिह्राय राघवः। न ह्यकालभवो मृत्युरिक्ष्वाकुपदमस्पृशत्॥ ४४॥
स मुहूर्तं क्षमस्वेति द्विजमाश्वास्य दुःखितम्। यानं सस्मार कौबेरं वैवस्वतजिगीषया॥ ४५॥
आत्तशस्त्रस्तदध्यास्य प्रस्थितः स रघूद्वहः। उच्चचार पुरस्तस्य गूढरूपा सरस्वती॥ ४६॥
राजन्! प्रजासु ते कश्चिदपचारः प्रवर्तते। तमन्विष्य प्रशमयेर्भवितासि ततः कृती॥ ४७॥
इत्याप्तवचनाद्रामो विनेष्यन्वर्णविक्रियाम्। दिशः पपात पत्त्रेण वेगनिष्कम्पकेतुना॥ ४८॥
अथ धूमाभिताम्राक्षं वृक्षशाखावलम्बिनम्। ददर्श कश्चिदैक्ष्वाकस्तपस्यन्तमधोमुखम्॥ ४९॥
पृष्टनामान्वयो राज्ञा स किलाचष्ट धूमपः। आत्मानं शम्बुकं नाम शूद्रं सुरपदार्थिनम्॥ ५०॥
तपस्यनधिकारित्वात्प्रजानां तमघावहम्। शीर्षच्छेद्यं परिच्छिद्य नियन्ता शस्त्रमाददे॥ ५१॥
स तद्वक्त्रं हिमक्लिष्टकिञ्जल्कमिव पङ्कजम्। ज्योतिष्कणाहतश्मश्रु कण्ठनालादपातयत्॥ ५२॥
कृतदण्डः स्वयं राज्ञा लेभे शूद्रः सतां गतिम्। तपसा दुश्चरेणापि न स्वमार्गविलङ्घिना॥ ५३॥

जब उन्हें प्रणाम करने को झुके, तब राम ने भी उनका सहर्ष अभिनन्दन किया॥ ४०॥ राम के पूछने पर उन्होंने और सब हाल तो सुना दिया, परन्तु पुत्र होने की बात नहीं कही। क्योंकि वाल्मीकिजी ने कह दिया था कि समय आने पर हम दोनों पुत्र राम को सौंप देंगे, तुम मत कहना॥ ४१॥ कुछ समय बाद एक दिन उसी जनपद का निवासी एक ब्राह्मण अपना मृत बालक राजा की ड्योढी पर गोद से उतारकर यह कहता हुआ फूट-फूटकर रोने लगा॥ ४२॥ हे पृथ्वी! तुम दशरथ के हाथ से छूटकर तथा राम के हाथों में आकर बड़े संकट में पड़ गयी हो और तुम्हारी दशा बडी शोचनीय हो गयी है॥ ४३॥ प्रजापालक राम ने जब उसके शोक की बात सुनी, तब उन्हें बड़ी लज्जा आयी। क्योंकि इक्ष्वाकुवंशी राजाओं के राज्य में किसी की भी अकाल मृत्यु नहीं होती थी॥ ४४॥ उस दुःखी विप्र को राम ने यह कहकर ढाढस बँधाया कि तुम थोड़ी देर ठहरो, मैं अभी तुम्हारा शोक दूर करता हूँ। यह कहकर यमराज को जीतने की इच्छा से उन्होंने कुबेर के पुष्पक विमान का स्मरण किया॥ ४५॥ इस प्रकार जब वे अस्त्र-शस्त्र से सुसज्जित होकर पुष्पक विमान पर बैठकर चलने लगे, तब यह आकाशवाणी सुनायी दी—॥ ४६॥ 'हे राजन्! आपकी प्रजा में वर्णधर्म सम्बन्धी कुछ दोष आ गया है। उसे खोजकर दूर करो, तभी तुम्हारा उद्देश्य पूर्ण होगा'॥ ४७॥ इस विश्वसनीय वचन को सुनकर वेग से चलने के कारण निष्कम्प ध्वजा वाले पुष्पक विमान पर चढ़कर राम यह देखने के लिए सभी दिशाओं में चक्कर काटने लगे कि कहाँ वर्णधर्म में दोष आया है॥ ४८॥ घूमते-घूमते एक स्थान पर राम ने देखा कि एक पेड़ की शाखा पर उलटा लटका हुआ एक मनुष्य नीचे जलती हुई आग का धुआँ पी-पीकर तप कर रहा है और धुआँ लगने से उसकी आँखें लाल हो गयी हैं॥ ४९॥ उससे राम ने पूछा—'आपका नाम क्या है और आप किस वंश के हैं?' वह तपस्वी बोला—'मै देव पद पाने के लिए तप कर रहा हूँ। मेरा नाम शम्बुक है और मैं शूद्र हूँ'॥ ५०॥ शूद्रों को तप करने का अधिकार नहीं है। यही अनधिकृत कार्य करने से प्रजा में पाप फैल रहा था। अतः राम ने निश्चय कर लिया कि इसका सिर काटना ही होगा और शस्त्र उठा लिया॥ ५१॥ फिर उसका सिर वैसे ही गले से काटकर अलग कर दिया, जैसे डंडी से कमल उतार दिया गया हो। आग की चिनगारियों से झुलसी दाढी वाला उसका सिर ऐसा लग रहा था कि जैसे पाले से जली हुई केसरवाला कमलगट्टा हो॥ ५२॥ इस प्रकार साक्षात् राजा राम से दण्ड पाकर उस शूद्र को वह सद्गति मिली, जो वह अपने उस कठोर तप से कभी भी न पाता, जिसे वह वर्णाश्रम धर्म का उल्लङ्घन करके प्राप्त करना चाहता था॥ ५३॥ जैसे चन्द्रमा शरद्

रघुनाथोऽप्यगस्त्येन मार्गसन्दर्शितात्मना । महौजसा संयुयुजे शरत्काल इवेन्दुना ॥ ५४ ॥
कुम्भयोनिरलङ्कारं तस्मै दिव्यपरिग्रहम् । ददौ दत्तं समुद्रेण पीतेनेवात्मनिष्क्रयम् ॥ ५५ ॥
तं दधन्मैथिलीकण्ठनिर्व्यापारेण बाहुना । पश्चान्निववृते रामः प्राक्परासुर्द्विजात्मजः ॥ ५६ ॥
तस्य पूर्वोदितां निन्दां द्विजः पुत्रसमागतः । स्तुत्या निवर्तयामास त्रातुर्वैवस्वतादपि ॥ ५७ ॥
तमध्वराय मुक्ताश्वं रक्षःकपिनरेश्वराः । मेघाः सस्यमिवाम्भोभिरभ्यवर्षन्नुपायनैः ॥ ५८ ॥
दिग्भ्यो निमन्त्रिताश्चैनमभिजग्मुर्महर्षयः । न भौमान्येव धिष्ण्यानि हित्वा ज्योतिर्मयान्यपि ॥
उपशल्यनिविष्टैस्तैश्चतुर्द्वारमुखी बभौ । अयोध्या सृष्टलोकेव सद्यः पैतामही तनुः ॥ ६० ॥
श्लाघ्यस्त्यागोऽपि वैदेह्याः पत्युः प्राग्वंशवासिनः । अनन्यजानेःसैवासीद्यस्माज्जाया हिरण्मयी ॥
विधेरधिकसम्भारस्ततः प्रववृते मखः । आसन्यत्र क्रियाविघ्ना राक्षसा एव रक्षिणः ॥ ६२ ॥
अथ प्राचेतसोपज्ञं रामायणमितस्ततः । मैथिलेयौ कुशलवौ जगतुर्गुरुचोदितौ ॥ ६३ ॥
वृत्तं रामस्य वाल्मीकेः कृतिस्तौ किन्नरस्वनौ । किं तद्येन मनो हर्तुमलं स्यातां न शृण्वताम् ॥
रूपे गीते च माधुर्य तयोस्तज्ज्ञैर्निवेदितम् । ददर्श सानुजो रामः शुश्राव च कुतूहली ॥ ६५ ॥
तद्गीतश्रवणैकाग्रा संसदश्रुमुखी बभौ । हिमनिष्यन्दिनी प्रातर्निर्वातेव वनस्थली ॥ ६६ ॥
वयोवेषविसंवादि रामस्य च तयोस्तदा । जनता प्रेक्ष्य सादृश्यं नाक्षिकम्पं व्यतिष्ठत ॥ ६७ ॥

ऋतु से मिलता है, वैसे ही राम को मार्ग में सहसा अगस्त्य ऋषि मिल गये ॥ ५४ ॥ ऋषि ने राम को वह सुन्दर आभूषण दिया, जो उन्हें समुद्र ने उस समय दण्ड के रूप में दिया था, जब उन्होंने समुद्र को पिया था ॥ ५५ ॥ राम ने वह आभूषण लेकर अपनी उस भुजा में बाँध लिया, जो सीताजी के वन चले जाने पर उनके गले में पडने से वंचित हो गया था। जब राम अयोध्या लौटे, तब उन्हें ज्ञात हुआ कि उनके आने से पहले ही ब्राह्मणपुत्र जी उठा है ॥ ५६ ॥ पुत्र के जी जाने पर ब्राह्मण ने राम की बडी स्तुति की और पहले जो निन्दा की थी, उसे उसने अपनी इन स्तुतियों से धो डाला। क्योंकि राम ने उसके पुत्र को यमराज के हाथ से छुडाया था ॥ ५७ ॥ कुछ समय बाद राम ने अश्वमेध यज्ञ के लिए घोड़ा छोड़ा। तब जैसे बादल धान के खेत पर जल बरसाते हैं, वैसे ही सुग्रीव, विभीषण तथा अन्य राजाओं ने आकर राम के आगे उपहार के रूप में धन की वर्षा की ॥ ५८ ॥ उस यज्ञ में विभिन्न देशों के ऋषियों को आमन्त्रित किया गया था। वे ऋषि पृथ्वी से ही नहीं, बल्कि सप्तर्षि-मण्डल आदि दिव्य स्थानों से भी राम के पास आये ॥ ५९ ॥ वे लोग वहाँ आकर नगर के आस-पासवाले देहातों में टिक गये थे। जब वे अयोध्या के चारों द्वारों से नगर में प्रविष्ट हुए, तब चार द्वारों वाली वह अयोध्या ऐसी दीखी कि जैसे ब्रह्माजी की चतुर्मुखी देह हो ॥ ६० ॥ सीता के त्याग से राम की इसलिए भी प्रशंसा हुई कि उन्होंने किसी दूसरी स्त्री से अपना विवाह नहीं किया था। अतएव यज्ञ में सोने की सीता बनवाकर राम ने अपनी पत्नी के स्थान पर उसे बैठा दिया था ॥ ६१ ॥ इस प्रकार वह प्रसिद्ध यज्ञ प्रारम्भ हुआ, जिसमें आवश्यकता से अधिक सामग्री इकट्ठी हुई थी। विशेषता यह थी कि यज्ञकार्य में विघ्न डालने वाले राक्षस ही उसकी रखवाली कर रहे थे ॥ ६२ ॥ उसी समय वाल्मीकिजी की आज्ञा से सीताजी के पुत्र लव और कुश वाल्मीकिरचित रामायण गाते हुए वहाँ घूमने लगे ॥ ६३ ॥ एक तो राम का चरित्र, उस पर वाल्मीकिजी उसके रचयिता और फिर किन्नरों के समान मधुर कण्ठ वाले लव और कुश उसके गायक। तब बतलाइये कि उसमें क्या कमी रह गयी थी, जिससे लोग उसे सुनकर मोहित न हो जाते ॥ ६४ ॥ यह बात राम के कानों तक पहुँची। उन्होंने उन दोनों बालकों को बुलवाया और अपने भाइयों के साथ उन बालकों के रूप और गीत की मधुरता को आश्चर्य के साथ देखा और सुना ॥ ६५ ॥ सारी सभा एकाग्र मन से उनका गीत सुनती और आँखों से आँसू बहाती जा रही थी। उस समय वह सभा प्रातःकाल की उस वनस्थली जैसी दीख रही थी, जिसमें वृक्षों से ओस की बूँदें टपक रही हों ॥ ६६ ॥ लोगों ने

उभयोर्न तथा लोकः प्रावीण्येन विसिष्मिये । नृपतेः प्रीतिदानेषु वीतस्पृहतया यथा ॥ ६८ ॥
गेये को नु विनेता वां कस्य चेयं कृतिः कवेः । इति राज्ञा स्वयं पृष्टौ तौ वाल्मीकिमशंसताम् ॥ ६९ ॥
अथ सावरजो रामः प्राचेतसमुपेयिवान् । ऊरीकृत्यात्मनो देहं राज्यमस्मै न्यवेदयत् ॥ ७० ॥
स तावाख्याय रामाय मैथिलेयौ तदात्मजौ । कविः कारुणिको वव्रे सीतायाः सम्परिग्रहम् ॥
तात ! शुद्धा समक्षं नः स्नुषा ते जातवेदसि । दौरात्म्याद्रक्षसस्तां तु नात्रत्याः श्रद्दधुः प्रजाः ॥
ताः स्वचारित्रमुद्दिश्य प्रत्याययतु मैथिली । ततः पुत्रवतीमेनां प्रतिपत्स्ये त्वदाज्ञया ॥ ७३ ॥
इति प्रतिश्रुते राज्ञा जानकीमाश्रमान्मुनिः । शिष्यैरानाययामास स्वसिद्धिं नियमैरिव ॥ ७४ ॥
अन्येद्युरथ काकुत्स्थः सन्निपात्य पुरौकसः । कविमाह्वाययामास प्रस्तुतप्रतिपत्तये ॥ ७५ ॥
स्वरसंस्कारवत्याऽसौ पुत्राभ्यामथ सीतया । ऋचेवोदर्चिषं सूर्यं रामं मुनिरुपस्थितः ॥ ७६ ॥
काषायपरिवीतेन स्वपदार्पितचक्षुषा । अन्वमीयत शुद्धेति शान्तेन वपुषैव सा ॥ ७७ ॥
जनास्तदालोकपथात्प्रतिसंहृतचक्षुषः । तस्थुस्तेऽवाङ्मुखाः सर्वे फलिता इव शालयः ॥ ७८ ॥
तां दृष्टिविषये भर्तुर्मुनिरास्थितविष्टरः । कुरु निःसंशयं वत्से ! स्ववृत्ते लोकमित्यशात् ॥ ७९ ॥
अथ वाल्मीकिशिष्येण पुण्यमावर्जितं पयः । आचम्योदीरयामास सीता सत्यां सरस्वतीम् ॥ ८० ॥
वाङ्मनःकर्मभिः पत्यौ व्यभिचारो यथा न मे । तथा विश्वम्भरे देवि ! मामन्तर्धातुमर्हसि ॥ ८१ ॥

राम और उन दोनों बालकों का चेहरा एकदम मिलता-जुलता देखा। जिसमें इतना ही अन्तर था कि वे दोनों अभी बच्चे थे तथा वनवासियों के जैसे वस्त्र पहने थे और राम प्रौढ थे तथा राजसी वस्त्र पहने हुए थे॥ ६७॥ जनता को उनके गायन का कौशल देखकर उतना आश्चर्य नहीं हुआ, जितना इस बात पर विस्मय हुआ कि राजा ने उन्हें प्रेम से जो दान दिया था, वह भी उन्होंने लौटा दिया॥ ६८॥ राम ने जब उनसे पूछा कि तुमने संगीत किससे सीखा है और यह किस कवि की रचना है, तब उन्होंने वाल्मीकिजी का नाम बता दिया॥ ६९॥ तब अपने भाइयों को साथ लेकर रामचन्द्र वाल्मीकिजी के पास गये। उन्होंने वहाँ जाकर अपने शरीर के सिवाय शेष सम्पूर्ण राज्य वाल्मीकि को भेंट कर दिया॥ ७०॥ तब दयालु ऋषि ने राम से कहा—'ये दोनों गायक कुमार सीताजी के गर्भ से उत्पन्न हुए हैं और तुम्हारे पुत्र हैं। अब तुम सीताजी को स्वीकार कर लो'॥ ७१॥ राम बोले—आपकी पतोहू सीता हमारे सामने ही अग्नि में शुद्ध हो चुकी हैं, परन्तु रावण की दुष्टता का विचार करके यहाँ की प्रजा को विश्वास नहीं होता॥ ७२॥ अतः यदि सीता अपनी शुद्धता का प्रमाण देकर प्रजा को विश्वास दिला दें, तब मैं आपकी आज्ञा से पुत्रों के साथ उन्हें ग्रहण कर लूँगा॥ ७३॥ राम की यह प्रतिज्ञा सुनकर वाल्मीकि ने शिष्यों को भेजकर सीताजी को आश्रम से इस प्रकार बुलाया, जैसे वे नियमों के द्वारा अपनी सिद्धि को बुलवा रहे हों॥ ७४॥ दूसरे दिन राम ने इस काम के लिए अयोध्या की सम्पूर्ण प्रजा को एकत्र करके वाल्मीकिजी को बुलवाया॥ ७५॥ तदनुसार वाल्मीकिजी लव, कुश और सीताजी को साथ लेकर राम के समक्ष आ उपस्थित हुए। पुत्रों के साथ राम के पास जाती हुई सीताजी ऐसी लगती थीं, जैसे स्वर और संस्कारों के साथ गायत्री देवी सूर्य के पास जा रही हों॥ ७६॥ गेरुए वस्त्र पहने और आँखें नीची किये हुए सीताजी अपने शान्त शरीर से ही पवित्र दिखलाई देती थीं॥ ७७॥ उन्हें देखते ही सब लोगों ने उसी प्रकार आँखें नीची कर ली, जैसे फले हुए धान के पौधे झुक जाते हैं। क्योंकि उन्हें लज्जा लगी कि हम लोगों ने व्यर्थ इस साध्वी पर कलंक लगाया॥ ७८॥ तब राम के समक्ष आसन पर आसीन वाल्मीकि ने सीताजी से कहा—'बेटी ! जनता के मन में तुम्हारे चरित्र पर सन्देह है, उसे तुम मिटा दो'॥ ७९॥ तभी वाल्मीकिजी के एक शिष्य ने पवित्र जल लाकर सीताजी को दिया, उससे आचमन करके सीताजी ने यह सत्य वचन कहा—॥८०॥ 'यदि मैंने मन, वचन और कर्म से अपना पातिव्रत भंग न किया हो तो हे धरती माता !

एवमुक्ते तया साध्व्या रन्ध्रात्सद्योभवाद्भुवः । शातह्रदमिव ज्योतिः प्रभामण्डलमुद्ययौ ॥ ८२ ॥
तत्र नागफणोत्क्षिप्तसिंहासननिषेदुषी । समुद्ररशना साक्षात्प्रादुरासीद्वसुन्धरा ॥ ८३ ॥
सा सीतामङ्कमारोप्य भर्तृप्रणिहितेक्षणाम् । मा मेति व्यवहरत्येव तस्मिन् पातालमभ्यगात् ॥
धरायां तस्य संरम्भं सीताप्रत्यर्पणैषिणः । गुरुर्विधिबलापेक्षी शमयामास धन्विनः ॥ ८५ ॥
ऋषीन्विसृज्य यज्ञान्ते सुहृदश्च पुरस्कृतान् । रामः सीतागतं स्नेहं निदधे तदपत्ययोः ॥ ८६ ॥
युधाजितश्च सन्देशात्स देशं सिन्धुनामकम् । ददौ दत्तप्रभावाय भरताय भृतप्रजः ॥ ८७ ॥
भरतस्तत्र गन्धर्वान्युधि निर्जित्य केवलम् । आतोद्यं ग्राहयामास समत्याजयदायुधम् ॥ ८८ ॥
स तक्षपुष्कलौ पुत्रौ राजधान्योस्तदाख्ययोः । अभिषिच्याभिषेकार्हौ रामान्तिकमगात्पुनः ॥
अङ्गदं चन्द्रकेतुं च लक्ष्मणोऽप्यात्मसम्भवौ । शासनाद्रघुनाथस्य चक्रे कारापथेश्वरौ ॥ ९० ॥
इत्यारोपितपुत्रास्ते जननीनां जनेश्वराः । भर्तृलोकप्रपन्नानां निवापान्विदधुः क्रमात् ॥ ९१ ॥
उपेत्य मुनिवेषोऽथ कालः प्रोवाच राघवम् । रहःसंवादिनौ पश्येदावां यस्तं त्यजेरिति ॥ ९२ ॥
तथेति प्रतिपन्नाय विवृतात्मा नृपाय सः । आचख्यौ दिवमध्यास्व शासनात्परमेष्ठिनः ॥ ९३ ॥
विद्वानपि तयोर्द्वाःस्थः समयं लक्ष्मणोऽभिनत् । भीतो दुर्वासिसः शापाद्रामसन्दर्शनार्थिनः ॥
स गत्वा सरयूतीरं देहत्यागेन योगवित् । चकारावितथां भ्रातुः प्रतिज्ञां पूर्वजन्मनः ॥ ९५ ॥

तुम मुझे अपनी गोद में छिपा लो' ॥ ८१ ॥ पतिव्रता सीता के ऐसा कहते ही पृथ्वी फट गयी और तुरन्त उसमें से बिजली के समान चमकीला एक तेजोमण्डल निकला ॥ ८२ ॥ उसमें से नाग के फण पर रखे सिंहासन पर बैठी और समुद्र को करधनी पहने साक्षात् धरती माता प्रकट हो गयीं ॥ ८३ ॥ उन्होंने उन सीताजी को अपनी गोद में ले लिया, जो राम पर आँखें लगाये हुए थीं। राम कहते ही रह गये—'हैं, यह क्या करती हो, यह क्या करती हो?' परन्तु वे सबके देखते-देखते पाताल में समा गयीं ॥ ८४ ॥ इससे राम पृथ्वी पर क्रुद्ध हो गये और पृथ्वी से सीता को लौटा लेने के लिए उन्होंने धनुष उठाया। परन्तु वसिष्ठजी तो सब कुछ जानते थे, उन्होंने ही राम को समझाया और उनका कोप शान्त किया ॥ ८५ ॥ वह यज्ञ समाप्त हो जाने पर राम ने ऋषियों तथा अभ्यागतों को पुरस्कृत करके विदा किया। तदनन्तर वे सीता पर रहने वाला प्रेम उनके पुत्रों पर रख कर राजकार्य करने लगे ॥ ८६ ॥ भरत के मामा युधाजित् के कहने पर प्रजापालक राम ने सिन्धु देश का राज्य प्रभावशाली भरत को दे दिया ॥ ८७ ॥ वहाँ भरत ने गन्धर्वों को युद्ध में जीतकर उनके हाथों में वीणा दे दी और शस्त्र छुड़वा दिया ॥ ८८ ॥ बाद में उन्होंने तक्ष और पुष्कल नामक अपने योग्य पुत्रों को तक्ष और पुष्कल की राजधानियों का राजा बना दिया और स्वयं राम के पास अयोध्या लौट आये ॥ ८९ ॥ राम की आज्ञा से लक्ष्मण ने अङ्गद और चन्द्रकेतु नाम के अपने दोनों पुत्रों को कारापथ का राजा बना दिया ॥ ९० ॥ इस प्रकार पुत्रों को राज्य देकर उन चारों भाइयों ने क्रमशः अपनी स्वर्गीया माताओं के श्राद्ध आदि संस्कार सम्पन्न किये ॥ ९१ ॥ कुछ समय बाद एक दिन राम के पास मुनि के वेश में काल आया और कहने लगा—'हम आपसे एकान्त में कुछ बातें करेंगे। हम लोगों की वार्ता में जो आये, उसे देश-निकाला दे दें ॥ ९२ ॥ राम ने कहा—'अच्छी बात है'। तब उसने अपना असली रूप दिखलाया और कहा कि 'ब्रह्माजी की आज्ञा है कि अब आप चलकर स्वर्ग में रहें' ॥ ९३ ॥ उन दोनों में बात हो ही रही थी कि इसी बीच दुर्वासा मुनि आ गये। उन्होंने द्वार पर बैठे हुए लक्ष्मण से कहा—'अभी जाकर राम से कहो कि मैं आया हूँ'। लक्ष्मण तो जानते ही थे कि जो इस समय राम के पास जायेगा, उसका देश-निकाला होगा। फिर भी मुनि के शाप से डरकर उन दोनों की बात-चीत के बीच में ही पहुँचकर उन्होंने वह शर्त तोड़ दी ॥ ९४ ॥ वहाँ से चलकर योगमार्ग के विज्ञ लक्ष्मण सरयू के तट पर गये और योगबल से शरीर

तस्मिन्नात्मचतुर्भागे प्राङ्नाकमधितस्थुषि । राघवः शिथिलं तस्थौ भुवि धर्मस्त्रिपादिव ॥ ९६ ॥
स निवेश्य कुशावत्यां रिपुनागाङ्कुशं कुशम् । शरावत्यां सतां सूक्तैर्जनिताश्रुलवं लवम् ॥ ९७ ॥
उदक्प्रतस्थे स्थिरधीः सानुजोऽग्निपुरःसरः । अन्वितः पतिवात्सल्याद्गृहवर्जमयोध्यया ॥ ९८ ॥
जगृहुस्तस्य चित्तज्ञाः पदवीं हरिराक्षसाः । कदम्बमुकुलस्थूलैरभिवृष्टां प्रजाश्रुभिः ॥ ९९ ॥
उपस्थितविमानेन तेन भक्तानुकम्पिना । चक्रे त्रिदिवनिःश्रेणिः सरयूरनुयायिनाम् ॥ १०० ॥
यद्गोप्रतरकल्पोऽभूत्सम्मर्दस्तत्र मज्जताम् । अतस्तदाख्यया तीर्थं पावनं भुवि पप्रथे ॥ १०१ ॥
स विभुर्विबुधांशेषु प्रतिपन्नात्ममूर्तिषु । त्रिदशीभूतपौराणां स्वर्गान्तरमकल्पयत् ॥ १०२ ॥
निर्वर्त्यैवं दशमुखशिरश्छेदकार्यं सुराणां
विष्वक्सेनः स्वतनुमविशत्सर्वलोकप्रतिष्ठाम् ।
लङ्कानाथं पवनतनयं चोभयं स्थापयित्वा
कीर्तिस्तम्भद्वयमिव गिरौ दक्षिणे चोत्तरे च ॥ १०३ ॥

इति महाकविकालिदासकृतौ रघुवंशे महाकाव्ये राम-
स्वर्गारोहणो नाम पञ्चदशः सर्गः ॥ १५ ॥

छोड़कर उन्होंने बडे भाई के प्रतिज्ञा की रक्षा कर ली ॥ ९५ ॥ इस प्रकार अपने चौथाई अंश लक्ष्मण के स्वर्गवासी हो जाने पर राम वैसे ही ढीले पड़ गये, जैसे त्रेतायुग में पृथ्वी पर तीन पैर वाला धर्म ढीला पड़ जाता है ॥ ९६ ॥ तदनन्तर स्थिरबुद्धि राम ने शत्रुरूपी हाथियों के लिए अंकुश सरीखे भयदायक कुश को कुशावती का राज्य दे दिया और अपने मधुर वचनों द्वारा सज्जनों की आँखों में आँसू ला देने वाले लव को उन्होंने शरावती का राजा बनाया ॥ ९७ ॥ तदनन्तर अग्निहोत्र की अग्नि आगे करके अपने भाइयों के साथ राम उत्तर की ओर चल पड़े। अयोध्यावासियों ने जब यह सुना तो प्रेमवश वे सब भी घरों को छोड़कर उनके साथ हो लिये ॥ ९८ ॥ राम के मन की बात जानने वाले वानर और राक्षस भी उनके पीछे-पीछे चल दिये। जिस मार्ग से वे चल रहे थे, वह मार्ग राम के पीछे-पीछे जाने वाली जनता के स्थूल अश्रुबिन्दुओं से भींग गया ॥ ९९ ॥ इस प्रकार भक्तवत्सल राम विमान पर चढकर स्वर्ग चले गये। सरयू को उन्होंने अपने पीछे आने वालों के लिए स्वर्ग की सीढी बना दिया। अर्थात् जो सरयू में स्नान करता था, वह तुरन्त स्वर्ग चला जाता था ॥ १०० ॥ अतएव वहाँ पर स्नानार्थियों की वैसी ही भीड़ हुई, जैसे गायों को नदी पार कराते समय होती है। इसीलिए वह पवित्र स्थान संसार में 'गोप्रतरतीर्थ' के नाम से प्रसिद्ध हो गया ॥ १०१ ॥ तदनन्तर देवताओं के अंशधारी रीछ-वानरों ने भी अपना देवरूप धारण कर लिया। इसलिए स्वर्ग में इतने लोग पहुँच गये कि सामर्थ्यशाली राम को देवपद-प्राप्त अयोध्यावासियों को रहने के लिए एक दूसरा ही स्वर्ग बनाना पड़ा ॥ १०२ ॥ इस प्रकार विष्णु भगवान् ने रावण का वध करके देवताओं का कार्य पूरा किया। फिर उत्तरगिरि (हिमालय) पर हनुमान्जी को तथा दक्षिणगिरि (त्रिकूट पर्वत) पर विभीषणजी को अपने दो कीर्तिस्तम्भों के रूप में स्थापित करके वे अपने विराट् शरीर में लीन हो गये ॥ १०३ ॥

इस प्रकार रघुवंशमहाकाव्य में राम-स्वर्गारोहण नामक
पन्द्रहवाँ सर्ग समाप्त ॥ १५ ॥

षोडशः सर्गः

अथेतरे सप्त रघुप्रवीरा ज्येष्ठं पुरोजन्मतया गुणैश्च।
चक्रुः कुशं रत्नविशेषभाजं सौभ्रात्रमेषां हि कुलानुसारि॥ १॥
ते सेतुवार्तागजबन्धमुख्यैरभ्युच्छ्रिताः कर्मभिरप्यवन्ध्यैः।
अन्योन्यदेशप्रविभागसीमां वेलां समुद्रा इव न व्यतीयुः॥ २॥
चतुर्भुजांशप्रभवः स तेषां दानप्रवृत्तेरनुपारतानाम्।
सुरद्विपानामिव सामयोनिर्भिन्नोऽष्टधा विप्रससार वंशः॥ ३॥
अथार्धरात्रे स्तिमितप्रदीपे शय्यागृहे सुप्तजने प्रबुद्धः।
कुशः प्रवासस्थकलत्रवेषामदृष्टपूर्वां वनितामपश्यत्॥ ४॥
सा साधुसाधारणपार्थिवर्द्धेः स्थित्वा पुरस्तात्पुरुहूतभासः।
जेतुः परेषां जयशब्दपूर्वं तस्याञ्जलिं बन्धुमतो बबन्ध॥ ५॥
अथानपोढार्गलमप्यगारं छायामिवादर्शतलं प्रविष्टाम्।
सविस्मयो दाशरथेस्तनूजः प्रोवाच पूर्वार्धविसृष्टतल्पः॥ ६॥
लब्धान्तरा सावरणेऽपि गेहे योगप्रभावो न च लक्ष्यते ते।
विभर्षि चाकारमनिर्वृतानां मृणालिनी हैममिवोपरागम्॥ ७॥
का त्वं शुभे! कस्य परिग्रहो वा किं वा मदभ्यागमकारणं ते।
आचक्ष्व मत्वा वशिनां रघूणां मनः परस्त्रीविमुखप्रवृत्तिः॥ ८॥

तदनन्तर लव आदि सात रघुवंशी वीरों ने अपने सबसे बड़े भाई गुणवान् कुश को अग्रणी बनाया। क्योंकि भ्रातृप्रेम उनके कुल का धर्म था॥ १॥ वे सभी कर्मठ भाई पुल बाँधने, कृषि की रक्षा करने और हाथियों को पकड़ने में कुशल थे। तथापि जैसे समुद्र अपने तट का उल्लंघन नहीं करता, वैसे ही उनमें से किसी ने भी अपने राज्य की सीमा लाँघकर दूसरे भाई के राज्य की सीमा में प्रवेश करने का प्रयत्न नहीं किया॥ २॥ जैसे सामवेद के कुल में उत्पन्न मतवाले दिग्गजों का वंश आठ भागों में बँट गया था, वैसे ही विष्णु के अंश से उत्पन्न राम का त्यागी कुल भी आठ भागों में फैल गया॥ ३॥ एक दिन आधी रात के समय जब शयनकक्ष का दीपक टिमटिमा रहा था और सब लोग सोये हुए थे, तब कुश को एक ऐसी स्त्री दिखलायी दी, जिसे उन्होंने पहले कभी नहीं देखा था। उसके वेश को देखकर ऐसा लगता था कि जैसे उसका पति परदेश चला गया है॥ ४॥ अपनी सम्पत्ति से सज्जनों का उपकार करने वाले, इन्द्र के समान तेजस्वी और शत्रुओं को जीतने वाले कुश के आगे वह स्त्री उनकी जय-जयकार करती हुई हाथ जोड़कर खड़ी हो गयी॥ ५॥ दर्पण में जैसे मुँह का प्रतिबिम्ब प्रविष्ट हो जाता है, वैसे ही वह स्त्री द्वार बन्द रहने पर भी घर के भीतर आ पहुँची थी। उसे देखकर कुश को बहुत विस्मय हुआ। वे शय्या पर आधे शरीर से उठकर उससे बोले—॥ ६॥ तुम हमारे इस बन्द भवन में सहसा घुस आयी हो, परन्तु तुम्हारे मुख से यह नहीं प्रकट होता कि तुम कोई योगिनी हो। क्योंकि तुम पाले से मारी हुई कमलिनी जैसी उदास दीख रही हो॥ ७॥ हे शुभे! तुम कौन हो? तुम्हारे पति का क्या नाम है और मेरे पास किस काम से आयी हो? लेकिन तुम यह समझकर कुछ मत कहना कि रघुवंशियों का चित्त परायी स्त्री की ओर आकृष्ट नहीं होता॥ ८॥ स्त्री बोली—भगवान् राम जब

तमब्रवीत्सा गुरुणाऽनवद्या या नीतपौरा स्वपदोन्मुखेन।
तस्याः पुरः सम्प्रति वीतनाथां जानीहि राजन्नधिदेवतां माम्॥ ९॥
वस्वौकसारामभिभूय साऽहं सौराज्यबद्धोत्सवया विभूत्या।
समग्रशक्तौ त्वयि सूर्यवंश्ये सति प्रपन्ना करुणामवस्थाम्॥ १०॥
विशीर्णतल्पाट्टशतो निवेशः पर्यस्तशालः प्रभुणा विना मे।
विडम्बयत्यस्तनिमग्नसूर्यं दिनान्तमुग्रानिलभिन्नमेघम्॥ ११॥
निशासु भास्वत्कलनूपुराणां यः सञ्चरोऽभूदभिसारिकाणाम्।
नन्दन्मुखोल्काविचितामिषाभिः स वाह्यते राजपथः शिवाभिः॥ १२॥
आस्फालितं यत्प्रमदाकराग्रैर्मृदङ्गधीरध्वनिमन्वगच्छत्।
वन्यैरिदानीं महिषैस्तदम्भः शृङ्गाहतं क्रोशति दीर्घिकाणाम्॥ १३॥
वृक्षेशया यष्टिनिवासभङ्गान्मृदङ्गशब्दापगमादलास्याः।
प्राप्ता दवोल्काहतशेषवर्हाः क्रीडामयूरा वनबर्हिणत्वम्॥ १४॥
सोपानमार्गेषु च येषु रामा निक्षिप्तवत्यश्चरणान्सरागान्।
सद्योहतन्यङ्कुभिरस्रदिग्धं व्याघ्रैः पदं तेषु निधीयते मे॥ १५॥
चित्रद्विपाः पद्मवनावतीर्णाः करेणुभिर्दत्तमृणालभङ्गाः।
नखाङ्कुशाघातविभिन्नकुम्भाः संरब्धसिंहप्रहृतं वहन्ति॥ १६॥
स्तम्भेषु योषित्प्रतियातनानामुत्क्रान्तवर्णक्रमधूसराणाम्।
स्तनोत्तरीयाणि भवन्ति सङ्गान्निर्मोकपट्टाः फणिभिर्विमुक्ताः॥ १७॥

वैकुण्ठ जाने लगे, तब इस निर्दोष अयोध्यापुरी के निवासियों को भी साथ लेते गये। हे राजन्! मैं उसी अनाथिनी अयोध्यापुरी की अधिष्ठात्री देवी हूँ॥ ९॥ पहले सुशासन के कारण मैं इतनी ऐश्वर्यशालिनी हो गयी थी कि मेरे आगे कुबेर की अलकापुरी भी फीकी लगती थी। अब तुम्हारे जैसे प्रतापी राजा के रहते हुए भी मेरी बड़ी हीन दशा हो गयी है॥ १०॥ स्वामी के अभाव में सैकड़ों तल्लों वाली अट्टालिकाओं के टूट जाने से मेरी निवासभूमि अयोध्या ऐसी उदास लगती है, जैसे सूर्यास्तकालीन वह सन्ध्या हो कि जिसमें वायु के झोंके से छितराये हुए बादल कहीं-कहीं दिखलायी देते हों॥ ११॥ रात के समय पहले जिन सड़कों पर चमकीले बिछुओंवाली अभिसारिकाएँ चलती थीं, उन पर आजकल मांस खोजनेवाली वे सियारिनें घूमती हैं, जिनके मुख से चिल्लाते समय आग की लपटें निकलती हैं॥ १२॥ पहले नगर की जिन बावलियों का जल जलक्रीडानिरत सुन्दरियों के हाथ के थपेडों से मृदङ्ग के समान गम्भीर ध्वनि करता था, वही आजकल जङ्गली भैंसों की सींगों की चोट खा-खाकर चिल्लाता रहता है॥ १३॥ अड्डों के टूट जाने से यहाँ के मोर अब वृक्षों पर बैठते हैं और मृदङ्ग न बजने के कारण उन्होंने नाचना भी छोड़ दिया है। वे अब उन जंगली मोरों जैसे लगते हैं, जिनकी पूछें वन की आग से झुलस गयी हों॥ १४॥ जिन सीढियों पर पहले सुन्दरियाँ अपने महावर लगे लाल-लाल पैर रखती हुई चलती थीं, उन्हीं पर मृगघाती बाघ अपने रक्तलिप्त लाल पैर रखते हुए चलते हैं॥ १५॥ जिन चित्रों में दिखलाया गया था कि हाथी कमल के सरोवर में उतर रहे हैं और हथिनियाँ उन्हें सूँड़ से कमल का डण्ठल तोड़-तोडकर दे रही है, उन चित्रलिखित हाथियों के मस्तकों को सच्चे हाथी का मस्तक समझकर सिंहों ने अपने नखों से फाड डाला है॥ १६॥ जिन खम्भों में स्त्रियों की मूर्तियाँ बनी हुई थीं, आज-कल उन मूर्तियों का रंग उड़ गया है और वे धुँधली पड़ गयी हैं। उन खम्भों में जो साँप लिपटें उनमें से उनकी केंचुलें छूटकर उन मूर्तियों में सॅटकर ऐसी लगती हैं कि जैसे उन पत्थर की स्त्रियों ने स्तन ढँकने के लिए

कालान्तरश्यामसुधेषु नक्तमितस्ततो रूढतृणाङ्कुरेषु।
त एव मुक्तागुणशुद्धयोऽपि हर्म्येषु मूर्च्छन्ति न चन्द्रपादाः॥ १८॥
आवर्ज्य शाखाः सदयं च यासां पुष्पाण्युपात्तानि विलासिनीभिः।
वन्यैः पुलिन्दैरिव वानरैस्ताः क्लिश्यन्त उद्यानलता मदीयाः॥ १९॥
रात्रावनाविष्कृतदीपभासः कान्तामुखश्रीवियुता दिवाऽपि।
तिरस्क्रियन्ते कृमितन्तुजालैर्विच्छिन्नधूमप्रसरा गवाक्षाः॥ २०॥
बलिक्रियावर्जितसैकतानि स्नानीयसंसर्गमनाप्नुवन्ति।
उपान्तवानीरगृहाणि दृष्ट्वा शून्यानि दूये सरयूजलानि॥ २१॥
तदर्हसीमां वसतिं विसृज्य मामभ्युपेतुं कुलराजधानीम्।
हित्वा तनुं कारणमानुषीं तां यथा गुरुस्ते परमात्ममूर्तिम्॥ २२॥
तथेति तस्याः प्रणयं प्रतीतः प्रत्यग्रहीत् प्राग्रहरो रघूणाम्।
पूरप्यभिव्यक्तमुखप्रसादा शरीरबन्धेन तिरोबभूव॥ २३॥
तदद्भुतं संसदि रात्रिवृत्तं प्रातर्द्विजेभ्यो नृपतिः शशंस।
श्रुत्वा त एनं कुलराजधान्या साक्षात्पतित्वे वृतमभ्यनन्दन्॥ २४॥
कुशावतीं श्रोत्रियसात् स कृत्वा यात्रानुकूलेऽहनि सावरोधः।
अनुद्रुतो वायुरिवाभ्रवृन्दैः सैन्यैरयोध्याभिमुखः प्रतस्थे॥ २५॥
सा केतुमालोपवना बृहद्भिर्विहारशैलानुगतेव नागैः।
सेना रथोदारगृहा प्रयाणे तस्याभवज्जङ्गमराजधानी॥ २६॥

कोई कपड़ा डाल लिया हो॥ १७॥ पहले भवनों पर मोती की माला जैसी शुभ्र चाँदनी चमकती थी, उन पर अब वह नहीं चमकती। क्योंकि बहुत दिनों से चूना न लगने से उन कोठों के चूने का रंग काला पड़ गया है और उन पर जहाँ-तहाँ घास उग आयी है॥ १८॥ पहले उद्यानों की जिन लताओं को धीरे से झुकाकर सुन्दर स्त्रियाँ फूल तोड़ती थीं, उन मेरी प्रिय लताओं को वन्य भीलों के समान उत्पाती वन्दर झकझोरते हैं॥ १९॥ अब अटारियों के झरोखों से न रात को दीपकों की किरणें निकलती हैं, न दिन में सुन्दरियों का मुख दीखता है और न ही कहीं से अगरु का धुआँ ही निकलता है। अब वे झरोखे मकड़ियों के जालों से भर गये हैं॥ २०॥ यह देखकर मुझे बड़ा दुःख होता है कि अब न सरयू की रेती पर देवताओं की पूजा की जाती है और न स्त्रियों के स्नान करने पर उनके शरीर से अंगराग आदि की सुगन्ध निकलती है। सरयू के तट पर बनी हुई बेत की झोपड़ियाँ भी सूनी पड़ी रहती हैं॥ २१॥ अतएव तुम्हारे पिता राम ने राक्षसों को मारने के लिए जो मानव शरीर धारण किया था, उसे छोड़कर जैसे वे परमात्मा में लीन हो गये, वैसे ही तुम भी यह नयी राजधानी कुशावती त्यागकर अपनी कुल-परम्परा की राजधानी अयोध्या में चलकर निवास करो॥ २२॥ कुश ने उसकी प्रार्थना स्वीकार करते हुए कहा—'ऐसा ही करेंगे'। यह सुनकर प्रसन्न मन से अयोध्या की अधिष्ठात्री देवी अन्तर्धान हो गयी॥ २३॥ रात की वह विस्मयजनक घटना राजा ने सवेरे सभा में ब्राह्मणों से कही। सो सुनकर ब्राह्मणों ने कुश की प्रशंसा की और कहा कि 'आप धन्य हैं, जिसे कुल की राजधानी ने स्वेच्छा से अपना पति चुना है'॥ २४॥ तदनन्तर उन्होंने कुशावती नगरी वेदपाठी ब्राह्मणों को दान करके दे दी और जैसे वायु के पीछे-पीछे बादल चलते हैं, वैसे ही अपनी सेना साथ लेकर वे शुभ मुहूर्त में अयोध्या की ओर चल पड़े॥ २५॥ उस यात्रा के समय चलती हुई कुश की सेना सचल राजधानी जैसी लगती थी। क्योंकि उसका ध्वजाओं वाला भाग लतायुक्त उपवनों जैसा, बड़े-बड़े हाथी बनावटी

तेनातपत्रामलमण्डलेन प्रस्थापितः पूर्वनिवासभूमिम्।
बभौ बलौघः शशिनोदितेन वेलामुदन्वानिव नीयमानः॥ २७॥
तस्य प्रयातस्य वरूथिनीनां पीडामपर्याप्तवतीव सोढुम्।
वसुन्धरा विष्णुपदं द्वितीयमध्यारुरोहेव रजश्छलेन॥ २८॥
उद्यच्छमाना गमनाय पश्चात्पुरो निवेशे पथि च व्रजन्ती।
सा यत्र सेना ददृशे नृपस्य तत्रैव सामग्र्यमतिं चकार॥ २९॥
तस्य द्विपानां मदवारिसेकात्खुराभिघाताच्च तुरङ्गमाणाम्।
रेणुः प्रपेदे पथि पङ्कभावं पङ्कोऽपि रेणुत्वमियाय नेतुः॥ ३०॥
मार्गेषिणी सा कटकान्तरेषु वैन्ध्येषु सेना बहुधा विभिन्ना।
चकार रेवेव महाविरावा बद्धप्रतिश्रुन्ति गुहामुखानि॥ ३१॥
स धातुभेदारुणयाननेमिः प्रभुः प्रयाणध्वनिमिश्रतूर्यः।
व्यलङ्घयद्विन्ध्यमुपायनानि पश्यन्पुलिन्दैरुपपादितानि॥ ३२॥
तीर्थे तदीये गजसेतुबन्धात् प्रतीपगामुत्तरतोऽस्य गङ्गाम्।
अयत्नबालव्यजनीबभूवुर्हंसा नभोलङ्घनलोलपक्षाः॥ ३३॥
स पूर्वजानां कपिलेन रोषाद्भस्मावशेषीकृतविग्रहाणाम्।
सुरालयप्राप्तिनिमित्तमम्भस्त्रैस्रोतसं नौलुलितं ववन्दे॥ ३४॥
इत्यध्वनः कैश्चिदहोभिरन्ते कूलं समासाद्य कुशः सरय्वाः।
वेदिप्रतिष्ठान्विततत्राध्वराणां यूपानपश्यच्छतशो रघूणाम्॥ ३५॥
आधूय शाखाः कुसुमद्रुमाणां स्पृष्ट्वा च शीतान्सरयूतरङ्गान्।
तं क्लान्तसैन्यं कुलराजधान्याः प्रत्युद्गमोपवनान्तवायुः॥ ३६॥

पर्वतों जैसे और रथ ऊँचा-ऊँचा अटारियों सरीखे लगते थे॥ २६॥ जैसे चन्द्रमा उदित होकर समुद्र को तट तक खींच लाता है, वैसे ही श्वेत छत्रधारी कुश अपनी सेना को रघुकुल की पुरानी राजधानी अयोध्या की ओर लेकर चले जा रहे थे॥ २७॥ जब कुश चले तो उनकी सेना का भार पृथ्वी नहीं सह सकी। अतएव उड़ती हुई धूल ऐसी लगती थी कि जैसे पृथ्वी विष्णु के दूसरे पद अर्थात् आकाश में पहुँची हों॥ २८॥ कुशावती से चलने की तैयारी करती हुई, आगे के पड़ाव पर पहुँची हुई या मार्ग में चलने वाली कुश की सम्पूर्ण सैनिक-टुकड़ियाँ पूरी सेना ही मालूम देती थीं॥ २९॥ कुश के हाथियों के मदजल से सिंचकर मार्ग की धूल कीचड़ बनी और वह कीचड़ भी घोड़ों की टापों से मर्दित होकर फिर धूल बन गयी॥ ३०॥ मार्ग भूल जाने से वह सेना विन्ध्याचल के आस-पास मार्ग ढूँढ़ती हुई कई भागों में बँट गयी। नर्मदा के समान उस सेना के गम्भीर गर्जन से पर्वत की गुफाएँ गूँज उठीं॥ ३१॥ गेरू आदि धातुओं से जिनके रथ के पहिये लाल हो गये थे और जिनकी चलती हुई सेना के शब्द से तुरही के शब्द भी दब गये थे, वे राजा कुश विन्ध्याचलनिवासी किरातों से प्राप्त भेंट की सामग्री को देखते हुए विन्ध्य से आगे बढ़े॥ ३२॥ वहाँ ही पश्चिम की ओर बहने वाली गंगाजी पर हाथियों का पुल बनाकर जब वे पार उतरने लगे, तब आकाश में उड़ते हुए चंचल पंखों वाले हंस कुश पर डुलाये जाते हुए चँवर के समान दीखने लगे॥ ३३॥ वहाँ कुश ने नावों के यातायात से चंचल जलवाली गंगाजी को प्रणाम किया। क्योंकि कपिल मुनि के कोप से जले हुए उनके पूर्वज (सगरपुत्र) उसी जल की कृपा से स्वर्ग गये थे॥ ३४॥ इस तरह मार्ग में कुछ दिन बिताकर कुश सरयू के तट पर पहुँचे। वहाँ उन्हें बड़े-बड़े यज्ञ करने वाले रघुवंशी राजाओं के गाड़े हुए सैकड़ों यज्ञस्तम्भ दिखलायी पड़े॥ ३५॥ अयोध्या

अथोपशल्ये रिपुमग्नशल्यस्तस्याः पुरः पौरसखः स राजा।
कुलध्वजस्तानि चलध्वजानि निवेशयामास बली बलानि॥ ३७॥
तां शिल्पिसङ्घैः प्रभुणा नियुक्तास्तथागतां सम्भृतसाधनत्वात्।
पुरं नवीचक्रुरपां विसर्गान्मेघा निदाघग्लपितामिवोर्वीम्॥ ३८॥
ततः सपर्यां सपशूपहारां पुरः परार्ध्यप्रतिमागृहायाः।
उपोषितैर्वास्तुविधानविद्भिर्निर्वर्तयामास रघुप्रवीरः॥ ३९॥
तस्याः स राजोपपदं निशान्तं कामीव कान्ताहृदयं प्रविश्य।
यथार्हमन्यैरनुजीविलोकं सम्भावयामास यथाप्रधानम्॥ ४०॥
स मन्दुरासंश्रयिभिस्तुरङ्गैः शालाविधिस्तम्भगतैश्च नागैः।
पूराबभासे विपणिस्थपण्या सर्वाङ्गनद्धाभरणेव नारी॥ ४१॥
वसन् स तस्यां वसतौ रघूणां पुराणशोभामधिरोपितायाम्।
न मैथिलेयः स्पृहयाम्बभूव भर्त्रे दिवो नाप्यलकेश्वराय॥ ४२॥
अथास्य रत्नग्रथितोत्तरीयमेकान्तपाण्डुस्तनलम्बिहारम्।
निःश्वासहार्यांशुकमाजगाम धर्मः प्रियावेषमिवोपदेष्टुम्॥ ४३॥
अगस्त्यचिह्नादयनात्समीपं दिगुत्तरा भास्वति सन्निवृत्ते।
आनन्दशीतामिव बाष्पवृष्टिं हिमस्रुतिं हैमवतीं ससर्ज॥ ४४॥
प्रवृद्धतापो दिवसोऽतिमात्रमत्यर्थमेव क्षणदा च तन्वी।
उभौ विरोधक्रियया विभिन्नौ जायापती सानुशयाविवास्ताम्॥ ४५॥

के उपवनों में वायु ने फूले हुए वृक्षों की डालियाँ कँपा कर सरयू के शीतल जल का स्पर्श करके थकी हुई सेना के साथ आये हुए कुश की अगवानी की॥ ३६॥ शत्रुविनाशक और प्रजाहितैषी राजा कुश ने फहराती हुई ध्वजावाली अपनी सेना को नगर के आस-पास वाले स्थानों में ठहरा दिया॥ ३७॥ जैसे बादल इन्द्र की आज्ञा से जल बरसाकर गरमी से तपी धरती को हरी-भरी कर देते हैं, वैसे ही कुश की आज्ञा से कारीगरों ने अपने यन्त्रों के सहारे अयोध्या को नया रूप दे दिया॥ ३८॥ तदनन्तर रघुकुलवीर कुश ने व्रती, उपवासी एवं वास्तु-विद्या में निपुण पंडितों द्वारा अनमोल मूर्तियों से भरे घरों वाली अयोध्या का विधिवत् पूजन कराके पशुओं की बलि दी॥ ३९॥ जैसे कोई कामी पुरुष स्त्री के हृदय में प्रविष्ट हो जाता है, वैसे ही कुश भी अयोध्या के राजमहल में प्रविष्ट हो गये और उन्होंने अपने मन्त्रियों आदि को रहने के लिए दूसरे अनेक भवन दिये॥ ४०॥ अयोध्या की बाजारों में सुन्दर वस्तुएँ सजी हुई थीं, घुडसाल में घोडे बंधे थ और हस्तिशालाओ में खम्भों से हाथी बँधे हुए थे। इस प्रकार वह नगरी ऐसी सुन्दर लगती थी, जैसे सारे शरीर में गहना पहने कोई स्त्री खड़ी हो॥ ४१॥ अब अयोध्या फिर पहले जैसी सुन्दर लगने लगी। उसमें निवास करते हुए जानकीजी के पुत्र कुश को ऐसा सुख मिला कि न तो उन्हें सुन्दरी अप्सराओ से भरे स्वर्ग के स्वामी बनने की इच्छा रह गयी और न असंख्य रत्नों वाली अलकापुरी ही पाने की चाह रही॥ ४२॥ तभी ग्रीष्म ऋतु आ गयी, जिसने मानो इन्हें अपनी उस प्रिया का स्मरण करा दिया—जिसकी ओढनी में रत्न जडे हों, जिसके गोरे-गोरे स्तनों पर मोतियों का हार लटका हुआ हो और जो साँस की हवा से उडने वाले महीन कपडे पहने हो॥ ४३॥ गर्मी से जो बर्फ गलने लगी, वह ऐसी लगी कि जैसे दक्षिण दिशा से सूर्य के लौट आने की प्रसन्नता में उत्तर दिशा ने हिमालय से आनन्द के ठंडे आँसुओ जैसी पानी की ठंडी धारा बहा दी हो॥ ४४॥ उस समय अत्यन्त ताप से भरे दिन और बहुत छोटी-छोटी रातें—ये दोनों उन पछताते

दिने दिने शैवलवन्त्यधस्तात्सोपानपर्वाणि विमुञ्चदम्भः।
उद्दण्डपद्मं गृहदीर्घिकाणां नारीनितम्बद्वयसं बभूव॥४६॥
वनेषु सायन्तनमल्लिकानां विजृम्भणोद्गन्धिषु कुड्मलेषु।
प्रत्येकनिक्षिप्तपदः सशब्दं सङ्ख्यामिवैषां भ्रमरश्चकार॥४७॥
स्वेदानुविद्धार्द्रनखक्षताङ्के भूयिष्ठसन्दष्टशिखं कपोले।
च्युतं न कर्णादपि कामिनीनां शिरीषपुष्पं सहसा पपात॥४८॥
यन्त्रप्रवाहैः शिशिरैः परीतान्रसेन धौतान्मलयोद्भवस्य।
शिलाविशेषानधिशय्य निन्युर्धिरागृहेष्वातपमृद्धिमन्तः॥४९॥
स्नानार्द्रमुक्तेष्वनुधूपवासं विन्यस्तसायन्तनमल्लिकेषु।
कामो वसन्तात्ययमन्दवीर्यः केशेषु लेभे बलमङ्गनानाम्॥५०॥
आपिञ्जरा बद्धरजःकणत्वान्मञ्जर्युदारा शुशुभेऽर्जुनस्य।
दग्ध्वाऽपि देहं गिरिशेन रोषात्खण्डीकृता ज्येव मनोभवस्य॥५१॥
मनोज्ञगन्धं सहकारभङ्गं पुराणशीधुं नवपाटलं च।
सम्बध्नता कामिजनेषु दोषाः सर्वे निदाघावधिना प्रमृष्टाः॥५२॥
जनस्य तस्मिन्समये विगाढे बभूवतुर्द्वौ सविशेषकान्तौ।
तापापनोदक्षमपादसेवौ स चोदयस्थौ नृपतिः शशी च॥५३॥
अथोर्मिलोलोन्मदराजहंसे रोधोलतापुष्पवहे सरय्वाः।
विहर्तुमिच्छा वनितासखस्य तस्याम्भसि ग्रीष्मसुखे बभूव॥५४॥

हुए पति-पत्नी सदृश दीखने लगे, जो आपस में झगड़ा करके एक-दूसरे से रूठ गये हों॥४५॥ अतिशय गर्मी मे घर की बावलियाँ सेवार जमी हुई सीढियाँ छोड़कर पीछे हटने लगीं और उनका पानी सूखने लगा। उनमें कमल की डंडियाँ दीखने लगीं और पानी घटकर स्त्रियों की कमरभर रह गया॥४६॥ वनों में चमेली खिल गयी और उसकी सुगन्ध सब ओर फैलने लगी। सन्ध्या को गुनगुनाते हुए भौंरे एक-एक फूल पर बैठकर जैसे उनकी गिनती करने लगे॥४७॥ स्त्रियों के गालों पर प्रियतम के हाथों द्वारा बने हुए नखक्षतों पर पसीने की बूँदें फैल जाती थीं और कान पर रखे हुए सिरस के फूलों की केसर उन पर सट जाती थी। अतएव जब वे फूल कान पर से खिसकते भी थे तो सहसा पृथ्वी पर नहीं गिर पडते थे॥४८॥ धनी लोग गर्मी में ठंडी रहने वाली उन खास तरह की शिलाओं पर सोकर दुपहरी बिताते थे, जो चन्दनमिश्रित जल से धुली होती थीं और जिनके चारों ओर जल की धाराएँ छूटती रहती थीं॥४९॥ वसन्त बीत जाने से जो कामदेव मन्द पड गया था, वह स्त्रियों के उन केशों में जा बसा, जो स्नान करने पर खोल दिये जाते थे और जिनमें धूप से सुगन्धित करने के बाद शाम को फूलने वाली चमेली के सुगन्धित फूल खोंस लिये जाया करते थे॥५०॥ पराग से परिपूर्ण कुछ पीली-पीली अर्जुन की मञ्जरी ऐसी लगती थी कि जैसे कामदेव का शरीर भस्म करने के पश्चात् शिवजी के हाथ टूटी हुई कामदेव के धनुष की डोरी पडी हो॥५१॥ उस समय मनोहर गन्ध वाला आम का बौर, पुरानी मदिरा और नये पाटल के फूल लाकर ग्रीष्म ऋतु ने कामी पुरुषों की सब न्यूनता पूर्ण कर दी॥५२॥ उस भीषण ग्रीष्म काल में उदित होकर ही दोनों प्रजा को बहुत प्रिय लगे। एक तो सेवा से प्रसन्न होने पर निर्धनता आदि सन्तापों को दूर करने वाले राजा कुश और दूसरे शीतल किरण से गर्मी का सन्ताप दूर करने वाले चन्द्रमा॥५३॥ एक दिन कुश की यह इच्छा हुई कि जल की लहर से मतवाले हंसों से युक्त तट की लताओं के फूल बहाने वाली और गर्मी में सुखदायिनी सरयू के जल में रानियों

स तीरभूमौ विहितोपकार्यामानायिभिस्तामपकृष्टनक्राम् ।
विगाहितुं श्रीमहिमानुरूपं प्रचक्रमे चक्रधरप्रभावः ॥ ५५ ॥
सा तीरसोपानपथावतारादन्योन्यकेयूरविघट्टनीभिः ।
सनूपुरक्षोभपदाभिरासीदुद्विग्नहंसा सरिदङ्गनाभिः ॥ ५६ ॥
परम्पराभ्युक्षणतत्पराणां तासां नृपो मज्जनरागदर्शी।
नौसंश्रयः पार्श्वगतां किरातीमुपात्तबालव्यजनां बभाषे ॥ ५७ ॥
पश्यावरोधैः शतशो मदीयैर्विगाह्यमानो गलिताङ्गरागैः ।
सन्ध्योदयः साभ्र इवैष वर्ण पुष्यत्यनेकं सरयूप्रवाहः ॥ ५८ ॥
विलुप्तमन्तःपुरसुन्दरीणां यदञ्जनं नौलुलिताभिरद्भिः ।
तद्वध्नतीभिर्मदरागशोभां विलोचनेषु प्रतिमुक्तमासाम् ॥ ५९ ॥
एता गुरुश्रोणिपयोधरत्वादात्मानमुद्वोढुमशक्नुवत्यः ।
गाढाङ्गदैर्बाहुभिरप्सु बालाः क्लेशोत्तरं रागवशात् प्लवन्ते ॥ ६० ॥
अमी शिरीषप्रसवावतंसाः प्रभ्रंशिनो वारिविहारिणीनाम्।
पारिप्लवाः स्रोतसि निम्नगायाः शैवाललोलांश्छलयन्ति मीनान् ॥ ६१ ॥
आसां जलास्फालनतत्पराणां मुक्ताफलस्पर्धिषु शीकरेषु।
पयोधरोत्सर्पिषु शीर्यमाणः संलक्ष्यते न च्छिदुरोऽपि हारः ॥ ६२ ॥
आवर्तशोभा नतनाभिकान्तेर्भङ्गे भ्रुवां द्वन्द्वचराः स्तनानाम्।
जातानि रूपावयवोपमानान्यदूरवर्तीनि विलासिनीनाम् ॥ ६३ ॥

के साथ विहार किया जाय ॥ ५४ ॥ ऐसा निश्चय करके विष्णु जैसे प्रभावशाली कुश सरयू के जल में विहार करने को चले। तदनुसार सरयू के तट पर डेरे तन गये और मल्लाहों ने ग्राह आदि जन्तुओं को सरयू से निकाल दिया ॥ ५५ ॥ कुश की रानियाँ सीढ़ियों से जब पानी में उतरने लगीं, उस समय उनके भुजवन्द एक-दूसरे से टकराने लगे, पैर के बिछुए बजने लगे और इन शब्दों को सुनकर सरयू के हंस उद्विग्न हो उठे ॥ ५६ ॥ तभी वे रानियाँ जल में उतरकर एक-दूसरे के ऊपर छींटे डालने लगीं। उन रानियों के स्नान की वह शोभा देखकर नाव पर बैठे हुए राजा कुश पास ही चँवर लेकर खड़ी किरातिनी से बोले ॥ ५७ ॥ देखो, मेरे रनवास की सैकड़ों रानियों के स्नान करने और उनके शरीर से धुले हुए अंगराग के मिल जाने से सरयू की धारा बादलों से भरी सन्ध्या जैसी रंग-बिरंगी दीख रही है ॥ ५८ ॥ नावों के चलने से जल में उठने वाली लहरों ने इन सुन्दरियों की आँखों का अञ्जन धोकर उसके बदले मदपान के समय की लाली लेकर इनकी आँखों में भर दी है ॥ ५९ ॥ बोझिल नितम्बों तथा स्तनों के कारण ये भलीभाँति तैर नहीं पातीं, तथापि खेल में सम्मिलित होने के कारण ये अपने मोटे-मोटे भुजबन्दों वाली बाँहों से जल में बड़ी कठिनाई से तैरती हैं ॥ ६० ॥ इन जलक्रीड़ानिरत रानियों के कानों से गिरे हुए सिरस के कर्णफूल नदी में तैर रहे हैं। इन्हें देखने वाली मछलियों को सेवार का भ्रम होता है और वे इन पर मुँह मार रही हैं ॥ ६१ ॥ देखो, जलक्रीड़ा में संलग्न रानियों को यह भी नहीं मालूम कि इनके हार टूट गये हैं और मोती बिखर गये हैं। वे मोतियों के समान दीखने वाले जलबिन्दुओं को ही मोती समझ बैठी हैं और इनका ख्याल है कि हार नहीं टूटा है ॥ ६२ ॥ देख, सुन्दरी स्त्रियों के के अंगों की तरह जो वस्तुएँ प्रसिद्ध हैं वे सब इन सुन्दरियों के पास स्वतः जुट गयी भँवर इनकी गहरी नाभि के सदृश, लहरें भौंहों के समान और चकवा-च

तीरस्थलीबर्हिभिरुत्कलापैः प्रस्निग्धकेकैरभिनन्द्यमानम्।
श्रोत्रेषु सम्मूर्च्छति रक्तमासां गीतानुगं वारिमृदङ्गवाद्यम्॥ ६४॥
सन्दष्टवस्त्रेष्वबलानितम्बेष्विन्दुप्रकाशान्तरितोडुतुल्याः ।
अमी जलापूरितसूत्रमार्गा मौनं भजन्ते रशनाकलापाः॥ ६५॥
एताः करोत्पीडितवारिधारा दर्पात्सखीभिर्वदनेषु सिक्ताः।
वक्त्रेतरागैरलकैस्तरुण्यश्चूर्णारुणान् वारिलवान् वमन्ति॥ ६६॥
उद्बन्धकेशश्च्युतपत्रलेखो विश्लेषिमुक्ताफलपत्रवेष्टः।
मनोज्ञ एव प्रमदामुखानामम्भोविहाराकुलितोऽपि वेषः॥ ६७॥
स नौविमानादवतीर्य रेमे विलोलहारः सह तामिरप्सु।
स्कन्धावलग्नोद्धृतपद्मिनीकः करेणुभिर्वन्य इव द्विपेन्द्रः॥ ६८॥
ततो नृपेणानुगताः स्त्रियस्ता भ्राजिष्णुना सातिशयं विरेजुः।
प्रागेव मुक्ता नयनाभिरामाः प्राप्येन्द्रनीलं किमुतोन्मयूखम्॥ ६९॥
वर्णोदकैः काञ्चनभृङ्गमुक्तैस्तमायताक्ष्यः प्रणयादसिञ्चन्।
तथागतः सोऽतितरां बभासे सधातुनिष्यन्द इवाद्रिराजः॥ ७०॥
तेनावरोधप्रमदासखेन विगाहमानेन सरिद्वरां ताम्।
आकाशगङ्गारतिरप्सरोभिर्वृतो मरुत्वाननुयातलीलः॥ ७१॥
यत्कुम्भयोनेरधिगम्य रामः कुशाय राज्येन समं ददेश।
तदस्य जैत्राभरणं विहर्तुरज्ञातपातं सलिले ममज्ज॥ ७२॥

हैं॥ ६३॥ गाती हुई ये जो मृदंग बजाने के समान थपकी दे-देकर जल पीट रही हैं, उसे सुनकर तट पर बैठे हुए मोर अपनी पूँछ उठाकर और बोलकर उनका अभिनन्दन करते हैं॥ ६४॥ अपने नितम्बों पर रानियों ने श्वेत वस्त्र लपेट लिया है, उसके नीचे करधनी के घुंघरू चाँदनी से ढके हुए तारे जैसे दीखते हैं। उनके डोरों में जल भर जाने से इन स्त्रियों के इधर-उधर दौड़ने पर भी ये बजते नहीं हैं॥ ६५॥ इनकी सखियाँ जब इनके मुँह पर पानी डालती हैं और ये भी अहंकार से अपनी सखियों पर पानी उछालती हैं, तब इनके काँधे लटके हुए बालों से कुंकुम-मिश्रित लाल रंग की बूँदें टपकने लगती हैं॥ ६६॥ यद्यपि स्नान के कारण बाल खुल जाने, मुँह और स्तनों पर बनी हुई चित्रकारी धुल जाने तथा मोतियों के कर्णफूल कान से निकल जाने पर स्त्रियों का वेश अस्त-व्यस्त हो गया है, तथापि ये कितनी सुन्दर लग रही हैं॥ ६७॥ ऐसा कहकर कुश भी नौका से पानी में उतर पड़े और जैसे कमलिनियों को कन्धे पर लटकाये हुए जंगली हाथी हथिनियों के साथ जलक्रीडा करते हैं वैसे ही हिलते हुए हारवाले कुश भी उन स्त्रियों के साथ जल-विहार करने लगे॥ ६८॥ उस कान्तिमान् राजा के साथ जलक्रीड़ा करती हुई वे रानियाँ और भी अधिक सुन्दर लगने लगीं। क्योंकि मोती यों ही सुन्दर होते हैं, फिर यदि वह इन्द्रनीलमणि के साथ मिल जाय, तब उसकी शोभा का क्या कहना॥ ६९॥ तब वे स्त्रियाँ सोने की पिचकारियों से रंग छोड़-छोड़कर राजा कुश को भिंगोने लगीं। उस समय वे ऐसे दीखने लगे, जैसे पर्वतराज हिमालय पर से गेरू का झरना झर रहा हो॥ ७०॥ उन स्त्रियों के साथ सरयू में जलक्रीडा करते समय कुश ऐसे लगते थे, जैसे देवराज इन्द्र स्वर्गीय अप्सराओं के साथ आकाशगंगा में जलक्रीड़ा कर रहे हों॥ ७१॥ अगस्त्य ऋषि ने राम को जैत्र (सदा जीतने वाला) जो आभूषण दिया था, उसे राम ने राज्य के साथ ही कुश को दे दिया था। जलक्रीडा करते समय सहसा वह आभूषण पानी में गिर गया और किसी

स्नात्वा यथाकाममसौ सदारस्तीरोपकार्यां गतमात्र एव।
दिव्येन शून्यं वलयेन बाहुमपोढनेपथ्यविधिर्ददर्श॥ ७३॥
जयश्रियः संवननं यतस्तदामुक्तपूर्वं गुरुणा च यस्मात्।
सेहेऽस्य न भ्रंशमतो न लोभात्स तुल्यपुष्पाभरणो हि धीरः॥ ७४॥
ततः समाज्ञापयदाशु सर्वानानायिनस्तद्विचये नदीष्णान्।
वन्ध्यश्रमास्ते सरयूं विगाह्य तमूचुरम्लानमुखप्रसादाः॥ ७५॥
कृतः प्रयत्नो न च देव! लब्धं मग्नं पयस्याभरणोत्तमं ते।
नागेन लौल्यात्कुमुदेन नूनमुपात्तमन्तर्हृदवासिना तत्॥ ७६॥
ततः स कृत्वा धनुराततज्यं धनुर्धरः कोपविलोहिताक्षः।
गारुत्मतं तीरगतस्तपस्वी भुजङ्गनाशाय समाददेऽस्त्रम्॥ ७७॥
तस्मिन् ह्रदः संहितमात्र एव क्षोभात्समाविद्धतरङ्गहस्तः।
रोधांसि निघ्नन्नवपातमग्नः करीव वन्यः परुषं ररास॥ ७८॥
तस्मात् समुद्रादिव मथ्यमानादुदवृत्तनक्रात् सहसोन्ममज्ज।
लक्ष्म्येव सार्धं सुरराजवृक्षः कन्यां पुरस्कृत्य भुजङ्गराजः॥ ७९॥
विभूषणप्रत्युपहारहस्तमुपस्थितं वीक्ष्य विशाम्पतिस्तम्।
सौपर्णमस्त्रं प्रतिसञ्जहार प्रह्वेष्वनिर्बन्धरुषो हि सन्तः॥ ८०॥
त्रैलोक्यनाथप्रभवं प्रभावात्कुशं द्विषामङ्कुशमस्त्रविद्वान्।
मनोन्नतेनाप्यभिवन्द्य मूर्ध्ना मूर्धाभिषिक्तं कुमुदो बभाषे॥ ८१॥

को इस बात का ज्ञान ही नहीं रहा॥ ७२॥ इस प्रकार रानियों के साथ यथेच्छ जलक्रीडा करके कुश जब जल मे बाहर निकले और डेरे पर गये, तब कपडे बदलने के पहले ही उन्होंने देखा कि भुजा पर मे वह दिव्य आभूषण गायब है॥ ७३॥ यद्यपि बुद्धिमान् राजा कुश फूल और आभूषण दोनों को बराबर समझते थे, अतएव आभूषण के खो जाने का इसलिए दु:ख नहीं हुआ कि वह बहुमूल्य था, बल्कि इसलिए दु:ख हुआ कि वह आभूषण विजयलक्ष्मी प्राप्त करने वाला और अपने पिता राम का चिह्न था॥ ७४॥ अतएव उन्होंने सब धीवरों को वह आभूषण ढूँढने की आज्ञा दी। बहुत देर तक उन लोगों ने पानी में टटोला, परन्तु उनका सब परिश्रम व्यर्थ हो गया। तब वे कुश के पास आकर बोले—॥ ७५॥ हे देव! बहुत परिश्रम करने पर भी हम लोग जल में गिरे हुए आपके आभूषण को नहीं पा सके। ऐसा लगता है कि इस जल में रहने वाले कुमुद नाम के नाग ने लोभवश चुरा लिया है॥ ७६॥ यह सुना वैसे ही कुश की आँखें क्रोध मे लाल हो गयीं। तट पर खडे होकर उन्होंने अपना धनुष सम्हाला और नाग को नष्ट करने के लिए उस पर गारुडास्त्र चढा लिया॥ ७७॥ उनके धनुष चढाते ही उस सरोवर का जल खलबलाता हुआ अपना तरंग रूपी हाथ उठाकर तट को तोडता हुआ इस तरह गरजने लगा, जैसे गड्ढे में गिरा हुआ कोई हाथी चिग्घाड रहा हो॥ ७८॥ समुद्र के समान उस जल को मथा जाता देखकर नक्र-घड़ियाल आदि जीव घबरा उठे। इतने में उस जल में से एक कन्या को आगे किये नागराज कुमुद इस प्रकार निकला, जैसे लक्ष्मी को साथ लेकर कल्पवृक्ष निकला हो॥ ७९॥ राजा कुश ने देखा कि कुमुद के हाथ में वही आभूषण विद्यमान है, इसलिए उन्होंने धनुष पर से गारुडास्त्र उतार लिया। क्योंकि सज्जन लोग ऐसे लोगों पर क्रोध नहीं करते हैं, जो विनम्र होकर उनके समक्ष पहुँच जाते हैं॥ ८०॥ त्रिलोकीनाथ राजा राम के पुत्र तथा शत्रुओं को अंकुश सदृश दु:ख देने वाले कुश को अभिमान से उठा हुआ अपना सिर नवाकर कुमुद ने प्रणाम किया। क्योंकि वह कुश के बाण की शक्ति को भलीभाँति

अवैमि कार्यान्तरमानुषस्य विष्णोः सुताख्यामपरां तनुं त्वाम्।
सोऽहं कथं नाम तवाचरेयमाराधनीयस्य धृतेर्विघातम्॥ ८२॥
कराभिघातोत्थितकन्दुकेयमालोक्य बालाऽतिकुतूहलेन।
ह्रदात्पतज्ज्योतिरिवान्तरिक्षादादत्त जैत्राभरणं त्वदीयम्॥ ८३॥
तदेतदाजानुविलम्बिना ते ज्याघातरेखाकिणलाञ्छनेन।
भुजेन रक्षापरिघेण भूमेरुपैतु योगं पुनरंसलेन॥ ८४॥
इमां स्वसारं च यवीयसीं मे कुमुद्वतीं नार्हसि नानुमन्तुम्।
आत्मापराधं नुदतीं चिराय शुश्रूषया पार्थिव! पादयोस्ते॥ ८५॥
इत्यूचिवानुपहृताभरणः क्षितीशं श्लाघ्यो भवान्स्वजन इत्यनुभाषितारम्।
संयोजयां विधिवदास समेतबन्धुः कन्यामयेन कुमुदः कुलभूषणेन॥ ८६॥
तस्याः स्पृष्टे मनुजपतिना साहचर्याय हस्ते माङ्गल्योर्णावलयिनि पुरः पावकस्योच्छिखस्य।
दिव्यस्तूर्यध्वनिरुदचरद्व्यश्नुवानो दिगन्तान्गन्धोदग्रं तदनु ववृषुः पुष्पमाश्चर्यमेघाः॥ ८७॥
इत्थं नागस्त्रिभुवनगुरोरौरसं मैथिलेयं लब्ध्वा बन्धुं तमपि च कुशः पञ्चमं तक्षकस्य।
एकः शङ्कं पितृवधरिपोरत्यजद्वैनतेयाच्छान्तव्यालामवनिमपरः पौरकान्तः शशास॥ ८८॥

इति महाकविकालिदासकृतौ रघुवंशे महाकाव्ये कुमुद्वती-
परिणयो नाम षोडशः सर्गः॥ १६॥

जानता था। इस प्रकार प्रणाम करके वह कहने लगा॥ ८१॥ मैं जानता हूँ कि आप राक्षसों का नाश करने के लिए मनुष्य का शरीर धारण करने वाले विष्णु के दूसरे रूप अर्थात् उनके पुत्र हैं। आप मेरे पूजनीय हैं। अतः मैं भला आपसे वैर कैसे कर सकता हूँ॥ ८२॥ यह कन्या गेंद खेल रही थी। इसकी थपकी से गेंद ऊपर उछल गयी। उसे देखने को इसने जो ऊपर आँख उठायी तो देखा कि आकाश से गिरते हुए तारे के समान आपका आभूषण नीचे चला आ रहा है। बस, इसने उसे पकड़ लिया॥ ८३॥ अब आप इसे ले लीजिए और अपनी उस मोटी और लम्बी भुजा में फिर बाँध लीजिए, जिसमें धनुष की डोरी के आघात से घट्ठे पड गये हैं और जो पृथ्वी की रक्षा करती रहती है॥ ८४॥ हे राजन्! मेरी छोटी बहन कुमुद्वती जीवनभर आपकी सेवा करके अपने अपराध का मार्जन करना चाहती है। अतएव आप इसे अपनी पत्नी के रूप में स्वीकार कर लें॥ ८५॥ ऐसा कहकर कुमुद ने वह आभूषण कुश को दे दिया। कुश ने कहा—आज से आप मेरे आदरणीय सम्बन्धी हुए। यह सुनकर कुमुद ने अपने कुटुम्बियों को बुलाया और बड़ी धूम-धाम से उस कन्या का कुश के साथ विवाह कर दिया॥ ८६॥ राजा कुश ने जब अग्नि के समक्ष उस कन्या का ऊँनी कंगन बँधा हुआ हाथ पकड़ा, उस समय तुरही आदि बाजों की ध्वनि से दसों दिशाएँ गूँज उठीं और विचित्र प्रकार के मेघों ने आ-आकर आकाश से उनके ऊपर सुगन्धित पुष्पों की वर्षा की॥ ८७॥ नागराज कुमुद ने इस प्रकार त्रिलोकीनाथ विष्णु अर्थात् राम के पुत्र कुश को अपना सम्बन्धी बनाकर गरुड़ से डरना छोड़ दिया। क्योंकि अब गरुड़ उनके सम्बन्धी के पिता के वाहन मात्र रह गये थे। इधर कुश ने भी नागराज तक्षक के पाँचवें पुत्र कुमुद को अपना सम्बन्धी बनाया, तभी से सर्प शान्त हो गये और कुश पृथ्वी पर यथावत् शासन करने लगे॥ ८८॥

इस प्रकार रघुवंशमहाकाव्य में कुमुद्वती-परिणय नामक
सोलहवाँ सर्ग समाप्त॥ १६॥

सप्तदशः सर्गः

अतिथिं नाम काकुत्स्थात्पुत्रं प्राप कुमुद्वती । पश्चिमाद्यामिनीयामात्प्रसादमिव चेतना ॥ १ ॥
स पितुः पितृमान्वंशं मातुश्चानुपमद्युतिः । अपुनात् सवितेवोभौ मार्गावुत्तरदक्षिणौ ॥ २ ॥
तमादौ कुलविद्यानामर्थमर्थीविदां वरः । पश्चात्पार्थिवकन्यानां पाणिमग्राहयत्पिता ॥ ३ ॥
जात्यस्तेनाभिजातेन शूरः शौर्यवता कुशः । अमन्यूतैकमात्मानमनेकं वशिना वशी ॥ ४ ॥
स कुलोचितमिन्द्रस्य साहायकमुपेयिवान् । जघान समरे दैत्यं दुर्जयं तेन चावधि ॥ ५ ॥
तं स्वसा नागराजस्य कुमुदस्य कुमुद्वती । अन्वगात्कुमुदानन्दं शशाङ्कमिव कौमुदी ॥ ६ ॥
तयोर्दिवस्पतेरासीदेकः सिंहासनार्धभाक् । द्वितीयाऽपि सखी शच्याः पारिजातांशभागिनी ॥ ७ ॥
तदात्मसम्भवं राज्ये मन्त्रिवृद्धाः समादधुः । स्मरन्तः पश्चिमामाज्ञां भर्तुः सङ्ग्रामयायिनः ॥ ८ ॥
ते तस्य कल्पयामासुरभिषेकाय शिल्पिभिः । विमानं नवमुद्वेदि चतुःस्तम्भप्रतिष्ठितम् ॥ ९ ॥
तत्रैनं हेमकुम्भेषु सम्भृतैस्तीर्थवारिभिः । उपतस्थुः प्रकृतयो भद्रपीठोपवेशितम् ॥ १० ॥
नदद्भिः स्निग्धगम्भीरं तूर्यैराहतपुष्करैः । अन्वमीयत कल्याणं तस्याविच्छिन्नसन्तति ॥ ११ ॥
दूर्वायवाङ्कुरप्लक्षत्वगभिन्नपुटोत्तरान् । ज्ञातिवृद्धैः प्रयुक्तान्स भेजे नीराजनाविधीन् ॥ १२ ॥
पुरोहितपुरोगास्तं जिष्णुं जैत्रैरथर्वभिः । उपचक्रमिरे पूर्वमभिषेक्तुं द्विजातयः ॥ १३ ॥
तस्यौघमहती मूर्ध्नि निपतन्ती व्यरोचत । सशब्दमभिषेकश्रीर्गङ्गेव त्रिपुरद्विषः ॥ १४ ॥

रात के चौथे पहर अर्थात ब्राह्म मुहूर्त में जैसे बुद्धि को नवीनता प्राप्त हो जाती है, वैसे ही कुश को कुमुद्वती की कोख से अतिथि नाम का पुत्र प्राप्त हुआ ॥ १ ॥ जैसे तेजस्वी सूर्य अपने प्रकाश से उत्तर तथा दक्षिण दोनों दिशाएँ पवित्र कर देते हैं, वैसे ही अमाधारण तेजस्वी पुत्र अतिथि ने माता और पिता दोनों के कुल पवित्र कर दिये ॥ २ ॥ पिता कुश ने पहले उसे आन्वीक्षिकी, त्रयी, वार्ता तथा दण्डनीति—ये चारों राजविद्याएँ सिखायीं। फिर राजाओं की कन्याओं के साथ उसका विवाह सम्पन्न कर दिया ॥ ३ ॥ अतिथि भी कुश के समान ही कुलीन, वीर और जितेन्द्रिय थे। इसलिए कुश अपने पुत्र को अपना ही दूसरा स्वरूप मानते थे ॥ ४ ॥ अपनी कुलपरम्परा के अनुसार कुश भी एक बार युद्ध में इन्द्र की सहायता करने गये थे। वहाँ उन्होंने दुर्जय नाम के राक्षस को मारा और स्वयं भी वीरगति को प्राप्त हो गये ॥ ५ ॥ जैसे कुमुदिनी को विकसित करनेवाले चन्द्रमा के अस्त हो जाने पर चाँदनी भी समाप्त हो जाती है, उसी प्रकार नागराज कुमुद की बहन कुमुद्वती भी कुश के साथ सती हो गयी ॥ ६ ॥ राजा कुश को तो इन्द्र के सिंहासन का आधा भाग मिला और कुमुद्वती ने जाकर शची (इन्द्राणी) के पारिजात का आधा भाग बँटा लिया ॥ ७ ॥ उस युद्ध में जाते समय कुश ने जैसी आज्ञा दी थी, तदनुसार मन्त्रियों ने उनके पुत्र अतिथि को कुश का उत्तराधिकारी राजा बनाया ॥ ८ ॥ उसके अभिषेक के लिए मंत्रियों ने कारीगरों से ऊँची वेदी के चार खम्भों का नया मंडप बनवाया ॥ ९ ॥ तब प्रजा ने भद्रपीठ पर बैठे हुए राजा अतिथि को सोने के घड़ों में भरे हुए तीर्थजल से नहलाया ॥ १० ॥ उस समय मृदङ्ग आदि वाद्यों को बजाने पर जो मधुर और गम्भीर शब्द निकलता था, उससे यह अनुमान हो रहा था कि राजा अतिथि का सदा कल्याण होगा ॥ ११ ॥ दूब, जौ के अंकुर तथा वटवृक्ष की छाल दोनों में रखकर कुल के बड़े-बूढ़ों ने जो आरती की, उसे राजा अतिथि ने सादर स्वीकार किया ॥ १२ ॥ तब पुरोहित को आगे करके ब्राह्मण आये और विजयी राजा को अथर्ववेद के उन मन्त्रों को पढ़ते हुए नहलाने लगे, जिनसे विजय प्राप्त होती है ॥ १३ ॥ उस समय उनके सिर पर गिरती हुई अभिषेक के जल

स्तूयमानः क्षणे तस्मिन्नलक्ष्यत स बन्दिभिः । प्रवृद्ध इव पर्जन्यः सारङ्गैरभिनन्दितः ॥ १५ ॥
तस्य सन्मन्त्रपूताभिः स्नानमद्भिः प्रतीच्छतः । ववृधे वैद्युतस्याग्नेर्वृष्टिसेकादिव द्युतिः ॥ १६ ॥
स तावदभिषेकान्ते स्नातकेभ्यो ददौ वसु । यावतैषां समाप्येरन्यज्ञाः पर्याप्तदक्षिणाः ॥ १७ ॥
ते प्रीतमनसस्तस्मै यामाशिषमुदैरयन् । सा तस्य कर्मनिर्वृत्तैर्दूरं पश्चात्कृता फलैः ॥ १८ ॥
बन्धच्छेदं स बद्धानां वधार्हाणामवध्यताम् । धुर्याणां च धुरो मोक्षमदोहं चादिशद्गवाम् ॥ १९ ॥
क्रीडापतत्रिणोऽप्यस्य पञ्जरस्थाः शुकादयः । लब्धमोक्षास्तदादेशाद्यथेष्टगतयोऽभवन् ॥ २० ॥
ततः कक्ष्यान्तरन्यस्तं गजदन्तासनं शुचि । सोत्तरच्छदमध्यास्त नेपथ्यग्रहणाय सः ॥ २१ ॥
तं धूपाश्यानकेशान्तं तोयनिर्णिक्तपाणयः । आकल्पसाधनैस्तैस्तैरुपसेदुः प्रसाधकाः ॥ २२ ॥
तेऽस्य मुक्तागुणोन्नद्धं मौलिमन्तर्गतस्रजम् । प्रत्यूपुः पद्मरागेण प्रभामण्डलशोभिना ॥ २३ ॥
चन्दनेनाङ्गरागं च मृगनाभिसुगन्धिना । समापय्य ततश्चक्रुः पत्रं विन्यस्तरोचनम् ॥ २४ ॥
आमुक्ताभरणः सग्वी हंसचिह्नदुकूलवान् । आसीदतिशयप्रेक्ष्यः स राज्यश्रीवधूवरः ॥ २५ ॥
नेपथ्यदर्शिनश्छाया तस्यादर्शे हिरण्मये । विरराजोदिते सूर्ये मेरौ कल्पतरोरिव ॥ २६ ॥
स राजककुदव्यग्रपाणिभिः पार्श्ववर्तिभिः । ययावुदीरितालोकः सुधर्मानिवमां सभाम् ॥ २७ ॥
वितानसहितं तत्र भेजे पैतृकमासनम् । चूडामणिभिरुद्घृष्टपादपीठं महीक्षिताम् ॥ २८ ॥

की धारा ऐसी सुन्दर लगती थी, जैसे शिवजी के सिर पर गङ्गाजी की धारा गिरती हो ॥ १४ ॥ भाट और चारण जब अतिथि का यश गाने लगे तो ऐसा लगा कि जैसे अनेक चातक मिलकर बादल के गुण गा रहे हैं ॥ १५ ॥ मन्त्रों से अभिमंत्रित जल से स्नान करते समय उनके शरीर का तेज वैसे ही बढ गया, जैसे वर्षा के जल मे बिजली की दीप्ति बढ जाती है ॥ १६ ॥ अभिषेक के बाद राजा अतिथि ने स्नातक ब्राह्मणों को इतना धन दिया कि उस धन से वे अच्छी दक्षिणा दे देकर अनेक यज्ञ कर सकते थे ॥ १७ ॥ उन ब्राह्मणों ने प्रसन्न होकर उन्हें जो आशीर्वाद दिया, उसको सफल होने के लिए बहुत दिन प्रतीक्षा करनी पड़ी। क्योंकि आशीर्वाद के समय तो राजा अतिथि अपने पूर्वजन्म के सत्कर्मों का ही फल भोग रहे थे, आशीर्वाद का फल तो उस फल की समाप्ति पर प्रारम्भ होता ॥ १८ ॥ उस राज्याभिषेक की प्रसन्नता में अतिथि ने आज्ञा दी कि सब कैदी छोड दिये जायँ, मृत्युदण्ड पाये हुए अपराधी न मारे जायँ, भारवाही पशुओं के कन्धे से जुए उतार लिये जायँ और गौओं का दुहना बन्द कर दिया जाय ॥ १९ ॥ पिंजडे के सुग्गे आदि पक्षी भी उनकी आज्ञा से छोड दिये गये, जिससे वे यथेच्छ उड़ने लगे ॥ २० ॥ तदनन्तर वह राजा अतिथि अपना राजसी सिंगार कराने के लिए हाथीदाँत के बने सिंहासन पर बैठे, जो राजमहल में एक ओर रखा था और जिस पर बिछौना बिछा हुआ था ॥ २१ ॥ तब सिंगारकलाकुशलों ने धुले हाथों से धूप से सुगंधित केशवाले राजा अतिथि को सब अलंकारों से सजाना आरम्भ किया ॥ २२ ॥ फूलों और मोतियों की मालाओं से ग्रथित राजा के सिर पर उन्होंने वह पद्मरागमणि बाँधी, जिसकी सुन्दर चमक चारों ओर फैल गयी ॥ २३ ॥ तत्पश्चात् उन्होंने कस्तूरी से सुवासित चन्दन का अंगराग लगाकर गोरोचन से राजा के मुख पर चित्रकारी की ॥ २४ ॥ आभूषण तथा माला पहने और हंस का चित्र छपा हुआ दुपट्टा ओढ़े हुए अतिथि राजा उस समय ऐसे सुन्दर लगते थे, मानो राजलक्ष्मीरूपिणी वधू के दुल्हे हों ॥ २५ ॥ सोने के चौखटेवाले दर्पण में जब वे अपनी सजावट देखने लगे, उस समय उनका प्रतिबिम्ब ऐसा लगा कि जैसे सूर्योदयकाल में सुमेरु पर्वत पर कल्पवृक्ष प्रतिबिम्बित हो रहा हो ॥ २६ ॥ अब वे अपनी उस सभा की ओर चले, जो देवताओं की सभा सुधर्मा से कुछ भी कम नहीं थी। उनके पीछे-पीछे बहुत से सेवक चँवर डुलाते तथा जय-जयकार करते हुए चल रहे थे ॥ २७ ॥ वहाँ पहुँचकर चँदोवा लगे हुए अपने पूर्वजों के सिंहासन पर वे जा बैठे। उनके पैर के नीचे जो पीढा

शुशुभे तेन चाक्रान्तं मङ्गलायतनं महत् । श्रीवत्सलक्षणं वक्षः कौस्तुभेनेव केशवम् ॥ २९ ॥
बभौ भूयः कुमारत्वादाधिराज्यमवाप्य सः । रेखाभावादुपारूढः सामग्र्यमिव चन्द्रमाः ॥ ३० ॥
प्रसन्नमुखरागं तं स्मितपूर्वाभिभाषिणम् । मूर्तिमन्तममन्यन्त विश्वासमनुजीविनः ॥ ३१ ॥
स पुरं पुरुहूतश्रीः कल्पद्रुमनिभध्वजाम् । क्रममाणश्चकार द्यां नागेनैरावतौजसा ॥ ३२ ॥
तस्यैकस्योच्छ्रितं छत्रं मूर्ध्नि तेनामलत्विषा । पूर्वराजवियोगौष्म्यं कृत्स्नस्य जगतो हृतम् ॥ ३३ ॥
धूमादग्नेः शिखाः पश्चादुदयादंशवो रवेः । सोऽतीत्य तेजसां वृत्तिं सममेवोत्थितो गुणैः ॥ ३४ ॥
तं प्रीतिविशदैर्नेत्रैरन्वयुः पौरयोषितः । शरत्प्रसन्नैर्ज्योतिर्भिर्विभावर्य इव ध्रुवम् ॥ ३५ ॥
अयोध्यादेवताश्चैनं प्रशस्तायतनार्चिताः । अनुदध्युरनुध्येयं सान्निध्यैः प्रतिमागतैः ॥ ३६ ॥
यावन्नाशयायते वेदिरभिषेकजलाप्लुता । तावदेवास्य वेलान्तं प्रतापः प्राप दुःसहः ॥ ३७ ॥
वसिष्ठस्य गुरोर्मन्त्राः सायकास्तस्य धन्विनः । किं तत्साध्यं यदुभये साधयेयुर्न सङ्गताः ॥ ३८ ॥
स धर्मस्यसखः शश्वदर्थिप्रत्यर्थिनां स्वयम् । ददर्श संशयच्छेद्यान्व्यवहारानतन्द्रितः ॥ ३९ ॥
ततः परमभिव्यक्तसौमनस्यनिवेदितैः । युयोज पाकाभिमुखैर्भृत्यान्विज्ञापनाफलैः ॥ ४० ॥
प्रजास्तद्गुरुणा नद्यो नभसेव विवर्धिताः । तस्मिंस्तु भूयसीं वृद्धिं नभस्ये ता इवाययुः ॥ ४१ ॥
यदुवाच न तन्मिथ्या यद्ददौ न जहार तत् । सोऽभूद्भग्नव्रतः शत्रूनुद्धृत्य प्रतिरोपयन् ॥ ४२ ॥

रखा था, वह प्रणाम करने वाले राजाओं के सिर के मणियों की रगड से घिस गया था ॥ २८ ॥ भृगु के चरण की चोट से बने हुए श्रीवत्स-चिह्नवाला विष्णु का वक्षःस्थल जैसे कौस्तुभमणि से चमक उठा था, वैसे ही राजा अतिथि के बैठने से वह सभाभवन भी जगमगाने लगा ॥ २९ ॥ इस प्रकार राजा अतिथि को युवराज बनने का अवसर ही नहीं मिला। क्योंकि वे कुमार अवस्था के बाद तुरन्त महाराज हो गये। जैसे एक ही कलावाले चन्द्रमा में तुरन्त सोलहों कलाएँ आ गयी हों ॥ ३० ॥ उनका मुख सदा प्रसन्न रहता था और वे सबसे हँसकर बोलते थे। अतः उनके सेवक उन्हें मूर्तिमान् विश्वास समझते थे ॥ ३१ ॥ इन्द्र जैसे ऐश्वर्यशाली राजा अतिथि जब ऐरावत के सदृश बलवान् हाथी पर चढकर अयोध्या में घूमने निकले, तब कल्पवृक्ष के समान ध्वजाओं से अलंकृत अयोध्या नगरी स्वर्ग-सदृश दीखने लगी ॥ ३२ ॥ राजछत्र यद्यपि केवल राजा अतिथि के सिर पर ही लगा हुआ था, परन्तु उस श्वेत छत्र ने सारे संसार का वह ताप दूर कर दिया, जो कुश के वियोग से उत्पन्न हो गया था ॥ ३३ ॥ धुआँ निकलने के बाद आग की लपटें उठती हैं और किरणें सूर्योदय के पश्चात् दिखलायी देती हैं, परन्तु अतिथि ने इन तेजस्वियों के नियमों को भी उलट दिया। क्योंकि उनके गुण राजा बनने के साथ-साथ प्रकट हो गये ॥ ३४ ॥ शरद् ऋतु की निर्मल रातों के तारे जैसे ध्रुव के चारों ओर घूमते हैं, वैसे ही नगर की स्त्रियों की प्रेमभरी आँखें अतिथि पर जा अटकीं ॥ ३५ ॥ अयोध्या के बडे-बडे मन्दिरों में जिन देवताओं की पूजा की गयी, उन्होंने अपनी मूर्तियों में आकर कृपा के योग्य राजा अतिथि पर बहुत बडी कृपा की ॥ ३६ ॥ अभी उनके अभिषेक के जल से भींगी वेदी सूखने भी नहीं पायी थी कि उनका दुःसह प्रताप समुद्र के तट तक जा पहुँचा ॥ ३७ ॥ गुरु वसिष्ठ के मन्त्र और धनुषधारी राजा अतिथि के बाण इन दोनों ने कोई भी ऐसा कार्य नहीं था, जिसे मिलकर न पूरा किया हो ॥ ३८ ॥ धर्मात्माओं के मित्र राजा अतिथि आलस्य छोड़कर वादी-प्रतिवादियों के पेंचीदे झगडे स्वयं निपटाया करते थे ॥ ३९ ॥ जैसे वृक्ष को पुष्पित देखकर यह अनुमान हो जाता है कि इससे इतने फल मिलेंगे। वैसे ही राजा अतिथि का प्रसन्न मुख देखकर ही उनके सेवक जान जाते थे कि हमें इतना धन मिलेगा ॥ ४० ॥ कुश के समय में जो प्रजा सावन की नदी के समान भरी-पूरी थी, वह अतिथि के राज्य में भादों की नदी के समान और भी अधिक बढ़ गयी ॥ ४१ ॥ राजा अतिथि ने मुँह से जो कहा, वह कर दिखलाया और जिसे जो दिया, उससे फिर

वयोरूपविभूतीनामेकैकं मदकारणम् । तानि तस्मिन्समस्तानि न तस्योत्सिषिचे मनः ॥ ४३ ॥
इत्थं जनितरागासु प्रकृतिष्वनुवासरम् । अक्षोभ्यः स नवोऽप्यासीद्दृढमूल इव द्रुमः ॥ ४४ ॥
अनित्याः शत्रवो बाह्या विप्रकृष्टाश्च ते यतः । अतः सोऽभ्यन्तरान्नित्यान् षट्पूर्वमजयद्रिपून् ॥
प्रसादाभिमुखे तस्मिंश्चपलापि स्वभावतः । निकषे हेमरेखेव श्रीरासीदनपायिनी ॥ ४६ ॥
कातर्यं केवला नीतिः शौर्यं श्वापदचेष्टितम् । अतः सिद्धिं समेताभ्यामुभाभ्यामन्वियेष सः ॥
न तस्य मण्डले राज्ञो न्यस्तप्रणिधिदीधितेः । अदृष्टमभवत्किञ्चिद्दृश्यभास्येव विवस्वतः ॥ ४८ ॥
रात्रिन्दिवविभागेषु यदादिष्टं महीक्षिताम् । तत्सिषेवे नियोगेन स विकल्पपराङ्मुखः ॥ ४९ ॥
मन्त्रः प्रतिदिनं तस्य बभूव सह मन्त्रिभिः । स जातु सेव्यमानोऽपि गुप्तद्वारो न सूच्यते ॥ ५० ॥
परेषु स्वेषु च क्षिप्तैरविज्ञातपरस्परैः । सोऽपसर्पैर्जजागार यथाकालं स्वपन्नपि ॥ ५१ ॥
दुर्गाणि दुर्ग्रहाण्यासंस्तस्य रोद्धुरपि द्विषाम् । नहि सिंहो गजास्कन्दी भयाद्गिरिगुहाशयः ॥ ५२ ॥
भव्यमुख्याः समारम्भाः प्रत्यवेक्ष्या निरत्ययाः । गर्भशालिसधर्माणस्तस्य गूढं विपेचिरे ॥ ५३ ॥
अपथेन प्रववृते न जातूपचितोऽपि सः । वृद्धौ नदीमुखेनैव प्रस्थानं लवणाम्भसः ॥ ५४ ॥

लिया नहीं। पर हाँ, शत्रुओं को उखाड़कर उन्हें फिर जमाते समय उन्होंने यह नियम नहीं निबाहा ॥ ४२ ॥ यौवन, सौन्दर्य और ऐश्वर्य—इनमें से यदि एक भी किसी के पास होता है तो वह मतवाला हो जाता है, परन्तु राजा अतिथि के पास ये सभी वस्तुएँ थीं, तथापि उन्हें अभिमान नहीं था ॥ ४३ ॥ इस प्रकार प्रजा उनसे दिनोदिन अधिक प्रेम करने लगी और नये राजा होने पर भी वे दृढ़ जड़वाले वृक्ष-सदृश अचल हो गये ॥ ४४ ॥ बाहरी शत्रु एक तो सदा होते नहीं और होते भी हैं तो दूर रहते हैं, यह सोचकर उन्होंने सदा शरीर के भीतर रहनेवाले काम आदि छहों शत्रुओं को पहले जीता ॥ ४५ ॥ स्वभावतः चंचला लक्ष्मी भी प्रसन्नमुख अतिथि के पास आकर वैसे ही अचल भाव से बैठ गयी, जैसे कसौटी पर खिंची हुई सोने की लकीर पक्की हो जाती है ॥ ४६ ॥ सदा कूटनीति से काम लेना कायरता है और मार-काट करके जीतना हिंसक पशुओं का काम है। इसलिए उन्होंने कूटनीति और मार-काट इन दोनों नीतियों को मिलाकर शत्रुओं को जीता ॥ ४७ ॥ जैसे खुले आकाश में सूर्य की किरणों के फैल जाने से कुछ भी छिपा नहीं रहता, वैसे ही अतिथि ने चारों ओर गुप्तचरों का ऐसा जाल बिछा दिया था कि प्रजा की कोई बात उनसे छिपी नहीं रहती थी ॥ ४८ ॥ राजाओं के लिए शास्त्रों ने दिन और रात के जो कर्तव्य निर्धारित किये हैं, उन सबको राजा अतिथि नियमपूर्वक पालते थे ॥ ४९ ॥ वे प्रतिदिन मन्त्रियों के साथ राज्यसम्बन्धी मन्त्रणा करते थे, परन्तु वे मंत्रणाएँ इतनी गुप्त होती थीं कि प्रतिदिन व्यवहार में आने पर भी कोई उनको नहीं जान पाता था ॥ ५० ॥ अपने कर्मचारियों तथा शत्रुओं का भेद जानने के लिए उन्होंने ऐसी चतुराई से उनके पीछे दूत लगा रखे थे कि वे दूत भी परस्पर एक-दूसरे को नहीं पहचानते थे। उन दूतों द्वारा सब समाचार मिलते रहने से वे सोते हुए भी सदा जागते रहते थे ॥ ५१ ॥ यद्यपि वे युद्ध में ही शत्रुओं का अवरोध करते थे, तथापि उन्होंने राजधानी के चारों ओर बहुत बड़े-बड़े दुर्ग बनवा रखे थे। क्योंकि हाथियों को मारनेवाला सिंह हाथियों के भय से गुफा में नहीं सोता, बल्कि उसका स्वभाव ही ऐसा होता है ॥ ५२ ॥ राजा अतिथि जो काम करते थे, वे सब कल्याणकारी होते थे। वे कोई भी काम करने से पहले उस पर भलीभाँति सोच लेते थे। इसीलिए उसमें किसी प्रकार की कोई बाधा नहीं पड़ती थी। जैसे धान का दाना भीतर ही पकता है, वैसे ही उनका काम गुप्तरूप से आरम्भ होकर पूरा होता था ॥ ५३ ॥ ऐश्वर्यशाली होते हुए भी उन्होंने कभी गलत मार्ग पर पैर नहीं रखा। क्योंकि ज्वार के समय भी समुद्र नदियों के मार्ग से ही बढ़ता है, दूसरे मार्गों से नहीं ॥ ५४ ॥

कामं प्रकृतिवैराग्यं सद्यः शमयितुं क्षमः । यस्य कार्यः प्रतीकारः स तन्नैवोदपादयत्॥ ५५॥
शक्येष्वेवाभवद्यात्रा तस्य शक्तिमतः सतः । समीरणसहायोऽपि नाम्भःप्रार्थी दवानलः॥ ५६॥
न धर्ममर्थकामाभ्यां बबाधे न च तेन तौ । नार्थं कामेन कामं वा सोऽर्थेन सदृशस्त्रिषु॥ ५७॥
हीनान्यनुपकर्तॄणि प्रवृद्धानि विकुर्वते । तेन मध्यमशक्तीनि मित्राणि स्थापितान्यतः॥ ५८॥
परात्मनोः परिच्छिद्य शक्त्यादीनां बलाबलम् । ययावेभिर्बलिष्ठश्चेत्परस्मादास्त सोऽन्यथा॥
कोशेनाश्रयणीत्वमिति तस्यार्थसङ्ग्रहः । अम्बुगर्भो हि जीमूतश्चातकैरभिनन्द्यते॥ ६०॥
परकर्मापहः सोऽभूदुद्यतः स्वेषु कर्मसु । आवृणोदात्मनो रन्ध्रं रन्ध्रेषु प्रहरन् रिपून्॥ ६१॥
पित्रा संवर्धितो नित्यं कृतास्त्रः साम्परायिकः । तस्य दण्डवतो दण्डः स्वदेहान्न व्यशिष्यत॥ ६२॥
सर्पस्येव शिरोरत्नं नास्य शक्तित्रयं परः । स चकर्ष परस्मात्तदयस्कान्त इवायसम्॥ ६३॥
वापीष्विव स्रवन्तीषु वनेषूपवनेष्विव । सार्थाः स्वैरं स्वकीयेषु चेरुर्वेश्मस्विवाद्रिषु॥ ६४॥
तपो रक्षन्स विघ्नेभ्यस्तस्करेभ्यश्च सम्पदः । यथास्वमाश्रमैश्चक्रे वर्णैरपि षडंशभाक्॥ ६५॥
खनिभिः सुषुवे रत्नं क्षेत्रैः सस्यं वनैर्गजान् । दिदेश वेतनं तस्मै रक्षासदृशमेव भूः॥ ६६॥
स गुणानां बलानां च षण्णां षण्मुखविक्रमः । बभूव विनियोगज्ञः साधनीयेषु वस्तुषु॥ ६७॥

उनमें इतनी प्रबल शक्ति थी कि यदि किसी कारण प्रजा में असन्तोष फैले तो उसे तुरन्त दूर कर दे, परन्तु उन्होंने प्रजा में कोई ऐसा असन्तोष उत्पन्न ही नहीं होने दिया कि जिसे दूर करने की आवश्यकता पडती॥ ५५॥ वे बडे शक्तिमान् थे। अतएव शक्तिशाली राजाओं पर ही चढाई करते थे, दुर्बलों पर नहीं। क्योंकि वायु की सहायता मिलने पर भी वन में लगी हुई दवाग्नि पानी को नहीं जलाती॥ ५६॥ अर्थ और काम के लिए उन्होंने कभी धर्म को नहीं छोडा और धर्म मे बँधकर अर्थ तथा काम को नहीं त्यागा और न अर्थ के कारण काम को या काम के कारण अर्थ को ही छोडा, अपितु धर्म, अर्थ और काम तीनों के साथ वे एक-सा व्यवहार करते थे॥ ५७॥ यदि नीच और धनी मित्र मिल जाते हैं तो कुछ न कुछ बाधा डालते हैं, इसीलिए उन्होंने ऐसे लोगों को मित्र बनाया, जो न नीच थे और न धनी॥ ५८॥ चढाई करने के पहले वे अपने तथा अपने शत्रु का बल और त्रुटि भलीभाँति जान लेते थे। जब शत्रु से अपना बल अधिक देखते, तभी उस पर आक्रमण करते थे; नहीं तो चुप बैठ जाते थे॥ ५९॥ उन्होंने धन इसलिए एकत्र किया कि इससे दीन लोग आश्रय पाते हैं। क्योंकि चातक जलभरे बादलों का ही स्वागत करते हैं॥ ६०॥ इस प्रकार शत्रुओं का उद्योग नष्ट करके वे अपने काम में लग गये। उन्होंने शत्रुओं के दोष देखकर उन्हें नष्ट कर दिया और अपने भी दोष दूर कर दिये॥ ६१॥ पिता कुश के प्रयत्न से बढी, शास्त्रास्त्रसम्पन्न तथा युद्ध करने में समर्थ सेना को दंडधर अतिथि अपने शरीर के समान प्यार करते थे॥ ६२॥ सर्प के सिर से जैसे मणि नहीं निकाली जा सकती, वैसे ही शत्रुगण इनके प्रभाव, उत्साह और मन्त्र—इन तीन शक्तियों को अपनी ओर नहीं खींच सके। जैसे चुम्बक लोहे को अपनी ओर खींच लेता है, वैसे ही इन्होंने शत्रुओं की उन तीनों शक्तियों को अपनी ओर खींच लिया॥ ६३॥ राजा अतिथि का इतना प्रताप था कि व्यापारी लोग बेरोक-टोक व्यापार करते थे। उनके लिए नदियाँ बावलियों जैसे घरेलू, वन उद्यान-सदृश सुखकर और पहाड अपने घर जैसे सुगम हो गये थे॥ ६४॥ अतिथि ने विघ्नों से तपस्वियों के तप की रक्षा की, चोरों से प्रजा की सम्पत्ति बचायी और चारों आश्रमों तथा चारों वर्णों मे उनकी पूँजी के अनुसार छठा भाग प्राप्त किया॥ ६५॥ जैसे वे पृथ्वी की रक्षा कर रहे थे, वैसे ही पृथ्वी भी उन्हें उचित वेतन दे रही थी। खानों ने रत्न दिये, खेतों ने अन्न दिया और वनों ने हाथी दिये॥ ६६॥ कार्तिकेय जैसे पराक्रमी राजा अतिथि यह भलीभाँति जानते थे कि सन्धि, विग्रह, यान, आसन, संश्रय और द्वैधीभाव—इन छः राजगुणों को कैसे उपयोग में लाना

इति क्रमात्प्रयुञ्जानो राजनीतिं चतुर्विधाम्। आतीर्थादप्रतीघातं स तस्याः फलमानशे॥ ६८॥
कूटयुद्धविधिज्ञेऽपि तस्मिन्सन्मार्गयोधिनि। भेजेऽभिसारिकावृत्तिं जयश्रीर्वीरगामिनी॥ ६९॥
प्रायः प्रतापभग्नत्वादरीणां तस्य दुर्लभः। रणो गन्धद्विपस्येव गन्धभिन्नान्यदन्तिनः॥ ७०॥
प्रवृद्धौ हीयते चन्द्रः समुद्रोऽपि तथाविधः। स तु तत्समवृद्धिश्च न चाभूत्ताविव क्षयी॥ ७१॥
सन्तस्तस्याभिगमनादत्यर्थं महतः कृशाः। उदधेरिव जीमूताः प्रापुर्दातृत्वमर्थिनः॥ ७२॥
स्तूयमानः स जिह्राय स्तुत्यमेव समाचरन्। तथापि ववृधे तस्य तत्कारिद्वेषिणो यशः॥ ७३॥
दुरितं दर्शनेन घ्नंस्तत्त्वार्थेन नुदंस्तमः। प्रजाः स्वतन्त्रयाञ्चक्रे शश्वत्सूर्य इवोदितः॥ ७४॥
इन्दोरगतयः पद्मे सूर्यस्य कुमुदेऽशवः। गुणास्तस्य विपक्षेऽपि गुणिनो लेभिरेऽन्तरम्॥ ७५॥
पराभिसन्धानपरं यद्यप्यस्य विचेष्टितम्। जिगीषोरश्वमेधाय धर्म्यमेव बभूव तत्॥ ७६॥
एवमुद्यन्प्रभावेण शास्त्रनिर्दिष्टवर्त्मना। वृषेव देवो देवानां राज्ञां राजा बभूव सः॥ ७७॥
पञ्चमं लोकपालानामूचुः साधर्म्ययोगतः। भूतानां महतां षष्ठमष्टमं कुलभूभृताम्॥ ७८॥
दूरापवर्जितच्छत्रैस्तस्याज्ञां शासनार्पिताम्। दधुः शिरोभिर्भूपाला देवाः पौरन्दरीमिव॥ ७९॥

चाहिए॥ ६७॥ इस प्रकार साम-दाम आदि चारों उपायों के साथ राजनीति का उपयोग करते हुए महाराज अतिथि ने मंत्रियों आदि की सहायता से बिना किसी बाधा के उपर्युक्त उपायों का फल अनायास प्राप्त कर लिया॥ ६८॥ वे कपटयुद्ध भी करना जानते थे, परन्तु युद्ध में सदा धर्म की लड़ाई ही लड़ते थे। अतएव वीरों की अनुचरी विजयश्री अभिसारिका की भाँति चुपके से उनके पास चली आती थी॥ ६९॥ युद्धक्षेत्र में अतिथि को देखते ही शत्रुओं के छक्के छूट जाते थे और वे प्राण लेकर भाग खड़े होते थे। इसलिए जैसे मदहीन हाथी मदवाले हाथी से नहीं लड पाते, वैसे ही अतिथि से लडने का कोई भी शत्रु साहस ही नहीं कर पाता था॥ ७०॥ पूरी तरह बढ चुकने पर चन्द्रमा घटने लगता है और समुद्र की भी यही दशा होती है, परन्तु अतिथि के साथ यह बात नहीं थी। वे चन्द्रमा और समुद्र के समान बढे, किन्तु उनके समान घटे नहीं॥ ७१॥ जैसे बिना पानीवाले मेघ समुद्र के पास जाते हैं और वह उन्हें इतना जल दे देता है कि वे सम्पूर्ण संसार को जल बाँटने लगते हैं, वैसे ही जो बहुत से निर्धन विद्वान् राजा अतिथि के पास जाते थे, उन्हें वे इतना धन दे देते थे कि वे विद्वान् स्वयं भी दूसरों को धन-दान देने लग जाते थे॥ ७२॥ उनके सभी काम प्रशंसनीय होते थे, परन्तु जब कोई उनकी प्रशंसा करता था तब वे सकुचा जाते थे। प्रशंसा की इच्छा न करने पर भी उनका यश बराबर बढता गया॥ ७३॥ जैसे उदीयमान सूर्य के दर्शन से पाप दूर हो जाते हैं, वैसे ही उनके भी दर्शन से पाप भाग जाते थे। वे ज्ञानी थे, सो दूसरों को तत्त्वज्ञान सिखाकर अज्ञान का अँधेरा मिटाते थे। अतएव उन्होंने प्रजा को सब प्रकार से स्वतंत्र कर दिया था॥ ७४॥ चन्द्रमा की किरणें कमल में तथा सूर्य की किरणें कुमुद में नहीं प्रविष्ट हो पातीं, परन्तु अतिथि के गुणों ने शत्रुओं के हृदय में भी घर कर लिया था अर्थात् शत्रु भी उनके गुणों का आदर करते थे॥ ७५॥ अश्वमेध यज्ञ के लिए जब वे दिग्विजय करने को निकले, तब उनका काम यद्यपि शत्रुओं को किसी भी प्रकार हराना ही था, परन्तु उस समय भी उन्होंने धर्म से ही काम लिया, कूटनीति अथवा छल का प्रयोग नहीं किया॥ ७६॥ इस तरह शास्त्रीय मार्ग पर चलने से अतिथि का प्रभाव बढ गया और जैसे इन्द्र देवताओं के देवता है, वैसे ही वे राजाओं के राजा हो गये॥ ७७॥ इन्द्र आदि चारों लोकपालों के समान पराक्रमी होने के कारण लोग उन्हें पाँचवाँ लोकपाल कहते थे। पृथ्वी-जल आदि पाँचों तत्त्वों के समान महान् होने के कारण लोग उन्हें छठा तत्त्व मानते थे। हिमाचल आदि सात कुलपर्वतों के समान विशाल होने के कारण वे आठवें कुलपर्वत कहलाते थे॥ ७८॥ जैसे देवता इन्द्र की आज्ञा मानते हैं, वैसे ही सब राजे अपने-अपने छत्र उतारकर

ऋत्विजः स तथाऽनर्च दक्षिणाभिर्महाक्रतौ । यथा साधारणीभूतं नामास्य धनदस्य च ॥ ८० ॥
इन्द्राद्वृष्टिर्नियमितगदोद्रेकवृत्तिर्यमोऽभूद्यादोनाथः शिवजलपथः कर्मणे नौचराणाम् ।
पूर्वापेक्षी तदनु विदधे कोषवृद्धिं कुबेरस्तस्मिन्दण्डोपनतचरितं भेजिरे लोकपालाः ॥ ८१ ॥

इति महाकविकालिदासकृतौ रघुवंशे महाकाव्ये
अतिथिवर्णनं नाम सप्तदशः सर्गः ॥ १७ ॥

उनकी आज्ञा को शिरोधार्य करते थे ॥ ७९ ॥ अश्वमेध महायज्ञ में जिन ब्राह्मणों ने यज्ञ कराया था, उनको अतिथि ने इतनी दक्षिणा दी कि लोग उन्हें भी दूसरा कुबेर मानने लगे ॥ ८० ॥ उनके साम्राज्य पर इन्द्र ने वर्षा की, यमराज ने रोगों की रोक-थाम की, वरुण ने नाविकों के लिए जल का मार्ग खोल दिया और कुबेर ने इनका राजकोश भरा। इस प्रकार इन्द्र आदि लोकपाल जैसे उनके प्रताप से ही डरकर उनकी सेवकाई किया करते थे ॥ ८१ ॥

इस प्रकार रघुवंशमहाकाव्य में अतिथि-वर्णन नामक
सतरहवाँ सर्ग समाप्त ॥ १७ ॥

अष्टादशः सर्गः

स नैषधस्यार्थपतेः सुतायामुत्पादयामास निषिद्धशत्रुः।
अनूनसारं निषधान्नगेन्द्रात्पुत्रं यमाहुर्निषधाख्यमेव॥ १॥
तेनोरुवीर्येण पिता प्रजायै कल्पिष्यमाणेन ननन्द यूना।
सुवृष्टियोगादिव जीवलोकः सस्येन सम्पत्तिफलोन्मुखेन॥ २॥
शब्दादि निर्विश्य सुखं चिराय तस्मिन्प्रतिष्ठापितराजशब्दः।
कौमुद्वतेयः कुमुदावदातैर्यामिर्जितां कर्मभिरारुरोह॥ ३॥
पौत्रः कुशस्यापि कुशेशयाक्षः ससागरां सागरधीरचेताः।
एकातपत्रां भुवमेकवीरः पुरार्गलादीर्घभुजो बुभोज॥ ४॥
तस्यानलौजास्तनयस्तदन्ते वंशश्रियं प्राप नलाभिधानः।
यो नड्वलानीव गजः परेषां बलान्यमृद्नान्नलिनाभवक्त्रः॥ ५॥
नभश्चरैर्गीतयशाः स लेभे नभस्तलश्यामतनुं तनूजम्।
ख्यातं नभःशब्दमयेन नाम्ना कान्तं नभोमासमिव प्रजानाम्॥ ६॥
तस्मै विसृज्योत्तरकोसलानां धर्मोत्तिरस्तत्प्रभवे प्रभुत्वम्।
मृगैरजर्यं जरसोपदिष्टमदेहबन्धाय पुनर्बबन्ध॥ ७॥
तेन द्विपानामिव पुण्डरीको राज्ञामजय्योऽजनि पुण्डरीकः।
शान्ते पितर्याहृतपुण्डरीका यं पुण्डरीकाक्षमिव श्रिता श्रीः॥ ८॥
स क्षेमधन्वानममोघधन्वा पुत्रं प्रजाक्षेमविधानदक्षम्।
क्षमां लम्भयित्वा क्षमयोपपन्नं वने तपः क्षान्ततरश्चचार॥ ९॥

अभिमान त्याग दिया॥ ४७॥ यदि पशु-पक्षियों में भी मनुष्य के समान लज्जा होती तो अपने बालों पर इतरानेवाली चमरी गायें उनके बालों को देखकर अपने चँवरों पर इठलाना भूल जातीं॥ ४८॥ संसार को बनाने वाले ब्रह्माजी पृथ्वी की सारी सुन्दरता एक साथ देखना चाहते थे। इसीलिए उन्होंने सुन्दर अंगों की उपमा में आने वाली सब वस्तुओं को बडे जतन मे बटोर तथा उन्हें सब अंगों पर यथास्थान सजाकर सुन्दरता की मूर्ति पार्वतीजी का निर्माण किया था॥ ४९॥ स्वेच्छया इधर-उधर घूमने वाले नारदजी एक दिन घूमते-घामते हिमालय के घर पहुँचे। वहाँ हिमालय के पास बैठी उनकी कन्या को देखकर नारदजी ने भविष्यवाणी की कि 'यह कन्या अपने प्रेम से शिवजी के आधे शरीर की स्वामिनी और उनकी एकमात्र पत्नी बनकर रहेगी'॥ ५०॥ यद्यपि पार्वतीजी बराबर सयानी होती चली जा रही थीं, किन्तु नारदजी की बात से हिमालय इतने निश्चिन्त हो गये कि उन्होंने दूसरा वर खोजने की चिन्ता ही छोड़ दी। क्योंकि जैसे मन्त्र से पवित्र हवन की सामग्री को अग्नि के सिवाय और कोई नहीं ले सकता, वैसे ही महादेवजी को छोडकर पार्वतीजी को कोई दूसरा नहीं पा सकता था॥ ५१॥ हिमालय ने यह सोचा कि 'जब तक स्वयं महादेवजी कन्या माँगने नहीं आते, तब तक उन्हें अपने-आप कन्या देने जाना ठीक नहीं होगा'। इसलिए जहाँ सज्जनों को निरादर का डर रहता है, वहाँ वे अपने काम में किसी मध्यस्थ को साथ ले लेते हैं॥ ५२॥ जब सती ने अपने पिता दक्ष के द्वारा महादेवजी का अपमान होने पर क्रोध करके यज्ञ की अग्नि में अपना शरीर भस्म कर दिया, तभी से शिवजी ने भी सब भोग-विलास छोडकर दूसरा विवाह नहीं किया था॥ ५३॥ इन्द्रियजयी और गजचर्म धारण करने वाले भगवान् शंकर कस्तूरी की गन्ध से सुगन्धित हिमालय की एक ऐसी सुन्दर चोटी पर जाकर तप करने लगे, जहाँ देवदारु के वृक्षों को गंगाजी की धारा सींचती थी और जहाँ दिन-रात गन्धर्व गाते रहते थे॥ ५४॥ उनके आस-पास सिर पर नमेरु के कोमल फूलों की माला बाँधे, शरीर पर भोजपत्र के वृक्षों की छाल के कपड़े लपेटे और मैनसिल के रंग से अपना शरीर रंगे हुए उनके प्रमथ आदि गण शिलाजीत से पुती चट्टानों पर

तुषारसङ्घातशिलाः खुराग्रैः समुल्लिखन्दर्पकलः ककुद्मान्।
दृष्टः कथञ्चिद् गवयैर्विविग्नैरसोढसिंहध्वनिरुन्ननाद॥ ५६॥
तत्राग्निमाधाय समित्समिद्धं स्वमेव मूर्त्यन्तरमष्टमूर्तिः।
स्वयं विधाता तपसः फलानां केनापि कामेन तपश्चचार॥ ५७॥
अनर्घ्यमर्घ्येण तमद्रिनाथः स्वर्गौकसामर्चितमर्चयित्वा।
आराधनायास्य सखीसमेतां समादिदेश प्रयतां तनूजाम्॥ ५८॥
प्रत्यर्थिभूतामपि तां समाधेः शुश्रूषमाणां गिरिशोऽनुमेने।
विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः॥ ५९॥
अवचितबलिपुष्पा वेदिसम्मार्गदक्षा नियमविधिजलानां बर्हिषां चोपनेत्री।
गिरिशमुपचचार प्रत्यहं सा सुकेशी नियमितपरिखेदा तच्छिरश्चन्द्रपादैः॥ ६०॥

इति महाकविकालिदासकृतौ कुमारसम्भवे महाकाव्ये
उमोत्पत्तिर्नाम प्रथमः सर्गः॥ १॥

वैठे रहते थे॥ ५५॥ उनका गर्वीला नन्दी गरजते हुए सिंह की दहाड़ को न सह सकने के कारण जब अपने खुरों से हिम की चट्टानों को खोदता हुआ डकारने लगता था, तब घबरायी हुई नीलगायें उसे देखती ही रह जाती थीं कि यह सिंह जैसा गरजने वाला दूसरा कौन वीर यहाँ आ पहुँचा॥ ५६॥ उसी पर्वत-शिखर पर सब तपस्याओं के स्वयं फलदाता शिवजी अपनी दूसरी मूर्ति अग्नि को समिधाओं से सुलगाकर न जाने किस फल की इच्छा से तप करने लगे॥ ५७॥ स्वर्ग के देवता महादेवजी को पूजते हैं, उनकी पूजा के लिए हिमालय अपनी पुत्री के साथ बहुमूल्य सामग्री लेकर पहुँचे। पहले उन्होंने स्वयं उनकी पूजा की और बाद में अपनी कन्या को आज्ञा दी कि सखियों के साथ जाकर नित्य शिवजी की पूजा किया करो॥ ५८॥ यद्यपि वहाँ पार्वतीजी के आने से शिवजी के तप में बाधा पड़ सकती थी, तथापि उन्होंने पार्वतीजी की सेवा स्वीकार कर ली। क्योंकि सच्चे धर्मात्मा उन्हें ही समझना चाहिए कि जिनका मन विकार उत्पन्न करने वाली वस्तुओं के बीच में रहकर भी विकृत नहीं होता॥ ५९॥ सुन्दर केशों वाली पार्वतीजी वहाँ रहकर नियम से प्रतिदिन पूजा के लिए फूल चुनतीं, बड़े अच्छे ढंग से वेदी को धोती-पोंछतीं और नित्यकर्म के लिए जल तथा कुश लाकर उनकी सेवा करती हुई तनिक भी नहीं थकती थीं। क्योंकि महादेवजी के माथे पर विराजमान चन्द्रमा की ठण्ड़ी किरणें पार्वतीजी की थकान बराबर मिटाती रहती थीं॥ ६०॥

इस प्रकार महाकविकालिदासरचित कुमारसम्भवमहाकाव्य में
उमाजन्म नामक पहला सर्ग समाप्त॥ १॥

द्वितीयः सर्गः

तस्मिंन्विप्रकृताः काले तारकेण दिवौकसः । तूरासाहं पुरोधाय धाम स्वायम्भुवं ययुः ॥ १ ॥
तेषामाविरभूद्ब्रह्मा परिम्लानमुखश्रियाम् । सरसां सुप्तपद्मानां प्रातर्दीधितिमानिव ॥ २ ॥
अथ सर्वस्य धातारं ते सर्वे सर्वतोमुखम् । वागीशं वाग्भिरर्थ्याभिः प्रणिपत्योपतस्थिरे ॥ ३ ॥
नमस्त्रिमूर्तये तुभ्यं प्राक्सृष्टेः केवलात्मने । गुणत्रयविभागाय पश्चाद्भेदमुपेयुषे ॥ ४ ॥
यदमोघमपामन्तरुप्तं बीजमज ! त्वया । अतश्चराचरं विश्वं प्रभवस्तस्य गीयसे ॥ ५ ॥
तिसृभिस्त्वमवस्थाभिर्महिमानमुदीरयन् । प्रलयस्थितिसर्गाणामेकः कारणतां गतः ॥ ६ ॥
स्त्रीपुंसावात्मभागौ ते भिन्नमूर्तेः सिसृक्षया । प्रसूतिभाजः सर्गस्य तावेव पितरौ स्मृतौ ॥ ७ ॥
स्वकालपरिमाणेन व्यस्तरात्रिन्दिवस्य ते । यौ तु स्वप्नावबोधौ तौ भूतानां प्रलयोदयौ ॥ ८ ॥
जगद्योनिरयोनिस्त्वं जगदन्तो निरन्तकः । जगदादिरनादिस्त्वं जगदीशो निरीश्वरः ॥ ९ ॥
आत्मानमात्मना वेत्सि सृजस्यात्मानमात्मना । आत्मना कृतिना च त्वमात्मन्येव प्रलीयसे ॥ १० ॥
द्रवः सङ्घातकठिनः स्थूलः सूक्ष्मो लघुर्गुरुः । व्यक्तो व्यक्तेतरश्चासि प्राकाम्यं ते विभूतिषु ॥ ११ ॥
उद्घातः प्रणवो यासां न्यायैस्त्रिभिरुदीरणम् । कर्म यज्ञः फलं स्वर्गस्तासां त्वं प्रभवो गिराम् ॥

उसी समय तारकासुर नाम के राक्षस द्वारा सताये हुए देवता इन्द्र को अगुआ बनाकर ब्रह्माजी के पास गये ॥ १ ॥ उदास मुँहवाले उन देवताओं के आगे ब्रह्माजी उसी प्रकार उपस्थित हुए, जैसे तालाब में सोये हुए कमलों के आगे प्रातःकाल का सूर्य निकल आता है ॥ २ ॥ अपने आगे उपस्थित देखते ही चार मुँह वाले और सारे जगत् को बनाने वाले ब्रह्माजी को प्रणाम करके वे देवता बड़े भावभरे शब्दों में इस तरह स्तुति करने लगे— ॥ ३ ॥ हे भगवन्! संसार की रचना के पहले आपका केवल एक रूप रहता है, किन्तु जब संसार रचने लगते हैं उस समय सत्त्व, रज और तम— ये तीन गुण उत्पन्न करके आप ब्रह्मा, विष्णु और महेश नाम से त्रिमूर्ति बन जाते हैं। आपको हमारा प्रणाम है ॥ ४ ॥ हे ब्रह्मन्! सर्वप्रथम आपने जल उत्पन्न करके उसमें ऐसा बीज बो दिया है, जो कभी व्यर्थ नहीं जाता। जिससे एक ओर ये पशु, पक्षी, मनुष्य आदि जंगम और दूसरी ओर वृक्ष-पहाड़ आदि स्थावर जगत् उत्पन्न हुए हैं। अतएव लोग आपको ही समस्त संसार का जन्मदाता कहते हैं ॥ ५ ॥ एकमात्र आप ही शिव, विष्णु और हिरण्यगर्भ— इन तीनों रूपों से अपनी शक्ति प्रकट करके इस संसार का नाश, पालन और सृष्टि करते हैं ॥ ६ ॥ जब आप स्त्री और पुरुष की सृष्टि करने चलते हैं, उस समय आप ही स्त्री और पुरुष दो रूप बन जाते हैं। आपके वे ही दोनों रूप सारे संसार के माता-पिता कहलाते हैं ॥ ७ ॥ आपने समय की जो नाप बना रखी है, उसी के अनुसार दिन और रात होते हैं। उसमें जब आप सोते हैं, तब संसार का प्रलय हो जाता है और जब आप जागते हैं, तब संसार की सृष्टि होती है ॥ ८ ॥ यद्यपि आपने संसार को उत्पन्न किया है, किन्तु आपको किसी ने नहीं उत्पन्न किया। आप संसार का अन्त करते हैं, परन्तु आपका कोई अन्त नहीं कर सकता। आपने संसार का प्रारम्भ किया है, परन्तु आपका प्रारम्भ कभी नहीं हुआ। आप समस्त संसार के स्वामी हैं, परन्तु आपका स्वामी कोई नहीं है ॥ ९ ॥ आप ही अपने को जानते हैं और आप ही अपने को उत्पन्न करते हैं और जब अपना काम पूरा कर लेते हैं, तब आप अपने को अपने में ही लीन कर लेते हैं ॥ १० ॥ आप तरल भी हैं और कठोर भी। मोटे भी हैं और पतले भी। बड़े भी हैं और छोटे भी। आप दिखलायी भी देते हैं और नहीं भी दिखलायी देते। इस प्रकार सभी सिद्धियाँ आपके हाथ में हैं। आप जब जैसा चाहें, वैसा बन सकते हैं ॥ ११ ॥ उस वैदिकी वाणी को आपने ही उत्पन्न किया है, जिसका प्रारम्भ ॐकार से होता है। जिसका उच्चारण

त्वामामनन्ति प्रकृतिं पुरुषार्थप्रवर्तिनीम् । तद्दर्शिनमुदासीनं त्वामेव पुरुषं विदुः ॥ १३ ॥
त्वं पितृणामपि पिता देवानामपि देवता । परतोऽपि परश्चासि विधाता वेधसामपि ॥ १४ ॥
त्वमेव हव्यं होता च भोज्यं भोक्ता च शाश्वतः । वेद्यं च वेदिता चासि ध्याता ध्येयं च यत्परम् ॥
इति तेभ्यः स्तुतीः श्रुत्वा यथार्था हृदयङ्गमाः । प्रसादाभिमुखो वेधाः प्रत्युवाच दिवौकसः ॥
पुराणस्य कवेस्तस्य चतुर्मुखसमीरिता । प्रवृत्तिरासीच्छन्दानां चरितार्था चतुष्टयी ॥ १७ ॥
स्वागतं स्वानधीकारान्प्रभावैरवलम्ब्य वः । युगपद्युगबाहुभ्यः प्राग्भ्यः प्राज्यविक्रमाः ॥ १८ ॥
किमिदं द्युतिमात्मीयां न बिभ्रति यथा पुरा । हिमक्लिष्टप्रकाशानि ज्योतींषीव मुखानि वः ॥ १९ ॥
प्रशमादर्चिषामेतदनुद्गीर्णसुरायुधम् । वृत्रस्य हन्तुः कुलिशं कुण्ठितश्रीव लक्ष्यते ॥ २० ॥
किं चायमरिदुर्वारः पाणौ पाशः प्रचेतसः । मन्त्रेण हतवीर्यस्य फणिनो दैन्यमाश्रितः ॥ २१ ॥
कुबेरस्य मनःशल्यं शंसतीव पराभवम् । अपविद्धगदो बाहुर्भग्नशाख इव द्रुमः ॥ २२ ॥
यमोऽपि विलिखन्भूमिं दण्डेनास्तमितत्विषा । कुरुतेऽस्मिन्नमोघेऽपि निर्वाणालातलाघवम् ॥
अमी च कथमादित्याः प्रतापक्षतिशीतलाः । चित्रन्यस्ता इव गताः प्रकामालोकनीयताम् ॥ २४ ॥
पर्याकुलत्वान्मरुतां वेगभङ्गोऽनुमीयते । अम्भसामोघसंरोधः प्रतीपगमनादिव ॥ २५ ॥

उदात्त, अनुदात्त और स्वरित— इन तीनों स्वरों से होता है और जिसके मन्त्रों द्वारा यज्ञ करके लोग स्वर्ग प्राप्त करते हैं॥ १२॥ आपको ही लोग धर्म, अर्थ, काम और माक्ष के लिए मनुष्य को प्रेरित करने वाली मूल प्रकृति कहते हैं और आप ही उस प्रकृति का दर्शन करने वाले उदासीन पुरुष भी कहलाते हैं॥ १३॥ आप पितरों के भी पिता और देवताओं के भी देवता हैं। आप अच्छों से भी अच्छे हैं और सृष्टि करने वाले प्रजापतियों की सृष्टि भी आप ही करते हैं॥ १४॥ आप ही हवन की सामग्री हैं और आप ही होता (हवन करने वाले) भी हैं। आप ही भोग की वस्तुएँ हैं और आप ही भोक्ता हैं। आप ही जानने के योग्य हैं और आप ही ज्ञाता भी हैं। आप ही ध्यान करने वाले हैं और आप ही वे सर्वश्रेष्ठ प्रभु हैं कि जिनका ध्यान किया जाना चाहिए॥ १५॥ उन देवताओं की ऐसी वास्तविक और मनभावनी स्तुति सुनकर दयालु ब्रह्माजी देवताओं से बोले॥ १६॥ उस समय सबसे पुराने कवि ब्रह्माजी के चार मुखों से निकली हुई वाणी ने परा, पश्यन्ती, मध्यमा और वैखरी—इन चार रूपों वाली होना सार्थक कर दिया॥ १७॥ ब्रह्माजी ने कहा—एक साथ आये हुए, अपनी शक्ति से अपने-अपने अधिकारों की रक्षा करने वाले और बडी-बड़ी भुजाओं वाले हे प्रचुर शक्तिशाली देवताओ! मैं आप सबका स्वागत करता हूँ॥ १८॥ परन्तु यह तो बतलाइए कि आप लोगों के मुँह की कान्ति पहले जैसी क्यों नहीं है? कुहरे से ढँके हुए धुँधले तारे के समान आप लोग उदास क्यों दिखलायी दे रहे हैं?॥ १९॥ वृत्रासुर को मारने वाला और इन्द्रधनुष के समान चमकीला इन्द्र का वज्र भी आज अपनी चमक खोकर कुण्ठित जैसा क्यों दीख रहा है॥ २०॥ शत्रुओं को नष्ट करने वाला यह वरुणदेव के हाथ का पाश (फन्दा) मन्त्र से बँधे हुए सर्प के समान ऐसा दीन क्यों हो रहा है॥ २१॥ गदा के बिना कुबेर की विशाल भुजा भी कटी हुई शाखा वाले वृक्ष के ठूँठ जैसी क्यों लग रही है? यह बतलाता है कि किसी बड़े प्रबल शत्रु से हार जाने का काँटा इनके हृदय में चुभा हुआ है॥ २२॥ अपने निस्तेज दण्ड से पृथ्वी को कुरेदते हुए यमराज भी ऐसे क्यों दीख रहे हैं कि मानो इनका विकराल दण्ड भी बुझी लुकाठी जैसा बेकाम हो गया है॥ २३॥ ठण्डे पड़े हुए ये बारह आदित्य भी अपना तेज गँवा कर चित्रलिखित जैसे होकर ऐसे मंद क्यों दिखलायी दे रहे हैं कि कोई भी जब तक चाहे तब तक इस समय इन्हें देख सकता है॥ २४॥ ऊँचे की ओर बहने वाले जल का बहाव जैसे धीमा पड़ जाता है, वैसे ही उनचासों पवन ऐसे क्यों दीख रहे हैं, जैसे ये भी घबराहट से मन्द पड़ गये हों॥ २५॥ पराजय के दुःख से झुकी और

आवर्जितजटामौलिविलम्बिशशिकोटयः । रुद्राणामपि मूर्धानः क्षतहुङ्कारशंसिनः ॥ २६ ॥
लब्धप्रतिष्ठाः प्रथमं यूयं किं बलवत्तरैः । अपवादैरिवोत्सर्गाः कृतव्यावृत्तयः परैः ॥ २७ ॥
तद्ब्रूत वत्साः किमितः प्रार्थयध्वं समागताः । मयि सृष्टिर्हि लोकानां रक्षा युष्मास्ववस्थिता ॥
ततो मन्दानिलोद्धूतकमलाकरशोभिना । गुरुं नेत्रसहस्रेण नोदयामास वासवः ॥ २९ ॥
स द्विनेत्रं हरेश्चक्षुः सहस्रनयनाधिकम् । वाचस्पतिरुवाचेदं प्राञ्जलिर्जलजासनम् ॥ ३० ॥
एवं यदात्थ भगवन्नामृष्टं नः परैः पदम् । प्रत्येकं विनियुक्तात्मा कथं न ज्ञास्यसि प्रभो ! ॥ ३१ ॥
भवल्लब्धवरोदीर्णस्तारकाख्यो महासुरः । उपप्लवाय लोकानां धूमकेतुरिवोत्थितः ॥ ३२ ॥
पुरे तावन्तमेवास्य तनोति रविरातपम् । दीर्घिकाकमलोन्मेषो यावन्मात्रेण साध्यते ॥ ३३ ॥
सर्वाभिः सर्वदा चन्द्रस्तं कलाभिर्निषेवते । नादत्ते केवलां लेखां हरचूडामणीकृताम् ॥ ३४ ॥
व्यावृत्तगतिरुद्याने कुसुमस्तेयसाध्वसात् । न वाति वायुस्तत्पार्श्वे तालवृन्तानिलाधिकम् ॥ ३५ ॥
पर्यायसेवामुत्सृज्य पुष्पसम्भारतत्पराः । उद्यानपालसामान्यमृतवस्तमुपासते ॥ ३६ ॥
तस्योपायनयोग्यानि रत्नानि सरिताम्पतिः । कथमप्यम्भसामन्तरानिष्पत्तेः प्रतीक्षते ॥ ३७ ॥
ज्वलन्मणिशिखाश्चैनं वासुकिप्रमुखा निशि । स्थिरप्रदीपतामेत्य भुजङ्गाः पर्युपासते ॥ ३८ ॥
तत्कृतानुग्रहापेक्षी तं मुहुर्दूतहारितैः । अनुकूलयतीन्द्रोऽपि कल्पद्रुमविभूषणैः ॥ ३९ ॥

खुली जटाओं में लटकती हुई चन्द्रकलाओं वाले ग्यारह रुद्रों के मस्तक भी यही बता रहे हैं कि इनकी हुंकार करने की शक्ति अब लुप्त हो गयी है ॥ २६ ॥ जैसे व्याकरण आदि शास्त्रों में अपवाद वाला नियम किसी व्यापक नियम को व्यर्थ कर देता है, वैसे ही लब्धप्रतिष्ठ आप लोग भी किसी पराक्रमी शत्रु से क्या अपना-अपना अधिकार खो चुके हैं? ॥ २७ ॥ हे वत्स ! मुझे बतलाइये कि आप लोग इकट्ठे होकर क्या कहने के लिए मेरे पास आये हैं। क्योंकि हमारा काम तो केवल संसार की सृष्टि करना है, उसकी रक्षा का भार तो आप ही लोगों पर है ॥ २८ ॥ ब्रह्माजी की बात सुनकर इन्द्र ने अपने सहस्र नेत्रों को एक साथ इस प्रकार चलाकर बृहस्पतिजी को बोलने के लिए प्रेरित किया, जैसे मन्द पवन के झोंके से कमल का वन हिल उठे ॥ २९ ॥ जिनके दो नेत्रों में ही इन्द्र के सहस्र नेत्रों से भी अधिक देखने की शक्ति थी, वे बृहस्पतिजी हाथ जोडकर ब्रह्माजी से बोले ॥ ३० ॥ हे ब्रह्मन्! आपने जो कुछ कहा है, वह सत्य है। हम लोगों के सब स्थान शत्रुओं ने हस्तगत कर लिये हैं। आप तो घट-घट में रमे हुए हैं, तब भला आपसे कोई बात कैसे छिपी रह सकती है ॥ ३१ ॥ भगवन्! आपसे वरदान पाकर तारक नाम का ढीठ राक्षस उसी प्रकार सिर उठाता चला जा रहा है, जैसे संसार का नाश करने के लिए धूमकेतु (पुच्छल) तारा निकल आया हो ॥ ३२ ॥ प्रचण्ड किरणों वाले सूर्य भी डरकर उसके नगर पर केवल उतनी ही किरणें फैलाते हैं, जिनसे तालाब का कमल खिल जायँ ॥ ३३ ॥ चन्द्रमा भी पूरे महीने भर अपनी पूर्ण कला से चमकते हैं। वे केवल उस एक कला को छोड देते हैं, जिसे शिवजी ने अपने मस्तक की मणि बना रखा है ॥ ३४ ॥ पवन भी उसके पास पंखे की वायु से अधिक वेग से नहीं बहता। क्योंकि वह डरता है कि कहीं तारकासुर की फुलवारी के फूल न झड़ जायँ, जिससे उसे फूल की चोरी का दण्ड भोगना पड जाय ॥ ३५ ॥ छहों ऋतुएँ अपने-अपने समय का विचार छोड़कर एक साथ फुलवारी की मालिनों की भाँति एक दूसरी ऋतु के फूलों को बिना छेड़े हुए अपनी-अपनी ऋतु के फूल उपजाकर तारकासुर की सेवा करती रहती हैं ॥ ३६ ॥ समुद्र भी उसके पास भेंट के योग्य रत्न भेजने लिए तब तक जल के भीतर रखकर प्रतीक्षा करता रहता है, जब तक कि वे रत्न ठीक से पुष्ट नहीं हो जाते ॥ ३७ ॥ चमकती हुयी मणि युक्त फनों वाले वासुकी आदि बड़े-बड़े सर्प अपने मणियों के न बुझने वाले स्थायी दीपक लेकर उसकी सेवा करते हैं ॥ ३८ ॥ उसकी कृपा पाने के लिए

इत्थमाराध्यमानोऽपि क्लिश्नाति भुवनत्रयम्। शाम्येत्प्रत्यपकारेण नोपकारेण दुर्जनः॥ ४०॥
तेनामरवधूहस्तैः सदयालूनपल्लवाः। अभिज्ञाश्छेदपातानां क्रियन्ते नन्दनद्रुमाः॥ ४१॥
वीज्यते स हि संसुप्तः श्वाससाधारणानिलैः। चामरैः सुरबन्दीनां बाष्पसीकरवर्षिभिः॥ ४२॥
उत्पाट्य मेरुशृङ्गाणि क्षुण्णानि हरितां खुरैः। आक्रीडपर्वतास्तेन कल्पिताः स्वेषु वेश्मसु॥ ४३॥
मन्दाकिन्याः पयः शेषं दिग्वारणमदाविलम्। हेमाम्भोरुहसस्यानां तद्वाप्यो धाम साम्प्रतम्॥
भुवनालोकनप्रीतिः स्वर्गिभिर्नानुभूयते। खिलीभूते विमानानां तदापातभयात् पथि॥ ४५॥
यज्वभिः सम्भृतं हव्यं विततेष्वध्वरेषु सः। जातवेदोमुखान्मायी मिषतामाच्छिनत्ति नः॥ ४६॥
उच्चैरुच्चैःश्रवास्तेन हयरत्नमहारि च। देहबद्धमिवेन्द्रस्य चिरकालार्जितं यशः॥ ४७॥
तस्मिन्नुपायाः सर्वे नः क्रूरे प्रतिहतक्रियाः। वीर्यवन्त्यौषधानीव विकारे सान्निपातिके॥ ४८॥
जयाशा यत्र चास्माकं प्रतिघातोत्थितार्चिषा। हरिचक्रेण तेनास्य कण्ठे निष्कमिवार्पितम्॥ ४९॥
तदीयास्तोयदेष्वद्य पुष्करावर्तकादिषु। अभ्यस्यन्ति तटाघातं निर्जितैरावता गजाः॥ ५०॥
तदिच्छामो विभो! स्रष्टुं सेनान्यं तस्य शान्तये। कर्मबन्धच्छिदं धर्मं भवस्येव मुमुक्षवः॥ ५१॥
गोप्तारं सुरसैन्यानां यं पुरस्कृत्य गोत्रभित्। प्रत्यानेष्यति शत्रुभ्यो बन्दीमिव जयश्रियम्॥ ५२॥
वचस्यवसिते तस्मिन्ससर्ज गिरमात्मभूः। गर्जितानन्तरां सृष्टिं सौभाग्येन जिगाय सा॥ ५३॥

इन्द्र भी बार-बार अपने दूतों के हाथों कल्पवृक्ष से उत्पन्न सुन्दर रत्न उसके पास भेजकर उसे प्रसन्न करते रहते हैं॥ ३९॥ ऐसी सेवा करने पर भी वह तीनों भुवनों को दुःख दे रहा है। क्योंकि दुर्जन लात खाकर ही सीधे होते हैं—उपकार से नहीं॥ ४०॥ नन्दन वन के जिन वृक्षों के कोमल पत्ते देवताओं की स्त्रियाँ बड़ी कोमलता के साथ कर्णफूल बनाने के लिए तोडती थीं, उन्हीं वृक्षों को वह राक्षस बड़ी निर्दयता से काट-काटकर गिरा रहा है॥ ४१॥ उसके सोते समय बन्दी की हुई देवताओं की स्त्रियाँ गरम-गरम साँसें लेती और आँसू बहाती हुई उस पर चँवर डुलाती हैं॥ ४२॥ सूर्य के घोडों की टापों से विशृङ्खलित मेरु पर्वत की चोटियों को उखाड़-उखाड़ कर उसने अपने घर में ले जाकर उनके क्रीड़ा-पर्वत बना लिये हैं॥४३॥ मन्दाकिनी के स्वर्णकमल उखाड-उखाड़कर उसने अपने घर की बावलियों में लगा लिये हैं। इसी कारण मन्दाकिनी में आजकल केवल दिग्गजों के मद से गँदला जल रह गया है॥ ४४॥ पहले देवतागण विमानों पर चढकर इस लोक से उस लोक में घूमते-फिरते थे, परन्तु अब उसके आ जाने के डर से वे आकाश में निकल ही नहीं पाते॥ ४५॥ जब यज्ञ में यजमान हम लोगों को आहुति देता है, तब यह मायावी हम लोगों के देखते-देखते अग्नि के मुँह से हमारा भाग छीन ले जाता है॥ ४६॥ उच्चैःश्रवाः नाम के उस सुन्दर घोडे को भी उसने छीन लिया है, जो बहुत दिनों से एकत्रित इन्द्र के यश के समान महान् था॥ ४७॥ बड़ी-बड़ी ओषधियाँ भी जैसे सन्निपात में काम नहीं करतीं, उसी प्रकार हम लोग भी उस दुष्ट को मारने के लिए जितने भी उपाय करते हैं, वे सब व्यर्थ हो जाते हैं॥ ४८॥ विष्णु के जिस चक्र पर हम अपनी जीत की आस लगाये हुए थे, वह भी जब उसके गले पर जाकर टकराता है, तब उसमें से निकली हुयी चिनगारियाँ उस राक्षस के गले में स्वर्णमय आभूषण जैसी दीखती है॥ ४९॥ इन्द्रगज (ऐरावत) को भी हरा देने वाले उसके हाथी पुष्करावर्त्तक आदि प्रलयंकर बादलों से टकराकर टीले ढहाने का खेल खेलते हैं॥ ५०॥ हे प्रभो! जैसे मोक्ष पाने के इच्छुक लोग जन्म-मरण से छूटने के लिए कर्मबन्धनों को काटने वाला उपाय खोजा करते हैं, वैसे ही हमलोग राक्षस को नष्ट करने के लिए एक ऐसा सेनापति उत्पन्न करना चाहते हैं, जिसको देवताओं की सेना का रक्षक बनाकर और उसे सेना के आगे करके भगवान् इन्द्र शत्रुओं के हाथ में बन्दी के समान पड़ी हुई विजय-श्री को लौटा लायें॥ ५१-५२॥ उनके ऐसा कहने पर ब्रह्माजी ऐसी मीठी वाणी बोले, जो मेघगर्जन के बाद

सम्पत्स्यते वः कामोऽयं कालः कश्चित्प्रतीक्ष्यताम्। न त्वस्य सिद्धौ यास्यामि सर्गव्यापारमात्मना॥
इतः स दैत्यः प्राप्तश्रीर्नेत एवार्हति क्षयम्। विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतम्॥ ५५॥
वृत्तं तेनेदमेव प्राङ्मया चास्मै प्रतिश्रुतम्। वरेण शमितं लोकानलं दग्धुं हि तत्तपः॥ ५६॥
संयुगे सांयुगीनं तमुद्यतं प्रसहेत कः। अंशादृते निषिक्तस्य नीललोहितरेतसः॥ ५७॥
स हि देवः परं ज्योतिस्तमःपारे व्यवस्थितम्। परिच्छिन्नप्रभावर्द्धिर्न मया न च विष्णुना॥ ५८॥
उमारूपेण ते यूयं संयमस्तिमितं मनः। शम्भोर्यतध्वमाक्रष्टुमयस्कान्तेन लोहवत्॥ ५९॥
उभे एव क्षमे वोढुमुभयोर्बीजमाहितम्। सा वा शम्भोस्तदीया वा मूर्तिर्जलमयी मम॥ ६०॥
तस्यात्मा शितिकण्ठस्य सैनापत्यमुपेत्य वः। मोक्ष्यते सुरबन्दीनां वेणीर्वीर्यविभूतिभिः॥ ६१॥
इति व्याहृत्य विबुधान्विश्वयोनिस्तिरोदधे। मनस्याहितकर्तव्यास्तेऽपि देवा दिवं ययुः॥ ६२॥
तत्र निश्चित्य कन्दर्पमगमत्पाकशासनः। मनसा कार्यसंसिद्धौ त्वराद्विगुणरंहसा॥ ६३॥
अथ स ललितयोषिद्भ्रूलताचारुभृङ्गं रतिवलयपदाङ्कं चापमासज्य कण्ठे।
सहचरमधुहस्तन्यस्तचूताङ्कुरास्त्रः शतमखमुपतस्थे प्राञ्जलिः पुष्पधन्वा॥ ६४॥

इति महाकविकालिदासकृतौ कुमारसम्भवे महाकाव्ये
ब्रह्मसाक्षात्कारो नाम द्वितीयः सर्गः॥ २॥

होने वाली वर्षा के समान भली लग रही थी॥ ५३॥ उन्होंने कहा—आप लोगों की इच्छा पूरी हो जायगी, परन्तु आपको थोडे दिन और धैर्य धरना पडेगा। तारकासुर को मारने के लिए मैं स्वयं तो अवतार ले नहीं सकता। क्योंकि उस राक्षस को मैंने ही वरदान दिया है अतएव अपने हाथ से उसे मारना ठीक नहीं लगता। अपने हाथ मे लगाये हुए विषवृक्ष को भी अपने ही हाथ से काटना उचित नहीं होता॥ ५४-५५॥ उस समय उमने मुझसे जो वरदान माँगा था, यदि मैं उसे न देता तो उसकी तपस्या मे सारा संसार जल जाता॥ ५६॥ महादेवजी के वीर्य से उत्पन्न होने वाले पुत्र के सिवाय युद्धभूमि में उस प्रसिद्ध वीर तारकासुर का नाश और कोई नहीं कर सकता॥ ५७॥ क्योंकि शंकर भगवान् अन्धकार के परे रहने वाले वह परम तेज हैं कि जिन्हें अविद्या छू भी नहीं पाती। अतएव हम और विष्णु भी उनकी महिमा का पता अब तक नहीं लगा सके हैं॥ ५८॥ अब आप लोग कोई ऐसा उपाय कीजिए कि जैसे चुम्बक से लोहा खिंच आता है, वैसे ही समाधिमग्न शंकरजी का मन पार्वतीजी के रूप की ओर खिंच जाय॥ ५९॥ क्योंकि शिवजी के वीर्य को केवल पार्वतीजी ही धारण कर सकती हैं और हमारे वीर्य को शिवजी की जलमयी मूर्ति धारण कर सकती है॥ ६०॥ उन पार्वतीजी से शंकरजी का जो पुत्र होगा, वही आप लोगों का सेनापति बनकर अपने पराक्रम से देवताओं की बन्दी स्त्रियों को छुड़ाकर उनके उलझे हुए बाल सुलझा सकेगा॥ ६१॥ संसार के रचयिता ब्रह्माजी ऐसा कहकर अन्तर्धान हो गये और देवता भी आगे का काम सोचकर स्वर्गलोक को चले गये॥ ६२॥ उक्त कार्य को सम्पन्न करने में कामदेव ही समर्थ है, ऐसा निश्चय करके इन्द्र भी चले गये, क्योंकि जब कार्यसिद्धि होनी होती है तो मन उस कार्य को करने में दुगुने वेग से प्रवृत्त होता है॥ ६३॥ इस प्रकार इन्द्र के स्मरण करते ही रति के कंगन की छाप से अङ्कित गले में सुन्दर स्त्री की भौंहों जैसा सुन्दर धनुष लटका तथा अपने साथी वसन्त के हाथ में आम के बौर का बाण देकर हाथ जोडे हुए कामदेव इन्द्र के आगे आकर उपस्थित हुआ॥ ६४॥

इस प्रकार महाकविकालिदासरचित कुमारसम्भवमहाकाव्य में
ब्रह्मा से भेंट नामक दूसरा सर्ग समाप्त॥ २॥

तृतीयः सर्गः

तस्मिन् मघोनस्त्रिदशान् विहाय सहस्रमक्ष्णां युगपत्पपात।
प्रयोजनापेक्षितया प्रभूणां प्रायश्चलं गौरवमाश्रितेषु॥ १॥
स वासवेनासनसन्निकृष्टमितो निषीदेति निसृष्टभूमिः।
भर्तुः प्रसादं प्रतिनन्द्य मूर्ध्ना वक्तुं मिथः प्राक्रमतैवमेनम्॥ २॥
आज्ञापय ज्ञातविशेष! पुंसां लोकेषु यत्ते करणीयमस्ति।
अनुग्रहं संस्मरणप्रवृत्तमिच्छामि संवर्धितमाज्ञया ते॥ ३॥
केनाभ्यसूया पदकाङ्क्षिणा ते नितान्तदीर्घैर्जनिता तपोभिः।
यावद् भवत्याहितसायकस्य मत्कार्मुकस्यास्य निदेशवर्ती॥ ४॥
असम्मतः कस्तव मुक्तिमार्ग पुनर्भवक्लेशभयात् प्रपन्नः।
बद्धश्चिरं तिष्ठतु सुन्दरीणामारेचितभ्रूचतुरैः कटाक्षैः॥ ५॥
अध्यापितस्योशनसाऽपि नीतिं प्रयुक्तरागप्रणिधिर्द्विषस्ते।
कस्यार्थधर्मौ वद पीडयामि सिन्धोस्तटावोघ इव प्रवृद्धः॥ ६॥
कामेकपत्नीव्रतदुःखशीलां लोलं मनश्चारुतया प्रविष्टाम्।
नितम्बिनीमिच्छसि मुक्तलज्जां कण्ठे स्वयंग्राहनिषक्तबाहुम्॥ ७॥
कयाऽसि कामिन्! सुरतापराधात् पादानतः कोपनयाऽवधूतः।
तस्याः करिष्यामि दृढानुतापं प्रवालशय्याशरणं शरीरम्॥ ८॥

वहाँ कामदेव के आते ही इन्द्र की हजारों आँखें देवताओं पर से हटकर बड़े ही आदर के साथ कामदेव पर जा पड़ीं। क्योंकि प्रायः स्वामी को अपने सेवकों से जब जैसा काम निकालना होता है, उसी के अनुसार वे उन पर आदर प्रदर्शित करते हैं॥ १॥ इन्द्र ने कामदेव से कहा—आओ, यहाँ बैठो। ऐसा कहकर उसे अपने पास बैठाया। उसने भी सिर झुकाकर इन्द्र की कृपा स्वीकार कर ली और उनसे बातें करने लगा॥ २॥ वह बोला— सबके गुणों को पहचानने वाले हे स्वामी! आज्ञा दीजिए, तीनों लोकों में ऐसा कौन-सा काम है, जो आप मुझसे कराना चाहते हैं। क्योंकि मुझे स्मरण करके आपने जो कृपा की है, उस कृपा को मैं आपकी आज्ञा पालन करके और भी बढाने का इच्छुक हूँ॥ ३॥ आपका सिंहासन चाहने वाला ऐसा कौन पुरुष उत्पन्न हो गया है, जिसने बहुत बड़ी-बड़ी तपस्याएँ करके आपके मन में ईर्ष्या जगा दी है। आप मुझे उनका नाम बतलाइये। मैं अभी जाकर उसे अपने इस बाण चढे हुए धनुष से जीत लूँगा॥ ४॥ वह आपका शत्रु कौन पुरुष है, जो संसार के कष्टों से घबराकर मोक्ष की ओर चल पड़ा है। मैं उसे अभी उन सुन्दरियों की चितवन में बहुत दिनों के लिए फँसाये देता हूँ, जो नयनबाण चलाने में बड़ी चतुर हैं॥ ५॥ आपका वह शत्रु अगर शुक्राचार्य से नीतिशास्त्र पढ़ा होगा तब भी मैं अत्यन्त भोगासक्ति को दूत बनाकर उसके पास भेजता हूँ, जो उसका धर्म और अर्थ दोनों उसी प्रकार नष्ट कर देगा, जैसे बरसात में बढी हुई नदी का वेग दोनों तटों को ढहा देता है॥ ६॥ अथवा कौन ऐसी सुन्दर और हठीली पतिव्रता आपके चंचल मन में पैठ गयी है। मैं उस सुन्दरी पर ऐसा बाण चलाऊँगा कि वह लाज-शील छोड़कर आपके गले से आ लगेगी॥ ७॥ हे कामिन्! कौन-सी ऐसी स्त्री है, जो आपका सम्भोग न पाने से क्रोध करके इतनी रूठ गयी है कि

प्रसीद विश्राम्यतु वीर! वज्रं शरैर्मदीयैः कतमः सुरारिः।
बिभेतु मोघीकृतबाहुवीर्यः स्त्रीभ्योऽपि कोपस्फुरिताधराभ्यः॥ ९॥
तव प्रसादात् कुसुमायुधोऽपि सहायमेकं मधुमेव लब्ध्वा।
कुर्या हरस्यापि पिनाकपाणेर्धैर्यच्युतिं के मम धन्विनोऽन्ये॥ १०॥
अथोरुदेशादवतार्य पादमाक्रान्तिसम्भावितपादपीठम्।
सङ्कल्पितार्थे विवृतात्मशक्तिमाखण्डलः काममिदं बभाषे॥ ११॥
सर्वं सखे! त्वय्युपपन्नमेतदुभे ममास्त्रे कुलिशं भवांश्च।
वज्रं तपोवीर्यमहत्सु कुण्ठं त्वं सर्वतोगामि च साधकं च॥ १२॥
अवैमि ते सारमतः खलु त्वां कार्ये गुरुण्यात्मसमं नियोक्ष्ये।
व्यादिश्यते भूधरतामवेक्ष्य कृष्णेन देहोद्वहनाय शेषः॥ १३॥
आशंसता बाणगतिं वृषाङ्के कार्यं त्वया नः प्रतिपन्नकल्पम्।
निबोध यज्ञांशुभुजामिदानीमुच्चैर्द्विषामीप्सितमेतदेव॥ १४॥
अमी हि वीर्यप्रभवं भवस्य जयाय सेनान्यमुशन्ति देवाः।
स च त्वदेकेषुनिपातसाध्यो ब्रह्माङ्गभूर्ब्रह्मणि योजितात्मा॥ १५॥
तस्मै हिमाद्रेः प्रयतां तनूजां यतात्मने रोचयितुं यतस्व।
योषित्सु तद्वीर्यनिषेकभूमिः सैव क्षमेत्यात्मभुवोपदिष्टम्॥ १६॥

पैरों में पड़कर मनाने पर भी नहीं मानती। मैं उनके मन में ऐसा पछतावा उत्पन्न कर दूँगा कि उसका शरीर कामदाहवश नवकिसलयों की शय्या पर सोने के लिए विवश हो जायेगा॥८॥ हे वीर! आप चिन्ता न करें और अपने वज्र को विश्राम करने दें। मुझे यह बतलाइये कि वह कौन-सा दैत्य है, जो मेरे बाणों की मार से इतना शक्तिहीन हो जाना चाहता है कि क्रोध से काँपते हुए ओठोंवाली नारी भी उसे डरा दे॥ ९॥ यदि आपकी कृपा हो तो मैं केवल वसन्त को साथ लेकर अपने फूल के बाणों से पिनाक धनुष धारण करने वाले महादेवजी तक के छक्के छुड़ा दूँ, फिर दूसरे धनुषधारी किस गिनती में हैं॥ १०॥ यह सुनकर इन्द्र को कुछ ढाढस बँधा और उन्होंने अपने पैर पालथी से उतार कर चौकी पर रखे और जिस कामदेव ने उनके सोचे हुए काम में स्वयं इतना उत्साह दिखाया था, उससे बोले—॥ ११॥ हे मित्र! तुम सब कुछ कर सकते हो। क्योंकि तुम और वज्र ये ही तो मेरे दो अस्त्र हैं। किन्तु शत्रुओं की तपस्या ने मेरे वज्र की धार कुंठित कर दी है। अब तुम्हीं बचे हो, जो बेरोक-टोक सर्वत्र जाकर हमारा काम कर सकते हो॥ १२॥ मैं तुम्हारी शक्ति को भलीभाँति जानता हूँ, तभी तो तुम्हें अपने जैसा मानकर इतने बड़े काम में लगाना चाहता हूँ। प्रलयकाल में अपने सोने के लिए भगवान् ने शेष को ही अपनी शय्या क्यों बनाया था? इसीलिए कि वे देख चुके थे कि शेषनाग जब पृथ्वी का भार धारण कर सकते हैं तो मेरा बोझ भी सह लेंगे॥ १३॥ अभी-अभी तुमने कहा है कि हम अपने बाणों से शंकरजी को भी वश में कर सकते हैं। अतएव एक प्रकार से तुमने हमारा काम बनाने का बीड़ा ही उठा लिया है। इसलिए समझ लो कि बलवान् शत्रु से सताये और डरे हुए देवता तुमसे यही काम लेना चाहते हैं॥ १४॥ देवता चाहते हैं कि शत्रु को जीतने के लिए शिवजी के वीर्य से हमारा सेनापति उत्पन्न हो। अतः मन्त्र-बल से ब्रह्म में ध्यान लगाये हुए महादेवजी की समाधि तुम्हीं अपने एक बाण से भंग कर सकते हो॥ १५॥ अब तुम ऐसा प्रयत्न करो कि समाधिस्थ महादेवजी के मन में हिमालय की पुत्री पार्वती के प्रति प्रेम उत्पन्न हो जाय। क्योंकि ब्रह्माजी ने मुझे यह बात बतलायी है कि स्त्रियों में वे ही एक ऐसी हैं, जो शिवजी का वीर्य धारण करने में समर्थ हैं॥ १६॥ अप्सराओं के मुँह से मैंने

गुरोर्नियोगाच्च नगेन्द्रकन्या स्थाणुं तपस्यन्तमधित्यकायाम्।
अन्वास्त इत्यप्सरसां मुखेभ्यः श्रुतं मया मत्प्रणिधिः स वर्गः॥ १७॥
तद्गच्छ सिद्धयै कुरु देवकार्यमर्थोऽयमर्थान्तरभाव्य एव।
अपेक्षते प्रत्ययमुत्तमं त्वां बीजाङ्कुरः प्रागुदयादिवाम्भः॥ १८॥
तस्मिन्सुराणां विजयाभ्युपाये तवैव नामास्त्रगतिः कृती त्वम्।
अप्यप्रसिद्धं यशसे हि पुंसामनन्यसाधारणमेव कर्म॥ १९॥
सुराः समभ्यर्थयितार एते कार्यं त्रयाणामपि विष्टपानाम्।
चापेन ते कर्म न चातिहिंस्रमहो! बतासि स्पृहणीयवीर्यः॥ २०॥
मधुश्च ते मन्मथ! साहचर्यादसावनुक्तोऽपि सहाय एव।
समीरणो नोदयिता भवेति व्यादिश्यते केन हुताशनस्य॥ २१॥
तथेति शेषामिव भर्तुराज्ञामादाय मूर्ध्ना मदनः प्रतस्थे।
ऐरावतास्फालनकर्कशेन हस्तेन पस्पर्श तदङ्गमिन्द्रः॥ २२॥
स माधवेनाभिमतेन सख्या रत्या च साशङ्कमनुप्रयातः।
अङ्गव्ययप्रार्थितकार्यसिद्धिः स्थाण्वाश्रमं हैमवतं जगाम॥ २३॥
तस्मिन्वने संयमिनां मुनीनां तपःसमाधेः प्रतिकूलवर्ती।
सङ्कल्पयोनेरभिमानभूतमात्मानमाधाय मधुर्जजृम्भे॥ २४॥
कुबेरगुप्तां दिशमुष्णरश्मौ गन्तुं प्रवृत्ते समयं विलङ्घ्य।
दिग्दक्षिणा गन्धवहं मुखेन व्यलीकनिश्वासमिवोत्ससर्ज॥ २५॥

सुना है कि अपने पिता की आज्ञा से पार्वतीजी हिमालय पर तप करते हुए महादेवजी की सेवा कर रही हैं॥ १७॥ अतएव तुम जाओ और देवताओं का यह काम कर डालो। जैसे बीज को अंकुर बनाने के लिए जल की आवश्यकता पडती है, वैसे ही यह काम तुम्हारी सहायता के लिए ही रुका हुआ था॥ १८॥ सब देवताओं की विजय तुम्हारे ही बाणों से हो सकती है। सचमुच तुम बड़े भाग्यशाली हो, क्योंकि संसार में ऐसा ही काम करने से यश होता है, जिसे कोई दूसरा न कर सके॥ १९॥ और फिर एक तो सब देवता तुमसे इस काम के लिए भीख माँग रहे हैं, दूसरे यह कार्य तीनों लोक वालों का है, तीसरी बात यह है कि यद्यपि इस काम में तुम्हारा धनुष काम करेगा सही, परन्तु इससे किसी की हिंसा नहीं हो पायेगी। आज तुम्हें देखकर सबके मन में यह इच्छा जागृत हो उठी है कि हमें भी तुम्हारी जैसी ही शक्ति प्राप्त हो जाय॥ २०॥ हे कामदेव! यद्यपि तुम्हारी सहायता के लिए मैंने वसन्त का नाम नहीं लिया है, परन्तु वह तो तुम्हारा सदा का सार्थी है। क्योंकि पवन को कहीं यह थोड़े ही कहना पड़ता है कि तुम जाकर आग की सहायता करो। चाहे कोई कहे या न कहे, वह तो आग को भडकाता ही है॥ २१॥ कामदेव बोला—जैसी आज्ञा। तब जैसे कोई उपहार में दी हुई माला को सिर पर चढ़ाता है, वैसे ही कामदेव ने इन्द्र की आज्ञा शिरोधार्य कर ली। जब वह जाने लगा, तब इन्द्र ने उसकी पीठ पर अपना वह हाथ फेरकर उत्साहित किया, जो ऐरावत की पीठ को रगड़ने से खुरदरा हो गया था॥ २२॥ कामदेव ने निश्चय कर लिया कि अपना शरीर देकर भी मैं देवताओं का काम करूँगा। तदनुसार वसन्त को साथ लेकर वह उस ओर चल पड़ा, जहाँ शिवजी बैठे तप कर रहे थे। उन दोनों के पीछे-पीछे बेचारी रति भी यह सोचती हुई चली कि आज न जाने क्या बीतेगी॥ २३॥ उस वन में जाकर संयमी मुनियों के तप तथा समाधि को डिगाने और कामदेव का सहायक बनने का घमण्ड करने वाला वसन्त अपना पूरा रूप दिखाकर चारों ओर छा गया॥ २४॥ वसन्त के छा जाने

असूत सद्यः कुसुमान्यशोकः स्कन्धात्प्रभृत्येव सपल्लवानि।
पादेन नापैक्षत सुन्दरीणां सम्पर्कमासिञ्जितनूपुरेण॥ २६॥
सद्यः प्रवालोद्गमचारुपत्रे नीते समाप्तिं नवचूतबाणे।
निवेशयामास मधुद्विरिफान्नामाक्षराणीव मनोभवस्य॥ २७॥
वर्णप्रकर्षे सति कर्णिकारं दुनोति निर्गन्धतया स्म चेतः।
प्रायेण सामग्र्यविधौ गुणानां पराङ्मुखी विश्वसृजः प्रवृत्तिः॥ २८॥
बालेन्दुवक्त्राण्यविकाशभावाद्बभुः पलाशान्यतिलोहितानि।
सद्यो वसन्तेन समागतानां नखक्षतानीव वनस्थलीनाम्॥ २९॥
लग्नद्विरेफाञ्जनभक्तिचित्रं मुखे मधुश्रीस्तिलकं प्रकाश्य।
रागेण बालारुणकोमलेन चूतप्रवालोष्ठमलञ्चकार॥ ३०॥
मृगाः पियालद्रुममञ्जरीणां रजःकणैर्विघ्नितदृष्टिपाताः।
मदोद्धताः प्रत्यनिलं विचेरुर्वनस्थलीर्मर्मरपत्रमोक्षाः॥ ३१॥
चूताङ्कुरास्वादकषायकण्ठः पुंस्कोकिलो यन्मधुरं चुकूज।
मनस्विनीमानविघातदक्षं तदेव जातं वचनं स्मरस्य॥ ३२॥
हिमव्यपायाद् विशदाधराणामापाण्डरीभूतमुखच्छवीनाम्।
स्वेदोद्गमः किम्पुरुषाङ्गनानां चक्रे पदं पत्रविशेषकेषु॥ ३३॥
तपस्विनः स्थाणुवनौकसस्तामाकालिकीं वीक्ष्य मधुप्रवृत्तिम्।
प्रयत्नसंस्तम्भितविक्रियाणां कथञ्चिदीशा मनसां बभूवुः॥ ३४॥

पर असमय में ही सूर्य दक्षिणायन से उत्तरायण हो गये। उस समय दक्षिण से बहने वाला मलय पवन ऐसा लगता था, मानो अपने पति सूर्य के चले जाने पर दक्षिण दिशा खिन्न होकर अपने मुँह से लम्बी-लम्बी साँसें छोड रही है॥ २५॥ वहाँ अशोक का वृक्ष भी तत्काल नीचे से ऊपर तक फूल-पत्तों से लद गया और झनझनाते पायलों वाली सुन्दरियों के चरणप्रहार की राह उसने नहीं देखी॥ २६॥ तभी वसन्त ने नयी कोपलों में पंख लगाकर आम की मंजरियों के बाण तैयार कर दिये और उन पर उसने जो भौंरें बैठाये, वे ऐसे लग रहे थे मानो उन बाणों पर कामदेव के नाम के अक्षर लिखे हुए हों॥ २७॥ फूले हुए कर्णिकार देखने में तो बडे सुन्दर लगते थे, परन्तु गन्ध न होने के कारण वे मन को नहीं भाते थे। ब्रह्मा की कुछ आदत ही ऐसी पड गयी है कि वे किसी वस्तु में पूरे गुण नहीं भरते॥ २८॥ वहाँ वसन्त के आते ही दूज के चन्द्रमा सदृश टेढे, अत्यन्त लाल-लाल और अधखिले टेसू के फूल ऐसे लग रहे थे, जैसे वनस्थलियों के साथ विहार करके वसन्त ने उन पर अपने नखों के नये चिह्न अंकित कर दिये हों॥ २९॥ उड़ते हुए भौंरें, खिले हुए तिलक के फूल और प्रातःकाल के सूर्य की लाली से चमकने वाली कोपलें ऐसी दीखती थीं, मानो वसन्त की शोभा रूपी स्त्री ने भौंरें रूपी अँजन से मुँह पोत तथा अपने माथे पर तिलक के फूल का तिलक लगाकर प्रातःकाल निकले हुए सूर्य की कोमल लाली से चमकने वाले आम की कोपलों से अपने ओठ रंग लिये हों॥ ३०॥ प्रियाल के फूलों के पराग उड-उडकर आँखों में पड़ने से जो मतवाले हरिण भलीभाँति नहीं देख पाते थे, वे पवन से झड़े हुए सूखे पत्तों से मर्मर करती हुई वनैली भूमि पर इधर-उधर दौड रहे थे॥ ३१॥ आम की मंजरियाँ खा लेने से जिस कोकिल का कंठस्वर मीठा हो गया था, वह जब मीठे स्वर से कूँकता था तो उसे सुनकर रूठी हुई स्त्रियों को रूठना भूल जाता था॥ ३२॥ जाडा बीतने और गर्मी आ जाने से कोमल होंठों और गोरे मुखों वाली किन्नरियों के मुख पर रचित चित्रकारी पर पसीना छहराने लग गया॥ ३३॥ महादेवजी

तं देशमारोपितपुष्पचापे रतिद्वितीये मदने प्रपन्ने।
काष्ठागतस्नेहरसानुविद्धं द्वन्द्वानि भावं क्रियया विवव्रुः॥ ३५॥
मधु द्विरेफः कुसुमैकपात्रे पपौ प्रियां स्वामनुवर्तमानः।
शृङ्गेण च स्पर्शनिमीलिताक्षीं मृगीमकण्डूयत कृष्णसारः॥ ३६॥
ददौ रसात् पङ्कजरेणुगन्धि गजाय गण्डूषजलं करेणुः।
अर्धोपभुक्तेन बिसेन जायां सम्भावयामास रथाङ्गनामा॥ ३७॥
गीतान्तरेषु श्रमवारिलेशैः किञ्चित्समुच्छ्वासितपत्रलेखम्।
पुष्पासवाघूर्णितनेत्रशोभि प्रियामुखं किम्पुरुषश्चुचुम्बे॥ ३८॥
पर्याप्तपुष्पस्तबकस्तनाभ्यः स्फुरत्प्रवालोष्ठमनोहराभ्यः।
लतावधूभ्यस्तरवोऽप्यवापुर्विनम्रशाखाभुजबन्धनानि ॥ ३९॥
श्रुताप्सरोगीतिरपि क्षणेऽस्मिन् हरः प्रसङ्ख्यानपरो बभूव।
आत्मेश्वराणां नहि जातु विघ्नाः समाधिभेदप्रभवो भवन्ति॥ ४०॥
लतागृहद्वारगतोऽथ नन्दी वामप्रकोष्ठार्पितहेमवेत्रः।
मुखार्पितैकाङ्गुलिसंज्ञयैव मा चापलायेति गणान् व्यनैषीत्॥ ४१॥
निष्कम्पवृक्षं निभृतद्विरेफं मूकाण्डजं शान्तमृगप्रचारम्।
तच्छासनात् काननमेव सर्वं चित्रार्पितारम्भमिवावतस्थे॥ ४२॥
दृष्टिप्रपातं परिहृत्य तस्य कामः पुरःशुक्रमिव प्रयाणे।
प्रान्तेषु संसक्तनमेरुशाखं ध्यानास्पदं भूतपतेर्विवेश॥ ४३॥

के वन में रहने वाले तपस्वियों ने असमय में उपस्थित वसन्त को देखकर अपने मन को विकारों से हटाकर बड़ी कठिनाई से रोका॥ ३४॥ जब फूल के धनुष पर बाण चढाकर रति को साथ लिये हुए कामदेव आया, तब चर और अचर प्राणियों की अत्यन्त बढ़ी हुई सम्भोग की इच्छा उनकी चाल-चलन में दीखने लगी॥ ३५॥ भौंरा अपनी प्यारी भौंरी के साथ एक ही फूल की कटोरी में मकरन्द पीने लगा। कृष्णसार मृग अपनी उस मृगी को सींग से खुजलाने लगा, जो उसके स्पर्श का सुख लेती हुई आँख मूँदकर बैठी थी॥ ३६॥ हथिनी बड़े प्रेमपूर्वक कमल के पराग से सुवासित जल सूँड़ से निकालकर अपने हाथी को पिलाने लगी और चकवा आधी कुतरी हुई कमलनाल चकवी को देने लगा॥ ३७॥ किन्नरगण गीतों के बीच में ही अपनी प्रियाओं के उन मुखों को चूमने लगे, जिन पर थकावट के कारण पसीना छहरा गया था। जिन पर की हुई चित्रकारी पुँछ गयी थी और जिनके नेत्र फूलों की मदिरा के नशे से मतवाले होकर बड़े सुन्दर लग रहे थे॥ ३८॥ वृक्ष तक अपनी झुकी हुई डालियाँ फैला-फैलाकर उन लताओं से लिपटने लगे, जिनमें बड़े-बड़े फूलों के गुच्छों के रूप में स्तन लटक रहे थे और पत्तों रूपी जिनके सुन्दर ओठ हिल रहे थे॥ ३९॥ इसी समय अप्सराओं ने नृत्य-गान आरम्भ कर दिया, किन्तु महादेवजी टस से मस नहीं हुए और अपने ध्यान में ही मग्न रहे। क्योंकि जो लोग अपना मन वश में कर लेते हैं, उनकी समाधि को भला कोई कैसे भङ्ग कर सकता है?॥ ४०॥ उस समय अपने बाँयें हाथ में सोने का डंडा लिये हुए नन्दी लतामण्डप के द्वार पर बैठा मुँह पर एक उँगली रखकर सब गणों को संकेत से मना कर रहा था कि तुम लोग चपलता त्यागकर चुपचाप बैठो॥ ४१॥ उसकी आज्ञा से वृक्षों ने हिलना बन्द कर दिया, भौंरों का गूँजना रुक गया, सब जीव-जन्तु चुप हो गये और पशु भी जहाँ के तहाँ खड़े रह गये। सारा वन उस एक ही संकेत में चित्रलिखित-सदृश दीखने लगा॥ ४२॥ जैसे यात्रा के समय लोग सामने के शुक्र की दृष्टि से बचते हैं, उसी प्रकार कामदेव भी नन्दी की आँखों

स देवदारुद्रुमवेदिकायां शार्दूलचर्मव्यवधानवत्याम्।
आसीनमासन्नशरीरपातस्त्रियम्बकं संयमिनं ददर्श॥ ४४॥
पर्यङ्कबन्धस्थिरपूर्वकायमृज्वायतं सन्नमितोभयांसम्।
उत्तानपाणिद्वयसन्निवेशात् प्रफुल्लराजीवमिवाङ्कमध्ये ॥ ४५॥
भुजङ्गमोन्नद्धजटाकलापं कर्णावसक्तद्विगुणाक्षसूत्रम्।
कण्ठप्रभासङ्गविशेषनीलां कृष्णत्वचं ग्रन्थिमतीं दधानम्॥ ४६॥
किञ्चित्प्रकाशस्तिमितोग्रतारैर्भ्रूविक्रियायां विरतप्रसङ्गैः।
नेत्रैरविस्पन्दितपक्ष्ममालैर्लक्ष्यीकृतघ्राणमधोमयूखैः ॥ ४७॥
अवृष्टिसंरम्भमिवाम्बुवाहमपामिवाधारमनुत्तरङ्गम् ।
अन्तश्चराणां मरुतां निरोधान्निवातनिष्कम्पमिव प्रदीपम्॥ ४८॥
कपालनेत्रान्तरलब्धमार्गैर्ज्योतिःप्ररोहैरुदितैः शिरस्तः।
मृणालसूत्राधिकसौकुमार्यां बालस्य लक्ष्मीं ग्लपयन्तमिन्दोः॥ ४९॥
मनो नवद्वारनिषिद्धवृत्ति हृदि व्यवस्थाप्य समाधिवश्यम्।
यमक्षरं क्षेत्रविदो विदुस्तमात्मानमात्मन्यवलोकयन्तम्॥ ५०॥
स्मरस्तथाभूतमयुग्मनेत्रं पश्यन्नदूरान्मनसाऽप्यधृष्यम्।
नालक्षयत्साध्वससन्नहस्तः स्रस्तं शरं चापमपि स्वहस्तात्॥ ५१॥
निर्वाणभूयिष्ठमथास्य वीर्यं सन्धुक्षयन्तीव वपुर्गुणेन।
अनुप्रयाता वनदेवताभ्यामदृश्यत स्थावरराजकन्या॥ ५२॥

से बचकर नमेरु की शाखाओं से घिरे उस स्थान में जा घुसा, जहाँ महादेवजी समाधि लगाये बैठे थे॥ ४३॥ थोड़ी ही देर बाद मृत्यु के मुँह में पहुँचने वाले कामदेव ने देखा कि देवदारु के पेड की जड़ पर पत्थर की पटियों से बनी हुई चौकी पर बाघम्बर बिछा है और उस पर महादेवजी समाधिस्थ हैं॥ ४४॥ वे वीरासन से बैठे हैं, उन्होंने अपना धड़ सीधा और अचल कर रखा है। दोनों कन्धे झुकाकर अपनी गोद में कमल के समान दोनों हथेलियों को नीचे-ऊपर किये हुए वे निश्चल बैठे हैं॥ ४५॥ साँपों से वे जटा को बाँधे हैं। दाहिने कान पर दुहरी रुद्राक्ष की माला लटकी हुई है। गले की नीली आभा पड़ने से और भी अधिक साँवली दीखने वाली मृगछाला में गाँठ लगाकर वे शरीर पर बाँधे हुए हैं॥ ४६॥ उनकी भौंहें तनी हैं और प्रकाश देनेवाली, निश्चल, उग्र तारों युक्त और अपनी किरणें नीचे डालने वाली अपलक आँखों से वे नाक के अग्रभाग पर दृष्टि जमाकर बैठे हैं॥ ४७॥ शरीर के भीतर चलने वाले सभी पवनों को रोककर वे ऐसे अचल भाव से विराजमान हैं, जैसे कोई न बरसने वाला बादल हो, बिना लहरों वाला निश्चल तालाब हो या पवनरहित स्थान में खडी लौ वाला दीपक हो॥ ४८॥ उस समय उनके मस्तक और नेत्रों से जो तेज निकल रहा था, उसके समक्ष कमलतन्तु से भी अधिक कोमल बालचन्द्रमा की शोभा फीकी पड़ गयी थी॥ ४९॥ इस प्रकार समाधिस्थ शंकरजी उस अविनाशी आत्मा की ज्योति को अपने भीतर देख रहे थे, जिसे ज्ञानी लोग अपनी नवों इन्द्रियों के द्वार रोक तथा मन को समाधि द्वारा वश में करके उसे अपने हृदय में रखकर जान पाते हैं॥ ५०॥ उन तीन नेत्रवाले शंकरजी का जो रूप बुद्धि तथा मन से भी परे था, उसी रूप को इतने पास से देखकर डर के मारे कामदेव के हाथ ऐसे ढीले पड़ गये कि उसे यह भी ज्ञात नहीं हुआ कि हाथ से कब धनुष-बाण छूटकर गिर गये॥ ५१॥ इस तरह डर के मारे कामदेव की शक्ति तो नष्ट हो चुकी थी, परन्तु जब उसने मालिनी और विजया नाम की वनदेवियों के साथ आती हुई अत्यन्त सुन्दरी पार्वतीजी का सुन्दर रूप देखा तो

अशोकनिर्भर्त्सितपद्मरागमाकृष्टहेमद्युतिकर्णिकारम् ।
मुक्ताकलापीकृतसिन्धुवारं वसन्तपुष्पाभरणं वहन्ती ॥ ५३ ॥
आवर्जिता किञ्चिदिव स्तनाभ्यां वासो वसाना तरुणार्करागम् ।
पर्याप्तपुष्पस्तबकावनम्रा सञ्चारिणी पल्लविनी लतेव ॥ ५४ ॥
स्रस्तां नितम्बादवलम्बमाना पुनः पुनः केसरदामकाञ्चीम् ।
न्यासीकृतां स्थानविदा स्मरेण मौर्वीद्वितीयामिव कार्मुकस्य ॥ ५५ ॥
सुगन्धिनिश्वासविवृद्धतृष्णं विम्बाधरासन्नचरं द्विरेफम् ।
प्रतिक्षणं सम्भ्रमलोलदृष्टिर्लीलारविन्देन निवारयन्ती ॥ ५६ ॥
तां वीक्ष्य सर्ववियवानवद्यां रतेरपि ह्रीपदमादधानाम् ।
जितेन्द्रिये शूलिनि पुष्पचापः स्वकार्यसिद्धिं पुनराशशंसे ॥ ५७ ॥
भविष्यतः पत्युरुमा च शम्भोः समाससाद प्रतिहारभूमिम् ।
योगात्स चान्तः परमात्मसंज्ञं दृष्ट्वा परं ज्योतिरुपारराम ॥ ५८ ॥
ततो भुजङ्गाधिपतेः फणाग्रैरधः कथञ्चिद्धृतभूमिभागः ।
शनैः कृतप्राणविमुक्तिरीशः पर्यङ्कबन्धं निविडं विभेद ॥ ५९ ॥
तस्मै शशंस प्रणिपत्य नन्दी शुश्रूषया शैलसुतामुपेताम् ।
प्रवेशयामास च भर्तुरिनां भ्रूक्षेपमात्रानुमतप्रवेशाम् ॥ ६० ॥
तस्याः सखीभ्यां प्रणिपातपूर्व स्वहस्तलूनः शिशिरात्ययस्य ।
व्यकीर्यत त्र्यम्बकपादमूले पुष्पोच्चयः पल्लवभङ्गभिन्नः ॥ ६१ ॥

जैसे उसकी खोई हुई शक्ति पुनः लौट आयी ॥ ५२ ॥ उस समय पार्वतीजी के तन पर लाल मणि को लज्जित करने वाले अशोक के पत्तों के, सोने की चमक को घटाने वाले कर्णिकार पुष्पों के और मोतियों की माला सदृश उजले सिन्धुवार के वासन्ती फूलों के आभूषण सजे थे ॥ ५३ ॥ स्तनों के बोझ से तनिक झुके शरीर पर प्रातःकाल के सूर्य-सदृश लाल कपड़े पहने हुए वे ऐसी लग रही थीं, जैसे फूलों के गुच्छों के भार से झुकी लाल-लाल कोपलों वाली कोई चलती-फिरती लता हो ॥ ५४ ॥ कमर में पड़ी केसर के फूलों की तागड़ी जब-जब नितम्ब से नीचे खिसक आती थी, तब-तब वे उसे हाथ से ऊपर सरका लेती थीं। वह तागड़ी ऐसी दीखती थी कि मानो कहाँ क्या पहनना चाहिए, इस बात के जानकार कामदेव ने अपने हाथ से उनकी कमर में अपनी धनुष की दूसरी डोरी पहना दी हो ॥ ५५ ॥ कामदेव ने देखा कि उनकी अति सुगन्धित साँस पर ललचाये हुए भौंरे जब उनके लाल-लाल ओठों के पास आते थे, तब वे घबराकर आँखें नचाती हुई लीला के कमलों से उन्हें मार भगाती थीं ॥ ५६ ॥ जब कामदेव ने रति को जगाने वाली तथा अधिक सुघड़ अङ्गोंवाली पार्वतीजी को देखा, तब उसके मन में जितेन्द्रिय महादेवजी को अपने वश में करने की आशा फिर से जाग उठी ॥ ५७ ॥ तभी पार्वतीजी अपने भावी पति शंकरजी के आश्रम के द्वार पर पहुँचीं। ठीक उसी समय महादेवजी ने भी परमात्मा नाम की परमज्योति का दर्शन करके अपनी समाधि भङ्ग की ॥ ५८ ॥ अब आँखें खोलकर उन्होंने धीरे-धीरे साँस लेना प्रारम्भ कर दिया और अपनी कठोर पल्थी भी खोल दी। अतएव उनका शरीर जो समाधि के समय बहुत हलका था, फिर इतना भारी हो गया कि उनकी आसनभूमि को शेषजी भी बड़ी कठिनाई से अपने फणों पर सँभाल सके ॥ ५९ ॥ समाधि खुली देखकर नन्दी ने उन्हें प्रणाम किया और कहा कि 'आप की सेवा करने के लिए पार्वतीजी आयी हुई हैं'। महादेवजी ने भौंहों से उन्हें बुलाने का संकेत किया और नन्दी पार्वतीजी को भीतर ले आये ॥ ६० ॥ पार्वतीजी की दोनों सखियों ने पहले शङ्करजी

उमापि नीलालकमध्यशोभि विस्रंसयन्ती नवकर्णिकारम्।
चकार कर्णच्युतपल्लवेन मूर्ध्ना प्रणामं वृषभध्वजाय॥ ६२॥
अनन्यभाजं पतिमाप्नुहीति सा तथ्यमेवाभिहिता भवेन।
न हीश्वरव्याहृतयः कदाचित् पुष्णन्ति लोको विपरीतमर्थम्॥ ६३॥
कामस्तु बाणावसरं प्रतीक्ष्य पतङ्गवद्वह्निमुखं विविक्षुः।
उमासमक्षं हरबद्धलक्ष्यः शरासनज्यां मुहुराममर्श॥ ६४॥
अथोपनिन्ये गिरिशाय गौरी तपस्विने ताम्ररुचा करेण।
विशोषितां भानुमतो मयूखैर्मन्दाकिनीपुष्करबीजमालाम्॥ ६५॥
प्रतिग्रहीतुं प्रणयिप्रियत्वात् त्रिलोचनस्तामुपचक्रमे च।
सम्मोहनं नाम च पुष्पधन्वा धनुष्यमोघं समधत्त बाणम्॥ ६६॥
हरस्तु किञ्चित्परिलुप्तधैर्यश्चन्द्रोदयारम्भ इवाम्बुराशिः।
उमामुखे बिम्बफलाधरोष्ठे व्यापारयामास विलोचनानि॥ ६७॥
विवृण्वती शैलसुताऽपि भावमङ्गैः स्फुरद्बालकदम्बकल्पैः।
साचीकृता चारुतरेण तस्थौ मुखेन पर्यस्तविलोचनेन॥ ६८॥
अथेन्द्रियक्षोभमयुग्मनेत्रः पुनर्वशित्वाद् बलवन्निगृह्य।
हेतुं स्वचेतोविकृतेर्ददृक्षुर्दिशामुपान्तेषु ससर्ज दृष्टिम्॥ ६९॥
स दक्षिणापाङ्गनिविष्टमुष्टिं नतांसमाकुञ्चितसव्यपादम्।
ददर्श चक्रीकृतचारुचापं प्रहर्तुमभ्युद्यतमात्मयोनिम्॥ ७०॥

को प्रणाम किया और फिर अपने हाथ से चुने पत्तों के टुकड़े मिले हुए वासन्ती फूलों का ढेर उनके पैरों पर बिखेर दिया॥ ६१॥ जब पार्वतीजी ने शिवजी को प्रणाम करने के लिए सिर झुकाया, तब उनके काले-काले बालों में गुँथे कर्णिकार के फूल और कान पर धरे हुए पल्लव पृथ्वी पर गिर गये॥ ६२॥ तदनन्तर प्रणाम करती हुई पार्वतीजी को शंकरजी ने यह सत्य आशीर्वाद दिया कि 'तुम्हें ऐसा पति मिले, जैसा किसी भी स्त्री को न मिला हो'। उनका कथन यथार्थ था। भला ऐसे ऐश्वर्यशालियों की वाणी कभी झूठी होती है?॥ ६३॥ जैसे फतिंगा आग में कूदने को बेचैन हो, वैसे ही कामदेव ने भी सोचा कि बाण छोड़ने का यही ठीक अवसर है। बस, वह पार्वतीजी के आगे बैठे हुए शिवजी की ओर ताक-ताककर धनुष की डोरी खींचने लगा॥ ६४॥ प्रणाम करने के बाद पार्वतीजी ने धूप में सुखाये हुए मन्दाकिनी के कमलबीजों की माला लेकर अपने लाल-लाल हाथों से समाधि से जगे हुए शंकरजी के गले में पहना दी॥ ६५॥ भक्त पर प्रेम करने के नाते शंकरजी ने पार्वतीजी की वह माला ली ही थी कि इतने में पुष्पधन्वा कामदेव ने सम्मोहन नाम का अमोघ बाण अपने धनुष पर चढ़ा लिया॥ ६६॥ जैसे चन्द्रमा के उदय होने पर समुद्र में ज्वार आ जाता है, वैसे ही पार्वतीजी को देखकर महादेवजी के हृदय में कुछ हलचल-सी मच गयी और उन्होंने पार्वतीजी के बिम्ब-सदृश लाल-लाल ओठों पर अपनी आँखें जमा दीं॥ ६७॥ पार्वतीजी भी फूले हुए नये कदम्ब की भाँति पुलकित अंगों से प्रेम जताती तथा लजीली आँखों से निहारती हुई अपना अत्यन्त सुन्दर मुख कुछ तिरछा करके खड़ी रहीं॥ ६८॥ किन्तु महादेवजी तत्काल सँभल गये। संयमी होने के नाते उन्होंने तत्काल इन्द्रियों की चञ्चलता को हठात् रोक लिया और यह देखने के लिए चारों ओर दृष्टि दौडायी कि मेरे मन में यह विकार कैसे आया॥ ६९॥ तभी शंकरजी ने देखा कि अपना धनुष खींच और गोल करके दाहिनी आँख की कोर तक चुटकी से डोरी खींचे और दाहिना कन्धा झुकाकर बाँयें पैर का घुटना मोडे हुए कामदेव बाण चलाने

तपःपरामर्शविवृद्धमन्योर्भ्रूभङ्गदुष्प्रेक्ष्यमुखस्य तस्य।
स्फुरन्नुदर्चिः सहसा तृतीयादक्ष्णः कृशानुः किल निष्पपात॥ ७१॥
क्रोधं प्रभो! संहर संहरेति यावद्गिरः खे मरुतां चरन्ति।
तावत् स वह्निर्भवनेत्रजन्मा भस्मावशेषं मदनं चकार॥ ७२॥
तीव्राभिषङ्गप्रभवेण वृत्तिं मोहेन संस्तम्भयतेन्द्रियाणाम्।
अज्ञातभर्तृव्यसना मुहूर्तं कृतोपकारेव रतिर्बभूव॥ ७३॥
तमाशु विघ्नं तपसस्तपस्वी वनस्पतिं वज्र इवावभज्य।
स्त्रीसन्निकर्षं परिहर्तुमिच्छन्नन्तर्दधे भूतपतिः सभूतः॥ ७४॥
शैलात्मजाऽपि पितुरुच्छिरसोऽभिलाषं व्यर्थं समर्थ्य ललितं वपुरात्मनश्च।
सख्योः समक्षमिति चाधिकजातलज्जा शून्या जगाम भवनाभिमुखी कथञ्चित्॥ ७५॥
सपदि मुकुलिताक्षीं रुद्रसंरम्भभीत्या दुहितरमनुकम्प्यामद्रिरादाय दोर्भ्याम्।
सुरगज इव बिभ्रत् पद्मिनीं दन्तलग्नां प्रतिपथगतिरासीद्वेगदीर्घीकृताङ्गः॥ ७६॥

इति महाकविकालिदासकृतौ कुमारसम्भवे महाकाव्ये
मदनदहनो नाम तृतीयः सर्गः॥ ३॥

को उद्यत है॥ ७०॥ तब अपने तप में बाधा डालने वाले कामदेव पर महादेवजी को इतना क्रोध आया कि उनकी चढी भौंहों वाला नेत्र बड़ी कठिनाई से देखा जा सकता था। तभी उनका तीसरा नेत्र खुल गया और उसमें से सहसा धधकती आग की लपटें निकलने लगीं॥ ७१॥ यह देखकर आकाश में सब देवता एक साथ चिल्ला उठे—'रोकिए! रोकिए! अपने क्रोध को रोकिए प्रभो!' परन्तु इतनी ही देर में महादेवजी की तीसरी आँख से निकलने वाली उस भीषण आग ने कामदेव को जलाकर राख कर डाला॥ ७२॥ अपने सिर पर आयी हुई वह भारी विपत्ति देखकर कामदेव की स्त्री रति मूर्च्छित होकर धरती पर गिर पड़ी। उसकी इन्द्रियाँ स्तब्ध हो गयीं और ऐसा लगा कि मानो शंकर भगवान् ने कृपा करके उतनी देर के लिए पति की मृत्यु का ज्ञान हरकर उसे दुःख से बचा लिया॥ ७३॥ किसी पेड़ पर गिरकर बिजली जैसे उसे ध्वस्त कर डालती है, वैसे ही अपनी तपस्या में बाधा डालने वाले कामदेव को जलाकर शिवजी ने निश्चय किया कि स्त्रियों का साथ छोड़ देना ही उचित है। बस, तपस्वी महादेवजी तत्काल अपने भूत-प्रेतों के साथ अन्तर्धान हो गये॥ ७४॥ यह देखकर पार्वतीजी को इस बात पर बड़ी ग्लानि हुई कि आज सखियों के आगे मेरे ऊँचे सिर वाले पिता का मनोरथ और मेरा सौन्दर्य दोनों व्यर्थ हो गये और वे बहुत उदास मन से किसी-किसी प्रकार अपने घर को चलीं॥ ७५॥ तत्काल हिमवान् भी वहाँ पहुँच गये और जैसे ऐरावत अपने दाँतों पर कमलिनी को उठा ले, वैसे ही महादेवजी के क्रोध से डरकर आँख बन्द करके जाती हुई अपनी दुःखिनी कन्या को गोद में उठा लिया और वेग के साथ जिधर से आये थे, उधर ही चले गये॥ ७६॥

इस प्रकार महाकविकालिदासरचित कुमारसम्भवमहाकाव्य में
मदन-दहन नामक तीसरा सर्ग समाप्त॥ ३॥

चतुर्थः सर्गः

अथ मोहपरायणा सती विवशा कामवधूर्विबोधिता।
विधिना प्रतिपादयिष्यता नववैधव्यमसह्यवेदनम्॥ १॥
अवधानपरे चकार सा प्रलयान्तोन्मिषिते विलोचने।
न विवेद तयोरतृप्तयोः प्रियमत्यन्तविलुप्तदर्शनम्॥ २॥
अयि जीवितनाथ! जीवसीत्यभिधायोत्थितया तया पुरः।
ददृशे पुरुषाकृति क्षितौ हरकोपानलभस्म केवलम्॥ ३॥
अथ सा पुनरेव विह्वला वसुधालिङ्गनधूसरस्तनी।
विललाप विकीर्णमूर्धजा समदुःखामिव कुर्वती स्थलीम्॥ ४॥
उपमानमभूद् विलासिनां करणं यत्तव कान्तिमत्तया।
तदिदं गतमीदृशीं दशां न विदीर्ये कठिनाः खलु स्त्रियः॥ ५॥
क्व नु मां त्वदधीनजीवितां विनिकीर्य क्षणभिन्नसौहृदः।
नलिनीं क्षतसेतुबन्धनो जलसङ्गत इवासि विद्रुतः॥ ६॥
कृतवानसि विप्रियं न मे प्रतिकूलं न च ते मया कृतम्।
किमकारणमेव दर्शनं विलपन्त्यै रतये न दीयते॥ ७॥
स्मरसि स्मर! मेखलागुणैरुत गोत्रस्खलितेषु बन्धनम्।
च्युतकेशरदूषितेक्षणान्यवतंसोत्पलताडनानि वा॥ ८॥

इस प्रकार महादेवजी के अन्तर्धान होने और पार्वतीजी के चले जाने पर काठ के समान मूर्च्छित पड़ी कामदेव की पतिव्रता पत्नी रति को ब्रह्मा ने नये विधवापन का दुःख सहने के लिए जगा दिया॥ १॥ मूर्च्छा हटते ही रति चारों ओर आँखें दौड़ाकर देखने लगीं, परन्तु उसे यह नहीं ज्ञात हुआ कि जिसे सदा अपने आगे देखते रहने पर भी आँखें नहीं अघाती थीं, वही प्यारा सदा के लिए मेरी आँखों से ओझल हो गया है॥ २॥ 'हे प्राणनाथ! क्या तुम जीते हो?'—यह कहती हुई जैसे ही वह खड़ी हुई तो देखा की महादेवजी के क्रोध से जली हुई पुरुष के आकार की राख की ढेर सामने पृथ्वी पर पड़ी है॥ ३॥ वह राख की ढेर देखते ही रति विकल हो उठी और मिट्टी में लोटती हुई बाल बिखेर और बिलख-बिलखकर रोने लगी तो ऐसा लगा कि मानो सारी वनभूमि उसके साथ-साथ रो रही है॥ ४॥ वह रो-रोकर कहने लगी—'प्यारे! आज तक तुम्हारे जिस सुन्दर शरीर से विलासियों की शरीर की तुलना की जाती थी, उसे ऐसी दशा में देख कर के भी मेरी छाती नहीं फट गयी। वास्तव में स्त्रियों का हृदय बहुत कठोर होता है॥ ५॥ जैसे पानी का बहाव बाँध तोड़कर जल में बहने वाली कमलिनी को वहीं छोड़कर आगे निकल जाता है, वैसे ही तुम्हारे हाथ में अपने प्राण सौंपने वाली मुझ अभागिन को त्यागकर तुम इतनी शीघ्र रूठकर कहाँ चले गये?॥ ६॥ हे प्यारे! तुमने कभी मेरी अनभिलषित बात नहीं की और मैंने भी कभी तुम्हारे प्रतिकूल कुछ नहीं किया। फिर अकारण मुझ बिलखती हुई रति को तुम दर्शन क्यों नहीं देते?॥ ७॥ हे प्रियतम! पहले एक बार जब भूल से तुमने अपने किसी दूसरी प्यारी का नाम ले लिया था, उस पर मैंने जो तुम्हें अपनी तागड़ी से बाँध दिया था, क्या उसी बात का स्मरण करके तुम मुझसे रूठ गये हो? अथवा जब मैंने अपने कान में पहने हुए कमल से

हृदये वससीति मत्प्रियं यदवोचस्तदवैमि कैतवम्।
उपचारपदं न चेदिदं त्वमनङ्गः कथमक्षता रतिः॥ ९॥
परलोकनवप्रवासिनः प्रतिपत्स्ये पदवीमहं तव।
विधिना जन एष वञ्चितस्त्वदधीनं खलु देहिनां सुखम्॥ १०॥
रजनीतिमिरावगुण्ठिते पुरमार्गे घनशब्दविक्लवाः।
वसतिं प्रिय! कामिनां प्रियास्त्वदृते प्रापयितुं क ईश्वरः॥ ११॥
नयनान्यरुणानि घूर्णयन् वचनानि स्खलयन् पदे पदे।
असति त्वयि वारुणीमदः प्रमदानामधुना विडम्बना॥ १२॥
अवगम्य कथीकृतं वपुः प्रियबन्धोस्तव निष्फलोदयः।
बहुलेऽपि गते निशाकरस्तनुतां दुःखमनङ्ग! मोक्ष्यति॥ १३॥
हरितारुणचारुबन्धनः कलपुंस्कोकिलशब्दसूचितः।
वद सम्प्रति कस्य बाणतां नवचूतप्रसवो गमिष्यति॥ १४॥
अलिपङ्क्तिरनेकशस्त्वया गुणकृत्ये धनुषो नियोजिता।
विरुतैः करुणस्वनैरियं गुरुशोकामनुरोदितीव माम्॥ १५॥
प्रतिपद्य मनोहरं वपुः पुनरप्यादिश तावदुत्थितः।
रतिदूतिपदेषु कोकिलां मधुरालापनिसर्गपण्डिताम्॥ १६॥
शिरसा प्रणिपत्य याचितान्युपगूढानि सवेपथूनि च।
सुरतानि च तानि ते रहः स्मर! संस्मृत्य न शान्तिरस्ति मे॥ १७॥

तुम्हें पीटा था, उस समय उसका पराग पड जाने से जो तुम्हारी आँखें दुःखने लगी थीं, क्या उसी बात का स्मरण करके तुम मुझसे रूठे हुए हो?॥८॥ जो तुम मुझसे नित्य मीठी-मीठी बातों में कहा करते थे कि तुम सदा मेरे हृदय में बसती हो, वह बात झूठ थी। क्योंकि यदि वह बात केवल मेरा मन रखने भर को न होती तो तुम्हारे भस्म हो जाने पर तुम्हारी रति भला जीवित कैसे बची रहती?॥९॥ अभी-अभी तुम स्वर्ग को गये हो, मैं भी तुम्हारे पीछे-पीछे वहीं आ रही हूँ। ब्रह्मा ने मूर्च्छित करके मुझे बड़ा धोखा दिया। नहीं तो मैं उसी समय तुम्हारे साथ चल पड़ती। क्योंकि मेरा ही नहीं, बल्कि सारे संसार का सुख तुम अपने साथ लेकर चले गये हो॥१०॥ हे प्यारे! यह तो कहो कि वर्षा के समय रात की घनी अँधियारी भरे भयावने नगर के मार्गों पर बिजली की कडक से डर जानेवाली कामिनियों को उनके प्यारों के घर अब तुम्हारे सिवाय और कौन पहुँचायेगा?॥११॥ लाल-लाल नेत्रों को नचाती और एक-एक शब्द पर रुक-रुककर बोलती हुई प्रमदाओं का मदिरापान तुम्हारे न रहने पर अब भला किस काम का होगा?॥१२॥ हे अनङ्ग! तुम चन्द्रमा के बड़े प्यारे मित्र थे। जब उसे यह ज्ञात होगा कि अब तुम्हारा शरीर कहानी भर रह गया है, तब वह व्यर्थ उदित चन्द्रमा शुक्लपक्ष में भी बडी कठिनाई से अपना दुबलापन छोड़ सकेगा॥१३॥ बहुत सुन्दर हरे और लाल रङ्ग में बँधा और कोयल की मीठी कूक से गूँजता हुआ आम का नया बौर अब किसका बाण बनेगा?॥१४॥ जिन भौंरों की पंक्तियों को तुम अपने धनुष की डोरी बनाया करते थे, उनकी दुःखभरी गुञ्जार अब ऐसी लगती है कि मानो वे भी दुःख से बिलखती हुई मुझ दुःखिया के साथ-साथ रो रही हैं॥१५॥ हे कामदेव! तुम पहले जैसा सुन्दर शरीर फिर धारण करके उठकर स्वभावतः मधुर बोलने में निपुण इस कोयल को आज्ञा दो कि यह रतिदूती बनकर अपनी मीठी कूक से प्रेमियों को मिलने का स्थान बतलाना आरम्भ कर दे॥१६॥ हे कामदेव! जब तुम मेरे पैरों में पड़कर मनाते हुए मुझे गले से लगा लेते थे और एकान्त

रचितं रतिपण्डित! त्वया स्वयमङ्गेषु ममेदमार्तवम्।
ध्रियते कुसुमप्रसाधनं तव तच्चारु वपुर्न दृश्यते॥ १८॥
विबुधैरसि यस्य दारुणैरसमाप्ते परिकर्मणि स्मृतः।
तमिमं कुरु दक्षिणेतरं चरणं निर्मितरागमेहि मे॥ १९॥
अहमेत्य पतङ्गवर्त्मना पुनरङ्काश्रयणी भवामि ते।
चतुरैः सुरकामिनीजनैः प्रिय! यावन्न विलोभ्यसे दिवि॥ २०॥
मदनेन विनाकृता रतिः क्षणमात्रं किल जीवितेति मे।
वचनीयमिदं व्यवस्थितं रमण! त्वामनुयामि यद्यपि॥ २१॥
क्रियतां कथमन्त्यमण्डनं परलोकान्तरितस्य ते मया।
सममेव गतोऽस्यतर्कितां गतिमङ्गेन च जीवितेन च॥ २२॥
ऋजुतां नयतः स्मरामि ते शरमुत्सङ्गनिषण्णधन्वनः।
मधुना सह सस्मितां कथां नयनोपान्तविलोकितं च यत्॥ २३॥
क्व नु ते हृदयङ्गमः सखा कुसुमायोजितकार्मुको मधुः।
न खलूग्ररुषा पिनाकिना गमितः सोऽपि सुहृद्गतां गतिम्॥ २४॥
अथ तैः परिदेविताक्षरैर्हृदये दिग्धशरैरिवाहतः।
रतिमभ्युपपत्तुमातुरां मधुरात्मानमदर्शयत् पुरः॥ २५॥
तमवेक्ष्य रुरोद सा भृशं स्तनसम्बाधमुरो जघान च।
स्वजनस्य हि दुःखमग्रतो विवृतद्वारमिवोपजायते॥ २६॥

इत्यूचिवांस्तमेवार्थं गुहामुखविसर्पिणा । द्विरिव प्रतिशब्देन व्याजहार हिमालयः॥ ६४॥
अथाङ्गिरसमग्रण्यमुदाहरणवस्तुषु । ऋषयो नोदयामासुः प्रत्युवाच स भूधरम्॥ ६५॥
उपपन्नमिदं सर्वमतः परमपि त्वयि । मनसः शिखराणां च सदृशी ते समुन्नतिः॥ ६६॥
स्थाने त्वां स्थावरात्मानं विष्णुमाहुस्तथा हि ते । चराचराणां भूतानां कुक्षिराधारतां गतः॥ ६७॥

वृक्षों में फल आ जायँ॥ ५४॥ आपकी इस कृपा से मैं आज अपने को ऐसा समझ रहा हूँ कि मानो मुझ मूर्ख को ज्ञान मिल गया हो, मैं लोहे से सोना बन गया होऊँ अथवा पृथ्वी पर रहते हुए भी स्वर्ग में चला गया होऊँ॥ ५५॥ आज से मैं अपने को इतना बडा भारी तीर्थ मानने लगा हूँ कि जहाँ आते ही लोग शुद्ध हो जायँ। क्योंकि सज्जन लोग जहाँ जाकर बैठ जायँ, वह स्थान तीर्थ हो जाया करता है॥ ५६॥ हे ब्रह्मर्षियो! मैं अब अपने को दो प्रकार से पवित्र मानता हूँ। एक तो सिर पर गंगाजी की धारा गिरने से और दूसरे आप लोगों के चरण धोवन का जल पा लेने से॥ ५७॥ हे मुनियो! मुझे तो ऐसा लगता है कि आप लोगों ने मेरे चल और अचल दोनों शरीरों पर अलग-अलग कृपा की है। क्योंकि मेरे चल शरीर को तो आपने अपना दास बना लिया है और मेरे अचल शरीर पर अपने पवित्र चरण रखे हैं॥ ५८॥ आपने यहाँ पधारकर जो कृपा की है, उससे मुझे इतनी प्रसन्नता हो रही है कि दूर-दूर तक विस्तृत अपने इतने बडे अंगों में भी मैं फूला नहीं समाता॥ ५९॥ आप सदृश तेजस्वियों के दर्शन से केवल मेरी गुफाओं का ही अँधेरा नहीं मिटा, बल्कि मेरे हृदय के अज्ञान का अँधेरा भी दूर हो गया॥ ६०॥ मैं समझता हूँ कि आप किसी काम से तो यहाँ न आये होंगे। क्योंकि आप लोगों में स्वतः इतनी शक्ति है कि किसी भी काम को सोचते ही पूरा कर लें। अतएव मेरा विचार है कि केवल मुझे पवित्र करने के लिए ही आप यहाँ आये हैं॥ ६१॥ किन्तु जब आ ही गये हैं तो मेरे लिए कोई सेवा बतलाइए। क्योंकि प्रभुओं को तभी प्रसन्न समझना चाहिए, जब कि वे सेवक से कुछ काम करने को कहें॥ ६२॥ आपकी आज्ञा का पालन करने के लिए मैं स्वयं आपके आगे खड़ा ही हूँ। ये मेरी स्त्रियाँ हैं और यह मेरे घरभर की प्यारी कन्या है। इनमें से जिससे भी आपका काम बने, उसे आज्ञा दीजिए। क्योंकि धन-सम्पत्ति आदि जितनी बाहरी वस्तुएँ हैं, वे तो आपकी सेवा के लिए तुच्छ हैं॥ ६३॥ हिमवान् के यह कहने पर गुफाओं में से जो प्रतिध्वनि निकली, उससे मानो हिमालय ने अपनी बात फिर से दुहरा दी॥ ६४॥ अब ऋषियों ने हिमालय से महादेवजी का संदेश कहने के लिए उन अंगिरा ऋषि को उभाड़ा, जो बातें करने में बड़े निपुण थे। तब अंगिरा ऋषि ने हिमालय से कहा—॥ ६५॥ हे हिमालय! जो कुछ तुमने कहा है और उससे भी अधिक जो कुछ कहा जा सकता है, वह सब तुम्हें शोभा देता है। क्योंकि तुम्हारा मन भी उतना ही ऊँचा है, जितनी कि तुम्हारी चोटियाँ ऊँची हैं॥ ६६॥ तुमको जो सब अचल पदार्थों का विष्णु कहा गया है, वह यथार्थ

गामधास्यत्कथं नागो मृणालमृदुभिः फणैः । आ रसातलमूलात्त्वमवालम्बिष्यथा न चेत् ॥ ६८ ॥
अच्छिन्नामलसन्तानाः समुद्रोर्म्यनिवारिताः । पुनन्ति लोकान्पुण्यत्वात्कीर्तयः सरितश्च ते ॥
यथैव श्लाघ्यते गङ्गा पादेन परमेष्ठिनः । प्रभवेण द्वितीयेन तथैवोच्छिरसा त्वया ॥ ७० ॥
तिर्यगूर्ध्वमधस्ताच्च व्यापको महिमा हरेः । त्रिविक्रमोद्यतस्यासीत्स तु स्वाभाविकस्तव ॥ ७१ ॥
यज्ञभागभुजां मध्ये पदमातस्थुषा त्वया । उच्चैर्हिरण्मयं शृङ्गं सुमेरोर्वितथीकृतम् ॥ ७२ ॥
कार्ठिन्यं स्थावरे काये भवता सर्वमर्पितम् । इदं तु ते भक्तिनम्रं सतामाराधनं वपुः ॥ ७३ ॥
तदागमनकार्यं नः शृणु कार्यं तवैव तत् । श्रेयसामुपदेशात्तु वयमत्रांशभागिनः ॥ ७४ ॥
अणिमादिगुणोपेतमस्पृष्टपुरुषान्तरम् । शब्दमीश्वर इत्युच्चैः सार्धचन्द्रं बिभर्ति यः ॥ ७५ ॥
कलितान्योन्यसामर्थ्यैः पृथिव्यादिभिरात्मभिः । येनेदं ध्रियते विश्वं धुर्यैर्यानमिवाध्वनि ॥ ७६ ॥
योगिनो यं विचिन्वन्ति क्षेत्राभ्यन्तरवर्तिनम् । अनावृत्तिभयं यस्य पदमाहुर्मनीषिणः ॥ ७७ ॥
स ते दुहितरं साक्षात्साक्षी विश्वस्य कर्मणाम् । वृणुते वरदः शम्भुरस्मत्सङ्क्रामितैः पदैः ॥ ७८ ॥
तमर्थमिव भारत्या सुतया योक्तुमर्हसि । अशोच्या हि पितुः कन्या सद्भर्तृप्रतिपादिता ॥ ७९ ॥
यावन्त्येतानि भूतानि स्थावराणि चराणि च । मातरं कल्पयन्त्वेनामीशो हि जगतः पिता ॥ ८० ॥

है। क्योंकि चर और अचर सब प्राणी तुम्हारी गोद में ही आश्रय पाते हैं। सभी रत्न तुम्हारी गोद में होते हैं और तुम्हारी ही गोद से निकली हुई नदियों से आर्यावर्त जीवित है॥ ६७॥ पाताल के नीचे तक यदि तुम पृथ्वी को अपने बोझ से न दबाये होते तो शेषनाग अपनी कमल की नाल के समान कोमल फणों पर उसको कैसे धारण करते? ॥ ६८॥ तुम्हारे यहाँ से निकलकर सदा बहती हुई और समुद्र की लहरों से भी टक्कर लेने वाली निर्मल नदियाँ जैसे अपनी पवित्रता से सारे संसार को पवित्र करती हैं, वैसे ही तुम्हारी कीर्ति भी सब लोकों को पवित्र करती है॥ ६९॥ जैसे गंगाजी विष्णु के चरणों से निकलकर अपने को महान् मानती हैं, वैसे ही तुम्हारे शिखर से निकलकर बहने में भी वे अपनी बड़ाई समझती हैं॥ ७०॥ विष्णु भगवान् की महिमा तो संसार में तब फैली, जब उन्होंने वामन अवतार धारण करके ऊपर-नीचे और तिरछे पैर रखकर तीनों लोक नाप डाले, किन्तु तुम्हारी महिमा तो पहले से ही त्रिलोकी भर में फैली हुई है॥ ७१॥ तुमने यज्ञ का भाग पाने वाले देवताओं में स्थान पाकर सुमेरु पर्वत की सुनहरी और ऊँची चोटियों को भी नीचा दिखा दिया है॥ ७२॥ अपनी सारी कठोरता तुमने अपने अचल शरीर में रख दी है और तुम्हारा यह चल शरीर सदा भक्ति से झुका रहता है। इसी से तो सज्जन लोग आ-आकर नित्य इसकी पूजा किया करते हैं॥ ७३॥ अब हम तुम्हें अपने आने का कारण बतलाते हैं। वह काम ऐसा है, जिससे तुम्हारी ही भलाई है और यह भली बात तुम्हें समझाने के बहाने हमारी भी थोड़ी-सी भलाई हो जायेगी॥ ७४॥ तुम तो जानते ही हो कि जो अणिमा आदि आठों सिद्धियों के स्वामी हैं, जिनके सिवाय दूसरा कोई ईश्वर नहीं कहला सकता और जिनके माथे पर सदा आधा चन्द्रमा बैठा रहता है॥ ७५॥ जो अपने पृथ्वी-जल आदि उन आठों शरीरों से पृथ्वी को जीवित रखते हैं। जो एक-दूसरे की शक्ति बढ़ाते हुए संसार को इस तरह ठीक से चलाते हैं, जैसे सधे हुए घोडे रथ को मार्ग में बाँध रखते हैं॥ ७६॥ योगी लोग जिन्हें अपने शरीर के भीतर बैठा देखते हैं और जिनको विद्वान् लोग जन्म-मरण के बन्धनों से बाहर मानते हैं॥ ७७॥ समस्त संसार का काम देखने वाले और वरदायक उन्हीं शंकरजी ने हम लोगों के द्वारा सन्देश भेजकर तुम्हारी पुत्री पार्वतीजी को माँगा है॥ ७८॥ अतः तुम शिवजी के साथ अपनी पुत्री का वैसे ही अटूट सम्बन्ध कर दो, जैसे वाणी का अर्थ से सम्बन्ध होता है। क्योंकि अच्छे वर से कन्या का विवाह हो जाने पर पिता की चिन्ता मिट जाती है॥ ७९॥ महादेवजी सम्पूर्ण संसार के पिता हैं। अतएव पार्वतीजी

प्रणम्य शितिकण्ठाय विबुधास्तदनन्तरम् । चरणौ रञ्जयन्त्वस्याश्चूडामणिमरीचिभिः ॥८१॥
उमा वधूर्भवान्दाता याचितार इमे वयम् । वरः शम्भुरलं ह्येष त्वत्कुलोद्भूतये विधिः ॥८२॥
अस्तोतुः स्तूयमानस्य वन्द्यस्यानन्यबन्दिनः । सुतासम्बन्धविधिना भव विश्वगुरोर्गुरुः ॥८३॥
एवंवादिनि देवर्षौ पार्श्वे पितुरधोमुखी । लीलाकमलपत्राणि गणयामास पार्वती ॥८४॥
शैलः सम्पूर्णकामोऽपि मेनामुखमुदैक्षत । प्रायेण गृहिणीनेत्राः कन्यार्थेषु कुटुम्बिनः ॥८५॥
मेने मेनापि तत्सर्वं पत्युः कार्यमभीप्सितम् । भवन्त्यव्यभिचारिण्यो भर्तुरिष्टे पतिव्रताः ॥८६॥
इदमत्रोत्तरं न्याय्यमिति बुद्ध्या विमृश्य सः । आददे वचसामन्ते मङ्गलालङ्कृतां सुताम् ॥८९॥
एहि विश्वात्मने वत्से ! भिक्षाऽसि परिकल्पिता । अर्थिनो मुनयः प्राप्तं गृहमेधिफलं मया ॥८८॥
एतावदुक्त्वा तनयामृषीनाह महीधरः । इयं नमति वः सर्वास्त्रिलोचनवधूरिति ॥८९॥
ईप्सितार्थक्रियोदारं तेऽभिनन्द्य गिरेर्वचः । आशीर्भिरेधयामासुः पुरःपाकाभिरम्बिकाम् ॥९०॥
तां प्रणामादरस्रस्तजाम्बूनदवतंसकाम् । अङ्कमारोपयामास लज्जमानामरुन्धती ॥९१॥
तन्मातरं चाश्रुमुखीं दुहितृस्नेहविक्लवाम् । वरस्यानन्यपूर्वस्य विशोकामकरोद्गुणैः ॥९२॥
वैवाहिकीं तिथिं पृष्टास्तत्क्षणं हरबन्धुना । ते त्र्यहादूर्ध्वमाख्याय चेरुश्चीरपरिग्रहाः ॥९३॥
ते हिमालयमामन्त्र्य पुनः प्राप्य च शूलिनम् । सिद्धं चास्मै निवेद्यार्थं तद्विसृष्टाः खमुद्ययुः ॥९४॥

भी चर-अचर संसार की माता बन जायेगी ॥८०॥ ये इतनी पूजनीय हो जायेगी कि सब देवता महादेवजी को प्रणाम करके अपनी चूड़ामणि की किरणों से पार्वतीजी के चरणों को रंगा करेंगे ॥८१॥ यदि उमा वहू हों, तुम कन्या के दाता बनो, हम विवाह के संदेशवाहक हों और महादेवजी वर बनें तो तुम्हारे कुल के लिए इससे बढकर प्रतिष्ठा की और कौन-सी बात होगी ॥८२॥ तुम अपनी पुत्री का उनसे विवाह करके उन महादेवजी के भी बड़े बन जाओ, जो स्वयं किसी की स्तुति नहीं करते, किन्तु संसार जिनकी स्तुति करता है। जो स्वयं किसी की वन्दना नहीं करते परन्तु सारा संसार जिनकी वन्दना करता है ॥८३॥ जब देवर्षि लोग ऐसा कह रहे थे, उस समय पार्वतीजी अपने पिता के पास नीचा मुँह करके बैठी खिलौने के कमल के पत्ते गिन रही थीं ॥८४॥ यद्यपि हिमवान् स्वयं इस बात से सहमत थे, फिर भी उन्होंने इसका उत्तर पाने के लिए मेनका की ओर निहारा। क्योंकि कन्या के सम्बन्ध की बात में गृहस्थ लोग स्त्रियों से ही सलाह करते हैं ॥८५॥ मेना ने भी अपने पति की इच्छा में अपनी इच्छा मिलाकर वह बात मान ली। क्योंकि सती स्त्रियाँ किसी बात में पति से प्रतिकूल नहीं होतीं ॥८६॥ तब हिमालय ने सुन्दर मांगलिक वस्त्रों से अलंकृत अपनी कन्या को बुलाया और कहा—यहाँ आओ वत्से! देखो, घट-घट में रमने वाले शिवजी ने मुझसे तुम्हें माँगा है और वह भिक्षा लेने के लिए ये सप्तर्षि लोग आये हुए हैं। वास्तव में आज ही मुझे गृहस्थ होने का सच्चा फल मिला है। क्योंकि ऐसे महान् भिक्षुक मेरे द्वार पर पधारे हैं। अपनी पुत्री से इतना कहकर हिमालय ने ऋषियों से कहा—यह महादेवजी की पत्नी आप लोगों को प्रणाम कर रही है ॥८९॥ इस प्रकार अपना काम पूरा हुआ देखकर सप्तर्षियों ने हिमालय की भूरि-भूरि प्रशंसा की और अम्बिका को ऐसे आशीष दिये, जो तत्काल फलदायक थे ॥९०॥ उन ऋषियों को प्रणाम करने के लिए पार्वतीजी लजाती हुई जब झुकीं तो सहसा उनके कानों से सोने का कुण्डल गिर गया और अरुन्धतीजी ने उन्हें तुरन्त उठाकर अपनी गोद में बैठा लिया ॥९१॥ उस समय मेना अपनी पुत्री के स्नेह से इतनी विकल हो उठीं कि उनकी आँखें डबडबा आयीं, किन्तु अरुन्धतीजी ने उन्हें शिवजी जैसे अनोखे वर के गुण सुनाकर धीरज बँधाया ॥९२॥ जब विवाह की तिथि पूछी गयी तो सप्तर्षियों ने कहा कि आज से तीन दिन बाद विवाह करना ठीक होगा। यह कहकर वे चीर-वल्कलधारी ऋषि वहाँ से चल पड़े ॥९३॥ इस प्रकार हिमालय से विदा लेकर उन्होंने महादेवजी

पशुपतिरपि तान्यहानि कृच्छ्रादगमयदद्रिसुतासमागमोत्कः ।
कमपरमवशं न विप्रकुर्युर्विभुमपि तं यदमी स्पृशन्ति भावाः ॥ ९५ ॥

इति महाकविकालिदासकृतौ कुमारसम्भवे महाकाव्ये
उमाप्रदानो नाम षष्ठः सर्गः ॥ ६ ॥

को बतलाया कि सब ठीक हो गया है। फिर उनसे आज्ञा लेकर वे आकाश में यथास्थान चले गये ॥ ९४ ॥ अब पार्वतीजी से मिलने के लिए महादेवजी इतने अधीर हो उठे कि उन तीनों दिनों को भी उन्होंने बड़ी कठिनाई से काटा। जब महादेवजी जैसों की प्रेम में ऐसी दशा हो सकती है, तब भला साधारण लोगों को ऐसे मनोभाव क्यों न विकल कर देंगे ॥ ९५ ॥

इस प्रकार महाकविकालिदासरचित कुमारसम्भवमहाकाव्य में
'पार्वतीजी की मँगनी' नामक छठा सर्ग समाप्त ॥ ६ ॥

सप्तमः सर्गः

अथौषधीनामधिपस्य वृद्धौ तिथौ च जामित्रगुणान्वितायाम् ।
समेतबन्धुर्हिमवान् सुताया विवाहदीक्षाविधिमन्वतिष्ठत् ॥ १ ॥
वैवाहिकैः कौतुकसंविधानैर्गृहे गृहे व्यग्रपुरन्ध्रिवर्गम् ।
आसीत् पुरं सानुमतोऽनुरागादन्तःपुरं चैककुलोपमेयम् ॥ २ ॥
सन्तानकाकीर्णमहापथं तच्चीनांशुकैः कल्पितकेतुमालम् ।
भासोज्ज्वलत्काञ्चनतोरणानां स्थानान्तरं स्वर्ग इवावभासे ॥ ३ ॥
एकैव सत्यामपि पुत्रपङ्क्तौ चिरस्य दृष्टेव मृतोत्थितेव ।
आसन्नपाणिग्रहणेति पित्रोरुमा विशेषोच्छ्वसितं बभूव ॥ ४ ॥
अङ्गाद्ययावङ्गमुदीरिताशीः सा मण्डनान्मण्डनमन्वभुङ्क्त ।
सम्बन्धिमिश्रोऽपि गिरेः कुलस्य स्नेहस्तदेकायतनं जगाम ॥ ५ ॥
मैत्रे मुहूर्ते शशलाञ्छनेन योगं गतासूत्तरफल्गुनीषु ।
तस्याः शरीरे प्रतिकर्म चक्रुर्बन्धुस्त्रियो याः पतिपुत्रवत्यः ॥ ६ ॥
सा गौरसिद्धार्थनिवेशवद्भिर्दूर्वाप्रवालैः प्रतिभिन्नशोभम् ।
निर्नाभि कौशेयमुपात्तवाणमभ्यङ्गनेपथ्यमलञ्चकार ॥ ७ ॥
बभौ च सम्पर्कमुपेत्य बाला नवेव दीक्षाविधिसायकेन ।
करेण भानोर्बहुलावसाने सन्धुक्ष्यमाणेव शशाङ्करेखा ॥ ८ ॥

तीन दिनों बाद जब लग्न से सातवें घर में शुभ ग्रह थे, तब शुक्लपक्ष की शुभ तिथि को अपने भाई-बन्धुओं को एकत्रित करके हिमवान् ने अपनी पुत्री का शंकरजी के साथ विवाह का कार्य निश्चित कर दिया ॥ १ ॥ नगर के सब लोग हिमालय से ऐसा प्रेम करते थे कि वहाँ के घर-घर में स्त्रियाँ बड़ी धूम-धाम के साथ विवाह का उत्सव मनाने लगीं। घर-बाहर के लोग इस तरह मिल-जुलकर काम कर रहे थे जैसे सब एक कुल के ही हों ॥ २ ॥ नगर की बड़ी-बड़ी सड़कों पर कल्पवृक्ष के फूल बिछे थे, दोनों ओर रेशमी झंडियाँ कतारों में टँगी हुई थीं और द्वार-द्वार पर स्वर्णिम बन्दनवार बँधे थे। इन सब की चमक से जगमगाता हुआ वह नगर ऐसा लगता था, जैसे स्वर्ग ही उतर आया हो ॥ ३ ॥ यद्यपि हिमालय के कई पुत्र थे, फिर भी उस समय हिमालय और मेना दोनों को पार्वतीजी प्राणों से बढ़कर प्रिय लग रही थीं। मानों वे बहुत दिनों पर मिली हों, अथवा मरकर अभी जी उठी हों। क्योंकि विवाह हो जाने पर वे पराया हो जाने वाली थीं ॥ ४ ॥ बारी-बारी से सब कुटुम्बियों ने पार्वतीजी को अपनी-अपनी गोद में बैठाकर आशीर्वाद देते हुए एक-से-एक बढ़कर गहने दिये। जैसे हिमालय के सब कुटुम्बियों का स्नेह पार्वतीजी में ही आकर एकत्र हो गया था ॥ ५ ॥ सूर्योदय के तीन मुहूर्त बाद उत्तरफाल्गुनी नक्षत्र में कुटुम्ब की सुहागिन और पुत्रवती स्त्रियाँ पार्वतीजी का शृंगार करने लगीं ॥ ६ ॥ सर्वप्रथम उन्होंने दूब के अंकुरों और सरसों के दाने से उनका शृंगार किया। फिर नाभि तक ऊँची रेशमी साड़ी पहनाकर उसमें एक बाण खोंस दिया गया। इस प्रकार तेल-उबटन लगाकर सजावट पूरी कर दी गयी ॥ ७ ॥ विवाह का नया बाण कमर में खोंस कर पार्वतीजी ऐसी सुन्दर लगने लगीं, जैसे शुक्लपक्ष में सूर्य की किरणें पाकर चन्द्रमा चमक उठता है ॥ ८ ॥ तब सुहागिन स्त्रियों ने उनके शरीर पर लगे

तां लोध्रकल्केन हृताङ्गतैलामाश्यानकालेयकृताङ्गरागाम् ।
वासो वसानामभिषेकयोग्यं नार्यश्चतुष्काभिमुखं व्यनैषुः ॥ ९ ॥
विन्यस्तवैदूर्यशिलातलेऽस्मिन्नावद्धमुक्ताफलभक्तिचित्रे ।
आवर्जिताष्टापदकुम्भतोयैः सतूर्यमेनां स्नपयाम्बभूवुः ॥ १० ॥
सा मङ्गलस्नानविशुद्धगात्री गृहीतपत्युद्गमनीयवस्त्रा ।
निर्वृत्तपर्जन्यजलाभिषेका प्रफुल्लकाशा वसुधेव रेजे ॥ ११ ॥
तस्मात् प्रदेशाच्च वितानवन्तं युक्तं मणिस्तम्भचतुष्टयेन ।
पतिव्रताभिः परिगृह्य निन्ये क्लृप्तासनं कौतुकवेदिमध्यम् ॥ १२ ॥
तां प्राङ्मुखीं तत्र निवेश्य तन्वीं क्षणं व्यलम्बन्त पुरोनिषण्णाः ।
भूतार्थशोभाह्रियमाणनेत्राः प्रसाधने सन्निहितेऽपि नार्यः ॥ १३ ॥
धूपोष्मणा त्याजितमार्द्रभावं केशान्तमन्तःकुसुमं तदीयम् ।
पर्याक्षिपत् काचिदुदारबन्धं दूर्वावता पाण्डुमधूकदाम्ना ॥ १४ ॥
विन्यस्तशुक्लागुरु चक्रुरङ्गं गोरोचनापत्रविभक्तमस्याः ।
सा चक्रवाकाङ्कितसैकतायास्त्रिस्रोतसः कान्तिमतीत्य तस्थौ ॥ १५ ॥
लग्नद्विरेफं परिभूय पद्मं समेघलेखं शशिनश्च बिम्बम् ।
तदाननश्रीरलकैः प्रसिद्धैश्चिच्छेद सादृश्यकथाप्रसङ्गम् ॥ १६ ॥
कर्णार्पितो लोध्रकषायरूक्षे गोरोचनाक्षेपनितान्तगौरे ।
तस्याः कपोले परभागलाभाद्बबन्ध चक्षूंषि यवप्ररोहः ॥ १७ ॥

तेल को लोध की बुकनी से सुखाया और कुछ गीले तथा सुगन्धित लेप से उनका शरीर रंगा। तदनन्तर स्नान करने का कपड़ा पहनाकर वे उन्हें स्नानघर के चबूतरे पर ले गयीं ॥ ९ ॥ स्नानघर में नीलमणि की एक सुन्दर चौकी बिछी थी। चारों ओर रंग-बिरंगी मोतियों की मालाएँ लटकी थीं। उन स्त्रियों ने उमा को चौकी पर बैठाकर गायन-वाद्य के साथ सोने के घडे के जल से नहलाया ॥ १० ॥ उस मंगलस्नान से पार्वतीजी का शरीर अत्यन्त निर्मल हो गया और उन्होंने विवाह के वस्त्र पहने। उस समय वे ऐसी सुन्दर लगने लगीं कि जैसे गरजते हुए बादलों के जल से धुली और काँस के फूलों से भरी हुई धरती शोभित हो रही हो ॥ ११ ॥ इस प्रकार नहलाकर वे सुहागिनियाँ पार्वतीजी को सहारा देकर उस कोहबर में ले गयीं, जहाँ मणिस्तम्भों पर चँदवा तना था। बीच में मंगलवेदी बनी हुई थी और उस पर सुसज्ज आसन बिछा था ॥ १२ ॥ वहाँ उन्होंने पार्वतीजी को पूर्वाभिमुख करके बैठा दिया। शृंगार की सभी वस्तुएँ पास में होने पर भी वे सब पार्वतीजी की स्वाभाविक शोभा पर ही इतनी मुग्ध हो गयीं कि कुछ देर तक वे सुध-बुध खोकर उनकी ओर एकटक निहारती बैठी रहीं ॥ १३ ॥ फिर किसी ने अगरचन्दन के धुएँ से उनके बाल सुखाकर फूल गूँथे। दूब में गूँथी हुई पीले महुए के फूलों की माला जूड़े में बाँधी ॥ १४ ॥ किसी सुहागिन ने उजले अगर में पिसा हुआ अंगराग उनके शरीर पर मला और फिर अत्यन्त लाल गोरोचन से उनके शरीर को चित्रित किया। उस समय पार्वतीजी इतनी सुन्दर दीख रही थीं कि उनके रूप के आगे उज्ज्वल धारा वाली उन गंगाजी की शोभा भी मन्द पड़ गयी, जिनके तट की बालू में चकवे बैठे हुए हों ॥ १५ ॥ भौंरों से घिरा कमल और बादलों में छिपा हुआ चन्द्रमा, इनमें कोई भी ऐसा नहीं दिखलाई पडा, जो उनकी गुँथी चोटी वाले मुख की सुन्दरता के आगे टिक पाये ॥ १६ ॥ उनके कानों पर लटकने वाले जौ के अंकुर और लोध से पुते तथा गोरोचन लगे हुए गौरवर्ण गाल इतने सुन्दर दीखने लगे कि सबकी आँखें बरबस उनकी ओर खिंची जा रही थीं ॥ १७ ॥ सुडौल अंगों वाली पार्वतीजी

रेखाविभक्तः सुविभक्तगात्र्याः किञ्चिन्मधूच्छिष्टविमृष्टरागः।
कामप्यभिख्यां स्फुरितैरपुष्यदासन्नलावण्यफलोऽधरोष्ठः॥ १८॥
पत्युः शिरश्चन्द्रकलामनेन स्पृशेति सख्या परिहासपूर्वम्।
सा रञ्जयित्वा चरणौ कृताशीर्माल्येन तां निर्वचनं जघान॥ १९॥
तस्याः सुजातोत्पलपत्रकान्ते प्रसाधिकाभिर्नयने निरीक्ष्य।
न चक्षुषोः कान्तिविशेषबुद्ध्या कालाञ्जनं मङ्गलमित्युपात्तम्॥ २०॥
सा सम्भवद्भिः कुसुमैर्लतेव ज्योतिर्भिरुद्यद्भिरिव त्रियामा।
सरिद्विहङ्गैरिव लीयमानैरामुच्यमानाभरणा चकासे॥ २१॥
आत्मानमालोक्य च शोभमानमादर्शबिम्बे स्तिमितायताक्षी।
हरोपयाने त्वरिता बभूव स्त्रीणां प्रियालोकफलो हि वेशः॥ २२॥
अथाङ्गुलिभ्यां हरितालमार्द्रं माङ्गल्यमादाय मनःशिलां च।
कर्णावसक्तामलदन्तपत्रं माता तदीयं मुखमुन्नमय्य॥ २३॥
उमास्तनोद्भेदमनु प्रवृद्धो मनोरथो यः प्रथमं बभूव।
तमेव मेना दुहितुः कथञ्चिद्विवाहदीक्षातिलकं चकार॥ २४॥
बबन्ध चाप्राकुलदृष्टिरस्याः स्थानान्तरे कल्पितसन्निवेशाम्।
धात्र्यङ्गुलीभिः प्रतिसार्यमाणमूर्णामयं कौतुकहस्तसूत्रम्॥ २५॥

का जो निचला ओठ ऊपर के ओठ से एक रेखा के द्वारा अलग हो गया था, जिस पर लगी हुई चिकनाई ने और भी लाली बढाकर उसे सुन्दर बना दिया था और जिसकी सुन्दरता फैलने ही वाली थी, वह ओठ जब फड़कता था, उस समय की शोभा अनिर्वचनीय थी॥ १८॥ एक सखी पार्वतीजी के चरणों में जब महावर लगा चुकी, तब उसने हँसी-हँसी में आशीर्वाद दिया कि भगवान् करे, तुम इन पैरों से अपने पति के सिर की चन्द्रकला को छुओ। इस पर पार्वतीजी कुछ बोलीं तो नहीं, परन्तु एक माला उठाकर उसीसे उसकी पीठ पर मार दी॥ १९॥ शृङ्गार करने वाली एक स्त्री ने पार्वतीजी की नीलकमल जैसी बड़ी-बड़ी और काली-काली आँखों में जो काजल लगाया, वह इसलिए नहीं कि आँजन से आँखों की कुछ शोभा बढ़ेगी, बल्कि इसीलिए कि वह भी एक मंगलाचार था॥ २०॥ जैसे फूल आ जाने पर लताएँ स्वयं खिल उठती हैं, जैसे तारे निकलने पर रात जगमगाने लगती है, या कि जैसे रंग-बिरंगे पक्षियों के आ जाने से नदी सुन्दर लगने लगती है, वैसे ही मणियों-मोतियों और सोने के गहने पहना दिये जाने पर पार्वतीजी की सुन्दरता और भी निखर उठी॥ २१॥ अपने इस सँवारे हुए रूप को दर्पण में देखकर स्वयं पार्वतीजी भी चकित हो गयीं और महादेवजी से मिलने के लिए उतावली हो उठीं। क्योंकि स्त्रियों का शृङ्गार तभी सफल होता है जब प्रियतम उसे देखे॥ २२॥ उसी समय पार्वतीजी की माता मेना वहाँ आयीं। उन्होंने उमा का वह मुख ऊपर उठाया, जिसके दोनों कानों में सुन्दर कर्णफूल झूल रहे थे। उस रूप को देखकर वे आनन्द से विभोर हो गयीं, किन्तु किसी तरह उन्होंने दो उँगलियों से गीली हरताल और मंगलसूचक मैनसिल लेकर पुत्री के माथे पर विवाह का तिलक किया। उस समय ऐसा लगा कि मानो मेना ने तिलक लगाकर पार्वतीजी के मन में स्तन उभड़ने के समय से ही शंकरजी को पाने की जो इच्छा बराबर बढ रही थी, उसे पूर्ण कर दी॥ २३-२४॥ आनन्दातिरेक से मेना की आँखों में आँसू उमड़ आये। अतएव ठीक-ठीक न देख सकने के कारण उन्होंने पार्वतीजी के हाथ में बँधने वाला कंगन वहाँ न बाँधकर कहीं अन्यत्र बाँध दिया। बाद में उनकी धाय ने अपनी उँगलियों से उस ऊन के कंगन को खिसकाकर ठीक स्थान पर कर दिया॥ २५॥ रेशमी साड़ी पहने और हाथ

क्षीरोदवेलेव सफेनपुञ्जा पर्याप्तचन्द्रेव शरत्त्रियामा।
नवं नवक्षौमनिवासिनी सा भूयो बभौ दर्पणमादधाना॥ २६॥
तामर्चिताभ्यः कुलदेवताभ्यः कुलप्रतिष्ठां प्रणमय्य माता।
अकारयत् कारयितव्यदक्षा क्रमेण पादग्रहणं सतीनाम्॥ २७॥
अखण्डितं प्रेम लभस्व पत्युरित्युच्यते ताभिरुमा स्म नम्रा।
तया तु तस्यार्धशरीरभाजा पश्चात्कृताः स्निग्धजनाशिषोऽपि॥ २८॥
इच्छाविभूत्योरनुरूपमद्रिस्तस्याः कृती कृत्यमशेषयित्वा।
सभ्यः सभायां सुहृदास्थितायां तस्थौ वृषाङ्कागमनप्रतीक्षः॥ २९॥
तावद्भवस्यापि कुबेरशैले तत्पूर्वपाणिग्रहणानुरूपम्।
प्रसाधनं मातृभिरादृताभिर्न्यस्तं पुरस्तात् पुरशासनस्य॥ ३०॥
तद्गौरवान्मङ्गलमण्डनश्रीः सा पस्पृशे केवलमीश्वरेण।
स एव वेषः परिणेतुरिष्टं भावान्तरं तस्य विभोः प्रपेदे॥ ३१॥
बभूव भस्मैव सिताङ्गरागः कपालमेवामलशेखरश्रीः।
उपान्तभागेषु च रोचनाङ्को गजाजिनस्यैव दुकूलभावः॥ ३२॥
शङ्खान्तरद्योति विलोचनं यदन्तर्निविष्टामलपिङ्गतारम्।
सान्निध्यपक्षे हरितालमय्यास्तदेव जातं तिलकक्रियायाः॥ ३३॥
यथाप्रदेशं भुजगेश्वराणां करिष्यतामाभरणान्तरत्वम्।
शरीरमात्रं विकृतिं प्रपेदे तथैव तस्थुः फणरत्नशोभाः॥ ३४॥
दिवापि निष्ठ्यूतमरीचिभासा बाल्यादनाविष्कृतलाञ्छनेन।
चन्द्रेण नित्यं प्रतिभिन्नमौलेश्चूडामणेः किं ग्रहणं हरस्य॥ ३५॥

में दर्पण लिये वे उतराते हुए फेन वाली क्षीरसमुद्र की लहर एवं चन्द्रयुक्त शारदी रात्रि जैसी दीखने लगीं॥ २६॥ विवाह के रीति-रिवाज से अभिज्ञ मेना ने अपने कुल का यश बढाने वाली पार्वतीजी से कुलदेवताओं को प्रणाम करवाकर सब सखियों के चरणस्पर्श कराये॥ २७॥ तब लाज से सकुचाती हुई पार्वतीजी को सब सखियों ने यह आशीर्वाद दिया कि 'तुम्हारे पति तुम्हें सदा तन-मन से प्यार करें'। परन्तु पार्वतीजी ने भगवान् शंकर के आधे शरीर में बसकर अपनी सखियों के आशीर्वाद भी पिछाड़ दिये॥ २८॥ उधर हिमालय ने भी बड़े उत्साह तथा वैभव के अनुरूप पार्वतीजी के विवाह के सब उपकरण जुटा लिये और फिर सभा में बैठकर भगवान् शंकरजी के आगमन की राह देखने लगे। उसी समय कैलास पर्वत पर भी सप्तमाताओं ने शृङ्गार की वह सब सामग्रियाँ महादेवजी के आगे रख दीं, जो उनके पहले विवाह में काम आयी थीं॥ २९-३०॥ माताओं का आदर करने के लिए शिवजी ने उन मंगल-शृङ्गार की सामग्रियों को केवल स्पर्श कर दिया, पहना नहीं। अपनी शक्ति से ही उन्होंने अपने वेश को विवाह के योग्य बना लिया॥ ३१॥ उनके लिए चिता की भस्म उजला अंगराग, कपाल सिर का सुन्दर आभूषण और गजचर्म ही ऐसा सुन्दर रेशमी वस्त्र बन गया, जिसके आँचलों पर गोरोचन से छपाई की हुई थी॥ ३२॥ उनके माथे में पीली पुतली वाला चमकता हुआ जो तृतीय नेत्र था, वही हरताल के सुन्दर तिलक के रूप में परिणत हो गया॥ ३३॥ उनके अंगों में जो बहुत-से साँप लिपटे थे, वे भी उन-उन अंगों के आभूषण बन गये। किन्तु उनके फणों पर जो मणियाँ थीं, वे ज्यों की त्यों चमकती रहीं॥ ३४॥ उनके मुकुट पर सदा विद्यमान रहने वाला जो बाल-चन्द्र दिन में भी अपनी

इत्यद्भुतैकप्रभवः प्रभावात् प्रसिद्धनेपथ्यविधेर्विधाता।
आत्मानमासन्नगणोपनीते खड्गे निषक्तप्रतिमं ददर्श॥ ३६॥
स गोपतिं नन्दिभुजावलम्बी शार्दूलचर्मान्तरितोरुपृष्ठम्।
तद्भक्तिसङ्क्षिप्तबृहत्प्रमाणमारुह्य कैलासमिव प्रतस्थे॥ ३७॥
तं मातरो देवमनुव्रजन्त्यः स्ववाहनक्षोभचलावतंसाः।
मुखैः प्रभामण्डलरेणुगौरैः पद्माकरं चक्रुरिवान्तरिक्षम्॥ ३८॥
तासां च पश्चात्कनकप्रभाणां काली कपालाभरणा चकासे।
बलाकिनी नीलपयोदराजी दूरं पुरःक्षिप्तशतह्रदेव॥ ३९॥
ततो गणैः शूलभृतः पुरोगैरुदीरितो मङ्गलतूर्यघोषः।
विमानशृङ्गाण्यवगाहमानः शशंस सेवावसरं सुरेभ्यः॥ ४०॥
उपाददे तस्य सहस्ररश्मिस्त्वष्ट्रा नवं निर्मितमातपत्रम्।
स तद्दुकूलादविदूरमौलिर्बभौ पतद्गङ्ग इवोत्तमाङ्गे॥ ४१॥
मूर्ते च गङ्गायमुने तदानीं सचामरे देवमसेवियाताम्।
समुद्रगारूपविपर्ययेऽपि सहंसपाते इव लक्ष्यमाणे॥ ४२॥
तमभ्यगच्छत्प्रथमो विधाता श्रीवत्सलक्ष्मा पुरुषश्च साक्षात्।
जयेति वाचा महिमानमस्य संवर्धयन्तौ हविषेव वह्निम्॥ ४३॥
एकैव मूर्तिर्विभिदे त्रिधा सा सामान्यमेषां प्रथमावरत्वम्।
विष्णोर्हरस्तस्य हरिः कदाचिद् वेधास्तयोस्तावपि धातुराद्यौ॥ ४४॥

किरणें चमकाता था और जिसके छोटे होने से उसका कलंक दिखलाई नहीं देता था, वह चन्द्रमा ही उनका चूड़ामणि बन गया। तब वे दूसरा चूड़ामणि लेकर क्या करते॥ ३५॥ अपनी शक्ति से संसार के सभी शृङ्गारों को बनाने में निपुण और सदा अनोखे काम करने वाले महादेवजी ने अपने पास बैठे हुए गण से खड्ग मँगा कर उसमें अपना मुँह देखा॥ ३६॥ तब नन्दी के हाथ का सहारा लेकर वे अपने उस लम्बे-चौड़े डीलवाले बैल की पीठ पर चढकर चले, जिस पर सिंह की खाल बिछी थी और जो ऐसा दीखता था कि जैसे शंकरजी में भक्ति रखने के कारण कैलास ने ही अपना बड़ा रूप छोटा कर लिया हो॥ ३७॥ तेजोमंडल से दमकती गोरे-गोरे मुखवाली सुन्दर माताएँ जब अपने-अपने रथों पर बैठकर उनके पीछे-पीछे चलीं तो वाहनों के झटके से उनके कर्णफूल हिल उठे। आकाश में उनके मुँह ऐसे लग रहे थे, जैसे किसी विशाल तालाब में बहुत-से कमल खिल गये हों॥ ३८॥ सोने के समान चमकती हुई उन माताओं के पीछे-पीछे श्वेत खप्परों से देह सजाये भद्रकालीजी चल रही थीं, जो ऐसी लगती थीं कि मानो बगुलों से भरी और दूर तक चमकती हुई बिजली युक्त नीले बादलों की घटा चल रही हो॥ ३९॥ महादेवजी के आगे-आगे चलने वाले गणों ने जो मंगलमयी तुरही बजायी तो उसकी ध्वनि ने देवताओं के विमानों की छतों पर गूँज कर उन्हें यह सूचना दी कि अब सबको अपने-अपने काम पर जुट जाना है॥ ४०॥ तत्काल सूर्य ने विश्वकर्मा के हाथ का बना नया छत्र लेकर शिवजी के ऊपर लगा दिया। उस समय शिवजी के सिर के पास छत्र से लटका हुआ कपड़ा ऐसा दीख रहा था, मानो उनके सिर पर गंगाजी की धारा गिर रही हो॥ ४१॥ गंगा और यमुना भी मूर्तरूप में प्रकट होकर महादेवजी पर चँवर डुलाने लगीं। वे चँवर ऐसे दीखते थे, मानो हंस उड़ते हों॥ ४२॥ आग में घी डालने से जैसे उसकी लपट बढ़ जाती है, वैसे ही ब्रह्मा और विष्णु ने जय-जयकार करके उनकी महिमा बढ़ा दी॥ ४३॥ सच तो यह है कि ब्रह्मा, विष्णु और महेश एक ही मूर्ति के तीन रूप

तं लोकपालाः पुरुहूतमुख्याः श्रीलक्षणोत्सर्गविनीतवेषाः।
दृष्टिप्रदाने कृतनन्दिसंज्ञास्तद्दर्शिताः प्राञ्जलयः प्रणेमुः॥ ४५॥
कम्पेन मूर्ध्नः शतपत्रयोनिं वाचा हरिं वृत्रहणं स्मितेन।
आलोकमात्रेण सुरानशेषान् सम्भावयामास यथाप्रधानम्॥ ४६॥
तस्मै जयाशीः ससृजे पुरस्तात्सप्तर्षिभिस्तान् स्मितपूर्वमाह।
विवाहयज्ञे विततेऽत्र यूयमध्वर्यवः पूर्ववृता मयेति॥ ४७॥
विश्वावसुप्राग्रहरैः प्रवीणैः सङ्गीयमानत्रिपुरावदानः।
अध्वानमध्वान्तविकारलङ्घ्यस्ततार तारापिपखण्डधारी॥ ४८॥
खे खेलगामी तमुवाह वाहः सशब्दचामीकरकिङ्किणीकः।
तटाभिघातादिव लग्नपङ्के धुन्वन् मुहुः प्रोतघने विषाणे॥ ४९॥
स प्रापदप्राप्तपराभियोगं नगेन्द्रगुप्तं नगरं मुहूर्तात्।
पुरोविलग्नैर्हरदृष्टिपातैः सुवर्णसूत्रैरिव कृष्यमाणः॥ ५०॥
तस्योपकण्ठे घननीलकण्ठः कुतूहलादुन्मुखपौरदृष्टः।
स्वबाणचिह्नादवतीर्य मार्गादासन्नभूपृष्ठमियाय देवः॥ ५१॥
तमृद्धिमद्बन्धुजनाधिरूढैर्वृन्दैर्गजानां गिरिचक्रवर्ती।
प्रत्युज्जगामागमनप्रतीतः प्रफुल्लवृक्षैः कटकैरिव स्वैः॥ ५२॥
वर्गावुभौ देवमहीधराणां द्वारे पुरस्योद्घटितापिधाने।
समीयतुर्दूरविसर्पिघोषौ भिन्नैकसेतू पयसामिवौघौ॥ ५३॥

हो गये हैं। और ये तीनों आपस में एक-दूसरे से छोटे-बड़े होते ही रहते हैं। कभी शिवजी विष्णु से, कभी ब्रह्मा इन दोनों से और कभी ये दोनों ब्रह्मा से बड़े हो जाते हैं॥ ४४॥ जब अपना राजसी ठाट छोड़ और विनीत वेश बनाकर इन्द्र आदि लोकपाल उनका दर्शन करने आये तो नन्दी ने संकेत से उन लोगों को महादेवजी के दर्शन करा दिये, तब इन लोगों ने हाथ जोडकर शिवजी को प्रणाम किया॥ ४५॥ शिवजी ने भी ब्रह्माजी की ओर सिर हिलाकर, विष्णु से कुशल-मंगल पूछकर, इन्द्र की ओर मुस्कुराकर और सब देवताओं को केवल निहार कर सब छोटे-बड़े देवताओं का सम्मान किया॥ ४६॥ जब सप्तर्षि आये और क्रमशः जय-जयकार करके उन्हें आशीर्वाद दिया, तब शिवजी ने उनसे कहा कि इस बड़े भारी विवाह के यज्ञ में पुरोहित का काम मैंने पहले से ही आपके लिए निश्चित कर रखा है॥ ४७॥ सब विकारों से परे महादेवजी जब चले तो उस समय विश्वावसु आदि प्रसिद्ध गन्धर्व त्रिपुरासुर पर विजय पाने के गीत गाते हुए उनके आगे-आगे चल रहे थे॥ ४८॥ मन्द-मन्द चाल से चलने वाला और गले में लटकी हुई सोने की छोटी-छोटी घंटियों को टनटनाता हुआ शिवजी का बैल उन बादलों को अपनी सींगों से बार-बार झटकारता जाता था, जो उसकी सींगों में इस प्रकार सँट गये थे, जैसे नदी के तटवर्ती टीले ढाते समय उनमें कीचड़ लग गया हो॥ ४९॥ वह बैल कभी किसी से भी न हारने वाले हिमालय के ओषधिप्रस्थ नामक नगर में इस प्रकार क्षण भर में ही पहुँच गया, मानो आगे पड़ती हुई शिवजी की दृष्टिरूपिणी सोने की डोरियाँ उसे बरबस खींच ले गयी हों॥ ५०॥ उस नगर के पास बादलों जैसे नीले कण्ठवाले महादेवजी आकाश से उस पृथ्वी पर उतरे, जिसमें उन्होंने त्रिपुरासुर को मारते समय बहुत-से बाणों द्वारा चिह्न बना दिये थे। वहाँ के निवासी बड़े चाव से ऊपर मुहँ उठाये हुए उन्हें निहार रहे थे॥ ५१॥ इस प्रकार महादेवजी के आगमन से पर्वतराज हिमालय बहुत प्रसन्न हुए और अपने उन धनी कुटुम्बियों को हाथी पर चढ़ाकर शिवजी की अगवानी के लिए ले चले, जो हिमालय की ढाल पर फूलों से लदे हुए वृक्ष की तरह अपने सैनिकों से सुसज्जित थे॥ ५२॥ वर-कन्या

ह्रीमानभूद्भूमिधरो हरेण त्रैलोक्यवन्द्येन कृतप्रणामः।
पूर्वं महिम्ना स हि तस्य दूरमावर्जितं नात्मशिरो विवेद॥५४॥
स प्रीतियोगाद् विकसन्मुखश्रीर्जामातुरग्रेसरतामुपेत्य।
प्रावेशयन्मन्दिरमृद्धमेनमागुल्फकीर्णापणमार्गपुष्पम्॥५५॥
तस्मिन्मुहूर्ते पुरसुन्दरीणामीशानसन्दर्शनलालसानाम्।
प्रासादमालासु बभूवुरित्थं त्यक्तान्यकार्याणि विचेष्टितानि॥५६॥
आलोकमार्गं सहसा व्रजन्त्या कयाचिदुद्वेष्टनवान्तमाल्यः।
बद्धुं न सम्भावित एव तावत्करेण रुद्धोऽपि च केशपाशः॥५७॥
प्रसाधिकाऽऽलम्बितमग्रपादमाक्षिप्य काचिद्द्रवरागमेव।
उत्सृष्टलीलागतिरागवाक्षादलक्तकाङ्कं पदवीं ततान॥५८॥
विलोचनं दक्षिणमञ्जनेन सम्भाव्य तद्वञ्चितवामनेत्रा।
तथैव वातायनसन्निकर्षं ययौ शलाकामपरा वहन्ती॥५९॥
जालान्तरप्रेषितदृष्टिरन्या प्रस्थानभिन्नां न बबन्ध नीवीम्।
नाभिप्रविष्टाभरणप्रभेण हस्तेन तस्थाववलम्ब्य वासः॥६०॥
अर्धाचिता सत्वरमुत्थितायाः पदे पदे दुर्निमिते गलन्ती।
कस्याश्चिदासीद्रसना तदानीमङ्गुष्ठमूलार्पितसूत्रशेषा॥६१॥
तासां मुखैरासवगन्धगर्भैर्व्याप्तान्तराः सान्द्रकुतूहलानाम्।
विलोलनेत्रभ्रमरैर्गवाक्षाः सहस्रपत्राभरणा इवासन्॥६२॥

दोनों ही पक्ष वालों का कोलाहल दूर तक सुनायी दे रहा था और वे जब नगर के खुले फाटकों वाले द्वार पर आकर मिले तो ऐसे लगने लगे, मानो बाँध टूट जाने पर जल की दो धाराएँ आकर परस्पर मिल गयी हों॥५३॥ पहले शंकरजी ने जब हिमालय को प्रणाम किया तो वे लाज से मानो गड़ गये, परन्तु उन्हें यह नहीं ज्ञात हुआ कि प्रणाम करने के पहले शिवजी की महिमा से ही उनका सिर झुक चुका था॥५४॥ इस सम्बन्ध में हिमालय बहुत प्रसन्न थे। वे आगे-आगे चलकर उस सम्पन्न नगर में अपने जामाता को उस मार्ग से ले गये, जहाँ बाजार के मार्ग में टखनों तक फूल बिछे थे॥५५॥ उस समय महादेवजी के दर्शन के लिए उतावली नगर की सुन्दरियाँ अपना सब काम-काज छोड़कर अपने-अपने भवनों की छतों पर गयीं॥५६॥ एक स्त्री ज्यों ही खिडकी की ओर हड़बड़ी में भागी कि उसके जूड़े में बँधी हुई फूल की माला खुल गयी और वह उसे अपने हाथ में थामे ही चली गयी। क्योंकि उसे बाँधने की सुध ही नहीं रही॥५७॥ एक स्त्री अपने पैर में महावर लगवा रही थी। उसे यों ही छुड़ाकर वह खिड़की के पास तक अपने महावर लगे पैरों की छाप बनाती हुई दौड़ पड़ी॥५८॥ एक स्त्री अपनी दाईं आँख में काजल लगा चुकी थी, परन्तु बाँईं आँख में काजल बिना लगाये और हाथ में सलाई लिये हुए ही खिड़की की ओर चल पड़ी॥५९॥ एक दूसरी स्त्री ज्यों ही जाकर खिड़की की जालियों में झाँकने लगी, तभी उसकी कमर का नारा खुल गया और उसे बिना बाँधे ही हाथ से कपड़ा पकड़े जो खड़ी हुई तो उसके हाथ के कङ्कन के रत्नों की चमक से उसकी नाभि चमकती दीखने लगी॥६०॥ एक स्त्री डोरे में मणि पोह रही थी। इतने में ही वह शंकरजी की बरात आने का कोलाहल सुनकर हड़बड़ा उठी और खिड़की की ओर दौड़ी। जिससे ऐसा हुआ कि खिड़की तक जाते-जाते मणियों के सब दाने बिखर गये, किन्तु पैर के अँगूठे में बँधा हुआ डोरा ज्यों का त्यों पड़ा रहा॥६१॥ उन उत्सुकता भरे नैनवालियों के आसव से महकते और चंचल नेत्र वाले मुख खिड़कियों में झाँकते हुए ऐसे दीख रहे थे,

तावत्पताकाकुलमिन्दुमौलिरुत्तोरणं राजपथं प्रपेदे।
प्रासादशृङ्गाणि दिवापि कुर्वञ्ज्योत्स्नाभिषेकद्विगुणद्युतीनि॥ ६३॥
तमेकदृश्यं नयनैः पिबन्त्यो नार्यो न जग्मुर्विषयान्तराणि।
तथाहि शेषेन्द्रियवृत्तिरासां सर्वात्मना चक्षुरिव प्रविष्टा॥ ६४॥
स्थाने तपो दुश्चरमेतदर्थमपर्णया पेलवयाऽपि तप्तम्।
या दास्यमप्यस्य लभेत नारी सा स्यात्कृतार्था किमुताङ्कशय्याम्॥ ६५॥
परस्परेण स्पृहणीयशोभं न चेदिदं द्वन्द्वमयोजयिष्यत्।
अस्मिन्द्वये रूपविधानयत्नः पत्युः प्रजानां विफलोऽभविष्यत्॥ ६६॥
न नूनमारूढरुषा शरीरमनेन दग्धं कुसुमायुधस्य।
व्रीडादमुं देवमुदीक्ष्य मन्ये संन्यस्तदेहः स्वयमेव कामः॥ ६७॥
अनेन सम्बन्धमुपेत्य दिष्ट्या मनोरथप्रार्थितमीश्वरेण।
मूर्धानमालि! क्षितिधारणोच्चमुच्चैस्तरं वक्ष्यति शैलराजः॥ ६८॥
इत्यौषधिप्रस्थविलासिनीनां शृण्वन् कथाः श्रोत्रसुखास्त्रिनेत्रः।
केयूरचूर्णीकृतलाजमुष्टिं हिमालयस्यालयमाससाद॥ ६९॥
तत्रावतीर्याच्युतदत्तहस्तः शरद्घनाद्दीधितिमानिवोक्ष्णः।
क्रान्तानि पूर्वं कमलासनेन कक्ष्यान्तराण्यद्रिपतेर्विवेश॥ ७०॥
तमन्वगिन्द्रप्रमुखाश्च देवाः सप्तर्षिपूर्वाः परमर्षयश्च।
गणाश्च गिर्यालयमभ्यगच्छन् प्रशस्तमारम्भमिवोत्तमार्थाः॥ ७१॥

जैसे खिड़कियों की जालियों में भौंरों से युक्त कमल लटकाये हुए हों॥ ६२॥ उसी समय उन चूने से पुते श्वेत भवनों के कंगूरों को अपने सिर के चन्द्रमा की चाँदनी से और भी अधिक चमकाते हुए महादेवजी ने ध्वजाओं और पताकाओं से सुसज्जित राजमार्ग में प्रवेश किया॥ ६३॥ उस नगर की स्त्रियाँ सुध-बुध भूलकर इस तरह टकटकी लगाकर देखती हुई शिवजी को अपने नेत्रों से पी रही थीं, जैसे उनकी सब इन्द्रियाँ आँखों में ही समा गयी हों॥ ६४॥ उन्होंने सोचा कि ऐसे उत्तम वर के लिए सुकुमार पार्वती का तप करना उचित ही था। क्योंकि ये इतने सुन्दर हैं कि जो स्त्री इनकी दासी हो, वह भी धन्य हो जाय। फिर जो इनकी गोद में सोये, उसका क्या कहना है॥ ६५॥ सौन्दर्य में एक-दूसरे से बढे-चढ़े इस जोड़ का यदि विवाह न होता तो हम यही समझती हैं कि ब्रह्माजी ने इन दोनों का रूप बनाने में जो परिश्रम किया, वह सब व्यर्थ हो जाता॥ ६६॥ अब हम समझ रही हैं कि इन्होंने कामदेव को क्रोध करके नहीं भस्म किया था। बल्कि कामदेव ही इनकी सुन्दरता देखकर टीस के मारे स्वयं जल मरा॥ ६७॥ हे सखी! पर्वतेश्वर हिमवान् बडे भाग्यशाली हैं। एक तो पृथ्वी धारण करने से उनका मस्तक वैसे ही ऊँचा था, उस पर अपने मनचाहे वर शंकरजी से सम्बन्ध करके उनका सिर और भी उन्नत हो जायेगा॥ ६८॥ ओषधिप्रस्थ नगर की स्त्रियों की ऐसी मीठी-मीठी बातें सुनते हुए महादेवजी हिमालय के उस घर में पहुँचे, जहाँ इतनी भीड थी कि कुमारियों ने मङ्गलाचार के लिए जो धान के लावे फेंके थे, वे वहाँ के लोगों के भुजबन्धों की रगड़ से ही पिसकर चूर-चूर हो गये॥ ६९॥ वहाँ पहुँचने पर भगवान् विष्णु ने हाथ का सहारा देकर महादेवजी को इस प्रकार बैल से उतारा, जैसे शरद् ऋतु के उजले बादलों से सूर्य को उतारा हो। वहाँ से चलकर वे हिमालय के भवन की उस भीतरी कोठी में पहुँचे, जहाँ ब्रह्माजी पहले से ही विराजमान थे॥ ७०॥ उनके पीछे-पीछे इन्द्र आदि देवता, सप्तर्षियों के साथ सभी महर्षि और महादेवजी के सब गण हिमालय के घर में उसी प्रकार गये, जैसे किसी काम

तत्रेश्वरो विष्टरभाग्यथावत् सरत्नमर्घ्यं मधुमच्च गव्यम्।
नवे दुकूले च नगोपनीतं प्रत्यग्रहीत् सर्वममन्त्रवर्जम्॥ ७२॥
दुकूलवासाः स वधूसमीपं निन्ये विनीतैरवरोधदक्षैः।
वेलासमीपं स्फुटफेनराजिर्नवैरुदन्वानिव चन्द्रपादैः॥ ७३॥
तया प्रवृद्धाननचन्द्रकान्त्या प्रफुल्लचक्षुःकुमुदः कुमार्या।
प्रसन्नचेतःसलिलः शिवोऽभूत्संसृज्यमानः शरदेव लोकः॥ ७४॥
तयोः समापत्तिषु कातराणि किञ्चिद्व्यवस्थापितसंहृतानि।
ह्रीयन्त्रणां तत्क्षणमन्वभूवन्नन्योन्यलोलानि विलोचनानि॥ ७५॥
तस्याः करं शैलगुरूपनीतं जग्राह ताम्राङ्गुलिमष्टमूर्तिः।
उमातनौ गूढतनोः स्मरस्य तच्छङ्किनः पूर्वमिव प्ररोहम्॥ ७६॥
रोमोद्गमः प्रादुरभूदुमायाः स्विन्नाङ्गुलिः पुङ्खवकेतुरासीत्।
वृत्तिस्तयोः पाणिसमागमेन समं विभक्तेव मनोभवस्य॥ ७७॥
प्रयुक्तपाणिग्रहणं यदन्यद् वधूवरं पुष्यति कान्तिमग्र्याम्।
सान्निध्ययोगादनयोस्तदानीं किं कथ्यते श्रीरुभयस्य तस्य॥ ७८॥
प्रदक्षिणप्रक्रमणात् कृशानोरुदर्चिषस्तन्मिथुनं चकासे।
मेरोरुपान्तेष्विव वर्तमानमन्योन्यसंसक्तमहस्त्रियामम्॥ ७९॥
तौ दम्पती त्रिः परिणीय वह्निमन्योन्यसंस्पर्शनिमीलिताक्षौ।
स कारयामास वधूं पुरोधास्तस्मिन्समिद्धार्चिषि लाजमोक्षम्॥ ८०॥

के प्रारम्भ हो जाने पर उसके पीछे और भी बहुत-से बड़े-बड़े काम सिद्ध हो जाते हैं॥ ७१॥ वहाँ महादेवजी को आसन पर बैठाकर हिमालय ने रत्न, अर्घ्य, मधु, दही और दो नये वस्त्र आदि जो कुछ लाकर दिये, उन सबको उन्होंने मंत्र के साथ ले लिया॥ ७२॥ तदनन्तर रेशमी वस्त्र पहने हुए महादेवजी को रनिवास के सेवक उसी प्रकार पार्वतीजी के पास ले गये, जैसे चन्द्रमा की किरणें फेन वाले समुद्र को तट तक पहुँचा दिया करती हैं॥ ७३॥ शरद् ऋतु के आने पर जैसे लोग प्रसन्न होते हैं, वैसे ही अत्यन्त देदीप्यमान चंद्रमा के सदृश मुखवाली पार्वतीजी को देखकर शंकरजी के नेत्ररूपी कुमुद खिल गये और उनका मन जल के समान स्वच्छ हो गया॥ ७४॥ पार्वतीजी और शंकरजी के नेत्र थोड़ी देर के लिए मिलते और फिर हट जाते थे। इस प्रकार वे दोनों एक-दूसरे को चावभरी आँखों से देखते थे, किन्तु उनके हृदय में फिर बड़ी लज्जा आ जाती थी कि हमें ऐसा करते देखकर दूसरे लोग क्या कहेंगे॥ ७५॥ तभी हिमालय ने पार्वतीजी का हाथ आगे बढाकर शंकरजी के हाथ पर रख दिया। पार्वतीजी का वह लाल-लाल उँगलियों वाला हाथ ऐसा दीख रहा था कि जैसे महादेवजी के डर से छिपे हुए कामदेव के अंकुर फिर से निकल रहे हो॥ ७६॥ इस प्रकार उनके हाथ पकड़ते ही पार्वतीजी को रोमांच हो आया और महादेवजी की उँगलियों से भी पसीना निकलने लगा। इससे ऐसा जान पड़ा कि मानो इन दोनों का हाथ मिलाकर कामदेव ने दोनों को एक साथ अपने अधीन कर लिया हो॥ ७७॥ विवाह के समय जिन पार्वती और शंकरजी का स्मरण किये जाने पर वे वधू और वर की शोभा बढाते हैं, उन्हीं पार्वती और शंकरजी का जब स्वयं ही विवाह हो रहा है, तब उनकी शोभा का क्या कहना है॥ ७८॥ जलती हुई अग्नि का फेरा देते समय पार्वती और शंकरजी इस प्रकार शोभित हुए, जैसे रात और दिन दोनों मिलकर सुमेरु पर्वत की प्रदक्षिणा कर रहे हों॥ ७९॥ पार्वती और शंकरजी आँख मूँदकर एक-दूसरे के स्पर्श का आनन्द लेते हुए अग्नि की प्रदक्षिणा कर रहे थे। जलती हुई अग्नि के जब तीन

सा लाजधूमाञ्जलिमिष्टगन्धं गुरूपदेशाद्वदनं निनाय।
कपोलसंसर्पिशिखः स तस्या मुहूर्तकर्णोत्पलतां प्रपेदे॥८१॥
तदीषदार्द्रारुणगण्डलेखमुच्छ्वासि कालाञ्जनरागमक्ष्णोः ।
वधूमुखं क्लान्तयवावतंसमाचारधूमग्रहणाद् बभूव॥८२॥
वधूं द्विजः प्राह तवैष वत्से! वह्निर्विवाहं प्रति कर्मसाक्षी।
शिवेन भर्त्रा सह धर्मचर्या कार्या त्वया मुक्तविचारयेति॥८३॥
आलोचनान्तं श्रवणे वितत्य पीतं गुरोस्तद्वचनं भवान्या।
निदाघकालोल्बणतापयेव माहेन्द्रमम्भः प्रथमं पृथिव्या॥८४॥
ध्रुवेण भर्त्रा ध्रुवदर्शनाय प्रयुज्यमाना प्रियदर्शनेन।
सा दृष्ट इत्याननमुन्नमय्य ह्रीसन्नकण्ठी कथमप्युवाच॥८५॥
इत्थं विधिज्ञेन पुरोहितेन प्रयुक्तपाणिग्रहणोपचारौ।
प्रणेमतुस्तौ पितरौ प्रजानां पद्मासनस्थाय पितामहाय॥८६॥
वधूर्विधात्रा प्रतिनन्द्यते स्म कल्याणि! वीरप्रसवा भवेति।
वाचस्पतिः सन्नपि सोऽष्टमूर्तौ त्वाशास्य चिन्तास्तिमितो बभूव॥८७॥
क्लृप्तोपचारां चतुरस्रवेदीं तावेत्य पश्चात् कनकासनस्थौ।
जायापती लौकिकमेषणीयमार्द्राक्षतारोपणमन्वभूताम्॥८८॥
पत्रान्तलग्नैर्जलबिन्दुजालैराकृष्टमुक्ताफलजालशोभम् ।
तयोरुपर्यायतनालदण्डमाधत्त लक्ष्मीः कमलातपत्रम्॥८९॥

फेरे हो गये, पुरोहित ने अग्नि में धान के लावा का हवन कराया॥८०॥ पुरोहित के कथनानुसार पार्वतीजी ने उस होम से उठे हुए सुगन्धित धुएँ को अपने हाथ की अंजली से लेकर कपोलों पर लगाया। उनके गालों के पास पहुँचकर वह धुआँ क्षणभर के लिए उनके कानों का कर्णफूल बन गया॥८१॥ उस हवन के गरम धुएँ से पार्वतीजी के नेत्र कुछ लाल हो गये, मुँह पर पसीने की बूँदे छहरा गयीं, आँखों का काला आँजन फैल गया और कानों पर धरे हुए यवांकुर धुँधले पड़ गये॥८२॥ तभी पुरोहित ने पार्वतीजी से कहा—वत्से! यह अग्नि तुम्हारे विवाह का साक्षी है। आज से तुम सब प्रकार के संशय छोड़कर शिवजी के साथ सदा धर्म के काम करते रहना॥८३॥ पार्वतीजी ने आँखों तक अपने कान फैलाकर पुरोहित की बात को वैसे ही आदर से पी लिया, जैसे गरमी से तपी हुई धरती वर्षा की पहली फुहार को पी लेती है॥८४॥ जब शंकरजी ने सदा स्थायी ध्रुव की ओर देखो कहा, तब पार्वतीजी ने ऊपर मुँह उठाकर बहुत लजाते हुए किसी प्रकार इतना भर कहा—'हाँ, देख लिया'॥८५॥ इस प्रकार कर्मकाण्ड के विज्ञ पुरोहित ने संसार के माता-पिता शिव-पार्वती का विवाह-कार्य पूरा कर दिया। तब कमल के आसन पर बैठे हुए पितामह ब्रह्माजी को वर-वधू दोनों ने प्रणाम किया॥८६॥ तब ब्रह्माजी ने बहू को आशीर्वाद देते हुए कहा—हे कल्याणी! तुम वीर पुत्र की माता बनो। किन्तु वाणी के स्वामी होते हुए भी ब्रह्माजी यह नहीं समझ सके कि सब इच्छाओं से ऊपर रहने वाले शंकरजी को हम कौन-सा आशीर्वाद दें॥८७॥ वहाँ से ले जाकर महादेव और पार्वतीजी दोनों सजे हुए चौक में सोने के आसन पर बैठाये गये। वहाँ लौकिक विधि के अनुसार उन पर लोगों ने गीले और पीले अक्षत फेंके॥८८॥ उस समय पत्तों के कोरों पर लटकती तथा मोती के समान चमकती हुई जल की बूँदों से भरे हुए

द्विधाप्रयुक्तेन च वाङ्मयेन सरस्वती तन्मिथुनं नुनाव।
संस्कारपूतेन वरं वरेण्यं वधूं सुखग्राह्यनिबन्धनेन॥ ९०॥
तौ सन्धिषु व्यञ्जितवृत्तिभेदं रसान्तरेषु प्रतिबद्धरागम्।
अपश्यतामप्सरसां मुहूर्तं प्रयोगमाद्यं ललिताङ्गहारम्॥ ९१॥
देवास्तदन्ते हरमूढभार्यं किरीटबद्धाञ्जलयो निपत्य।
शापावसाने प्रतिपन्नमूर्तेर्ययाचिरे पञ्चशरस्य सेवाम्॥ ९२॥
तस्यानुमेने भगवान् विमन्युर्व्यापारमात्मन्यपि सायकानाम्।
कालप्रयुक्ता खलु कार्यविद्भिर्विज्ञापना भर्तृषु सिद्धिमेति॥ ९३॥
अथ विबुधगणांस्तानिन्दुमौलिर्विसृज्य क्षितिधरपतिकन्यामाददानः करेण।
कनककलशयुक्तं भक्तिशोभासनाथं क्षितिविरचितशय्यं कौतुकागारमागात्॥ ९४॥
नवपरिणयलज्जाभूषणां तत्र गौरीं वदनमपहरन्तीं तत्कृताक्षेपमीशः।
अपि शयनसखीभ्यो दत्तवाचं कथञ्चित् प्रमथमुखविकारैर्हसयामास गूढम्॥ ९५॥

इति महाकविकालिदासकृतौ कुमारसम्भवे महाकाव्ये
उमापरिणयो नाम सप्तमः सर्गः॥ ७॥

लम्बी डंठल वाले कमल का छत्र उनके ऊपर लगाकर स्वयं लक्ष्मीजी खड़ी हुईं॥ ८९॥ स्वयं देवी सरस्वतीजी संस्कृत और प्राकृत भाषाओं में शिव-पार्वतीजी की स्तुति करने लगीं। संस्कृत में प्रशंसनीय वर की और सरलता से समझने योग्य प्राकृत भाषा में उन्होंने वधू की स्तुति आरम्भ कर दी॥ ९०॥ तदनन्तर पार्वती और शंकरजी ने थोड़ी देर शृङ्गार आदि रसों से युक्त सुन्दर हाव-भाव से भरा और पाँचों सन्धियों में अलग-अलग भाषा की शैलियों से निबद्ध वह नाटक देखा, जिसे अप्सराओं ने खेला था॥ ९१॥ नाटक समाप्त हो जाने पर इन्द्र आदि देवता विवाहित शंकरजी के पास गये और अपने किरीट युक्त सिर पर हाथ जोड़कर कहा—'आपका विवाह हो जाने से शाप भी समाप्त हो गया। अब आप आज्ञा दें तो कामदेव फिर जी उठे और आपकी सेवा करे'॥ ९२॥ तब प्रसन्न मन से शंकरजी ने कहा—'अच्छा, अब कामदेव से कह दो कि वह जी भरकर हम पर बाण चलाये'। ठीक ही कहा है कि जो चतुर सेवक यह जानते हैं कि स्वामी से कौन बात कब कहनी चाहिए, वे स्वामी से जो प्रार्थना करते हैं, वह अवश्य पूरी होती है॥ ९३॥ तब शंकरजी ने इन्द्र आदि देवताओं को विदा किया और पार्वतीजी का हाथ पकड़कर उस शयन-गृह में पहुँचे जहाँ सेज बिछी थी, फूलों की मालाएँ सजी थीं और स्वर्णकलश धरा था॥ ९४॥ नवविवाह होने से लज्जित, महादेवजी के हाथों आँचल खींचने पर मुँह छिपाने वाली और सखियों की ठठोलियों का उचित उत्तर देने वाली पार्वतीजी के आगे जब प्रमथ आदि गण अनेक प्रकार से मुँह बनाने लगे तो पार्वतीजी मन्द-मन्द मुसकाने लगीं॥ ९५॥

इस प्रकार महाकविकालिदासरचित कुमारसम्भवमहाकाव्य में पार्वतीजी के
विवाह का वर्णन नामक सातवाँ सर्ग समाप्त॥ ७॥

अष्टमः सर्गः

पाणिपीडनविधेरनन्तरं शैलराजदुहितुर्हरं प्रति।
भावसाध्वसपरिग्रहादभूत् कामदोहदमनोहरं वपुः॥ १॥
व्याहृता प्रतिवचो न सन्दधे गन्तुमैच्छदवलम्बितांशुका।
सेवते स्म शयनं पराङ्मुखी सा तथापि रतये पिनाकिनः॥ २॥
कैतवेन शयिते कुतूहलात् पार्वती प्रतिमुखं निपातितम्।
चक्षुरुन्मिषति सस्मितं प्रिये! विद्युदाहतमिव न्यमीलयत्॥ ३॥
नाभिदेशनिहितः सकम्पया शङ्करस्य रुरुधे तया करः।
तद्दुकूलमथ चाभवत् स्वयं दूरमुच्छ्वसितनीविबन्धनम्॥ ४॥
एवमालि निगृहीतसाध्वसं शङ्करो रहसि सेव्यतामिति।
सा सखीभिरुपदिष्टमाकुला नास्मरत् प्रमुखवर्तिनि प्रिये॥ ५॥
अप्यवस्तुनि कथाप्रवृत्तये प्रश्रतत्परमनङ्गशासनम्।
वीक्षितेन परिवीक्ष्य पार्वती मूर्धकम्पमयमुत्तरं ददौ॥ ६॥
शूलिनः करतलद्वयेन सा सन्निरुध्य नयने हृतांशुका।
तस्य पश्यति ललाटलोचने मोघयत्नविधुरा रहस्यभूत्॥ ७॥
चुम्बनेष्वधरदानवर्जितं खिन्नहस्तसदयोपगूहनम्।
क्लिष्टमन्मथमपि प्रियं प्रभोर्दुर्लभप्रतिकृतं वधूरतम्॥ ८॥

विवाह के बाद पार्वतीजी शिवजी का सान्निध्य चाहती हुई भी कुछ झिझकती थीं। उनके इस प्रेम तथा झिझक से भरे सुन्दर शरीर को देखकर महादेवजी उन पर मुग्ध होते जा रहे थे। वे इतनी लजाती थीं कि शिवजी कुछ पूछते तो बोलती नहीं थीं, यदि वे आँचल थाम लेते तो उठकर भागने लगती थीं और साथ सोते समय दूसरी ओर मुँह फेरकर सोती थीं। परन्तु शिवजी इन बातों से भी प्रसन्न होते थे॥ २॥ शिवजी जब सोने का बहाना कर के लेट जाते थे, तब पार्वतीजी उनकी ओर घूमकर उन्हें एकटक देखा करतीं। तभी मुस्कुराकर शिवजी आँखे खोल देते तो ये चटपट इस तरह आँखें मींच लेतीं, जैसे वे बिजली की चकाचौंध से मिंच गयी हों॥ ३॥ शंकरजी जब अपना हाथ उनकी नाभि की ओर बढाते तो काँपती हुई पार्वतीजी उनका हाथ थाम लेतीं, परन्तु न जाने कैसे उनकी साडी की गाँठ ढीली पड़कर स्वतः खुल जाती थी॥ ४॥ पार्वतीजी की सखियाँ सिखाती हुई कहतीं कि सखी! तुम डरना मत और जैसे-जैसे हम बतलाती हैं, वैसे-वैसे अकेले में शंकरजी के पास रहना। किन्तु शिवजी के सामने पहुँचते ही वे इतनी घबरा जाती थीं कि सखियों की सब सिखावन भूल जाती थी॥ ५॥ जब कभी शिवजी वासनाभरी ऊटपटाँग बातें छेडकर उनसे उत्तर माँगते तो वे अपने मुँह से तो कुछ न बोलतीं, परन्तु अपनी आँखें ऊपर उठा और सिर हिलाकर यह जता देतीं कि मैं आपके मन की सब बातें जानती हूँ॥ ६॥ अकेले में शिवजी जब कभी उनके कपड़े खींचकर उघाड देते तो वे अपनी दोनों हथेलियों से शिवजी के दोनों नेत्र बन्द कर लेती थीं, जिससे वे देख न सकें। परन्तु शिवजी तुरन्त अपना तीसरा नेत्र खोल लेते तो हार मानकर बैठ जाती थीं॥ ७॥ महादेवजी जब उन्हें चूमना चाहते थे तो वे अपना ओठ ही नहीं बढाती थीं और जब वे उन्हें कसकर छाती से लगाना चाहते तो ये अपने

यन्मुखग्रहणमक्षताधरं दानमव्रणपदं नखस्य यत्।
यद्व्रतं च सदयं प्रियस्य तत्पार्वती विषहते स्म नेतरत्॥ ९ ॥
रात्रिवृत्तमनुयोक्तुमुद्यतं सा प्रभातसमये सखीजनम्।
नाकरोदपकुतूहलं ह्रिया शंसितुं तु हृदयेन तत्वरे॥ १०॥
दर्पणे च परिभोगदर्शिनी पृष्ठतः प्रणयिनो निषेदुषः।
प्रेक्ष्य बिम्बमुपबिम्बमात्मनः कानि कानि न चकार लज्जया॥ ११॥
नीलकण्ठपरिभुक्तयौवनां तां विलोक्य जननी समाश्वसत्।
भर्तृवल्लभतया हि मानसीं मातुरस्यति शुचं वधूजनः॥ १२॥
वासराणि कतिचित्कथञ्चन स्थाणुना रतमकारि चानया।
ज्ञातमन्मथरसा शनैः शनैः सा मुमोच रतिदुःखशीलताम्॥ १३॥
सस्वजे प्रियमुरोनिपीडनं प्रार्थितं मुखमनेन नाहरत्।
मेखलाप्रणयलोलतां गतं हस्तमस्य शिथिलं रुरोध सा॥ १४॥
भावसूचितमदृष्टविप्रियं दार्ढ्यभाक्क्षणवियोगकातरम्।
कैश्चिदेव दिवसैस्तथा तयोः प्रेम गूढमितरेतराश्रयम्॥ १५॥
तं यथात्मसदृशं वरं वधूरन्वरज्यत वरस्तथैव ताम्।
सागरादनपगा हि जाह्नवी सोऽपि तन्मुखरसैकवृत्तिभाक्॥ १६॥

हाथ तक नहीं उठाती थीं। इन बाधाओं और अधूरे रस के साथ भी शिवजी ने नववधू के साथ जो संभोग किया, उसमें भी उन्हें आनन्द मिला॥८॥ धीरे-धीरे पार्वतीजी की झिझक मिटने लगी। इसलिए जब कभी महादेवजी उन्हें चूमते समय अधर नहीं काटते थे, नखक्षत करते हुए घाव नहीं करते थे और संभोग बहुत धीरे-धीरे करते थे तो वे आनाकानी नहीं करती थीं। परन्तु इससे आगे बढने पर वे घबरा उठती थीं॥९॥ सवेरे जब सखियाँ उनसे रात की बातें पूछने लगतीं तो वे चाहती हुई भी लज्जा के मारे नहीं बता पाती थीं॥१०॥ जब वे हाथ में दर्पण लेकर उसमें अपने शरीर पर बने सम्भोग के चिह्न देखतीं और उस समय कहीं पीछे से चुपचाप शिवजी पहुँच जाते तो उनकी परछाई दर्पण में पडते ही वे लजा जाती थीं और झेंप के मारे न जाने क्या-क्या करने लगती थीं॥११॥ यह देखकर मेना को बड़ा सन्तोष हुआ कि महादेवजी मेरी कन्या के यौवन का उपभोग कर रहे हैं। क्योंकि कोई भी माता जब यह देख लेती है कि मेरा दामाद कन्या को प्यार करता है तो उसको मानसिक शान्ति मिलती है॥१२॥ कुछ दिनों तक तो महादेवजी ज्यों-त्यों करके पार्वतीजी के साथ संभोग करते रहे। किन्तु जब धीरे-धीरे पार्वतीजी को भी संभोग का रस मिलने लगा, तब उनकी भी झिझक धीरे-धीरे निवृत्त हो गयी॥१३॥ अब महादेवजी जब उन्हें कसकर छाती से लगाते तो वे भी उन्हें दोनों हाथों से कस लेतीं, जब चूमने को मुँह बढाते तो वे अपना मुँह हटाती नहीं थीं और जब शंकरजी उनकी तागड़ी पकड़कर खींचते तो पार्वतीजी आधे मन से ही उनका हाथ रोकती थीं॥१४॥ थोड़े ही दिनों में दोनों की चाल-ढाल से यह निश्चित हो गया कि अब वे परस्पर घुल-मिल गये हैं। क्योंकि अब दोनो एक-दूसरे की बड़ाई करते थे और यदि क्षणभर के लिए भी एक-दूसरे से अलग होते तो तड़पने लगते थे॥१५॥ जैसे गंगाजी समुद्र के पास जा और उसमें मिलकर वहाँ से लौटने का नाम नहीं लेतीं और समुद्र भी उन्हीं के मुख का जल ले-लेकर बराबर उनसे प्रम करता रहता है, वैसे ही पार्वतीजी जैसे-जैसे अपने प्रियतम का मन बहलातीं, वैसे-वैसे महादेवजी भी उनके मन की ही बातें करते थे॥१६॥ शंकरजी से पार्वतीजी ने अकेले में जो कामकला सीखी थी, उस कला के अनुरूप उन्होंने महादेवजी

शिष्यतां निधुवनोपदेशिनः शङ्करस्य रहसि प्रपन्नया।
शिक्षितं युवतिनैपुणं तया यत्तदेव गुरुदक्षिणीकृतम्॥ १७॥
दष्टमुक्तमधरोष्ठमम्बिका वेदनाविधुरहस्तपल्लवा।
शीतलेन निरवापयत् क्षणं मौलिचन्द्रशकलेन शूलिनः॥ १८॥
चुम्बनादलकचूर्णदूषितं शङ्करोऽपि नयनं ललाटजम्।
उच्छ्वसत्कमलगन्धये ददौ पार्वतीवदनगन्धवाहिने॥ १९॥
एवमिन्द्रियसुखस्य वर्त्मनः सेवनादनुगृहीतमन्मथः।
शैलराजभवने सहोमया मासमात्रमवसद्वृषध्वजः॥ २०॥
सोऽनुमान्य हिमवन्तमात्मभूरात्मजाविरहदुःखखेदितम्।
तत्र तत्र विजहार सम्पतन्नप्रमेयगतिना ककुद्मता॥ २१॥
मेरुमेत्य मरुदाशुगोक्षकः पार्वतीस्तनपुरस्कृतान्कृती।
हेमपल्लवविभङ्गसंस्तरानन्वभूत् सुरतमर्दनक्षमान्॥ २२॥
पद्मनाभचरणाङ्कितांश्मसु प्राप्तवत्स्वमृतविप्रुषो नवाः।
मन्दरस्य कटकेषु चावसत् पार्वतीवदनपद्मषट्पदः॥ २३॥
रावणध्वनितभीतया तया कण्ठसक्तदृढबाहुबन्धनः।
एकपिङ्गलगिरौ जगद्गुरुर्निर्विवेश विशदाः शशिप्रभाः॥ २४॥
तस्य जातु मलयस्थलीरते धूतचन्दनलतः प्रियाक्लमम्।
आचचाम सलवङ्गकेसरश्चाटुकार इव दक्षिणानिलः॥ २५॥

के साथ नववधुओं के चटक-मटक से भरा जो संभोग किया, वही मानो कला सीखने की गुरुदक्षिणा थी॥ १७॥ महादेवजी जब कभी पार्वतीजी का ओठ काट लेते तो वे पीड़ा से अपने हाथ झटकने लगती थीं। फिर तत्काल महादेवजी के सिर पर बैठे चन्द्रमा पर ओठ रख देतीं तो उन्हें ऐसी ठंडक मिलती थी कि उनकी सब पीड़ा दूर हो जाती थी॥ १८॥ चुम्बन लेते समय जब पार्वतीजी की केशों का चूर्ण शिवजी के तीसरे नेत्र पर पड़ता तो वह नेत्र दुःखने लगता था। तब खिले हुए कमल की गन्धयुक्त पार्वतीजी के मुँह की फूँक पाने के लिए वे अपना नेत्र उठाकर उनके मुँह तक पहुँचा दिया करते थे॥ १९॥ इस प्रकार इन्द्रियसुख भोगकर महादेवजी ने कामदेव पर बड़ी कृपा की और उमा के साथ हिमालय के घर में रहते हुए उन्होंने एक महीना बिताया॥ २०॥ इसके बाद शंकरजी ने हिमालय से जाने की आज्ञा माँगी। कन्या को अपने से अलग करने में हिमालय को बहुत दुःख हुआ, किन्तु उन्होंने विदा दे दी। अब वे बेरोक-टोक चलने वाले नन्दी पर चढकर जहाँ-तहाँ घूमते हुए विहार करने लगे॥ २१॥ वायु-सदृश द्रुतगामी बैल पर चढ तथा आगे पार्वतीजी को बैठाकर उनके स्तन पकड़े हुए वे सुमेरु पर्वत पर पहुँचे और वहाँ सुनहरे पत्तों की शय्या पर उन्होंने एक रात सम्भोग किया॥ २२॥ पार्वतीजी के मुखकमल के मधुकर महादेवजी वहाँ से चलकर मन्दराचल की उस ढाल पर पहुँचे, जिसकी चट्टानों पर विष्णु के चरणों की छाप और समुद्रमन्थन के समय उड़े अमृत की बूँदों के नये-नये छींटे पडे हुए थे॥ २३॥ वहाँ से चलकर वे कुबेर की राजधानी कैलास पर पहुँचे, जहाँ रावण का गर्जन सुनकर पार्वतीजी ऐसी डरीं कि वे अपनी कोमल भुजाएँ शिवजी के गले में डालकर उनसे लिपट गयीं। वहाँ रहकर शंकरजी ने उजली चाँदनी का भरपूर आनन्द लिया॥ २४॥ वहाँ से चलकर वे मलय पर्वत पर जा पहुँचे, जहाँ चन्दन की कोमल शाखाओं को हिलाने और लौंग के फूलों की केसर उड़ाने वाला दक्षिणी पवन सम्भोग से थकी पार्वतीजी की थकावट वैसे ही दूर कर रहा था, जैसे कोई मीठी-मीठी बातें करके किसी थके

हेमतामरसताडितप्रिया तत्कराम्बुविनिमीलितेक्षणा।
सा व्यगाहत तरङ्गिणीमुमा मीनपङ्क्तिपुनरुक्तमेखला॥ २६॥
तां पुलोमतनयालकोचितैः पारिजातकुसुमैः प्रसाधयन्।
नन्दने चिरमयुग्मलोचनः सस्पृहं सुरवधूभिरीक्षितः॥ २७॥
इत्यभौममनुभूय शङ्करः पार्थिवं च दयितासखः सुखम्।
लोहितायति कदाचिदातपे गन्धमादनवनं व्यगाहत॥ २८॥
तत्र काञ्चनशिलातलाश्रयो नेत्रगम्यमवलोक्य भास्करम्।
दक्षिणेतरभुजव्यपाश्रयां व्याजहार सहधर्मचारिणीम्॥ २९॥
पद्मकान्तिमरुणत्रिभागयोः सङ्क्रमय्य तव नेत्रयोरिव।
सङ्क्षये जगदिव प्रजेश्वरः संहरत्यहरसावहर्पतिः॥ ३०॥
सीकरव्यतिकरं मरीचिभिर्दूरयत्यवनते विवस्वति।
इन्द्रचापपरिवेषशून्यतां निर्झरास्तव पितुर्व्रजन्त्यमी॥ ३१॥
दष्टतामरसकेसरस्रजोः क्रन्दतोर्विपरिवृत्तकण्ठयोः।
निघ्नयोः सरसि चक्रवाकयोरल्पमन्तरमनल्पतां गतम्॥ ३२॥
स्थानमाह्निकमपास्य दन्तिनः सल्लकीविटपभङ्गवासितम्।
आविभातचरणाय गृह्णते वारि वारिरुहबद्धषट्पदम्॥ ३३॥
पश्य पश्चिमदिगन्तलम्बिना निर्मितं मितकथे! विवस्वता।
लब्धया प्रतिमया सरोऽम्भसां तापनीयमिव सेतुबन्धनम्॥ ३४॥

हुए पथिक का मन बहलाता हो॥ २५॥ वहाँ पार्वतीजी कभी उस आकाशगंगा में जल-विहार करने लगतीं, जहाँ उनकी कमर के चारों ओर खेलने वाली मछलियाँ ऐसी लगती थीं कि जैसे उन्होंने दूसरी करधनी पहन ली हो। वहाँ वे सोने के कमल तोड-तोड़कर उनसे महादेवजी को मारती थीं और महादेवजी भी इस तरह पानी उछालते थे कि उमा की आँखें बन्द हो जाती थीं॥ २६॥ वहाँ से नन्दन वन में जाकर महादेवजी पारिजात के उन फूलों से बहुत दिनों तक पार्वतीजी का शृङ्गार करते रहे, जिनसे इन्द्राणी के केश सजाये जाते थे। वहाँ की अप्सराएँ महादेवजी की इस कला को बडे चाव से देखती थीं॥ २७॥ इस प्रकार अपनी प्राणप्यारी के साथ सांसारिक और स्वर्गीय दोनों सुख भोगते हुए सन्ध्या के समय जब सूर्य लाल-लाल दीख रहे थे उस समय एक दिन वे गन्धमादन पर्वत पर पहुँचे॥ २८॥ वे सोने की एक चट्टान पर बैठ गये। उस समय सूर्य का तेज़ इतना क्षीण हो गया था कि उसकी ओर आसानी से देखा जा सकता था। उसे देखकर बाँयीं भुजा के सहारे बैठी अपनी धर्मपत्नी उमा से महादेवजी ने कहा—॥ २९॥ देखो प्यारी! इस समय सूर्य ऐसा दीख रहा है, जैसे यह तुम्हारी तिहाई लाल आँखों के समान सुन्दर कमलों की शोभा को लजाकर उसी प्रकार दिन को समेट रहा है, जैसे प्रलय के समय ब्रह्माजी सारे संसार को समेट लिया करते हैं॥ ३०॥ जैसे-जैसे दिन ढलता जाता है, वैसे-वैसे सूर्य की किरणें हिमालय के झरनों की फुहारों से दूर होती जाती हैं और उनके हटते ही उन फुहारों में बने हुए इन्द्रधनुष भी अदृश्य होते जा रहे हैं॥ ३१॥ कटे हुए कमलों की केसर को चोंच में दबाकर ये चकवी-चकवे एक-दूसरे के कंठ से अलग होकर चीखने लगे हैं और तालाब का यह छोटा-सा पाट भी इनके लिए बहुत बड़ा बन गया है॥ ३२॥ सलई के वृक्षों के टूटने से जहाँ गन्ध फैल गयी है और जहाँ हाथी दिन में रहा करते थे, उन स्थानों को अगले दिन तक के लिए छोडकर ये हाथी उस ताल की ओर जा रहे हैं, जहाँ कमलों में भौंरें बन्द हैं॥ ३३॥ हे मधुरभाषिणि! पश्चिम दिशा में लटके

उत्तरन्ति विनिकीर्य पल्वलं गाढपङ्कमतिवाहितातपाः।
दंष्ट्रिणो वनवराहयूथपा दष्टभङ्गुरबिसाङ्कुरा इव॥ ३५॥
एष वृक्षशिखरे कृतास्पदो जातरूपरसगौरमण्डलम्।
हीयमानमहरत्ययातपं पीवरोरु! पिबतीव बर्हिणः॥ ३६॥
पूर्वभागतिमिरप्रवृत्तिभिर्व्यक्तपङ्कमिव जातमेकतः।
खं हृतातपजलं विवस्वता भाति किञ्चिदिव शेषवत्सरः॥ ३७॥
आविशद्भिरुटजाङ्गणं मृगैर्मूलसेकसरसैश्च वृक्षकैः।
आश्रमाः प्रविशदग्र्यधेनवो बिभ्रति श्रियमुदीरिताग्नयः॥ ३८॥
बद्धकोशमपि तिष्ठति क्षणं सावशेषविवरं कुशेशयम्।
षट्पदाय वसतिं ग्रहीष्यते प्रीतिपूर्वमिव दातुमन्तरम्॥ ३९॥
दूरमग्रपरिमेयरश्मिना वारुणी दिगरुणेन भानुना।
भाति केसरवतेव मण्डिता बन्धुजीवतिलकेन कन्यका॥ ४०॥
सामभिः सहचराः सहस्रशः स्यन्दनाश्वहृदयङ्गमस्वनैः।
भानुमग्निपरिकीर्णतेजसं संस्तुवन्ति किरणोष्मपायिनः॥ ४१॥
सोऽयमानतशिरोधरैर्हयैः कर्णचामरविघट्टितेक्षणैः।
अस्तमेति युगभुग्नकेसरैः सन्निधाय दिवसं महोदधौ॥ ४२॥
खं प्रसुप्तमिव संस्थिते रवौ तेजसो महत ईदृशी गतिः।
तत्प्रकाशयति यावदुद्गतं मीलनाय खलु तावतश्च्युतम्॥ ४३॥

तमीक्षमाणा क्षणमीक्षणानां सहस्रमासुं विनिमेषमैच्छत्।
सा नन्दनालोकनमङ्गलेषु क्षणं क्षणं तृप्यति कस्य चेतः॥ २०॥
विनम्रदेवासुरपृष्ठगाभ्यामादाय तं पाणिसरोरुहाभ्याम्।
नवोदयं पार्वणचन्द्रचारुं गौरी स्वमुत्सङ्गतलं निनाय॥ २१॥
स्वमङ्कमारोप्य सुधानिधानमिवात्मनो नन्दनमिन्दुवक्त्रा।
तमेकमेषा जगदेकवीरं बभूव पूज्या धुरि पुत्रिणीनाम्॥ २२॥
निसर्गवात्सल्यरसौघसिक्ता सान्द्रप्रमोदामृतपूरपूर्णा।
तमेकपुत्रं जगदेकमाताऽभ्युत्सङ्गितं प्रस्रविणी बभूव॥ २३॥
अशेषलोकत्रयमातुरस्याः षाण्मातुरः स्तन्यसुधामधासीत्।
सुरस्रवन्त्याः किल कृत्तिकाभिर्मुहुर्मुहुः सस्पृहमीक्ष्यमाणः॥ २४॥
सुखाश्रुपूर्णेन मृगाङ्कमौलेः कलत्रमेकेन मुखाम्बुजेन।
तस्यैकनालोद्गतपञ्चपद्मलक्ष्मीं क्रमात् षड्वदनीं चुचुम्ब॥ २५॥
हैमी फलं हेमगिरेर्लतेव विकस्वरं नाकनदीव पद्मम्।
पूर्वेव दिङ्नूतनमिन्दुमाभातं पार्वती नन्दनमादधाना॥ २६॥
प्रीतात्मना सा प्रयतेन दत्तहस्तावलम्बा शशिशेखरेण।
कुमारमुत्सङ्गतले दधाना विमानमभ्रंलिहमारुरोह॥ २७॥

पड़ रहा था, आँसू बहे जा रहे थे और वात्सल्यभाव छलक रहा था॥ १९॥ बच्चे की ओर एकटक देखती हुई पार्वतीजी सोचने लगीं कि यदि मुझे इस समय एक सहस्र अनिमेष नेत्र मिल जाते तो बड़ा अच्छा होता। पुत्र का दर्शन करके भला किसका जी भरता है?॥ २०॥ प्रणाम के समय झुके हुए देवताओं और दैत्यों की पीठ पर अपने जो हाथ फेरकर वे आशीष देती थीं, उन्हीं हाथों से पार्वतीजी ने पूर्णिमा के चन्द्रमा जैसे सुन्दर पुत्र को उठाकर गोद में ले लिया॥ २१॥ चन्द्रमा-सदृश मुखवाली पार्वतीजी ने संसार में सर्वश्रेष्ठ अपने उस वीर पुत्र को गोद में इस प्रकार उठा लिया, जैसे उन्होंने अमृत का कलश पा लिया हो। इससे वे पुत्रवतियों में सबसे श्रेष्ठ और पूजनीय हो गयीं॥ २२॥ सारे संसार की माता पार्वतीजी ने जब उस अनोखे पुत्र को गोद में लिया तो उनके रोम-रोम से वात्सल्य रस की धारा उमड़ पड़ी, हर्ष से अमृत की बाढ आ गयी और स्तनों से दूध की धारा बह चली॥ २३॥ कार्तिकेय जब तीनों लोकों की माता पार्वतीजी के स्तन पीने लगे, तब गंगाजी और कृत्तिकाएँ डाह से उनकी ओर बार-बार निहारने लगीं॥ २४॥ हर्ष के आँसू बहाती हुई शंकरजी की प्रिया पार्वतीजी ने कमल के समान अपने एक मुख से उस पुत्र के छहों मुखों को चूमा। जो कमल की एक डंठल से निकले पाँच कमल जैसे थे, उन पाँचों के बीच में उन कमलों की ही शोभा छठा कमल बनकर निकल आयी थी॥ २५॥ गोद में एक सुन्दर पुत्र लिये हुए पार्वतीजी ऐसी सुन्दर लग रही थीं, जैसे सोने के सुमेरु पर्वत पर उत्पन्न होने वाली सुनहरी लता में फल आ गया हो अथवा आकाशगंगा में कमल खिल उठा हो या कि पूर्व दिशा में चन्द्रमा निकल आया हो॥ २६॥ तभी पुत्र को गोद में लिये हुए आनन्दित मन से पार्वतीजी परम प्रसन्न शंकरजी के हाथ का सहारा लेकर उस गगनचुम्बी विमान पर चढ़ गयीं॥ २७॥

महेश्वरोऽपि प्रमदप्ररूढरोमोद्गमो भूधरनन्दनायाः।
अङ्कादुपादत्त तदङ्कतः सा तस्यास्तु सोऽप्यात्मजवत्सलत्वात्॥ २८॥
दधानया नेत्रसुधैकसत्रं पुत्रं पवित्रं सुतया तयाऽद्रेः।
संश्लिष्यमाणः शशिखण्डधारी विमानवेगेन गृहाञ्जगाम॥ २९॥
अधिष्ठितः स्फाटिकशैलशृङ्गे तुङ्गे निजं धाम निकामरम्यम्।
महोत्सवाय प्रमथप्रमुख्यान् पृथून् गणाञ्शम्भुरथादिदेश॥ ३०॥
पृथुप्रमोदः प्रगुणो गणानां गणः समग्रो वृषवाहनस्य।
गिरीन्द्रपुत्र्यास्तनयस्य जन्मन्यथोत्सवं संववृते विधातुम्॥ ३१॥
स्फुरन्मरीचिच्छुरिताम्बराणि सन्तानशाखिप्रसवान्वितानि।
उच्चिक्षिपुः काञ्चनतोरणानि गणा वराणि स्फटिकालयेषु॥ ३२॥
दिक्षु प्रसर्पंस्तदधीश्वराणामथामराणामिव मध्यलोके।
महोत्सवं शंसितुमाहतोऽन्यैर्दध्वान धीरः पटहः पटीयान्॥ ३३॥
महोत्सवे तत्र समागतानां गन्धर्वविद्याधरसुन्दरीणाम्।
सम्भावितानां गिरिराजपुत्र्या गृहेऽभवन्मङ्गलगीतकानि॥ ३४॥
सुमङ्गलोपायनपात्रहस्तास्तं मातरो मातृवदभ्युपेताः।
विधाय दूर्वाक्षतकानि मूर्ध्नि निन्युः स्वमङ्कं गिरिजातनूजम्॥ ३५॥
ध्वनत्सु तूर्येषु सुमन्द्रमङ्क्यालिङ्ग्योर्ध्वकेष्वप्सरसो रसेन।
सुसन्धिबन्धं ननृतुः सुवृत्तगीतानुगं भावरसानुविद्धम्॥ ३६॥
वाता ववुः सौख्यकराः प्रसेदुराशा विधूमो हुतभुद्विदीपे।
जलान्यभूवन् विमलानि तत्रोत्सवेऽन्तरिक्षं प्रससाद सद्यः॥ ३७॥

वे दोनों पुत्र-प्रेम में इतने मगन हो गये थे कि कभी पार्वतीजी की गोद से शंकरजी उस पुत्र को ले लेते थे और कभी उनकी गोद से उसे पार्वतीजी ले लेती थीं। इस प्रकार पुत्र-प्रेम में विभोर होकर दोनों उसे खेला रहे थे॥ २८॥ आँखों को अमृत-सदृश सुखदायी उस पवित्र पुत्र को गोद में लिये तथा अपनी छाती से लिपटी हुई पार्वतीजी को साथ लेकर शंकरजी वेग से चलने वाले विमान पर चढकर कैलास को लौट गये॥ २९॥ उस स्फटिकमय कैलास के ऊँचे शिखर पर बने अपने सुन्दर भवन में बैठकर शंकरजी ने मुख्य-मुख्य प्रमथ आदि गणों को आज्ञा दी कि पुत्र उत्पन्न होने के उपलक्ष्य में तुम लोग उत्सव मनाओ॥ ३०॥ तब बड़े आनन्द और चाव से सभी गुणवान् गण पार्वतीजी और शंकरजी के पुत्रजन्म के उपलक्ष्य में महोत्सव मनाने लगे॥ ३१॥ कुछ गण स्फटिकमणि में चमकती हुई किरणों के पड़ने से रंग-बिरंगे दीखने वाले कपड़ों, कल्पवृक्ष के फूलों और पत्तों के बने सुनहले बन्दनवारों से अपने स्फटिक-निर्मित भवन सजाने लगे॥ ३२॥ कुछ गणों के नगाड़ा बजाने से उसकी गम्भीर ध्वनि जब दसों दिशाओं में फैली तो धरती से उठी हुई उसकी गमक जैसे यह बता रही थी कि दिक्पालों और देवताओं के लोक के समान ही वहाँ भी पुत्रोत्सव मनाया जा रहा है॥ ३३॥ उस महोत्सव में गन्धर्वों और विद्याधरों की सुन्दरियों ने आकर बधैया गायी और पार्वतीजी ने उनकी बड़ी आवभगत की॥ ३४॥ ब्राह्मी आदि माताएँ भी हाथ में बधावे के मङ्गलोपहार ले-लेकर बालक के पास आयीं और उसके सिर पर दूब तथा अक्षत छिड़क-छिड़ककर सबने उसे अपनी-अपनी गोद में लिया॥ ३५॥ उस समय अङ्क्य, आलिङ्ग्य और ऊर्ध्वक नाम की अनेक तुरहियाँ मीठे स्वर में बज रही थीं और भाव तथा रसभरे अच्छे छन्दों में बँधे गाने गाती हुई अप्सराएँ बड़े हाव-भाव से नाच रही थीं॥ ३६॥ उस समय

गम्भीरशङ्खध्वनिमिश्रमुच्चैर्गृहोद्भवा दुन्दुभयः प्रणेदुः।
दिवौकसां व्योम्नि विमानसङ्घा विमुच्य पुष्पप्रचयान् प्रससुः॥ ३८॥
इत्थं महेशाद्रिसुतासुतस्य जन्मोत्सवे सम्मदयाञ्चकार।
चराचरं विश्वमशेषमेतत् परं चकम्पे किल तारकश्रीः॥ ३९॥
ततः कुमारः समुदां निदानैः स बाललीलाचरितैर्विचित्रैः।
गिरीशगौर्योर्हृदयं जहार मुदे न हृद्या किमु बालकेलिः॥ ४०॥
महेश्वरः शैलसुता च हर्षात् सतर्षमेकेन मुखेन गाढम्।
अजातदन्तानि मुखानि सूनोर्मनोहराणि क्रमतश्चुचुम्ब॥ ४१॥
क्वचित्स्खलद्भिः क्वचिदस्खलद्भिः क्वचित्प्रकम्पैः क्वचिदप्रकम्पैः।
बालः स लीलाचलनप्रयोगैस्तयोर्मुदं वर्धयति स्म पित्रोः॥ ४२॥
अहेतुहासच्छुरिताननेन्दुर्गृहाङ्गणक्रीडनधूलिधूम्रः।
मुहुर्वदन् किञ्चिदलक्षितार्थं मुदं तयोरङ्कगतस्ततान॥ ४३॥
गृह्णन्विषाणे हरवाहनस्य स्पृशन्नुमाकेसरिणं सलीलम्।
स भृङ्गिणः सूक्ष्मतरं शिखाग्रं कर्षन्बभूव प्रमदाय पित्रोः॥ ४४॥
एको नव द्वौ दश पञ्च सप्तेत्यजीगणन्नात्ममुखं प्रसार्य।
महेशकण्ठोरगदन्तपङ्क्तिं तदङ्कगः शैशवमौग्ध्यमैशिः॥ ४५॥
कपर्दिकण्ठान्तकपालदाम्नोऽङ्गुलिं प्रवेश्याननकोटरेषु।
दन्तानुपात्तुं रभसीबभूव मुक्ताफलभ्रान्तिकरः कुमारः॥ ४६॥

सुखदायक पवन बहने लगा, दिशाएँ खिल उठीं, धुआँ मिट जाने से आग चमक उठी और जल निर्मल हो गया। यहाँ तक कि उस उत्सव में आकाश भी तत्काल स्वच्छ हो गया॥ ३७॥ शंख की गम्भीर ध्वनि के साथ घर-घर के छोटे नगाडे बजने लगे। देवता भी आकाश में विमानों से आ-आकर फूल बरसाते जाते थे॥ ३८॥ इस प्रकार शंकर और पार्वतीजी के पुत्र के जन्मोत्सव से संसार के सभी चर और अचर प्राणी तो हर्ष से गद्गद हो गये, परन्तु तारकासुर की राजलक्ष्मी काँप उठी॥ ३९॥ वह बालक भी धीरे-धीरे अपनी मनोहर और अनोखी बाल-लीलाओं से शंकर और पार्वतीजी को आनन्द देने लगा॥ ४०॥ वे हर्ष से मतवाले होकर अपने पुत्र के दन्तहीन और मनोहर मुखों को बार-बार बड़े भाव से चूमा करते थे॥ ४१॥ कहीं लड़खड़ाता, कहीं सीधा चलता, कहीं काँपता और कहीं तना हुआ-सा वह बालक अपनी खेलवाड़-भरी चालों से उन दोनों का मन लुभाने लगा॥ ४२॥ अपने माता-पिता की गोद में बैठा वह बालक अनेक तरह से उनका जी बहलाया करता था। कभी उस बच्चे का मुखचन्द्र बिना किसी बात की हँसी से चमक उठता था, कभी घर के आँगन में खेलने से उसका शरीर धूल से भर जाता था और कभी वह बार-बार तोतली बोली बोलकर अपने माता-पिता को प्रसन्न करता था॥ ४३॥ कभी वह शंकरजी के बैल का सींग पकडता, कभी पार्वतीजी के सिंह का केसर खींचता और कभी भृङ्गी की चोटी के बाल नोचने लगता था। यह सब देखकर उसके माता-पिता हर्ष से फूले नहीं समाते थे॥ ४४॥ कभी-कभी वह बाल्यचपलतावश शिवजी के गले में पड़े सर्पों के मुख खोलकर एक नौ दस पाँच कहकर उनके दाँत गिनने लगता था और शिव-पार्वती हँसने लगते थे॥ ४५॥ कभी-कभी शंकरजी के गले में पड़ी मुंडमाला के मुखों में उँगली डालकर उनके दाँतों को मोती समझकर निकालने लगता था॥ ४६॥ कभी वह शंकरजी की जटा पर गंगाजी की ठंडी धारा में अपना हाथ डाल देता,

शम्भोः शिरोऽन्तः सरितस्तरङ्गान्विगाह्य गाढं शिशिरान्रसेन।
स जातजाड्यं निजपाणिपद्ममतापयद्बालविलोचनाग्नौ॥ ४७॥
किञ्चित्कलं भङ्गुरकन्धरस्य नमज्जटाजूटधरस्य शम्भोः।
प्रलम्बमानं किल कौतुकेन चिरं चुचुम्बे मुकुटेन्दुखण्डम्॥ ४८॥
इत्थं शिशोः शैशवकेलिवृत्तेर्मनोऽभिरामैर्गिरिजागिरीशौ।
मनोविनोदैकरसप्रसक्तौ दिवानिशं नाविदतां कदाचित्॥ ४९॥
इति बहुविधं बालक्रीडाविचित्रविचेष्टितं,
ललितललितं सान्द्रानन्दं मनोहरमाचरन्।
अलभत परां बुद्धिं षष्ठे दिने नवयौवनं,
स किल सकलं शास्त्रं शस्त्रं विवेद विभुर्यया॥ ५०॥

इति महाकविकालिदासकृतौ कुमारसम्भवे महाकाव्ये
कुमारोत्पत्तिर्नामैकादशः सर्गः॥ ११॥

परन्तु ठंड़ लगने से उसके हाथ सुन्न हो जाते। तब वह अपना कमल जैसा कोमल हाथ शिवजी के माथे पर जलते हुए तीसरे नेत्र की आग पर ले जाकर सेंक लेता था॥ ४७॥ वह जब देखता कि शंकरजी का कन्धा तनिक नीचा हो गया है और उनके जटा-जूट झुक गये हैं, तब वह जटा के साथ नीचे लटकने वाले उनके सिर पर विद्यमान चन्द्रमा को बड़ी देर तक चूमता रहता था॥ ४८॥ पुत्र की मनोहर और खेलवाड से भरी बाल-लीलाओं का आनन्द लेते हुए शंकर और पार्वतीजी इतने मगन हो गये कि उन्हें यही सुधि नहीं रह गयी कि कब दिन चढ़ा और कब रात आयी॥ ४९॥ इस तरह अनेक प्रकार की लुभावनी और सुहावनी बाल-लीलाएँ करते हुए वह बालक छठें ही दिन बड़ा बुद्धिमान् जवान हो गया और छः ही दिनों में उसे सब शास्त्र और शस्त्रविद्याएँ भलीभाँति आ गयीं॥ ५०॥

इस प्रकार महाकविकालिदासरचित कुमारसम्भवमहाकाव्य में
कार्तिकेय-जन्म नामक ग्यारहवाँ सर्ग समाप्त॥ ११॥

द्वादशः सर्गः

अथ प्रपेदे त्रिदशैरशेषैः क्रूरासुरोपप्लवदुःखितात्मा।
पुलोमपुत्रीदयितोऽन्धकारिं पत्रीव तृष्णातुरितः पयोदम्॥ १॥
दृप्तारिसन्त्रासखिलीकृतात् स कथञ्चिदम्भोदविहारमार्गात्।
अवाततारामिगिरिं गिरीशगौरीपदन्यासविशुद्धमिन्द्रः॥ २॥
सङ्क्रन्दनः स्यन्दनतोऽवतीर्य मेघात्मनो मातलिदत्तहस्तः।
पिनाकिनोऽथालयमुच्चचाल शुचौ पिपासाकुलितो यथाम्भः॥ ३॥
इतस्ततोऽथ प्रतिबिम्बभाजं विलोकमानः स्फटिकाद्रिभूमौ।
आत्मानमप्येकमनेकधा स व्रजन् विभोरास्पदमाससाद॥ ४॥
विचित्रचञ्चन्मणिभङ्गिसङ्गं सौवर्णदण्डं दधताऽतिचण्डम्।
स नन्दिनाऽधिष्ठितमध्यतिष्ठत् सौधाङ्गणद्वारमनङ्गशत्रोः॥ ५॥
ततः स कक्षाहितहेमदण्डो नन्दी सुरेन्द्रं प्रतिपद्य सद्यः।
प्रतोषयामास सुगौरवेण गत्वा शशंस स्वयमीश्वरस्य॥ ६॥
भ्रूसंज्ञयाऽनेन कृताभ्यनुज्ञः सुरेश्वरं तं जगदीश्वरेण।
प्रवेशयामास सुरैः पुरोगः समं स नन्दी सदनं सदस्य॥ ७॥
स चण्डिभृङ्गिप्रमुखैर्गरिष्ठैर्गणैरनेकैर्विविधस्वरूपैः।
अधिष्ठितं संसदि रत्नमय्यां सहस्रनेत्रः शिवमालुलोके॥ ८॥
कपर्दमुद्बद्धमहीनमूर्धरत्नांशुभिर्भासुरमुल्लसद्भिः।
दधानमुच्चैस्तरमिद्धधातोः सुमेरुशृङ्गस्य समत्वमाप्तम्॥ ९॥

जैसे प्यासा पपीहा बादल की शरण में जाता है, वैसे ही अत्याचारी तारकासुर के उपद्रवों से दुःखी इन्द्र सब देवताओं के साथ शंकरजी के पास गये॥ १॥ उस घमंडी शत्रु तारक से भयभीत देवता किसी भी मार्ग से नहीं आ-जा सकते। अतएव इन्द्र बादलों के बीच छिपते-छिपते किसी प्रकार उस कैलास पर जा उतरे, जो शंकर और पार्वतीजी के चरण पडने से पवित्र हो चुका था॥॥२॥ वहाँ मातलि के हाथ के सहारे इन्द्र रथ मे उतरे और शंकरजी के भवन की ओर वैसे ही बढ़े, जैसे गर्मी में प्यासा पानी की ओर झपटे॥ ३॥ स्फटिक मणि से बने हुए उस कैलास पर चारों ओर अपनी बहुत-सी परछाइयाँ देखते हुए वे शंकरजी के निवासस्थान पर जा पहुँचे॥ ४॥ शंकरजी के भवन के द्वार पर पहुँचकर इन्द्र रुक गये। वहाँ रंग-बिरंगे मणियों की पच्चीकारी की हुई थी और एक बड़ा भारी सोने का डंडा हाथ में लिये हुए नन्दी पहरा दे रहे थे॥ ५॥ इन्हें देखा तो अपने सोने के डंडे को एक कोने में रखकर नन्दी ने चटपट आगे बढ़कर इन्द्र की आवभगत करते हुए स्वागत किया और भीतर जाकर महादेवजी को उनके आगमन की खबर दी॥ ६॥ शंकरजी ने भौंहों के संकेत से ही उन्हें भीतर लाने का आदेश दे दिया। उनकी आज्ञा पाकर आगे-आगे मार्ग दिखलाते हुए नन्दी इन्द्र आदि देवताओं को शंकरजी के पास ले गये॥ ७॥ वहाँ इन्द्र ने देखा कि रत्नजटित सभा-मण्डप में चण्डी-भृङ्गी आदि अनेक रूप-रंगवाले बहुत-से गणों से घिरे शिवजी बैठे हुए हैं॥ ८॥ साँपों से लिपटा हुआ शिवजी के सिर का जटाजूट वासुकी आदि बडे-बडे साँपों के फनों के मणियों की किरणों से चमकता हुआ सुमेरु

विभ्राणमुत्तुङ्गतरङ्गमालां गङ्गां जटाजूटतटं भजन्तीम्।
गौरीं तदुत्सङ्गजुषं हसन्तीमिव स्वफेनैः शरदभ्रशुभ्रैः॥ १०॥
गङ्गातरङ्गप्रतिबिम्बितैः स्वैर्बहूभवन्तं शिरसा सुधांशुम्।
चलन्मरीचिप्रचयैस्तुषारगौरैर्हिमद्योतितमुद्वहन्तम् ॥ ११॥
भालस्थले लोचनमेधमानधामाधरीभूतरवीन्दुनेत्रम्।
युगान्तकालोचितहव्यवाहं मीनध्वजप्लोषणमादधानम्॥ १२॥
महार्हरत्नान्वितयोरुदारं स्फुरत्प्रभामण्डलयोः समन्तात्।
कर्णस्थिताभ्यां शशिभास्कराभ्यामुपासितं कुण्डलयोश्छलेन॥ १३॥
स्ववद्धया कण्ठिकयेव नीलमाणिक्यमय्या कुतुकेन गौर्याः।
नीलस्य कण्ठस्य परिस्फुरन्त्या कान्त्या महत्या सुविराजमानम्॥ १४॥
कालार्दितानां त्रिदशासुराणां चितारजोभिः परिपाण्डुराङ्गम्।
महन्महेभाजिनमुद्वहाभ्रप्रालेयशैलश्रियमुद्वहन्तम् ॥ १५॥
पाणिस्थितब्रह्मकपालपात्रं वैकुण्ठभाजाऽपि निषेव्यमाणम्।
नरास्थिखण्डाभरणं रणान्तमूलं त्रिशूलं कलयन्तमुच्चैः॥ १६॥
पुरातनीं ब्रह्मकपालमालां कण्ठे वहन्तं पुनराश्वसन्तीम्।
उद्गीतवेदां मुकुटेन्दुवर्षत्सुधाभरौघाप्लवलब्धसंज्ञाम्॥ १७॥
सलीलमङ्कस्थितया गिरीन्द्रपुत्र्या नवाष्टापदवल्लिभासा।
विराजमानं शरदभ्रखण्डं परिस्फुरन्त्याऽचिररोचिषेव॥ १८॥

पर्वत के शिखर की नाईं दीख रहा था॥ ९॥ शिवजी के जटाजूट के अग्रभाग में बैठी ऊँची-ऊँची तरङ्गोंवाली गंगाजी शरत्कालीन बादलों के समान उजली फेन उछाल-उछालकर जैसे शंकरजी की गोद में बैठी पार्वतीजी की हँसी उड़ा रही थीं कि देखो, हम तो शिवजी के सिर पर चढ़ी बैठी हैं॥ १०॥ शिवजी के सिर के चन्द्रमा की हिम जैसी उजली किरणों की जो परछाईं गंगाजी की तरंगों में बहुत रूपों में नाच रही थी, वह ऐसी लगती थी कि मानो उस अकेले चन्द्रमा के अनेक चन्द्रमा बन गये हों॥ ११॥ उनके मस्तक पर कामदेव को जलाने वाला और प्रलय की अग्नि के समान वह भीषण तीसरा नेत्र चमक रहा था, जिसके तेज के आगे प्रलयकालीन सूर्य और चन्द्र रूपी नेत्र भी चौंधिया जाते थे॥ १२॥ उनके दोनों कानों में किरणों के घेरे से घिरे तथा अनमोल रत्नों से जड़े दो कुण्डल ऐसे झूल रहे थे, जैसे उनके वहाने सूर्य और चन्द्रमा ही शंकरजी के दोनों कानों पर बैठकर उनकी सेवा कर रहे हों॥ १३॥ उनका नीला कंठ ठीक वैसे ही चमकता था, जैसे कभी-कभी खिलवाड में नीलम का हार पहन लेने पर पार्वतीजी का कंठ चमक उठता है॥ १४॥ मरे हुए देवताओं और दानवों की चिताओं की भस्म पुते हुए अपने उजले अंग पर उजले हाथी की खाल ओढ़े हुए वे ऐसे दीख रहे थे, मानो बादलों से घिरा हुआ विशाल हिमालय पर्वत हो॥ १५॥ उनके एक हाथ में ब्रह्म-कपाल का पात्र था, गले में मरे मनुष्यों की हड्डियों के टुकडों के गहने थे और दूसरे हाथ में वे युद्ध समाप्त करने वाला अपना त्रिशूल ऊपर उठाये हुए थे। इस विचित्र वेश में होने पर भी वैकुंठवासी विष्णु तक उनकी सेवा करते थे॥ १६॥ उनके गले में ब्रह्म-कपालों की एक पुरानी माला पडी हुई थी, जो सिर पर बैठे हुए चन्द्रमा से बरसी हुई अमृत की बूँदें पीने से जीवित-सी होकर वेद का गान कर रही थी॥ १७॥ सोने की नवीन लता के समान सुन्दरी पार्वतीजी को अपनी गोद में बैठाये हुए शिवजी ऐसे दीख रहे थे, मानो चमकती हुई बिजली वाला कोई शरद् ऋतु का बादल हो॥ १८॥ उनके हाथ में वह पिनाक नाम का

दृप्तान्धकप्राणहरं पिनाकं महासुरस्त्रीविधवात्वहेतुम्।
करेण गृह्णन्तमगृह्यमन्यैः पुरा स्मरप्लोषणकेलिकारम्॥ १९॥
भद्रासनं काञ्चनपादपीठं महार्हमाणिक्यविभङ्गिचित्रम्।
अधिष्ठितं चन्द्रमरीचिगौरैरुद्वीज्यमानं चमरैर्गणाभ्याम्॥ २०॥
शस्त्रास्त्रविद्याभ्यसनैकसक्ते सविस्मयैरेत्य गणैः सुदृष्टे।
नीराज्यमाने स्फटिकाचलेन सानन्दनिर्दिष्टदृशं कुमारे॥ २१॥
तथाविधं शैलसुताधिनाथं पुलोमपुत्रीदयितो निरीक्ष्य।
आसीत्क्षणं क्षोभपरो न कस्य मनो न हि क्षुभ्यति धामधाम्नि॥ २२॥
विकस्वराम्भोजवनश्रिया तं दृशां सहस्रेण निरीक्षमाणः।
रोमालिभिः स्वर्गपतिर्बभासे पुष्पोत्कराकीर्ण इवाम्रशाखी॥ २३॥
दृष्ट्वा सहस्रेण दृशां महेशमभूत्कृतार्थोऽतितरां महेन्द्रः।
सर्वाङ्गजातं तदथो विरूपमिव प्रियाकोपकरं विवेद॥ २४॥
ततः कुमारं कनकाद्रिसारं पुरन्दरः प्रेक्ष्य धृतास्त्रशस्त्रम्।
महेश्वरोपान्तिकवर्तमानं शत्रोर्जयाशां मनसा बबन्ध॥ २५॥
श्रीनीलकण्ठ! द्युपतिः पुरोऽस्ति त्वयि प्रणामावसरं प्रतीच्छन्।
सहस्रनेत्रेऽत्र भव त्रिनेत्र! दृष्ट्या प्रसादप्रगुणो महेश!॥ २६॥
इति प्रबद्धाञ्जलिरेत्य नन्दी निधाय कक्षामभि हेमवेत्रम्।
प्रसादपात्रं पुरतो भविष्णुरथ स्मरारातिमुवाच वाचम्॥ २७॥

धनुष था, जिसने अन्धक नाम के मतवाले दैत्य के प्राण लिये थे, बडे-बड़े दानवों को मारकर उनकी स्त्रियों को विधवा बना दिया था, कामदेव को जलाकर राख कर दिया था और जिसे दूसरा कोई नहीं धारण कर सकता था॥ १९॥ अनमोल मोतियों और मणियों की मजावट से रग-विरंगे दीखने वाले उस सिंहासन पर शिवजी बैठे हुए थे, जिसके नीचे सोने का पैर-पीढा रखा हुआ था। दोनों ओर दो गण उन पर चन्द्रमा की किरणों के सदृश उजले चँवर ढुला रहे थे॥ २०॥ शिवजी बैठे हुए बडे चाव से उन कुमार कार्तिकेय की शस्त्रास्त्र-विद्या का अभ्यास देख रहे थे, जिन्हें शंकरजी के गण भी बड़े आश्चर्य से देखते थे और वह स्फटिक का पहाड़ भी जिनकी आरती उतारता था॥ २१॥ इस प्रकार के शंकरजी को देखकर थोड़ी देर के लिए इन्द्र का मन भी लुभा गया। अचानक इतनी सुख-सम्पदा इकट्ठी देखकर भला किसका मन नहीं ललच जायेगा॥ २२॥ विकसित कमलों के समान अपने सुन्दर सहस्रों नयनों से शंकरजी को देखकर इन्द्र उस आम के पेड़ जैसे सुन्दर लगने लगे, जो नीचे से ऊपर तक बौर से लदा हुआ हो॥ २३॥ अपनी सहस्रों आँखों से शंकरजी को देखकर इन्द्र ने अपने को बड़ा भाग्यवान् माना। परन्तु इससे उनके शरीरभर में जो रोमाञ्च हो आया, उसे देखकर उन्हें यह डर भी हो गया कि कहीं इन्द्राणी यह न समझ लें कि किसी दूसरी सुन्दरी को देखने मे इन्हें रोमांच हो आया है और इस पर वे सौतियाडाह करके रूठ न जायँ॥ २४॥ इसके बाद जब उन्होंने शंकरजी के पास बैठे, सुमेरु के समान बलवान् और अस्त्र-शस्त्रधारी कार्तिकेय को देखा तो उनके मन में यह आशा हो चली कि अब हम शत्रु पर अवश्य विजय प्राप्त कर लेंगे॥ २५॥ तभी अपने सोने के डंडे को एक कोने में रख तथा आगे बढ़ और हाथ जोड़कर शंकरजी की कृपा पाने की इच्छा से नन्दी ने जाकर शंकरजी से कहा—हे नीलकण्ठ! देवताओं के स्वामी इन्द्रदेव आप को प्रणाम करने के लिए यहाँ खड़े हैं। अतएव कृपा करके इन पर भी अपनी कृपादृष्टि करिए॥ २६-२७॥ यह सुनकर त्रिपुरासुर के नाशक और संसार

पुरा सुरेन्द्रं सुरसङ्घसेव्यं त्रिलोकसेव्यस्त्रिपुरासुरारिः।
प्रीत्या सुधासारनिधारिणेव ततोऽनुजग्राह विलोकनेन॥ २८॥
किरीटकोटिच्युतपारिजातपुष्पोत्करेणानमितेन मूर्ध्ना।
स्वर्गैकवन्द्यो जगदेकवन्द्यं तं देवदेवं प्रणनाम देवः॥ २९॥
अनेकलोकैकनमस्क्रियार्हं महेश्वरं तं त्रिदशेश्वरः सः।
भक्त्या नमस्कृत्य कृतार्थतायाः पात्रं पवित्रं परमं बभूव॥ ३०॥
सुभक्तिभाजामधि पादपीठं प्रान्तक्षितिं नम्रतरैः शिरोभिः।
ततः प्रणेमुः पुरतो गणानां गणाः सुराणां क्रमतः पुरारिम्॥ ३१॥
गणोपनीते प्रभुणोपदिष्टः शुभासने हेममये पुरस्तात्।
प्रापोपविश्य प्रमुदं सुरेन्द्रः प्रभुप्रसादो हि मुदे न कस्य॥ ३२॥
क्रमेण चान्यैऽपि विलोकनेन सम्भावितः सस्मितमीश्वरेण।
उपाविशंस्तोषविशेषमाप्ता दृग्गोचरे तस्य सुराः समग्राः॥ ३३॥
अथाह देवा बलवैरिमुख्यान् वर्णिवर्गान् करुणार्द्रचेताः।
कृताञ्जलीकानसुराभिभूतान् ध्वस्तश्रियः श्रान्तमुखानवेक्ष्य॥ ३४॥
अहो बतानन्तपराक्रमाणां दिवौकसो वीरवरायुधानाम्।
हिमोदबिन्दुग्लपितस्य किं वः पद्मस्य दैन्यं दधते मुखानि॥ ३५॥
स्वर्गौकसः स्वर्गपरिच्युताः किं स्वपुण्यराशौ सुमहत्तमेऽपि।
चिह्नं चिरोढं न तु यूयमेते निजाधिपत्यस्य परित्यजध्वम्॥ ३६॥
दिवौकसो देवगृहं विहाय मनुष्यसाधारणतामवाप्ताः।
यूयं कुतः कारणतश्चरध्वं महीतले मानभृतो महान्तः॥ ३७॥

के पूजनीय शंकर भगवान् ने देवताओं के आराध्य इन्द्र को अपनी अमृत की धारा बरसाती हुई-सी दृष्टि से देखने की कृपा की॥ २८॥ स्वर्ग में जिनकी सब पूजा करते हैं, वे देवराज इन्द्र जब सारे संसार के एकमात्र पूजनीय और देवताओं के भी देवता महादेवजी को प्रणाम करने के लिए झुके तो उनके मस्तक के किरीट की नोक से आहत परिजात के बहुत-से फूल गिरकर छितरा गये॥ २९॥ सब लोकों के एकमेव पूजनीय शंकरजी को भक्ति के साथ प्रणाम करके स्वर्ग के स्वामी इन्द्र ने अपने को परम पवित्र और धन्य माना॥ ३०॥ अन्य देवताओं ने भी प्रमथ आदि गणों के समक्ष बड़ी भक्ति से शंकरजी के पैर रखने के पीढे के पास धरती पर माथा टेक-टेककर बारी-बारी से वन्दना की॥ ३१॥ तदनन्तर शंकरजी की आज्ञा पाकर एक गण गया और एक सोने का आसन उठा लाया। उस पर बैठकर इन्द्र को बड़ा आनन्द मिला। शंकरजी जैसे प्रभु का प्रसाद पाकर कौन अपने को धन्य नहीं समझेगा॥ ३२॥ क्रमशः सब देवताओं की ओर देखकर मुस्कुराते हुए शंकरजी ने उन सब का समुचित सम्मान किया। इससे वे भी बहुत प्रसन्न होकर उनके समक्ष बैठ गये॥ ३३॥ इन्द्र आदि देवता हाथ जोडे आगे बैठे थे और दैत्यों से हार जाने के कारण जिनके मुँह उदास और सुस्त दीख रहे थे, उनकी ओर देखकर करुणा से आर्द्र हृदयवाले शिवजी ने कहा—॥ ३४॥ हे देवताओ! इतने बड़े-बड़े वीर होकर, एक से एक उत्कृष्ट अस्त्र-शस्त्रों से सज-धजकर स्वर्ग में रहते हुए भी आप लोगों के मुख पाला मारे हुए कमलों के समान उदास क्यों दीख रहे हैं?॥ ३५॥ हे देवताओ! इतने बड़े पुण्यात्मा होने पर भी आप लोग स्वर्ग से निकले कैसे? आप इतने दिनों से छत्र-चँवर आदि राज-चिह्न धारण करते आ रहे थे, उन्हें आप मत छोड़िए॥ ३६॥ आप लोग इतने मनस्वी, महिमामय और स्वर्गनिवासी होते हुए भी स्वर्ग छोडकर

अनन्यसाधारणसिद्धमुच्चैस्तद्दैवतं धाम निकामरम्यम्।
कस्मादकस्मान्निरगाद्गवद्भ्यश्चिरार्जितं पुण्यमिवापचारात्॥ ३८॥
दिवौकसो वो हृदयस्य कस्मात्तथाविधं धैर्यमहार्यमार्याः।
अगादगाधस्य जलाशयस्य ग्रीष्मातितापादिवशादिवाम्भः॥ ३९॥
सुराः सुराधीशपुरःसराणां समीयुषां वः सममातुराणाम्।
तद्ब्रूत लोकत्रयजित्वरात्किं महासुरात्तारकतो विरुद्धम्॥ ४०॥
पराभवं तस्य महासुरस्य निषेद्धुमेकोऽहमलम्भविष्णुः।
दावानलप्लोषविपत्तिमन्यो महाम्बुदात् किं हरते वनानाम्॥ ४१॥
इतीरिते मन्मथमर्दनेन सुराः सुरेन्द्रप्रमुखा मुखेषु।
सान्द्रप्रमोदाश्रुतरङ्गितेषु दधुः श्रियं सत्वरमाश्वसन्तः॥ ४२॥
ततो गिरीशस्य गिरां विरामे जगाद लब्धेऽवसरे सुरेन्द्रः।
भवन्ति वाचोऽवसरे प्रयुक्ता ध्रुवं फलाविष्टमहोदयाय॥ ४३॥
ज्ञानप्रदीपेन तमोपहेनाविनश्वरेणास्खलितप्रभेण ।
भूतं भवद्भावि च यच्च किञ्चित्सर्वज्ञ सर्वं तव गोचरं तत्॥ ४४॥
दुर्वारदोरुद्यमदुःसहेन यत्तारकेणामरघस्मरेण।
तदीशतामाप्तवता निरस्ता वयं दिवोऽमी वद किं न वेत्सि॥ ४५॥
विधेरमोघं स वरप्रसादमासाद्य सद्यस्त्रिजगज्जिगीषुः।
सुरानशेषानहकप्रमुख्यान् दोर्दण्डचण्डो मनुते तृणाय॥ ४६॥

साधारण मनुष्यों के समान पृथ्वी-तल पर इधर-उधर क्यों भटक रहे हैं?॥ ३७॥ जैसे पाप करने से बहुत दिनों का संचित पुण्य हाथ से निकल जाता है, वैसे ही बडी-बडी सिद्धियों से परिपूर्ण बड़ा सुन्दर स्वर्ग आपलोगों के हाथ से अचानक कैसे निकल गया?॥ ३८॥ हे देवताओ! जैसे अधिक गर्मी पडने से गहरा तालाब भी सूख जाता है, वैसे ही आपलोगों के हृदय का वह अटल धीरज कहाँ चला गया?॥ ३९॥ व्याकुल होकर आज एक साथ आये हुए हे इन्द्र आदि देवताओ! यह तो बतलाइये कि आप लोगों ने तीनों लोकों को जीतनेवाले दैत्यराज तारकासुर से तो लडाई नहीं ठान ली है?॥ ४०॥ उस महादैत्य ने जो आपलोगों का अपमान किया है, उसका बदला केवल मैं ही ले सकता हूँ। क्योंकि जंगलों में लगी हुई आग बादलों की बड़ी घटा को छोडकर और कौन बुझा सकता है॥ ४१॥ शंकरजी के वचन सुनकर इन्द्र आदि देवताओं की आँखों में आनन्द के आँसू उमड पडे और जब उन्हें यह ढाढस बँध गया कि अब आपलोगों की प्राणरक्षा हो जायेगी तो वे सब खिल उठे॥ ४२॥ जब भगवान् शंकर बोल चुके तो ठीक अवसर जानकर इन्द्र ने कहना आरम्भ किया। क्योंकि ठीक अवसर पर कही हुई बात का फल अवश्य मिलता है॥ ४३॥ हे प्रभो! आप तो घट-घट की बात जानते हैं, आप अज्ञानता को मिटाने वाले हैं, आपका कभी नाश नहीं होता और कभी भी न बुझने वाले ज्ञान के प्रकाश से आप संसार के भूत, भविष्य और वर्तमान—इन तीनों कालों की सब बातें जान लेते हैं॥ ४४॥ अतएव हे नाथ! आप क्या यह नहीं जानते कि अपनी कठोर भुजाओं के पराक्रम से मतवाला होकर देवताओं को पीड़ा देनेवाला तारकासुर स्वर्ग का प्रभु बन बैठा है और उसने हम सबको स्वर्ग से निकाल दिया है॥ ४५॥ वह असुर ब्रह्मा से अमोघ वरदान पाकर अपनी भुजाओं के बल पर तुरन्त तीनों लोक जीत लेना चाहता है। वह मुझे तथा दूसरे बड़े-बडे देवताओं को तिनके के बराबर तुच्छ समझे हुए है॥ ४६॥ हे भगवन्! हम लोगों ने जब ब्रह्माजी की स्तुति की थी, तब प्रसन्न होकर उन्होंने कहा था कि जब

स्तुत्या पुराऽस्माभिरुपासितेन पितामहेनेति निरूपितं नः।
सेनापतिः संयति दैत्यमेतं पुरः स्मरारातिसुतो निहन्ति॥४७॥
अहो ततोऽनन्तरमद्ययावत्सुदुःसहां तस्य पराभवार्तिम्।
विषेहिरे हन्त! हृदन्तशल्यमाज्ञानिवेशं त्रिदिवौकसोऽमी॥४८॥
निदाघधामक्लमविक्लवानां नवीनमम्भोदमिवौषधीनाम्।
सुनन्दनं नन्दनमात्मनो नः सेनान्यमेतं स्वयमादिश त्वम्॥४९॥
त्रैलोक्यलक्ष्मीहृदयैकशल्यं समूलमुत्खाय महासुरं तम्।
अस्माकमेषां पुरतो भवन्सन्दुःखापहारं युधि यो विधत्ते॥५०॥
महाहवे नाथ! तवास्य सूनोः शस्त्रैः शितैः कृत्तशिरोधराणाम्।
महासुराणां रमणीविलापैर्दिशो दशैता मुखरीभवन्तु॥५१॥
महारणक्षोणिपशूपहारीकृतेऽसुरे तत्र तवात्मजेन।
बन्दिस्थितानां सुदृशां करोतु वेणिप्रमोक्षं सुरलोक एषः॥५२॥
इत्थं सुरेन्द्रे वदति स्मरारिः सुरारिदुश्चेष्टितजातरोषः।
कृतानुकम्पस्त्रिदशेषु तेषु भूयोऽपि भूताधिपतिर्बभाषे॥५३॥
अहो अहो देवगणाः! सुरेन्द्रमुख्याः! शृणुध्वं वचनं ममैते।
विचेष्टते शङ्कर एष देवः कार्याय सज्जो भवतां सुताद्यैः॥५४॥
पुरा मयाऽकारि गिरीन्द्रपुत्र्याः प्रतिग्रहोऽयं नियतात्मनाऽपि।
तत्रैष हेतुः खलु तद्भवेन वीरेण यद्वध्यत एव शत्रुः॥५५॥
अत्रोपपन्नं तदमी नियुज्य कुमारमेनं पृतनापतित्वे।
निघ्नन्तु शत्रुं सुरलोकमेष भुनक्तु भूतोऽपि सुरैः सहेन्द्रः॥५६॥

शंकरजी का पुत्र देवताओं का सेनापति बनकर उससे लडेगा, तभी वह दैत्य मरेगा॥४७॥ तब से अब तक हम सब देवता तारकासुर के हाथ से हारने की कसक और हृदय में चुभे हुए काँटे के समान खटकनेवाली उसकी आज्ञा का पालनरूपी अपमान सह रहे हैं॥४८॥ हे भगवन्! जैसे गर्मी के सूर्य की तपन से दग्ध लता-वृक्षों को नये बादल हरा कर देते हैं, वैसे ही अपने इस आनन्ददायक पुत्र को हमारा सेनापति बनने की आज्ञा देकर आप हमें जिला लें॥४९॥ समस्त त्रिलोकी के हृदय में काँटे जैसे चुभनेवाले उस महादैत्य को जब आपके पुत्र कार्तिकेय युद्ध में आगे बढकर मार डालेंगे, तभी हमारा दुःख मिटेगा॥५०॥ हे नाथ! आप ऐसा कुछ कीजिए कि उस महासंग्राम में आपके पुत्र के तीखे बाणों से महादैत्यों के सिर कट-कटकर गिरें और उन दैत्यों की स्त्रियों के विलाप से दसों दिशाएँ गूँज उठें॥५१॥ आपके पुत्र जब उस महासमर में दैत्यों को सियार आदि जन्तुओं की भेंट चढायें, तब स्वर्ग में बन्दी बनी अपनी सुनयनी स्त्रियों की उलझी हुई चोटियों को ये देवता जाकर खोलें॥५२॥ इस प्रकार इन्द्र के मुँह से तारक का अत्याचार सुनकर शंकरजी क्रोध से तमतमा उठे और उन देवताओं पर कृपा करके बोले—॥५३॥ हे इन्द्र आदि देवताओ! आप लोग मेरी बात सुनें। अब मैं अपने पुत्र को लेकर तुम्हारा काम करने को तैयार हूँ, तुम भी तैयार होओ॥५४॥ हे देवो! समाधिस्थ होने पर भी मैंने पार्वती के साथ इसलिए विवाह किया था कि इनका पुत्र तारक को मारे॥५५॥ आपका काम करने वाले इस कुमार को सेनापति बनाकर आप शत्रु का नाश कीजिए और इन्द्र के साथ फिर स्वर्ग का आनन्द लूटिए॥५६॥ तदनन्तर शंकरजी ने घोर संग्राम को एक महोत्सव मानने वाले अपने पुत्र कार्तिकेय से कहा—हे पुत्र! तुम जाकर

इत्युदीर्य भगवांस्तमात्मजं घोरसङ्गरमहोत्सवोत्सुकम्।
नन्दनं हि जहि देवविद्विषं संयतीति निजगाद शङ्करः॥५७॥
शासनं पशुपतेः स कुमारः स्वीचकार शिरसाऽवनतेन।
सर्वथैव पितृभक्तिरतानामेष एव परमः खलु धर्मः॥५८॥
असुरयुद्धविधौ विबुधेश्वरे पशुपतौ वदतीति तमात्मजम्।
गिरिजया मुमुदे सुतविक्रमे सति न नन्दति का खलु वीरसूः॥५९॥
सुरपरिवृढः प्रौढं वीरं कुमारमुमापते-
र्बलवदमरारातिस्त्रीणां दृगञ्जनभञ्जनम्।
जगदभयदं सद्यः प्राप्य प्रमोदपरोऽभवद्
ध्रुवमभिमते पूर्णे को वा मुदा नहि माद्यति॥६०॥

इति महाकविकालिदासकृतौ कुमारसम्भवे महाकाव्ये
कुमारसैनापत्यवर्णनं नाम द्वादशः सर्गः॥१२॥

देवताओं के शत्रु तारकासुर को युद्धभूमि में मार डालो॥५७॥ कुमार कार्तिकेय ने सिर झुकाकर शंकरजी की आज्ञा मान ली। क्योंकि पितृभक्त पुत्रों का यही धर्म है कि वे पिता की आज्ञा मानें॥५८॥ सब देवताओं के स्वामी शिवजी अब अपने पुत्र को दैत्यों से युद्ध की बात समझाने लगे तो पार्वतीजी गद्गद हो गयीं। क्योंकि कौन ऐसी वीर माता होगी, जो अपने पुत्र की वीरता की बात से प्रसन्न न हो॥५९॥ बलवान् दैत्यों के स्त्रियों की आँख का आँजन मिटानेवाले तथा संसार को अभयदान देनेवाले परम पराक्रमी कुमार कार्तिकेय को पाकर इन्द्र आनन्द से खिल उठे। क्योंकि ऐसा कौन है, जो अपनी इच्छा पूरी हो जाने पर आनन्द से पागल न हो जाय॥६०॥

इस प्रकार महाकविकालिदासरचित कुमारसम्भवमहाकाव्य में कुमार का
सेनापति होना नामक बारहवाँ सर्ग समाप्त॥१२॥

त्रयोदशः सर्गः

प्रस्थानकालोचितचारुवेषः स स्वर्गिवर्गैरनुगम्यमानः।
ततः कुमारः शिरसा नतेन त्रैलोक्यभर्तुः प्रणनाम पादौ॥ १॥
जहीन्द्रशत्रुं समरेऽमरेशपदं स्थिरत्वं नय वीर वत्स!।
इत्याशिषा तं प्रणमन्तमीशो मूर्धन्युपाघ्राय मुदाऽभ्यनन्दत्॥ २॥
प्रह्वीभवन्नम्रतरेण मूर्ध्ना नमश्चकाराङ्घ्रियुगं स्वमातुः।
तस्याः प्रमोदाश्रुपयःप्रवृष्टिस्तस्याभवद् वीरवराभिषेकः॥ ३॥
तमङ्कमारोप्य सुता हिमाद्रेराश्लिष्य गाढं सुतवत्सला सा।
शिरस्युपाघ्राय जगाद शत्रुं जित्वा कृतार्थीकुरु वीरसूं माम्॥ ४॥
उद्दामदैत्येशविपत्तिहेतुः श्रद्धालुचेताः समरोत्सवस्य।
आपृच्छ्य भक्त्या गिरिजागिरीशौ ततः प्रतस्थेऽभिदिवं कुमारः॥ ५॥
देवं महेशं गिरिजां च देवीं ततः प्रणम्य त्रिदिवौकसोऽपि।
प्रदक्षिणीकृत्य च नाकनाथपूर्वाः समस्तास्तमथानुजग्मुः॥ ६॥
अथ व्रजद्भिस्त्रिदशैरशेषैः स्फुरत्प्रभाभासुरमण्डलैस्तैः।
नभो बभासे परितो विकीर्णं दिवापि नक्षत्रगणैरिवोग्रैः॥ ७॥
रराज तेषां व्रजतां सुराणां मध्ये कुमारोऽधिककान्तिकान्तः।
नक्षत्रताराग्रहमण्डलानामिव त्रियामारमणो नभोऽन्ते॥ ८॥
गिरीशगौरीतनयेन सार्धं पुलोमपुत्रीदयितादयस्ते।
उत्तीर्य नक्षत्रपथं मुहूर्तात् प्रपेदिरे लोकमथात्मनीनम्॥ ९॥

लड़ाई का वस्त्र पहन और सब देवताओं के आगे होकर कुमार कार्तिकेय ने चलते समय त्रिलोकी के स्वामी शिवजी के चरणों को प्रणाम किया॥ १॥ इस प्रकार प्रणाम करते हुए पुत्र को उठा और उसका सिर सूँघकर शिवजी ने यह आशीर्वाद देते हुए कुमार को प्रोत्साहित किया—हे वीर पुत्र! जाओ, युद्ध में इन्द्र के शत्रु को मार डालो और इन्द्र को उनके पद पर स्थायी रूप से बैठा दो॥ २॥ कार्तिकेय जब झुककर अपने माताजी के दोनों चरणों को प्रणाम कर रहे थे उस समय पार्वतीजी की आँखों से जो प्रेम के आँसू बरसे, उन आँसुओं के जल से ही मानों कुमार का सेनापति पद के लिए अभिषेक हो गया॥ ३॥ पुत्रवत्सला पार्वती ने कुमार को गोद में लेकर अपने हृदय से लगा लिया और माथा सूँघकर आशीर्वाद दिया और कहा—पुत्र! लड़ाई में शत्रु को जीतकर यह बात सार्थक कर दो कि मैं वीरप्रसविनी माता हूँ॥ ४॥ तदननतर उस बलवान् दैत्य को मारने तथा संग्रामरूपी उत्सव मनाने के लिए उतावले बने हुए कुमार कार्तिकेय बड़ी भक्तिपूर्वक अपने माता-पिता से आज्ञा लेकर स्वर्ग की ओर चल पड़े॥ ५॥ इन्द्र आदि सब देवता भी भगवान् शंकर और पार्वतीजी को प्रणाम तथा प्रदक्षिणा करके कुमार के पीछे-पीछे चले॥ ६॥ चारों ओर फैली हुई कान्तिवाले उन सब देवताओं के एक साथ चलने से आकाश ऐसा दीखने लगा, जैसे दिन में भी चमकनेवाले बडे-बडे और उग्र तारे निकल आये हों॥ ७॥ आकाश में चलते हुए देवताओं के बीच में अपनी अनुपम दीप्ति से सुन्दर दीखने वाले कुमार कार्तिकेय ऐसे लगते थे, मानों नक्षत्रों और तारों के बीच में चन्द्रमा चल रहे हों॥ ८॥ कुमार कार्तिकेय

ते स्वर्गलोकं चिरकालदृष्टं महासुरत्रासवशंवदत्वात्।
सद्यः प्रवेष्टुं न विषेहिरे तत्क्षणं व्यलम्बन्त सुराः समग्राः॥ १०॥
पुरो भव त्वं न पुरो भवामि नाहं पुरोगोऽस्मि पुरःसरस्त्वम्।
इत्थं सुरास्तत्क्षणमेव भीताः स्वर्ग प्रवेष्टुं कलहं वितेनुः॥ ११॥
सुरालयालोकनकौतुकेन मुदा शुचिस्मेरविलोचनास्ते।
दधुः कुमारस्य मुखारविन्दे दृष्टिं द्विषत्साध्वसकातरान्ताम्॥ १२॥
सहेलहासच्छुरिताननेन्दुस्ततः कुमारः पुरतो भविष्णुः।
स तारकापातमपेक्षमाणो रणप्रवीरो हि सुरानवोचत्॥ १३॥
भीत्यालमद्य त्रिदिवौकसोऽमी स्वर्गं भवन्तः प्रविशन्तु सद्यः।
अत्रैव मे दृक्पथमेतु शत्रुर्महासुरो वः खलु दृष्टपूर्वः॥ १४॥
स्वर्लोकलक्ष्मीकचकर्षणाय दोर्मण्डलं वलगति यस्य चण्डम्।
इहैव तच्छोणितपानकेलिमह्नाय कुर्वन्तु शरा ममैते॥ १५॥
शक्तिर्ममासावहतप्रचारा प्रभावसारा सुमहःप्रसारा।
स्वर्लोकलक्ष्म्या विपदावहारेः शिरो हरन्ती दिशतान्मुदं वः॥ १६॥
इत्यन्धकारातिसुतस्य दैत्यवधाय युद्धोत्सुकमानसस्य।
सर्वं शुचिस्मेरमुखारविन्दं गीर्वाणवृन्दं वचसा ननन्द॥ १७॥
सान्द्रप्रमोदात् पुलकोपगूढः सर्वाङ्गसम्फुल्लसहस्रनेत्रः।
तस्योत्तरीयेण निजाम्बरेण निरुच्छनं चारु चकार शक्रः॥ १८॥
घनप्रमोदाश्रुतरङ्गिताक्षैर्मुखैश्चतुर्भिः प्रचुरप्रसादैः।
अथो अचुम्बद्विधिरादिवृद्धः षडाननं षट्सु शिरःसु चित्रम्॥ १९॥

के पीछे-पीछे चलते हुए इन्द्र आदि देवता थोडी ही देर में आकाश पार करके अपने स्वर्गलोक में पहुँच गये॥ ९॥ दैत्यराज तारक के डर से देवता स्वर्ग में नहीं जा पाते थे। इसलिए वे झिझक के कारण एकदम भीतर नहीं जा सके॥ १०॥ उस समय वे भयभीत देवता आपस में एक-दूसरे को धकेलते हुए झगड़ने लगे—तुम आगे चलो। मैं आगे नहीं चलूँगा। मैं क्यों आगे चलूँ? तुम्हीं को आगे चलना चाहिए॥ ११॥ स्वर्ग को सामने देखकर मगन देवताओं की आँखें आनन्द से खिल गयीं, परन्तु शत्रु के डर से उनकी आँखें कातर होकर कुमार के मुख-कमल पर जा टिकीं॥ १२॥ यह देखकर कुमार का मुख-चन्द्र खिलवाड़ भरी हँसी से खिल उठा और तारक के आक्रमण की बाट जोहते हुए रणवीर कुमार कार्तिकेय ने आगे आकर देवताओं से कहा—॥ १३॥ हे देवताओ! अब डरने की कोई बात नहीं है। आप लोग निडर होकर स्वर्ग में घुसिए। मैं चाहता हूँ कि जिस महान् असुर तारक को आप लोग देख चुके हैं, वह यहीं मेरे आगे आ उपस्थित हो॥ १४॥ मेरी इच्छा यह है कि जिस तारकासुर की भुजाएँ बलपूर्वक स्वर्गलक्ष्मी के बाल पकडकर दुर्दशा करते हुए उन्हें खींचने के लिए मचल रही हैं, उसके लहू पीने का आनन्द मेरे बाणों को तुरन्त यहीं मिल जाय॥ १५॥ यह अत्यन्त तेजस्विनी, अमोघ गति, प्रतापशालिनी और स्वर्गलोक की राजलक्ष्मी का कष्ट दूर करनेवाली मेरी शक्ति यहीं पर शत्रु का सिर काटकर लोगों को आनन्दित करें॥ १६॥ दैत्यों का नाश करने की इच्छावश जो लड़ाई करने को उद्यत थे, उन कुमार कार्तिकेय की बातें सुनकर उन देवताओं के सुन्दर मुख-कमल खिल उठे॥ १७॥ आनन्दातिरेक के कारण इन्द्र भी पुलकित हो उठे और उनके शरीर की सहस्रों आँखें खिल गयीं। तब इन्द्र और कुमार ने परस्पर एक-दूसरे से वस्त्र बदलकर अपनी मित्रता पक्की कर ली॥ १८॥ उन देवताओं में सबसे वयोवृद्ध ब्रह्माजी

तं साधु साध्वित्यभितः प्रशस्य मुदा कुमारं त्रिपुरासुरारेः।
आनन्दयन्वीर! जयेति वाचा गन्धर्वविद्याधरसिद्धसङ्घः॥ २०॥
दिव्यर्षयः शत्रुविजेष्यमाणं तमभ्यनन्दन्किल नारदाद्याः।
निरुञ्छनं चक्रुरथोत्तरीयैश्चामीकरीयैर्निजवल्कलैश्च॥ २१॥
ततः सुराः शक्तिधरस्य तस्यावष्टम्भतः साध्वसमुत्सृजन्तः।
उत्सेहिरे स्वर्गमनन्तशक्तेर्गन्तुं वनं यूथपतेरिवेभाः॥ २२॥
अथाभिपृष्ठं गिरिजासुतस्य पुरन्दरारातिवधं चिकीर्षोः।
सुरा निरीयुस्त्रिपुरं दिधक्षोरिव स्मरारेः प्रमथाः समन्तात्॥ २३॥
सुराङ्गनानां जलकेलिभाजां प्रक्षालितैः सन्ततमङ्गरागैः।
प्रपेदिरे पिञ्जरवारिपूरां स्वर्गौकसः स्वर्गधुनीं पुरस्तात्॥ २४॥
दिग्दन्तिनां वारिविहारभाजां कराहतैर्भीमतरैस्तरङ्गैः।
आप्लावयन्तीं मुहुरालवालश्रेणीं तरूणां निजतीरजानाम्॥ २५॥
लीलारसाभिः सुरकन्यकाभिर्हिरण्मयीभिः सिकताभिरुच्चैः।
माणिक्यगर्भाभिरुपाहिताभिः प्रकीर्णतीरां वरवेदिकाभिः॥ २६॥
सौरभ्यलुब्धभ्रमरोपगीतैर्हिरण्यहंसावलिकेलिलोलैः ।
चामीकरीयैः कमलैर्विनिद्रैश्च्युतैः परागैः परिपिङ्गतोयाम्॥ २७॥
कुतूहलाद् द्रष्टुमुपागताभिस्तीरस्थिताभिः सुरसुन्दरीभिः।
अभ्यूर्मिराजिप्रतिबिम्बिताभिर्मुदं दिशन्तीं व्रजतां जनानाम्॥ २८॥

की आँखें भी अत्यधिक आनन्दवश उमड़े हुए आँसुओं की लहरों से छलछला आयीं और उनके चारों मुख प्रसन्नता से खिल उठे। उन्होंने अपने चारों मुखों से कुमार के छहों मुखों को विचित्र ढङ्ग से चूमा॥ १९॥ उस समय गन्धर्व, विद्याधर और सिद्धों ने शिवतनय कुमार की 'साधु-साधु' कहते हुए बड़े आनन्दपूर्वक बड़ाई की और यह कहकर उन्हें आनन्दित किया कि 'हे वीर! तुम्हारी विजय हो'॥ २०॥ देवर्षि नारद आदि ने भी शत्रुविजयी होने के इच्छुक कुमार की प्रशंसा की और उनके सुनहले उत्तरीय आदि वस्त्रों से अपने वल्कल बदलकर उनसे भाईचारे का नाता जोड़ लिया॥ २१॥ शक्तिधारी कुमार का सहारा पाकर देवता लोग निडर हो गये और वे उसी उत्साह से स्वर्ग में घुस पड़े, जैसे किसी शक्तिशाली बड़े हाथी का सहारा पाकर छोटे हाथी भी जंगल में घुस जाते हैं॥ २२॥ त्रिपुरासुर को जलाने के लिए जाते समय जैसे शंकरजी के पीछे-पीछे उनके प्रमथ आदि गण गये थे, वैसे ही तारकासुर को मारने के इच्छुक देवता भी कुमार के पीछे-पीछे चले॥ २३॥ सर्वप्रथम उन्हें वह आकाशगंगा दिखलायी दीं, जिनका जल जलविहार करने वाली अप्सराओं के धुले अङ्गों से छूटे हुए अंगराग से रँग जाता था॥ २४॥ जिनके जल में नहाते समय दिक्पालों के हाथी लहरों पर अपनी सूँड़ पटकते हैं और जिनकी लहरों के जल से तट पर खड़े पेड़ों के थाले सदा सिंचते रहते हैं॥ २५॥ जहाँ खेल खेलने आयी हुई देवकन्याओं के हाथ की बनी सुनहरी बालू की वे ऊँची-ऊँची वेदिकाएँ दूर-दूर तक विद्यमान थीं, जो उन्होंने बीच-बीच में माणिक डाल-डालकर खेलने के लिए बनायी थीं॥ २६॥ सुगन्ध के लोभी भौंरें जहाँ सदा गुनगुनाते हैं, सुनहले हंस किलोलें करते हैं और जहाँ ऐसे सोने के कमल खिलते हैं, जिनके पराग से वहाँ का जल पीला पड़ जाता है॥ २७॥ जहाँ देवताओं की सुन्दरियाँ मनबहलाव के लिए आ-आकर तट पर बैठी रहती हैं और तरंगों में पड़ती हुई जिनकी परछाईं उधर से आने-जानेवाले पथिकों का जी लुभा लेती हैं॥ २८॥ बहुत दिनों बाद उस देव-नदी को देखकर इन्द्र प्रसन्न हो उठे और आगे बढ़कर सादर

ननन्द सद्यश्चिरकालदृष्टां विलोक्य शक्रः सुरदीर्घिकां ताम्।
अदर्शयत् सादरमद्रिपुत्रीमहेशपुत्राय ततः पुरोगः॥ २९॥
स कार्तिकेयः पुरतः परीतः सुरैः समस्तैः सुरनिम्नगां ताम्।
अपूर्वदृष्टामवलोकमानः सविस्मयः स्मेरविलोचनोऽभूत्॥ ३०॥
उपेत्य तां तत्र किरीटकोटिन्यस्ताञ्जलिर्भक्तिपरः कुमारः।
गीर्वाणवृन्दैः प्रणुतां प्रणुत्य नम्रेण मूर्ध्ना मुदितो ववन्दे॥ ३१॥
प्रणर्तितस्मेरसरोजराजिः पुरः परीरम्भमिलन्महोर्मिः।
कपोलपालिश्रमवारिहारि भेजे गुहं तं सरितः समीरः॥ ३२॥
ततो व्रजन्नन्दननामधेयं लीलावनं जम्भजितः पुरस्तात्।
विभिन्नभग्नोद्धृतशालसङ्घं प्रेक्षाञ्चकार स्मरशत्रुसूनुः॥ ३३॥
सुरद्विषोपप्लुतमेवमेतद् वनं बलस्य द्विषतो गतश्रि।
इत्थं विचिन्त्यारुणलोचनोऽभूद्भ्रूभङ्गदुष्प्रेक्ष्यमुखः स कोपात्॥ ३४॥
निर्लूनलीलोपवनामपश्यद् दुःसञ्चरीभूतविमानमार्गाम् ।
विध्वस्तसौधप्रचयां कुमारो विश्वैकसाराममरावतीं सः॥ ३५॥
गतश्रियं वैरिवराभिभूतां दशां सुदीनामभितो दधानाम्।
नारीमवीरामिव तामवेक्ष्य स बाढमन्तः करुणापरोऽभूत्॥ ३६॥
दुश्चेष्टिते देवरिपौ सरोषस्तस्याविषण्णः समराय चोत्कः।
तथाविधां तां स विवेश पश्यन्सुरैः सुराधीश्वरराजधानीम्॥ ३७॥
दैतेयदन्तावलदन्तघातैः क्षुण्णान्तराः स्फाटिकहर्म्यपङ्क्तीः।
महाहिनिर्मोकपिनद्धजालाः स वीक्ष्य तस्यां विषसाद सद्यः॥ ३८॥

उन्होंने कुमार को भी वह नदी दिखलायी॥ २९॥ देवताओं से घिरे हुए कार्तिकेयजी को वह नयी नदी देखकर बडा विस्मय हुआ और प्रसन्नता से उनकी आँखें खिल उठीं॥ ३०॥ सब देवता जिसकी स्तुति करते हैं, उस मंदाकिनी के तट पर जाकर कुमार कार्तिकेय ने सिर झुका तथा अपने किरीट के सिरे पर हाथ जोडकर बड़ी भक्ति और प्रसन्न मन से उनकी वन्दना की॥ ३१॥ उस समय खिले हुए कमलों को नचानेवाली तरंगों से गले लगकर चलने और गालों का पसीना सुखानेवाले उस मन्दाकिनी के मन्द पवन ने वहाँ आये हुए कुमार का सत्कार किया॥ ३२॥ वहाँ से आगे जाकर कार्तिकेय ने इन्द्र के नन्दन वन को देखा। वहाँ पर सब साल के पेड या तो उखाड डाले गये थे अथवा जड़ से काट दिये गये थे॥ ३३॥ अब कार्तिकेय ने समझ लिया कि तारकासुर के अत्याचार से ही इन्द्र के इस सुन्दर उपवन की शोभा बिगड़ी है। बस, मारे क्रोध के उनका मुँह लाल हो गया, भौंहें तन गयीं और आँखें आग उगलने लगीं॥ ३४॥ वहाँ से और आगे बढकर कुमार ने विश्व की सर्वश्रेष्ठ नगरी अमरावती देखी। जिसके लीला-उपवन नष्ट-भ्रष्ट हो गये थे, ऊँचे-ऊँचे महल गिरा दिये गये थे और ऐसा उजाड हो गया था कि उधर विमान पर चढकर जाने को भी मन नहीं करता था॥ ३५॥ तारकासुर के हाथों उजडी हुई वह नष्ट-भ्रष्ट और सुनसान नगरी देखकर कार्तिकेय को उसी प्रकार बडी दया आयी, जैसे किसी नपुंसक की स्त्री को देखकर दया आ जाती है॥ ३६॥ अमरावती की दुर्दशा देखते ही कुमार उस दुष्ट दैत्य पर बहुत क्रुद्ध हो उठे और युद्ध के लिए उतावले होकर देवताओं की राजधानी में घुसे॥ ३७॥ वहाँ के स्फटिक-निर्मित बडे-बड़े भवन दैत्यों के हाथियों के दाँतों की टक्करों से टूट-फूट गये थे और जहाँ-तहाँ

उत्कीर्णचामीकरपङ्कजानां दिग्दन्तिदानद्रवदूषितानाम्।
हिरण्यहंसव्रजवर्जितानां विदीर्णवैदूर्यमहाशिलानाम्॥ ३९॥
आविर्भवद्बालतृणाञ्चितानां तदीयलीलागृहदीर्घिकाणाम्।
स दुर्दशां वीक्ष्य विरोधिजातां विषादवैलक्ष्यभरं बभार॥ ४०॥
तद्दन्तिदन्तक्षतहेमभित्ति सुतन्तुजालाकुलरत्नजालम्।
निन्ये सुरेन्द्रेण पुरोगतेन स वैजयन्ताभिधमात्मसौधम्॥ ४१॥
निर्दिष्टवर्त्मा विबुधेश्वरेण सुरैः समग्रैरनुगम्यमानः।
स प्राविशत्तं विविधाश्मरश्मिच्छिन्नेन सोपानपथेन सौधम्॥ ४२॥
निसर्गकल्पद्रुमतोरणं तं स पारिजातप्रसवप्रगाढ्यम्।
दिव्यैः कृतस्वस्त्ययनं मुनीन्द्रैरन्तःप्रविष्टप्रमदं प्रपेदे॥ ४३॥
पादौ महर्षेः किल कश्यपस्य कुलादिवृद्धस्य सुरासुराणाम्।
प्रदक्षिणीकृत्य कृताञ्जलिः सन् षड्भिः शिरोभिः स ननैर्ववन्दे॥ ४४॥
स देवमातुर्जगदेकवन्द्यौ पादौ तथैव प्रणनाम काममम्।
मुनेः कलत्रस्य च तस्य भक्त्या प्रह्वीभवञ्शैलसुतातनूजः॥ ४५॥
स कश्यपः सा जननी सुराणां तमेधयामासतुराशिषा द्वौ।
तया यया नैकजगज्जिगीषुं जेता मृधे तारकमुग्रवीर्यम्॥ ४६॥
स्वदर्शनार्थं समुपेयुषीणां सुदेवतानामदितिश्रितानाम्।
पादौ ववन्दे पतिदेवतास्तमाशीर्वचोभिः पुनरभ्यनन्दन्॥ ४७॥

बड़े-बड़े साँपों की केचुलियाँ बिखरी पड़ी थीं। यह सब देखकर कुमार को बड़ा क्लेश हुआ॥ ३८॥ वहाँ उन्होंने देखा कि देवताओं के विलासभवनों में बनी बावलियों में से सोने के कमल उखाड़ डाले गये थे, दिग्गजों के मद से उनका जल गँदला हो गया था, सुनहले हंस वहाँ से उड़ गये थे, पन्नों की बनी बड़ी-बड़ी पटियाँ भी टूट गयी थीं और चारों ओर छोटी-छोटी घासें उग आयी थीं। शत्रुओं के हाथों स्वर्ग की यह दुर्दशा देखकर उनका मन दुःख से भर गया॥ ३९-४०॥ तदनन्तर इन्द्र कुमार को अपने उस वैजयन्त नाम के भवन में ले गये, जहाँ की सुनहली दीवारें दैत्यों के हाथियों के दाँतों की टक्करों से फट गयी थीं और मकड़ियों ने जाले तान दिये थे॥ ४१॥ आगे-आगे राह बतलाते हुए इन्द्र चल रहे थे और उनके पीछे-पीछे सब देवता थे। विविध रत्नों की चमक से सुहावनी सीढ़ियों पर चढ़कर कुमार कार्तिकेय उस भवन में गये॥ ४२॥ वहाँ से सब लोग उस सुन्दर भवन में पहुँचे, जहाँ कल्पवृक्ष स्वयं बन्दनवार बना हुआ था। जहाँ ढेर के ढेर पारिजात के फूल बिखरे पड़े थे, जहाँ देवर्षियों ने स्वस्ति-पाठ किया था और जहाँ एक से एक बढ़कर अप्सराएँ रहती थीं॥ ४३॥ वहाँ देव-दानव वंश के सबसे वयोवृद्ध महर्षि कश्यप के चरणों की प्रदक्षिणा करके कुमार ने अपने छहों सिरों से उन्हें प्रणाम किया॥ ४४॥ बड़ी भक्ति से कुमार ने कश्यप की स्त्री और देवों की माता अदिति के उन चरणों को भी भलीभाँति नतमस्तक होकर प्रणाम किया, जिन्हें सारा संसार पूजता है॥ ४५॥ तब कश्यप और देव-माता अदिति ने कुमार को यह आशीर्वाद देकर उनका उत्साह बढ़ाया कि तीनों लोकों को जीतने वाले शक्तिशाली तारकासुर को तुम युद्ध में अवश्य परास्त करोगे॥ ४६॥ तभी अदिति के यहाँ देवाङ्गनाएँ भी कुमार को देखने के लिए आ पहुँचीं। कुमार ने उनको भी प्रणाम किया और उन सब पतिव्रताओं ने कुमार

पुलोमपुत्रीं विबुधाधिभर्तुस्ततः शचीं नाम कलत्रमेषः।
नमश्चकार स्मरशत्रुसूनुस्तमाशिषा सा समुपाचरच्च॥ ४८॥
अथादितीन्द्रप्रमदाः समेतास्ता मातरः सप्त घनप्रमोदाः।
उपेत्य भक्त्या नमते महेशपुत्राय तस्मै ददुराशिषः प्राक्॥ ४९॥
समेत्य सर्वेऽपि मुदं दधाना महेन्द्रमुख्यास्त्रिदिवौकसोऽथ।
आनन्दकल्लोलितमानसं तं समभ्यषिञ्चन् पृतनाधिपत्ये॥ ५०॥
सकलविबुधलोकः प्रस्तनिःशेषशोकः कृतरिपुविजयाशः प्राप्तयुद्धावकाशः।
अजनि हरसुतेनानन्तवीर्येण तेनाखिलविबुधचमूनां प्राप्य लक्ष्मीमनूनाम्॥ ५१॥

इति महाकविकालिदासकृतौ कुमारसम्भवे महाकाव्ये कुमार-
सैनापत्याभिषेको नाम त्रयोदशः सर्गः॥ १३॥

को आशीर्वाद दे-देकर उनका मान बढ़ाया॥ ४७॥ तदनन्तर कुमार ने इन्द्र की पत्नी शची को प्रणाम किया और उन्होंने भी आशीष देकर उनका उत्साह बढ़ाया॥ ४८॥ अब कुमार ने कश्यप की उन सातों पत्नियों के पास जाकर बड़ी भक्ति से प्रणाम किया, जो बड़े आनन्द से वहाँ बैठी हुई थीं। उन्होंने प्रणाम करने से पहले ही कुमार को विजय-प्राप्ति का आशीर्वाद दे दिया॥ ४९॥ इसके बाद इन्द्र आदि सभी देवताओं ने आनन्द के साथ एकत्र होकर प्रसन्न कुमार कार्तिकेय को अपना सेनापति बनाया॥ ५०॥ इस प्रकार जब अनन्त शक्तिशाली कुमार कार्तिकेय देवताओं की समस्त सेना के सेनापति हो गये, तब देवताओं को विश्वास हो गया कि अब हम लोग युद्ध में शत्रुओं को अवश्य जीतेंगे। यह सोचकर उनका सारा शोक लुप्त हो गया॥ ५१॥

इस प्रकार महाकविकालिदासरचित कुमारसम्भवमहाकाव्य में कुमार का सेनापतिपद पर अभिषेक नामक तेरहवाँ सर्ग समाप्त॥ १३॥

चतुर्दशः सर्गः

रणोत्सुकेनान्धकशत्रुसूनुना समं प्रयुक्तैस्त्रिदशैर्जिगीषुणा।
महासुरं तारकसंज्ञकं द्विषं प्रसह्य हन्तुं समनह्यत द्रुतम्॥१॥
स दुर्निवारं मनसोऽतिवेगिनं जयश्रियः सन्नयनं सुदुःसहम्।
विजित्वरं नाम तदा महारथं धनुर्धरः शक्तिधरोऽध्यरोहयत्॥२॥
सुरालयश्रीविपदां निवारणं सुरारिसम्पत्परितापकारणम्।
केनापि दध्रेऽस्य विरोधिदारणं सुचारु चामीकरधर्मवारणम्॥३॥
शरच्चरच्चन्द्रमरीचिपाण्डुरैः स वीज्यमानो वरचारुचामरैः।
पुरःसरैः किन्नरसिद्धचारणैः रणेच्छुरस्तूयत वाग्भिरुल्बणैः॥४॥
प्रयाणकालोचितचारुवेषभृद्वज्रं वहन् पर्वतपक्षदारणम्।
ऐरावतं स्फाटिकशैलसोदरं ततोऽधिरुह्य द्युपतिस्तमन्वगात्॥५॥
तमन्वगच्छद्गिरिशृङ्गसोदरं मदोद्धतं मेषमधिष्ठितः शिखी।
विरोधिविद्वेषरुषाधिकं ज्वलन् महोमहीयस्तरमायुधं दधत्॥६॥
अथेन्द्रनीलाचलचण्डविग्रहं विषाणविध्वस्तमहापयोधरम्।
अधिष्ठितः कालरमुद्धतं मुदा वैवस्वतो दण्डधरस्तमन्वगात्॥७॥
मदोद्धतं प्रेतमथाधिरूढवाँस्तमन्धकद्वेषितनूजमन्वगात्।
महासुरद्वेषविशेषभीषणः सुरोषणश्चण्डरणाय नैर्ऋतः॥८॥
नवोद्यदम्भोधरघोरदर्शने युद्धाय रूढो मकरे महत्तरे।
दुर्वारपाशो वरुणो रणोल्बणस्तमन्वियाय त्रिपुरान्तकात्मजम्॥९॥

विजय की कामना से लड़ने को उद्यत कुमार कार्तिकेय की प्रेरणा से सब देवता मिलकर बलपूर्वक तारक को मार डालने के लिए अस्त्र-शस्त्र बाँधने लगे॥१॥ तब धनुर्धर तथा शक्तिशाली कुमार अपने 'विजित्वर' नाम के उस बड़े भारी रथ पर जा चढे, जो मन से भी अधिक वेग से चलता था, जो किसी के रोकने से रुकता नहीं था और जिस पर चढकर लड़ने से सदा विजय मिलती थी॥२॥ उसी समय किसी ने उन पर एक शत्रुनाशक सोने का छत्र लाकर लगा दिया, जो स्वर्ग की लक्ष्मी को सुखदायक तथा दैत्यों की सम्पत्ति का नाशक था॥३॥ कुमार के दोनों ओर शरत्कालीन चन्द्रमा की किरणों के सदृश श्वेत चँवर डुल रहे थे और उनके आगे किन्नर, सिद्ध और चारण युद्धप्रेमी कुमार की बड़ाई के गीत गा रहे थे॥४॥ युद्ध का साज सजा तथा पर्वतों के पंख काटनेवाला वज्र लेकर इन्द्र भी स्फटिक पर्वत के समान उजले और ऊँचे ऐरावत हाथी पर चढकर उनके पीछे-पीछे चले॥५॥ शत्रु पर क्रोध के मारे और भी अधिक जलते हुए अग्निदेव भी पर्वत-शिखर के समान ऊँचे और बिगड़ैल मेढ़े पर चढ तथा बड़ा भयंकर और दहकता हुआ शस्त्र हाथ में लेकर कुमार के साथ चल पड़े॥६॥ हाथ में दंड लेकर यमराज भी अपने नीलम के पहाड़ जैसे ऊँचे और काले उस भैंसे पर चढ़कर कुमार कार्तिकेय के पीछे चले, जो अपनी सींगों से बादलों को फाड़ता चलता था॥७॥ नैर्ऋत्य दिशा का स्वामी नैर्ऋत राक्षस भी तारक से चिढ़कर बड़ा भयानक हो गया और शत्रु से लड़ने के लिए मतवाले प्रेत पर चढकर कुमार के पीछे-पीछे चल पड़ा॥८॥ हाथ में अपना अमोघ पाश लिये हुए बडे बलवान् वरुणदेव अपने

दिगम्बराधिक्रमणोल्बणं क्षणान्मृगं महीयांसमरुद्धविक्रमम्।
अधिष्ठितः सङ्गरकेलिलालसो मरुन्महेशात्मजमन्वगाद् द्रुतम्॥ १०॥
विरोधिना शोणितपारणैषिणीं गदामनूनां नरवाहनो वहन्।
महाहवाम्भोधिविगाहनोद्धतं यियासुमन्वागमदीशनन्दनम्॥ ११॥
महाहिनिर्बद्धजटाकलापिनो ज्वलत्त्रिशूलप्रबलायुधा युधे।
रुद्रास्तुषाराद्रिसखं महावृषं ततोऽधिरूढास्तमयुः पिनाकिनः॥ १२॥
अन्येऽपि सन्नह्य महारणोत्सवश्रद्धालवः स्वर्गिगणास्तमन्वयुः।
स्ववाहनानि प्रबलान्यधिष्ठिताः प्रमोदविस्मेरमुखाम्बुजश्रियः॥ १३॥
उद्दण्डहेमध्वजदण्डसङ्कुलाश्चञ्चद्विचित्रातपवारणोज्ज्वलाः ।
चलद्घनस्यन्दनघोषभीषणाः करीन्द्रघण्टारवचण्डचीत्कृताः॥ १४॥
स्फुरद्विचित्रायुधकान्तिमण्डलैरुद्द्योतिताशावलयाम्बरान्तराः।
दिवौकसां सोऽनुवहन्महाचमूः पिनाकपाणेस्तनयस्ततो ययौ॥ १५॥
कोलाहलेनोच्चलतां दिवौकसां महाचमूनां गुरुभिर्ध्वजव्रजैः।
घनैर्निरुच्छ्वासमभूदनन्तरं दिङ्मण्डलं व्योमतलं महीतलम्॥ १६॥
सुरारिलक्ष्मीपरिकम्पहेतवो दिक्चक्रवालप्रतिनादमेदुराः।
नभोऽन्तकुक्षिम्भरयो घनाः स्वना निहन्यमानैः पटहैर्वितेनिरे॥ १७॥
प्रमथ्यमानाम्बुधिगर्जितर्जनैः सुरारिनारीगणगर्भपातनैः।
नभश्चमूधूलिकुलैरिवाकुलं ररास गाढं पटहप्रतिस्वनैः॥ १८॥

उस बड़े भारी घडियाल पर बैठकर युद्ध के लिए कुमार के पीछे-पीछे चले, जो नयी उठी हुई घटा के समान काला था॥ ९॥ लड़ाई की इच्छा से क्षणभर में तैयार होकर पवनदेव भी अपने उस पराक्रमी हरिण पर बैठकर कुमार के पीछे चल पड़े, जो पृथ्वी और आकाश में सर्वत्र विना रुके चौकडी भरता चलता था॥ १०॥ जो शत्रुओं का लहू पीकर ही व्रत का पारण करती थी, वह भारी गदा लेकर कुबेर उस पालकी पर चढकर कुमार के पीछे चले, जिसे मनुष्य ढो रहे थे॥ ११॥ अपने-अपने हाथों में पिनाक धनुष और जलते हुए त्रिशूल ले तथा अपने जटा-जूटों को बड़े-बडे साँपों से कसकर हिमालय जैसे उजले बैलों पर चढ़कर ग्यारहों रुद्र कुमार के पीछे-पीछे चले॥ १२॥ उस महायुद्ध के उत्सव में रुचि रखने वाले दूसरे सब देवता भी अपने-अपने तगडे वाहनों पर चढ तथा आनन्द से हँसकर अपना मुख-कमल खिलाते हुए कार्तिकेय के साथ चल पड़े॥ १३॥ इस प्रकार सब साजों से सजी हुई, अगणित सोने के डंडे ऊपर उठाकर चलती, चमचमाते हुए रंग-बिरंगे छत्र चमकाती, झुण्ड के झुण्ड चलने वाले रथों की घरघराहट से भयंकर लगती, मतवाले हाथियों के घण्टों की टन-टन ध्वनि और उनके चिग्घाड़ों से कान फाड़ती हुई तथा अनेक प्रकार से झिलमिलाते अस्त्र-शस्त्रों की चमक से चारों दिशाओं और आकाश को चमकाती हुई देवताओं की उस महासेना को लिये हुए वीर कुमार कार्तिकेय चले॥ १४-१५॥ उछलते-कूदते चलने वाले देवताओं के कोलाहल और उस बड़ी भारी सेना की ऊँची-ऊँची तथा बड़ी-बड़ी ध्वजाओं से दसों दिशाएँ, आकाश और पृथ्वी सब एक-से दीखने लगे॥ १६॥ सब दिशाओं में प्रतिध्वनित होती हुई उनके नगाड़ों की घनघोर ध्वनि की गूँज सुनकर दैत्यों की राजलक्ष्मी भी काँप उठी॥ १७॥ सेना के चलने से उड़ी हुई धूल से भरा आकाश ऐसा लगता था, जैसे मथने के समय समुद्र के गर्जन से भी अधिक डरावनी ध्वनिवाले और दैत्यों की स्त्रियों के गर्भ गिराने वाले नगाड़ों की धमक सुनकर आकाश रो पड़ा हो॥ १८॥ सुमेरु पर्वत की धूल इस ढङ्ग से आकाश में पहुँची कि पहले रथों ने पहिए

क्षुण्णं रथैर्वाजिभिराहतं खुरैः करीन्द्रकर्णैः परितः प्रसारितम्।
धूतं ध्वजैः काञ्चनशैलजं रजो वातैर्हृतं व्योम समारुहत्क्रमात्॥ १९॥
खातं खुरै रय्यतुरङ्गपुङ्गवैरुपत्यकाहाटकमेदिनीरजः।
गतं दिगन्तान्मुखरैः समीरणैः सुविभ्रमं भूरि बभार भूयसा॥ २०॥
अधस्तथोर्ध्वं पुरतोऽथ पृष्ठतोऽभितोऽपि चामीकररेणुरुच्चकैः।
चमूषु सर्पन्मरुदाहतोऽहरन्नवीनसूर्यस्य च कान्तिवैभवम्॥ २१॥
बलोद्धृतं काञ्चनभूमिजं रजो बभौ दिगन्तेषु नभःस्थले स्थितम्।
अकालसन्ध्याघनरागपिङ्गलं घनं घनानामिव वृन्दमुद्यतम्॥ २२॥
हेमावनीषु प्रतिबिम्बमात्मनो मुहुर्विलोक्याभिमुखं महागजाः।
रसातलोत्तीर्णगजभ्रमात् क्रुधा दन्तप्रकाण्डप्रहृतानि तेनिरे॥ २३॥
सुजातसिन्दूरपरागपिञ्जरैः कलं चलद्भिः सुरसैन्यसिन्धुरैः।
शुद्धासु चामीकरशैलभूमिषु नादृश्यत स्वं प्रतिबिम्बमग्रतः॥ २४॥
इति क्रमेणामरराजवाहिनी महाहवाम्भोधिविलासलालसा।
अवातरत् काञ्चनशैलतो द्रुतं कोलाहलाक्रान्तविधूतकन्दरा॥ २५॥
महाचमूस्यन्दनचण्डचीत्कृतैर्विलोलघण्टेभपतेश्च बृंहितैः।
सुरैन्द्रशैलेन्द्रमहागुहाशयाः सिंहा महत्स्वप्नसुखं न तत्यजुः॥ २६॥
गम्भीरभेरीध्वनितैर्भयङ्करैर्महागुहान्तप्रतिनादमेदुरैः ।
महारथानां गुरुनेमिनिःस्वनैरनाकुलैस्तैर्मृगराजताऽजनि॥ २७॥

से मिट्टी उखाड़ी, घोड़ों ने अपने टापों से खूँद-खूँदकर उसे महीन कर दिया, हाथियों ने अपने कान हिला-हिलाकर उसे चारों ओर फैला दिया, लहराती हुई झाड़ियों ने उस धूल को इधर-उधर बिखेर दिया और तब वायु उसे आकाश में उड़ा ले गया॥ १९॥ सुमेरु की तलहटी से उठी हुई वह सुनहली धूल रथ खींचनेवाले उत्तम घोड़ों के खुरों से पिसकर हरहराते हुए पवन के सहारे सभी दिशाओं में फैलकर चमकने लगी॥ २०॥ वायु के सहारे सेना के ऊपर-नीचे, आगे-पीछे और चारों ओर फैली हुई वह सुनहली धूल इतनी सुन्दर लगती थी कि निकलते हुए सूर्य की सुनहरी धूप भी उसके आगे तुच्छ लगती थी॥ २१॥ सेना के चलने से उड़ी हुई वह सुनहरी धूल सब दिशाओं और आकाश में भरकर ऐसी सुन्दर दीखने लगी, जैसे सन्ध्या हुए बिना ही सुनहले बादलों के झुण्ड उमड़कर आकाश में छा गये हों॥ २२॥ सेना के साथ चलनेवाले हाथियों ने वहाँ की सुनहरी धरती पर अपनी परछाईं देखी तो उन्होंने समझा कि ये पाताल से निकले हुए बड़े-बड़े हाथी हैं। इसीलिए बहुत बिगड़कर वे उन प्रतिबिम्बों पर ही अपने बड़े-बड़े दाँतों से टक्कर मारने लगे॥ २३॥ बढ़िया सिन्दूर से रंगे हुए और धीरे-धीरे चलनेवाले उन देवताओं की सेना के हाथियों को सुमेरुगिरि की चमकदार सोने की धरती पर भी अपनी परछाईं ठीक-ठीक नहीं दीखती थी, क्योंकि दोनों का रंग एक जैसा था॥ २४॥ इस प्रकार युद्ध के समुद्र में तैरने को उद्यत देवराज इन्द्र की सेना अपने कोलाहल से गुफाओं को गुँजाती हुई सुमेरु पर्वत से बड़े वेग के साथ नीचे उतरी॥ २५॥ देवताओं की उस विशाल सेना के रथों की घोर घरघराहट तथा बजते हुए घण्टों और बड़े-बड़े हाथियों के चिग्घाड़ों की विकराल ध्वनि होते हुए भी सुमेरु पर्वत की बड़ी-बड़ी गुफाओं में सोनेवाले सिंहों ने अपनी नींद का सुख नहीं छोड़ा, वे सोते ही रहे॥ २६॥ गुफाओं में गूँजते हुए नगाड़ों की गम्भीर तथा भयंकर ध्वनि और बड़े-बड़े रथों के पहियों की घड़घड़ाहट गुफाओं से टकराकर दूनी गूँज रही थी। फिर भी वहाँ के सिंह ज्यों के त्यों बैठे रहे। ऐसा करके उन्होंने

समुत्थितेन त्रिदिवौकसां महाचमूरवेणाद्रितटान्तदारिणा ।
प्रपेदिरे केसरिणोऽधिकं मदं स्ववीर्यलक्ष्मीमृगराजतावशात् ॥ २८ ॥
भिया सुरानीकविमर्दजन्मना विदुद्रुवुर्दूरतरं द्रुतं मृगाः ।
गुहागृहान्ताद्बहिरेत्य हेलया तस्थुर्विशङ्कं नितरां मृगाधिपाः ॥ २९ ॥
विलोकिताः कौतुकिनाऽमरावतीजनेन जुष्टप्रमदेन दूरतः ।
सुराचलप्रान्तभुवः प्रपेदिरे सुविस्तृतायाः प्रसरं सुसैनिकाः ॥ ३० ॥
पीतासितारक्तसितैः सुराचलप्रान्तस्थितैर्धातुरजोभिरम्बरम् ।
अयत्नगन्धर्वपुरोदयभ्रमं बभार भूम्नोत्पतितैरितस्ततः ॥ ३१ ॥
महास्वनः सैन्यविमर्दसम्भवः कर्णान्तकूलङ्कषतामुपेयिवान् ।
पयोनिधेः क्षुब्धतरस्य वर्धनो बभूव भूम्ना भुवनोदरम्भरिः ॥ ३२ ॥
महागजानां गुरुबृंहितैस्ततैः सुहेषितैर्घोरतरैश्च वाजिनाम् ।
घनै रथानां गुरुचण्डचीत्कृतैस्तिरोहितोऽभूत्पटहस्य निःस्वनः ॥ ३३ ॥
महासुराणामवरोधयोषितां कचाक्षिपक्ष्मस्तनमण्डलेषु च ।
ध्वजेषु नागेषु रथेषु वाजिषु क्षणेन तस्थौ सुरसैन्यजं रजः ॥ ३४ ॥
घनैर्विलोक्य स्थगितार्कमण्डलैश्चमूरजोभिर्निचितं नभःस्थलम् ।
अयायि हंसैरभिमानसं घनभ्रमेण सानन्दमनर्तिं केकिभिः ॥ ३५ ॥
सान्द्रैः सुरानीकरजोभिरम्बरे नवाम्बुदानीकनिभैरमिश्रिते ।
चकाशिरे स्वर्णमया महाध्वजाः परिस्फुरन्तस्तडिताङ्गणा इव ॥ ३६ ॥
विलोक्य धूलीपटलैर्भृशं भृतं द्यावापृथिव्योरलमन्तरं महत् ।
किमूर्ध्वतोऽधः किमधस्त उर्ध्वतो रजोऽभ्युपैतीति जनैरतर्क्यत ॥ ३७ ॥

यह सिद्ध कर दिया कि हम मृगराज हैं ॥ २७ ॥ सुमेरु की चट्टानों को फोड़नेवाली देवताओं की उस महासेना के चलने से जो कोलाहल हो रहा था, उसे सुन-सुनकर वे सिंह और भी मस्त हो उठे, जो अपने बूते पर सब पशुओं के राजा बने हुए थे ॥ २८ ॥ वहाँ जितने हरिण थे, वे सब तो इस डर से चौकड़ी भरकर दूर भाग गये कि कहीं देवताओं की सेना हमें न मार डाले। परन्तु जितने सिंह थे, वे अपनी गुफाओं के बाहर निकल-निकलकर खड़े हो गये ॥ २९ ॥ वे सैनिक जब उस ऊँचे सुमेरु पर्वत की तलहटी में उतरे, उस समय अमरावती में रहनेवाले स्त्री-पुरुष उन्हें बड़े चाव से देखने लगे ॥ ३० ॥ सुमेरु पर्वत की पीली, नीली, लाल और उजली चट्टानों की उड़ी हुई धूल से भरा हुआ आकाश ऐसा लगने लगा, जैसे बिना परिश्रम के ही वह अनेक रत्नों से परिपूर्ण गन्धर्वनगर बन गया हो ॥ ३१ ॥ कानों के परदे फाड़नेवाला देवसेना का वह उठता हुआ घनघोर शब्द हड़हड़ाते हुए समुद्र के कोलाहल से भी अधिक बढ़कर सारे ब्रह्माण्ड में गूँज उठा ॥ ३२ ॥ यहाँ तक कि मतवाले हाथियों की भारी चिग्घाड, घोड़ों की हिनहिनाहट और चलते हुए रथों की घोर घरघराहट में गम्भीर और कान फाड़नेवाली नगाड़ों की ध्वनि बिलकुल दब गयी ॥ ३३ ॥ क्षणभर में ही देवसेना के चलने से उड़ी हुई धूल धीरे-धीरे दैत्यों की स्त्रियों के बालों, आँखों, अलकों और स्तनों पर बैठती हुई उनकी पताकाओं, हाथियों, रथों और घोड़ों पर जा पहुँची ॥ ३४ ॥ जब सेना की घनी धूल सूर्य को ढँककर आकाश में छा गयी तो हंसों ने समझा कि ये बादल हैं। बरसात आयी जानकर वे मानसरोवर की ओर उड़ चले और मोर मस्ती के साथ नाचने लगे ॥ ३५ ॥ सेना के चलने से उड़ी हुई धूल आकाश में नये बादलों की पाँत जैसे दीखने लगी और सुनहली पताकाएँ चमचमाती हुई बिजली की लहरों की भाँति चमकने लगीं ॥ ३६ ॥ आकाश

नोर्ध्वं न चाधो न पुरो न पृष्ठतो न पार्श्वतोऽभूत्खलु चक्षुषोर्गतिः।
सूच्यग्रभेद्यैः पृतनारजश्चयैराच्छादिता प्राणिगणस्य सर्वतः॥ ३८॥
दिगन्तदन्तावलदानहारिभिर्विमानरन्ध्रप्रतिनादमेदुरैः ।
अनेकवाद्यध्वनितैरनारतैर्जगर्ज गाढं गुरुभिर्नभस्तलम्॥ ३९॥
भुवं विगाह्य प्रययौ महाचमूः क्वचिन्न मान्ती महतीं दिवं खलु।
सुसङ्कुलायामपि तत्र निर्भरात्किं कान्दिशीकत्वमवाप नाकुला॥ ४०॥
उद्दामदानद्विपवृन्दबृंहितैर्नितान्तमुत्तुङ्गतुरङ्गहेषितैः ।
चलद्घनस्यन्दननेमिनिःस्वनैरभून्निरुच्छ्वासमिवाकुलं जगत्॥ ४१॥
महागजानां गुरुभिस्तु गर्जितैर्विलोलघण्टारणितै रणोल्बणैः।
वीरप्रणादैः प्रमदप्रमेदुरैर्वाचालतामादधिरेतरां दिशः॥ ४२॥
दन्तीन्द्रदानद्रववारिवीचिभिः सद्योऽपि नद्यो बहुधा पुपूरिरे।
धारा रजोभिस्तुरगैः क्षतैर्भृता याः पङ्कतामेत्य रथैः स्थलीकृताः॥ ४३॥
निम्नाः प्रदेशाः स्थलतामुपागमन्निम्नत्वमुच्चैरपि सर्वतश्च ते।
तुरङ्गमाणां व्रजतां खुरैः क्षता रथैर्गजेन्द्रैः परितः समीकृताः॥ ४४॥
नभोदिगन्तप्रतिघोषभीषणैर्महामहीभृत्तटदारणोल्बणैः ।
पयोधिनिर्धूननकेलिभिर्जगद् बभूव भेरीध्वनितैः समाकुलम्॥ ४५॥
इतस्ततो वातविधूतचञ्चलैर्नीरन्ध्रिताशागमनैर्ध्वजांशुकैः।
लक्षैः क्वणत्काञ्चनकिङ्किणीकुलैरमज्जि धूलीजलधौ नभोगते॥ ४६॥

और पृथ्वी के बीचोंबीच छायी हुई इस धूल को देखकर लोग यही सोचते रह गये कि यह धूल ऊपर से नीचे उतर रही है या नीचे से ऊपर चढ़ रही है॥ ३७॥ सेना के चलने से उड़ी हुई धूल ऐसी छा गयी कि सुई की नोक बराबर स्थान खाली नहीं रह गया। अतएव सब की आँखों के आगे ऐसा अँधेरा छा गया कि किसी को भी नीचे-ऊपर, आग-पीछे, इधर-उधर कहीं कुछ दीखता ही नहीं था॥ ३८॥ उस सेना में अनेक बाजे निरंतर बज रहे थे, जिनकी घनघोर ध्वनि सुनकर मतवाले हाथियों का मद भी सूख जाता था। वह ध्वनि विमानों की छतरियों से टकराकर और भी जोर से गूँज उठती थी। उन्हें सुनकर ऐसा लगता था कि जैसे आकाश ही घनघोर गर्जन कर रहा है॥ ३९॥ देवताओं की वह महासेना पहले तो सारी धरती में भर गयी, परन्तु वहाँ न समा सकने के कारण आकाश में जा पहुँची और जब वहाँ भी नहीं समा सकी तो जैसे वह यह समझकर घबरा गयी कि अब यहाँ से कहाँ चला जाय॥ ४०॥ मतवाले हाथियों की चिग्घाड़, अत्यंत ऊँचे घोड़ों की हिनहिनाहट और चलने वाले रथों की घड़घड़ाहट से लोग ऐसे घबरा उठे कि जैसे उनकी साँस घुटी जा रही हो॥ ४१॥ बड़े-बड़े हाथियों की चिग्घाड़, उनके हिलते हुए घंटों की टन-टन ध्वनि और मतवाले वीरों की ललकार चारों ओर फैलकर ऐसी लग रही थी कि जैसे दसों दिशाएँ कोलाहल मचा रही हों॥ ४२॥ बड़े-बड़े हाथियों का मद इतना बहा कि उससे सूखी हुई नदियों में भी तुरन्त बाढ़ आ गयी। फिर घोड़ों की खुरों से उड़ी हुई धूल भर जाने से उन नदियों में कीचड़ ही कीचड़ हो गया। किन्तु रथों के पहियों से दबकर वहाँ पर फिर ज्यों की त्यों धरती निकल आयी॥ ४३॥ चलते हुए घोड़ों के खुरों से रौंदी जाने पर और रथों तथा हाथियों के चलने से दब जाने पर नीचे के स्थान ऊँचे हो गये और ऊँचे स्थान नीचे हो गये॥ ४४॥ बड़े से बड़े पहाड़ों को फोड़ देने और समुद्र में हलचल मचा देनेवाली नगाड़े की ध्वनि आकाश और दिशाओं में गूँजी तो उसकी और भी भयानक प्रतिध्वनि सुनकर सारा संसार घबरा गया॥ ४५॥ उस

घण्टारवै रौद्रतरैर्निरन्तरं विसृत्वरैर्गर्जिरवैः सुभैरवैः।
मत्तद्विपानां प्रथयाम्बभूविरे न वाहिनीनां पटहस्य निःस्वनाः॥ ४७॥
करालवाचालमुखाश्चमूस्वनैर्ध्वस्ताम्बरा वीक्ष्य दिशो रजस्वलाः।
तिरोबभूवे गहनैर्दिनेश्वरो रजोऽन्धकारैः परितः कुतोऽप्यसौ॥ ४८॥
आक्रान्तपूर्वा रभसेन सैनिकैर्दिगङ्गना व्योम रजोभिदूषिता।
भेरीरवाणां प्रतिशब्दितैर्घनैर्जगर्ज गाढं घनमत्सरादिव॥ ४९॥
गुरुसमीरसमीरितभूधरा इव गजा गगनं विजगाहिरे।
गुरुतरा इव वारिधरा रथा भुवमितीह विवर्त इवाभवत्॥ ५०॥
बलमदसुरलोकानल्पकल्पान्तकाले निरवधय इवाम्भोराशयो घोरघोषाः।
गुरुतरपरिमज्जद्भूभृतो देवसेना ववृधुरपि सुपूर्णा व्योमभूम्यन्तराले॥ ५१॥

इति महाकविकालिदासकृतौ कुमारसम्भवे महाकाव्ये
देवसेनाप्रयाणं नाम चतुर्दशः सर्गः॥ १४॥

सेना की वजते हुए घुँघुरुओं युक्त लाखों झंडियाँ सारे आकाश में भरकर मार्ग रोके हुए वायु के झोंके से फरफरा रही थीं। वे भी उस सेना के चलने से उड़ी हुई धूल के समुद्र में डूब गयीं॥ ४६॥ मतवाले हाथियों की गूँजती हुई चिग्घाड और पल-पल में भयंकर होकर बढती हुई घंटे की ध्वनि के आगे नगाड़ों का शब्द सुनायी ही नहीं दे रहा था॥ ४७॥ जैसे किसी हल्ला मचानेवाली नंगी रजस्वला स्त्री को देखकर लोग आड़ कर लेते हैं, वैसे ही सेना के शब्द से घोर कोलाहल करती हुई और आकाशरूपी वस्त्र को फाड़कर रज से भरी हुई दिशारूपिणी नायिका को देखकर सूर्य ने चारों ओर फैले हुए धूल के बने अँधेरे की ओट करके अपने को छिपा लिया॥ ४८॥ सेना में जो नगाडे बज रहे थे, उनका शब्द ऐसा लग रहा था कि जैसे आकाशरूपी नायक धूल से भरी हुई अपनी दिशारूपिणी रजस्वला नायिका पर सैनिकों का इतना बड़ा आक्रमण देखकर घोर ईर्ष्या से गरज रहा हो॥ ४९॥ आकाश में बडे-बड़े हाथी इधर-उधर घूम रहे थे, जैसे किसी बडी भारी आँधी से पहाड़ी चट्टानें ऊपर उड़ रही हों। भूमि पर रथ इस प्रकार चलते थे, जैसे बड़े-बडे बादल चल रहे हों। उस युद्ध में ऐसा जान पड़ता था कि मानो पृथ्वी के पहाड़ आकाश में और आकाश के बादल धरती पर चल रहे हों॥ ५०॥ भीषण कोलाहल मचाती हुई बड़े-बड़े राजाओं से भरी वह देवसेना भली प्रकार चारों ओर से परिपूर्ण होने पर भी और अधिक बढने लगी। उसे देखकर ऐसा लगता था कि मानो बलवान् असुरों के इस महाप्रलय के समय घोररूप से गरजता हुआ महासागर उमड़ पडा हो॥ ५१॥

इस प्रकार महाकविकालिदासरचित कुमारसम्भवमहाकाव्य में देवसेना का
प्रस्थान नामक चौदहवाँ सर्ग समाप्त॥ १४॥

पञ्चदशः सर्गः

सेनापतिं नन्दनमन्धकद्विषो युधे पुरस्कृत्य बलस्य शात्रवः।
सैन्यैरुपैतीति सुरद्विषां पुरोऽभूत् किंवदन्ती हृदयप्रकम्पिनी॥ १॥
चमूप्रभुं मन्मथमर्दनात्मजं विजित्वरीभिर्विजयश्रियाश्रितम्।
श्रुत्वा सुराणां पृतनाभिरागतं चित्ते चिरं चुक्षुभिरे महासुराः॥ २॥
समेत्य दैत्याधिपतेः पुरे स्थिताः किरीटबद्धाञ्जलयः प्रणम्य ते।
न्यवेदयन्मन्मथशत्रुसूनुना युयुत्सुना जम्भजितं सहागतम्॥ ३॥
दासीकृताशेषजगत्त्रयं न मां जिगाय युद्धे कतिशः शचीपतिः।
गिरीशपुत्रस्य बलेन साम्प्रतं ध्रुवं विजेतेति स काकुतोऽहसत्॥ ४॥
ततः क्रुधा विस्फुरिताधरः सन् स तारको दर्पितदोर्बलोद्धतान्।
युधे त्रिलोकीजयकेलिलालसः सेनापतीन्सन्नहनार्थमादिशत्॥ ५॥
महाचमूनामधिपाः समन्ततः सन्नह्य सद्यः सुतरामुदायुधाः।
तस्थुर्विनम्रक्षितिपालसङ्कुले तदङ्गणद्वारवरप्रकोष्ठके॥ ६॥
स द्वारपालेन पुरः प्रदर्शितान् कृतानतीन्बाहुवरानधिष्ठितान्।
महाहवाम्भोधिविधूननोद्धतान् ददर्श राजा पृतनाधिपान्बहून्॥ ७॥
बली बलारातिबलातिशातनं दिग्द्रन्तिनादद्रवनाशनस्वनम्।
महीधराम्भोधिनवारितक्रमं ययौ रथं घोरमथाधिरुह्य सः॥ ८॥

उधर दैत्यों के नगर में जब यह कोलाहल मचा कि शंकरजी के पुत्र कार्तिकेय को सेनापति बना तथा देवताओं की सेना लेकर दैत्यों के शत्रु इन्द्र युद्ध करने आ रहे हैं, तो दैत्यों में बड़ी खलबली मच गयी॥ १॥ जब उन्हें यह ज्ञात हुआ कि विजयलक्ष्मी के साथ देवताओं की सेना लेकर विजयी कार्तिकेय वास्तव में सेनापति बनकर आये हैं, तब नगरनिवासी दैत्य बहुत देर तक घबराये॥ २॥ दैत्यों के राजा तारकासुर की नगरी में रहने वाले सब दैत्य मिलकर तारक के पास पहुँचे और उसको प्रणाम करके कहने लगे कि युद्ध करने के लिए उद्यत कुमार को साथ लेकर इन्द्र यहाँ आ गये हैं॥ ३॥ यह सुना तो तारक ने बड़े ताने के साथ हँसकर कहा—पिछले कई युद्धों में तो मुझ त्रैलोक्यविजयी को इन्द्र नहीं जीत सका था। अब कुमार के भरोसे मुझसे लड़ने चला है तो अवश्य जीतेगा॥ ४॥ यह कहने के साथ ही खेल-खेल में तीनों लोकों को जीतने की सामर्थ्य रखनेवाले तारकासुर के ओठ क्रोध से काँपने लगे और उसने अपने उन नामी सेनापतियों को युद्ध के लिए तैयार होने की आज्ञा दी, जिन्हें अपने बाहुबल पर बड़ा घमण्ड था॥ ५॥ तब अस्त्र-शस्त्र बाँधकर बड़े-बड़े दैत्यसेनापति तुरन्त तारकासुर के उस भारी फाटकवाले आँगन में आ खड़े हुए, जहाँ बहुत-से राजा विनम्रभाव से खड़े थे॥ ६॥ जो-जो सेनापति द्वार पर पहुँचकर प्रणाम करते थे, उन-उन बड़ी-बड़ी भुजाओंवाले वीरों को ले जाकर द्वारपाल तारकासुर के सामने खड़ा करता जाता था। दैत्यराज तारक ने देखा कि ये अगणित सेनापति महायुद्ध के समुद्र में हलचल मचाने में एक से एक प्रबल हैं॥ ७॥ तब वह बलवान् दैत्य भी उस भयंकर रथ पर चढकर चल पड़ा, जो अकेला ही इन्द्र की सेना को तहस-नहस कर सकता था। जिसकी घरघराहट सुनकर दिग्गजों का चिग्घाड़ना और मद बहाना बन्द हो जाता था और जो पर्वत और समुद्र में कहीं

युगक्षयक्षुब्धपयोधिनिःस्वनाश्चलत्पताकाकुलवारितातपाः ।
धरारजोग्रस्तदिगन्तभास्कराः पतिं प्रयान्तं पृतनास्तमन्वयुः ॥ ९ ॥
चमूरजः प्राप दिगन्तदन्तिनां महासुरस्याभिसुरं प्रसर्पिणः ।
दन्तप्रकाण्डेषु सितेषु शुभ्रतां कुम्भेषु दानाम्बुघनेषु पङ्कताम् ॥ १० ॥
महीभृतां कन्दरदारणोल्बणैस्तद्वाहिनीनां पटहस्वनैर्घनैः ।
उद्वेलिताश्चुक्षुभिरे महार्णवा नभःस्रवन्ती सहसाऽभ्यवर्धत ॥ ११ ॥
सुरारिनाथस्य महाचमूस्वनैर्विगाह्यमाना तुमुलैः सुरापगा ।
अभ्युच्छ्रितैरूर्मिशतैश्च वारिजैरक्षालयन्नाकनिकेतनावलीम् ॥ १२ ॥
अथ प्रयाणाभिमुखस्य नाकिनां द्विषः पुरस्तादशुभोपदेशिनी ।
अगाधदुःखाम्बुधिमध्यमज्जनं बभूव चोत्पातपरम्परा तदा ॥ १३ ॥
आगामिदैत्याशनकेलिकाङ्क्षिणी कुपक्षिणां घोरतरा परम्परा ।
दधौ पदं व्योम्नि सुरारिवाहिनीरुपर्युपर्येत्यनिवारितातपा ॥ १४ ॥
मुहुर्विभग्नातपवारणध्वजश्चलद्धराधूलिकलाकुलेक्षणः ।
धूताश्वमातङ्गमहारथाकरानवेक्षणोऽभूत् प्रसभं प्रभञ्जनः ॥ १५ ॥
सद्योविभिन्नाञ्जनपुञ्जतेजसो मुखैर्विषाग्निं विकिरन्त उच्चकैः ।
पुरः पथोऽतीत्य महाभुजङ्गमा भयङ्करा कारभृतो भृशं ययुः ॥ १६ ॥
मिलन्महाभीमभुजङ्गभीषणं प्रभुर्दिनानां परिवेषमादधौ ।
महासुरस्य द्विषतोऽतिमत्सरादिवान्तमासूचयितुं भयङ्करः ॥ १७ ॥

भी बेरोक-टोक पहुँच सकता था ॥ ८ ॥ पृथ्वी से उड़ी हुई धूल से सब दिशाओं तथा आकाश को ढँकती हुई दैत्यों की सेनाएँ भी अपने सेनापति तारकासुर के पीछे-पीछे चल पड़ीं, जो प्रलयकाल के हड़बडाते हुए समुद्र के समान घोर हल्ला मचा रही थीं और जिनमें इतनी पताकाएँ उड रही थीं कि धूप तक रुक गयी थी ॥ ९ ॥ जब देवताओं से लड़ने के लिए दैत्यराज तारक की सेना चली तो उसके चलने से उड़ी हुई धूल दिग्गजों के उजले दाँतों पर पड़कर उजली हो जाती थी और जब वह उनके मद बहते हुए गालों पर पड़ती थी, तब कीचड़ बन जाती थी ॥ १० ॥ उसकी सेना के नगाड़ों की गम्भीर ध्वनि पहाड़ों की कन्दराओं को भी फोड सकती थी। उसे सुनकर समुद्र हिलोरें लेकर अपने तट से बाहर चला आया और आकाशगंगा में भी अचानक बाढ़ आ गयी ॥ ११ ॥ दैत्यराज तारक की बड़ी भारी सेना का भीषण कोलाहल आकाशगंगा में जा गूँजा और उसमें उछली हुई सुन्दर कमलों ने भरी सैकड़ों लहरों ने वहाँ के भवन धो दिये ॥ १२ ॥ जब वह दैत्य लडने को चला तो उसके आगे ऐसे बुरे-बुरे अशगुन होने लगे, जिनसे ऐसा लगा कि अब तारकासुर किसी बड़ी भारी विपत्ति के समुद्र में डूबनेवाला है ॥ १३ ॥ उसी समय दैत्यों का मांस खाने की आशा से बहुत-से गिद्ध-कौए आदि भयंकर जीव-जन्तु कतार बाँधकर दैत्यों की सेना के ऊपर ऐसे मँडराने लगे कि धूप भी नीचे नहीं आ पाती थी ॥ १४ ॥ आकाश में बार-बार ऐसी आँधियाँ चलने लगीं कि दैत्यों के छत्र-चमर और पताकाएँ टूट-फूट गयीं। धूल उड़-उड़कर सबकी आँखों में भर गयी और घोडे, हाथी, रथ सबको उन आँधियों ने अस्त-व्यस्त कर दिया ॥ १५ ॥ तुरन्त तैयार किये हुए काजल से टूटकर गिरे हुए टुकडे के समान काले और विषभरी आग की ऊँची-ऊँची लपटें उगलनेवाले भयंकर साँप सेना का मार्ग काट-काटकर सामने से निकलने लगे ॥ १६ ॥ वैर के कारण ही मानो सूर्य ने भयंकर साँपों की कुण्डली के समान बडा-सा मंडल अपने चारों ओर डाल लिया। जिससे ऐसा ज्ञात होता था कि अब देवताओं के शत्रु तारक के दिन पूरे हो

त्विषामधीशस्य पुरोऽधिमण्डलं शिवाः समेताः परुषं ववाशिरे।
सुरारिराजस्य रणान्तशोणितं प्रसह्य पातुं द्रुतमुत्सुका इव॥ १८॥
दिवापि तारास्तरलास्तरस्विनीः परापतन्तीः परितोऽथ वाहिनीः।
विलोक्य लोको मनसा व्यचिन्तयत्प्राणव्ययान्तं व्यसनं सुरद्विषः॥ १९॥
ज्वलद्भिरुच्चैरभितः प्रभाभरैरुद्भासिताशेषदिगन्तराम्बरम्।
रवेण रौद्रेण हृदन्तदारणं पपात वज्रं नभसो निरम्बुदात्॥ २०॥
ज्वलद्विरङ्गारचयैर्नभस्तलं ववर्ष गाढं सह शोणितास्थिभिः।
धूमं ज्वलन्तो व्यसृजन्मुखै रजो दधुर्दिशो रासभकण्ठधूसरम्॥ २१॥
निर्घातघोषो गिरिशृङ्गशातनो घनोऽम्बराशाकुहरोदरम्भरिः।
बभूव भूम्ना श्रुतिभित्तिभेदनः प्रकोपिकालार्जितगर्जितर्जनः॥ २२॥
स्खलन्महेभं प्रपतत्तुरङ्गमं परस्पराश्लिष्टजनं समन्ततः।
प्रक्षुभ्यदम्भोधिविभिन्नभूधराद् बलं द्विषोऽभूदवनिप्रकम्पात्॥ २३॥
ऊर्ध्वीकृतास्या रविदत्तदृष्टयः समेत्य सर्वे सुरविद्विषः पुरः।
श्वानः स्वरेण श्रवणान्तशातिना मिथो रुदन्तः करुणेन निर्ययुः॥ २४॥
अपीति पश्यन् परिणामदारुणां महत्तमां गाढमरिष्टसन्ततिम्।
दुर्दैवदष्टो न खलु न्यवर्तत क्रुधा प्रयाणव्यवसायतोऽसुरः॥ २५॥
अरिष्टमाशङ्क्य विपाकदारुणं निवार्यमाणोऽपि बुधैर्महासुरः।
पुरः प्रतस्थे महतां वृथा भवेदसद्ग्रहान्धस्य हितोपदेशनम्॥ २६॥
क्षितौ निरस्तं प्रतिकूलवायुना तदीयचामीकरघर्मवारणम्।
रराज मृत्योरिव पारणाविधौ प्रकल्पितं हाटकभाजनं महत्॥ २७॥

गये हैं॥ १७॥ युद्ध में तारक का रुधिर पीने को उतावली सियारिनियाँ सूर्य-मंडल की ओर मुख कर-करके बड़े भीषण स्वरों में रोने लगीं॥ १८॥ दिन में ही निकले हुए तारे उस सेना के चारों ओर बड़े वेग से टूट-टूटकर गिरने लगे। यह देखकर लोगों को विश्वास हो गया कि ये सब उपद्रव तारक के नाश के लिए ही हो रहे हैं॥ १९॥ घोर और भयंकर तड़प से हृदय फाड़ देने वाली और अपनी जलती हुई चमक से सारी दिशाओं तथा आकाश को चमका देने वाली बिजली बिना बादल के ही आकाश से गिरने लगी॥ २०॥ आकाश से धधकते अङ्गारों, लहू और हड्डियों की वर्षा हो रही थी। दसों दिशाएँ गधे के कण्ठ के रंग जैसा भूरा-भूरा धुआँ उगल रही थीं॥ २१॥ आकाश और दसों दिशाओं में ऐसा भयंकर कोलाहल हो रहा था, जो क्रोध में भरे हुए काल की गर्जना के समान कानों के पर्दे फाड़े देता था और उसकी गूँज से पहाड़ की चोटियाँ फटी जा रही थीं॥ २२॥ इतने में ही ऐसा भूकम्प आया कि समुद्र हिलोरें लेने लगे, पहाड़ों में दरारें पड़ गयीं, तारक के सैनिक एक-दूसरे से लिपट गये, बड़े-बड़े हाथी लड़खड़ा गये और घोड़े जहाँ-तहाँ गिरने लगे॥ २३॥ सूर्य की ओर देखते हुए ऊपर मुँह उठाकर एक साथ बहुत-से कुत्ते रोते और बुरी तरह भूँकते हुए तारक के सामने से निकले॥ २४॥ इस प्रकार के भद्दे और भीषण असगुन देखकर भी दुर्भाग्यवश उस महादैत्य ने लड़ाई में जाने से मुख नहीं मोड़ा॥ २५॥ इन डरावने और बुरे असगुनों को देखकर विद्वानों ने उसे बहुत रोकना चाहा, परन्तु वह आगे बढ़ता ही गया। आग्रह से अन्धे लोगों को बड़े-बूढ़ों का उपदेश भी अच्छा नहीं लगता॥ २६॥ इतने में उलटे बहते हुए वायु का एक ऐसा झोंका आया कि उसका सुनहला राजछत्र भूमि में जा गिरा। जिसे देखकर

विजानता भाविशिरोनिकृन्तनं प्रज्ञेन शोकादिव तस्य मौलिना।
मुहुर्गलद्भिस्तरलैरलन्तरामरोदि मुक्ताफलबाष्पबिन्दुभिः॥ २८॥
निवार्यमाणैरभितोऽनुयायिभिर्ग्रहीतुकामैरिव तं मुहुर्मुहुः।
अपाति गृध्रैरभि मौलिमाकुलैर्भविष्यदेतन्मरणोपदेशिभिः॥ २९॥
सद्योनिकृत्ताञ्जनसोदरद्युतिं फणामणिप्रज्वलदंशुमण्डलम्।
निर्यद्विषोल्कानलगर्भफूत्कृतं ध्वजे जनस्तस्य महाहिमैक्षत॥ ३०॥
रथाश्वकेशावलिकर्णचामरं ददाह बाणासनबाणबाणधीन्।
अकाण्डतश्चण्डतरो हुताशनस्तस्यातनुस्यन्दनधुर्यगोचरः॥ ३१॥
इत्याद्यरिष्टैरशुभोपदेशिभिर्विहन्यमानोऽप्यसुरः पुनः पुनः।
यदा मदान्धो न गतान्यवर्तताम्बरात् तदाभून्मरुतां सरस्वती॥ ३२॥
मदान्ध! मा गा भुजदण्डचण्डिमावलेपतो मन्मथहन्तृसूनुना।
सुरैः सनाथेन पुरन्दरादिभिः समं समन्तात् समरं विजित्वरैः॥ ३३॥
गुहोऽसुरैः षड्दिनजातमात्रको निदाघधामेव निशातमोभरैः।
विषह्यते नाभिमुखो हि सङ्गरे कुतस्त्वया तस्य समं विरोधिता॥ ३४॥
अभ्रंलिहैः शृङ्गशतैः समन्ततो दिक्चक्रवालैः स्थगितस्य भूभृतः।
क्रौञ्चस्य रन्ध्रं विशिखेन निर्ममे येनाहवस्तस्य सह त्वया कुतः॥ ३५॥
लब्ध्वा धनुर्वेदमनङ्गविद्विषस्त्रिःसप्तकृत्वः समरे महीभुजाम्।
कृत्वाभिषेकं रुधिराम्बुभिर्घनैः स्वक्रोधवह्निं शमयाम्बभूव यः॥ ३६॥
न जामदग्न्यः क्षयकालरात्रिकृत्स क्षत्रियाणां समराय वल्गति।
येन त्रिलोकीसुभटेन तेन कुतोऽवकाशः सह विग्रहग्रहे॥ ३७॥

ऐसा लगा कि मानो उसकी मृत्यु ने पारणा करने के लिए सोने का थाल ला रखा हो॥ २७॥ तारक के किरीट से टूट-टूटकर गिरते हुए मोती ऐसे दीख रहे थे, मानो तारक का सिर कटने की बात पहले से जाननेवाला वह विज्ञ मुकुट बार-बार अपनी मोती के आँसू बरसाकर रो रहा हो॥ २८॥ तारकासुर के सिर पर मँडराते हुए गिद्धों को उसके सेवक बार-बार भगा रहे थे, फिर भी वे गिद्ध व्याकुल भाव से सिर पर ही गिरकर मानो यह बता रहे थे कि अब तुम्हारे दिन पूरे हो गये हैं॥ २९॥ सहसा लोगों ने देखा कि उसके झंडे पर तुरन्त बनाये हुए काजल जैसा काला, अपने फन के मणि की किरणों के प्रकाश से चमकते हुए फनोंवाला और भयानक विषभरी आग की फुँकारें छोडने वाला एक बड़ा भारी साँप लपटा हुआ है॥ ३०॥ अचानक उसके रथ के धुरे से आग की भीषण लपट उठी कि रथ के घोड़ों के बाल, कान और चँवर झुलस गये और तारकासुर के धनुष-बाण तथा तूणीर जल गये॥ ३१॥ बार-बार ऐसे बुरे-बुरे असगुन होने पर भी जब घमंड में चूर वह दैत्य नहीं लौटा, तब आकाश से यह देववाणी सुनायी पडी—॥ ३२॥ अरे मदान्ध दैत्य! तू अपने भुजदण्डों पर घमंड करके उन शिवतनय कार्तिकेयजी के साथ लडने मत जा, जिनके साथ इन्द्र और दूसरे विजयी देवता चले आ रहे हैं॥ ३३॥ ओ मतवाले दैत्य! छः दिन के बालक कार्तिकेय के आगे युद्ध में दैत्यों की वही दुर्दशा होगी, जो सूर्य के आगे रात के अन्धकार की होती है। भला तू क्या उनसे लड पायेगा?॥ ३४॥ अरे तारक! जिस क्रौञ्च पर्वत के सैकड़ों शिखर आकाश चूमते हैं और जो दसों दिशाओं में फैला हुआ है, उसे भी जिसने अपने बाणों से बींध डाला, उसके साथ तुम क्या लड़ सकोगे?॥ ३५॥ जिन परशुरामजी ने शंकरजी से धनुर्विद्या

त्यजाशु गर्वं मदमूढ मा स्म गाः स्मरारिसूनोर्वरशक्तिगोचरम्।
तमेव नूनं शरणं व्रजाधुना जगत्सुवीरं स चिराय जीव तत्॥ ३८॥
श्रुत्वेति वाचं वियतो गरीयसीं क्रोधादहङ्कारपरो महासुरः।
प्रकम्पिताशेषजगत्त्रयोऽपि सन्नकम्पतोच्चैर्दिवमभ्यधाच्च सः॥ ३९॥
किं ब्रूथ रे व्योमचरा! महासुराः! स्मरारिसूनुप्रतिपक्षवर्तिनः।
मदीयबाणव्रणवेदना हि साऽधुना कथं विस्मृतिगोचरीकृता॥ ४०॥
कटुस्वरैः प्रालपथाम्बरस्थिताः शिशोर्बलात् षड्दिनजातकस्य किम्।
श्वानः प्रमत्ता इव कार्तिके निशि स्वैरं वनान्ते मृगधूर्तका इव॥ ४१॥
सङ्गेन वो गर्भतपस्विनः शिशुर्वराक एषोऽन्तमवाप्स्यति ध्रुवम्।
अतस्करस्तस्करसङ्गतो यथा तद्वो निहन्मि प्रथमं ततोऽप्यमुम्॥ ४२॥
इतीरयत्युग्रतरं महासुरे महाकृपाणं कलयत्यलं क्रुधा।
परस्परोत्पीडितजानवो भयान्नभश्चरा दूरतरं विदुद्रुवुः॥ ४३॥
ततोऽवलेपाद्विकटं विहस्य स व्यधत्त कोशादसिमुत्तमं बहिः।
रथं द्रुतं प्रापय वासवान्तिकं नन्वित्यवोचन्निजसारथिं रथी॥ ४४॥
मनोतिवेगेन रथेन सारथिप्रणोदितेन प्रचलन्महासुरः।
ततः प्रपेदे सुरसैन्यसागरं भयङ्कराकारमपारमग्रतः॥ ४५॥
पुरः सुराणां पृतनां प्रथीयसीं विलोक्य वीरः पुलकं प्रमोदजम्।
बभार भूम्नाथ स बाहुदण्डयोः प्रचण्डयोः सङ्गरकेलिकौतुकी॥ ४६॥

सौख तथा इक्कीस बार युद्ध में राजाओं के गाढे रक्त में स्नान करके अपना क्रोध शान्त किया है, ऐसे क्षत्रियों के नाश की कालरात्रि बुलानेवाले परशुराम भी जिनमे लडने में घबराते हैं, उन त्रिभुवन-प्रसिद्ध महायोद्धा से लड़ने का साहस तुममें कहाँ है?॥ ३६-३७॥ अरे घमंड मे अन्धे दैत्य! अपना घमंड छोड़कर कोई ऐसा उपाय कर जिससे तू कुमार की शक्ति के आगे न पडे। इस समय उन्हीं की शरण में जाने से तेरे प्राण बच सकेंगे॥ ३८॥ तीनों लोक कँपानेवाला वह क्रोधी और घमंडी दैत्य भी यह आकाशवाणी सुनकर एक बार काँप उठा, किन्तु फिर सँभलकर आकाश की ओर मुँह करके गरजता हुआ बोला—॥ ३९॥ अरे ओ कार्तिकेय की बड़ाई करते हुए आकाश में घूमने वाले देवताओ! क्या आज तुम्हें मेरे बाणों के घावों की पीड़ा भूल गयी, जो इस प्रकार बक रहे हो?॥ ४०॥ अरे देवताओ! कार्तिक के महीने में जैसे पागल कुत्ते भूँकते हैं और रात को वन में सियार-लोमड़ी आदि धूर्त पशु बोला करते हैं, वैसे ही तुमलोग भी आकाश में चढ़कर उस छः दिन के बच्चे कुमार के बल की ऐसे कटु स्वर में झूठी प्रशंसा कर रहे हो?॥ ४१॥ अरे देवताओ! तुम लोगों के साथ आने के कारण बेचारा बालक कार्तिकेय भी तुम्हारे साथ वैसे ही मेरे हाथों मारा जायेगा, जैसे चोर का साथी भी दण्ड भोगता है॥ ४२॥ यह कहकर उस महान् असुर ने अपनी भारी और भयावनी कृपाण उठायी तो आकाश-स्थित सब देवताओं में भगदड़ मच गयी॥ ४३॥ तब घमंड के साथ विकट हँसी हँसकर उसने म्यान मे अपनी तलवार निकाली और सारथी से कहा कि रथ बढ़ाकर मुझे झटपट इन्द्र के पास पहुँचाओ॥ ४४॥ मन से भी अधिक वेग से चलनेवाले जिस रथ को सारथी बढाये लिये चला जा रहा था, उस पर बैठा वह महादैत्य देवताओं की उस सेना के आगे जा पहुँचा, जो अथाह समुद्र के समान भीषण दीख रही थी॥ ४५॥ देवताओं की उस बड़ी भारी सेना को सामने देखकर युद्ध के लिए उतावले उस वीर के भारी भुजदंडों के रोयें खड़े हो गये और उसके हृदय में युद्ध का उत्साह उमड़ पड़ा॥ ४६॥ तभी इन्द्र के बड़े-बडे लड़ाके और

ततो महेन्द्रस्य चराश्चमूचरा रणान्तलीलारभसेन भूयसा।
पुरः प्रचेलुर्मनसोऽतिवेगिनो युयुत्सुभिः किं समरे विलम्ब्यते॥ ४७॥
पुरःस्थितं देवरिपोश्चमूचरा बलद्विषः सैन्यसमुद्रमभ्ययुः।
भुजं समुत्क्षिप्य परेभ्य आत्मनोऽभिधानमुच्चैरभितो न्यवेदयन्॥ ४८॥
पुरोगतं दैत्यचमूमहार्णवं दृष्ट्वा परं चुक्षुभिरे महासुराः।
पुरारिसूनोर्नयनैककोणके ययुर्भटास्तस्य रणेऽवहेलया॥ ४९॥
द्विषद्बलत्रासविभीषिताश्चमूर्दिवौकसामन्धकशत्रुनन्दनः।
अपश्यदुद्दिश्य महारणोत्सवं प्रसादपीयूषधरेण चक्षुषा॥ ५०॥
उत्साहिताः शक्तिधरस्य दर्शनान्मृधे महेन्द्रप्रमुखा मखाशनाः।
अहं मृधे जेतुमरीनरीरमन्न कस्य वीर्याय वरस्य सङ्गतिः॥ ५१॥
परस्परं वज्रधरस्य सैनिका द्विषोऽपि योद्धुं स्वकरोद्धृतायुधाः।
वैतालिकश्रावितताराविक्रमाभिधानमीयुर्विजयैषिणो रणे॥ ५२॥
सङ्ग्रामं प्रलयाय सन्निपततो वेलामतिक्रामतो
वृन्दारासुरसैन्यसागरयुगस्याशेषदिग्व्यापिनः।
कालातिथ्यभुजो बभूव बहलः कोलाहलः क्रोषणः
शैलोत्तालतटीविघट्टनपटुर्ब्रह्माण्डकुक्षिम्भरिः॥ ५३॥

इति महाकविकालिदासकृतौ कुमारसम्भवे महाकाव्ये
सुरासुरसैन्यसङ्क्षुब्धो नाम पञ्चदशः सर्गः॥ १५॥

रण के लिए ललचाये वीर सैनिक मन से भी अधिक वेग से उस दैत्य की सेना पर टूट पड़े। लड़ाई के प्यासे लोग अवसर आने पर आगा-पीछा नहीं देखते॥ ४७॥ दैत्यसेना के सैनिक भी आगे खड़ी इन्द्र की सेना पर टूट पड़े और चारों ओर भुजाएँ उठा-उठा तथा ललकार-ललकार कर अपना-अपना नाम सुनाने लगे॥ ४८॥ अपने समक्ष समुद्र के समान हिलोरें लेती हुई वह दैत्यसेना को देखकर बड़े-बड़े देवता भी दंग रह गये, परन्तु उस दैत्यसेना को कनखियों मे देखकर ही निडर कार्तिकेय ने समझ लिया कि इसमें कुछ दम नहीं है॥ ४९॥ उन दैत्यों की सेना के डर से घबरायी हुई देवसेना की ओर अपने आनन्दामृत-परिपूर्ण नेत्रों से देखकर कुमार ने संकेत किया कि निर्भीक होकर लडते चलो। देवताओं ने जब रण में शक्तिशाली कार्तिकेय का दर्शन पाया तो उनका उत्साह बढ गया और इन्द्र आदि सभी देवता यह कहकर प्रसन्नता से उछलने-कूदने लगे कि मैं शत्रुओं को युद्ध में अवश्य जीतूँगा। भले लोगों का संग करने से भला किसका बल नहीं बढ जाता॥ ५०-५१॥ अपने-अपने शस्त्र लेकर देवताओं तथा दैत्यों के सैनिक अपने-अपने चारणों द्वारा गाये हुए अपने पराक्रम के गीत सुनकर विजय की इच्छा से समर में आ डटे॥ ५२॥ जैसे प्रलय करने के लिए अपनी मर्यादा त्यागकर चारों ओर फैले और सारे संसार को डुबाते-बहाते एवं काल का भोजन बनाते हुए दो समुद्र एक-दूसरे से टंकराते हुए बढ आये हों, वैसे ही ताड़ के वृक्षोंवाले पहाड़ों की तलहटी को फाड देनेवाला वह देवताओं और दैत्यों की सेनाओं के भीषण समुद्रों का भारी कोलाहल यमराज को आमंत्रित करता हुआ समस्त ब्रह्माण्ड में फैल गया॥ ५३॥

इस प्रकार महाकविकालिदासरचित कुमारसम्भवमहाकाव्य में देवताओं-दैत्यों का युद्ध नामक पन्द्रहवाँ सर्ग समाप्त॥ १५॥

षोडशः सर्गः

अथान्योन्यं विमुक्तास्त्रशस्त्रजालैर्भयङ्करैः । युद्धमासीत् सुनासीरसुरारिबलयोर्महत्॥ १ ॥
पत्तिः पत्तिमभीयाय रणाय रथिनं रथी । तुरङ्गस्थं तुरङ्गस्थो दन्तिस्थं दन्तिनि स्थितः॥ २ ॥
युद्धाय धावतां धीरं वीराणामितरेतरम् । वैतालिकाः कुलाधीशा नामान्यलमुदाहरन्॥ ३ ॥
पठतां बन्दिवृन्दानां प्रवीरा विक्रमावलीम् । क्षणं विलम्ब्य चित्तानि ददुर्युद्धोत्सुकाः पुरः॥ ४ ॥
सङ्ग्रामानन्दवर्धिष्णौ विग्रहे पुलकाञ्चिते । आसीत्कवचविच्छेदो वीराणां मिलतां मिथः॥ ५ ॥
निर्दयं खड्गभिन्नेभ्यः कवचेभ्यः समुत्थितैः । आसन्व्योमदिशस्तूलैः पलितैरिव पाण्डुराः॥ ६ ॥
खड्गा रुधिरसंलिप्ताश्चण्डांशुकरभासुराः । इतस्ततोऽपि वीराणां विद्युतां वैभवं दधुः॥ ७ ॥
विसृजन्तो मुखैर्ज्वाला भीमा इव भुजङ्गमाः । विसृष्टाः सुभटैः रुष्टैर्व्योम व्यानशिरे शराः॥ ८ ॥
बाढं वपूंषि निर्भिद्य धन्विनां निघ्नतां मिथः । अशोणितमुखा भूमिं प्राविशन्दूरमाशुगाः॥ ९ ॥
निर्भिद्य दन्तिनः पूर्वं पातयामासुराशुगाः । पेतुः प्रवरयोधानां प्रीतानामाहवोत्सवे॥ १०॥
ज्वलदग्निमुखैर्बाणैर्नीरन्ध्रैरितरेतरम् । उच्चैर्वैमानिका व्योम्नि कीर्णे दूरमपासरन्॥ ११॥
विभिन्नं धन्विनां बाणैर्व्यथार्तमिव विह्वलम् । ररास विरसं व्योम श्येनप्रतिरवच्छलात्॥ १२॥
चापैराकर्णमाकृष्टैर्विमुक्ता दूरमाशुगाः । अधावन् रुधिरास्वादलुब्धा इव रणैषिणाम्॥ १३॥

तदनन्तर इन्द्र और तारक की सेनाएँ परस्पर एक-दूसरे पर भयंकर शस्त्र-अस्त्र की वर्षा करती हुई घोर युद्ध करने लगीं॥ १ ॥ पैदल से पैदल, रथवालों से रथवाले, घुड़सवारों से घुड़सवार और हाथीसवार हाथीसवारों से जूझने लगे॥ २॥ निडर होकर जो सैनिक वैरियों पर प्रहार कर रहे थे, उन्हें लड़ने को उत्साहित करने के लिए दोनों ओर के चारण उन वीरों के कुल का बड़प्पन बता-बताकर उनकी सराहना कर रहे थे॥ ३॥ परन्तु वे वीर युद्ध में ऐसे जी-जान से लड़ रहे थे कि उन्हें इतना अवकाश ही कहाँ था कि चारणों के मुँह से अपने पराक्रम के गीत सुनते। इसलिए वे बीच-बीच में कभी क्षणभर को रुकते थे, तब चारणों के गीत भी सुन लेते थे॥ ४॥ उन्हें लड़ाई में ऐसा आनन्द मिला कि उत्साह से उनके रोएँ-रोएँ फड़क उठे। जब वे आपस में भिड़ जाते तो उनके कवचों के टाँके तक खुल जाया करते थे॥ ५॥ वहाँ पर सैनिक इतनी करारी तलवार चलाते थे कि कवचों के कट जाने से उनके नीचे बँधी रुई आकाश और दिशाओं में उड़-उड़कर ऐसी फैल गयी कि सब दिशाएँ बूढ़े के बालों सरीखी उजली हो गयीं॥ ६॥ सूर्य की किरणें पड़ने पर जहाँ-तहाँ वीरों के लहू से रंगी तलवारें बिजली की भाँति चमक उठती थीं॥ ७॥ क्रोध में भर-भरकर वीरों ने जो आग उगलते हुए भयंकर साँपों के समान विषैले बाण छोड़े, उनसे सारा आकाश भर गया॥ ८॥ वे दूर से एक-दूसरे पर जो बाणवर्षा कर रहे थे, वे बाण दूसरी ओर के धनुर्धारियों के शरीर को ऐसी शीघ्रता से बींधते हुए पार निकलकर पृथ्वी में जा धँसते थे कि उनमें लहू तक नहीं लगने पाता था॥ ९॥ युद्ध के उस उत्सव में जो बड़े-बड़े योद्धा जी खोलकर लड़ रहे थे, वे बाणों से हाथियों पर ऐसी चोट करते थे कि हाथियों का सिर पहले कटकर गिर जाता था और बाण पीछे गिरता था॥ १०॥ जलती हुई लपटोंवाले बाणों की घनी पाँत जब आकाश में भर गयी तो विमानों पर बैठे हुए देवता वहाँ से दूर हट गये कि कहीं हम भी इनकी लपेट में न आ जायँ॥ ११॥ उन धनुर्धारी सैनिकों ने इतने बाण छोड़े कि आकाश की छाती चलनी हो गयी। इसीलिए आकाश भी जैसे पीड़ा से व्याकुल होकर बाज पक्षी के डरावने शब्दों में रुदन करने लगा॥ १२॥ लड़ाके योद्धाओं ने कानों तक खींच-खींचकर जो बाण छोड़े, वे मानो रुधिर के लोभ से ही बड़ी दूर तक दौड़े चले गये॥ १३॥ संग्राम में वीरों के हाथों की नंगी तलवारें जैसे मतवाली हो-होकर अपनी धार की

गृहीताः पाणिभिर्वीरैर्विकोशाः खड्गराजयः । कान्तिजालच्छलादाजौ व्यहसन्सम्मदादिव ॥
खड्गाः शोणितसन्दिग्धा नृत्यन्तो वीरपाणिषु । रजोघने रणेऽनन्ते विद्युतां वैभवं दधुः ॥ १५ ॥
कुन्ताश्चकाशिरे चण्डमुल्लसन्तो रणार्थिनाम् । जिह्वाभोगा यमस्येव लेलिहाना रथाङ्गणे ॥ १६ ॥
प्रज्वलत्कान्तिचक्राणि चक्राणि वरचक्रिणाम् । चण्डांशुमण्डलश्रीणि रणव्योमनि बभ्रमुः ॥ १७ ॥
केचिद्धीरैः प्रणादैश्च वीराणामभ्युपेयुषाम् । निपेतुः क्षोभतो वाहादपरे मुमुहुर्मदात् ॥ १८ ॥
कश्चिदभ्यागते वीरे जिघांसौ मुदमादधौ । परावृत्य गते क्षुब्धे विषसादाहवप्रियः ॥ १९ ॥
बहुभिः सह युद्ध्वा वा परिभ्रम्य रणोल्बणाः । उद्दिश्य तानुपेयुः केऽपि ये पूर्ववृता रणे ॥ २० ॥
अभितोऽभ्यागतान्योद्धुं वीरान्रणमदोद्धतान् । प्रत्यनन्दन्भुजादण्डरोमोद्गमभृतो भटाः ॥ २१ ॥
शस्त्रभिन्नेभकुम्भेभ्यो मौक्तिकानि च्युतान्यधः । अध्याहवक्षेत्रमुप्तकीर्तिबीजाङ्कुरश्रियम् ॥ २२ ॥
वीराणां विषमैर्घोषैर्विद्रुता वारणा रणे । शास्यमाना अपि त्रासाद्वेजुर्धूताङ्कुशा दिशः ॥ २३ ॥
रणे बाणगणैर्भिन्ना भ्रमन्तो भिन्नयोधिनः । निममज्जुर्मिलद्रक्तनिम्नगासु महागजाः ॥ २४ ॥
अपारेऽसृक्सरित्पूरे रथेषूच्चैस्तरेष्वपि । रथिनोऽभिरिपुं क्रुद्धा हुङ्कृतैर्व्यसृजञ्शरान् ॥ २५ ॥
खड्गनिर्लूनमूर्धानो व्यापतन्तोऽपि वाजिनः । *प्रथमं पातयामासुरसिना दारितानरीन्* ॥ २६ ॥
वीराणां शस्त्रभिन्नानि शिरांसि निपतन्त्यपि । अधावन्दन्तदष्टोष्ठभीमान्यभिरिपुं क्रुधा ॥ २७ ॥
शिरांसि वरयोधानामर्धचन्द्रहृतान्यलम् । आददाना भृशं पादैः श्येना व्यानशिरे नभः ॥ २८ ॥

चमक से ही हँस रही थीं ॥ १४ ॥ उन वीरों के हाथों में नाचनेवाली लहू से तर तलवारें, धूल से पटे तथा दूर तक फैले हुए रणक्षेत्र में बिजली के समान चमकती थीं ॥ १५ ॥ समर में लड़नेवाले वीरों के चमकते हुए भयंकर भाले यमराज की लपलपाती जीभ जैसे दिखलायी पड़ते थे ॥ १६ ॥ चकाचौंध पैदा करनेवाली चमक से घिरे और प्रचंड सूर्यमण्डल जैसे चमकवाले चक्रधारी वीरों के चक्र उस रणरूपी आकाशमंडल में चारों ओर चक्कर काट रहे थे ॥ १७ ॥ जब कोई वीर सामने आता और गरजकर ललकारने लगता था तो अनेक वीर उस ललकार को सुनकर ही घोड़ों से नीचे गिर पडते और कितने हदस के मारे मूर्च्छित हो जाते थे ॥ १८ ॥ अनेक वीरों को तो जब कोई मारने के लिए सामने आता तो वे प्रसन्न हो उठते थे कि चलो, इसी से दो-दो हाथ बज जाय। परन्तु जब वह घबराकर लौट पड़ता, तब उन्हें इस बात का बड़ा दुःख होता था कि हाय, हम लड न सके ॥ १९ ॥ कुछ ऐसे भी लड़ाके थे, जो बहुतों के साथ लड़-भिड और इधर-उधर घूम-घामकर उन वीरों के पास जा पहुँचते थे, जिनसे लडने के लिए उन्होंने पहले से ही ठान ली थी ॥ २० ॥ जब सच्चे लडाकों ने देखा कि रण के लिए मतवाले और लडने के लिए फड़कती बाँहोंवाले वीर चारों ओर आ जुटे हैं तो वे प्रसन्न हुए कि अब जी भरकर लड़ने को तो मिलेगा ॥ २१ ॥ शस्त्रों से कटे हुए हाथियों के मस्तकों से गिरे हुए मोती ऐसे लग रहे थे, जैसे समर के खेत में बोये हुए कीर्ति के अंकुर फूट निकले हों ॥ २२ ॥ उस रण में वीरों की भयानक ललकारों से भागे हाथी हाथीवानों के अंकुश खा-खाकर भी इधर-उधर भाग जाते थे ॥ २३ ॥ जिन हाथियों के हाथीवान् रण में शत्रुओं के बाणों से मर चुके थे, वे हाथी स्वतंत्र घूमते हुए लहू की नदी में नहाकर लाल हो गये ॥ २४ ॥ ऊँचे-ऊँचे रथों पर चढे हुए सैनिक, रुधिरमयी नदी की अपार धारा में डूबते हुए भी कुपित हो-होकर शत्रु पर बाण छोड़ रहे थे ॥ २५ ॥ बहुत-से ऐसे वीर भी थे, जो शत्रु की तलवार से सिर कट जाने पर जब वे अपने घोडों से नीचे गिरते थे तो गिरते-गिरते भी अपनी तलवार से शत्रु का सिर काट लेते थे ॥ २६ ॥ शस्त्रों से कटकर गिरे हुए वीरों के मस्तक कुपित होकर दाँतों से होंठ काटते हुए शत्रु की ओर दौड पड़ते थे ॥ २७ ॥ अर्धचन्द्र बाणो ने जो सिर काटे और जिन्हें अपने पंजों में जकडकर बाज उड़ा ले गये, उन बडे-बडे वीरों के सिरों से सारा आकाश भर गया ॥ २८ ॥

क्रोधादभ्यापतद्दन्तिदन्तारूढाः पदातयः । अश्वारोहा गजारोहप्राणान्प्रासैरपाहरन्॥ २९॥
शस्त्रच्छिन्नगजारोहा विभ्रमन्त इतस्ततः । युगान्तवातचलिताः शैला इव गजा बभुः॥ ३०॥
मिलितेषु मिथो योद्धुं दन्तिषु प्रसभं भटाः । अगृह्णन्रुध्यमानाश्च शस्त्रैः प्राणान्परस्परम्॥ ३१॥
रुषा मिथो मिलद्दन्तिदन्तसङ्घर्षजोऽनलः । योधाञ्शस्त्रहृतप्राणानदहत्सहसाऽरिभिः॥ ३२॥
आक्षिप्ता अपि दन्तीन्द्रैः कोपनैः पत्तयः परम् । तदसूनहरन्खड्गघातैः स्वस्य पुरः प्रभोः॥ ३३॥
उत्क्षिप्य करिभिर्दूरान्मुक्तानां योधिनां दिवि । प्रापि जीवात्मभिर्दिव्या गतिर्वा विग्रहैर्महो॥ ३४॥
खड्गैर्धवलधारालैर्निहत्य करिणां करान् । तैर्भुवापि समं विद्धान्सन्तोषं न भटा ययुः॥ ३५॥
आक्षिप्याभिदिवं नीताः पत्तयः करिभिः करैः । दिव्याङ्गनाभिरादातुं रक्ताभिर्द्युतमीषिरे॥ ३६॥
धन्विनस्तुरगारूढा गजारोहाञ्शरैः क्षतान् । प्रत्यैच्छन्मूर्च्छितान्भूयो योद्धुमाश्वसतश्चिरम्॥ ३७॥
क्रुद्धस्य दन्तिनः पत्तिर्जिघृक्षोरसिना करम् । निर्भिद्य दन्तमुसलावारुरोह जिघृक्षया॥ ३८॥
खड्गेन मूलतो हत्वा दन्तिनो रदनद्वयम् । प्रातिपक्ष्ये प्रविष्टोऽपि पदातिर्निरगाद्द्रुतम्॥ ३९॥
करेण करिणा वीरः सुगृहीतोऽपि कोपिना । असिनाऽसूञ्जहाराशु तस्यैव स्वयमक्षतः॥ ४०॥
तुरङ्गी तुरगारूढं प्रासेनाहत्य वक्षसि । पततस्तस्य नाज्ञासीत्प्रासघातं स्वके हृदि॥ ४१॥
द्विषा प्रासहृतप्राणो वाजिपृष्ठदृढासनः । हस्तोद्धृतमहाप्रासो भुवि जीवन्निवाभ्रमत्॥ ४२॥

पैदल और घुड़सवार सैनिकों ने क्रोध से पागल हो तथा सामने पडनेवाले हाथियों के दाँतों पर चढ-चढकर हाथीसवार सैनिकों को अपने भालों से मार डाला॥ २९॥ हाथीसवारों के मार डाले जाने पर उनके स्वतंत्र घूमनेवाले हाथी ऐसे दीख रहे थे, जैसे प्रलयकाल की आँधी से पहाड़ उड़ रहे हों॥ ३०॥ जब दो हाथी लड़ने लगते थे तो उन पर बैठे हुए वीर परस्पर लड़कर बलात् एक-दूसरे को मार डालते थे॥ ३१॥ क्रोध से परस्पर लड़नेवाले हाथियों के दाँतों की टक्कर से ऐसी आग निकलती थी कि जिसमें शत्रु के हाथों से मृत सैनिक जल जाते थे॥ ३२॥ पैदल सैनिक तो ऐसे लड़ रहे थे कि यदि उन्हें अत्यन्त क्रुद्ध हाथी अपनी सूँड़ से उठाकर ऊपर उछाल देते थे तो वे अपने स्वामी के समक्ष ही अपनी तलवार के प्रहार से उनको मार डालते थे॥ ३३॥ जिन वीरों को हाथियों ने उछाल दिया था, उनके प्राण तो स्वर्ग चले गये और उन्हें दिव्य गति मिली। केवल उनके शरीर अलबत्ते पृथ्वी पर आ गिरे॥ ३४॥ यद्यपि अपनी उजली धारवाली तलवारों से योद्धा लोग हाथियों की सूँड़ ऐसे झटके से काट रहे थे कि उनकी तलवारें पृथ्वी में धँस जाती थीं, फिर भी उनका जी नहीं भरता था॥ ३५॥ हाथियों की सूँड़ों से उछाले जाने पर जिन वीरों ने वीरगति पायी थी, स्वर्ग में पहुँचे हुए उन सैनिकों को अपना प्रेमी बनाने के लिए देवाङ्गनाएँ उतावली हो उठती थीं॥ ३६॥ जब कोई घुड़सवार धनुर्धारी योद्धा अपने बाणों से किसी हाथीसवार को बाण मारकर मूर्च्छित कर देता था, तब वह बड़ी देर तक यह सोचकर खड़ा रह जाता था कि वह फिर उठे तो उससे युद्ध करें। क्योंकि जो मूर्च्छित हो जाता था, वे उसे नहीं मारते थे॥ ३७॥ एक बिगड़ैल हाथी एक पैदल सैनिक को अपनी सूँड़ में लपेटना चाहता था। इतने में उसने अपनी तलवार का एक हाथ मारकर उसकी सूँड़ काट डाली। फिर उसके दाँत उखाड़ने के लिए वह उसके लम्बे-लम्बे दाँतों पर चढ़कर बैठ गया॥ ३८॥ एक दूसरा पैदल सैनिक शत्रु की सेना में घुसा और अपनी तलवार से एक हाथी के दोनों दाँतों को जड़ से काटकर फिर अपनी सेना में लौट आया॥ ३९॥ क्रोध में भरे हुए एक हाथी द्वारा सूँड़ में कसकर लपेट लिये जाने पर भी एक वीर अपनी तलवार से हाथी को मारकर सकुशल लौट आया॥ ४०॥ एक घुड़सवार दूसरे घुड़सवार की छाती में भाला भोंककर इतना प्रसन्न हुआ कि जब उस घोड़े से गिरते हुए सैनिक ने उछलकर उस पर भाला चलाया तो उसे यह पता ही नहीं चला कि मुझे भी चोट लगी है॥ ४१॥ हाथ में भारी भाला लेकर घोड़े की पीठ पर

तुरङ्गसादिनं शस्त्रहृतप्राणं गतं भुवि । अबद्धोऽपि महावाजी न साश्रुनयनोऽत्यजत् ॥ ४३ ॥
भल्लेन शितधारेण भिन्नोऽपि रिपुणाश्वगः । नामूर्च्छत्कोपतो हन्तुमियेष प्रपतन्नपि ॥ ४४ ॥
मिथः प्रासाहतौ वाजिच्युतौ भूमिगतौ रुषा । शस्त्र्या युयुधतुः कौचित्केशाकेशि भुजाभुजि ॥ ४५ ॥
रथिनो रथिभिर्बाणैर्हृतप्राणा दृढासनाः । क्षतकार्मुकसन्धानाः सप्राणा इव मेनिरे ॥ ४६ ॥
न रथी रथिनं भूयः प्राहरच्छस्त्रमूर्च्छितम् । प्रत्याश्वसन्तमन्विच्छन्नातिष्ठद्युधि लोभतः ॥ ४७ ॥
अन्योन्यं रथिनौ कौचिद्गतप्राणौ दिवं गतौ । एकामप्सरसं प्राप्य युयुधाते वरायुधौ ॥ ४८ ॥
मिथोऽर्धचन्द्रनिर्लूनमूर्धानौ रथिनौ रुचा । खेचरौ भुवि नृत्यन्तौ स्वकबन्धावपश्यताम् ॥ ४९ ॥
रणाङ्गणे शोणितपङ्कपिच्छिले कथं कथञ्चिन्ननृतुर्धृतायुधाः ।
नदत्सु तूर्येषु परेतयोषितां गणेषु गायत्सु कबन्धराजयः ॥ ५० ॥
इति सुरारिपुर्वृत्ते युद्धे सुरासुरसैन्ययो रुधिरसरितां मज्जद्दन्तिव्रजेषु तटेष्वलम् ।
अरुणनयनः क्रोधाद्भीमभ्रमद्भ्रुकुटीमुखः सपदि ककुभामीशानभ्यागमत्स युयुत्सया ॥ ५१ ॥

इति महाकविकालिदासकृतौ कुमारसम्भवे महाकाव्ये सुरासुरसैन्य-
सङ्ग्रामवर्णनं नाम षोडशः सर्गः ॥ १६ ॥

जमकर बैठा हुआ एक सैनिक शत्रु के भाल से मारे जाने पर भी ऐसा लग रहा था, जैसे वह अभी जीवित ही हो ॥ ४२ ॥ किसी शस्त्र की चोट से एक घुडसवार पृथ्वी पर मरा पड़ा था, उसका बड़ा-सा घोड़ा आँसूभरी आँखों से अपने स्वामी को देखता हुआ वहीं खडा रह गया, हटा नहीं ॥ ४३ ॥ एक क्रुद्ध घुड़सवार शत्रु के तीखे भाले की मार खाकर लडखडाता हुआ भी मूर्च्छित नहीं हो रहा था। वह चाहता था कि शत्रु मिले तो मैं उसे अभी मार डालूँ ॥ ४४ ॥ दो घुडसवार आपस में एक-दूसरे के भाले की मार से घायल होकर भूमि में गिर करके भी क्रोधपूर्वक एक-दूसरे के बाल तथा भुजा से भुजा पकड़कर छुरियाँ लेकर लड़ रहे थे ॥ ४५ ॥ एक रथी योद्धा को दूसरे रथवाले ने मार डाला। फिर भी वह अपने टूटे धनुष को खींचे रथ पर मरकर भी ऐसा जमकर बैठा था, मानो अभी जीता ही हो ॥ ४६ ॥ एक रथी सैनिक ने दूसरे रथी को शस्त्र से मूर्च्छित कर दिया, परन्तु उस पर पुनः प्रहार न करके वह देखने लगा कि यह सचेत हो तो फिर लड़ूँ ॥ ४७ ॥ दो रथी एवं श्रेष्ठ शस्त्रधारी योद्धा एक-दूसरे को मारकर जब स्वर्ग में पहुँचे, तब वहाँ वे दोनों एक अप्सरा के लिए आपस में लड़ने लगे ॥ ४८ ॥ अर्द्धचन्द्र बाणों से एक-दूसरे का सिर काटकर दो रथी स्वर्ग में जा पहुँचे और वहाँ से वे अपने उन धड़ों का खेल देखने लगे, जो बहुत देर तक हाथ में तलवार लिये युद्धभूमि में नाच रहे थे ॥ ४९ ॥ उस युद्धभूमि में जहाँ-तहाँ नगाडे बज रहे थे और भूत-प्रेतों की स्त्रियाँ गीत गा रही थीं। वहाँ पर लहू के कीचड से इतनी फिसलन हो गयी थी कि शस्त्र लिये हुए वीरों के धड बड़ी कठिनाई से नाच पाते थे ॥ ५० ॥ इस प्रकार जब देव-दानवों में तुमुल युद्ध होने लगा और लहू की नदी के तट पर ही लोग डूबने लगे, तब देवताओं का शत्रु तारक क्रोध मे भौंहें नचाता हुआ लाल-लाल आँखें करके युद्ध करने के लिए तुरन्त इन्द्र आदि दिक्पालों के समक्ष आया ॥ ५१ ॥

इस प्रकार महाकविकालिदासरचित कुमारसम्भवमहाकाव्य में देवताओं और
दैत्यों की सेनाओं का युद्ध नामक सोलहवाँ सर्ग समाप्त ॥ १६ ॥

सप्तदशः सर्गः

दृष्ट्वाभ्युपेतमथ दैत्यपतिं पुरस्तात् सङ्ग्रामकेलिकुतुकेन घनप्रमोदम्।
योद्धुं मदेन मिमिलुः ककुभामधीशा बाणान्धकारितदिगम्बरगर्भमेत्य॥ १॥
देवद्विषां परिवृढो विकटं विहस्य बाणावलीभिरमरान्विकटान् वर्षं।
शैलानिव प्रवरवारिधरो गरिष्ठानद्रिः पराभिरथ गाढमनारताभिः॥ २॥
जम्भद्विषत्प्रभृतिदिक्पतिचापमुक्ता बाणाः शिता दनुजनायकबाणसङ्घान्।
अह्राय तार्क्ष्यनिवहा इव नागपूगान् सद्यो विचिच्छिदुरलं कणशो रणान्ते॥ ३॥
तान् प्रज्वलत्फलमुखैर्विषमैः सुरारिनामाङ्कितैः पिहितदिग्गगनान्तरालैः।
आच्छादितस्तृणचयानिव हव्यवाहश्चिच्छेद सोऽपि सुरसैन्यशराञ्शरौघैः॥ ४॥
दैत्येश्वरो ज्वलितरोषविशेषभीमः सद्यो मुमोच युधि यान्विशिखान्सहेलः।
ते प्रापुरुद्भटभुजङ्गमभीमभावं गाढं बबन्धुरपि ताँस्त्रिदशेन्द्रमुख्यान्॥ ५॥
ते नागपाशविशिखैरसुरेण बद्धाः श्वासानिलाकुलमुखा विमुखा रणस्य।
दिङ्नायका बलरिपुप्रमुखाः स्मरारिसूनोः समीपमगमन् विपदन्तहेतोः॥ ६॥
दृष्टिप्रपातवशतोऽपि पुरारिसूनोस्ते नागपाशघनबन्धविपत्तिदुःखात्।
इन्द्रादयो मुमुचिरे स्वयमस्य देवाः सेवां व्यधुर्निकटमेत्य महाजिगीषोः॥ ७॥
उद्दीप्तकोपदहनोऽथ सुरेन्द्रशत्रुरह्राय सारथिमवोचत चण्डबाहुः।
बद्धा मया सुरपतिप्रमुखाः प्रसह्य बालस्य धूर्जटिसुतस्य निरीक्षणेण॥ ८॥

जिस दैत्यराज तारक के रोम-रोम लड़ाई के लिए फड़क रहे थे और जिसने धुआँधार वाण वरसाकर धरती और आकाश में सर्वत्र अँधेरा कर दिया था, उसे आता देख सब दिक्पाल मतवाले होकर एक साथ उससे जूझने के लिए रणभूमि में डट गये॥ १॥ जैसे सावन-भादों की घटाएँ निरन्तर जल वरसाकर बड़े-बड़े पहाड़ों को नीचे से ऊपर तक भिंगो देती हैं, वैसे ही देवताओं का शत्रु तारक भी बड़ी डरावनी हँसी हँसता हुआ देवताओं पर भयंकर रूप से धुआँधार वाण-वर्षा करने लगा॥ २॥ उस रणभूमि में इन्द्र आदि देवता जितने तीखे-तीखे बाण छोड़ते थे, उन्हें चुन-चुनकर दैत्यराज के वाण उतनी ही फुर्ती से काटते चले जा रहे थे, जैसे अनेक गरुड़ मिलकर साँपों के झुण्ड को काटते जा रहे हों॥ ३॥ देवताओं ने उस पर जो बाणों की झड़ी लगायी, उसे उसने अपने नाम खुदे हुए, आग के समान प्रज्ज्वलित, तीखे फलवाले, सब दिशाओं तथा आकाश को भर देनेवाले बाणों से उसी प्रकार नष्ट कर दिया, जैसे अपने ऊपर पड़े हुए घास-फूस को धधकती हुई आग जला देती है॥ ४॥ क्रोध से लाल उस भयंकर दैत्य ने उस युद्ध को कुछ न समझते हुए जो वाण छोड़े, वे तुरंत साँपों की भाँति भीषण वनकर इन्द्र आदि देवताओं के गलों में जा लिपटे॥ ५॥ गले में उस दैत्य के वाणों की फाँसी पड़ जाने पर इन्द्रादि दिक्पालों की साँसें घुटने लगीं और वे लड़ना-भिड़ना छोड़-छोड़कर इस विपत्ति से छुटकारा पाने के लिए शंकरपुत्र कार्त्तिकेय के पास जा पहुँचे॥ ६॥ कार्त्तिकेय ने उनकी ओर देखते ही इन्द्र आदि देवताओं के गले में कसे हुए वे नाग-फाँस के फन्दे स्वतः खुल गये। तव वे सब देवता कार्त्तिकेय के पास जा-जाकर उनकी सराहना करने लगे, जो दैत्यों को जीतने के लिए उद्यत थे॥ ७॥ उस वडी-वड़ी भुजाओंवाले तारक ने जब यह सब देखा, तब वह क्रोध से जल उठा और उसने तुरन्त सारथी से कहा कि मैंने

मुक्ता बभूवुरधुना तदिमान् विहाय कर्तास्म्यमुं समरभूमिपशूपहारम्।
तत्स्यन्दनं सपदि वाहय शम्भुसूनुं द्रष्टाऽस्मि दर्पितभुजावलमाहवाय॥ ९ ॥
तत्स्यन्दनः सपदि सारथिसम्प्रणुन्नः प्रक्षुब्धवारिधरधीरगभीरघोषः।
चण्डश्चचाल दलिताखिलशत्रुसैन्यमांसास्थिशोणितविपङ्कविलुप्तचक्रः॥ १०॥
दृष्ट्वा रथं प्रलयवातचलद्गिरीन्द्रकल्पं दलद्बलविरावविशेषरौद्रम्।
अभ्यागतं सुरारिपोः सुरराजसैन्यं क्षोभं जगाम परमं भयवेपमानम्॥ ११॥
प्रक्षुभ्यमाणमवलोक्य दिगीशसैन्यं शम्भोः सुतं कलहकेलिकुतूहलोत्कम्।
उद्दामदोःकलितकार्मुकदण्डचण्डः प्रोवाच वाचमुपगम्य स कार्तिकेयम्॥ १२॥
रे शम्भुतापसशिशो! बत मुञ्च मुञ्च दोर्दर्पमत्र विरम त्रिदिवेन्द्रकार्यात्।
शस्त्रैः किमत्र भवतोऽनुचितैरतीव बालत्वकोमलभुजातुलभारभूतैः॥ १३॥
एवं त्वमेव तनयोऽसि गिरीशगौर्योः किं यासि कालविषयं विषमैः शरैर्मे।
सङ्ग्रामतोऽपसर जीव पितुर्जनन्यास्तूर्णं प्रविश्य वरमङ्कतलं विधेहि॥ १४॥
सम्यक्स्वयं किल विमृश्य गिरीशपुत्र! जम्भद्विषोऽस्य जहिहि प्रतिपक्षमाशु।
एष स्वयं पयसि मज्जति दुर्विगाह्ये पाषाणनौरिव निमज्जयते पुरा त्वाम्॥ १५॥
इत्थं निशम्य वचनं युधि तारकस्य कम्पाधरो विकचकोकनदारुणाक्षः।
क्षोभात्त्रिलोचनसुतो धनुरीक्षमाणः प्रोवाच वाचमुचितां परिमृश्य शक्तिम्॥ १६॥

जिन इन्द्र आदि बड़े-बड़े देवताओं को फंदे में फाँस लिया था, वे सब कार्त्तिकेय के देखनेमात्र से छुटकारा पा गये हैं। अतएव इन सबको छोड़कर मैं पहले कार्तिकेय को गिद्ध-सियार आदि की भेंट करता हूँ। सो तुम तुरन्त रथ बढ़ाकर उस शिवपुत्र के पास मुझे पहुँचाओ। जिससे मैं भी तो देखूँ कि मुझसे लड़ने के लिए वह अपनी किन भुजाओं के बल पर इतना अकड रहा है॥ ८-९॥ तभी सारथी ने ऐसे वेग से रथ को हाँका कि वह प्रलय के उमडे हुए बादलों सदृश घडघडाता हुआ भयंकर रूप से चला। रण में इतने शत्रु-सैनिक कटकर गिरे हुए थे कि उनके मांस, हड्डी और लहू के कीचड में उस रथ के पहिये तक धँस गये॥ १०॥ इस तरह चलता हुआ वह रथ ऐसा लगता था कि मानो प्रलय की आँधी में हिमालय उडता चला जा रहा हो। देवताओं की सेना के जो सैनिक उसके नीचे पिसे जा रहे थे, उनके चीत्कार से वह और भी भयंकर हो गया था। जब वह रथ देवताओं के एकदम पास आ गया, तब तो उसे देखकर देवताओं की सेना भय से काँप उठी॥ ११॥ घबड़ाई हुई देवताओं की सेना को देखता और अपनी भारी-भारी भुजाओं में प्रचण्ड धनुष पकड़े हुए तारक उन कार्त्तिकेय के पास जा पहुँचा, जो मानो उससे लड़ने के लिए अधीर हो रहे थे। वहाँ पहुँचकर तारक ने कार्त्तिकेय से कहा—॥ १२॥ हे तपस्वी शंकर के पुत्र! तुम अपनी भुजाओं के बल पर घमंड मत करो और इन देवताओं का साथ छोड़ दो। कहाँ तुम्हारी ये छोटी-छोटी कोमल भुजाएँ और कहाँ ये भारी-भारी अस्त्र। ये तुम्हारे हाथ में नहीं जँचते॥ १३॥ पार्वती और शंकर के इकलौते पुत्र होकर तुम मेरे तीक्ष्ण बाणों से बिंधकर काल के गाल में क्यों जाना चाहते हो? रण से भागकर अपने प्राण बचाओ और तुरन्त जाकर अपने माता-पिता की गोद में छिपे रहो॥ १४॥ हे कार्त्तिकेय! अपना भला-बुरा स्वयं सोचते हुए तुम इन्द्र का साथ छोडकर अलग हो जाओ। क्योंकि मैं जब इस पर बाणवर्षा करने लगूँगा, तब पत्थर की नाव के समान यह स्वयं तो गहरे जल में डूबेगा ही, साथ ही तुम्हें भी ले बीतेगा॥ १५॥ तारक की बातें सुनकर क्रोध से कार्त्तिकेय के ओठ काँपने लगे और खिले हुए लाल कमल के समान उनकी भयानक लाल-लाल आँखें नाचने लगीं। बड़े क्रोध से अपने धनुष की ओर देखते हुए अपना पराक्रम समझकर उन्होंने तारकासुर

दैत्याधिराज! भवता यदवादि गर्वात्तत्सर्वमप्युचितमेव तवैव किं तु।
द्रष्टाऽस्मि ते प्रवरबाहुबलं वरिष्ठं शस्त्रं गृहाण कुरु कार्मुकमाततज्यम्॥ १७॥
इत्युक्तवन्तमवदत्त्रिपुरारिपुत्रं दैत्यः क्रुधौष्ठमधरं किल निर्विभिद्य।
युद्धार्थमुद्भटभुजाबलदर्पितोऽसि बाणान् सहस्व मम सादितशत्रुपृष्ठान्॥ १८॥
दुःप्रेक्षणीयमरिभिर्धनुराततज्यं सद्यो विधाय विषमान्विशिखान् न्यधत्त।
स क्रोधभीमभुजगेन्द्रनिभं स्वचापं चण्डं प्रपञ्चयति जैत्रशरैः कुमारे॥ १९॥
कर्णान्तमेत्य दितिजेन विकृष्यमाणं कोदण्डमेतदभितः सुषुवे शरौघान्।
व्योमाङ्गणे लिपिकरान् किरणप्ररोहैः सान्द्रैरशेषककुभां पलितङ्करिष्णून्॥ २०॥
बाणैः सुरारिधनुषः प्रसृतैरनन्तैर्निर्घोषभीषितभटो लसदंशुजालैः।
अन्धीकृताखिलसुरेश्वरसैन्य ईशसूनुः कुतोऽपि विषयं न जगाम दृष्टेः॥ २१॥
देवेन मन्मथरिपोस्तनयेन गाढमाकर्णकृष्टमभितो धनुराततज्यम्।
बाणानसूत निशितान्युधि यान्सुजैत्रास्तैः सायका बिभिदरे सहसा सुरारेः॥ २२॥
रेजे सुरारिशरदुर्दिनके निरस्ते सद्यस्तरां निखिलखेचरखेदहेतौ।
देवः प्रभाप्रभुरिव स्मरशत्रुसूनुः प्रद्योतनः सुघनदुर्धरधामधामा॥ २३॥
तत्राय दुःसहतरं समरे तरस्वी धामाधिकं दधति धीरतरं कुमारे।
मायामयं समरमाशु महासुरेन्द्रो मायाप्रचारचतुरो रचयाञ्चकार॥ २४॥
अह्राय कोपकलुषो विकटं विहस्य व्यर्था समर्थ्य वरशस्त्रयुधं कुमारे।
जिष्णुर्जगद्विजयदुर्ललितः सहेलं वायव्यमस्त्रमसुरो धनुषि न्यधत्त॥ २५॥

से कहा—॥ १६॥ हे दैत्यराज! घमण्ड में चूर होकर तूमने जो कुछ कहा है, वह तुम्हें कहना ही चाहिए था। किन्तु आज मुझे भी तुम्हारी इन बड़ी-बड़ी भुजाओं के बल की थाह लेने की इच्छा हो आयी है। अतएव अपने शस्त्र उठा लो और धनुष पर डोरी चढाओ॥ १७॥ यह सुना तो तारक ने क्रुद्ध होकर कार्त्तिकेय पर क्रोध के कारण दाँतों से ओठ चबाते हुए कहा—यदि तुम्हें युद्ध के लिए अपनी प्रचण्ड भुजाओं का इतना घमण्ड है तो आओ और शत्रुओं की पीठ चलनी बना देनेवाले मेरे बाणों की चोट सहो॥ १८॥ जैसे साँप क्रोध से पागल हो जाता है, वैसे ही क्रुद्ध कार्त्तिकेय अपने धनुष पर विजयी और भयङ्कर बाण चढा ही रहे थे कि इतने में तारक ने ऐसी फुर्ती के साथ धनुष चढाकर वह बाण रखा, जिसकी ओर देखने में भी शत्रु घबराते थे॥ १९॥ अपनी चमक से आकाश को जगमगाकर सब दिशाओं को चमका देनेवाले बाण अपने धनुष पर चढा-चढ़ा और धनुष को कान तक तान-तानकर वह तारकासुर बाण छोड़ने लगा॥ २०॥ उसके धनुष से छूटकर चमचमाते हुए अनगिनत बाणों की भयंकरता देखकर सब देवसैनिक काँप उठे, सब देवताओं के आगे अँधेरा छा गया और स्वयं कार्तिकेय को भी थोडी देर तक कुछ नहीं दिखलायी पड़ा॥ २१॥ बाद में कार्तिकेय ने भी पूरे बल के साथ धनुष की डोरी कान तक खींचकर अपने तीखे और जीतनेवाले बाण बरसाकर तारक के बाणों को काट डाला॥ २२॥ सब देवताओं को दुःखदायिनी तारक के बाणों की घटा फट जाने पर शंकरजी के पुत्र कार्तिकेय अपने घने और अपार तेज के कारण सूर्य के समान चमकते हुए शोभित होने लगे॥ २३॥ युद्ध में कार्तिकेय का ऐसा प्रबल प्रताप देखकर कपटविद्या से युद्ध करने में चतुर और बलवान् तारक ने तुरन्त मायामय युद्ध आरम्भ कर दिया॥ २४॥ जिस विजयी तारकासुर ने सारे संसार को वश में कर लिया था, उसने जब यह समझा कि और अस्त्रों से कुमार के साथ लड़ने में मैं न जीतूँगा, तब उसने क्षुब्ध होकर अन्धड़ चलानेवाले वायव्य नाम का बाण धनुष पर चढाया॥ २५॥ उस बाण को धनुष पर चढ़ाते ही बड़े

सन्धानमात्रमपि यस्य युगान्तकालभूतभ्रमं परुषभीषणघोरघोषः।
उद्धूतधूलिपटलैः पिहिताम्बराशः प्रच्छन्नचण्डकिरणो व्यसरत् समीरः॥ २६॥
कुन्दोज्ज्वलानि सकलातपवारणानि धूतानि तेन मरुता सुरसैनिकानाम्।
उड्डीयमानकलहंसकुलोपमानि मेघाभधूलिमलिने नभसि प्रससुः॥ २७॥
विध्वस्य तेन सुरसैन्यमहापताका नीता नभस्तलमलं नवमल्लिकाभाः।
स्वर्गापगाज़लमहौघसहस्रलीलां व्यातेनिरे दिवि सिताम्बरकैतवेन॥ २८॥
धूतानि तेन सुरसैन्यमहागजानां सद्यः शतानि विधुराणि दलत्कुथानि।
पेतुः क्षितौ कुपितवासववज्रलूनपक्षस्य भूधरकुलस्य तुलां वहन्ति॥ २९॥
तास्ताः खरेण मरुता रथराजयोऽपि दोधूयमाननिपतिष्णुतुरङ्गमाश्च।
विस्रस्तसारथिकुलप्रवराः समन्ताद् व्यावृत्य पेतुरवनौ सुरवाहिनीनाम्॥ ३०॥
हित्वाऽऽयुधानि सुरसैन्यतुरङ्गवाहा वातेन तेन विधुराः सुरसैन्यमध्ये।
शस्त्राभिघातमनवाप्य निपेतुरुर्व्यां स्वीयेषु वाहनवरेषु पतत्सु सत्सु॥ ३१॥
तेनाहतास्त्रिदशसैन्यपदातयोऽपि सस्तायुधाः सुविधुराः परुषं रसन्तः।
वात्याविवर्तदलवद्भ्रममेत्य दूरं निष्पेतुरम्बरतलाद्वसुधातलेऽस्मिन्॥ ३२॥
इत्थं विलोक्य सुरसैन्यमथो अशेषं दैत्येश्वरेण विधुरीकृतमस्त्रयोगात्।
स्वर्लोकनाथकमलाकुशलैकहेतुर्दिव्यं प्रभावमतनोदतनुः स देवः॥ ३३॥
तेनोज्झितं सकलमेव सुरेन्द्रसैन्यं स्वास्थ्यं प्रपद्य पुनरेव युधि प्रवृत्तम्।
दृष्ट्वाऽसृजद्दहनदैवतमस्त्रमिद्धमुद्दीप्तकोपदहनः सहसा सुरारिः॥ ३४॥

वेग से घड़घड़ाती हुई आँधी चलने लगी, जिससे लोग यह समझने लगे कि अब प्रलय आ गया। उसकी धूल से आकाश और सब दिशाएँ भर गयीं और प्रचण्ड किरणोंवाले सूर्य भी छिप गये॥ २६॥ देवसैनिकों के जो कुन्द के फूल सदृश श्वेत छत्र थे, उन्हें उस भयंकर अन्धड ने इस तरह झकझोर कर उड़ा दिया कि वे मेघ के समान धूल से भरे आकाश में उड़ते हुए राजहंस जैसे दीखने लगे॥ २७॥ उस अन्धड़ ने देवसेना की सब ध्वजाओं और पताकाओं को नवविकसित चमेली के फूल की तरह तोड-ताड़कर आकाश में उड़ा दिया। आकाश में उडती हुई उजले वस्त्र की वे पताकाएँ ऐसी दीख रही थीं, मानों उस अन्धड़ ने आकाश-गंगा की उछलती हुई सहस्रों लहरियाँ बिखेर दी हों॥ २८॥ उस भयंकर अंधड़ के झोंकें में पड़ी देवसेना के जो अनेक बड़े-बड़े हाथी अपनी झूलें मसलते हुए देखते-देखते लड़खड़ाकर गिरते जा रहे थे। वे ऐसे दीखते थे, मानो इन्द्र के वज्र से पंख कट जाने पर बहुत-से पहाड पृथ्वी पर लुढ़क रहे हों॥ २९॥ उस प्रचण्ड आँधी के लपेट में पड़कर देवसेना के असंख्य घोडे लड़खड़ाकर गिरने लगे। सारथी भी इधर-उधर जा गिरे और और उनके रथ भी इधर-उधर चक्कर लगा-लगाकर उलट-पुलट गये॥ ३०॥ उस भीषण आँधी की झकोरें खाकर देवसेना के घुडसवार इतने घबड़ा गये कि अपने अस्त्र-शस्त्र देवसेना पर ही फेंकने लगे और बिना किसी शस्त्र की चोट खाये ही अपने उन घोड़ों की पीठ से गिरने लगे, जो अन्धड़ के झोंके में लुढ़कते जा रहे थे॥ ३१॥ तारक के उस वायव्य अस्त्र से देवसेना के पैदल सैनिक भी इतने घबरा गये कि वे अपने-अपने शस्त्र डाल तथा व्याकुल होकर रोने-चिल्लाने लगे और बवण्डर की भाँति चक्कर खाते हुए दूर तक आकाश में उड़-उड़कर फिर धरती पर आकर गिरने लगे॥ ३२॥ दैत्यराज तारक ने जो वायव्य-अस्त्र चलाया था, उससे देवसेना को इस प्रकार नष्ट होते देखकर स्वर्ग की राजलक्ष्मी के रक्षक कार्तिकेय ने अपना अनोखा और बड़ा भारी प्रभाव दिखलाना आरम्भ कर दिया॥ ३३॥ उन्होंने ऐसा कुछ किया कि जिससे देवसेना पर छाया हुआ अन्धड़ दूर हो

वर्षातिकालजलदद्युतयो नभोऽन्ते गाढान्धकारितदिशो घनधूमसङ्घः।
सद्यः प्रसस्रुरसितोत्पलदामभासो दृग्गोचरत्वमखिलं न हि सन्नयन्तः॥ ३५॥
दिक्चक्रवालगिलनैर्मलिनैस्तमोभिर्लिप्तं नभःस्थलमलं घनवृन्दसान्द्रैः।
धूमैर्विलोक्य मुदिताः खलु राजहंसा गन्तुं सरः सपदि मानसमीपुरुच्चैः॥ ३६॥
जज्वाल वह्निरतुलः सुरसैनिकेषु कल्पान्तकालदहनप्रतिमः समन्तात्।
आशामुखानि विमलान्यखिलानि लीलाजालैरलं कपिलयन्सकलं नभोऽपि॥ ३७॥
उज्जागरस्य दहनस्य निरर्गलस्य ज्वालावलीभिरतुलाभिरनारताभिः।
कीर्णं पयोदनिवहैरिव धूमसङ्घैर्व्योमाभ्यलक्ष्यत कुलैस्तडितामिवोच्चैः॥ ३८॥
गाढाङ्कयाद्वियति विद्रुतखेचरेण दीप्तेन तेन दहनेन सुदुःसहेन।
दन्दह्यमानमखिलं सुरराजसैन्यमत्याकुलं शिवसुतस्य समीपमाप॥ ३९॥
इत्यग्निना घनतरेण ततोऽभिभूतं तद्देवसैन्यमखिलं विकलं विलोक्य।
सस्मेरवक्त्रकमलोऽन्धकशत्रुसूनुर्बाणासनेन समधत्त स वारुणास्त्रम्॥ ४०॥
घोरान्धकारनिकरप्रतिमो युगान्तकालानलप्रबलधूमनिभो नभोऽन्ते।
गर्जारवैर्विघटयन्नवनीधराणां शृङ्गाणि मेघनिवहो घनमुज्जगाम॥ ४१॥
विद्युल्लता वियति वारिदवृन्दमध्ये गम्भीरभीषणरवैः कपिशीकृताशा।
घोरा युगान्तचलितस्य भयङ्करोऽथ कालस्य लोलरसनेव चमच्चकार॥ ४२॥
कादम्बिनी विरुरुचे विषकण्ठिकाभिरुत्तालकालरजनीजलदावलीभिः।
व्योम्न्युच्चकैरचिररुक्परिदीपितांशा दृष्टिच्छदा विषमघोषविभीषणा च॥ ४३॥

गया और सारी सेना हरी-भरी और नयी-सी होकर फिर लड़ने लगी। यह देखा तो तारक क्षुब्ध हो उठा और उसने आग बरसानेवाला अग्निबाण चलाया॥ ३४॥ तब बरसात के काले-काले बादलों की तरह और नीलकमल के झुण्ड के समान काला-काला घना धुआँ चारों ओर ऐसा फैल गया कि कहीं कुछ दीखता ही नहीं था॥ ३५॥ घने बादलों के समान काले-काले धुएँ से जब सारा आकाश भर गया तो राजहंसों को यह भ्रम हो गया कि बरसात आ गयी और वे प्रसन्न मन से मानसरोवर जाने को तैयार हो गये॥ ३६॥ इतने में देवसेना के भीतर प्रलयाग्नि के समान ऐसी भयानक आग भभक उठी कि उसकी लपटों से सारा आकाश और दिशाएँ पीली पड़ गयीं॥ ३७॥ अनवरत धधक-धधककर जलती हुई आग की बड़ी-बड़ी लपटों और ऊपर फैले हुए काले-काले धुएँ से भरा हुआ आकाश ऐसा दीखने लगा कि जैसे वह ऊँचे-ऊँचे बादलों और बिजलियों से भर गया हो॥ ३८॥ आकाश में फैली हुई उस धधकती आग की लपटों में झुलसकर लोग इधर-उधर भागने लगे और बुरी तरह झुलसी हुई देवसेना बहुत घबराकर फिर शिवतनय कार्तिकेय के पास जा पहुँची॥ ३९॥ भयङ्कर आग से झुलसती हुई देवसेना को देखकर कार्तिकेय ने हँसकर धनुष पर वह वारुणास्त्र चढ़ाया, जो पानी बरसाता था॥ ४०॥ उस अस्त्र के चलाते ही भयंकर अँधेरा छा गया और प्रलय की आग से उठे हुए धुएँ के समान काली-काली घटाएँ आकाश में घिर आयीं, जिनकी गरज से पहाड़ों की चोटियों तक में दरारें पड़ गयीं॥ ४१॥ उन बादलों से बड़ी भयानक घड़घड़ाहट के साथ ऐसी भयङ्कर बिजली तड़पी कि उसकी चमक से सब दिशाएँ पीली पड़ गयीं। उस समय वह बिजली ऐसी लगती थी कि जैसे प्रलयकाल में काल की लपलपाती हुई भयंकर जीभ हो॥ ४२॥ बिजली की चमक से सब दिशाओं में चकाचौंध उत्पन्न कर देनेवाली, भीषण गर्जन से भरी, भयंकर प्रलयकालीन बादलों के समान काली और जल से भरी घटाएँ आकाश

व्योम्नस्तलं पिदधतां ककुभां मुखानि गर्जारवैरविरतैस्तुदतां मनांसि।
अम्भोभृतामतितरामनणीयसीभिर्धारावलीभिरभितो ववृषे समूहैः ॥ ४४ ॥
घोरान्धकारपटलैः पिहिताम्बराणां गम्भीरगर्जनरवैर्व्यथितासुराणाम्।
वृष्ट्या तया जलमुचां वरुणास्त्रजानां विश्वोदरम्भरिरपि प्रशशाम वह्निः ॥ ४५ ॥
दैत्योऽपि रोषकलुषो निशितैः क्षुरप्रैराकर्णकृष्टधनुरुत्पतितैः स भीमैः।
तद्भीतिविद्रुतसमस्तसुरेन्द्रसैन्यो गाढं जघान मकरध्वजशत्रुसूनुम् ॥ ४६ ॥
देवोऽपि दैत्यविशिखप्रकरं सचापं बाणैश्चकर्त कणशो रणकेलिकारी।
योगीव योगविधिशुष्कमना यमाद्यैः सांसारिकं विषयसङ्गममोघवीर्यम् ॥ ४७ ॥
भ्रूभङ्गभीषणमुखोऽसुरचक्रवर्ती सन्दीप्तकोपदहनोऽथ रथं विहाय।
क्रीडत्करालकरवालकरोऽसुरेन्द्रस्तं प्रत्यधावदभितस्त्रिपुरारिसूनुम् ॥ ४८ ॥
अभ्यापतन्तमसुराधिपमीशपुत्रो दुर्वारबाहुविभवं सुरसैनिकैस्तम्।
दृष्ट्वा युगान्तदहनप्रतिमां मुमोच शक्तिं प्रमोदविकसद्वदनारविन्दः ॥ ४९ ॥
उद्द्योतिताम्बरदिगन्तरमंशुजालैः शक्तिः पपात हृदि तस्य महासुरस्य।
हर्षश्रुभिः सह समस्तदिगीश्वराणां शोकोष्णबाष्पसलिलैः सह दानवानाम् ॥ ५० ॥
शक्त्या हृतासुमसुरेश्वरमापतन्तं कल्पान्तवातहतभिन्नमिवाद्रिशृङ्गम्।
दृष्ट्वा प्ररूढपुलकाञ्चितचारुदेहा देवाः प्रमोदमगमंस्त्रिदशेन्द्रमुख्याः ॥ ५१ ॥
यत्रापतत् स दनुजाधिपतिः परासुः संवर्तकालनिपतच्छिखरीन्द्रतुल्यः।
तत्रादधात् फणिपतिर्धरणीं फणाभिस्तद्भूरिभारविधुराभिरधोव्रजन्तीम् ॥ ५२ ॥

में इस प्रकार अन्धेरा करके छा गयीं कि आँखों से कुछ सूझता ही नहीं था ॥ ४३ ॥ आकाश में छायी हुई और लगातार गरज-गरजकर लोगों का दिल दहलाती हुई वे घटाएँ मूसलाधार जल बरसाने लगीं ॥ ४४ ॥ कार्तिकेय द्वारा चलाये हुए वारुणास्त्र से अँधेरा करके आकाश को छिपा देने और अपनी कड़क से दैत्यों को कँपा देनेवाले बादल छा गये। उनकी वर्षा से संसारभर में फैल जानेवाली आग बुझ गयी ॥ ४५ ॥ तब क्रोध से लाल तारक ने कान तक खींचकर-खींचकर पैने और चमचमाते छुरोंवाले भयंकर बाण बरसाते हुए देवसेना को डरा तथा तितर-बितर करके कार्तिकेय पर भी करारा प्रहार किया ॥ ४६ ॥ कार्तिकेय ने भी खेल-खेल में ही तारक के धनुष और बाण कण-कण करके इस प्रकार काटकर गिरा दिये, जैसे योगी लोग यम-नियम आदि योगविधियों से अपने मन की वासनाएँ मिटा डालते हैं ॥ ४७ ॥ यह देखकर दैत्यराज तारक अपनी तनी हुई भौंहों के कारण और भी भयंकर दिखलायी देने लगा। अब वह दैत्य रथ छोड़ तथा हाथ में लपलपाती हुई भयंकर तलवार लेकर कार्तिकेय पर झपटा ॥ ४८ ॥ कार्तिकेय ने जब देखा कि भयंकर तारक मुझ पर झपट रहा है और देवताओं के सैनिकों द्वारा हराये नहीं हारता, तब उन्होंने हँसकर प्रलय की अग्नि के समान भयंकर अपना शक्ति-अस्त्र उस पर फेंका ॥ ४९ ॥ अपनी चमक से सब दिशाओं को चमकानेवाला वह शक्ति-अस्त्र तारक के हृदय पर जाकर लगा। उसके लगते ही देवताओं की आँखों से हर्ष के और दैत्यों की आँखों से दुःख के आँसू एक साथ बह निकले ॥ ५० ॥ शक्ति के प्रहार से मरकर गिरा हुआ तारक ऐसा दीखता था, जैसे प्रलय की आँधी से टूटकर गिरा हुआ पहाड़ का कोई शिखर हो। इन्द्र आदि देवताओं ने जब उस तारक दैत्य को गिरा हुआ देखा तो वे सब हर्ष से उछल पड़े और उनके रोम-रोम फड़क उठे ॥ ५१ ॥ दैत्यराज तारकासुर प्रलयकाल की आँधी से टूटकर गिरे हुए पहाड़ के समान मरकर गिर गया और उसके भारी बोझ से दबकर पृथ्वी

स्वर्गापगासलिलसीकरिणी समन्तात् सौरभ्यलुब्धमधुपावलिसेव्यमाना।
कल्पद्रुमप्रसववृष्टिरभून्नभस्तः शम्भोः सुतस्य शिरसि त्रिदशारिशत्रोः॥५३॥
पुलकभरविभिन्नवारबाणा भुजविभवं बहु तारकस्य शत्रोः।
सकलसुरगणा महेन्द्रमुख्याः प्रमदमुखच्छविसम्पदोऽभ्यनन्दन्॥५४॥
इति विषमशरारेः सूनुना जिष्णुनाजौ त्रिभुवनवरशल्ये प्रोद्धृते दानवेन्द्रे।
बलरिपुरथ नाकस्याधिपत्यं प्रपद्य व्यजयत सुरचूडारत्नघृष्टाग्रपादः॥५५॥

इति महाकविकालिदासकृतौ कुमारसम्भवे महाकाव्ये
तारकासुरवधो नाम सप्तदशः सर्गः॥१७॥

समाप्तोऽयं ग्रन्थः

जब नीचे को धँसी तो शेष ने उसे अपने फणों पर किसी-किसी प्रकार सँभाला॥५२॥ उस समय आकाशगङ्गा के जल की फुहारों से भरे और सुगन्ध के लोभी भौंरों से घिरे कल्पवृक्ष के फूल आकाश से कार्तिकेय के सिर पर बरसने लगे॥५३॥ आनन्दातिरेक मे देवताओं के मुँह खिल गये और वे हर्ष से इतने फूल उठे कि उनकी छातियों पर कसे कवच तड़ातड़ टूटने लगे। इस प्रकार आनन्द से मस्त इन्द्र आदि देवता आकर तारक को मारनेवाले कुमार के भुजबल की सराहना करने लगे॥४५॥ इस तरह विजयी कार्तिकेय ने जब समस्त त्रिलोकी के हृदय में काँटे की भाँति खटकनेवाले उस तारकासुर को मार डाला, तब इन्द्र फिर स्वर्ग के स्वामी बन गये। उन्हें सबसे श्रेष्ठ समझकर सब देवता अपने-अपने मुकुट की मणियों सहित अपना मस्तक उनके चरणों पर रखकर वन्दना करने लगे॥४५॥

इस प्रकार महाकविकालिदासरचित कुमारसम्भवमहाकाव्य में तारक राक्षस का वध नामक सतरहवाँ सर्ग समाप्त॥१७॥



'स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु'

मेघदूतम्

॥ श्रीः ॥

मेघदूतम्

पूर्वमेघः

कश्चित्कान्ताविरहगुरुणा स्वाधिकारात्प्रमत्तः शापेनाऽस्तङ्गमितमहिमा वर्षभोग्येण भर्तुः।
यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु॥ १॥
तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्तः स कामी नीत्वा मासान्कनकवलयभ्रंशरिक्तप्रकोष्ठः।
आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुं वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श॥ २॥
तस्य स्थित्वा कथमपि पुरः कौतुकाधानहेतोरन्तर्बाष्पश्चिरमनुचरो राजराजस्य दध्यौ।
मेघालोके भवति सुखिनोऽप्यन्यथावृत्ति चेतः कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे॥ ३॥
प्रत्यासन्ने नभसि दयिताजीवितालम्बनार्थी जीमूतेन स्वकुशलमयीं हारयिष्यन्प्रवृत्तिम्।
सः प्रत्यग्रैः कुटजकुसुमैः कल्पितार्घाय तस्मै प्रीतः प्रीतिप्रमुखवचनं स्वागतं व्याजहार॥ ४॥
धूमज्योतिःसलिलमरुतां सन्निपातः क्व मेघः सन्देशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः।
इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे कामार्त्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु॥ ५॥

एक यक्ष कुबेर के यहाँ अलकापुरी में सेवा करता था, परन्तु उसका मन दिन-रात अपनी स्त्री में ही आसक्त रहता था। इसी बेसुधी में एक बार उसने कुबेर को पूजा के लिए बासी फूल लाकर दे दिये। जिससे कुबेर ने कुपित हो उसे यह कहकर देश निकाला दे दिया कि 'अब से एक वर्ष तक तू अपनी पत्नी से नहीं मिलने पायेगा।' इस शाप से उसका सारा राग-रंग जाता रहा और शाप के दिन काटने के लिए उसने रामगिरि (चित्रकूट) के उन आश्रमों में जाकर डेरा डाला, जहाँ के बावड़ियों का जल श्रीजानकी के स्नान करने से पवित्र हो गया था और जहाँ घनी छाया वाले बहुत-से वृक्ष जहाँ-तहाँ लहलहाते दीख रहे थे॥ १॥ जो अपनी पत्नी के बिना एक क्षण भी नहीं रह पाता था, वह यक्ष पत्नी से बिछुडने पर सूखकर काँटा हो गया। उसके हाथ के सोने के कंकण ढीले होकर निकल गये और किसी प्रकार रोते-कलपते उसने आठ महीने तो उस पहाडी पर जैसे-तैसे काट दिये, परन्तु आषाढ के पहले ही दिन वह देखता क्या है कि सामने पहाडी की चोटी से लिपटा हुआ बादल ऐसा लग रहा है कि मानो कोई हाथी अपने माथे की टक्कर से मिट्टी के टीले को ढहाने का खेल कर रहा है॥ २॥ उस बादल को देखकर महाराज कुबेर का वह सेवक आँसू रोके ज्यों-त्यों खड़ा-खडा बहुत देर तक कुछ सोचता रह गया। क्योंकि बादलों को देखकर जब सुखी लोगों का मन भी डाँवाडोल हो जाता है, तब उस वियोगी का तो कहना ही क्या, जो दूर देश में पड़ा अपनी प्यारी के गले लगने के लिए व्याकुल हो॥ ३॥ उस बादल को देखकर उसे ध्यान आया कि आषाढ़ बीतते ही सावन भी आ जायेगा और उस समय मेरी सुकुमारी प्रिया अपने को सँभाल न सकेगी। इसलिए उसने सोचा कि अपनी प्रियतमा को ढाढस बँधाने और उसके प्राण बचाने के लिए क्यों न इस बादल के द्वारा ही अपना कुशल-समाचार भेज दूँ। यह ध्यान आते ही वह मगन हो उठा। उसने झटपट कुटज के कुछ ताजे फूलों को लेकर पहले मेघ की पूजा की और फिर कुशल-मंगल पूछकर उसका स्वागत किया॥ ४॥ कहाँ तो धुएँ, अग्नि, जल और वायु के मेल से बना हुआ बादल और

जातं वंशे भुवनविदिते पुष्करावर्त्तकानां जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः।
तेनार्थित्वं त्वयि विधिवशाद्दूरबन्धुर्गतोऽहं याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा॥ ६ ॥
सन्तप्तानां त्वमसि शरणं तत्पयोद! प्रियायाः सन्देशं मे हर धनपतिक्रोधविश्लेषितस्य।
गन्तव्या ते वसतिरलका नाम यक्षेश्वराणां बाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्या॥ ७ ॥
त्वामारूढं पवनपदवीमुद्गृहीतालकान्ताः प्रेक्षिष्यन्ते पथिकवनिताः प्रत्ययादाश्वसन्त्यः।
कः सन्नद्धे विरहविधुरां त्वय्युपेक्षेत जायां न स्यादन्योऽप्यहमिव जनो यः पराधीनवृत्तिः॥ ८ ॥
तां चावश्यं दिवसगणनातत्परामेकपत्नीमव्यापन्नामविहतगतिर्द्रक्ष्यसि भ्रातृजायाम्।
आशाबन्धः कुसुमसदृशं प्रायशो ह्यङ्गनानां सद्यःपाति प्रणयि हृदयं विप्रयोगे रुणद्धि ॥ ९ ॥
मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वां वामश्चायं नदति मधुरं चातकस्ते सगन्धः।
गर्भाधानक्षणपरिचयान्नूनमाबद्धमालाः सेविष्यन्ते नयनसुभगं खे भवन्तं बलाकाः ॥ १० ॥
कर्तुं यच्च प्रभवति महीमुच्छिलीन्ध्रामवन्ध्यां तच्छ्रुत्वा ते श्रवणसुभगं गर्जितं मानसोत्काः।
आ कैलासाद्विसकिसलयच्छेदपाथेयवन्तः सम्पत्स्यन्ते नभसि भवतो राजहंसाः सहायाः॥ ११॥

कहाँ सन्देश की वे बातें, जिन्हें बड़े चतुर लोग ही ला-पहुँचा सकते हैं। परन्तु यक्ष को अपने तन-मन की तो सुधि थी ही नहीं, फिर भला उसका ध्यान यहाँ तक कैसे पहुँच पाता। इसीलिए वह यक्ष अपना सन्देश भेजने के लिए बादल के आगे गिड़गिड़ाने लगा। सच है, प्रेमियों को यह जानने की चेतना ही कहाँ रहती है कि कौन जड़ है और कौन चेतन॥ ५॥ बादल की बड़ाई करता हुआ यक्ष कहने लगा—हे मेघ! संसार में पुष्कर और आवर्तक नाम के जो बादलों के दो प्रसिद्ध और ऊँचे कुल हैं, उन्हीं में तुमने जन्म लिया है। मैं यह भी जानता हूँ कि तुम इन्द्र के दूत हो और जैसा चाहो वैसा अपना रूप बना सकते हो। इसीलिए अपनी प्यारी से इतनी दूर लाकर पटका हुआ मैं अभागा तुम्हारे आगे हाथ पसार रहा हूँ। क्योंकि गुणी के आगे हाथ फैलाकर खाली हाथ लौट आना अच्छा है, परन्तु नीच से मनचाहा फल पा जाना भी अच्छा नहीं होता॥ ६॥ तुम्ही तो संसार के तपे हुए प्रणियों को ठंडक देते हो, इसलिए हे मेघ! कुबेर के क्रोध से निकाले और अपनी प्यारी से दूर बिछुड़े हुए मुझ वियोगी का संदेश भी तुम्हीं मेरी प्यारी के पास पहुँचा आओ। देखो! यह सन्देश लेकर तुम्हे बड़े ठाट-बाट से रहने वाले यक्षों की अलका नाम की उस नगरी की ओर जाना होगा, जहाँ के भवनों में बस्ती के बाहर वाले उद्यान में बनी शिवजी की मूर्ति के सिर की चन्द्रिका से सदा उजाला रहा करता है॥ ७॥ तुम वायु के सहारे जब ऊपर चढ़ोगे, तब परदेशियों की स्त्रियाँ अपने केश ऊपर उठाकर बडे भरोसे के साथ ढाढ़स पाकर तुम्हारी ओर एकटक होकर देखेंगी। क्योंकि मुझ जैसे पराधीन को छोड़कर और कौन ऐसा निर्दयी होगा, जो तुम्हें उमड़ा हुआ देखकर भी बिछोह में तड़पने वाली अपनी पत्नी से मिलने को उतावला न हो उठे॥ ८॥ हे मेघ! ऐसा कोई स्थान नहीं है, जहाँ तुम्हारी पहुँच न हो। इसलिए तुम अपनी उस पतिव्रता भाभी को अवश्य पा जाओगे, जो बैठी-बैठी मेरे लौटने के दिन गिन रही होगी। क्योंकि देखो, प्रेमियों का फूल जैसा कोमल हृदय मिलन की आशा पर ही अटका रहता है। इसलिए स्त्रियों के जो हृदय अपने प्रेमियों से बिछुड़ने पर एक क्षण भी नहीं टिके रह सकते, वे इसी आशा के भरोसे उन स्त्रियों को जिलाये रखते हैं॥ ९॥ देखो! सगुन भी अच्छे हो रहे हैं। तुम्हारा साथी वायु धीरे-धीरे तुम्हें आगे बढा रहा है। इधर मतवाला यह चातक भी बाँयीं ओर मीठी बोली बोल रहा है। अभी थोड़ी ही देर में तुम्हारा यह आँखों को सुहानेवाला रूप देखकर बलाकाएँ भी समझ लेंगी कि हमारे गर्भ धारण करने का समय आ गया है और वे पाँत बाँध-बाँधकर अपने पंखों से तुम्हें पंखा झलने के लिए अवश्य ही आकाश में उड़कर आती होंगी॥ १०॥ तुम्हारे जिस गर्जन से कुकुरमुत्ते निकल आते हैं और धरती उपजाऊ हो जाती है, वही कानों को भला लगनेवाले तुम्हारा

आपृच्छस्व प्रियसखममुं तुङ्गमालिङ्ग्य शैलं वन्द्यैः पुंसां रघुपतिपदैरङ्कितं मेखलासु।
काले काले भवति भवतो यस्य संयोगमेत्य स्नेहव्यक्तिश्चिरविरहजं मुञ्चतो बाष्पमुष्णम्॥ १२॥
मार्गं तावच्छृणु कथयतस्त्वत्प्रयाणानुरूपं सन्देशं मे तदनु जलद! श्रोष्यसि श्रोत्रपेयम्।
खिन्नः खिन्नः शिखरिषु पदं न्यस्य गन्तासि यत्र क्षीणः क्षीणः परिलघु पयः स्रोतसां चोपभुज्य॥ १३॥
अद्रेः शृङ्गं हरति पवनः किंस्विदित्युन्मुखीभिर्दृष्टोत्साहश्चकितचकितं मुग्धसिद्धाङ्गनाभिः।
स्थानादस्मात्सरसनिचुलादुत्पतोदङ्मुखः खं दिङ्नागानां पथि परिहरन्स्थूलहस्तावलेपान्॥ १४॥
रत्नच्छायाव्यतिकर इव प्रेक्ष्यमेतत्पुरस्ताद्वल्मीकाग्रात्प्रभवति धनुःखण्डमाखण्डलस्य।
येन श्यामं वपुरतितरां कान्तिमापत्स्यते ते बर्हेणेव स्फुरितरुचिना गोपवेषस्य विष्णोः॥ १५॥
त्वय्यायत्तं कृषिफलमिति भ्रूविलासानभिज्ञैः प्रीतिस्निग्धैर्जनपदवधूलोचनैः पीयमानः।
सद्यःसीरोत्कषणसुरभि क्षेत्रमारुह्य मालं किञ्चित्पश्चाद् व्रज लघुगतिर्भूय एवोत्तरेण॥ १६॥
त्वामासारप्रशमितवनोपप्लवं साधु मूर्ध्ना वक्ष्यत्यध्वश्रमपरिगतं सानुमानाम्रकूटः।
न क्षुद्रोऽपि प्रथमसुकृतापेक्षया संश्रयाय प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः॥ १७॥

गर्जन सुनकर मानसरोवर जाने को उतावले राजहंस अपनी चोचों में कमल की डंठल लिये हुए कैलास पर्वत तक तुम्हारे साथ-साथ आकाश में उडते हुए जायेंगे॥ ११॥ हे मेघ! जिस पहाड से तुम लिपटे हुए हो, इसकी ढालों पर भगवान् रामचन्द्रजी के उन पैरों की छाप जहाँ-तहाँ पड़ी हुई है, जिन्हें सारा संसार पूजता है। प्रतिवर्ष जब तुम इससे मिलने आते हो, तब यह भी बहुत दिनों पर मिलने के कारण अपने गरम-गरम आँसू बहाकर तुम्हारे साथ अपना प्रेम प्रकट करता है। इसलिए अपने इस प्यारे मित्र पहाड की चोटी से जी भर गले मिलकर विदा ले लो॥ १२॥ अच्छा, पहले मैं तुम्हें वह मार्ग समझा दूँ, जिधर से जाने में तुम्हे कोई कष्ट नहीं होगा। मार्ग समझा देने पर मैं अपना मधुर संदेश भी बता दूँगा। देखो! मार्ग में चलते हुए जब कभी थकने लगो तो रास्ते में पड़ती हुई पर्वत की चोटियों पर ठहरते जाना और जब-जब तुम पानी की कमी से दुबले पडने लगो, तब-तब झरनों का हल्का-हल्का जल पीते हुए आगे बढ़ना॥ १३॥ बेंतों से लदी हुई इस पहाडी से जब तुम ऊपर उडोगे, तब तुम्हारी उडान देखकर सिद्धों की भोली-भाली स्त्रियाँ आँखें फाड़-फाड़कर तुम्हारी ओर देखती हुई सोचेंगी कि कहीं पहाड़ की चोटी को पवन तो नहीं उडाये लिए चला जा रहा है? इस प्रकार ठाट से उड़ते हुए तुम दिग्गजों की मोटी सूँड़ों की फटकारों को ढकेलते हुए उत्तर की ओर घूम जाना॥ १४॥ देखो! सामने वल्मीकाग्र से (सूर्य की कान्ति से प्रभावित मेघ) उठा हुआ इन्द्रधनुष का वह टुकड़ा ऐसा सुन्दर दिखलाई पड रहा है, मानो बहुत-से रत्नों की चमक एक साथ यहाँ लाकर इकट्ठी कर दी गयी हो। इस इन्द्रधनुष से सजा हुआ तुम्हारा साँवला शरीर ऐसा सुन्दर लगने लगा है, जैसे मोरमुकुट पहने और ग्वाले का वेश बनाये हुए स्वयं श्रीकृष्णजी आ खड़े हुए हों॥ १५॥ हाँ, खेती का होना न होना भी एकमात्र तुम्हारे ही हाथ में है। इसलिए किसानों की वे भोली-भाली स्त्रियाँ तुम्हें बड़े प्रेम और आदर के साथ देखेंगी, जिन्हें कि भौं चलाकर रिझाना नहीं आता। वहाँ तुम माल (ऊँचे) प्रदेश के उन खेतों पर अवश्य बरस जाना, जहाँ अभी जोते जाने के कारण सोंधी-सोंधी सुगन्धि निकल रही होगी। वहाँ से थोड़ा पश्चिम की ओर घूमकर फिर झटपट उत्तर की ओर बढ़ जाना॥ १६॥ हे मेघ! जब तुम थककर आम्रकूट पर्वत पर पहुँचोगे, तब वह प्रशंसनीय पर्वत तुम्हें अपनी ऊँची चोटी पर सादर ठहरायेगा। तब तुम भी जल बरसाकर उसके जंगलों में लगी हुई आग (दावानल) बुझा देना। क्योंकि यदि सच्चे मन से क्षुद्रजनों का भी उपकार किया जाय तो वे अपनी भलाई करने वाले का आदर करने में देर नहीं लगाते। फिर जो इतना उच्च है, उसके विषय में क्या कहना॥ १७॥ हे मित्र! जंगलों के पके हुए आमों से जिसका तल-प्रदेश ढँका हुआ होगा, उस आम्रकूट के शिखर पर चिकनी वेणी के

छन्नोपान्तः परिणतफलद्योतिभिः काननाम्रैस्त्वय्यारूढे शिखरमचलः स्निग्धवेणीसवर्णे।
नूनं यास्यत्यमरमिथुनप्रेक्षणीयामवस्थां मध्ये श्यामः स्तन इव भुवः शेषविस्तारपाण्डुः॥ १८॥
अध्वक्लान्तं प्रतिमुखगतं सानुमानाम्रकूटस्तुङ्गेन त्वां जलद! शिरसा वक्ष्यति श्लाघ्यमानः।
आसारेण त्वमपि शमयेस्तस्य नैदाघमग्निः सद्भावार्द्रः फलति न चिरेणोपकारो महत्सु॥ १९॥
स्थित्वा तस्मिन्वनचरवधूभुक्तकुञ्जे मुहूर्तं तोयोत्सर्गद्रुततरगतिस्तत्परं वर्त्म तीर्णः।
रेवां द्रक्ष्यस्युपलविषमे विन्ध्यपादे विशीर्णां भक्तिच्छेदैरिव विरचितां भूतिमङ्गे गजस्य॥ २०॥
तस्यास्तिक्तैर्वनगजमदैर्वासितं वान्तवृष्टिर्जम्बूकुञ्जप्रतिहतरयं तोयमादाय गच्छेः।
अन्तःसारं घन! तुलयितुं नानिलः शक्ष्यति त्वां रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय॥ २१॥
नीपं दृष्ट्वा हरितकपिशं केसरैरर्द्धरूढ़ैराविर्भूतप्रथममुकुलाः कन्दलीश्चानुकच्छम्।
जग्ध्वाऽरण्येष्वधिकसुरभिं गन्धमाघ्राय चोर्व्याः सारङ्गास्ते जललवमुचः सूचयिष्यन्ति मार्गम्॥
अम्भोबिन्दुग्रहणचतुरांश्चातकान्वीक्षमाणाः श्रेणीभूताः परिगणनया निर्दिशन्तो बलाकाः।
त्वामासाद्य स्तनितसमये मानयिष्यन्ति सिद्धाः सोत्कम्पानि प्रियसहचरीसम्भ्रमालिङ्गितानि॥२३॥
उत्पश्यामि द्रुतमपि सखे! मत्प्रियार्थं यियासोः कालक्षेपं ककुभसुरभौ पर्वते पर्वते ते।
शुक्लापाङ्गैः सजलनयनैः स्वागतीकृत्य केकाः प्रत्युद्यातः कथमपि भवान्गन्तुमाशु व्यवस्येत्॥ २४॥

समान काले-काले वर्णवाले तुम जब चढोगे तब वह पर्वत ऐसा दिखलायी देगा, मानो मध्य में श्यामवर्ण शेष भाग पीले वर्ण वाला पृथ्वी का पीला स्तन हो। उसकी उस छटा को देवियों के साथ देवता भी बडे चाव से देखेंगे॥ १८॥ हे मेघ! जब तुम थककर आम्रकूट पर्वत पर पहुँचोगे, तब तुम्हें वह प्रशंसनीय पर्वत अपनी ऊँची चोटी पर भलीभाँति ठहरायेगा। उस समय तुम भी जल बरसाकर उसके जंगलों में गर्मी में लगी हुई आग को बुझा देना, क्योंकि यदि श्रद्धा-भक्ति से बडों पर उपकार किया जाय तो वे अपने ऊपर उपकार करने वाले का आदर करने में देर नहीं लगाते॥ १९॥ उस आम्रकूट के जिन कुञ्जों में जंगली स्त्रियाँ घूमा करती हैं, वहाँ थोड़ी देर ठहरना और फिर आगे की ओर चल देना। क्योंकि जल बरसा देने से तुम्हारी देह का भारीपन दूर हो जायेगा, जिससे तुम्हारी चाल बढ जायगी। वहाँ से आगे बढ़ने पर तुम्हें विन्ध्याचल के ऊबड-खाबड़ पहाड़ पर बहुत-सी धाराओं में फैली हुई नर्मदा नदी मिलेगी, जो तुम्हें ऊपर से ऐसी दिखलाई देगी मानो किसी ने बड़े हाथी का शरीर भस्म मे रंग दिया हो॥ २०॥ जब वहाँ जल बरसा चुको तो जंगली हाथियों के सुगन्धित मद से सुवासित और जामुन की कुञ्जों में बहता हुआ रेवा (नर्मदा) का जल पीकर आगे बढना। जल पीकर जब तुम भारी हो जाओगे तो वायु भी तुम्हें इधर-उधर नहीं उड़ा सकेगा। क्योंकि जिसके हाथ खाली होते हैं उसी को सब दुरदुराते हैं, जो भरा-पूरा होता है उसका सब आदर करते हैं॥ २१॥ और फिर जिस समय तुम जल बरसाते हुए चले जा रहे होंगे, उस समय अधपके और हरे-पीले कदम्ब के फूलों पर मँडराते हुए भौंरें, दलदलों में नयी फूली हुई कन्दली की पत्तियों को चरते हुए हरिण और जंगली धरती की सोंधी गन्ध सूँघते हुए हाथी तुम्हें मार्ग बतलायेंगे॥ २२॥ और देखो, बरसात की बूँदों को ऊपर ही ऊपर से चोंच में ले लेने वाले चतुर चातकों तथा झुण्ड बाँधकर उड़ती हुई चातकियों को गिनाते हुए सिद्धजन, जब तुम वहाँ पहुँचकर गरजने लगोगे तो सिद्धाङ्गनाएँ घबड़ाकर अपने-अपने प्रियतम के गले से लिपट जायेंगी। इस घबराहट-भरे आलिंगन को पाकर वे तुम्हारा उपकार मानेंगे॥ २३॥ हे मित्र! मैं जानता हूँ कि तुम मेरे काम के लिए बिना रुके शीघ्र जाना चाहोगे। फिर भी मैं समझता हूँ कि कुटज के फूलों से लदे हुए उन सुगन्धित पहाड़ों पर तुम्हें ठहरते हुए ही जाना होगा। क्योंकि वहाँ के मोर नेत्रों में आनन्द के आँसू भरकर अपनी कूक से तुम्हारा स्वागत कर रहे होंगे। फिर भी मुझे आशा है कि तुम किसी तरह वहाँ से जल्दी चल दोगे॥ २४॥ हे मित्र! जब तुम दशार्ण

पाण्डुच्छायोपवनवृतयः केतकैः सूचिभिन्नैर्नीडारम्भैर्गृहबलिभुजामाकुलग्रामचैत्याः।
त्वय्यासन्ने परिणतफलश्यामजम्बूवनान्ताः सम्पत्स्यन्ते कतिपयदिनस्थायिहंसा दशार्णाः॥ २५॥
तेषां दिक्षु प्रथितविदिशालक्षणां राजधानीं गत्वा सद्यः फलमविकलं कामुकत्वस्य लब्धा।
तीरोपान्तस्तनितसुभगं पास्यसि स्वादु यस्मात्सभ्रूभङ्गं मुखमिव पयो वेत्रवत्याश्चलोर्मि॥ २६॥
नीचैराख्यं गिरिमधिवसेस्तत्र विश्रामहेतोस्त्वत्सम्पर्कात्पुलकितमिव प्रौढपुष्पैः कदम्बैः।
यः पण्यस्त्रीरतिपरिमलोद्गारिभिर्नागराणामुद्दामानि प्रथयति शिलावेश्मभिर्यौवनानि॥ २७॥
विश्रान्तः सन् व्रज वननदीतीरजातानि सिञ्चन्नुद्यानानां नवजलकणैर्यूथिकाजालकानि।
गण्डस्वेदापनयनरुजाक्लान्तकर्णोत्पलानां छायादानात्क्षणपरिचितः पुष्पलावीमुखानाम्॥ २८॥
वक्रः पन्था यदपि भवतः प्रस्थितस्योत्तराशां सौधोत्सङ्गप्रणयविमुखो मा स्म भूरुज्जयिन्याः।
विद्युद्दामस्फुरितचकितैस्तत्र पौराङ्गनानां लोलापाङ्गैर्यदि न रमसे लोचनैर्वञ्चितोऽसि॥ २९॥
वीचिक्षोभस्तनितविहगश्रेणिकाञ्चीगुणायाः संसर्पन्त्याः स्खलितसुभगं दर्शितावर्तनाभेः।
निर्विन्ध्यायाः पथि भव रसाभ्यन्तरः सन्निपत्य स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु॥ ३०॥
वेणीभूतप्रतनुसलिलाऽसावतीतस्य सिन्धुः पाण्डुच्छाया तटरुहतरुभ्रंशिभिर्जीर्णपर्णैः।
सौभाग्यं ते सुभग! विरहावस्थया व्यञ्जयन्ती कार्श्यं येन त्यजति विधिना स त्वयैवोपपाद्यः॥ ३१॥

देश के पास पहुँचोगे, तब वहाँ की फूली हुई फुलवारियाँ फूले हुए केवड़ों के कारण उजली दिखलायी देंगी। गाँव के मन्दिर कौआ आदि पक्षियों के घोंसलों से भरे मिलेंगे। वहाँ के जंगल पकी हुई काली जामुनों से लदे मिलेंगे और हंस भी वहाँ पर कुछ दिनों के लिए आकर बसे होंगे॥ २५॥ हे सखे! जब तुम दशार्ण देश की विदिशा नाम की प्रसिद्ध राजधानी में पहुँचोगे तो तुम्हें विलास की सामग्री मिल जायेगी। क्योंकि जब तुम वहाँ की सुहावनी, मनभावनी और नाचती हुई लहरों वाली वेत्रवती नदी के तीर पर गर्जन करके उसका मीठा जल पियोगे, तब तुम्हें ऐसा लगेगा कि मानो तुम किसी कटीली भौंहोंवाली कामिनी के ओठों का रस पी रहे हो॥ २६॥ हे मित्र! वहाँ पहुँचकर तुम थकावट मिटाने के लिए 'नीच' नाम की पहाड़ी पर उतर जाना। वहाँ पर फूले हुए कदम्ब के वृक्षों को देखकर ऐसा जान पड़ेगा कि मानो तुमसे भेंट करने के कारण उनके रोम-रोम फरफरा उठे हैं। उस पहाडी की गुफाओं में से उन सुगन्धित पदार्थों की गन्ध निकल रही होगी, जिन्हें वहाँ के रसिक वेश्याओं के साथ रति करने के समय काम में लाते हैं। इससे तुम्हें यह भी पता चल जायगा कि वहाँ के नागरिक कितनी स्वतन्त्रता से जवानी का आनन्द लेते हैं॥ २७॥ हे सखे! वहाँ थकावट मिटाकर तुम जंगली नदियों के तीरों पर उपवनों में खिली हुई जूही की कलियों को अपने जल की फुहारों से सींचते हुए और वहाँ की फूल चुननेवाली उन मालिनों के मुँह पर छाया करके थोड़ी-सी जान-पहचान बढ़ाते हुए आगे बढ जाना, जिनके कानों में लटकते हुए कमल की पंखुड़ियों के कनफूल उनके गालों पर बहते हुए पसीने से लग-लगकर गंदे हो गये रहेंगे॥ २८॥ और देखो, उत्तर की ओर जाने में यद्यपि उज्जयिनीवाला मार्ग कुछ टेढा पडेगा, फिर भी तुम उस नगर के राजभवनों को देखना न भूलना। तुम्हारी बिजली की चमक से डरकर वहाँ की स्त्रियाँ जो चंचल कटाक्ष चलायेंगी, उन पर यदि तुम न रीझे तो समझ लो कि तुम्हारा जन्म व्यर्थ गया॥ २९॥ हे मित्र! उज्जयिनी की ओर जाते हुए तुम उतरकर उस निर्विन्ध्या नदी का भी रस ले लेना, जिसकी उछलती हुई लहरों पर पक्षियों की चहकती हुई पंक्तियाँ करधनी-सी दिखलाई देंगी। जो बहुत सुन्दर ढंग से रुक-रुककर बह रही होगी और उसमें पड़ी हुई भँवर तुम्हें उसकी नाभि जैसी दिखलाई देगी। क्योंकि स्त्रियाँ हाव-भाव के द्वारा ही अपने प्रेमियों को प्रेम की बात बतलाती हैं॥ ३०॥ हे मित्र! निर्विन्ध्या नदी की धारा तुम्हारे बिछोह में चोटी की भाँति पतली हो गयी होगी और तीर के वृक्षों से पीले पत्ते गिरने के कारण उसका रंग भी पीला हो गया होगा। हे भाग्यशाली मेघ! इस प्रकार अपने वियोग की दशा दिखलाकर वह यही बता रही

प्राप्यावन्तीनुदयनकथाकोविदग्रामवृद्धान् पूर्वोद्दिष्टामनुसर पुरीं श्रीविशालां विशालाम्।
स्वल्पीभूते सुचरितफले स्वर्गिणां गां गतानां शेषैः पुण्यैर्हृतमिव दिवः कान्तिमत्खण्डमेकम्॥ ३२॥
दीर्घीकुर्वन्पटु मदकलं कूजितं सारसानां प्रत्यूषेषु स्फुटितकमलामोदमैत्रीकषायः।
यत्र स्त्रीणां हरति सुरतग्लानिमङ्गानुकूलः शिप्रावातः प्रियतम इव प्रार्थनाचाटुकारः॥ ३३॥
हारांस्तारांस्तरलगुटिकान्कोटिशः शङ्खशुक्तीः शष्पश्यामान्मरकतमणीनुन्मयूखप्ररोहान्।
दृष्ट्वा यस्यां विपणिरचितान्विद्रुमाणां च भङ्गान्संलक्ष्यन्ते सलिलनिधयस्तोयमात्रावशेषाः॥ ३४॥
प्रद्योतस्य प्रियदुहितरं वत्सराजोऽत्र जह्रे हैमं तालद्रुमवनमभूदत्र तस्यैव राज्ञः।
अत्रोद्भ्रान्तः किल नलगिरिः स्तम्भमुत्पाट्य दर्पादित्यागन्तून्रमयति जनो यत्र बन्धूनभिज्ञः॥ ३५॥
जालोद्गीर्णैरुपचितवपुः केशसंस्कारधूपैर्बन्धुप्रीत्या भवनशिखिभिर्दत्तनृत्योपहारः।
हर्म्येष्वस्याः कुसुमसुरभिष्वध्वखेदं नयेथा लक्ष्मीं पश्यँल्ललितवनितापादरागाङ्कितेषु॥ ३६॥
भर्तुः कण्ठच्छविरिति गणैः सादरं वीक्ष्यमाणः पुण्यं यायास्त्रिभुवनगुरोर्धाम चण्डीश्वरस्य।
धूतोद्यानं कुवलयरजोगन्धिभिर्गन्धवत्यास्तोयक्रीडानिरतयुवतिस्नानतिक्तैर्मरुद्भिः॥ ३७॥

होगी कि मैं तुम्हारे वियोग में सूखी जा रही हूँ। देखो! तुम ऐसा कोई उपाय करना कि जिससे उस बेचारी का दुबलापन दूर हो जाय॥ ३१॥ अवन्ति देश में पहुँचकर तुम धन-धान्य से भरी हुई उस विशाला नगरी की ओर चले जाना, जिसकी चर्चा मैं पहले ही कर चुका हूँ। वहाँ गाँव के बडे-बूढे लोग महाराज उदयन की कथा भली प्रकार जानते हैं। वह नगरी ऐसी लगती है कि मानो स्वर्ग में अपने पुण्यों का फल भोगनेवाले पुण्यात्मा लोग पुण्य समाप्त होने से पहले ही अपने बचे हुए पुण्य के बदले स्वर्ग का एक चमकीला भाग लेकर उसे अपने साथ धरती पर उतार लाये हों॥ ३२॥ हे मेघ! उस नगरी में सारसों की मीठी बोली को दूर-दूर तक फैलाती तथा प्रायः खिले हुए कमलों की गन्ध में बसी हुई और शरीर को सुहानेवाली शिप्रा की वायु स्त्रियों की संभोगजनित थकावट को उसी प्रकार दूर करती है, जैसे चतुर प्रेमी मीठी-मीठी बातें बना तथा इत्र सुँघा और पंखा झलकर संभोग से थकी हुई अपनी प्यारी की थकावट दूर करता है॥ ३३॥ हे सखे! उज्जयिनी के बाजारों में तुम्हें कहीं करोडों मोतियों की ऐसी मालाएँ सजी हुई दिखलाई देंगी, जिनके बीच-बीच में बडे-बड़े रत्न गुँथे हुए होंगे। कहीं करोड़ों शंख और सीपियाँ रखी हुई होंगी और कहीं पर नयी घास के समान नीले और चमकीले नीलम बिछे दिखलाई देंगे। उन्हें देखकर यही जान पड़ेगा कि सब रत्न तो यहाँ रखे हैं और समुद्रों में केवल पानी ही पानी रह गया है॥ ३४॥ हे मित्र! वहाँ के जानकार लोग यह कथा सुना-सुनाकर बाहर से आये हुए अपने सम्बन्धियों का मन बहला रहे होंगे कि वहाँ पर वत्सदेश के राजा उदयन ने उज्जयिनी के महाराज प्रद्योत की प्यारी कन्या वासवदत्ता को हरा था, यहीं उनका बनाया हुआ सुनहले ताड़ के पेड़ों का उपवन था और यहीं पर मद में भरा हुआ नलगिरि नाम का हाथी खूँटा उखाड तथा पागल होकर इधर-उधर घूमता था॥ ३५॥ हे मेघ! वहाँ की स्त्रियों के बालों को सुगन्धित करके अगर की धूप का जो धुआँ झरोखों से निकलता होगा, उससे तुम्हारा शरीर बढेगा और तुम्हें अपना सगा समझकर वहाँ के पालतू मोर नाच-नाचकर तुम्हारा सत्कार करेंगे। तब तुम फूलों की गन्ध से महकते हुए वहाँ के उन भवनों की सजावट देखकर अपनी थकावट दूर कर लेना, जिनमें सुन्दरियों के चरणों में लगी हुई महावर से पैरों की लाल-लाल छाप बनी हुई होगी॥ ३६॥ हे मित्र! वहाँ से तुम तीनों लोक के स्वामी और चण्डी के पति महाकाल के पवित्र मन्दिर की ओर चले जाना। वहाँ शिवजी के गण तुम्हें अपने स्वामी शिवजी के कण्ठ के समान नीला देखकर बड़े आदर से निहारेंगे। वहाँ पर जल-विहार करने वाली युवतियों के स्नान करने से महकती और कमल की गन्ध में बसी हुई गन्धवती नदी की ओर से आने वाला पवन उस मन्दिर के उपवन को बार-बार झकझोर रहा होगा॥ ३७॥ हे मेघ!

अप्यन्यस्मिञ्जलधर! महाकालमासाद्य काले स्थातव्यं ते नयनविषयं यावदत्येति भानुः।
कुर्वन्सन्ध्याबलिपटहतां शूलिनः श्लाघनीयामामन्द्राणां फलमविकलं लप्स्यसे गर्जितानाम्॥३८॥
पादन्यासैः क्वणितरशनास्तत्र लीलावधूतै रत्नच्छायाखचितवलिभिश्चामरैः क्लान्तहस्ताः।
वेश्यास्त्वत्तो नखपदसुखान्प्राप्य वर्षाग्रबिन्दूनामोक्ष्यन्ते त्वयि मधुकरश्रेणिदीर्घान्कटाक्षान्॥ ३९॥
पश्चादुच्चैर्भुजतरुवनं मण्डलेनाभिलीनः सान्ध्यं तेजः प्रतिनवजपापुष्परक्तं दधानः।
नृत्यारम्भे हर पशुपतेरार्द्रनागाजिनेच्छां शान्तोद्वेगस्तिमितनयनं दृष्टभक्तिर्भवान्याः॥ ४०॥
गच्छन्तीनां रमणवसतिं योषितां तत्र नक्तं रुद्धालोके नरपतिपथे सूचिभेद्यैस्तमोभिः।
सौदामिन्या कनकनिकषस्निग्धया दर्शयोर्वीं तोयोत्सर्गस्तनितमुखरो मा स्म भूर्विक्लवास्ताः॥ ४१॥
तां कस्याञ्चिद्भवनवलभौ सुप्तपारावतायां नीत्वा रात्रिं चिरविलसनात्खिन्नविद्युत्कलत्रः।
दृष्टे सूर्ये पुनरपि भवान्वाहयेदध्वशेषं मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः॥ ४२॥
तस्मिन् काले नयनसलिलं योषितां खण्डितानां शान्तिं नेयं प्रणयिभिरतो वर्त्म भानोस्त्यजाशु।
प्रालेयास्रं कमलवदनात्सोऽपि हर्तुं नलिन्याः प्रत्यावृत्तस्त्वयि करुधि स्यादनल्पाभ्यसूयः॥ ४३॥
गम्भीरायाः पयसि सरितश्चेतसीव प्रसन्ने छायात्माऽपि प्रकृतिसुभगो लप्स्यते ते प्रवेशम्।
तस्मादस्याः कुमुदविशदान्यर्हसि त्वं न धैर्यान्मोघीकर्तुं चटुलशफरोद्वर्तनप्रेक्षितानि॥ ४४॥

यदि तुम महाकाल के मन्दिर में साँझ होने से पहले पहुँच जाओ तो भी वहाँ तब तक ठहर जाना, जब तक सूर्य भली प्रकार आँखों से ओझल न हो जायँ। जब महादेवजी की साँझ की सुहावनी आरती होने लगे, तब तुम भी अपने गर्जन रूपी नगाड़ा बजाने लगना। इससे तुम्हें अपने मन्द एवं गम्भीर गर्जन का पूरा फल मिल जायगा॥ ३८॥ हे मित्र! सन्ध्या के समय नाच में पैर चलाती हुई जिन वेश्याओं की करधनी के घुँघरू बड़े मीठे-मीठे बज रहे होंगे और उनके हाथ कंगन के नगों की चमक से दमकते हुए डंडोंवाले चँवर डुलाते-डुलाते थक गये होंगे, उन वेश्याओं के नखक्षतों पर जब तुम्हारी ठंडी-ठंडी बूँदें पड़ेंगी, तब वे बड़े प्रेम से भौंरों की पाँतों के समान अपनी बडी-बडी चितवन तुम पर चलायेंगी॥ ३९॥ हे मेघ! साँझ की पूजा हो चुकने पर जब महाकाल शिव ताण्डव नृत्य करने लगें, तब तुम अपनी सायंकालीन लालिमा लेकर उन वृक्षों पर छा जाना, जो उनके ऊँचे उठे हुए भुजदण्ड जैसे खड़े होंगे। ऐसा करने से शिवजी के मन में जो हाथी की गीली खाल ओढने की इच्छा होगी, वह भी पूर्ण हो जायगी। यह देखकर पहले तो पार्वतीजी डर जायेगी कि यह हाथी की खाल कहाँ से आ गयी, परन्तु फिर तुम्हें पहचानकर उनका डर दूर हो जायगा और वे एकटक होकर शिवजी में तुम्हारी दृढ भक्ति देखती रह जायेगी॥ ४०॥ हे मित्र! वहाँ पर जो स्त्रियाँ अपने यारों से मिलने के लिए ऐसी घनी अँधेरी रात में निकली होंगी, उन्हें जब सड़कों पर अँधेरे के मारे कुछ भी न सूझता होगा तब तुम कसौटी पर सोने के समान दमकने वाली अपनी बिजली चमकाकर उन्हें ठीक-ठीक मार्ग दिखा देना। परन्तु देखो! तुम गरजना-बरसना मत। नहीं तो वे घबड़ा उठेंगी॥ ४१॥ हे मित्र! बहुत देर तक चमकते-चमकते थकी हुई अपनी प्यारी बिजली को लेकर तुम किसी ऐसे मकान के छज्जे पर रात बिता देना, जिसमें कबूतर सोये हुए हों और फिर दिन निकलते ही वहाँ से चल देना। क्योंकि जो अपने मित्रों के काम करने का बीड़ा उठाता है, वह आलस्य नहीं करता॥ ४२॥ हाँ! उस समय बहुत से प्रेमी अपनी-अपनी उन प्यारिओं के आँसू पोंछ रहे होंगे, जिन्हें रात को अकेली छोड़कर वे कहीं दूसरे स्थान पर रमे होंगे। इसलिए उस समय तुम सूर्य को मत ढँकना। क्योंकि वे भी उस समय अपनी प्यारी कमलनी के मुख-कमल पर पड़ी हुई ओस की बूँदें पोंछने के लिए आ जायेंगे। तब तुम उनके किरण रूपी हाथों को न रोक लेना, नहीं तो वे बहुत रुष्ट हो जायेंगे॥ ४३॥ हे मेघ! तुम्हारे सहज-सलोने शरीर की परछाई गम्भीरा नदी के उस जल में अवश्य दिखलाई देगी, जो चित्त जैसा निर्मल

तस्याः किञ्चित्करधृतमिव प्राप्तवानीरशाखं नीत्वा नीलं सलिलवसनं मुक्तरोधोनितम्बम्।
प्रस्थानं ते कथमपि सखे! लम्बमानस्य भावि ज्ञातास्वादो विवृतजघनां को विहातुं समर्थः॥४५॥
त्वन्निष्यन्दोच्छ्वसितवसुधागन्धसम्पर्करम्यः स्रोतोरन्ध्रध्वनितसुभगं दन्तिभिः पीयमानः।
नीचैर्वास्यत्युपजिगमिषोर्देवपूर्वं गिरिं ते शीतो वायुः परिणमयिता काननोदुम्बराणाम्॥४६॥
तत्र स्कन्दं नियतवसतिं पुष्पमेघीकृतात्मा पुष्पासारैः स्नपयतु भवान्व्योमगङ्गाजलार्द्रैः।
रक्षाहेतोर्नवशशिभृता वासवीनां चमूनामत्यादित्यं हुतवहमुखे सम्भृतं तद्धि तेजः॥४७॥
ज्योतिर्लेखावलयि गलितं यस्य बर्हं भवानी पुत्रप्रेम्णा कुवलयदलप्रापि कर्णे करोति।
धौतापाङ्गं हरशशिरुचा पावकेस्तं मयूरं पश्चादद्रिग्रहणगुरुभिर्गर्जितैर्नर्तयेथाः॥४८॥
आराध्यैनं शरवणभवं देवमुल्लङ्घिताध्वा सिद्धद्वन्द्वैर्जलकणभयाद्वीणिभिर्मुक्तमार्गः।
व्यालम्बेथाः सुरभितनयालम्भजां मानयिष्यन् स्रोतोमूर्त्या भुवि परिणतां रन्तिदेवस्य कीर्तिम्॥४९॥
त्वय्यादातुं जलमवनते शार्ङ्गिणो वर्णचौरे तस्याः सिन्धोः पृथुमपि तनुं दूरभावात्प्रवाहम्।
प्रेक्षिष्यन्ते गगनगतयो नूनमावर्ज्य दृष्टीरेकं मुक्तागुणमिव भुवः स्थूलमध्येन्द्रनीलम्॥५०॥

है। उसमें किलोलें करती हुई कुमुद के समान उजली और चपल मछलियों को देखकर तुम यही समझना कि वह नदी तुम्हारी ओर अपनी प्रेम-भरी चंचल चितवन चला रही है। कहीं तुम अपनी रुखाई से उसके प्रेम का निरादर न कर बैठना॥४४॥ हे मित्र! जब तुम गम्भीरा नदी का जल पी लोगे तो उसका जल कम हो जायगा और उनके दोनों तट नीचे तक दिखलाई देने लगेंगे। उस समय जल में झुकी हुई बेंत की लताओं को देखने से ऐसा जान पड़ेगा कि मानो गम्भीरा नदी अपने तट के नितम्बों पर से जल रूपी वस्त्र के खिसक जाने पर लज्जावश अपनी बेंत की लताओं के हाथों से जल का वस्त्र थामे हुए है। यह सब देखकर भैया मेघ! उस पर झुके हुए तुम वहाँ से जा न सकोगे। क्योंकि जवानी का रस ले चुकने वाला ऐसा कौन रँगीला होगा, जो कामिनी की खुली हुई जाँघों को देखकर उसका रस लिये बिना ही वहाँ से चल दे॥४५॥ हे मित्र! वहाँ से चलकर जब तुम देवगिरि पहाड की ओर जाओगे, तब वहाँ धीरे-धीरे बहता हुआ वह शीतल पवन तुम्हारे नीचे की ओर बहेगा, जिसमें तुम्हारे बरसाये हुए जल से आनन्द की साँस लेती हुई धरती की गन्ध भरी रहेगी, जिसे चिंग्घाड़ते हुए हाथी अपनी सूँड़ों से पी रहे होंगे और जिस वायु के चलने से वन के गूलर पकने लग जायेंगे॥४६॥ हे मेघ! उसी देवगिरि पर्वत पर षडाननजी सदा निवास करते हैं। इसलिए वहाँ पहुँचकर तुम फूल बरसाने वाले बादल बनकर उन पर आकाशगंगा के जल से भींगे हुए पुष्प बरसाकर उन्हें स्नान करा देना। स्कन्दभगवान् को तुम ऐसा-वैसा देवता मत समझना। इन्द्र की सेनाओं को बचाने के लिए शिवजी ने सूर्य से भी बढकर अपना जो तेज अग्नि में इकट्ठा किया था, उसी तेज से स्कन्द का जन्म हुआ है॥४७॥ हे मित्र! वहाँ पहुँचने पर तुम अपनी गर्जन से पर्वत की गुफाओं को गुँजा देना। उसे सुनकर स्वामी कार्तिकेय का वह मोर नाच उठेगा, जिसके नेत्रों के कोने शिवजी के सिर पर विराजमान चन्द्रमा की चमक से चमकते रहते हैं। उस मोर के झड़े हुए उन पंखों से चमकीली किरणें निकल रही होंगी, जिन्हें पार्वतीजी पुत्र पर प्रेम दिखलाने के लिए अपने उन कानों पर सजा लेती हैं, जिन पर वे कमल की पंखड़ी सजाया करती थीं॥४८॥ हे मेघ! स्कन्द भगवान् की पूजा करके जब तुम आगे बढ़ोगे तो हाथों में वीणा लिये अपनी स्त्रियों के साथ वे सिद्ध लोग तुम्हें मिलेंगे, जो अपनी वीणा भींगकर बिगड़ जाने के भयवश तुमसे दूर ही दूर रहेंगे। तब तुम कुछ दूर जाकर उस चर्मण्वती नदी का आदर करने के लिए नीचे उतर जाना, जो राजा रन्तिदेव के गवालम्भ यज्ञ की कीर्ति के समान धरती पर बहती है॥४९॥ हे सखे! जब तुम विष्णु भगवान का साँवला रूप चुराकर चर्मण्वती का जल पीने के लिए झुकोगे, उस समय आकाश में विचरने वाले सिद्ध-गन्धर्व आदि को दूर

तामुत्तीर्य व्रज परिचितभ्रूलताविभ्रमाणां पक्ष्मोत्क्षेपादुपरिविलसत्कृष्णशारप्रभाणाम्।
कुन्दक्षेपानुगमधुकरश्रीमुषामात्मबिम्बं पात्रीकुर्वन् दशपुरवधूनेत्रकौतूहलानाम्॥५१॥
ब्रह्मावर्तं जनपदमथ च्छायया गाहमानः क्षेत्रं क्षत्रप्रधनपिशुनं कौरवं तद्भजेथाः।
राजन्यानां शितशरशतैर्यत्र गाण्डीवधन्वा धारापातैस्त्वमिव कमलान्यभ्यवर्षन्मुखानि॥५२॥
हित्वा हालामभिमतरसां रेवतीलोचनाङ्कां बन्धुप्रीत्या समरविमुखो लाङ्गली याः सिषेवे।
कृत्वा तासामभिगममपां सौम्य सारस्वतीनामन्तःशुद्धस्त्वमपि भविता वर्णमात्रेण कृष्णः॥५३॥
तस्माद्गच्छेरनुकनखलं शैलराजावतीर्णां जह्नोः कन्यां सगरतनयस्वर्गसोपानपङ्क्तिम्।
गौरीवक्त्रभ्रुकुटिरचनां या विहस्येव फेनैः शम्भोः केशग्रहणमकरोदिन्दुलग्नोर्मिहस्ता॥५४॥
तस्याः पातुं सुरगज इव व्योम्नि पश्चार्द्धलम्बी त्वं चेदच्छस्फटिकविशदं तर्कयेस्तिर्यगम्भः।
संसर्पन्त्या सपदि भवतः स्रोतसि च्छायया ऽसौ स्यादस्थानोपगतयमुनासङ्गमेवाभिरामा॥५५॥
आसीनानां सुरभितशिलं नाभिगन्धैर्मृगाणां तस्या एव प्रभवमचलं प्राप्य गौरं तुषारैः।
वक्ष्यस्यध्वश्रमविनयने तस्य शृङ्गे निषण्णः शोभां शुभ्रत्रिनयनवृषोत्खातपङ्कोपमेयाम्॥५६॥
तं चेद्वायौ सरति सरलस्कन्धसङ्घट्टजन्मा बाधेतोल्काक्षपितचमरीवालभारो दवाग्निः।
अर्हस्येनं शमयितुमलं वारिधारासहस्रैरापन्नार्तिप्रशमनफलाः सम्पदो ह्युत्तमानाम्॥५७॥

से पतली दिखलायी देनेवाली उस नदी की चौड़ी धारा के बीच तुम ऐसे दिखलायी दोगे, जैसे पृथ्वी के गले में पड़े एकहरे हार के बीच में एक मोटी-सी इन्द्रनीलमणि पिरो दी गयी हो॥५०॥ हे मेघ! चर्मण्वती नदी पार करके तुम दशपुर की ओर बढ़ जाना और अपना रूप दिखाकर वहाँ की उन रमणियों को रिझाना, जो कटीली भौंहें चलाने में बड़ी चतुर हैं। जब तुम्हें देखने के लिए वे अपनी पलकें ऊपर उठायेंगी, तब उनकी चमकीली और काली-काली भौंहें ऐसी जान पड़ेंगी, मानो उन्होंने कुन्द के फूलों पर मँडराने वाले भौंरों की चमक चुरा ली हो॥५१॥ हे मेघ! वहाँ से चलकर ब्रह्मावर्त्त देश पर छाया करते हुए तुम उस कुरुक्षेत्र को चले जाना, जो कौरवों और पाण्डवों की घरेलू लड़ाई के कारण आज तक बदनाम है और जहाँ गाण्डीवधारी अर्जुन ने अपने शत्रु-राजाओं के मुखों पर उसी प्रकार अगणित बाण बरसाये थे, जैसे कमलों पर तुम अपना जल बरसाते हो॥५२॥ हे सखे! कौरव और पाण्डव दोनों पर एक-सा प्रेम रखने वाले बलरामजी महाभारत के युद्ध में किसी की ओर से भी नहीं लड़े। वे अपनी प्रियतमा रेवती के नेत्रों की छाया पड़ी हुई प्यारी मदिरा को छोड़कर जिस सरस्वती नदी का जल पीते थे, वही जल यदि तुम पी लोगे तो बाहर से काले होने पर भी तुम्हारा मन स्वच्छ हो जायगा॥५३॥ हे मित्र! कुरुक्षेत्र से चलकर तुम कनखल पहुँच जाना। वहाँ तुम्हें हिमालय की घाटियों से उतरी हुई गंगाजी मिलेंगी, जिन्होंने सीढ़ी बनकर सगर के पुत्रों को स्वर्ग पहुँचा दिया था। जिनकी उजली फेनराशि ऐसी लगती है, मानो वे इस फेन की हँसी से खिल्ली उड़ाती हुई उन पार्वतीजी का निरादर कर रही हैं, जो सौतियाडाह से गंगाजी पर भौंहें तरेरती हैं। इतना ही नहीं, बल्कि वे अपनी लहरों रूपी हाथों से चन्द्रमा के सहारे शिवजी के केश पकड़कर पार्वतीजी को यह बता रही हैं कि तुमसे बढ़कर शिवजी मेरे वश में हैं॥५४॥ हे मेघ! वहाँ पहुँचकर तुम दिग्गजों के समान अपना पिछला भाग ऊपर उठा और आगे का भाग झुकाकर गंगाजी का स्फटिक के समान स्वच्छ जल तिरछे होकर पीना चाहोगे, तब तुम्हारी चलती हुई छाया गंगाजी की धारा में पड़कर ऐसी सुन्दर लगेगी कि मानो प्रयाग पहुँचने के पहले ही गंगाजी यमुनाजी से मिल गयी हैं॥५५॥ हे सखे! वहाँ से चलकर जब तुम हिमालय के हिम से ढँकी उस चोटी पर बैठकर थकावट मिटाओगे, जहाँ से गंगाजी निकली हैं और जिसकी शिलाएँ कस्तूरी मृगों के सदा बैठने से सुगन्धित रहती हैं; उस समय उस चोटी पर बैठे हुए तुम वैसे ही दिखलायी दोगे, जैसे महादेवजी के उजले साँड़ की सींगों पर कीचड़ लग गया हो॥५६॥ हे मित्र! अन्धड चलने पर देवदार वृक्षों के आपस में

ये संरम्भोत्पतनरभसाः स्वाङ्गभङ्गाय तस्मिन् मुक्ताध्वानं सपदि शरभा लङ्घयेयुर्भवन्तम्।
तान्कुर्वीथास्तुमुलकरकावृष्टिपातावकीर्णान्के वा न स्युः परिभवपदं निष्फलारम्भयत्नाः॥५८॥
तत्र व्यक्तं दृषदि चरणन्यासमर्धेन्दुमौलेः शश्वत्सिद्धैरुपचितबलिं भक्तिनम्रः परीयाः।
यस्मिन्दृष्टे करणविगमादूर्ध्वमुद्धूतपापाः सङ्कल्पन्ते स्थिरगणपदप्राप्तये श्रद्दधानाः॥५९॥
शब्दायन्ते मधुरमनिलैः कीचकाः पूर्यमाणाः संसक्ताभिस्त्रिपुरविजयो गीयते किन्नरीभिः।
निर्ह्रादस्ते मुरज इव चेत्कन्दरेषु ध्वनिः स्यात् सङ्गीतार्थो ननु पशुपतेस्तत्र भावी समग्रः॥६०॥
प्रालेयाद्रेरुपतटमतिक्रम्य तांस्तान्विशेषान्हंसद्वारं भृगुपतियशोवर्त्म यत्क्रौञ्चरन्ध्रम्।
तेनोदीचीं दिशमनुसरेस्तिर्यगायामशोभी श्यामः पादो बलिनियमनाभ्युद्यतस्येव विष्णोः॥६१॥
गत्वा चोर्ध्वं दशमुखभुजोच्छ्वासितप्रस्थसन्धेः कैलासस्य त्रिदशवनितादर्पणस्यातिथिः स्याः।
शृङ्गोच्छ्रायैः कुमुदविशदैर्यो वितत्य स्थितः खं राशीभूतः प्रतिदिनमिव त्र्यम्बकस्याट्टहासः॥६२॥
उत्पश्यामि त्वयि तटगते स्निग्धभिन्नाञ्जनाभे सद्यःकृत्तद्विरददशनच्छेदगौरस्य तस्य।
शोभामद्रेः स्तिमितनयनप्रेक्षणीयां भवित्रीमंसन्यस्ते सति हलभृतो मेचके वाससीव॥६३॥
हित्वा तस्मिन्भुजगवलयं शम्भुना दत्तहस्ता क्रीडाशैले यदि च विचरेत्पादचारेण गौरी।
भङ्गीभक्त्या विरचितवपुः स्तम्भितान्तर्जलौघः सोपानत्वं कुरु मणितटारोहणायाग्रयायी॥६४॥

रगड़ लगने से जब वन में आग लग जाय और उसकी उडती हुई चिनगारियाँ चमरीगाय के लम्बे-लम्बे रोएँ जलाने लगें, तब तुम घुआँधार पानी बरसाकर उसे बुझा देना। क्योंकि लोगों के पास जो कुछ भी रहता है, वह दीन-दुःखियों का दुःख मिटाने के लिए ही होता है॥५७॥ हे मेघ! हिमालय पर जब शरभ (हरिण) तुम्हें दूर से ही देख तथा बिगड़कर उछलने के लिए मचलें और अपने हाथ-पैर तुड़वाने के लिए तुम पर सींग चलाने को झपटें, तब तुम उनके ऊपर घुआँधार ओले बरसाकर उन्हें तितर-बितर कर देना। क्योंकि जो लोग व्यर्थ का काम करने लगते हैं, उनको ऐसा ही नीचा देखना पड़ता है॥५८॥ हे मेघ! वहीं हिमालय पर्वत की एक शिला पर तुम्हें शिवजी के पैर की छाप बनी मिलेगी, जिसकी सिद्ध लोग बराबर पूजा किया करते हैं। तुम भी भक्तिभाव से झुककर उसकी प्रदक्षिणा कर लेना। क्योंकि श्रद्धालु लोगों का पाप उसके दर्शन से ही धुल जाता है और वे शरीर त्याग करने पर सदा के लिए शिवजी के गण बन जाते हैं॥५९॥ हे मित्र! वहाँ के पोले बाँसों में जब वायु भरता है, तब उनमें से मीठे-मीठे स्वर निकलने लगते हैं और किन्नरों की स्त्रियाँ भी उनसे स्वर मिलाकर त्रिपुर-विजय के गीत गाने लगती हैं। उस समय यदि तुम भी गरजकर पहाड़ की खोहों को गुँजाते हुए मृदंग के समान शब्द करने लगोगे तो शिवजी के संगीत-सम्बन्धी सब अंग पूरे हो जायेंगे॥६०॥ हे मेघ! हिमालय पर्वत के आस-पास जितने भी सुहावने स्थान हैं, उन्हें देखकर तुम उस क्रौञ्चरन्ध्र में से होते हुए उत्तर की ओर जाना, जिसमें से होकर हंस मानसरोवर को जाते हैं और जिसे परशुरामजी अपने बाण से छेदकर अपना नाम अमर कर गये हैं। उस सँकरे मार्ग में श्याम वर्ण के तुम वैसे ही लम्बे और तिरछे होकर जाना, जैसे बलि को छलने के समय भगवान् विष्णु का चरण श्याम वर्ण हो गया था॥६१॥ हे सखे! वहाँ से ऊपर उठकर तुम उस कैलास पर्वत पर पहुँच जाओगे, जिसकी चोटियों के जोड़-जोड़ रावण के बाहुओं ने हिला डाले थे। जिसमें देवताओं की स्त्रियाँ अपना मुँह देखा करती हैं और जिसकी कुमुद जैसी उजली चोटियाँ आकाश में इस प्रकार फैली हुई हैं, मानो वह प्रतिदिन का इकट्ठा किया हुआ शिवजी का अट्टहास विराजमान हो॥६२॥ हे मित्र! तुम तो चिकने तथा घुटे हुए आँजन के समान काले हो और कैलास तुरन्त काटे हुए हाथी-दाँत के समान गोरा है। इसलिए जब तुम कैलास के ऊपर पहुँचोगे, उस समय बलराम के कन्धों पर पड़े हुए चटकीले काले वस्त्र के समान ऐसे मनोहर लगोगे कि लोगों की आँखें एकटक तुम्हें देखती ही रह जायेंगी॥६३॥ हे मेघ! कैलास पर जब पार्वतीजी उन महादेवजी के हाथ में हाथ डाले टहल रही हों, जिन्होंने पार्वतीजी

तत्रावश्यं वलयकुलिशोद्घट्टनोद्गीर्णतोयं नेष्यन्ति त्वां सुरयुवतयो यन्त्रधारागृहत्वम्।
ताभ्यो मोक्षस्तव यदि सखे घर्मलब्धस्य न स्यात्क्रीडालोलाः श्रवणपरुषैर्गर्जितैर्भीषयेस्ताः ॥ ६५ ॥
हेमाम्भोजप्रसवि सलिलं मानसस्याददानः कुर्वन्कामं क्षणमुखपटप्रीतिमैरावतस्य।
धुन्वन्कल्पद्रुमकिसलयान्यंशुकानीव वातैर्नानाचेष्टैर्जलद! ललितैर्निर्विशेस्तं नगेन्द्रम् ॥ ६६ ॥
तस्योत्सङ्गे प्रणयिन इव स्रस्तगङ्गादुकूलां न त्वं दृष्ट्वा न पुनरलकां ज्ञास्यसे कामचारिन्।
या वः काले वहति सलिलोद्गारमुच्चैर्विमाना मुक्ताजालग्रथितमलकं कामिनीवाभ्रवृन्दम् ॥ ६७ ॥

इति महाकविकालिदासविरचिते मेघदूते काव्ये पूर्वमेघः समाप्तः ॥

के डर से अपने साँपों के कड़े हाथ से उतार दिये होंगे। वे पार्वतीजी जब मणिशिखरों पर चढ़ रही हों, उस समय तुम मत बरसना बल्कि आगे बढ़कर सीढ़ी के समान बन जाना, जिससे कि उन्हें ऊपर चढ़ने में सुविधा हो ॥ ६४ ॥ हे सखे! उस पर्वत पर बहुत-सी अप्सराएँ अपने नगजटित कंगनों की नोक चुभाकर तुम्हारे शरीर से जलधाराएँ निकाल लेंगी और तुम्हें फुहारे का घर बना डालेंगी। उस समय यदि वे अपने गर्म शरीरों को ठंडक मिलने के कारण तुम्हें न छोड़ें तो तुम उन खिलवाड़ी देवांगनाओं से छुटकारा पाने के लिए कान फाड़ने वाला भीषण गर्जन करके उन्हें डरा देना ॥ ६५ ॥ हे जलद! वहाँ पहुँचकर पहले तो तुम उस मानसरोवर का जल पीना, जिसमें सुनहले कमल खिला करते हैं। फिर ऐरावत के मुँह पर थोड़ी देर कपड़े जैसे छाकर उसका मन बहला देना। आगे जाकर कल्पद्रुम के कोमल पत्तों को महीन कपड़े की भाँति हिला देना। इस प्रकार बहुत से खेल करते हुए तुम कैलास पर्वत पर जी भरकर भ्रमण करना ॥ ६६ ॥ हे कामचारिन्! उस कैलास पर्वत की गोद में अलकापुरी वैसे ही बसी हुई है; जैसे अपने प्यारे की गोद में कोई कामिनी बैठी हो। वहीं से निकली गंगाजी की धारा ऐसी लगती है, मानो उस कामिनी के शरीर पर से सरकी हुई उसकी साड़ी हो। यह नहीं हो सकता कि ऐसी अलका को देखकर तुम पहचान न पाओ। ऊँचे-ऊँचे भवनोंवाली अलकापुरी पर वर्षा के दिनों में बरसते हुए बादल कामिनियों के सिर पर मोती गुँथे हुए जूड़े जैसे छाये रहते हैं ॥ ६७ ॥

॥ इस प्रकार मेघदूत काव्य में पूर्वमेघ समाप्त ॥

उत्तरमेघः

विद्युत्वन्तं ललितवनिताः सेन्द्रचापं सचित्राः सङ्गीताय प्रहतमुरजाः स्निग्धगम्भीरघोषम्।
अन्तस्तोयं मणिमयभुवस्तुङ्गमभ्रंलिहाग्राः प्रासादास्त्वां तुलयितुमलं यत्र तैस्तैर्विशेषैः॥१॥
हस्ते लीलाकमलमलके बालकुन्दानुविद्धं नीता लोध्रप्रसवरजसा पाण्डुतामानने श्रीः।
चूडापाशे नवकुरबकं चारु कर्णे शिरीषं सीमन्ते च त्वदुपगमजं यत्र नीपं वधूनाम्॥२॥
यत्रोन्मत्तभ्रमरमुखराः पादपा नित्यपुष्पा हंसश्रेणीरचितरशना नित्यपद्मा नलिन्यः।
केकोत्कण्ठा भवनशिखिनो नित्यभास्वत्कलापा नित्यज्योत्स्नाः प्रतिहततमोवृत्तिरम्याः प्रदोषाः॥
आनन्दोत्थं नयनसलिलं यत्र नान्यैर्निमित्तैर्नान्यस्तापः कुसुमशरजादिष्टसंयोगसाध्यात्।
नाप्यन्यस्मात् प्रणयकलहाद्विप्रयोगोपपत्तिर्वित्तेशानां न च खलु वयो यौवनादन्यदस्ति॥४॥
यस्यां यक्षाः सितमणिमयान्येत्य हर्म्यस्थलानि ज्योतिश्छायाकुसुमरचितान्युत्तमस्त्रीसहायाः।
आसेवन्ते मधु रतिफलं कल्पवृक्षप्रसूतं त्वद्गम्भीरध्वनिषु शनकैः पुष्करेष्वाहतेषु॥५॥
मन्दाकिन्याः सलिलशिशिरैः सेव्यमाना मरुद्भिर्मन्दाराणामनुतटरुहां छायया वारितोष्णाः।
अन्वेष्टव्यैः कनकसिकतामुष्टिनिक्षेपगूढैः सङ्क्रीडन्ते मणिभिरमरप्रार्थिता यत्र कन्याः॥६॥
नीवीबन्धोच्छ्वसितशिथिलं यत्र बिम्बाधराणां क्षौमं रागादनिभृतकरेष्वाक्षिपत्सु प्रियेषु।
अर्चिस्तुङ्गानभिमुखमपि प्राप्य रत्नप्रदीपान् ह्रीमूढानां भवति विफलप्रेरणा चूर्णमुष्टिः॥७॥

हे सखे! अलकापुरी के ऊँचे-ऊँचे भवन सब बातों में तुम्हारे ही सदृश हैं। यदि तुम्हारे पास बिजली है तो उन भवनों में चटकीली नारियाँ हैं। यदि तुम्हारे पास इन्द्रधनुष है तो उन भवनों में रंग-बिरंगे चित्र लटके हुए हैं। यदि तुम मृदु और गम्भीर गर्जन कर सकते हो तो वहाँ संगीत के साथ मृदंग बजते हैं। यदि तुम्हारे भीतर नीला जल है तो उनकी धरती भी नीलम से जड़ी हुई है और यदि तुम ऊँचे हो तो उनकी अटारियाँ भी आकाश चूमती हैं॥ १॥ हे मेघ! वहाँ की कुलवधुएँ हाथों में कमल के आभूषण पहनती हैं। अपनी चोटियों में नये खिले हुए कुन्द के फूल गूँथती हैं। मुँह में लोध के फूलों का पराग मलकर उसे गोरा करती हैं। जूड़े में नये कुरबक के फूल खोंसती हैं। कानों पर सिरस के फूल रखती हैं और वर्षा में फूलने वाले कदम्ब के फूलों से अपनी माँग सजाया करती हैं॥ २॥ हे सखे! वहाँ पर सदा फूलनेवाले बहुत-से ऐसे वृक्ष तुम्हें मिलेंगे, जिन पर मतवाले भौंरे गुनगुनाते होंगे। बारहमासी कमल और कमलिनियों को हंसों की पाँतें घेरे रहती होंगी। सदा चमकीले पंखोंवाले पालतू मोर ऊँचा सिर किये हुए रात-दिन बोलते रहते होंगे और वहाँ की रातें सदा चाँदनी रहने से बड़ी उजली और मनभावनी होंगी॥ ३॥ हे मित्र! वहाँ रहनेवाले यक्षों की आँखों में केवल आनन्द के ही आँसू आते हैं। अपने प्यारे मिलन से दूर हो जाने वाले विरह के ताप को छोड़कर और किसी प्रकार का ताप वहाँ नहीं होता। प्रेम में रूठने को छोड़कर और कभी किसी का किसी से बिछोह नहीं होता और जवानी की अवस्था को छोड़कर दूसरी अवस्था वहाँ नहीं देखी जाती॥ ४॥ हे मेघ! वहाँ के यक्ष अपनी अलबेली स्त्रियों को लेकर स्फटिक मणि के बने अपने उन भवनों पर बैठते हैं, जिनकी छत पर पड़ी हुई तारों की छाया ऐसी जान पड़ती है, मानो फूल जड़े हुए हों। वहाँ बैठकर वे कामदेव को उभारनेवाला वह मधु पी रहे होंगे, जो उन बाजों के मन्द-मन्द बजने पर कल्पवृक्ष से निकलता है और जो तुम्हारे गम्भीर गर्जन के समान ही नित्य गूँजा करते हैं॥ ५॥ हे मित्र! वहाँ की कन्याएँ इतनी सुन्दर होती हैं कि देवता भी उन्हें पाने को तरसते हैं। वे कन्याएँ मन्दाकिनी के जल की फुहारों से शीतल पवन में तथा तट पर खड़े कल्पवृक्षों की छाया में तपन मिटाती हुई अपनी मुट्ठियों में रत्न ले तथा उनको सुनहरे बालू में डालकर छिपाने और ढूँढने का खेल खेलती रहती हैं॥ ६॥

नेत्रा नीताः सततगतिना यद्विमानाग्रभूमिरालेख्यानां नवजलकणैर्दोषमुत्पाद्य सद्यः।
शङ्कास्पृष्टा इव जलमुचस्त्वादृशो जालमार्गैर्धूमोद्गारानुकृतिनिपुणा जर्जरा निष्पतन्ति॥ ८॥
यत्र स्त्रीणां प्रियतमभुजालिङ्गनोच्छ्वासितानामङ्गग्लानिं सुरतजनितां तन्तुजालावलम्बाः।
त्वत्संरोधापगमविशदैश्चन्द्रपादैर्निशीथे व्यालुम्पन्ति स्फुटजललवस्यन्दिनश्चन्द्रकान्ताः॥ ९॥
अक्षय्यान्तर्भवननिधयः प्रत्यहं रक्तकण्ठैरुद्गायद्भिर्धनपतियशः किन्नरैर्यत्र सार्द्धम्।
वैभ्राजाख्यं विबुधवनितावारमुख्यासहाया बद्धालापा बहिरुपवनं कामिनो निर्विशन्ति॥ १०॥
गत्युत्कम्पादलकपतितैर्यत्र मन्दारपुष्पैः पत्रच्छेदैः कनककमलैः कर्णविभ्रंशिभिश्च।
मुक्ताजालैः स्तनपरिसरच्छिन्नसूत्रैश्च हारैर्नैशो मार्गः सवितुरुदये सूच्यते कामिनीनाम्॥ ११॥
वासश्चित्रं मधु नयनयोर्विभ्रमादेशदक्षं पुष्पोद्भेदं सह किसलयैर्भूषणानां विकल्पान्।
लाक्षारागं चरणकमलन्यासयोग्यं च यस्यामेकः सूते सकलमबलामण्डनं कल्पवृक्षः॥ १२॥
पत्रश्यामा दिनकरहयस्पर्द्धिनो यत्र वाहाः शैलोदग्रास्त्वमिव करिणो वृष्टिमन्तःप्रभेदात्।
योधाग्रण्यः प्रतिदशमुखं संयुगे तस्थिवांसः प्रत्यादिष्टाभरणरुचयश्चन्द्रहासव्रणाङ्कैः॥ १३॥
मत्वा देवं धनपतिसखं यत्र साक्षाद्वसन्तं प्रायश्चापं न वहति भयान्मन्मथः षट्पदज्यम्।
सभ्रूभङ्गप्रहितनयनैः कामिलक्ष्येष्वमोघैस्तस्यारम्भश्चतुरवनिताविभ्रमैरेव सिद्धः॥ १४॥

हे मेघ! वहाँ के प्रेमी लोग संभोग के लिए जब अपने चञ्चल हाथों से अपनी प्यारियों की कमर की गाँठें खोलकर उनकी ढीली साड़ियों को हटाने लगते हैं, तब वे लाज से इतनी सकुचा जाती हैं कि और कुछ न पाकर मुट्ठी में गुलाल भरकर जगमगाते हुए रत्नदीपों पर फेंकने लगती हैं, परन्तु उनका वह गुलाल फेंकना भी अकारथ हो जाता है॥ ७॥ हे मेघ! तुम्हारे जैसे बहुत-से बादल वायु के झोंकों के साथ वहाँ के सतमहले भवनों के ऊपरी खंडों में घुसकर दीवार पर टँगे चित्रों को अपने जलकणों से भिंगोकर मिटा देते हैं और फिर वे धुएँ का रूप बनाने में चतुर बादल डर के मारे झट से झरोखों की जालियों में से छितरा-छितराकर बाहर निकल जाते हैं॥ ८॥ हे मित्र! वहाँ आधी रात को खुली चाँदनी में झालरों में लटकी चन्द्रकान्त मणियों से टपकता हुआ जल उन स्त्रियों की संभोगजनित थकावट को दूर करता है, जिनके शरीर प्रियतम की भुजाओं में कसे रहने से ढीले पड़ जाते हैं॥ ९॥ हे मेघ! वहाँ अचल सम्पत्तिवाले कामी लोग अप्सराओं के साथ बातें करते और ऊँचे स्वर में मधुर कंठों से कुबेर का यश गानेवाले किन्नरों के साथ बैठे हुए वैभ्राज नाम के बाहरी उपवन में रात-दिन विहार करते हैं॥ १०॥ हे मित्र! वहाँ रात को जब कामिनी स्त्रियाँ अपने प्रेमियों के पास जल्दी-जल्दी पैर बढाकर जाने लगती हैं, तो उस समय उनकी चोटियों में गुँथे हुए कल्पवृक्ष के फूल और पत्ते खिसक-खिसककर निकल जाते हैं, उनके कानों पर रखे सोने के कमल गिर जाते हैं और हारों से टूटे हुए मोती भी इधर-उधर बिखर जाते हैं। जब दिन निकलता है तो इन वस्तुओं को मार्ग में बिखरा हुआ देखकर लोग समझ लेते हैं कि कामिनी स्त्रियाँ किधर से होकर अपने प्रेमियों के पास गयी थीं॥ ११॥ हे सखे! वहाँ रंग-बिरंगे वस्त्र, नयनों में बाँकापन पैदा करनेवाली मदिरा, कोमल पत्ते तथा फूल, पैरों में लगने वाला महावर आदि स्त्रियों की शृङ्गार-सम्बन्धी सभी वस्तुएँ कल्पवृक्ष से ही प्राप्त हो जाती हैं॥ १२॥ हे मेघ! वहाँ सूर्य के घोड़ों से होड़ करने वाले और पल्लव सदृश काले-काले घोड़ों, पर्वत के समान ऊँचे और तुम्हारी तरह मद की धारा बहाने वाले हाथियों एवं रावण से भी लोहा लेने वाले ऐसे वीर योद्धा तुम्हें दिखलाई देंगे, जिनके शरीर में पड़े घावों के निशान अलंकारों की शोभा को भी मात कर रहे होंगे॥ १३॥ हे मेघ! वहीं पर कुबेर के मित्र शिवजी भी रहा करते हैं, इसीलिए डरके मारे कामदेव अपना भौंरों की डोरी वाला धनुष वहाँ अपने साथ नहीं रखता, क्योंकि वहाँ की छबीली और चतुर स्त्रियाँ, जो अपने प्रेमियों की ओर बाँकी चितवन रूपी बाण चलाती हैं, उसी से कामदेव का काम चल जाता है॥ १४॥ हे मेघ! वहीं कुबेर के भवन से उत्तर की ओर इन्द्रधनुष सदृश

तत्रागारं धनपतिगृहानुत्तरेणास्मदीयं दूराल्लक्ष्यं सुरपतिधनुश्चारुणा तोरणेन।
यस्योपान्ते कृतकतनयः कान्तया वर्द्धितो मे हस्तप्राप्यस्तबकनमितो बालमन्दारवृक्षः॥ १५॥
वापी चास्मिन्मरकतशिलाबद्धसोपानमार्गा हैमैश्छन्ना विकचकमलैः स्निग्धवैदूर्यनालैः।
यस्यास्तोये कृतवसतयो मानसं सन्निकृष्टं नाध्यास्यन्ति व्यपगतशुचस्त्वामपि प्रेक्ष्य हंसाः॥ १६॥
तस्यास्तीरे रचितशिखरः पेशलैरिन्द्रनीलैः क्रीडाशैलः कनककदलीवेष्टनप्रेक्षणीयः।
मद्गेहिन्याः प्रिय इति सखे! चेतसा कातरेण प्रेक्ष्योपान्तस्फुरिततडितं त्वां तमेव स्मरामि॥ १७॥
रक्ताशोकश्चलकिसलयः केसरश्चात्र कान्तः प्रत्यासन्नौ कुरबकवृतेर्माधवीमण्डपस्य।
एकः सख्यास्तव सह मया वामपादाभिलाषी काङ्क्षत्यन्यो वदनमदिरां दोहदच्छद्मनाऽस्याः॥ १८॥
तन्मध्ये च स्फटिकफलका काञ्चनी वासयष्टिर्मूले बद्धा मणिभिरनतिप्रौढवंशप्रकाशैः।
तालैः शिञ्जावलयसुभगैर्नर्तितः कान्तया मे यामध्यास्ते दिवसविगमे नीलकण्ठः सुहृद्वः॥ १९॥
एभिः साधो! हृदयनिहितैर्लक्षणैर्लक्षयेथा द्वारोपान्ते लिखितवपुषौ शङ्खपद्मौ च दृष्ट्वा।
क्षामच्छायं भवनमधुना मद्वियोगेन नूनं सूर्यापाये न खलु कमलं पुष्यति स्वामभिख्याम्॥ २०॥
गत्वा सद्यः कलभतनुतां शीघ्रसम्पातहेतोः क्रीडाशैले प्रथमकथिते रम्यसानौ निषण्णः।
अर्हस्यन्तर्भवनपतितां कर्तुमल्पाल्पभासं खद्योतालीविलसितनिभां विद्युदुन्मेषदृष्टिम्॥ २१॥
तन्वी श्यामा शिखरिदशना पक्वबिम्बाधरोष्ठी मध्येक्षामा चकितहरिणीप्रेक्षणा निम्ननाभिः।
श्रोणीभारादलसगमना स्तोकनम्रा स्तनाभ्यां या तत्र स्याद्युवतिविषये सृष्टिराद्येव धातुः॥ २२॥

सुन्दर तथा गोल-गोल फाटक वाला हमारा घर तुम्हें दूर से ही दिखलाई-देगा। उसी के पास एक छोटा-सा कल्पवृक्ष है, जिसे मेरी स्त्री ने पुत्रवत् पाल रखा है। वह फूलों के गुच्छों से इतना झुका दीखेगा कि नीचे खड़े-खड़े ही उन गुच्छों को हाथ मे तोड़ा जा सकता है॥ १५॥ हे सखे! भीतर जाने पर तुम्हें एक बावली मिलेगी, जिसकी सीढ़ियों पर नीलम जड़ा होगा और जिसमें चिकने वैदूर्य मणि की डंठल वाले बहुत-से सुनहले कमल खिले हुए होंगे। वहाँ के जल में रहने वाले हंस इतने सुखी मिलेंगे कि मानसरोवर के अति समीप होते हुए भी वे तुम्हें देखकर वहाँ भी नहीं जाना चाहेंगे॥ १६॥ हे सखे! उसी बावली के पास एक बनावटी पहाड़ है, जिसकी चोटी नीलम की बनी हुई है। वह चारों ओर सोने के केलों से घिरा होने के कारण देखते ही बनता है। हे मित्र! वह पर्वत मेरी गृहिणी को बड़ा प्यारा है। इसलिए जब मैं तुम्हें बिजली के साथ देखता हूँ, तब मेरा मन अकेला होने से उदास हो जाता है और वह पहाड़ मेरी आँखों के आगे नाचने लगता है॥ १७॥ हे मेघ! उस बनावटी पर्वत पर कुरबक के वृक्षों से घिरे माधवीमण्डप के पास ही एक चञ्चल पत्तों वाला लाल अशोक का वृक्ष है और दूसरा मौलसिरी का पेड़ है। जैसे मैं तुम्हारी सखी के पैर की ठोकर खाने के लिए तरस रहा हूँ, वैसे ही वह अशोक भी फूलने का बहाना लेकर मेरी पत्नी के बाँयें पैर की ठोकर खाने के लिए बेचैन होगा। मौलसिरी का पेड़ भी उसके मुँह से निकले मदिरा के छींटे पीना चाहता होगा॥ १८॥ हे साथी! उन दोनों वृक्षों के बीच हरे बाँस के समान चमकीले मणियों से बनी हुई एक चौकी है, जिसके ऊपर स्फटिक की एक चौकोर पटिया रखी हुई है। उस पटिया पर जड़ी हुई एक सोने की छड़ पर तुम्हारा मित्र मोर नित्य साँझ को आकर बैठता है और मेरी स्त्री उसे अपने घुँघुरूदार कडेवाले हाथों से तालियाँ बजा-बजाकर नचाती है॥ १९॥ हे साधु! यदि तुम मेरे बतलाये हुए चिह्न भलीभाँति स्मरण रखोगे और मेरे द्वार पर शंख और पद्म के चित्र बने देख लोगे तो तुम मेरा घर अवश्य पहचान जाओगे। मेरे बिना वह भवन बड़ा सूना-सूना और उदास-सा दिखलाई देता होगा। क्योंकि सूर्य के छिप जाने पर कमल उदास हो ही जाता है॥ २०॥ देखो! यदि तुम्हें मेरे घर में जलदी घुसना हो तो तुरन्त हाथी के बच्चे जैसे छोटे बनकर उस क्रीड़ा-पर्वत की रमणीय चोटी पर जा बैठना। वहाँ से अपनी बिजली की आँखें जुगनुओं के समान थोड़ी-थोड़ी-सी चमकाकर मेरे घर के भीतर झाँकना॥ २१॥ हे मेघ! वहाँ जो दुबली-पतली, नन्हें-नन्हें दाँतों, पके हुए बिम्बफल के समान

तां जानीथाः परिमितकथां जीवितं मे द्वितीयं दूरीभूते मयि सहचरे चक्रवाकीमिवैकाम्।
गाढोत्कण्ठां गुरुषु दिवसेष्वेषु गच्छत्सु बालां जातां मन्ये शिशिरमथितां पद्मिनीं वान्यरूपाम्॥ २३॥
नूनं तस्याः प्रबलरुदितोच्छूननेत्रं प्रियाया निःश्वासानामशिशिरतया भिन्नवर्णाधरोष्ठम्।
हस्तन्यस्तं मुखमसकलव्यक्ति लम्बालकत्वादिन्दोर्दैन्यं त्वदनुसरणक्लिष्टकान्तेर्बिभर्ति॥ २४॥
आलोके ते निपतति पुरा सा बलिव्याकुला वा मत्सादृश्यं विरहतनु वा भावगम्यं लिखन्ती।
पृच्छन्ती वा मधुरवचनां सारिकां पञ्जरस्थां कच्चिद्भर्तुः स्मरसि रसिके त्वं हि तस्य प्रियेति॥ २५॥
उत्सङ्गे वा मलिनवसने सौम्य! निक्षिप्य वीणां मद्गोत्राङ्कं विरचितपदं गेयमुद्गातुकामा।
तन्त्रीमार्द्रां नयनसलिलैः सारयित्वा कथञ्चिद्भूयो भूयः स्वयमपि कृतां मूर्च्छनां विस्मरन्ती॥ २६॥
शेषान्मासान् विरहदिवसस्थापितस्यावधेर्वा विन्यस्यन्ती भुवि गणनया देहलीदत्तपुष्पैः।
मत्सङ्गं वा हृदयनिहितारम्भमास्वादयन्ती प्रायेणैते रमणविरहेष्वङ्गनानां विनोदाः॥ २७॥
सव्यापारामहनि न तथा पीडयेन्मद्वियोगः शङ्के रात्रौ गुरुतरशुचं निर्विनोदां सखीं ते।
मत्सन्देशैः सुखयितुमलं पश्य साध्वीं निशीथे तामुन्निद्रामवनिशयनां सौधवातायनस्थः॥ २८॥
स्निग्धाः सख्यः कथमपि दिवा तां न मोक्ष्यन्ति तन्वीमेकप्रख्या भवति हि जगत्यङ्गनानां प्रवृत्तिः।
स त्वं रात्रौ जलद! शयनासन्नवातायनस्थः कान्तां सुप्ते सति परिजने वीतनिद्रामुपेयाः॥ २९॥

लाल ओठों, पतली कमर, डरी हुई हरिणी के समान आँखें, गहरी नाभि, नितम्बों के बोझ से धीरे-धीरे चलनेवाली और स्तनों के भार से कुछ आगे को झुकी हुई जो युवती तुम्हें दिखलाई दे, वही मेरी पत्नी होगी। उसकी सुन्दरता देखकर यही जान पडेगा कि मानो ब्रह्मा की सबसे बढ़िया कारीगरी वही है॥ २२॥ हे सखे! अपने साथी से बिछुड़ी चकवी के समान अकेली और कम बोलने वाली उस सुन्दरी को देखकर तुम समझ लोगे कि वही मेरा दूसरा प्राण है। विरह के कठोर दिन बड़ी उतावली से बिताते-बिताते उसका रूप भी बदल गया होगा और उसे देखकर तुम्हें यह भ्रम हो सकता है कि यह कोई बाला है या पाले की मारी हुई कमलिनी?॥ २३॥ हे मेघ! मेरे बिछोह में रोते-रोते मेरी प्यारी की आँखें सूज गयी होंगी, गर्म साँसों से उसके ओठों का रंग फीका पड गया होगा, चिन्ता के कारण गालों पर हाथ धरने और बालों के मुँह पर आ जाने से उसका अधूरा दिखलाई देनेवाला मुँह मेघाच्छादित चन्द्रमा के समान धुँधला और उदास दिखलाई देगा॥ २४॥ हे सखे! वह वहाँ तुम्हें या तो देवताओं की पूजा करती दीखेगी या अपनी कल्पना द्वारा विरह से मेरे इस दुबले शरीर का चित्र बनाती मिलेगी या पिंजड़े में बैठी हुई मधुरभाषिणी मैना से यह पूछती मिलेगी कि हे मैना! तुम अपने जिस पति की प्यारी हो, उसका भी कभी स्मरण करती हो?॥ २५॥ हे मेघ! वह मैले कपड़े पहने और गोद में वीणा लिये ऊँचे स्वर से मेरे नाम के गीत गाती मिलेगी। उस समय वह अपनी आँखों के आँसुओं से भींगी हुई वीणा को तो जैसे-तैसे पोंछ लेगी, परन्तु मेरा स्मरण आ जाने से वह इतनी बेसुध हो जायेगी कि अपने सधे हुए स्वरों के उतार-चढ़ाव को भी बार-बार भूल जाती होगी॥ २६॥ अथवा मेरे विरह के दिन से ही वह देहली पर जो फूल नित्य रखती जाती थी, उन्हें ही धरती पर फैलाकर गिन रही होगी कि अब विरह के कितने दिन बाकी हैं। अथवा वह मेरे साथ किये हुए सम्भोग का आनन्द का मन ही मन रस लेती हुई बैठी होगी। क्योंकि अपने प्रियतम के विछोह में स्त्रियाँ प्रायः ऐसे ही कामों में अपने दिन बिताती हैं॥ २७॥ हे सखे! तुम्हारी सखी के इन कामों में लगे रहने से दिन में तो उसे मेरा विछोह विशेष नहीं सताता होगा, परन्तु मुझे डर है कि रात के लिए कुछ काम न होने से उसकी रात बड़े कष्ट से बीतती होगी। इसलिए मेरा सन्देश सुनाकर उसे सुख देने के लिए तुम आधी रात को मेरे भवन के झरोखों पर बैठकर उसे देखना। क्योंकि उस समय वह तुम्हें धरती पर उनींदी-सी पड़ी दीखेगी॥ २८॥ उसकी प्यारी सखियाँ उस कृशोदरी को दिन में कभी अकेली नहीं छोड़ेंगी, क्योंकि संसार में सभी स्त्रियों का ऐसा ही स्वभाव होता है। इसलिए तुम उसके पलंग

अन्वेष्टव्यामवनिशयने सन्निकीर्णैकपार्श्वां तत्पर्यङ्कप्रगलितनवैश्छिन्नहारैरिवाश्रैः।
भूयो भूयः कठिनविषमां सादयन्तीं कपोलादामोक्तव्यायमयमितनखेनैकवेणीं करेण॥ ३०॥
आधिक्षामां विरहशयने सन्निषण्णैकपार्श्वां प्राचीमूले तनुमिव कलामात्रशेषां हिमांशोः।
नीता रात्रिः क्षण इव मया सार्धमिच्छारतैर्या तामेवोष्णैर्विरहमहतीमश्रुभिर्यापयन्तीम्॥ ३१॥
पादानिन्दोरमृतशिशिराञ्जालमार्गप्रविष्टान् पूर्वप्रीत्या गतमभिमुखं सन्निवृत्तं तथैव।
चक्षुःखेदात्सलिलगुरुभिः पक्ष्मभिश्छादयन्तीं साभ्रेऽह्नीव स्थलकमलिनीं न प्रबुद्धां न सुप्ताम्॥ ३२॥
निःश्वासेनाधरकिसलयक्लेशिना विक्षिपन्तीं शुद्धस्नानात्परुषमलकं नूनमागण्डलम्बम्।
मत्सम्भोगः कथमुपनयेत्स्वप्नजोऽपीति निद्रामाकाङ्क्षन्तीं नयनसलिलोत्पीडरुद्धावकाशाम्॥
आद्ये बद्धा विरहदिवसे या शिखा दाम हित्वा शापस्यान्ते विगलितशुचा तां मयोद्वेष्टनीयाम्।
स्पर्शक्लिष्टामयमितनखेनासकृत् सारयन्तीं गण्डाभोगात् कठिनविषमामेकवेणीं करेण॥ ३४॥
सा संन्यस्ताभरणमबला पेशलं धारयन्ती शय्योत्सङ्गे निहितमसकृद्दुःखदुःखेन गात्रम्।
त्वामप्यस्रं नवजलमयं मोचयिष्यत्यवश्यं प्रायः सर्वो भवति करुणावृत्तिरार्द्रान्तरात्मा॥ ३५॥
जाने सख्यास्तव मयि मनः सम्भृतस्नेहमस्मादित्थम्भूतां प्रथमविरहे तामहं तर्कयामि।
वाचालं मां न खलु सुभगम्मन्यभावः करोति प्रत्यक्षं ते निखिलमचिराद्भ्रातरुक्तं मया यत्॥ ३६॥

के पास वाली खिड़की पर बैठकर थोड़ी देर प्रतीक्षा करना, जब वे सखियाँ सो जायें तब तुम जागती हुई मेरी प्यारी के पास पहुँच जाना॥ २९॥ वहाँ तुम मेरी उस विरहिणी प्यारी को ढूँढ़ लेना, जो वहीं कहीं धरती पर एक करवट पड़ी होगी। उसके आस-पास टूटे हुए मोतियों के हार के समान उसके आँसू बिखरे होंगे और वह अपने बढे हुए नखों वाले हाथ से अपनी इकहरी चोटी के रूखे तथा उलझे हुए बालों को अपने गालों पर से बार-बार हटा रही होगी॥ ३०॥ हे मित्र! जो प्यारी मेरे साथ जी भरकर संभोग करके सारी रात क्षणभर के समान बिता देती थी, वह आज मेरे बिछोह की चिन्ता में सूखी हुई और सूने पलङ्ग पर करवट लेती हुई पूरब के क्षितिज पर पहुँचे और एक कलाभर बचे हुए चन्द्रमा के समान दुबली होकर अपनी रात गर्म आँसू बहा-बहाकर बिताती होगी॥ ३१॥ सुनो भैया! जालियों में से चन्द्रमा की जो किरणें आ रही होंगी, उन्हें देखकर वह समझती होगी कि पहले सुख के दिनों में वे जैसी अमृत के समान ठण्डी थीं, वैसे ही अब भी होंगी और यही समझकर वह उन किरणों की ओर मुँह करेगी, किन्तु विरह के कारण जब वे किरणें उसे जलाने लगेंगी, तब वह अपनी आँसूभरी आँखों को पलकों से ढाँक लेगी। उस समय मेरी प्यारी ऐसी दिखलाई देगी; जैसे बदली के दिन धरती पर खिलनेवाली कोई अधखिली कमलिनी पडी हुई हो॥ ३२॥ हाँ! मेरे विरह में वह कोरे जल में नहाती होगी, इसलिए उसके रूखे और बिना सँवारे हुए बाल गालों पर लटक कर उसके पतले ओठों को तपाने वाली साँसों से हिल रहे होंगे। वह बार-बार यह सोचकर अपनी आँखों में नींद बुला रही होगी कि किसी प्रकार स्वप्न में ही प्यारे से संयोग हो जाय, परन्तु आँखों से लगातार बहते हुए आँसू उसकी आँखें ही नहीं लगने देते होंगे॥ ३३॥ हे मेघ! बिछुडने के दिन ही उसने जूड़े की माला खोलकर जो इकहरी चोटी बाँध ली थी, जिसे छूने में भी उसे पीड़ा होती होगी और जिसे शाप के दिन बीतने पर मैं ही सानन्द खोलकर बाँधूँगा, उसी उलझी और बिखरी हुई रूखी चोटी को वह अपने बढे हुए नखोंवाले हाथों से फैले हुए अपने गालों पर से बार-बार हटा रही होगी॥ ३४॥ तुम जब देखोगे कि वह बेचारी बार-बार दुःख से पछाड़ें खा-खाकर रोने के बाद पलंग के पास पड़ी हुई किसी प्रकार अपने बिना आभूषणोंवाले कोमल शरीर को सँभाले हुए है, तब तुम भी उसकी दशा पर अपने नेत्रों से आँसू बहाये बिना न रह सकोगे। क्योंकि दूसरों का दुःख देखकर ऐसा कौन कोमल हृदय वाला प्राणी होगा, जो न पसीज जाय॥ ३५॥ हे मित्र! मैं जानता हूँ कि तुम्हारी सखी मुझे जी भरकर प्यार करती है। इसीलिए मेरा ख्याल है कि वह इस पहले-पहले के बिछोह से दुबली हो गयी

रुद्धापाङ्गप्रसरमलकैरञ्जनस्नेहशून्यं प्रत्यादेशादपि च मधुनो विस्मृतभ्रूविलासम्।
त्वय्यासन्ने नयनमुपरिस्पन्दि शङ्के मृगाक्ष्या मीनक्षोभाच्चलकुवलयश्रीतुलामेष्यतीति॥ ३७॥
वामश्चास्याः करुहपदैर्मुच्यमानो मदीयैर्मुक्ताजालं चिरपरिचितं त्याजितो दैवगत्या।
सम्भोगान्ते मम समुचितो हस्तसंवाहनानां यास्यत्यूरुः सरसकदलीस्तम्भगौरश्चलत्वम्॥ ३८॥
तस्मिन् काले जलद यदि सा लब्धनिद्रासुखा स्यादन्वास्यैनां स्तनितविमुखो याममात्रं सहस्व।
माभूदस्याः प्रणयिनि मयि स्वप्नलब्धे कथञ्चित् सद्यः कण्ठच्युतभुजलताग्रन्थिगाढोपगूढम्॥ ३९॥
तामुत्थाप्य स्वजलकणिकाशीतलेनानिलेन प्रत्याश्वस्तां सममभिनवैर्जालकैर्मालतीनाम्।
विद्युद्गर्भः स्तिमितनयनां त्वत्सनाथे गवाक्षे वक्तुं धीरः स्तनितवचनैर्मानिनीं प्रक्रमेथाः॥ ४०॥
भर्तुर्मित्रं प्रियमविधवे विद्धि मामम्बुवाहं तत्सन्देशैर्हृदयनिहितैरागतं त्वत्समीपम्।
यो वृन्दानि त्वरयति पथि श्राम्यतां प्रोषितानां मन्द्रस्निग्धैर्ध्वनिभिरबलावेणिमोक्षोत्सुकानि॥ ४१॥
इत्याख्याते पवनतनयं मैथिलीवोन्मुखी सा त्वामुत्कण्ठोच्छ्वसितहृदया वीक्ष्य सम्भाव्य चैवम्।
श्रोष्यत्यस्मात्परमवहिता सौम्य सीमन्तिनीनां कान्तोदन्तः सुहृदुपनतः सङ्गमात्किञ्चिदूनः॥ ४२॥
तामायुष्मन्मम च वचनादात्मनश्चोपकर्तुं ब्रूया एवं तव सहचरो रामगिर्याश्रमस्थः।
अव्यापन्नः कुशलमबले! पृच्छति त्वां वियुक्तः पूर्वाभाष्यं सुलभविपदां प्राणिनामेतदेव॥ ४३॥

होगी। यह न समझो कि ऐसी पतिव्रता स्त्री का सुन्दर पति होने के नाते मैं इतना बढ़-बढ़कर बोल रहा हूँ, बल्कि भैया मेघ! मैंने जो कुछ कहा है, वह सब शीघ्र तुम्हारी आँखों के सामने ही आ जायेगा॥ ३६॥ हे सखे! जब तुम उसके पास पहुँचोगे, तब उस मृगनयनी की वह बाँयीं आँख फड़क उठेगी, जिस पर बाल बिखरे हुए होंगे। जो ऑजन न लगने से रूखी हो गयी होगी और जो बहुत दिनों से मदिरा न पीने के कारण भौंहें चलाना भी भूल गयी होगी। उस समय फड़कती हुई वह बाँई आँख उस नीले कमल जैसी सुन्दर दिखलाई देगी, जो मछलियों के इधर-उधर आने-जाने से काँप उठता है॥ ३७॥ हे मित्र! तुम्हारे पहुँचते ही केले के खम्भे के समान उसकी वह गोरी-गोरी बाँई जाँघ भी फड़क उठेगी, जिसे कि मैं सम्भोग कर चुकने के बाद अपने हाथ से दबाया करता था। उस जाँघ पर तुम्हें मेरे हाथ के नख-चिह्न बने नहीं मिलेंगे और दुर्भाग्यवश उस पर वह मोतियों की करधनी भी नहीं मिलेगी, जिसे वह बहुत दिनों से पहनती आ रही थी॥ ३८॥ हे मेघ! तुम्हारे पहुँचने पर यदि उसे कुछ नींद आयी रहे तो उसके पीछे चुपचाप एक पहर रुके रहना, जिससे यदि मेरी प्यारी कहीं स्वप्न में मुझसे कसकर लिपटी हुई हो तो मेरे गले में लिपटी उसकी भुजाएँ अचानक नींद टूटने से छूट न जायँ॥ ३९॥ हे सखे! पहरभर के बाद भी वह आँखें न खोले तो तुम मालती के नये फूलों के समान कोमल मेरी प्यारी को अपने जल की फुहारों से ठण्ड़ा किया हुआ वायु चलाकर जगा देना। आँखें खोलने पर जब वह झरोखे से तुम्हारी ओर टकटकी लगाकर देखे तो तुम अपनी बिजली को छिपा लेना और अपने धीमे गर्जन के शब्दों में उस मानिनी से बातें करने लग जाना॥ ४०॥ उससे कहना—हे सौभाग्यवती! मैं तुम्हारे पति का प्रिय मित्र मेघ तुम्हारे पास उनका सन्देश लाया हूँ। मैं तो अपनी मीठी और धीमी गर्जना से उन थके पथिकों के मन में भी घर लौटने की उतावली मचा देता हूँ, जो अपनी स्त्रियों की इकहरी चोटियाँ खोलने के लिए व्यग्र रहते हैं॥ ४१॥ हे मित्र! यह सुनते ही मेरी प्यारी तुम्हारी ओर मुँह करके बड़े चाव से खिले हुए मन से और बड़े आदर के साथ कान लगाकर तुम्हारा सब सन्देश उसी प्रकार सुनेगी, जैसे सीताजी ने हनुमान्जी की बातें सुनी थीं। हे भाई! मित्र के मुँह से पति का संदेश पाकर स्त्रियों को अपने प्रिय के मिलन से कुछ ही कम सुख मिलता है॥ ४२॥ हे आयुष्मन्! तुम मेरे कहने से और परोपकार करने का पुण्य लेने के लिए उससे कहना—हे अबले! तुम्हारा बिछुड़ा हुआ साथी रामगिरि अर्थात् चित्रकूट आश्रम में कुशल से है और तुम्हारा

अङ्गेनाङ्गं प्रतनु तनुना गाढतप्तेन तप्तं सास्रेणाश्रुद्रुतमविरतोत्कण्ठमुत्कण्ठितेन।
उष्णोच्छ्वासं समधिकतरोच्छ्वासिना दूरवर्ती सङ्कल्पैस्तैर्विशति विधिना वैरिणा रुद्धमार्गः॥४४॥
शब्दाख्येयं यदपि किल ते यः सखीनां पुरस्तात्कर्णे लोलः कथयितुमभूदाननस्पर्शलोभात्।
सोऽतिक्रान्तः श्रवणविषयं लोचनाभ्यामदृष्टस्त्वामुत्कण्ठाविरचितपदं मन्मुखेनेदमाह॥४५॥
श्यामास्वङ्गं चकितहरिणीप्रेक्षणे दृष्टिपातं वक्त्रच्छायां शशिनि शिखिनां बर्हभारेषु केशान्।
उत्पश्यामि प्रतनुषु नदीवीचिषु भ्रूविलासान्हन्तैकस्मिन्क्वचिदपि न ते चण्डि सादृश्यमस्ति॥४६॥
त्वामालिख्य प्रणयकुपितां धातुरागैः शिलायामात्मानं ते चरणपतितं यावदिच्छामि कर्तुम्।
अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः॥४७॥
धारासिक्तस्थलसुरभिणस्त्वन्मुखस्यास्य बाले दूरीभूतं प्रतनुमपि मां पञ्चबाणः क्षिणोति।
घर्मान्तेऽस्मिन् विगणय कथं वासराणि व्रजेयुर्दिक्संसक्तप्रविततघनव्यस्तसूर्यातपानि॥४८॥
मामाकाशप्रणिहितभुजं निर्दयाश्लेषहेतोर्लब्धायास्ते कथमपि मया स्वप्नसन्दर्शनेषु।
पश्यन्तीनां न खलु बहुशो न स्थलीदेवतानां मुक्तास्थूलास्तरुकिसलयेष्वश्रुलेशाः पतन्ति॥४९॥
भित्त्वा सद्यः किसलयपुटान्देवदारुद्रुमाणां ये तत्क्षीरस्रुतिसुरभयो दक्षिणेन प्रवृत्ताः।
आलिङ्ग्यन्ते गुणवति मया ते तुषाराद्रिवाताः पूर्वं स्पृष्टं यदि किल भवेदङ्गमेभिस्तवेति॥५०॥

कुशल जानना चाहता है। क्योंकि जिन लोगों पर अचानक विपत्ति आ गयी हो, उनसे पहले यही कहना उचित होता है॥४३॥ हे सती! दूर बैठे हुए तुम्हारे प्यारे साथी का मार्ग तो बैरी विधाता रोके बैठा है। इसलिए वह तुमसे मिल भले ही न सके, फिर भी वह अपने दुबलेपन, तपन, लगातार बहते हुए आँसू, मिलने की चाह और गर्म उसाँसों को देख-देखकर ही मन में यह समझ लेता है कि तुम भी मेरे विछोह में दुबली हो गयी होओगी, विरह से तप रही होगी, आँखों से झर-झर आँसू बहा रही होओगी, मिलने को उतावली होगी और दिन-रात लम्बी-लम्बी गर्म उसाँसे ले रही होओगी। ॥४४॥ हे अबले! तुम्हारे प्यारे को जब तुमसे कोई ऐसी बात कहनी होती थी, जो तुम्हारी सखियों के आगे ऊँचे स्वर से कही जा सकती थी। तब भी वह तुम्हारा मुँह चूमने के लोभ से तुम्हारे कान में ही कहने को उद्यत रहता था। अब तुम अपने उस प्यारे की न तो बात सुन सकती हो और न ही उसे आँखभर देख ही सकती हो। इसीलिए उसने बड़े चाव से मेरे मुँह से यह कहला भेजा है॥४५॥ और कहना—हे प्यारी! मैं यहाँ प्रियंगु की लता में तुम्हारा शरीर, डरी हुई हरिणी की आँखों में तुम्हारी चितवन, चन्द्रमा में तुम्हारा मुख, मोरों के पंखों में तुम्हारे बाल और नदी की छोटी-छोटी लहरियों में तुम्हारी कटीली भौंहें देखता रहता हूँ। फिर भी हे चण्डी! मुझे दुःख है कि इनमें से किसी एक में पूरे तौर से तुम्हारी समता नहीं दिखलायी देती॥४६॥ हे सुन्दरी! जब मैं पत्थर की सिल्ली पर गेरू से तुम्हारी रूठी हुई मूर्ति का चित्र खींचकर यह बनाना चाहता हूँ कि तुम्हें मनाने के लिए मैं तुम्हारे पैरों पड़ा हुआ हूँ, उस समय आँसू ऐसे उमड़ पड़ते हैं कि आँखभर देखने भी नहीं देते। निर्दयी दैव को हमारा मिलना चित्र में भी नहीं सुहाता॥४७॥ हे बाला! एक तो मैं यों ही तुम्हारे उस मुख से बिछुडने के कारण कृश होता जा रहा हूँ, जिसमें से ऐसी सोंधी गन्ध आती है जैसे नया पानी पड़ने पर धरती में से आती है। उस पर यह कामदेव मुझे और भी सता रहा है। अब तुम्हीं विचार करो कि गर्मी के बीतने पर जब चारों ओर से उमड़ने वाली घनघटा को देखकर मैं किसके सहारे अपने दिन बिता सकूँगा॥४८॥ हे कामिनि! जब कभी मैं स्वप्न में तुम्हें देखता हूँ और कसकर छाती से लगा लेने के लिए अपने हाथ ऊपर फैलाता हूँ, उस समय वन के देवता भी मेरी दशा पर तरस खाकर मोती के समान बड़े-बड़े अश्रुकण वृक्षों के कोमल पत्तों पर बहुधा ढुलकाया करते हैं॥४९॥ और कहना—हे गुणवती! देवदारु के पत्तों को अपने झोंकों से तत्काल तोडकर और उसके रस की गन्ध लेकर हिमालय के जो पवन दक्षिण की ओर आ रहे हैं, उन्हें यही समझकर

सङ्क्षिप्येत क्षण इव कथं दीर्घयामा त्रियामा सर्वावस्थास्वहरपि कथं मन्दमन्दातपं स्यात्।
इत्थं चेतश्चटुलनयने! दुर्लभप्रार्थनं मे गाढोष्माभिः कृतमशरणं त्वद्वियोगव्यथाभिः॥५१॥
नन्वात्मानं बहु विगणयन्नात्मनैवावलम्बे तत्कल्याणि! त्वमपि नितरां मा गमः कातरत्वम्।
कस्यात्यन्तं सुखमुपनतं दुःखमेकान्ततो वा नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण॥५२॥
शापान्तो मे भुजगशयनादुत्थिते शार्ङ्गपाणौ शेषान्मासान्गमय चतुरो लोचने मीलयित्वा।
पश्चादावां विरहगुणितं तं तमात्माभिलाषं निर्वेक्ष्यावः परिणतशरच्चन्द्रिकासु क्षपासु॥५३॥
भूयश्चाहं त्वमपि शयने कण्ठलग्ना पुरा मे निद्रां गत्वा किमपि रुदती सस्वनं विप्रबुद्धा।
सान्तर्हासं कथितमसकृत्पृच्छतश्च त्वया मे दृष्टः स्वप्ने कितव! रमयन्कामपि त्वं मयेति॥५४॥
एतस्मान्मां कुशलिनमभिज्ञानदानाद्विदित्वा मा कौलीनाच्चकितनयने मय्यविश्वासिनी भूः।
स्नेहानाहुः किमपि विरहे ध्वंसिनस्ते त्वभोगादिष्टे वस्तुन्युपचितरसाः प्रेमराशीभवन्ति॥५५॥
आश्वास्यैवं प्रथमविरहोदग्रशोकां सखीं ते शैलादाशु त्रिनयनवृषोत्खातकूटान्निवृत्तः।
साभिज्ञानप्रहितकुशलैस्तद्वचोभिर्ममापि प्रातः कुन्दप्रसवशिथिलं जीवितं धारयेथाः॥५६॥
कच्चित्सौम्य! व्यवसितमिदं बन्धुकृत्यं त्वया मे प्रत्यादेशान्न खलु भवतो धीरतां कल्पयामि।
निःशब्दोऽपि प्रदिशसि जलं याचितश्चातकेभ्यः प्रत्युक्तं हि प्रणयिषु सतामीप्सितार्थक्रियैव॥५७॥

मैं अपने हृदय से लगाता हूँ कि ये उधर से तुम्हारा शरीर छूकर आ रहे होंगे॥५०॥ हे चञ्चलाक्षि! मैं मन ही मन यही मनाया करता हूँ कि किसी प्रकार रात के लम्बे-लम्बे तीन पहर क्षणभर के समान छोटे हो जायँ और दिन की तपन किसी प्रकार सदा के लिए जाती रहे। परन्तु मेरी यह दुर्लभ प्रार्थना भी बेकार ही जाती है। उस पर इस तिल-तिल करके जलाने वाली विछोह की जलन से मेरा जी ही बैठा जा रहा है॥५१॥ किन्तु हे कल्याणी! बहुत कुछ सोच-विचारकर मैं अपने मन को अपने से ही ढाढ़स बँधा लेता हूँ। इसलिए तुम भी विशेष दुःखी न होना। देखो! दुःख या सुख किसी पर सदा नहीं रहा करते। ये तो पहिए के चक्के के समान कभी नीचे और कभी ऊपर आया-जाया करते हैं॥५२॥ हे प्रिये! अगली हरिबोधिनी एकादशी को जब विष्णु भगवान् शेषनाग की शय्या से उठेंगे, उसी दिन मेरा शाप भी समाप्त हो जायगा। इसलिए बाकी चार महीनों को भी किसी प्रकार आँख मूँद कर बिता लो। फिर तो हम दोनों विछोह के दिनों में सोची हुई अपने मन की सब साधें शरद्ऋतु की सुहावनी चाँदनी रात में पूरी कर ही लेंगे॥५३॥ हे अबले! तुम्हारे प्यारे ने यह भी कहलाया है कि एक बार जब तुम मेरे गले से लगी हुई मेरे साथ पलँग पर सो रही थी, उस समय तुम अचानक चिल्लाकर रोती हुई जाग पड़ीं और जब मैंने बार-बार तुमसे रोने का कारण पूछा, तब तुमने मीठी मुस्कान के साथ उत्तर दिया कि हे छलिया! मैंने स्वप्न में देखा कि तुम किसी दूसरी स्त्री के साथ रमण कर रहे हो, इसीलिए मैं एकाएक रो पड़ी॥५४॥ हे काली आँखोंवाली! इस पहचान से ही समझ लेना कि मैं सकुशल हूँ। लोगों के कहने से तुम मेरे प्रेम में सन्देह न करने लगना। न जाने लोग यह कहा करते हैं कि विरह में प्रेम कम हो जाता है। सच्ची बात तो यह है कि जब चाही हुई वस्तु नहीं मिलती, तभी उसे पाने के लिए व्यग्रता बढ़ती है और ढेर का ढेर प्रेम आकर एकत्र हो जाता है॥५५॥ हे मेघ! इस पहली बार के विछोह से दुःखिनी अपनी भाभी को इस प्रकार ढाढस बँधाने के बाद उससे कुशल समाचार और पहचान लेकर तुम मेरे पास उस कैलास पर्वत से जल्दी ही लौट आना, जिसकी चोटियाँ महादेवजी के साँड ने उखाड़ दी हैं। और फिर यहाँ आकर प्रातःकाल खिले हुए कुन्द के फूल के समान चू पड़ने वाले मेरे प्राणों की रक्षा करना॥५६॥ क्यों भैया मेघ! तुमने यह मेरा प्यारा काम करने की ठान ली है या नहीं? पूछने से यह न समझ बैठना कि मैं तुमसे हुँकारी भरवाने पर ही तुम्हें इस काम के योग्य समझूँगा। मैं जानता हूँ कि जब पपीहे तुमसे जल माँगते हैं, तब तुम बिना उत्तर दिये ही उन्हें जल दे देते हो। सज्जनों की

एतत्कृत्वा प्रियमनुचितप्रार्थनावर्तिनो मे सौहार्दाद्वा विधुर इति वा मय्यनुक्रोशबुद्ध्या।
इष्टान्देशाञ्जलद विचर प्रावृषा सम्भृतश्रीर्मा भूदेवं क्षणमपि च ते विद्युता विप्रयोगः॥५८॥
तस्मादद्रेर्निगदितमथो शीघ्रमेत्यालकायां यक्षागारं विगलितनिभं दृष्टिचिह्नैर्विदित्वा।
यत्सन्दिष्टं प्रणयमधुरं गुह्यकेन प्रयत्नात् तद्गेहिन्याः सकलमवदत् कामरूपी पयोदः॥५९॥
इत्याख्याते सुरपतिसखः शैलकुल्यापुरीषु स्थित्वा स्थित्वा धनपतिपुरीं वासरैः कैश्चिदाप।
मत्वागारं कनकरुचिरं लक्षणैः पूर्वमुक्तैः तस्योत्सङ्गे क्षितितलगतां तां च दीनां ददर्श॥६०॥
तं सन्देशं जलधरवरो दिव्यवाचाऽऽचचक्षे प्राणाँस्तस्या जनहितरतो रक्षितुं यक्षवध्वाः।
प्राप्योदन्तं प्रमुदितमना सापि तस्थौ स्वभर्तुः केषां न स्यादभिमतफला प्रार्थना ह्युत्तमेषु॥६१॥
श्रुत्वा वार्तां जलदकथितां तां धनेशोऽपि सद्यः शापस्यान्तं सदयहृदयः संविधायास्तकोपः।
संयोज्यैतो विगलितशुचौ दम्पती हृष्टचित्तौ भोगानिष्टानविरतसुखं भोजयामास शश्वत्॥६२॥
इत्यम्भूतं सुरचितपदं मेघदूताभिधानं कामक्रीडाविरहितजने विप्रयुक्ते विनोदम्।
मेघस्यास्मिन्नतिनिपुणतां बुद्धिभावं कवीनां नत्वार्यायाश्चरणकमलं कालिदासश्चकार॥६३॥

इति महाकविकालिदासविरचिते मेघदूते काव्ये उत्तरमेघः समाप्तः।

समाप्तोऽयं ग्रन्थः।

रीति ही यह है कि जब कोई उनसे कुछ माँगता है तो वे मुँह से कुछ न कहकर काम पूरा करके ही उसका उत्तर देते हैं॥५७॥ हे मित्र! मैंने तुमको जो काम बतलाया है, वह तुमसे कराना बड़ी ढिठाई होगी। परन्तु चाहे मित्रता के नाते, चाहे मुझ बिछोही पर तरस खाकर, तुम पहले मेरा यह काम कर देना और फिर अपना बरसाती रूप लेकर जहाँ मन चाहे वहाँ घूमना। मैं यही मानता हूँ कि प्यारी बिजली से एक क्षण के लिए भी तुम्हारा वैसा वियोग न हो, जैसा कि मैं भोग रहा हूँ॥५८॥ उस यक्ष के इन वचनों को सुनकर इच्छानुसार रूप धारण करने वाला मेघ रामगिरि से चलकर यक्ष के निवासस्थान अलका में जा पहुँचा और उपर्युक्त चिह्नों को देखकर उसने यक्ष का घर पहचान लिया। उस समय उसकी शोभा फीकी पड़ गयी थी। वहाँ उसने यक्ष की पत्नी को उसके पति का वह प्यारा-प्यारा सन्देश सुना दिया, जिसे यक्ष ने बड़े यत्न से भेजा था॥५९॥ यक्ष का सन्देश सुनकर मेघ वहाँ से चल पड़ा और मार्ग के विभिन्न पर्वतों, नदियों और नगरों में ठहरता हुआ यक्षपति कुबेर की राजधानी अलका में पहुँच गया। वहाँ पूर्वोक्त चिह्नों के अनुसार उसने यक्ष का घर पहचान लिया और उसमें बेचारी यक्ष की पत्नी को धरती में पड़ी देखा॥६०॥ अलकापुरी में पहुँचकर सबके शुभचिन्तक उस भले मेघ ने यक्षपत्नी के प्राण बचाने के लिए दैवी वाणी में सारा सन्देश कह सुनाया। वह अपने प्रियतम का कुशल-समाचार सुनकर मारे हर्ष के गद्गद हो गयी। क्योंकि भले-मानुस से कोई काम करने को कहा जाय तो वह पूर्ण होता ही है॥६१॥ जब मेघ के सन्देश की चर्चा कुबेर के पास पहुँची, तब उनको बड़ी दया आयी और उन्होंने अपना शाप लौटाकर उस यक्ष और उसकी पत्नी दोनों को पुनः मिला दिया। इस मधुर मिलन से उनका दुःख दूर हो गया और कुबेर ने ऐसा प्रबन्ध कर दिया कि जिससे फिर उन्हें कोई कष्ट नहीं हुआ॥६२॥ महाकवि कालिदास ने आर्या अर्थात् महाकाली के चरणों को प्रणाम करके सुन्दर पदों से सँवारकर 'मेघदूत' काव्य को रचा है। यह काव्य उन वियोगियों का मन बहलायेगा कि जिन्हें कामक्रीड़ा (भोग-विलास) का अवसर ही नहीं मिला। इसमें मेघ का उत्तम कौशल और कवियों की अनोखी कल्पनाओं का भी नमूना देखने को मिलेगा॥६३॥

॥ इस प्रकार मेघदूत काव्य में उत्तरमेघ समाप्त ॥



'सर्वं प्रियं चारुतरं वसन्ते'

ऋतुसंहारम्

॥ श्रीः ॥

ऋतुसंहारम्

प्रथमः सर्गः

(ग्रीष्मवर्णनम्)

प्रचण्डसूर्यः स्पृहणीयचन्द्रमाः सदावगाहक्षतवारिसञ्चयः।
दिनान्तरम्योऽभ्युपशान्तमन्मथो निदाघकालोऽयमुपागतः प्रिये! ॥ १ ॥
निशाः शशाङ्कक्षतनीलराजयः क्वचिद्विचित्रं जलयन्त्रमन्दिरम्।
मणिप्रकाराः सरसं च चन्दनं शुचौ प्रिये यान्ति जनस्य सेव्यताम् ॥ २ ॥
सुवासितं हर्म्यतलं मनोहरं प्रियामुखोच्छ्वासविकम्पितं मधु।
सुतन्त्रिगीतं मदनस्य दीपनं शुचौ निशीथेऽनुभवन्ति कामिनः ॥ ३ ॥
नितम्बबिम्बैः सदुकूलमेखलैः स्तनैः सहाराभरणैः सचन्दनैः।
शिरोरुहैः स्नानकषायवासितैः स्त्रियो निदाघं शमयन्ति कामिनाम् ॥ ४ ॥
नितान्तलाक्षारसरागरञ्जितैर्नितम्बिनीनां चरणैः सनूपुरैः।
पदे पदे हंसरुतानुकारिभिर्जनस्य चित्तं क्रियते समन्मथम् ॥ ५ ॥
पयोधराश्चन्दनपङ्कचर्चितास्तुषारगौरार्पितहारशेखराः ।
नितम्बदेशाश्च सहेममेखलाः प्रकुर्वते कस्य मनो न सोत्सुकम् ॥ ६ ॥
समुद्गतस्वेदचिताङ्गसन्धयो विमुच्य वासांसि गुरूणि साम्प्रतम्।
स्तनेषु तन्वंशुकमुन्नतस्तना निवेशयन्ति प्रमदाः सयौवनाः ॥ ७ ॥

हे प्रिये! यह ग्रीष्मऋतु आ गयी। इसमें सूर्य अति तपता है, सभी जन चन्द्रप्रकाश की प्राप्ति की अभिलाषा करते हैं, निरन्तर स्नान से नदियों के तथा जलाशयों के जल कम हो जाते हैं, इसमें सायंकाल की छवि मनोरम होती है और स्त्री-सहवास की अभिलाषा कम होती है॥ १॥ हे प्रिये! चन्द्र-किरणयुक्त रात, कहीं-कहीं चित्र-विचित्र फव्वारेदार मकान, अनेक भाँति के रत्न आदि मणि और रसयुक्त चन्दन, इस ऋतु में जन-समूह के ये ही पदार्थ सेवनीय हैं॥ २॥ हे प्रिये! इस ऋतु में सुगन्धि से परिपूर्ण अट्टालिकाएँ प्रेमिकाओं के मुखों के श्वासों से युक्त मधु और कामोद्दीपक मधुर गीत आदि का रात्रि में कामीजन अनुभव किया करते हैं॥ ३॥ हे प्रिये! इस ऋतु में प्रेयसियाँ सुन्दर रेशमी कपड़े पहनकर, नितम्बों के ऊपर करधनी धारण कर, स्तनों पर माला तथा फूलों के गहने और चन्दन लगाकर स्नानीय चूर्ण से सुवासित केशकलापों से अपने प्रेमीजनों की तपन दूर करती हैं॥ ४॥ हे प्राणेश्वरि! इस ऋतु में स्थूल नितम्बवाली रमणियाँ चरणों में महावर लगाकर तथा प्रति चरण-विन्यास में हंसों के समान शब्द करने वाले नूपुरों को पहनकर जब चलती हैं तब अपने प्रेमियों के अन्तःकरण को कामोद्वेजित कर देती है॥ ५॥ चन्दनचर्चित शीतल दोनों स्तन, बरफ के सदृश सफेद माला को धारण किये हुए तथा स्वर्ण की करधनियों से विभूषित नितम्बभाग भला किसके चित्त को उत्कण्ठित नहीं करता॥ ६॥ इस ऋतु में सभी अङ्ग-प्रत्यङ्गों से पसीना प्रबलता से निकलता है, अतः युवतियों ने मोटे कपड़ों को

सचन्दनाम्बुव्यजनोद्भवानिलैः सहारयष्टिस्तनमण्डलार्पणैः।
सवल्लकीकाकलिगीतनिःस्वनैर्विबोध्यते सुप्त इवाद्य मन्मथः॥ ८॥
सितेषु हर्म्येषु निशासु योषितां सुखप्रसुप्तानि मुखानि चन्द्रमाः।
विलोक्य नूनं भृशमुत्सुकश्चिरं निशाक्षये याति ह्रियेव पाण्डुताम्॥ ९॥
असह्यवातोद्धतरेणुमण्डला प्रचण्डसूर्यातपतापिता मही।
न शक्यते द्रष्टुमपि प्रवासिभिः प्रियावियोगानलदग्धमानसैः॥ १०॥
मृगाः प्रचण्डातपतापिता भृशं तृषा महत्या परिशुष्कतालवः।
वनान्तरे तोयमिति प्रधाविता निरीक्ष्य भिन्नाञ्जनसन्निभं नभः॥ ११॥
सविभ्रमैः सस्मितजिह्मवीक्षितैर्विलासवत्यो मनसि प्रवासिनाम्।
अनङ्गसन्दीपनमाशु कुर्वते यथा प्रदोषाः शशिचारुभूषणाः॥ १२॥
रवेर्मयूखैरभितापितो भृशं विदह्यमानः पथि तप्तपांसुभिः।
अवाङ्मुखो जिह्मगतिः श्वसन्मुहुः फणी मयूरस्य तले निषीदति॥ १३॥
तृषा महत्या हृतविक्रमोद्यमः श्वसन् मुहुर्दूरविदारिताननः।
न हन्त्यदूरेऽपि गजान् मृगेश्वरो विलोलजिह्मश्चलिताग्रकेसरः॥ १४॥
विशुष्ककण्ठोद्गतसीकराम्भसो गभस्तिभिर्भानुमतोऽनुतापिताः।
प्रवृद्धतृष्णोपहता जलार्थिनो न दन्तिनः केसरिणोऽपि बिभ्यति॥ १५॥
हुताग्निकल्पैः सवितुर्गभस्तिभिः कलापिनः क्लान्तशरीरचेतसः।
न भोगिनं घ्नन्ति समीपवर्तिनं कलापचक्रेषु निवेशिताननम्॥ १६॥

छोडकर ऊँचे-ऊँचे स्तनों पर महीन कपड़े पहन लिये हैं॥ ७॥ इस ऋतु में चन्दनयुक्त जल से छिड़के हुए पंखों की हवा से, मालाओं से सुसज्जित स्त्रियों के स्तन-मण्डल के स्पर्श से, वीणा की मधुर तान-गान से मानो सोये हुए कामदेव को जगाया जा रहा है॥ ८॥ इस ऋतु में रात में छतों पर सुख से सोयी हुई स्त्रियों के मुखों को देखकर ऐसा ज्ञात होता है कि चन्द्रमा लजाकर प्रातः पाण्डुता को प्राप्त होता है अर्थात् फीका पड़ जाता है॥ ९॥ इस ऋतु मे तीक्ष्ण पवन की गर्द उड़ रही है। प्रचण्ड सूर्य के ताप से पृथ्वी अत्यन्त तप्त हो रही है। अतः प्रियाओं के वियोग की आग में जिन वियोगियों का चित्त झुलस गया है, वे इसे देख भी नहीं सकते हैं॥ १०॥ इस ऋतु में प्यास के कारण जिनके तालु सूख गये हैं ऐसे हिरण, जो अति संतप्त हैं, नीले आकाश को देखकर 'वन में जल है' ऐसा सोचकर दौड़ रहे हैं॥ ११॥ विलासी तरुणियाँ हाव-भाव युक्त मुसकान के साथ कटाक्षादि द्वारा चन्द्रकिरणयुक्त सन्ध्या के सदृश प्रवासियों के अन्तःकरण में शीघ्र कामोत्तेजन कर रही हैं॥ १२॥ सूर्य की किरणों से अति पीडित तथा मार्ग की तप्त धूलि से दग्ध सर्प नीचे की तरफ शिर करके कुटिल गति से बार-बार श्वास छोडते हुए मोर के नीचे बैठ रहा है॥ १३॥ प्यास के कारण सिंह बलहीन हो गया है, बार-बार श्वासें छोड़ रहा है, मुँह को फैलाकर के पड़ा हुआ है। उसकी जीभ चञ्चल हो रही है, शिर के बाल काँप रहे हैं। देखो, हाथियों को समीप पाकर भी वह उन्हें नहीं मार रहा है॥ १४॥ सूखे हुए कण्ठ से निकली हुई झाग से सूर्य की गर्मी से सन्तप्त तथा प्यास से दुःखी हाथी पानी न पाकर घूम रहे हैं। वे शेर को देखकर भी नहीं डर रहे हैं॥ १५॥ होम की अग्नि के सदृश तीक्ष्ण धूप से मोरगणों के अन्तः-करण तथा चित्त इतने खिन्न हो गये हैं कि उनके पिच्छों की छाया में मुखों को रखकर बैठे

सभद्रमुस्तं परिशुष्ककर्दमं सरः खनन्नायतपोतृमण्डलैः।
रवेर्मयूखैरभितापितो भृशं वराहयूथो विशतीव भूतलम्॥ १७॥
विवस्वता तीक्ष्णतरांशुमालिना सपङ्कतोयात्सरसोऽभितापितः।
उत्प्लुत्य भेकस्तृषितस्य भोगिनः फणातपत्रस्य तले निषीदति॥ १८॥
समुद्धृताशेषमृणालजालकं विपन्नमीनं द्रुतभीतसारसम्।
परस्परोत्पीडनसंहतैर्गजैः कृतं सरः सान्द्रविमर्दकर्दमम्॥ १९॥
रविप्रभोद्भिन्नशिरोमणिप्रभो विलोलजिह्वाद्वयलीढमारुतः।
विषाग्निसूर्यातपतापितः फणी न हन्ति मण्डूककुलं तृषाकुलः॥ २०॥
सफेनलालावृतवक्त्रसम्पुटं विनिःसृतालोहितजिह्ममुन्मुखम्।
तृषाकुलं निःसृतमद्रिगह्वरादवेक्षमाणं महिषीकुलं जलम्॥ २१॥
पटुतरदवदाहोच्छुष्कसस्यप्ररोहाः परुषपवनवेगोत्क्षिप्तसंशुष्कपर्णाः।
दिनकरपरितापक्षीणतोयाः समन्ताद्विदधति भयमुच्चैर्वीक्ष्यमाणा वनान्ताः॥ २२॥
श्वसिति विहगवर्गः शीर्णपर्णद्रुमस्थः कपिकुलमुपयाति क्लान्तमद्रेर्निकुञ्जम्।
भ्रमति गवययूथः सर्वतस्तोयमिच्छञ्छरभकुलमजिह्मं प्राद्धरत्यम्बुकूपात्॥ २३॥
विकचनवकुसुम्भस्वच्छसिन्दूरभासा प्रबलपवनवेगोद्भूतवेगेन तूर्णम्।
तटविटपलताग्रालिङ्गनव्याकुलेन दिशि दिशि परिदग्धा भूमयः पावकेन॥ २४॥
ज्वलति पवनवृद्धः पर्वतानां दरीषु स्फुटति पटुनिनादैः शुष्कवंशस्थलीषु।
प्रसरति तृणमध्ये लब्धवृद्धिः क्षणेन ग्लपयति मृगवर्गं प्रान्तलग्नो दवाग्निः॥ २५॥

हुए सर्पों को देखकर भी वे नहीं मारते॥ १६॥ प्रचण्ड धूप से व्याकुल होकर शूकर-समूह अपने थूथनों से मोथे से पूर्ण सूखे हुए कीचडवाले तालाबों को खोद रहे हैं। ऐसा ज्ञात हो रहा है मानो वे गरमी से शान्ति पाने के लिए पाताल में जाना चाहते हैं॥ १७॥ मेढकों का झुण्ड प्रचण्ड सूर्य से संतापित होकर गरम तथा कीचडयुक्त पानी में कूदकर ठंडे होने की इच्छा से प्यास से खिन्न सर्पों के फणरूपी छत्रों के नीचे आश्रय ले रहे हैं॥ १८॥ आपस में झगडते हुए हाथी एक-दूसरे को तालाब से निकालने के लिए परस्पर पीड़ा दे रहे हैं तथा तालाबों के कमलनालों को नष्ट-भ्रष्ट कर रहे हैं। मछलियों तथा भयभीत सारसों का विनाश कर रहे हैं। तालाबों के कीचड को और भी पंकिल कर रहे हैं॥ १९॥ साँपों के शिरों की मणियाँ सूर्य की किरणों से चमक रही हैं, साँप भी दोनों जीभों से वायु को चाट रहे हैं। अपने जहर के प्रभाव से सूर्य के तेज से व्याकुल होकर मेढकों का नाश नहीं कर रहे हैं॥ २०॥ फेन तथा लारयुक्त मुखवाली कुछ भैंसें, जिनकी लाल रंग वाली जीभें बाहर आ गयी हैं, वे प्यास से व्यग्र होकर ऊपर को मुँह उठाकर जल को देखती हुई पहाडों के गह्वरों से बाहर आ रही हैं॥ २१॥ हे चारुचन्द्रमुखी! दावानल से अरण्यों के घास-फूस भस्म हो रहे हैं। तीक्ष्ण हवा से सूखे पत्ते उडे जा रहे हैं। सभी ओर सूर्य की प्रचण्डता से जलाशय सूखे जा रहे हैं। सभी ओर वनान्त को देखने से डर लग रहा है॥ २२॥ हे कमलनेत्री! सूखे हुए पत्तोंवाले पेडों पर पक्षीवर्ग येन-केन प्रकारेण जीवन यापन कर रहा है। बन्दरों का झुण्ड पहाड़ों के कुञ्जों में जा रहा है। चमरीमृग जल की इच्छा से इधर-उधर भ्रमण कर रहे हैं। शरभगण कुटिलतारहित कुँए से पानी ले रहे हैं॥ २३॥ नये कुसुम के फूल के सदृश तथा स्वच्छ सिन्दूर के समान आभावाली अग्नि तेज हवा के वेग मे अति प्रचण्ड होकर पेड, लता आदि का अग्रभाग चूमने के लिए प्रतिदिशाओं में पृथ्वी को जला रही है॥ २४॥ दावानल पहाडों की गुफाओं में हवा से वृद्धि प्राप्त करता है और जलता है। सूखे हुए बाँसों की स्थलियों में बडे शब्द से प्रवेश करता

बहुतर इव जातः शाल्मलीनां वनेषु स्फुरति कनकगौरः कोटरेषु द्रुमाणाम्।
परिणतदलशाखानुत्पतन्प्रांशुवृक्षान्भ्रमति पवनधूतः सर्वतोऽग्निर्वनान्ते॥ २६॥
गजगवयमृगेन्द्रा वह्निसन्तप्तदेहाः सुहृद इव समेता द्वन्द्वभावं विहाय।
हुतवहपरिखेदादाशु निर्गत्य कक्षाद्विपुलपुलिनदेशान्निम्नगां संविशन्ति॥ २७॥
कमलवनचिताम्बुः पाटलामोदरम्यः सुखसलिलनिषेकः सेव्यचन्द्रांशुहारः।
व्रजतु तव निदाघः कामिनीभिः समेतो निशि सुललितगीते हर्म्यपृष्ठे सुखेन॥ २८॥

॥ इति महाकविकालिदासकृतौ ऋतुसंहारे ग्रीष्मवर्णनं नाम प्रथमः सर्गः॥

है। क्षण में ही घास-फूस आदि तृणों में जल उठता है। हिरणों के देहभाग में लगकर उनका नाश करता है॥ २५॥ अग्नि सेमर के वनों में ढेर की ढेर हो जाती है। पेडों के खोखलों में स्वर्ण के सदृश जलने लगती है। सूखे पेड़ों की चोटियों पर विस्तीर्ण हो जाती है। हवा के झकोरों से वनों में सभी तरफ भ्रमण करती है॥ २६॥ हाथी, चमरीमृग और शेर दावानल से क्लेशित होकर आपस में मित्र के सदृश एक साथ ही शत्रुता को छोड़कर आग से तप्त हुए प्रदेश से निकलकर नदी में घुस जाते हैं॥ २७॥ अतिमधुर गीत गानेवाली तालाब में कमल फूल-फूलकर भर गये हैं। गुलाब के पुष्पों से चारों ओर मीठी महक उड रही है। इस समय स्नान करना और चन्द्र की किरण ही सेवनीय है। अतः हे प्यारी! तुम्हारा यह ग्रीष्म कामिनियों के साथ अटारियों पर सुख से बीते॥ २८॥

इस प्रकार ऋतुसंहार के प्रथम सर्ग में ग्रीष्मऋतु-वर्णन समाप्त हुआ।

द्वितीयः सर्गः

(प्रावृड्वर्णनम्)

ससीकराम्भोधरमत्तकुञ्जरस्तडित्पताकोऽशनिशब्दमर्दलः ।
समागतो राजवदुद्धतद्युतिर्घनागमः कामिजनप्रियः प्रिये ! ॥ १ ॥
नितान्तनीलोत्पलपत्रकान्तिभिः क्वचित्प्रभिन्नाञ्जनराशिसन्निभैः ।
क्वचित्सगर्भप्रमदास्तनप्रभैः समाचितं व्योम घनैः समन्ततः ॥ २ ॥
तृषाकुलैश्चातकपक्षिणां कुलैः प्रयाचितास्तोयभरावलम्बिनः ।
प्रयान्ति मन्दं बहुधारवर्षिणो बलाहकाः श्रोत्रमनोहरस्वनाः ॥ ३ ॥
बलाहकाश्चाशनिशब्दमर्दलाः सुरेन्द्रचापं दधतस्तडिद्गुणम् ।
सुतीक्ष्णधारापतनोग्रसायकैस्तुदन्ति चेतः प्रसभं प्रवासिनाम् ॥ ४ ॥
प्रभिन्नवैदूर्यनिभैस्तृणाङ्कुरैः समाचिता प्रोत्थितकन्दलीदलैः ।
विभाति शुक्लेतररत्नभूषिता वाराङ्गनेव क्षितिरिन्द्रगोपकैः ॥ ५ ॥
सदा मनोज्ञं स्वनदुत्सवोत्सुकं विकीर्णविस्तीर्णकलापिशोभितम् ।
ससम्भ्रमालिङ्गनचुम्बनाकुलं प्रवृत्तनृत्यं कुलमद्य बर्हिणाम् ॥ ६ ॥
निपातयन्त्यः परितस्तटद्रुमान् प्रवृद्धवेगैः सलिलैरनिर्मलैः ।
स्त्रियः सुदुष्टा इव जातविभ्रमाः प्रयान्ति नद्यस्त्वरितं पयोनिधिम् ॥ ७ ॥
तृणोत्करैरुद्गतकोमलाङ्कुरैर्विचित्रनीलैर्हरिणीमुखक्षतैः ।
वनानि वैन्ध्यानि हरन्ति मानसं विभूषितान्युद्गतपल्लवैर्द्रुमैः ॥ ८ ॥

हे प्रिये ! जलविन्दुओं से पूर्ण जलधररूप मत्त हाथियोंवाला, विजली के झण्डेवाला, वज्र के शब्द को नाश करने वाला, कामिजनों को प्यारा राजा के समान विशेष तेजस्वी यह वर्षा-समय प्राप्त हुआ ॥ १ ॥ अति नीले रंग के कमल के पत्रों की तरह आभावाले, कहीं-कहीं सान्द्र कज्जल के ढेर के सदृश कान्तिवाले किसी-किसी जगह गर्भिणी ललनाओं के कुचों की-सी छटावाले मेघों ने सभी ओर से आकाश को घेर लिया है ॥ २ ॥ प्यास से पीड़ित चातक पक्षियों से प्रार्थित, जलों के भार को धारण करने वाले, अति वर्षा करने वाले, कर्णमधुर शब्द करनेवाले मेघ धीरे-धीरे आकाश में मँडरा रहे हैं ॥ ३ ॥ वज्र का शब्द ही जिनका रणवाद्य है तथा जिनके धनुष की डोरी ही विजली है, ऐसे मेघ इन्द्र के धनुष को धारण किये हुए तेज जलधारा मानो तीक्ष्ण बाणों को वर्षति हुए प्रवासियों के अन्तःकरणों को क्लेशित कर रहे हैं ॥ ४ ॥ विखरी हुई वैदूर्य मणियों की कान्ति के समान, तृणांकुरों से युक्त, प्रादुर्भूत केले के दलों से परिपूर्ण हरित रंगवाले, वीरवहूटियों से युक्त पृथ्वी की शोभा हरे रंगवाली मणियों से सजी-धजी वेश्या के समान हो रही है ॥ ५ ॥ सदा सुन्दर मनोरम मेघों के गर्जना की अभिलाषा करनेवाले, खुले हुए केशकलापों की तरह शोभायुक्त, संभ्रम के कारण आलिंगन तथा चुम्बन से व्याकुल, नृत्य में प्रवृत्त मयूर-कुल इस समय शोभा दे रहा है ॥ ६ ॥ सब ओर से तटों पर उगे हुए पेडों को प्रवल वहाव वाले मलिन जल से उखाड़ती हुई ये नदियाँ समुद्र में ऐसे जा रही हैं, जैसे कामवेग से प्रेरित जघनचपला रमणियाँ अपने कामुकों के पास जाती हैं ॥ ७ ॥ जिन विन्ध्य के वनों में कोमल-कोमल अंकुर उत्पन्न हुए हैं, विचित्र नीले रंगवाले तथा मृगों के मुखों से चवाये हुए तृण बिखरे हैं तथा नवीन-नवीन पल्लवों

विलोलनेत्रोत्पलशोभिताननैर्मृगैः समन्तादुपजातसाध्वसैः।
समाचिता सैकतिनी वनस्थली समुत्सुकत्वं प्रकरोति चेतसः॥ ९॥
अभीक्ष्णमुच्चैर्ध्वनता पयोमुचा घनान्धकारीकृतशर्वरीष्वपि।
तडित्प्रभादर्शितमार्गभूमयः प्रयान्ति रागादभिसारिकाः स्त्रियः॥ १०॥
पयोधरैर्भीमगभीरनिःस्वनैस्तडिद्विरुद्वेजितचेतसो भृशम्।
कृतापराधानपि योषितः प्रियान्परिष्वजन्ते शयने निरन्तरम्॥ ११॥
विलोचनेन्दीवरवारिबिन्दुभिर्निषिक्तबिम्बाधरचारुपल्लवाः ।
निरस्तमाल्याभरणानुलेपनाः स्थिता निराशाः प्रमदाः प्रवासिनाम्॥ १२॥
विपाण्डुरं कीटरजस्तृणान्वितं भुजङ्गवद्वक्रगतिप्रसर्पितम्।
ससाध्वसैर्भेककुलैर्निरीक्षितं प्रयाति निम्नाभिमुखं नवोदकम्॥ १३॥
विपत्रपुष्पां नलिनीं समुत्सुका विहाय भृङ्गाः श्रुतिहारिनिःस्वनाः।
पतन्ति मूढाः शिखिनां प्रनृत्यतां कलापचक्रेषु नवोत्पलाशया॥ १४॥
वनद्विपानां नववारिदस्वनैर्मदान्वितानां ध्वनतां मुहुर्मुहुः।
कपोलदेशा विमलोत्पलप्रभाः सभृङ्गयूथैर्मदवारिभिश्चिताः॥ १५॥
सितोत्पलाभाम्बुदचुम्बितोपलाः समाचिताः प्रस्रवणैः समन्ततः।
प्रवृत्तनृत्यैः शिखिभिः समाकुलाः समुत्सुकत्वं जनयन्ति भूधराः॥ १६॥
कदम्बसर्जार्जुनकेतकीवनं विकम्पयँस्तत्कुसुमाधिवासितः।
ससीकराम्भोधरसङ्गशीतलः समीरणः कं न करोति सोत्सुकम्॥ १७॥

से भूषित वृक्ष हैं, ऐसे वे वन मनुष्यों के चित्तों को पुलकित कर रहे हैं॥ ८॥ चकित तथा चपल नेत्ररूपी कमलों के सदृश शोभावाले मुखोंवाले मृगों से घिरी हुई किनारों पर की वनभूमि इस समय मन में उमंग पैदा करती हैं॥ ९॥ बार-बार गम्भीर शब्द करनेवाले मेघों के घने अन्धकार से आच्छादित रात में भी बिजली की प्रभा से मार्ग की पृथ्वी को देखती हुई अभिसारिकाएँ अनुराग से प्रियतमों का अनुगमन करती हैं॥ १०॥ भयानक शब्द करनेवाले मेघों से तथा बिजली की तड़क से अधिक घबड़ाई हुई रमणियाँ अपराधी पतियों के साथ भी शयनावस्था में प्रगाढ़ आलिंगन करती हैं॥ ११॥ नेत्रकमलों से गिरे हुए अश्रुकणों से जिनके अधरपल्लव धुल गये हैं और जिन्होंने माला आदि आभूषण तथा सौन्दर्यवर्धक अनुलेपन आदि को छोड़ दिया है, ऐसी प्रवासीजनों की स्त्रियाँ अपने पतियों के प्रति निराश होकर बैठी हैं॥ १२॥ मलिन, कीड़े-मकोड़ों, धूलि तथा घास-फूस से भरा साँप की भाँति टढी-मेढ़ी गति से वहनेवाला और घबड़ाहट से युक्त मेंढकों के झुण्डों से देखा गया नूतन जल नीचे की ओर जा रहा है॥ १३॥ उत्कण्ठित तथा मधुर शब्द-श्रवण करनेवाले भ्रमरगण (भौंरें) विगतपत्रोंवाली कमलिनी को छोड़कर नूतन कमलों की प्रत्याशा से नृत्य करनेवाले मोरगणों के पिच्छों के ऊपर गिरते हैं॥ १४॥ हे प्रिये! बार-बार ध्वनि करनेवाले, मदोन्मत्त हाथियों के गण्डस्थलों पर जो विमल कमल के समान कान्तिवाले हैं, भौंरों के झुण्डों ने आकर मदजलों पर स्थान लिया अर्थात् अति सुगन्धि के कारण वहाँ पर आ बैठे॥ १५॥ सफेद कमल की छटा के सदृश शोभावाले मेघों द्वारा जिनकी चोटियाँ चुम्बित हैं तथा जिनके चारों ओर झरने झर रहे हैं एवं जिनके ऊपर मोरगण नाच रह हैं, ऐसे पर्वत उत्सुकता उत्पन्न कर रहे हैं॥ १६॥ कदम्ब, साल, अर्जुन तथा केतकी के वनों को कँपाती हुई तथा उक्त वृक्षों के फूलों से सुवासित करती हुई, जलकणों से मिश्रित मेघों के सम्पर्क से शीतल पवन भला किसे समुत्सुक नहीं करता अर्थात् सब

शिरोरुहैः श्रोणितटावलम्बिभिः कृतावतंसैः कुसुमैः सुगन्धिभिः।
स्तनैः सहारैर्वदनैः ससीधुभिः स्त्रियो रतिं सञ्जनयन्ति कामिनाम्॥ १८॥
वहन्ति वर्षन्ति नदन्ति भान्ति रुदन्ति नृत्यन्ति समाश्रयन्ति।
नद्यो घना मत्तगजा वनान्ताः प्रियाविहीनाः शिखिनः प्लवङ्गाः॥ १९॥
तडिल्लताशक्रधनुर्विभूषिताः पयोधरास्तोयभरावलम्बिनः।
स्त्रियश्च काञ्चीमणिकुण्डलोज्ज्वला हरन्ति चेतो युगपत्प्रवासिनाम्॥ २०॥
मालाः कदम्बनवकेसरकेतकीभिरायोजिताः शिरसि बिभ्रति योषितोऽद्य।
कर्णान्तरेषु ककुभद्रुममञ्जरीभिरिच्छानुकूलरचितानवतंसकांश्च॥ २१॥
कालागुरुप्रचुरचन्दनचर्चिताङ्ग्यः पुष्पावतंससुरभीकृतकेशपाशाः।
श्रुत्वा ध्वनिं जलमुचां त्वरितं प्रदोषे शय्यागृहं गुरुगृहात्प्रविशन्ति नार्यः॥ २२॥
कुवलयदलनीलैरुन्नतैस्तोयनम्रैर्मृदुपवनविधूतैर्मन्दमन्दं चलद्भिः।
अपहृतमिव चेतस्तोयदैः सेन्द्रचापैः पथिकजनवधूनां तद्वियोगाकुलानाम्॥ २३॥
मुदित इव कदम्बैर्जातपुष्पैः समन्तात् पवनचलितशाखैः शाखिभिर्नृत्यतीव।
हसितमिव विधत्ते सूचिभिः केतकीनां नवसलिलनिषेकच्छिन्नतापो वनान्तः॥ २४॥
शिरसि बकुलमालां मालतीभिः समेतां विकसितनवपुष्पैर्यूथिकाकुड्मलैश्च।
विकचनवकदम्बैः कर्णपूरं वधूनां रचयति जलदौघः कान्तवत्काल एषः॥ २५॥
दधति वरकुचाग्रैरुन्नतैर्हारयष्टिं प्रतनुसितदुकूलान्यायतैः श्रोणिबिम्बैः।
नवजलकणसेकादुद्गतां रोमराजीं ललितवलिविभङ्गैर्मध्यदेशैश्च नार्यः॥ २६॥

को उत्कण्ठित करता है॥ १७॥ कमर तक लटकनेवाले बालों मे, सुगन्धित पुष्पों के गहनों से, माला धारण किये हुए स्तनों से, मधुगन्धयुक्त मुखों से स्त्रियाँ विलासियों को रतिकर्म के लिए प्रेरित कर रही हैं॥ १८॥ वर्षाऋतु में नदियाँ बहती हैं, बादल बरसते हैं, मदमत्त हाथी चिंघाड़ते हैं, वनपंक्तियाँ हरी-भरी हो जाती हैं, अपने प्रियजनों से बिछुड़ी हुई स्त्रियाँ बिलखा करती हैं, मयूर नाचते हैं और बन्दर चुपचाप गुफाओं का सहारा ले लेते हैं॥ १९॥ बिजली रूपी लता से तथा इन्द्रधनुष से सुशोभित, जलभार से नम्र मेघ और करधनी आदि की मणियों से सुन्दर रमणियाँ दोनों मिलकर एक साथ प्रवासियों के मन को आकर्षित करते हैं॥ २०॥ आजकल ललनाएँ शिरों में कदम्ब के नवीन परागों से युक्त तथा केतकी के फूलों की मालाएँ रचकर धारण करती हैं। कानों के ऊपर के अलंकारों की जगह अर्जुन की मञ्जरियों के गहने बनाकर धारण करती हैं॥ २१॥ कालागुरु-मिश्रित चन्दनचर्चित शरीरवाली तथा फूलों के आभूषणों से सुवासित केशपाशों को धारण करने वाली अंगनाएँ संध्या समय मेघों की गर्जन सुनकर शीघ्र श्वसुर के घरों से शयनागारों में गमन करती हैं॥ २२॥ नीले कमल के सदृश रङ्गवाले, उन्नत तथा जलभार से लघु एवं मृदु पवन से कम्पित, धीरे-धीरे चलने वाले इन्द्रधनुषधारी मेघों से पथिकों की स्त्रियों का चित्त हरण कर लिया गया हो, ऐसा ज्ञात होता है॥ २३॥ नवीन जल के सेवन से जिसका ताप नष्ट हो गया है, ऐसा यह वनप्रदेश उत्पन्न हुए कदम्बपुष्पों से प्रसन्न हुआ-सा ज्ञात होता है। चारों ओर पवन से प्रचलित पेड की डालियों से नाचता हुआ-सा लगता है तथा केतकी की कलियों से हँसता हुआ-सा दीखता है॥ २४॥ यह वर्षा-समय पति के सदृश ललनाओं के शिरों में मालती के फूलों से युक्त अशोक के पुष्पों की माला धारण कराता है तथा खिली हुई नवीन फूलोंवाली जूही की कलियों से तथा कचनार आदि से रमणियों के कर्णाभरण रचता है॥ २५॥ रमणियाँ ऊँचे तथा उत्तम स्तनों के अग्रभागों से मोती की मालाओं को, बड़े नितम्बों से मफेद सूक्ष्म वस्त्र को, शरीर के मध्य

नवजलकणसङ्गच्छीततामादधानः कुसुमभरनतानां लासकः पादपानाम्।
जनितरुचिरगन्धः केतकीनां रजोभिः परिहरति नभस्वान्प्रोषितानां मनांसि ॥ २७॥
जलभरविनतानामाश्रयोऽस्माकमुच्चैरयमिति जलसेकैस्तोयदास्तोयनम्राः।
अतिशयपरुषाभिर्ग्रीष्मवह्नेः शिखाभिः समुपजनिततापं ह्लादयन्तीव विन्ध्यम्॥ २८॥
बहुगुणरमणीयः कामिनीचित्तहारी तरुविटपलतानां बान्धवो निर्विकारः।
जलदसमय एष प्राणिनां प्राणभूतो दिशतु तव हितानि प्रायशो वाञ्छितानि॥ २९॥

॥ इति महाकविकालिदासकृतौ ऋतुसंहारे प्रावृड्वर्णनं नाम द्वितीयः सर्गः॥

देश की सुन्दर त्रिवली से नवीन जलबिन्दुओं के स्नान से उत्पन्न रोमाञ्च-पंक्ति को धारण करती हैं॥ २६॥ नवीन जलकण के छिड़काव से शीतलता पाता हुआ, फूलों के बोझ से मृदु होते हुए पेड़ों का संपर्कवाला, केतकी के रज से उत्पन्न रुचिर गन्धधारी पवन प्रवासियों के चित्तों को चुरा रहा है॥ २७॥ यह विन्ध्य पर्वत मानो ऊँचे जलभार से नम्र हुए हम (मेघों) का आश्रय है। इसी कारण से अति प्रचंड ग्रीष्म की आग की लपटों से सन्तापित विन्ध्याचल को मानो जल के बोझ से नम्रीभूत मेघगण जल के बिन्दुओं से हर्षित करते हैं (अर्थात् उपकारी प्रत्युपकार करता ही है)॥ २८॥ अनेक सद्गुणों से मनोहर, कामिनियों के चित्तों का हरणकर्ता, वृक्ष-पल्लवादिकों का अकारण बन्धु, प्राणियों का प्राण स्वरूप यह प्रावृट् (वर्षाकाल) आप लोगों को प्रायः अभिलषित फल दे॥ २९॥

इस प्रकार ऋतुसंहार के द्वितीय सर्ग में वर्षाऋतु-वर्णन समाप्त हुआ।

तृतीयः सर्गः

(शरद्वर्णनम्)

काशांशुका विकचपद्ममनोज्ञवक्त्रा सोन्मादहंसरवनूपुरनादरम्या।
आपक्वशालिरुचिरा नतगात्रयष्टिः प्राप्ता शरन्नववधूरिव रूपरम्या॥ १।
काशैर्मही शिशिरदीधितिना रजन्यो हंसैर्जलानि सरितां कुमुदैः सरांसि।
सप्तच्छदैः कुसुमभारनतैर्वनान्ताः शुक्लीकृतान्युपवनानि च मालतीभिः॥ २।
चञ्चन्मनोज्ञशफरीरसनाकलापाः पर्यन्तसंस्थितसिताण्डजपङ्क्तिहाराः।
नद्यो विशालपुलिनान्तनितम्बबिम्बा मन्दं प्रयान्ति समदाः प्रमदा इवाद्य॥ ३।
व्योम क्वचिद्रजतशङ्खमृणालगौरैस्त्यक्ताम्बुभिर्लघुतया शतशः प्रयातैः।
संलक्ष्यते पवनवेगचलैः पयोदै राजेव चामरवरैरुपवीज्यमानः॥ ४।
भिन्नाञ्जनप्रचयकान्ति नभो मनोज्ञं बन्धूकपुष्परचिताऽरुणिता च भूमिः।
वप्राश्च पक्वकलमावृतभूमिभागाः प्रोत्कण्ठयन्ति न मनो भुवि कस्य यूनः॥ ५।
मन्दानिलाकुलितचारुतराग्रशाखः पुष्पोद्गमप्रचयकोमलपल्लवाग्रः।
मत्तद्विरेफपरिपीतमधुप्रसेकश्चित्तं विदारयति कस्य न कोविदारः॥ ६॥
तारागणप्रवरभूषणमुद्वहन्ती मेघावरोधपरिमुक्तशशाङ्कवक्त्रा।
ज्योत्स्नादुकूलममलं रजनी दधाना वृद्धिं प्रयात्यनुदिनं प्रमदेव बाला॥ ७॥
कारण्डवाननविघट्टितवीचिमालाः कादम्बसारसकुलाकुलतीरदेशाः।
कुर्वन्ति हंसविरुतैः परितो जनस्य प्रीतिं सरोरुहरजोरुणितास्तटिन्यः॥ ८॥

काश के कपड़े वाली, प्रफुल्लित कमल के समान मनोरम मुखवाली, मद से प्रादुर्भूत हंसों के ध्वनिरूप नूपुर की ध्वनियों से रमणीय, पके धानों से सुन्दर, कृश-समान यष्टि के शरीर वाली रमणीय नववधू के सदृश शरद्-ऋतु आ गयी।॥ १॥ काश से पृथिवी, शीत किरणों वाले चन्द्र से रात्रियाँ, हंसों से नदियों के जल, कुमुदों से तालाब, सप्तच्छदों के फूलों से नम्र पेडों से वनों के प्रान्तभाग तथा मालती के फूलों से उपवन सफेद-सफेद दिखलायी पड रहे हैं॥ २॥ मुखरित मनोज्ञ छोटी-छोटी मछलियों की करधनीवाली, चारों ओर स्थित सफेद अण्डों से उत्पन्न मालाओंवाली, विस्तीर्ण तटरूपी नितम्बोंवाली नदियाँ उन्मत्त अंगनाओं की तरह मंद-मंद चल रही है॥ ३॥ यत्र-तत्र चाँदी, शंख तथा कमल के समान गौरवर्ण वाले जल छोड देने से हलकेपन से जाते हुए यह आकाश हवा के झोकों से सैकडों मेघों को झकोरते हुए सैकडों चामरों से सेवित राजा के समान दिखलायी पड रहा है।॥ ४॥ इधर-उधर लगे हुए काजल की राशि के तुल्य शोभा वाला मनोरम आकाश तथा बन्धूक के फूलों से पृथिवी लाल-लाल हो रही है। पृथिवी का प्राकार पके धानों से आच्छादित है। भला कौन-सा ऐसा युवक होगा जिसका चित्त इसे देखकर उत्कण्ठित न हो॥ ५॥ मन्द पवन से प्रचालित सुन्दर अग्रशाखाओं वाला, फूलों के प्रादुर्भाव से, कलियों की अधिकता से कोमल पल्लव युक्त अग्रभाग वाला, मन्दोन्मत्त भौंरों के द्वारा पान किया हुआ मधुर रसवाला चमरिक का पेड़ किसके मन को विदीर्ण नहीं करता है॥ ६॥ तारागणरूपी अनेक अलङ्कारों से अलंकृत होती हुई, मेघों से मुक्त चन्द्ररूपी मुखवाली, चाँदनी रूपी उज्ज्वल वस्त्रधारिणी मदोन्मत्ता बाला की तरह इस ऋतु की रातें प्रतिदिन बढती जा रही हैं॥ ७॥ जिनकी तरंगरूपी मालाएँ

नेत्रोत्सवो हृदयहारिमरीचिमालः प्रह्लादकः शिशिरसीकरवारिवर्षी।
पत्युर्वियोगविषदिग्धशरक्षतानां चन्द्रो दहत्यतितरां तनुमङ्गनानाम्॥ ९ ॥
आकम्पयन्फलभरानतशालिजालान्यानर्तयँस्तरुवरान् कुसुमावनम्रान् ।
उत्फुल्लपङ्कजवनां नलिनीं विधुन्वन्यूनां मनश्चलयति प्रसभं नभस्वान्॥ १० ॥
सोन्मादहंसमिथुनैरुपशोभितानि स्वच्छप्रफुल्लकमलोत्पलभूषितानि।
मन्दप्रभातपवनोद्गतवीचिमालान्युत्कण्ठयन्ति सहसा हृदयं सरांसि॥ ११ ॥
नष्टं धनुर्बलभिदो जलदोदरेषु सौदामिनी स्फुरति नाद्य वियत्पताका।
धुन्वन्ति पक्षपवनैर्न नभो बलाकाः पश्यन्ति नोन्नतमुखा गगनं मयूराः॥ १२ ॥
नृत्यप्रयोगरहिताञ्छिखिनो विहाय हंसानुपैति मदनो मधुरप्रगीतान्।
मुक्त्वा कदम्बकुटजार्जुनसर्जनीपान्सप्तच्छदानुपगता कुसुमोद्गमश्रीः॥ १३ ॥
शेफालिकाकुसुमगन्धमनोहराणि स्वस्थस्थिताण्डजकुलप्रतिनादितानि ।
पर्यन्तसंस्थितमृगीनयनोत्पलानि प्रोत्कण्ठयन्त्युपवनानि मनांसि पुंसाम्॥ १४ ॥
कह्लारपद्मकुमुदानि मुहुर्विधुन्वंस्तत्सङ्गमादधिकशीतलतामुपेतः।
उत्कण्ठयत्यतितरां पवनः प्रभाते पत्रान्तलग्नतुहिनाम्बुविधूयमानः॥ १५ ॥
सम्पन्नशालिनिचयावृतभूतलानि स्वस्थस्थितप्रचुरगोकुलशोभितानि।
हंसैः ससारसकुलैः प्रतिनादितानि सीमान्तराणि जनयन्ति नृणां प्रमोदम्॥ १६ ॥
हंसैर्जिता सुललिता गतिरङ्गनानामम्भोरुहैर्विकसितैर्मुखचन्द्रकान्तिः।
नीलोत्पलैर्मदकलानि विलोकितानि भ्रूविभ्रमाश्च रुचिरास्तनुभिस्तरङ्गैः॥ १७ ॥

बत्तखों की चोंचों से दो भागों में बँट गयी हैं, जिनके तटों पर हंस तथा सारस पक्षियों का समूह स्थित है तथा जो कमलों के पराग से रागयुक्त हो गयी हैं, हंसों के कलरव से मुखरित ऐसी नदियाँ किनके मनों को प्रसन्न नहीं कर देतीं?॥ ८॥ नेत्रानंदकर, हृदयहारिणी मणिमाला वाले, हर्षप्रद शीतल जलकणों को बरसानेवाला चन्द्र पतिवियोगरूपी बाणों से विद्ध अवलाओं के शरीरों को प्रतिदिन जला रहा है॥ ९॥ फलों के बोझ से नम्र हुए, धानों की राशियों को कँपाता हुआ, फूलों से झुके हुए कुरबकों के पेड़ों को झकोरता हुआ, खिले हुए कमलवनों को तथा नलिनियों को हिलाता हुआ शरत्कालीन पवन युवकों के हृदयों को खूब मदमत्त बनाता है॥ १०॥ मदविह्वल हंसयुग्मों से सुशोभित, स्वच्छ विकसित कमल से विभूषित, मन्दगतियुक्त प्रभात के पवन से उत्पन्न तरंगरूपी माला वाले तालाब हृदयों को सहसा उत्कण्ठित कर रहे हैं॥ ११॥ मेघों के पेट में इन्द्रधनुष लीन हो गया, आजकल आकाश की ध्वजारूपी बिजली भी नहीं चमकती है, बगुले भी आकाश में नहीं उड़ रहे हैं तथा मोरगण भी आकाश की ओर मुख करके नहीं देखते हैं॥ १२॥ कामदेव नाचने में अयोग्य मोरों को जानकर उन्हें छोड़कर मधुरगानवेत्ता हंसों के पास जा रहा है। पुष्पों की उत्पत्तिश्री कदम्ब, कुटज, अर्जुन, सर्ज तथा नीप आदि वृक्षों को त्यागकर छतिवन के पेड़ में जा रही है॥ १३॥ मनोहर गंधवाले पुष्पों की सुगन्ध से मनोरम, निर्मल पक्षिगणों के कलरवों से निनादित तथा जिनके प्रान्तभाग में हिरणियों के नेत्ररूपी कमल हैं, ऐसे उपवन मनुष्यों के मनों को मोहते हैं॥ १४॥ सौगन्धिक कमल और कुमुद के फूलों को पुनः-पुनः कँपाता हुआ तथा उनके सम्पर्क से अत्यन्त शीतलता प्राप्त करके एवं पत्रों के प्रान्तभागों में स्थित वरफ के जलों को हरता हुआ पवन प्रभात समय में प्राणियों को अत्यन्त उत्कण्ठित करता है॥ १५॥ तैयार हुए धानों के ढेरों से घिरे हुए भूतल, घबड़ाहट रहित (निश्चिन्त) बैठी हुई गायें तथा हंस एवं सारसों के कलरवों से प्रतिध्वनित सीमा के अन्तभाग जनों को हर्षान्वित कर रहे हैं॥ १६॥ रमणियों की सुललित गति

श्यामा लताः कुसुमभारनतप्रवालाः स्त्रीणां हरन्ति धृतभूषणबाहुकान्तिम्।
दन्तावभासविशदस्मितचन्द्रकान्तिं कङ्केलिपुष्परुचिरा नवमालती च॥ १८॥
केशान्तितान्तघननीलविकुञ्चिताग्रानापूरयन्ति वनिता नवमालतीभिः।
कर्णेषु च प्रवरकाञ्चनकुण्डलेषु नीलोत्पलानि विविधानि निवेशयन्ति॥ १९॥
हारैः सचन्दनरसैः स्तनमण्डलानि श्रोणीतटं सुविपुलं रसनाकलापैः।
पादाम्बुजानि कलनूपुरशेखरैश्च नार्यः प्रहृष्टमनसोऽद्य विभूषयन्ति॥ २०॥
स्फुटकुमुदचितानां राजहंसाश्रितानां मरकतमणिभासा वारिणा भूषितानाम्।
श्रियमतिशयरूपां व्योम तोयाशयानां वहति विगतमेघं चन्द्रतारावकीर्णम्॥ २१॥
शरदि कुमुदसङ्गाद्वायवो वान्ति शीता विगतजलदवृन्दा दिग्विभागा मनोज्ञाः।
विगतकलुषमम्भः श्यानपङ्का धरित्री विमलकिरणचन्द्रं व्योम ताराविचित्रम्॥ २२॥
करकमलमनोज्ञाः कान्तसंसक्तहस्ता वदनविजितचन्द्राः काश्चिदन्यास्तरुण्यः।
रचितकुसुमगन्धि प्रायशो यान्ति वेश्म प्रबलमदनहेतोस्त्यक्तसङ्गीतरागाः॥ २३॥
सुरतरसविलासाः सत्सखीभिः समेता असमशरविनोदं सूचयन्ति प्रकामम्।
अनुपममुखरागा रात्रिमध्ये विनोदं शरदि तरुणकान्ताः सूचयन्ति प्रमोदान्॥ २४॥
दिवसकरमयूखैर्बोध्यमानं प्रभाते वरयुवतिमुखाभं पङ्कजं जृम्भतेऽद्य।
कुमुदमपि गतेऽस्तं लीयते चन्द्रबिम्बे हसितमिव वधूनां प्रोषितेषु प्रियेषु॥ २५॥

हंसों द्वारा जीत ली गयी। ललनाओं के चन्द्रमुखों की शोभा विकसित कमलों द्वारा ले ली गयी। मद से चपल नेत्रशोभा नीले कमलों द्वारा हरण कर ली गयी तथा नदियों की सूक्ष्म लहरों द्वारा भ्रूविलास छीन लिये गये॥ १७॥ फूलों के बोझ से लदी हुई श्यामा लता द्वारा स्त्रियों की आभूषणों सहित भुजाओं की शोभा हरण कर ली गयी। कंकेलि फूल मे रुचिर तथा नूतन मालती द्वारा दाँतों की प्रभा से निर्मल मुखचन्द्रकांति हरण कर ली गयी॥ १८॥ वनिताएँ सान्द्र तथा सघन एवं काले और घुँघराले बालों के अग्रभाग में मालती पुष्पों को लगाती हैं। उत्तम स्वर्ण के कुण्डलों से युक्त कानों में अनेक प्रकार के विचित्र नीले कमलों को धारण कर रही हैं॥ १९॥ प्रसन्न चित्तवाली रमणियों द्वारा स्तनमण्डल पर चन्दनरस से युक्त मालाएँ धारण की जा रही हैं तथा करधनियों से विपुल नितम्ब सजाये जा रहे हैं एवं श्रेष्ठ नूपुरों से चरणकमल शोभित किये जा रहे हैं॥ २०॥ स्वच्छ कमलों से व्याप्त तथा राजहंसों से सेवित पन्ने (मरकतमणि) के समान शोभा वाले जल से अलंकृत विपुल जलाशयों की छटा को मेघहीन तथा चन्द्र एवं तारागणों से परिपूर्ण आकाश धारण कर रहा है॥ २१॥ शरद्-ऋतु में फूलों के संस्पर्श से पवन शीतल होकर बहता है। मेघों के न रहने से दिशाएँ स्वच्छ हो गयी हैं। जल विमल तथा कीचड़ रहित पृथ्वी, निर्मल रश्मियों वाला चन्द्र एवं ताराओं से चित्रित आकाश रंग-बिरंगा लग रहा है॥ २२॥ चन्द्रमा से सुन्दर मुखों वाली कुछ दूसरी युवतियाँ कामातुर होने के कारण नाच-गाना छोड़कर अपने कमल के समान सुकुमार हाथों को अपने प्रिय के हाथों में डालकर उस घर में जा रही हैं जहाँ सुगन्धित सेज बिछी हुई है॥ २३॥ शरद्-ऋतु में सहवास-रस लेने वाली, अनुपम मुखराग करने वाली युवतियाँ जब अपनी सखियों के साथ बैठती हैं, तो परस्पर रात्रि में लिये गये सुखों का विशद वर्णन किया करती हैं॥ २४॥ प्रभात में सूर्यकिरणों मे प्रफुल्लित उत्तम अंगना के मुख के तुल्य कान्तिवाला यह पद्म प्रफुल्लित हो रहा है। रमणों के विदेश जाने पर रमणियों के हास्य के तुल्य क्षीण कैरव का पुष्प भी चन्द्रबिम्ब के अस्त हो जाने पर क्षीण हो रहा है॥ २५॥ पद्मों में अपनी प्रिया के नीले नयनों की शोभा जानकर, प्रमत्त हंसों के कलरवों में अपनी भार्या के सुवर्ण की करधनी की ध्वनि समझकर, दुपहरिया के फूलों

असितनयनलक्ष्मीं लक्षयित्वोत्पलेषु क्वणितकनककाञ्चीं मत्तहंसस्वनेषु।
अधररुचिरशोभां बन्धुजीवे प्रियाणां पथिकजन इदानीं रोदिति भ्रान्तचित्तः॥२६॥
स्त्रीणां विहाय वदनेषु शशाङ्कलक्ष्मीं काम्यं च हंसवचनं मणिनूपुरेषु।
बन्धूककान्तिमधरेषु मनोहरेषु क्वापि प्रयाति सुभगा शरदागमश्रीः॥२७॥
विकचकमलवक्त्रा फुल्लनीलोत्पलाक्षी विकसितनवकाशश्वेतवासो वसाना।
कुमुदरुचिरकान्तिः कामिनीवोन्मदेयं प्रतिदिशतु शरद्वश्चेतसः प्रीतिमग्र्याम्॥२८॥

॥ इति महाकविकालिदासकृतौ ऋतुसंहारे शरद्वर्णनं नाम तृतीयः सर्गः॥

में कान्ता के अधरों की समानता समझकर पथिक-गण विमूढ होकर रो रहे हैं॥ २६॥ सुन्दर शरद् की शोभा चन्द्र की शोभा को स्त्रियों के मुखों में, रमणीय हंस के कलरवों को मणिनूपुरों के शब्दों में और दुपहरिया के फूलों की शोभा को मनोहर अधरों में छोड़कर कहीं जा रही है॥ २७॥ प्रफुल्लित कमल के समान मुखवाली, विकसित नीलकमल के तुल्य नयनों वाली, खिले हुए नवीन काश के फूलों के समान सफेद कपड़े वाली, कुमुद के समान सुन्दर रूपवाली मदोन्मत्त नायिका की तरह यह शरदृतु आपकी प्रीति को बढायें॥ २८॥

इस प्रकार ऋतुसंहार के तृतीय सर्ग में शरद्-ऋतु-वर्णन समाप्त हुआ।

चतुर्थः सर्गः

(हेमन्तवर्णनम्)

नवप्रवालोद्गमसस्यरम्यः प्रफुल्ललोध्रः परिपक्वशालिः ।
विलीनपद्मः प्रपतत्तुषारो हेमन्तकालः समुपागतोऽयम् ॥ १ ॥
मनोहरैश्चन्दनरागगौरैस्तुषारकुन्देन्दुनिभैश्च हारैः ।
विलासिनीनां स्तनशालिनीनां नामलङ्क्रियन्ते स्तनमण्डलानि ॥ २ ॥
न बाहुयुग्मेषु विलासिनीनां प्रयान्ति सङ्गं वलयाङ्गदानि ।
नितम्बविम्बेषु नवं दुकूलं तन्वंशुकं पीनपयोधरेषु ॥ ३ ॥
काञ्चीगुणैः काञ्चनरत्नचित्रैर्नो भूषयन्ति प्रमदा नितम्बान् ।
न नूपुरैर्हंसरुतं भजद्भिः पादाम्बुजान्यम्बुजकान्तिभाञ्जि ॥ ४ ॥
गात्राणि कालीयकचर्चितानि सपत्रलेखानि मुखाम्बुजानि ।
शिरांसि कालागुरुधूपितानि कुर्वन्ति नार्यः सुरतोत्सवाय ॥ ५ ॥
रतिश्रमक्षामविपाण्डुवक्त्राः सम्प्राप्तहर्षाभ्युदयास्तरुण्यः ।
हसन्ति नोच्चैर्दशनाग्रभिन्नान्प्रपीड्यमानानधरानवेक्ष्य ॥ ६ ॥
पीनस्तनोरःस्थलभागशोभामासाद्य तत्पीडनजातखेदः ।
तृणाग्रलग्नैस्तुहिनैः पतद्भिराक्रन्दतीवोषसि शीतकालः ॥ ७ ॥
प्रभूतशालिप्रसवैश्चितानि मृगाङ्गनायूथविभूषितानि ।
मनोहरक्रौञ्चनिनादितानि सीमान्तराण्युत्सुकयन्ति चेतः ॥ ८ ॥
प्रफुल्लनीलोत्पलशोभितानि सोन्मादकादम्बविभूषितानि ।
प्रसन्नतोयानि सुशीतलानि सरांसि चेतांसि हरन्ति पुंसाम् ॥ ९ ॥

नूतन पल्लवों के उद्गम तथा फूलों से मनोहर, फूल गये हैं लोध्रकुसुम जिसमें तथा परिपक्व हो गये हैं धान जिसमें और लुप्त हो गये हैं कमल जिसमें, ऐसा तुषार गिराने वाला यह हेमन्तऋतु का समय आ गया है ॥ १ ॥ आजकल प्रशस्त स्तनोंवाली विलासिनियों के मनोहर चन्दन के राग से, बरफ एवं कुन्द और चन्द्र की प्रभा के समान मालाओं से रमणियाँ अपने कुचमण्डलों को सुशोभित करती हैं ॥ २ ॥ इस समय विलासवती नारियों के बाहुओं में कंकण, बाजूबन्द आदि नहीं हैं। जघनस्थलों पर नूतन वस्त्र हैं, किन्तु पीन स्तनों पर बारीक वस्त्र ही हैं ॥ ३ ॥ प्रमदाएँ अपने नितम्बों को सुवर्ण तथा मणियों से जड़ित करधनियों से नहीं सजातीं तथा हंसों के शब्दों के अनुकरणकारी नूपुरों से पद्म की छवि को धारण करने वाले अपने चरणकमलों को भी नहीं सजाती हैं ॥ ४ ॥ नारियाँ रतिक्रीडा के लिए शरीर को कालीयक चूर्ण से तथा पत्र-रचनाओं से मुखपद्मों को और काले अगर से अपने शिरों के केशों को सुगन्धित कर रही हैं ॥ ५ ॥ कामक्रीडा से खिन्न मुखवाली तरुणियाँ हर्ष का काल पाकर भी रागरञ्जित अपने अधरोष्ठों को दन्तक्षत युक्त देखकर जोर से नहीं हँसती हैं ॥ ६ ॥ पीन कुचों वाली छाती की शोभा प्राप्त कर तथा कुचपीडन से क्लेश प्राप्त कर यह शीतकाल गिरते हुए तृणों के अग्रभागों में संलग्न बरफ से प्रभातकाल में मानो रो रहा है ॥ ७ ॥ धानों की बहुत बालों से पूर्ण, मृगी-गणों के समुदाय से विभूषित, मनोहर क्रौञ्चपक्षियों के कलरवों से ध्वन्यमान सीमा-प्रदेश मन को पुलकित कर रहे हैं ॥ ८ ॥ फूले हुए

मार्गं समीक्ष्यातिनिरस्तनीरं प्रवासखिन्नं पतिमुद्वहन्त्यः।
अवेक्ष्यमाणा हरिणेक्षणाक्ष्यः प्रबोधयन्तीव मनोरथानि॥ १०॥
पाकं व्रजन्ती हिमजातशीतैराधूयमाना सततं मरुद्भिः।
प्रिये प्रियङ्गुः प्रियविप्रयुक्ता विपाण्डुतां याति विलासिनीव॥ ११॥
पुष्पासवामोदसुगन्धिवक्त्रो निःश्वासवातैः सुरभीकृताङ्गः।
परस्पराङ्गव्यतिषङ्गशायी शेते जनः कामरसानुविद्धः॥ १२॥
दन्तच्छदैः सव्रणदन्तचिह्नैः, स्तनैश्च पाण्यग्रकृताभिलेखैः।
संसूच्यते निर्दयमङ्गनानां रतोपभोगो नवयौवनानाम्॥ १३॥
काचिद्विभूषयति दर्पणसक्तहस्ता बालातपेषु वनिता वदनारविन्दम्।
दन्तच्छदं प्रियतमेन निपीतसारं दन्ताग्रभिन्नमवकृष्य निरीक्षते च॥ १४॥
अन्या प्रकामसुरतश्रमखिन्नदेहा रात्रिप्रजागरविपाटलनेत्रपद्मा।
स्रस्तांसदेशलुलिताकुलकेशपाशा निद्रां प्रयाति मृदुसूर्यकराभितप्ता॥ १५॥
निर्माल्यदाम परिमुक्तमनोज्ञगन्धं मूर्ध्नोऽपनीय घननीलशिरोरुहान्ताः।
पीनोन्नतस्तनभरानतगात्रयष्ट्यः कुर्वन्ति केशरचनामपरास्तरुण्यः॥ १६॥
अन्या प्रियेण परिभुक्तमवेक्ष्य गात्रं हर्षान्विता विरचिताधरचारुशोभा।
कूर्पासकं परिदधाति नखक्षताङ्गी व्यालम्बिनीललालितालककुञ्चिताक्षी॥ १७॥
अन्याश्चिरं सुरतकेलिपरिश्रमेण खेदं गताः प्रशिथिलीकृतगात्रयष्ट्यः।
संहृष्यमाणपुलकोरुपयोधरान्ता अभ्यञ्जनं विदधति प्रमदाः सुशोभाः॥ १८॥

नीलकमलों से सुशोभित, कलरव करते हुए कलहंसों से युक्त, निर्मल तथा शीतल जलवाले सरोवर युवकों के चित्तों को प्रफुल्लित कर रहे हैं॥ ९॥ जिनके पति परदेश गये हैं वे मृगनयनी स्त्रियाँ जब मार्गों को कीचड़ रहित देखती हैं, तो वे अपने परदेशी पतियों के आने की बाट जोहती हुई अपने चिर-संचित मनोरथों की अब पूर्ति होगी, मानो ऐसी आशा करने लगती हैं॥ १०॥ हे प्रिये! तुषार के शीत से पाक को प्राप्त तथा निरन्तर पवन-वेग से कम्पित यह प्रियङ्गुलता पतिवियुक्ता विलासिनी के समान पाण्डुरंग की हो रही है॥ ११॥ फूलों के रसों की सुगन्ध से सुवासित मुखवाला, श्वासों के पवन से सुवासित शरीरवाला, कामबाणों से बिंधा हुआ कामीजन परस्पर देह के स्पर्श-लोभ से सो रहा है॥ १२॥ दन्तक्षतों से तथा हाथों के नाखूनों से स्तनों पर के चिह्नों से नवीन युवतियों के साथ निर्दय रति-विलास हुआ है, ऐसा जाना जाता है॥ १३॥ कोई बाला प्रभात में अपने हाथों में दर्पण (शीशे) को लेकर अपने मुखकमल को सजाती हैं तथा अपने प्रियतम द्वारा दाँतों के अग्रभागों से पीये गये रसवाले अधरोष्ठों के क्षतों को इधर-उधर कर देख रही हैं॥ १४॥ कोई रमणी अत्यन्त रति के श्रम से शिथिल शरीरवाली रात में जागने से जिसके नेत्रकमल लाल हो गये हैं तथा जिनके कन्धों पर केश-पाश बिखर रहे हैं, वे रमणियाँ प्रभात में सूर्य की हलकी गरम किरणों से सन्तुष्ट होकर निद्रा ले रही हैं॥ १५॥ घने तथा काले बालोंवाली, परिपुष्ट तथा उन्नत स्तनों से जिनकी छाती झुक हो गयी है वे तरुणियाँ जिन फूलों से गन्ध निकल चुकी है ऐसे फूलों की मालाओं को शिर से उतार कर अपने बालों को फिर से सँवार रही हैं॥ १६॥ कोई-कोई बाला अपनी देह को अपने पति से उपभुक्त देखकर आनन्दित होकर, अधरों तथा कपोलों की रचना करती हुई वह नखक्षतांगी सुन्दर अलकावाली तथा तिरछी नजरोंवाली चोली पहन रही है॥ १७॥ रतिक्रीड़ा के परिश्रम से चिरकाल तक शिथिल शरीरवाली तथा खिन्न देहवाली, रोमाञ्चयुक्त परिपुष्ट जाँघों तथा पीन स्तनों को धारण करने वाली, सुन्दर शोभावाली कोई-कोई रमणियाँ

बहुगुणरमणीयो योषितां चित्तहारी परिणतबहुशालिव्याकुलग्रामसीमा।
विनिपततुषारः क्रौञ्चनादोपगीतः प्रदिशतु हिमयुक्तः काल एषः सुखं वः ॥ १९ ॥

॥ इति महाकविकालिदासकृतौ ऋतुसंहारे हेमन्तवर्णनं नाम चतुर्थः सर्गः ॥

सुगन्धित तैल आदि मर्दन कर रही हैं॥ १८॥ अनेक गुणों से रमणीय, अङ्गनाओं के चित्तों को हरनेवाला, परिपक्व धानों से ग्रामों के सीमाओं की शोभा बढानेवाला, चारों ओर पाला पडा, क्रौञ्चपक्षियों के गीतों से व्याप्त, बरफयुक्त यह हेमन्तऋतु आप सबको सुख प्रदान करे॥ १९॥

इस प्रकार ऋतुसंहार के चतुर्थ सर्ग में हेमन्तऋतु-वर्णन समाप्त हुआ।

पञ्चमः सर्गः

(शिशिरवर्णनम्)

प्ररूढशालीक्षुचयावृतक्षितिं क्वचित्स्थितक्रौञ्चनिनादराजितम्।
प्रकामकामं प्रमदाजनप्रियं वरोरु! कालं शिशिराह्वयं शृणु॥ १॥
निरुद्धवातायनमन्दिरोदरं हुताशनो भानुमतो गभस्तयः।
गुरूणि वासांस्यबलाः सयौवनाः प्रयान्ति कालेऽत्र जनस्य सेव्यताम्॥ २॥
न चन्दनं चन्द्रमरीचिशीतलं न हर्म्यपृष्ठं शरदिन्दुनिर्मलम्।
न वायवः सान्द्रतुषारशीतला जनस्य चित्तं रमयन्ति साम्प्रतम्॥ ३॥
तुषारसङ्घातनिपातशीतलाः शशाङ्कभाभिः शिशिरीकृताः पुनः।
विपाण्डुतारागणचारुभूषणा जनस्य सेव्या न भवन्ति रात्रयः॥ ४॥
गृहीतताम्बूलविलेपनस्रजः पुष्पासवामोदितवक्त्रपङ्कजाः।
प्रकामकालागुरुधूपवासितं विशन्ति शय्यागृहमुत्सुकाः स्त्रियः॥ ५॥
कृतापराधान् बहुशोऽभि तर्जितान् सवेपथून् साध्वसलुप्तचेतसः।
निरीक्ष्य भर्तॄन्सुरताभिलाषिणः स्त्रियोऽपराधान्समदा विसस्मरुः॥ ६॥
प्रकामकामैर्युवभिः सनिर्दयं निशासु दीर्घास्वभिरामिताश्चिरम्।
भ्रमन्ति मन्दं श्रमखेदितोरवः क्षपावसाने नवयौवनाः स्त्रियः॥ ७॥
मनोज्ञकूर्पासकपीडितस्तनाः सरागकौशेयकभूषितोरवः।
निवेशितान्तःकुसुमैः शिरोरुहैर्विभूषयन्तीव हिमागमं स्त्रियः॥ ८॥

हे सुन्दर जाँघोंवाली प्रिये! पके हुए धान तथा इक्षुओं के खेतों से मनोहर कहीं-कहीं वृक्षों की छाया में बैठे हुए क्रौञ्चपक्षियों के कलरवों से शोभायमान, प्रमदाजनों को प्रिय और अत्यन्त कामवर्धक इस शिशिरऋतु को सुनो॥ १॥ आजकल बन्द खिडकियों के भवन, अग्नि एवं सूर्य की किरणें और मोटे कपड़े तथा युवती स्त्रियाँ जनों के लिए सेवनीय होती हैं॥ २॥ आजकल चन्द्रकिरणों के समान शीतल चन्दन तथा शरत्-चन्द्र से धवलित छतें एवं खूब बरफ से शीतल पवन मनुष्यों के चित्तों को आनन्दित नहीं करते॥ ३॥ बरफ समूह से तथा पुनः चन्द्ररश्मियों से शीतल की हुई रातें, जो सफेद तारागणों तथा आभूषणों से अलंकृत हैं, वे किन मनुष्यों को हर्षदायिनी नहीं होती हैं॥ ४॥ पान तथा इत्रों से परिपूरित मालाओं को लिये हुए तथा सुखदायी पुष्पासव से सुवासित मुख-कमलवाली रमणियाँ काला अगर से खूब सुगन्धित किये हुए शयनागारों में उत्कण्ठा से घुस रही हैं॥ ५॥ मदोन्मत्त, सुरतक्रीडा को चाहनेवाली रमणियाँ परस्त्रीगमनकारी अपराधी अनेक बार ताडित, कम्पित, भय से मन्दचेतनवाले अपने पतियों को देखकर उनके अपराधों को भूल गयी हैं॥ ६॥ अति कामपीडित युवकों से शीतकाल की बड़ी-बड़ी रात्रियाँ निर्दयतापूर्वक चिरकाल तक भोगी हुई तथा रतिकेलि के परिश्रम से खिन्न जाँघोंवाली नवीन युवतियाँ रात के बीतने पर धीरे-धीरे विचरण कर रही हैं॥ ७॥ मनोहारिणी चोलियों से कसे हुए कुचोंवाली, रंगे हुए रेशमी कपड़ों से युक्त जाँघोंवाली नायिकाएँ, अपने बालों के बीच में फूलों को धारण किये हुए स्त्रियाँ मानो शिशिर को शोभायमान कर रही हैं॥ ८॥ विलासिनी स्त्रियों द्वारा कुंकुमराग

पयोधरैः कुङ्कुमरागपिञ्जरैः सुखोपसेव्यैर्नवयौवनोष्मभिः।
विलासिनीभिः परिपीडितोरसः स्वपन्ति शीतं परिभूय कामिनः॥ ९॥
सुगन्धिनिःश्वासविकम्पितोत्पलं मनोहरं कामरतिप्रबोधकम्।
निशासु हृष्टाः सह कामिभिः स्त्रियः पिबन्ति मद्यं मदनीयमुत्तमम्॥ १०॥
अपगतमदरागा योषिदेका प्रभाते कृतनिविडकुचाग्रा पत्युरालिङ्गनेन।
प्रियतमपरिभुक्तं वीक्षमाणा स्वदेहं व्रजति शयनवासाद्वासमन्यं हसन्ती॥ ११॥
अगुरुसुरभिधूपामोदितं केशपाशं गलितकुसुममालं वहन्ती कुञ्चिताग्रम्।
त्यजति गुरुनितम्बा निम्ननाभिःसुमध्या उषसि शयनमन्या कामिनी चारुशोभाम्॥ १२॥
कनककमलकान्तैश्चारुताम्राधरोष्ठैः श्रवणतटनिषक्तैः पाटलोपान्तनेत्रैः।
उषसि वदनबिम्बैरंससंसक्तकेशैः श्रिय इव गृहमध्ये संस्थिता योषितोऽद्य॥ १३॥
पृथुजघनभरार्ताः किञ्चिदानम्रमध्याः स्तनभरपरिखेदान्मन्दमन्दं व्रजन्त्यः।
सुरतसमयवेशं नैशमाशु प्रहाय दधति दिवसयोग्यं वेषमन्यास्तरुण्यः॥ १४॥
नखपदचितभागान्वीक्षमाणाः स्तनान्तानधरकिसलयाग्रं दन्तभिन्नं स्पृशन्त्यः।
अभिमतरतवेशं नन्दयन्त्यस्तरुण्यः सवितुरुदयकाले भूषयन्त्याननानि॥ १५॥
प्रचुरगुडविकारः स्वदुशालीक्षुरम्यः प्रबलसुरतकेलिर्जातकन्दर्पदर्पः।
प्रियजनरहितानां चित्तसन्तापहेतुः शिशिरसमय एष श्रेयसे वोऽस्तु नित्यम्॥ १६॥

॥ इति महाकविकालिदासकृतौ ऋतुसंहारे शिशिरवर्णनं नाम पञ्चमः सर्गः॥

से पीले किये हुए, सुख से भोगने योग्य नवीन तरुणतारूप कुचों से पीड़ित अन्तःकरणवाले विलासीजन शीत का तिरस्कार कर शयन कर रहे हैं॥ ९॥ सुवासित श्वास से कम्पित कमलवाले, मनोहर कामक्रीड़ा के प्रबोधक, उत्तम कामवासना को उद्दीप्त करने वाले मद्य को वल्लभाएँ वल्लभों के साथ रात में हर्षित होकर पीती हैं॥ १०॥ प्रभात में मदराग रहित कोई स्त्री पति के आलिंगन से जिसके कुचाग्र मीसे गये हैं, वह अपनी देह को पति से उपभुक्त देखकर हँसती हुई केलिगृह मे अन्य गृह में चली जा रही है॥ ११॥ अगर की सुगन्धवाली धूप से सुवासित जूड़ों से मोहित तथा जिसकी माला बिखर गयी है एवं केश टेढे-मेढ़े हो गये हैं और जिसकी पतली कमर है तथा बडे-बडे नितम्बोंवाली एवं गहरी नाभिवाली कोई कामिनी प्रभात में शयन को छोड रही है॥ १२॥ सुन्दर लाल ओठोंवाली, सोने के कमलों के समान सुन्दर, कानों के समीप तक गये हुए लाल नेत्रप्रान्तों से तथा कन्धों पर चिपके हुए बालों से विभूषित स्त्रियाँ सुबह गृहलक्ष्मी के समान प्रतीत होती हैं॥ १३॥ विशाल जाँघों के भार से पीड़ित, जरा पतली मध्यभागवाली, कुचों के भार से क्लेशित होकर धीरे-धीरे चलनेवाली कोई बाला रात्रि के रतिकालीन वेश को जल्दी छोड़कर दिन के लायक वेश धारण करती है॥ १४॥ स्तनों पर के नखक्षतों को देखती हुई, व्रणों का संस्पर्श करती हुई, अभिलषित रस की प्राप्ति से आनन्दित होती हुई कोई-कोई युवतियाँ प्रातःकाल अपने मुखों को सजाती हैं॥ १५॥ गुड़ से बने हुए विविध भोज्य पदार्थ, स्वादु चावल, ईख इस समय पर्याप्त मिलते हैं। प्रबल रतिक्रीड़ा से काम के अभिमान का उत्पादक, प्रियजनों के विरहियों के चित्तों को सन्ताप देने वाला यह शिशिर का काल आप लोगों का सर्वदा कल्याण करें॥ १६॥

इस प्रकार ऋतुसंहार के पञ्चम सर्ग में शिशिर-वर्णन समाप्त हुआ।

षष्ठः सर्गः

(वसन्तवर्णनम्)

प्रफुल्लचूताङ्कुरतीक्ष्णसायको द्विरेफमालाविलसद्धनुर्गुणः।
मनांसि भेत्तुं सुरतप्रसङ्गिनां वसन्तयोद्धा समुपागतः प्रिये!॥ १॥
द्रुमाः सपुष्पाः सलिलं सपद्मं स्त्रियः सकामाः पवनः सुगन्धिः।
सुखाः प्रदोषा दिवसाश्च रम्याः सर्वं प्रिये! चारुतरं वसन्ते॥ २॥
ईषत्तुषारैः कृतशीतहर्म्यः सुवासितं चारु शिरश्च चम्पकैः।
कुर्वन्ति नार्योऽपि वसन्तकाले स्तनं सहारं कुसुमैर्मनोहरैः॥ ३॥
वापीजलानां मणिमेखलानां शशाङ्कभासां प्रमदाजनानाम्।
चूतद्रुमाणां कुसुमान्वितानां ददाति सौभाग्यमयं वसन्तः॥ ४॥
कुसुम्भरागारुणितैर्दुकूलैर्नितम्बबिम्बानि विलासिनीनाम्।
तन्वंशुकैः कुङ्कुमरागगौरैरलङ्क्रियन्ते स्तनमण्डलानि॥ ५॥
कर्णे सु योग्यं नवकर्णिकारं चलेषु नीलेष्वलकेष्वशोकम्।
पुष्पं च फुल्लं नवमल्लिकायाः प्रयान्ति कान्तिं प्रमदाजनानाम्॥ ६॥
स्तनेषु हाराः सितचन्दनार्द्रा भुजेषु सङ्गं वलयाङ्गदानि।
प्रयान्त्यनङ्गातुरमानसानां नितम्बिनीनां जघनेषु काञ्च्यः॥ ७॥
सपत्रलेखेषु विलासिनीनां वक्त्रेषु हेमाम्बुरुहोपमेषु।
रत्नान्तरे मौक्तिकसङ्गरम्यः स्वेदागमो विस्तरतामुपैति॥ ८॥
उच्छ्वासयन्त्यः श्लथबन्धनानि गात्राणि कन्दर्पसमाकुलानि।
समीपवर्तिष्वधुना प्रियेषु समुत्सुका एव भवन्ति नार्यः॥ ९॥

हे प्रिये! प्रफुल्लित आम के वृक्षों के अंकुररूपी तेज बाणवाला, भौंरों की माला रूपी धनुष की डोरीवाला यह वसन्त समयरूपी वीर विलासियों के चित्तों को विदीर्ण करने के लिए आ गया॥१॥ हे प्रिये! फूलों से युक्त पेड़, कमलों से युक्त जल, कामयुक्ता नारियाँ, सुगन्धि से युक्त पवन, सुखद सायंकाल, रमणीय दिवस, वसन्त ऋतु में उक्त सभी मनोहर मालूम होते हैं॥ २॥ वसन्त ऋतु में घर के छतों पर ठंडी ओस छा गयी है, जूडा में लगे हुए चम्पा के फूलों से सिर महकने लगा है तथा स्त्रियाँ अपने स्तनों पर मनोहर फूलों की मालाएँ धारण करने लगी हैं॥ ३॥ यह वसन्त बावलियों के जलों को, मणियों की करधनियों को, चन्द्रप्रभावाली अङ्गनाओं को तथा फूलों से झुके हुए आम के वृक्षों को सुभगता प्रदान करता है॥ ४॥ विलासवती रमणियों के नितम्बों को कुसुम रंग से रंगे हुए कपड़ों से तथा कुचमंण्डलों को कुङ्कुम के रंग से, रेशमी वस्त्रों से आजकल सजाया जाता है॥ ५॥ इस ऋतु में युवतियों के कानों में नूतन कनैल के फूल के गहने, चंचल काली अलकों में लगे हुए अशोक के फूल प्रफुल्लित चमेली के फूलों की प्रभा के समान मालूम होते हैं॥ ६॥ मदनातुर नितम्बिनियों के कुचों में सफेद चन्दन से सिक्त मालाएँ तथा बाँहों में बाजूबन्द और कंगन एवं जघनस्थलों पर करधनी आजकल सुशोभित हो रही है॥ ७॥ हे प्रिये! कामवती सुन्दरियों के पत्रादि रचनावाले स्वर्ण-कमल के समान मुखों पर मणियों के मध्य में मोतियों के सम्पर्क से मनोहर पसीना फैल रहा है॥ ८॥ आजकल

तनूनि पाण्डूनि मदालसानि मुहुर्मुहुर्जृम्भणतत्पराणि।
अङ्गान्यनङ्गः प्रमदाजनस्य करोति लावण्यससम्भ्रमाणि॥ १०॥
छायां जनः समभिवाञ्छति पादपानां नक्तं तथेच्छति पुनः किरणं सुधांशोः।
हर्म्यं प्रयाति शयितुं सुखशीतलञ्च कान्तां च गाढमुपगूहति शीतलत्वात्॥ ११॥
नेत्रेषु लोलो मदिरालसेषु गण्डेषु पाण्डुः कठिनः स्तनेषु।
मध्येषु निम्नो जघनेषु पीनः स्त्रीणामनङ्गो बहुधा स्थितोऽद्य॥ १२॥
अङ्गानि निद्रालसविभ्रमाणि वाक्यानि किञ्चिन्मदिरालसानि।
सूक्ष्मेपजिह्मानि च वीक्षितानि चकार कामः प्रमदाजनानाम्॥ १३॥
प्रियङ्गुकालीयककुङ्कुमाक्तं स्तनेषु गौरेषु विलासिनीभिः।
आलिप्यते चन्दनमङ्गनाभिर्मदालसाभिर्मृगनाभियुक्तम्॥ १४॥
गुरूणि वासांसि विहाय तूर्णं तनूनि लाक्षारसरञ्जितानि।
सुगन्धिकालागुरुधूपितानि धत्ते जनः काममदालसाङ्गः॥ १५॥
पुंस्कोकिलश्चूतरसासवेन मत्तः प्रियां चुम्बति रागहृष्टः।
कूजन्द्विरेफोऽप्यथमम्बुजस्थः प्रियं प्रियायाः प्रकरोति चाटु॥ १६॥
ताम्रप्रवालस्तवकावनम्राश्चूतद्रुमाः पुष्पितचारुशाखाः।
कुर्वन्ति कामं पवनावधूताः पर्युत्सुकं मानसमङ्गनानाम्॥ १७॥
आमूलतो विद्रुमरागताम्रं सपल्लवाः पुष्पचयं दधानाः।
कुर्वन्त्यशोका हृदयं सशोकं निरीक्ष्यमाणा नवयौवनानाम्॥ १८॥

स्त्रियों, जिनके बन्धन शिथिल हो गये हैं तथा कामदेव से क्लेशित अपने अङ्गों को फड़फड़ाती हुई पतियों के पास होने पर भी उनसे मिलने के लिए उत्सुक हो उठती हैं॥ ९॥ आजकल कामदेव प्रमदाओं की देहों को कृश, श्वेत रक्तवाला, जड़तुल्य बार-बार आलस्य से जंभाई लेने में तत्पर तथा सौन्दर्य से वेगवान् बना रहा है॥ १०॥ इन दिनों लोग दिन में पेड़ों की छाया का आश्रय लिया करते हैं तथा रात में चन्द्रमा की किरणों का आनन्द लेना चाहते हैं, अतएव सोने के लिए चन्द्रकिरणों से मुदित एवं शीतल प्रासाद-शिखर पर चले जाते हैं, ठंडा लगने पर कान्ता का गाढ आलिंगन करते हैं॥ ११॥ आजकल स्त्रियों में कामदेव निम्नोक्त अनेक भाँति से विद्यमान है— मदिरा से अलसाये नयनों में चञ्चलता, गालों पर पाण्डुरता, स्तनों पर कठिनता, कमर में गहराई आदि-आदि रीति से॥ १२॥ आजकल कामदेव स्त्रियों के शरीरों को निद्रा के आलस्य से विभ्रमयुक्त, बोलियों को कुछ मद से चाटुतायुक्त तथा नेत्रों को भौंहों के विक्षेप से कुटिलतायुक्त बनाये है॥ १३॥ आजकल मदों से अलसाती हुई स्त्रियों द्वारा गौरवर्ण के कुचों पर अगर, केशर तथा कुङ्कुम से परिपूर्ण कस्तूरीयुक्त चन्दन का लेप किया जा रहा है॥ १४॥ काममद से अलसाये हुए जन भारी कपड़ों को छोड़कर शरीरों पर लाख के रङ्ग से हल्के रङ्गे हुए सुगन्धित काले अगर से सुवासित कपड़ों को पहनते हैं॥ १५॥ यह कोकिलपक्षी आम के रसासव से उन्मत्त होकर राग से हर्षित होकर अपनी प्रिया के मुखों को चूमता है तथा कमलों पर बैठे हुए ये भ्रमरगण भी गुञ्जार करते हुए अपनी प्रियाओं को (भ्रमरियों को) प्यार कर रहे हैं॥ १६॥ लाल-लाल पल्लवों के गुच्छों से नम्र, फूलों से युक्त सुन्दर डालियोंवाले पवन के झकोरों से कम्पित ये आम के पेड़ नारियों के चित्तों को अत्यन्त उत्कण्ठित करते हैं॥ १७॥ जड़ों तक मूँगे के समान रक्तवर्ण पत्तों के सहित फूलों के ढेर को धारणकर्ता स्त्रियों द्वारा देखे गये अशोक के वृक्ष नवयुवतियों के हृदयों को शोकान्वित करते

मत्तद्विरेफपरिचुम्बितचारुपुष्पा मन्दानिलाकुलितनम्रमृदुप्रवालाः।
कुर्वन्ति कामिमनसां सहसोत्सुकत्वं चूताभिरामकलिकाः समवेक्ष्यमाणाः॥ १९॥
कान्तामुखद्युतिजुषामचिरोद्गतानां शोभां परां कुरबकद्रुममञ्जरीणाम्।
दृष्ट्वा प्रिये! सहृदयस्य भवेन्न कस्य कन्दर्पबाणपतनव्यथितं हि चेतः॥ २०॥
आदीप्तवह्निसदृशैर्मरुताऽवधूतैः सर्वत्र किंशुकवनैः कुसुमावनम्रैः।
सद्यो वसन्तसमयेन समाचितेयं रक्तांशुका नववधूरिव भाति भूमिः॥ २१॥
किं किंशुकैः शुकमुखच्छविभिर्न भिन्नं किं कर्णिकारकुसुमैर्न कृतं नु दग्धम्।
यत्कोकिलः पुनरयं मधुरैर्वचोभिर्यूनां मनः सुवदनानिहितं निहन्ति॥ २२॥
पुंस्कोकिलैः कलवचोभिरुपात्तहर्षैः कूजद्भिरुन्मदकलानि वचांसि भृङ्गैः।
लज्जान्वितं सविनयं हृदयं क्षणेन पर्याकुलं कुलगृहेऽपि कृतं वधूनाम्॥ २३॥
आकम्पयन्कुसुमिताः सहकारशाखा विस्तारयन्परभृतस्य वचांसि दिक्षु।
वायुर्विवाति हृदयानि हरन्नराणां नीहारपातविगमात्सुभगो वसन्ते॥ २४॥
कुन्दैः सविभ्रमवधूहसितावदातैरुद्द्योतितान्युपवनानि मनोहराणि।
चित्तं मुनेरपि हरन्ति निवृत्तरागं प्रागेव रागमलिनानि मनांसि यूनाम्॥ २५॥
आलम्बिहेमरसनाः स्तनसक्तहाराः कन्दर्पदर्पशिथिलीकृतगात्रयष्ट्यः।
मासे मधौ मधुरकोकिलभृङ्गनादैर्नार्यो हरन्ति हृदयं प्रसभं नराणाम्॥ २६॥
नानामनोज्ञकुसुमद्रुमभूषितान्तान्हृष्टान्यपुष्टनिनदाकुलसानुदेशान्।
शैलेयजालपरिणद्धशिलातलौघान्दृष्ट्वा जनः क्षितिभृतो मुदमेति सर्वः॥ २७॥

हैं॥ १८॥ हे प्रिये! मदवाले भौंरों द्वारा चूमी हुई, कोमल आकृतिवाली, मन्द-मन्द पवन से आन्दोलित कोमल-कोमल आम की मञ्जरीवाली नयी लताओं को देखने से अकस्मात् कामीपुरुषों के मन अपनी प्रियतमाओं से मिलने के लिए उत्कंठित हो जाते हैं॥ १९॥ हे प्रिये! रमणियों के मुखों की कान्तियों को चुरानेवाली, कुछ-कुछ खिली हुई कुरबक की मञ्जरियों की शोभा को देखकर किस सहृदय का मन कामबाण से घायल के समान व्यथित नहीं होता है?॥ २०॥ आग के तुल्य चमकीले होनेवाले, हवा से झकोरे हुए, फूलों से नम्र हुए पलाश के पेड़ों से वसन्त आने पर भी यह पृथिवी सभी स्थानों पर लाल कपड़ेवाली नयी बहू के समान दीखती है॥ २१॥ सुग्गों की चोंचों के तुल्य लाल छटावाले पलाशों ने क्या नहीं विदीर्ण किया? मनोहर कनैल के कुसुमों ने क्या नहीं भस्म किया? यह कोयल मधुर गीत से सुन्दर मुख में स्थापित जनों के चित्तों को हरण करती है॥ २२॥ हर्ष करनेवाले, अव्यक्त और मधुर वाणीवाले पुरुष कोकिल से तथा मद से अव्यक्त और मधुर शब्द करनेवाले भौंरों के गुञ्जारों से क्षणमात्र में कुलाङ्गनाओं के हृदय व्याकुल कर दिये हैं॥ २३॥ फूलों के साथ आमों की शाखाओं को हिलाता हुआ, दिशाओं में कोयलों की वाणियों को फैलाता हुआ, मनुष्यों के चित्तों को मुग्ध करता हुआ, तुषार के पड़ने से सुन्दर यह पवन वसन्त में विशेषता से बह रहा है॥ २४॥ विभ्रमयुक्त सुन्दरियों के हास्य के समान धवल, कुन्दकुसुमों से दीप्त, मनोहर उपवनों से युक्त, निवृत्त मोहवाले ऋषियों के भी चित्तों को हरण करनेवाला, पूर्व से ही मोहयुक्त पुरुषों के मन को हरण करनेवाला पवन बह रहा है॥ २५॥ लम्बी लटकनेवाली सुवर्ण की करधनीवाली, कुचों के बीच में धारित हारवाली, काम की अधिकता से खिन्न शरीररूपी यष्टिवाली स्त्रियाँ चैत्रमास में कोयलों और भौंरों के मीठे गुञ्जार के साथ जनों के चित्तों को मोहती हैं॥ २६॥ अनेक रमणीक शोभित अग्रभागवाले पुष्पवृक्षों से, आनन्दित कोयलों से व्याप्त प्रदेशवाले, पहाड़ी वनस्पतियों से परिणद्ध शिलातलोंवाले पर्वतों को देखकर सम्पूर्ण प्राणी आनन्दित होते

नेत्रे निमीलयति रोदिति याति शोकं घ्राणं करेण विरुणद्धि विरौति चोच्चैः।
कान्तावियोगपरिखेदितचित्तवृत्तिर्दृष्ट्वाध्वगः कुसुमितान् सहकारवृक्षान्॥ २८॥
समदमधुकराणां कोकिलानां च नादैः कुसुमितसहकारैः कर्णिकारैश्च रम्यः।
इषुभिरिव सुतीक्ष्णैर्मानसं मानिनीनां तुदति कुसुममासो मन्मथोद्दीपनाय॥ २९॥
रुचिरकनककान्तीन् मुञ्चतः पुष्पराशीन् मृदुपवनविधूतान् पुष्पिताँश्चूतवृक्षान्।
अभिमुखमभिवीक्ष्य क्षामदेहोऽपि मार्गे मदनशरनिघातैर्मोहमेति प्रवासी॥ ३०॥
परभृतकलगीतैर्हृल्लादिभिः सद्वचांसि स्मितदशनमयूखान् कुन्दपुष्पप्रभाभिः।
करकिसलयकान्तिं पल्लवैर्विद्रुमाभैरुपहसति वसन्तः कामिनीनामिदानीम्॥ ३१॥
कनककमलकान्तैराननैः पाण्डुगण्डैरुपरिनिहितहारैश्चन्दनार्द्रैः स्तनान्तैः।
मदजनितविलासैर्दृष्टिपातैर्मुनीन्द्रान् स्तनभरनतनार्यः कामयन्ति प्रशान्तान्॥ ३२॥
मधुसुरभिमुखाब्जं लोचने लोध्रताम्रे नवकुरबकपूर्णः केशपाशो मनोज्ञः।
गुरुतरकुचयुग्मं श्रोणिबिम्बं तथैव न भवति किमिदानीं योषितां मन्मथाय॥ ३३॥
आकम्पितानि हृदयानि मनस्विनीनां वातैः प्रफुल्लसहकारकृताधिवासैः।
उत्कूजितैः परभृतस्य मदाकुलस्य श्रोत्रप्रियैर्मधुकरस्य च गीतनादैः॥ ३४॥
रम्यः प्रदोषसमयः स्फुटचन्द्रभासः पुंस्कोकिलस्य विरुतं पवनः सुगन्धिः।
मत्तालियूथविरुतं निशि शीधुपानं सर्वं रसायनमिदं कुसुमायुधस्य॥ ३५॥

हैं॥ २७॥ भार्या के विरह से पीडित चित्त-वृत्तिवाले, राह में चलनेवाले पथिक प्रफुल्लित आम के पेड़ों को देखकर नयनों को मींचते है, रुदन करते हैं, मोहित होते हैं, नाक को हाथ से बन्द करते हैं और ऊँचे शब्दों से चिल्लाते हैं॥ २८॥ हे प्रिये! मद से व्याप्त भौंरों मे, कोयलों के गीतों से प्रफुल्लित आम के पेडों मे तथा मनोहर कनैल के पुष्पों से यह वसन्त-समय तेज बाणों के समान कामिनियों को कामदेव से पीडित कर रहा है॥ २९॥ परदेशी पुरुष पहले तो वह विरहव्यथा मे स्वयं पीडित रहता है, उस पर भी जब वह मन्द-मन्द बहनेवाले पवन के झोंके से हिलते हुए मनोहर एवं सुनहले बौरों को आम की डालियों से गिरते हुए मार्ग में देखता है, तो वह कामदेव के बाणप्रहार से आहत होकर मूर्च्छित हो जाता है॥ ३०॥ इस समय मन को प्रसन्न करने वाले कोयल की कूकें सुनाकर यह वसन्त सुन्दरियों की रसभरी बातों का उपहास कर रहा है। कुन्दपुष्पों की प्रभा मे यह वसन्त स्त्रियों की मुस्कान पर चमक उठने वाली उनकी दशन-कान्ति भी हँसी कर रहा है और मूँगे जैसी लाल-लाल किसलयों की लालिमा को दिखलाकर कामिनियों की सुकोमल हथेलियों की खिल्ली उडा रहा है॥ ३१॥ स्तनों के बोझ से झुकी हुई रमणियाँ अपने कनककमल के समान सुन्दर गालों वाले मुख से, गीले चन्दन से लिप्त तथा मोतियों के हारों से युक्त स्तनों से और मतवाली चंचल चितवन से शान्तचित्तवाले तपस्वियों के मन को भी डिगा देती हैं॥ ३२॥ आसव से महकता हुआ युवतियों का कमल के सदृश मुख, लोध के वर्ण की उनकी लाल-लाल आँखें, नये कुरवक-पुष्पों से सजे हुए उनके जूडे, बड़े-बडे सुपुष्ट उनके दोनों स्तन, वैसे ही गोल-गोल नितम्ब, क्या ये सब लोगों के मन में कामदेव को नहीं जगा रहे हैं?॥ ३३॥ बौर आये हुए आम के पेड़ों से टकराकर चलनेवाली सुगन्धित वायु मे, मदमाती कोयल की कूक से और भौंरों की मदमस्त गुँजारों से मनस्विनी स्त्रियों के मन भी अपने प्रण से विचलित हो जाते हैं॥ ३४॥ सुन्दर सायंकाल का समय, चारों ओर छिटकी हुई चाँदनी, मदमत्त कोयल की कूक, सुगन्धित पवन, मतवाले भौंरों की गुँजार तथा रात में मदिरापान—ये सब कामदेव के जगाये रखने वाले रसायन

रक्ताशोकविकल्पिताधरमधुर्मत्तद्विरेफस्वनः
कुन्दापीडविशुद्धदन्तनिकरः प्रोत्फुल्लपद्मानन: ।
चूतामोदसुगन्धिमन्दपवनः शृङ्गारदीक्षागुरुः
कल्पान्तं मदनप्रियो दिशतु वः पुष्पागमो मङ्गलम् ॥ ३६ ॥
मलयपवनविद्धः कोकिलालापरम्यः
सुरभिमधुनिषेकाल्लब्धगन्धप्रबन्धः ।
विविधमधुपयूथैर्वेष्ट्यमानः समन्ताद्
भवतु तव वसन्तः श्रेष्ठकालः सुखाय ॥ ३७ ॥
आम्रोमञ्जुलमञ्जरीवरशरः सत्किंशुकं यद्धनु-
र्ज्या यस्यालिकुलं कलङ्करहितं छत्रं सितांशुः सितम् ।
मत्तेभो मलयानिलः परभृता यद्बन्दिनो लोकजित्
सोऽयं वो वितरीतरीतु वितनुर्भद्रं वसन्तान्वितः ॥ ३८ ॥

॥ इति महाकविकालिदासकृतौ ऋतुसंहारे वसन्तवर्णनं नाम षष्ठः सर्गः ॥

(सिद्ध औषधद्रव्य) हैं॥ ३५॥ अमृतपूर्ण अधरों के सदृश लाल अशोक जैसे, मदमत्त भौंरों की गुँजार जैसे, चमकती हुई दन्तपंक्ति के आकार वाले शुभ्र कुन्द की माला की भाँति, विकसित कमल के समान मुखों से, आनन्दप्रद आम के बौरों की सुगन्धि से युक्त मन्द-मन्द पवन से यह शृंगार की शिक्षा देने वाला कामदेव का परम मित्र वसन्त आप सब का कल्याण करे॥ ३६॥ मलयपवन से युक्त, कोकिलों के कूक से आनन्दित करने वाला, सदा सुगन्धित मधु बरसाने से सुगन्धित वातावरण को बनाये रखने वाला तथा अनेक प्रकार के भौंरों के झुंडों से चारों ओर से घिरा हुआ यह उत्तम वसन्त-समय आप सब को सुख प्रदान करें॥ ३७॥ आम की कोमल मंजरियाँ जिसके उत्तम बाण हैं, पलाश के सुन्दर फूल जिसका धनुष है, भौंरे जिसकी डोरी हैं, कलंकहीन चन्द्र जिसका सफेद छत्र है, मदोन्मत्त हाथी जिसके मलयपवन हैं तथा कोयलें जिसकी चारण हैं, वे शरीररहित कामदेव वसन्तऋतु सहित आपका श्रेय करें॥ ३८॥

इस प्रकार ऋतुसंहार के षष्ठ सर्ग में वसन्तऋतु-वर्णन समाप्त हुआ।



'यस्यायमङ्गात् कृतिनः प्ररूढः'

अभिज्ञानशाकुन्तलम्

पात्र-परिचय

पुरुष-पात्र

सूत्रधार	: नाटक का संचालक
दुष्यन्त	: हस्तिनापुर का सम्राट्
भद्रसेन	: सेनापति
महर्षि कण्व	: कुलपति
सोमरात	: राजा के धर्मगुरु
दुर्वासा	: क्रोधी ऋषि
मारीच	: प्रजापति
सर्वदमन	: दुष्यन्तपुत्र भरत
माढव्य	: विदूषक
रैवतक	: दौवारिक
करभक	: राजसेवक
पार्वतायन	: कञ्चुकी
वैतालिक	: चारण
श्यामल	: दुष्यन्त का साला
वैखानस, शांर्गरव, शारद्वत, हारीत, गौतम	: कण्वशिष्य
धीवर	: मछुआ
सूचक, जानुक	: राजपुरुष
मातलि	: इन्द्रसारथी

स्त्री-पात्र

नटी	: सूत्रधार की स्त्री
शकुन्तला	: कण्व द्वारा पालित पुत्री
अनसूया, प्रियंवदा	: शकुन्तला की सखियाँ
गौतमी	: तपस्विनी
चतुरिका, परभृतिका, मधुरिका	: राजा की दासियाँ
प्रतिहारी, यवनी	: परिचारिका
सानुमती	: अप्सरा
अदिति	: कश्यप की स्त्री

॥ श्रीः ॥

अभि ।।न श।।कुन लम्

प्रथमोऽङ्कः

या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री
ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम्।
यामाहुः सर्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः
प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः ॥ १ ॥

(नान्द्यन्ते)

सूत्रधारः—अलमतिविस्तरेण। (नेपथ्याभिमुखमवलोक्य) आर्ये! यदि नेपथ्यविधानमवसितम्, इतस्तावदागम्यताम्।

(प्रविश्य)

नटी—अज्जउत्त! इयं म्हि। आणवेदु अज्जो को णिओओ अणुचिट्ठिअदुत्ति। **[आर्यपुत्र! इयमस्मि। आपयतु आर्यः को नियोगोऽनुष्ठीयतामिति।]**

भगवान् शिव उस जल के रूप में हमें प्रत्यक्ष दिखलाई देते हैं, जिसे ब्रह्मा ने सबसे पहले बनाया था। वे उस अग्नि के रूप में दिखलाई देते हैं, जो विधि के साथ दी हुई हवन-सामग्री को ग्रहण करती है। वे उस होता के रूप में दिखलाई देते हैं, जिसे यज्ञ करने का काम मिला हुआ है। वे उन चन्द्र और सूर्य के रूप में दिखलाई देते हैं, जो दिन और रात का समय निश्चित करते हैं। वे उस आकाश के रूप में दिखलाई देते हैं, जिसका गुण शब्द है और जो संसारभर में रमा हुआ है। वे शिव उस पृथ्वी के रूप में दिखलाई देते हैं, जो सब बीजों को उत्पन्न करने वाली बतलाई जाती है और वे उस वायु के रूप में दिखलाई पडते हैं, जिसके कारण सब जीव जीते हैं। इन जल, अग्नि, होता, सूर्य, चन्द्र, आकाश, पृथ्वी और वायु के आठ रूपों में जो भगवान् शिव सबको प्रत्यक्ष दीखते हैं, वे आप सबका कल्याण करें॥ १॥

(नान्दीपाठ के अनन्तर)

सूत्रधार—बस, इतना ही बहुत है। (नेपथ्य की ओर देखकर) आर्ये! यदि शृङ्गार का काम पूर्ण हो चुका हो तो यहाँ आओ।

(प्रवेश कर)

नटी—आर्यपुत्र! मैं आ गई। कहिए आपकी क्या आज्ञा है?

सूत्रधारः—आर्ये! इयं हि रसभावविशेषदीक्षागुरोर्विक्रमादित्यस्याभिरूपभूयिष्ठा परिषत्। अस्याश्च कालिदासग्रथितवस्तुनाऽभिज्ञानशाकुन्तलनामधेयेन नवेन नाटकेनोपस्थातव्यमस्माभिः। तत्प्रतिपात्रमाधीयतां यत्नः।

नटी—सुविहिदप्पओअदाए अज्जस्स ण किं वि परिहावइस्सदि। [सुविहितप्रयोगताऽऽर्यस्य न किमपि परिहापयिष्यते।]

सूत्रधारः—(सस्मितम्) आर्ये! कथयामि ते भूतार्थम्—

आ परितोषाद्विदुषां न साधु मन्ये प्रयोगविज्ञानम्।
बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः॥ २॥

नटी—(सविनयम्) अज्ज! एवं एदं। अणंतरकरणिज्जं दाव अज्जो आणवेदु। [आर्य! एवमेतत्। अनन्तरकरणीयं तावदार्य आज्ञापयतु।]

सूत्रधारः—आर्ये! किमन्यदस्याः परिषदः श्रुतिप्रमोदहेतोर्गीतात्करणीयमस्ति।

नटी—अध कदमं उण उदुं अधिकरिअ गाइस्सं? [अथ कतमं पुनर्ऋतुमधिकृत्य गास्यामि?]

सूत्रधारः—आर्ये! नन्विममेव तावदचिरप्रवृत्तमुपभोगक्षमं ग्रीष्मसमयमधिकृत्य गीयताम्। सम्प्रति हि—

सुभगसलिलावगाहाः पाटलसंसर्गिसुरभिवनवाताः।
प्रच्छायसुलभनिद्रा दिवसाः परिणामरमणीयाः॥ ३॥

नटी—तह। [तथा।] (इति गायति)

सूत्रधार—आर्ये! रस और भाव का चमत्कार दिखलानेवाले कलाकारों के आश्रयदाता महाराज विक्रमादित्य की इस सभा को आज विशेषरूप से बड़े-बड़े विद्वान् सुशोभित कर रहे हैं। इसलिए इन्हें कालिदास का रचा हुआ नया नाटक 'अभिज्ञान-शाकुन्तल' दिखलाना चाहिए। जाकर सब पात्रों को ठीक करने का प्रयत्न करो।

नटी—आपने तो पहले से ही ऐसा अच्छा प्रबन्ध कर रखा है कि कोई कमी नहीं रह जायगी।

सूत्रधार—(मुस्कराकर) आर्ये! मैं सच्ची बात कहता हूँ।

जब तक कि विद्वान् लोग अच्छा न कहें, तब तक मैं किसी नाटक को सफल नहीं मानता। क्योंकि पात्रों को चाहे कितने ही अच्छे ढंग से सिखाया जाय, फिर भी उन्हें अपने पर भरोसा नहीं होता॥ २॥

नटी—(विनयपूर्वक) यह बात तो ठीक ही है आर्य! अब आप जो आज्ञा दें, वैसा किया जाय।

सूत्रधार—आर्ये! इस सभा के सदस्यों के कानों को आनन्द देने वाले मीठे गीत से बढ़कर और कौन-सी अच्छी बात हो सकती है।

नटी—तो किस ऋतु का आश्रय लेकर गाना गाऊँ?

सूत्रधार—ग्रीष्म ऋतु अभी ही आई है और सुहावनी भी लगती है। अतएव इस समय ग्रीष्म ऋतु का ही कोई गीत गाओ। देखो—

इन दिनों जल में नहाने से बड़ा आनन्द आता है, पाटल के सौरभ में बसा हुआ वन का पवन बड़ा अच्छा लगता है, वृक्षों की घनी छाया में नींद अच्छी आती है और आजकल की सन्ध्या भी बड़ी सुहावनी लगती है॥ ३॥

नटी—अच्छा। (गाती है)

ईसीसिचुंबिआइँ भमरेहिं सुउमारदरकेसरसिहाइँ।
ओदंसअंति दअमाणा पमदाओ सिरीसकुसुमाइँ॥ ४॥
[ईषदीषच्चुम्बितानि भ्रमरैः सुकुमारतरकेसरशिखानि।
अवतंसयन्ति दयमानाः प्रमदाः शिरीषकुसुमानि॥]

सूत्रधारः—आर्ये! साधु गीतम्। अहो, रागनिविष्टचित्तवृत्तिरालिखित इव सर्वतो रङ्गः। तदिदानीं कतमं प्रयोगमाश्रित्यैनमाराधयामः?

नटी—णं अज्जमिस्सेहिं पढमं एव्व आणत्तं अहिण्णाणसाउंदलं णाम अपुव्वं णाडअं पओए अधिकरीअदु त्ति। [नन्वार्यमिश्रैः प्रथममेवाज्ञप्तमभिज्ञानशाकुन्तलं नामापूर्वं नाटकं प्रयोगेऽधिक्रियतामिति।]

सूत्रधारः—आर्ये! सम्यगनुबोधितोऽस्मि। ननु अस्मिन्क्षणे विस्मृतं खलु मया। कुतः—

तवास्मि गीतरागेण हारिणा प्रसभं हृतः।

(कर्ण दत्वा)

एष राजेव दुष्यन्तः सारङ्गेणातिरंहसा॥ ५॥

(इति निष्क्रान्तौ)

॥ प्रस्तावना॥

(ततः प्रविशति मृगानुसारी सशरचापहस्तो राजा रथेन सूतश्च)

सूतः—(राजानं मृगं चावलोक्य) आयुष्मन्!

कृष्णसारे ददच्चक्षुस्त्वयि चाधिज्यकार्मुके।
मृगानुसारिणं साक्षात्पश्यामीव पिनाकिनम्॥ ६॥

सिरस के जिन कोमल केसरदल के शिखरों को भौंरें बार-बार चूमकर बैठते तथा उड़ जाते हैं, बड़े ही दयाभाव से कामिनियाँ उन फूलों को अपने कानों का कर्णफूल बनाती हैं॥ ४॥

सूत्रधार—आर्ये! तुमने तो बहुत ही अच्छा गाना गाया। देखो, तुम्हारे राग से लोग ऐसे बेसुध हो गये कि सारी रङ्गशाला चित्रलिखी-सी दीख रही है। तो अब कौन-सा नाटक दिखाकर इनका मनोरंजन किया जाय?

नटी—आपने तो अभी-अभी कहा था न कि अभिज्ञानशाकुन्तल नाम का नया नाटक खेला जाय।

सूत्रधार—तुमने ठीक स्मरण दिलाया आर्ये! मैं तो इस समय उसे भूल ही गया था।
तुम्हारे गीत के मधुर राग ने मेरे मन को बलपूर्वक वैसे ही खींच लिया था—

(कान लगाकर सुनने का अभिनय करते हुए)

जैसे वेग से दौडता हुआ यह हरिण राजा दुष्यन्त को यहाँ खींच लाया है॥ ५॥

(सूत्रधार और नटी का प्रस्थान)

॥ प्रस्तावना॥

(एक मृग का पीछा करते हुए सारथी के साथ रथ पर बैठे
धनुष-बाणधारी राजा दुष्यन्त का प्रवेश)

सारथी—(राजा और मृग को देखकर) आयुष्मन्!
इस काले मृग पर आँख लगाये और धनुष की डोरी चढाये हुए आप ऐसे दीख रहे हैं, मानो मृग का पीछा करते हुए साक्षात् शिव हों॥ ६॥

राजा—सूत ! दूरममुना सारङ्गेण वयमाकृष्टाः । अयं पुनरिदानीमपि—

ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः
पश्चार्धेन प्रविष्टः शरपतनभयाद्भूयसा पूर्वकायम् ।
दर्भैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति ॥ ७ ॥

(सविस्मयम्) तदेष कथमनुपतत एव मे प्रयत्नप्रेक्षणीयः संवृत्तः ?

सूतः—आयुष्मन् ! उद्घातिनी भूमिरिति मया रश्मिसंयमनाद्रथस्य मन्दीकृतो वेगः । तेन मृग एष विप्रकृष्टान्तरः संवृत्तः । सम्प्रति समदेशवर्तिनस्ते न दुरासदो भविष्यति ।

राजा—तेन हि मुच्यन्तामभीषवः ।

सूतः—यदाज्ञापयत्यायुष्मान् । (रथवेगं निरूप्य) आयुष्मन् ! पश्य पश्य—

मुक्तेषु रश्मिषु निरायतपूर्वकाया निष्कम्पचामरशिखा निभृतोर्ध्वकर्णाः ।
आत्मोद्धतैरपि रजोभिरलङ्घनीया धावन्त्यमी मृगजवाक्षमयेव रथ्याः ॥ ८ ॥

राजा—(सहर्षम्) नूनमतीत्य हरितो हरींश्च वर्तन्ते वाजिनः । तथा हि—

यदालोके सूक्ष्मं व्रजति सहसा तद्विपुलतां
यदर्धे विच्छिन्नं भवति कृतसन्धानमिव तत् ।
प्रकृत्या यद्वक्रं तदपि समरेखं नयनयो-
र्न मे दूरे किञ्चित्क्षणमपि न पार्श्वे रथजवात् ॥ ९ ॥

राजा—सूत ! यह हरिण हमें बहुत दूर तक दौड़ा ले आया है। अब भी यह—

बार-बार पीछे मुड़कर मेरे रथ को एकटक देखता हुआ यह सुन्दर हरिण बाण लगने के डर से अपने पिछले आधे शरीर को सिकोड़कर अगले भाग से मिलाता हुआ कैसा दौड़ रहा है। थकावट के कारण इसके खुले हुए मुँह से आधी चबाई हुई कुशा मार्ग में गिरती जा रही है। और देखो, यह इतनी लम्बी छलाँगें मार रहा है कि जैसे इसके पाँव पृथ्वी पर पडते ही नहीं। यह तो ऐसा दीखता है कि मानो आकाश में उड़ा जा रहा हो ॥ ७ ॥

(आश्चर्य के साथ) अरे ! हम इसके पीछे-पीछे चले आ रहे हैं, फिर भी हरिण सहसा मेरी आँख से ओझल क्यों हो गया ?

सारथी—आयुष्मन् ! उबड-खाबड़ भूमि होने के कारण मैंने रास खींचकर रथ का वेग कम कर दिया था। इसी से मृग बहुत दूर निकल गया है, परन्तु आगे की भूमि समतल है। अब वह आपके लिए अप्राप्य नहीं रहेगा।

राजा—तो अब रास ढीली कर दो।

सारथी—जैसी आयुष्मान् की आज्ञा। **(रथ का वेग दिखाकर)** देखिए, देखिए आयुष्मन् !

रास छोड़ते ही अपने शरीर का अगला हिस्सा फैला तथा माथे की चौंरी सीधी खड़ी करके ये घोड़े इतने वेग से दौड़ रहे हैं कि इनकी टापों से उठी हुई धूल भी इन्हें नहीं छू पाती। ऐसा जान पड़ता है कि मानो ये हरिण की दौड़ से होड लगा रहे हैं ॥ ८ ॥

राजा—**(प्रसन्न होकर)** वास्तव में इन घोड़ों ने तो सूर्य और इन्द्र के घोड़ों को भी दौड़ में पछाड़ दिया है। क्योंकि—

जो वस्तु दूर से पतली दीखती थी, वह तुरन्त मोटी हो जा रही है। जो बीच से कटी जान

सूत ! पश्यैनं व्यापाद्यमानम्। (इति शरसन्धानं नाटयति)

(नेपथ्ये)

भो भो राजन्! आश्रममृगोऽयं न हन्तव्यो न हन्तव्यः।

सूतः—(आकर्ण्यावलोक्य च) आयुष्मन्! अस्य खलु ते बाणपातवर्तिनः कृष्णसारस्यान्तरे तपस्विन उपस्थिताः।

राजा—(ससम्भ्रमम्) तेन हि प्रगृह्यन्तां वाजिनः।

सूतः—तथा। (इति रथं स्थापयति)

(ततः प्रविशत्यात्मना तृतीयो वैखानसः)

वैखानसः—(हस्तमुद्यम्य) राजन्! आश्रममृगोऽयं न हन्तव्यो न हन्तव्यः।

न खलु न खलु बाणः सन्निपात्योऽयमस्मिन्
मृदुनि मृगशरीरे तूलराशाविवाग्निः।
क्व बत हरिणकानां जीवितञ्चातिलोलं
क्व च निशितनिपाता वज्रसाराः शरास्ते॥ १०॥

तत्साधुकृतसन्धानं प्रतिसंहर सायकम्।
आर्तत्राणाय वः शस्त्रं न प्रहर्तुमनागसि॥ ११॥

राजा—एष प्रतिसंहृतः। (इति यथोक्तं करोति)

वैखानसः—सदृशमेतत्पुरुवंशप्रदीपस्य भवतः।

पड़ती थी, वह ऐसी लगती है कि मानो उसे किसी ने जोड दिया है। जो स्वभावतः टेढ़ी वस्तुएँ हैं, वे आँखों को सीधी-सी दिखलाई देती हैं। मेरा रथ इतने वेग से दौड़ रहा है कि कोई वस्तु न मुझसे दूर रह पाती है, न समीप ही॥ ९॥

सारथी! देखो, अब मैं हरिण को मार रहा हूँ। **(बाण चढाने का अभिनय करता है)**

(नेपथ्य में)

हे राजन्! यह आश्रम का मृग है। इसे न मारिए, न मारिए।

सारथी—(सुन और देखकर) आयुष्मन्! जिस काले हरिण पर आप बाण चलाना चाह रहे हैं, उसके बीच में ये तपस्वी लोग आ खडे हुए हैं।

राजा—(घबराकर) तो रोक दो घोड़ों को।

सारथी—अच्छा। **(रथ खड़ा कर लेता है)**

(दो शिष्यों के साथ वैखानस नामक तपस्वी का प्रवेश)

वैखानस—(हाथ उठाकर) राजन्! यह आश्रम का मृग है। इसे मत मारिए, मत मारिए।

इस पर कदापि बाण न चलाइएगा। आपका बाण इसके कोमल शरीर के लिए वैसा ही भयंकर है, जैसे रुई की राशि के लिए अग्नि। बतलाइए, कहाँ तो बेचारे हिरण के अतिशय चपल प्राण और कहाँ वज्र के समान कठोर आपके नुकीले बाण॥ १०॥

अतएव यह जो आपने बाण चढाकर धनुष ताना है, इसे उतार लीजिए। क्योंकि आप लोगों के शस्त्र तो पीडितों की रक्षा के लिए हैं, न कि निरपराधों को मारने के लिए॥ ११॥

राजा—लीजिए, उतार लिया। **(बाण उतारता है)**

वैखानस—आप जैसे पुरुवंश के दीपक राजा को यही शोभा देता है।

जन्म यस्य पुरोर्वंशे युक्तरूपमिदं तव।
पुत्रमेवंगुणोपेतं चक्रवर्तिनमाप्नुहि॥ १२॥

इतरौ—(हस्तमुद्यम्य) सर्वथा चक्रवर्त्तिनं पुत्रमाप्नुहि।

राजा—(सप्रणामम्) प्रतिगृहीतम्।

वैखानसः—राजन्! समिदाहरणाय प्रस्थिता वयम्। एष खलु कण्वस्य कुलपतेरनुमालिनीतीरमाश्रमो दृश्यते। न चेदन्यकार्यातिपातः तत्प्रविश्य प्रतिगृह्यतामातिथेयः सत्कारः। अपि च—

रम्यास्तपोधनानां प्रतिहतविघ्नाः क्रियाः समवलोक्य।
ज्ञास्यसि कियद्भुजो मे रक्षति मौर्वीकिणाङ्क इति॥ १३॥

राजा—अपि सन्निहितोऽत्र कुलपतिः?

वैखानसः—इदानीमेव दुहितरं शकुन्तलामतिथिसत्काराय नियुज्य दैवमस्याः प्रतिकूलं शमयितुं सोमतीर्थं गतः।

राजा—भवतु तामेव द्रक्ष्यामि। सा खलु विदितभक्तिं मां महर्षेः करिष्यति।

वैखानसः—साधयामस्तावत्। (इति सशिष्यो निष्क्रान्तः)

राजा—सूत! तूर्णं चोदयाश्वान्। पुण्याश्रमदर्शनेन तावदात्मानं पुनीमहे।

सूतः—यदाज्ञापयत्यायुष्मान्। (इति भूयो रथवेगं निरूपयति)

राजा—(समन्तादवलोक्य) सूत! अकथितोऽपि ज्ञायत एव यथाऽयमाश्रमाभोगस्तपोवनस्येति।

आपने पुरुवंश में जन्म लिया है, इसलिए यह ठीक ही है। आपको ऐसे ही गुणोंवाला चक्रवर्ती पुत्र प्राप्त होगा॥ १२॥

दोनों शिष्य—(बाँह उठाकर) निश्चय ही चक्रवर्ती पुत्र प्राप्त होगा।

राजा—(प्रणाम करके) आपका आशीर्वाद शिरोधार्य है।

वैखानस—राजन्! हम लोग समिधा लेने जाते हैं। यह सामने मालिनी नदी पर कुलपति कण्व का आश्रम है। यदि कोई अड़चन न हो तो वहाँ चलकर अतिथि-सत्कार ग्रहण कीजिए। और भी—

वहाँ के ऋषियों को निर्विघ्न भाव से सब क्रियाएँ करते देखकर आप यह भी जान जायें कि धनुष की डोरी की रगड़ से बने घट्टोंवाली आपकी भुजा कहाँ-कहाँ तक पहुँचकर लोगों की रक्षा कर रही है॥ १३॥

राजा—क्या कुलपति आश्रम में हैं?

वैखानस—अभी थोड़ी देर पहले अपनी पुत्री शकुन्तला को अतिथि-सत्कार का काम सौंपकर उसके खोटे ग्रहों की शान्ति के निमित्त सोमतीर्थ चले गये हैं।

राजा—अच्छी बात है। मैं शकुन्तला से अवश्य मिलूँगा। वही महर्षि को बतला देगी कि मेरी उनमें कितनी अगाध भक्ति है।

वैखानस—तो हम लोग जाते हैं। **(शिष्यों के साथ वैखानस का प्रस्थान)**

राजा—सारथी! घोड़ों को बढाओ। आगे चलकर इस पुनीत आश्रम के दर्शन से अपनी आत्मा को पवित्र करूँ।

सारथी—जैसी आयुष्मान् की आज्ञा। **(फिर रथ को बडे वेग से दौड़ाता है)**

राजा—(चारों ओर देखकर) देखो सारथी! बिना बताये ही ज्ञात हो रहा है कि हम आश्रम के तपोवन में आ पहुँचे हैं।

सूतः—कथमिव ?

राजा—किं न पश्यति भवान् ? इह हि—

नीवाराः शुकगर्भकोटरमुखभ्रष्टास्तरूणामधः
प्रस्निग्धाः क्वचिदिङ्गुदीफलभिदः सूच्यन्त एवोपलाः।
विश्वासोपगमादभिन्नगतयः शब्दं सहन्ते मृगा-
स्तोयाधारपथाश्च वल्कलशिखानिष्यन्दरेखाङ्किताः ॥ १४ ॥

अपि च—

कुल्याम्भोभिः प्रकृतिचपलैः शाखिनो धौतमूलाः
भिन्नो रागः किसलयरुचामाज्यधूमोद्गमेन।
एते चार्वागुपवनभुवि च्छिन्नदर्भाङ्कुरायां
नष्टाशङ्का हरिणशिशवो मन्दमन्दं चरन्ति ॥ १५ ॥

सूतः—सर्वमुपपन्नम्।

राजा—(स्तोकमन्तरं गत्वा) तपोवननिवासिनामुपरोधो मा भूत्। एतावत्येव रथं स्थापय यावदवतरामि।

सूतः—धृताः प्रग्रहाः। अवतरत्वायुष्मान्।

राजा—(अवतीर्य) सूत ! विनीतवेषेण प्रवेष्टव्यानि तपोवनानि नाम। इदं तावद् गृह्यताम्। (इति सूतस्याभरणानि धनुश्चोपनीयार्पयति) सूत ! यावदाश्रमवासिनः प्रत्यवेक्ष्याहमुपावर्ते तावदार्द्रपृष्ठाः क्रियन्तां वाजिनः।

सूतः—तथा। (इति निष्क्रान्तः)

सारथी—कैसे ?

राजा—आप देख नहीं रहें हैं ? यहाँ पर—

कहीं वृक्षों के नीचे सुग्गों के घोसलों मे गिरे हुए तिन्नी के दाने बिखरे पडे हैं, कहीं इधर-उधर पडे हुए चिकने पत्थर यह बतला रहे हैं कि इन पर हिंगोट के फल कूटे गये हैं, कहीं निडर खड़े मृग इस विश्वास से रथ का शब्द सुन रहे हैं कि आश्रम में हमें कोई नहीं छेडेगा और कहीं नदी-नालों पर आने-जाने की राहों पर मुनियों के वल्कलों से टपटी हुई जल की रेखाएँ बनी हुई हैं॥ १४॥

और देखो—

वायु के कारण लहरें लेने वाले पानी की गूलों से यहाँ के वृक्षों की जडें धुल गयी हैं, घी के धुएँ से नई चमकीली कोपलों का रङ्ग धुँधला पड़ गया है और जहाँ-जहाँ उपवन से कुशा उखाड़ ली गयी है, वहाँ मृग-छौने निडर होकर धीरे-धीरे घूम रहे हैं॥ १५॥

सारथी—हाँ, यह सब तो प्रत्यक्ष दीख रहा है।

राजा—(कुछ आगे बढ़कर) हम लोगों के आने से तपोवन-निवासियों को कष्ट न हो, इसलिए तुम रथ यहीं रोक लो, मैं उतर जाता हूँ।

सारथी—लीजिए, मैंने रास खींच ली। आयुष्मान् उतर जायें।

राजा—(उतरकर) सारथी ! आश्रम में सीधे-सादे वेश में ही जाना चाहिए। इसलिए तब तक यह सब सामान यहीं रक्खो। (अपने आभूषण और धनुष उतारकर सारथी को देते हुए) और देखो सारथी ! जब तक हम आश्रम-निवासियों से मिलकर लौटें, तब तक तुम घोडों को ठंडा कर लो।

सारथी—अच्छा। (प्रस्थान करता है)

राजा—(परिक्रम्यावलोक्य च) इदमाश्रमद्वारम्। यावत्प्रविशामि।

(प्रविश्य, निमित्तं सूचयन्)

शान्तमिदमाश्रमपदं स्फुरति च बाहुः कुतः फलमिहास्य।
अथवा भवितव्यानां द्वाराणि भवन्ति सर्वत्र॥ १६॥

(नेपथ्ये)

इदो इदो सहीओ। [इत इतः सख्यौ।]

राजा—(कर्णं दत्त्वा) अये! दक्षिणेन वृक्षवाटिकामालाप इव श्रूयते। यावदत्र गच्छामि। (परिक्रम्यावलोक्य च) अये! एतास्तपस्विकन्यकाः स्वप्रमाणानुरूपैः सेचनघटैर्वालपादपेभ्यः पयो दातुमित एवाभिवर्तन्ते। (निपुणं निरूप्य) अहो मधुरमासां दर्शनम्—

शुद्धान्तदुर्लभमिदं वपुराश्रमवासिनो यदि जनस्य।
दूरीकृताः खलु गुणैरुद्यानलता वनलताभिः॥ १७॥

यावदिमां छायामाश्रित्य प्रतिपालयामि। (इति विलोकयन्स्थितः)

(ततः प्रविशति यथोक्तव्यापारा सह सखीभ्यां शंकुन्तला)

शकुन्तला—इदो इदो सहीओ। [इत इतः सख्यौ।]

अनसूया—हला सउंदले! तुवत्तो वि तादकण्णस्स अस्समरुक्खआ पिअदरेत्ति तक्केमि। जेण णोमालिआकुसुमपेलवा तुमं वि एदाणं आलवालपूरणे णिउत्ता। [हला शकुन्तले! त्वत्तोऽपि तातकण्वस्याश्रमवृक्षकाः प्रियतरा इति तर्कयामि। येन नवमालिकाकुसुमपेलवा त्वमप्येतेषामालवालपूरणे नियुक्ता।]

राजा—(घूमकर और देखकर) यही तो आश्रम का द्वार है। इसी से भीतर चलूँ।

(प्रवेश करके शुभ शकुन होने की सूचना पाते हुए)

इस शान्त तपोवन की भूमि में मेरी दाहिनी भुजा क्यों फड़क रही है। यहाँ भला क्या मिलने वाला है? परन्तु हाँ, जो मिलना होता है वह तो सर्वत्र मिल सकता है॥ १६॥

(नेपथ्य में)

इधर आओ सखियों, इधर आओ।

राजा—(सुनकर) अरे! फुलवारी की दाहिनी ओर किसी की बातचीत सुनाई दे रही है। तो उधर ही चलूँ। (घूमकर और देखकर) अहो! ये तपस्वियों की कन्याएँ अपने-अपने मेल के घड़े ले-लेकर छोटे-छोटे पौधों को सींचने के लिए इधर ही आ रही हैं। (ध्यान से देखकर) ओहो! ये तो बड़ी ही सुन्दर हैं।

रनिवास की रानियों में भी जो सुन्दरता कठिनाई से देखने को मिलती है, वह यदि इन आश्रमवासिनी कन्याओं को मिली है तो यही समझना चाहिए कि जंगल की लताओं ने अपने गुणों से उद्यान की लताओं को लजा दिया है॥ १७॥

अच्छा इनके आने तक मैं यहीं छाया में खड़ा होकर राह देखता हूँ। (उन्हें देखता हुआ राजा खड़ा हो जाता है)

(पौधों को सींचती हुई शकुन्तला का सखियों के साथ प्रवेश)

शकुन्तला—इधर आओ सखियो, इधर आओ

अनसूया—सखी शकुन्तले! मैं तो समझती हूँ कि पिता कण्व आश्रम के इन पौधों को तुमसे

शकुन्तला—ण केअलं तादणिओओ एव्व; अत्थि मे सोदरसिणेहो वि एदेसु। [न केवलं तातनियोग एव; अस्ति मे सोदरस्नेहोऽप्येतेषु।] (इति वृक्षसेचनं रूपयति)

राजा—(आत्मगतम्) कथमियं सा कण्वदुहिता? असाधुदर्शी खलु तत्रभवान् कण्वः, य इमामाश्रमधर्मे नियुङ्क्ते।

इदं किलाव्याजमनोहरं वपुस्तपःक्षमं साधयितुं य इच्छति।
ध्रुवं स नीलोत्पलपत्रधारया शमीलतां छेत्तुमृषिर्व्यवस्यति॥ १८॥

भवतु; पादपान्तर्हित एव विश्रब्धं तावदेनां पश्यामि। (इति तथा करोति)

शकुन्तला—सहि अणसूए! अदिपिणद्धेण वक्कलेण पिअंवदाए णिअंतिद म्हि। सिढिलेहि दाव णं। [सखि अनसूये! अतिपिनद्धेन वल्कलेन प्रियंवदया नियन्त्रिताऽस्मि। शिथिलय तावदेतत्।]

अनसूया—तह। [तथा।] (इति शिथिलयति)

प्रियंवदा—(सहासम्) एत्थ पओहरवित्थारइत्तअं अत्तणो जोव्वणं उवालह। मं किं उवालंभेसि? [अत्र पयोधरविस्तारयितृ आत्मनो यौवनमुपालभस्व। मां किमुपालभसे?]

राजा—काममनुरूपमस्या वपुषो वल्कलं न पुनरलङ्कारश्रियं न पुष्यति। कुतः?

सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम्॥ १९॥

अधिक प्यार करते हैं। नहीं तो भला चमेली की कली जैसी कोमल अंगवाली तुमको वे इन पौधों के थाल्हे भरने का काम क्यों सौंप जाते।

शकुन्तला—केवल पिताजी की आज्ञा से ही मैं इन्हें नहीं सींचती, बल्कि मैं स्वयं भी इनको सगे भाई के समान प्यार करती हूँ। (पौधों में पानी देने का अभिनय करती है)

राजा—(मन ही मन) क्या यही कण्व ऋषि की कन्या है? पूज्य कण्व की यह बात ठीक नहीं है कि जो उन्होंने इसे भी आश्रम के काम में जोत दिया है।

जो ऋषि इसके सहज सुन्दर शरीर को तपस्या के लिए तैयार करना चाह रहे हैं, वे मानो नीलेकमल की पंखुड़ी की धार से शमी का पेड़ काटने पर उतारू हैं॥ १८॥

अच्छा, तव तक निश्चिन्त होकर वृक्षों की ओट से इसे आँखभर देख तो लूँ। (ऐसा ही करता है)

शकुन्तला—सखी अनसूये! प्रियंवदा ने ऐसा कसकर वल्कल बाँध दिया है कि मैं हिल-डुल भी नहीं पाती। आकर इसे तनिक ढीला तो कर दे।

अनसूया—अच्छा। (ढीला करती है)

प्रियंवदा—(हँसते हुए) अपने उस यौवन को क्यों नहीं दोष देती, जो तुम्हारे स्तनों को इतना बढाता चला जा रहा है। मुझे क्यों उलाहना देती हो?

राजा—यद्यपि इसका कोमल शरीर वल्कल के योग्य नहीं है, फिर भी ये इसके शरीर को अलंकारों के समान ही सुशोभित कर रहे हैं। क्योंकि—

सेवार सें घिरा होने पर भी कमल सुन्दर लगता है और चन्द्रमा में पडा हुआ कलंक भी उसकी शोभा ही बढ़ाता है, वैसे ही यह सुन्दरी भी वल्कल के कपडे पहने हुए बड़ी भली दीख रही है। सच्ची बात तो यह है कि सुन्दर शरीर पर सब कुछ सुन्दर लगने लगता है॥ १९॥

शकुन्तला—(अग्रतोऽवलोक्य) एसो वादेरिदपल्लवांगुलीहिं तुवरेदि विअ मं केसररुक्खओ। जाव णं संभावेमि। [एष वातेरितपल्लवाङ्गुलीभिस्त्वरयतीव मां केसरवृक्षकः। यावदेनं सम्भावयामि।] (इति परिक्रामति)

प्रियंवदा—हला सउंदले! एत्थ एव्व दाव मुहुत्तअं चिट्ठ जाव तुए उवगदाए लदासणाहो विअ अंअ केसररुक्खओ पडिभादि। [हला शकुन्तले! अत्रैव तावन्मुहूर्तं तिष्ठ यावत्त्वयोपगतया लतासनाथ इवायं केसरवृक्षकः प्रतिभाति।]

शकुन्तला—अदो क्खु पिअंवदा सि तुमं। [अतः खलु प्रियंवदाऽसि त्वम्।]

राजा—प्रियमपि तथ्यमाह शकुन्तलां प्रियंवदा। अस्याः खलु—

अधरः किसलयरागः कोमलविटपानुकारिणौ बाहू।
कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धम्॥ २०॥

अनसूया—हला सउंदले! इअं सअंवरवहू वालसहआरस्स तुए किदणामहेआ वणजोसिणि त्ति णोमालिआ। णं विसुमरिदा सि। [हला शकुन्तले! इयं स्वयंवरवधूः वालसहकारस्य त्वया कृतनामधेया वनज्योत्स्नेति नवमालिका। एनां विस्मृतासि।]

शकुन्तला—तदा अत्ताणं वि विसुमरिस्सं। (लतामुपेत्यावलोक्य च) हला! रमणीए क्खु काले इमस्स लदापाअवमिहुणस्स वइअरो संवुत्तो। णवकुसुमजोव्वणा वणजोसिणी, वद्धफलदाए उवभोअक्खमो सहआरो। [तदाऽऽत्मानमपि विस्मरिष्यामि। हला! रमणीये खलु काल एतस्य लतापादपमिथुनस्य व्यतिकरः संवृत्तः। नवकुसुमयौवना वनज्योत्स्ना, बद्धफलतयोपभोगक्षमः सहकारः।] (इति पश्यन्ती तिष्ठति)

प्रियंवदा—(सस्मितम्) अणसूए! जाणासि किं णिमित्तं सउंदला वणजोसिणीं अदिमेत्तं पेक्खदि त्ति? [अनसूये! जानासि किं निमित्तं शकुन्तला वनज्योत्स्नामतिमात्रं प्रेक्षत इति?]

शकुन्तला—(सामने देखकर) यह केसर का वृक्ष पवन के झोंकों से हिलती हुई पत्तियों की अंगुलियों के संकेत से मुझे बुला रहा है। जाऊँ, इसका भी मन रख लूँ (उधर घूमती है)

प्रियंवदा—अरी शकुन्तला! क्षणभर वहाँ खड़ी तो रह। तेरे खड़ी होने पर यह केसर का वृक्ष ऐसा दीखने लगता है कि जैसे उससे कोई लता लिपटी हुई हो।

शकुन्तला—इन्हीं बातों से तो तेरा नाम प्रियंवदा पड़ गया है।

राजा—प्रियंवदा ने शकुन्तला से बड़ी प्यारी और सच्ची ही बात तो कही है। सचमुच—

इसके लाल-लाल होठ लता की कोपलों जैसे लगते हैं, दोनो भुजाएँ कोमल शाखाओं जैसी जान पडती हैं और इसके अङ्गों में खिला हुआ नया यौवन लुभावने फूल के समान दीख रहा है॥ २०॥

अनसूया—शकुन्तला! यहाँ वह नई चमेली है न कि जिसने आम के वृक्ष से स्वयंवर कर लिया है और जिसका नाम तूने वनज्योत्स्ना या वन की चाँदनी रखा है। इसे तो तू भूली ही जा रही थी।

शकुन्तला—वाह! यदि इसे भूलूँगी, तब तो मैं अपने को भी भूल जाऊँगी। (लता के पास जा और देखकर) सखी! सचमुच इस लता और वृक्ष का मेल बड़े अच्छे दिनों में हुआ है। इधर यह वनज्योत्स्ना खिले हुए फूल को लेकर नवयौवना हुई है, उधर फल से लदी हुई शाखाओं वाला आम का वृक्ष भी निखार पर आया हुआ है। (उसे देखती हुई खड़ी रह जाती है)

प्रियंवदा—(मुस्कराकर) अनसूया! जानती हो कि शकुन्तला इतनी मगन होकर वनज्योत्स्ना को क्यों देख रही है?

अनसूया—ण क्खु विभावेमि। कहेहि। [न खलु विभावयामि। कथय।]

प्रियवंदा—जह वणजोसिणी अणुरूवेण पाअवेण संगदा अवि णाम एव्वं अहं वि अत्तणो अणुरूवं वरं लहेअत्ति। [यथा वनज्योत्स्नानुरूपेण पादपेन सङ्गता अपि नामैवमहमप्यात्मनोऽनुरूपं वरं लभेयेति।]

शकुन्तला—एसो णूणं तुह अत्तगदो मणोरहो। [एष नूनं तवात्मगतो मनोरथः।]

(इति कलशमावर्जयति)

राजा—अपि नाम कुलपतेरियमसवर्णक्षेत्रसम्भवा स्यात्? अथवा कृतं सन्देहेन—

असंशयं क्षत्रपरिग्रहक्षमा यदार्यमस्यामभिलाषि मे मनः।
सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः॥ २१॥

तथापि तत्त्वत एवैनामुपलप्स्ये।

शकुन्तला—(ससम्भ्रमम्) अम्मो! सलिलसेअसंभमुग्गदो णोमालिअं उज्झिअ वअणं मे महुअरो अहिवट्टइ। [अम्मो! सलिलसेकसम्भ्रमोद्गतो नवमालिकामुज्झित्वा वदनं मे मधुकरोऽभिवर्तते।]

(इति भ्रमरबाधां रूपयति)

राजा—(सस्पृहम्)

चलापाङ्गां दृष्टिं स्पृशसि बहुशो वेपथुमतीं
रहस्याख्यायीव स्वनसि मृदु कर्णान्तिकचरः।
करौ व्याधुन्वत्याः पिबसि रतिसर्वस्वमधरं
वयं तत्त्वान्वेषान्मधुकर! हतास्त्वं खलु कृती॥ २२॥

अनसूया—नहीं, मैं तो नहीं जानती सखी! तू ही बता दे।

प्रियंवदा—देख, यह सोच रही है कि जैसे इस वनज्योत्स्ना को अपने योग्य वृक्ष मिल गया है, वैसे ही मुझे भी मेरे योग्य वर प्राप्त हो जाय।

शकुन्तला—यह तू अपने मन की बात कह रही है।

(घड़े का जल थाले में छोड़ती है)

राजा—यह ऋषि की कन्या कहीं दूसरे वर्ण की स्त्री मे तो नहीं उत्पन्न हुई है? परन्तु यह सन्देह व्यर्थ है। क्योंकि—

जब मेरा शुद्ध मन भी इस पर रीझ उठा है, तब यह निश्चित है कि इसका विवाह क्षत्रिय से हो सकता है। क्योंकि सज्जनों के मन में जिस बात पर शंका हो, वहाँ जो उनका मन गवाही दे, वही ठीक मान लेना उचित होता है॥ २१॥

फिर भी मैं इसका ठीक-ठीक पता लगाता हूँ।

शकुन्तला—(घबराकर) अरे रे रे! जल पडने मे घबराकर उडा हुआ यह भौंरा नई चमेली को छोडकर बार-बार मेरे ही मुँह पर मँडराने लगा है। (भौंरे से पीडित होने का अभिनय करती है)

राजा—(ललचता हुआ)—अरे भौंरे! तुम सचमुच बड़े भाग्यवान् हो। हम तो सच्ची बात का पता लगाने में ही लुट गये और तुम इस चञ्चल चितवनवाली काँपती हुई सुन्दरी को बार-बार छू रहे हो। उसके कानो के पास जाकर ऐसा धीरे-धीरे गुनगुना रहे हो कि जैसे कोई बडे भेद की बात उसे सुनाना चाहते हो। बार-बार उसके हाथों मे झटके जाने पर भी तुम उसके रसीले अधरों को पी रहे हो॥ २२॥

शकुन्तला—ण एसो दुट्ठो विरमदि। अण्णदो गमिस्सं। (पदान्तरे स्थित्वा सदृष्टिक्षेपम्) कहं इदो वि आअच्छदि? हला! परित्ताअह मं इमिणा दुव्विणीदेण महुअरेण अहिहूअमाणं। **[न एष दुष्टो विरमति। अन्यतो गमिष्यामि। कथमितोऽप्यागच्छति? हला! परित्रायेथां मामनेन दुर्विनीतेन मधुकरेण अभिभूयमानाम्।]**

उभे—(सस्मितम्) का अम्हे परित्तादुं? दुस्संदं एव्वं अक्कंद। राअरक्खिदव्वाइं तवोवणाइं णाम। **[के आवां परित्रातुम्? दुष्यन्तमेवाक्रन्द। राजरक्षितव्यानि तपोवनानि नाम।]**

राजा—अवसरोऽयमात्मानं प्रकाशयितुम्। न भेतव्यं न भेतव्यम्—(इत्यर्धोक्ते स्वगतम्) राजभावस्त्वभिज्ञातो भवेत्। भवतु, एवं तावदभिधास्ये।

शकुन्तला—(पदान्तरे स्थित्वा, सदृष्टिक्षेपम्) कहं इदो वि मं अणुसरदि? **[कथमितोऽपि मामनुसरति।]**

राजा—(सत्वरमुपसृत्य) आः!

कः पौरवे वसुमतीं शासति शासितरि दुर्विनीतानाम्।
अयमाचरत्यविनयं मुग्धासु तपस्विकन्यकासु॥ २३॥

(सर्वा राजानं दृष्ट्वा किञ्चिदिव सम्भ्रान्ताः)

अनसूया—अज्ज! च ण क्खु किंवि अच्चाहिदं। इअं णो पिअसही दुट्ठमहुअरेण अहिहूअमाणा कादरीभूदा। **[आर्य! न खलु किमप्यत्याहितम्। इयं नौ प्रियसखी दुष्टमधुकरेणाभिभूयमाना कातरीभूता।]** (इति शकुन्तलां दर्शयति)

राजा—(शकुन्तलाभिमुखो भूत्वा) अपि तपो वर्द्धते?

शकुन्तला—अरे! यह दुष्ट तो मानता ही नहीं। चलूँ, कहीं अन्यत्र चली जाऊँ। **(दूसरे स्थान पर जाकर और दृष्टि फेरकर)** अरे, क्या यह यहाँ भी आ पहुँचा? अब क्या करूँ? अरी सखियो! इस दुष्ट भौंरे से बचाओ, बचाओ। यह तो मुझे बहुत तंग कर रहा है।

दोनों—**(मुस्कराकर)** हम कौन होती हैं बचाने वाली? दुष्यन्त को पुकारो। क्योंकि तपोवन की रक्षा करना तो राजा का ही काम है।

राजा—अपना परिचय देने का यह अच्छा अवसर है। डरो मत! डरो मत! **(आधी बात कहकर फिर मन ही मन)** किन्तु इससे तो ये सब यह समझ जायेंगी कि मैं राजा हूँ। अच्छा, तो मैं फिर इस प्रकार कहता हूँ।

शकुन्तला—**(थोड़ी दूर जा और खड़ी होकर फिर देखती है)** क्या करूँ? यह तो यहाँ भी मेरा पीछा कर रहा है।

राजा—**(तुरन्त प्रकट होकर)** ओह!

दुष्टों को दण्ड देनेवाले पुरुवंशी दुष्यन्त के पृथ्वी पर राज्य करते समय कौन ऐसा है, जो भोली-भाली ऋषि-कन्याओं को छेड़ रहा है॥ २३॥

(राजा को देखकर वे सब कुछ सकपका जाती है)

अनसूया—आर्य! ऐसी कोई बड़ी भारी विपत्ति नहीं आयी हुई है। हमारी इस प्यारी सखी को एक भौंरे ने तंग कर रक्खा है, इसी से यह कुछ डर-सी गयी है। **(शकुन्तला की ओर संकेत करती है)**

राजा—**(शकुन्तला के सामने जाकर)** आपका तप तो सफल हो गया है न?

(शकुन्तला साध्वसावनतमुखी तिष्ठति)

अनसूया—दाणिं अदिहविससेलाहेण। हला सउंदले! गच्छ उडअं फलमिस्सं अग्घं उवहर। इदं पादोदअं भविस्सदि। [इदानीमतिथिविशेषलाभेन। हला शकुन्तले! गच्छोटजं फलमिश्रमर्घमुपहर। इदं पादोदकं भविष्यति।]

राजा—भवतीनां सूनृतयैव गिरा कृतमातिथ्यम्।

प्रियंवदा—तेण हि इमस्सिं दाव पच्छाअसीअलाए सत्तवण्णवेदिआए मुहुत्तअं उवविसिअ परिस्समविणोदं करेदु अज्जो। [तेन ह्यस्यां तावत् प्रच्छायशीतलायां सप्तपर्णवेदिकायां मुहूर्तमुपविश्य परिश्रमविनोदं करोत्वार्यः।]

राजा—नूनं यूयमप्यनेन कर्मणा परिश्रान्ताः।

अनसूया—हला सउंदले! उइदं णो पज्जुवासणं अदिहीणं। ता एहि एत्थ उवविसम्ह। [हला शकुन्तले! उचितं नः पर्युपासनमतिथीनाम्। तदेहि अत्रोपविशामः।]

(इति सर्वे उपविशन्ति)

शकुन्तला—(आत्मगतम्) किं णु क्खु इमं जणं पेक्खिअ तवोवणविरोहिणो विआरस्स गमणीअम्हि संवुत्ता? [किं नु खल्विमं जनं प्रेक्ष्य तपोवनविरोधिनो विकारस्य गमनीयाऽस्मि संवृत्ता?]

राजा—(सर्वा विलोक्य) अहो! समवयोरूपरमणीयं भवतीनां सौहार्दम्।

प्रियंवदा—(जनान्तिकम्) अणसूए! को णु क्खु एसो चउरगंभीराकिदी महुरं पिअं आलवंतो पहाववंदो विअ लक्खीअदि। [अनसूये! को नु खल्वेष चतुरगम्भीराकृतिर्मधुरं प्रियमालपन्प्रभाववानिव लक्ष्यते।]

अनसूया—(प्रियम्वदामम्रति) सहि! मम वि अत्थि कोदूहलं। पुच्छिसं दाव णं। (प्रकाशम्) अज्जस्स महुरालावजणिदो वीसंभो मं मंतावेदि—कदमो अज्जेण राएसिणो वंसो अलंकरीअदि

(शकुन्तला भय तथा लज्जा से नीचा मुँह करके चुप रह जाती है)

अनसूया—हाँ, आप जैसे अतिथि के आ जाने से इसका तप सफल ही समझिए। अच्छा शकुन्तला! जाकर कुटी से कुछ फल-फूल के साथ अर्घ्य तो ले आ। चरण धोने का जल यहाँ है ही।

राजा—आपने अपनी मीठी-मीठी बातों से ही मेरा अतिथ-सत्कार कर दिया।

प्रियंवदा—तो आर्य! चलिए, घनी छाया वाले इस छतिवन वृक्ष के तले जो शीतल चबूतरा है, वहीं क्षणभर बैठकर थकान मिटाइये।

राजा—आप सब भी तो यह काम करते-करते थक गई होंगी।

अनसूया—शकुन्तला! अतिथि की बात तो माननी ही होगी। आओ, यहाँ बैठ जायें।

(सभी बैठ जाती हैं)

शकुन्तला—(मन ही मन) इनको देखकर मेरे मन में न जाने क्यों ऐसी विचित्र उथल-पुथल मच रही है, जो तपोवन-निवासियों के मन में नहीं मचनी चाहिए।

राजा—(सबको देखकर) आप लोग एक जैसी रूपवती और एक-सी अवस्थावाली हैं। आप लोगों का पारस्परिक प्रेम मुझे बड़ा प्यारा लगता है।

प्रियंवदा—(धीरे से) अनसूया! ये चतुर, गम्भीर, प्रिय और मधुर बोलनेवाले कोई बड़े प्रभावशाली व्यक्ति हैं।

अनसूया—(प्रियंवदा से धीरे से) सखी! मुझे भी जानने की बडी उत्कण्ठा है। चलो, इन्हीं

राजा—परस्ताज्ज्ञायत एव। सर्वथा अप्सरःसम्भवैषा।

अनसूया—अह इं। [अथ किम्।]

राजा—उपपद्यते—

मानुषीषु कथं वा स्यादस्य रूपस्य सम्भवः।
न प्रभातरलं ज्योतिरुदेति वसुधातलात्॥ २४॥

(शकुन्तलाऽधोमुखी तिष्ठति)

राजा—(आत्मगतम्) हन्त! लब्धावकाशो मे मनोरथः। किन्तु सख्याः परिहासोदाहृतां वरप्रार्थनां श्रुत्वा धृतद्वैधीभावकातरं मे मनः।

प्रियंवदा—(सस्मितं शकुन्तलां विलोक्य नायकाभिमुखी भूत्वा) पुणो वि वत्तुकामो विअ अज्जो। **[पुनरपि वक्तुकाम इवार्यः।]**

(शकुन्तला सखीमङ्गुल्या तर्जयति)

राजा—सम्यगुपलक्षितं भवत्या। अस्ति नः सच्चरितश्रवणलोभादन्यदपि प्रष्टव्यम्।

प्रियंवदा—अलं विआरिअ। अणिअंतणाणुओओ तवस्सिअणो णाम। **[अलं विचार्य। अनियन्त्रणानुयोगस्तपस्विजनो नाम।]**

राजा—इति सखीं ते ज्ञातुमिच्छामि—

वैखानसं किमनया व्रतमा प्रदानाद्व्यापाररोधि मदनस्य निषेवितव्यम्।
अत्यन्तमेव मदिरेक्षणवल्लभाभिराहो निवत्स्यति समं हरिणाङ्गनाभिः॥ २५॥

राजा—बस-बस, आगे की बात मैं समझ गया कि ये अप्सरा की कन्या हैं।

अनसूया—जी हाँ।

राजा—ठीक ही है। अन्यथा—

मनुष्यों में ऐसा रूप भला कहाँ मिलता है। चञ्चल चमकवाली बिजली पृथ्वीतल से नहीं निकला करती॥ २४॥

(शकुन्तला सिर झुका लेती है)

राजा—(मन ही मन) चलो, मेरे मनोरथ को कुछ सहारा तो मिला। परन्तु इसकी सखी प्रियंवदा ने हँसी-हँसी में इसके वर मिलने की भी बात कही थी। इसी से अब भी मेरा मन दुविधा में पड़ा हुआ है।

प्रियंवदा—(मुस्कराती हुई पहले शकुन्तला और फिर राजा की ओर देखकर) आर्य! जैसे कुछ और भी पूछना चाहते हैं?

(शकुन्तला सखी को अंगुली दिखलाकर धमकाती है)

राजा—आपने हमारे मन की बात भलीभाँति जान ली है। इनकी सुन्दर कथा सुनने के लोभवश हम कुछ और पूछना चाहते हैं।

प्रियंवदा—तो संकोच मत कीजिये। तपस्वियों से तो आप बेखटके कुछ भी पूछ सकते हैं।

राजा—अपकी सखी के सम्बन्ध में हम यह जानना चाहते हैं कि—

इन्होंने कामदेव की गति-विधि को रोकने वाला यह जो तपस्वियों जैसा बाना बनाया है, यह विवाह होने तक ही रहेगा या ये अपना सारा जीवन मदभरी आँखों के कारण प्यारी लगनेवाली हरिणियों के बीच में रहकर यों ही बितायेंगी॥ २५॥

प्रियंवदा—अज्ज ! धम्माचरणे वि परवसो अअं जणो। गुरुणो उण से अणुरूववरप्पदाणे संकप्पो। [आर्य ! धर्माचरणेऽपि परवशोऽयं जनः। गुरोः पुनरस्या अनुरूपवरप्रदाने सङ्कल्पः।]

राजा—(आत्मगतम्) न दुरवापेयं खलु प्रार्थना।

भव हृदय ! साभिलाषं सम्प्रति सन्देहनिर्णयो जातः।
आशङ्कसे यदग्निं तदिदं स्पर्शक्षमं रत्नम्॥ २६॥

शकुन्तला—(सरोषमिव) अणसूए ! गमिस्सं अहं। [अनसूये ! गमिष्याम्यहम्।]

अनसूया—किं णिमित्तं ? [किन्निमित्तम् ?]

शकुन्तला—इमं असंबद्धप्पलाविणिं पिअंवदं अज्जाए गोदमीए णिवेदइस्सं। [इमामसम्बद्ध-प्रलापिनीं प्रियंवदामार्यायै गौतम्यै निवेदयिष्यामि।]

अनसूया—सहि ! ण जुत्तं अस्समवासिणो अकिदसक्कारं अदिहिविसेसं विसज्जिअ सच्छंददो गमणं। [सखि ! न युक्तमाश्रमवासिनोऽकृतसत्कारमतिथिविशेषं विसृज्य स्वच्छन्दतो गमनम्।]

(शकुन्तला न किञ्चिदुक्त्वा प्रस्थितैव)

राजा—(स्वगतम्) आः ! कथं गच्छति ? (ग्रहीतुमिच्छन्निगृह्यात्मानम्)

अनुयास्यन्मुनितनयां सहसा विनयेन वारितप्रसरः।
स्थानादनुच्चलन्नपि गत्वेव पुनः प्रतिनिवृत्तः॥ २७॥

प्रियंवदा—(शकुन्तलां निरुध्य) हला ! ण दे जुत्तं गंतु। [हला ! न ते युक्तं गन्तुम्।]

शकुन्तला—(सभ्रूभङ्गम्) किं णिमित्तं ? [किन्निमित्तम् ?]

प्रियंवदा—आर्य ! धर्म के काम भी ये अपने मन से नहीं कर सकतीं। फिर भी पिताजी का सङ्कल्प है कि यदि इसके योग्य वर मिल जायेगा तो विवाह कर देंगे।

राजा—(मन ही मन) इस सङ्कल्प का पूरा होना कठिन नहीं है।

हृदय ! तू आशा मत छोड। जो दुविधा थी, वह तो जाती रही। क्योंकि जिसे तू अग्नि समझकर छूने से डरता था, वह तो छूने के योग्य रत्न निकला॥ २६॥

शकुन्तला—(कुपित जैसी होकर) अनसूये ! मैं तो जा रही हूँ।

अनसूया—किस लिए ?

शकुन्तला—इस ऊटपटांग बकवास करनेवाली प्रियंवदा की सब बातें जाकर आर्या गौतमी से कह आती हूँ।

अनसूया—सखी ! ऐसे बडे अतिथि का सत्कार किये बिना उन्हें छोड़कर स्वेच्छा से चले जाना हम आश्रमवासियों के लिए अच्छा नहीं है।

(शकुन्तला बिना कुछ कहे चलने को उद्यत होती है)

राजा—(मन ही मन) अरे, जाती क्यों हो ? **(उसे रोकने की इच्छा होती है, किन्तु फिर अपने को रोककर)**

इस मुनि-कन्या के पीछे जाते-जाते लाज के कारण मैं सहसा रुक गया और अपने स्थान से हिला तक नहीं। फिर भी मुझे ऐसा लग रहा है कि मानो मैं कुछ दूर जाकर लौट आया हूँ॥ २७॥

प्रियंवदा—(शकुन्तला को रोककर) सखी ! तुम्हारा इस प्रकार जाना ठीक नहीं है।

शकुन्तला—(भौंहें चढाकर) क्यों ?

प्रियंवदा—रुक्खसेअणे दुवे धारेसि मे। एहि जाव; अत्ताणं मोचिअ तदो गमिस्ससि। [वृक्षसेचने द्वे धारयसि मे। एहि तावत्; आत्मानं मोचयित्वा ततो गमिष्यसि।] (इति बलादेनां निवर्तयति)

राजा—भद्रे! वृक्षसेचनादेव परिश्रान्तामत्रभवतीं लक्षये। तथा ह्यस्याः—

स्रस्तांसावतिमात्रलोहिततलौ बाहू घटोत्क्षेपणा-
द्यापि स्तनवेपथुं जनयति श्वासः प्रमाणाधिकः।
बद्धं कर्णशिरीषरोधि वदने घर्माम्भसां जालकं
बन्धे संसनि चैकहस्तयमिताः पर्याकुला मूर्धजाः॥ २८॥

तदहमेनामनृणां करोमि। (इत्यङ्गुलीयं दातुमिच्छति)

(उभे नाममुद्राक्षराण्यनुवाच्य परस्परमवलोकयतः)

राजा—अलमस्मानन्यथा सम्भाव्य। राज्ञः परिग्रहोऽयमिति राजपुरुषं मामवगच्छथ।

प्रियंवदा—तेण हि णारिहदि एदं अंगुलीअअं अंगुलिविओअं। अज्जस्स वअणेण अणिरिणा दाणिं एसा। (किञ्चिद्विहस्य) हला सउंदले! मोइदासि अणुअंपिणा अज्जेण अहवा महाराएण। गच्छ दाणिं। [तेन हि नार्हत्येतदङ्गुलीयकमङ्गुलिवियोगम्। आर्यस्य वचनेनानृणेदानीमेषा। हला शकुन्तले! मोचितास्यनुकम्पिना आर्येण अथवा महाराजेन। गच्छेदानीम्।]

शकुन्तला—(आत्मगतम्) जइ अत्तणो पहविस्सं। (प्रकाशम्) का तुमं विसज्जिदव्वस्स रुंधिदव्वस्स वा? [यद्यात्मनः प्रभविष्यामि। का त्वं विसर्जितव्यस्य रोद्धव्यस्य वा?]

राजा—(शकुन्तलां विलोक्य, आत्मगतम्) किं नु खलु यथा वयमस्यामेवमियमप्यस्मान्प्रति स्यात्। अथवा लब्धावकाशा मे प्रार्थना। कुतः—

प्रियंवदा—क्योंकि तुम पर अभी दो पौधे और सींचने का कर्ज है। अपना कर्ज चुका करके ही तुम जा सकोगी। (उसे बलपूर्वक रोकती है)

राजा—भद्रे! पौधों को सींचने से ही आपकी सखी थकी हुई-सी दीख रही हैं। क्योंकि—

घड़े उठाते-उठाते इनके दोनों हाथों की हथेलियाँ लाल हो गयी हैं, इनके बार-बार काँपते हुए स्तन यह बता रहे हैं कि थकान से इनकी साँस फूल रही है। कानों में पहने हुए सिरस के फूल नहीं हिल रहे हैं। क्योंकि पसीने की बूँदों से उनकी पंखुड़ियाँ गालों पर चिपक गयी हैं और जूड़ा खुल जाने से ये अपनी बिखरी हुई लटें एक हाथ से किसी प्रकार सँभाले हुए हैं॥ २८॥

सो इनका ऋण मैं चुकाये देता हूँ। (यह कहकर राजा अंगूठी देना चाहता है)

(उस पर दुष्यन्त का नाम पढ़कर अनसूया और प्रियंवदा दोनों एक-दूसरी को देखती हैं)

राजा—मुझे आप कुछ और न समझ बैठियेगा। यह अंगूठी मुझे राजा से पुरस्कार में मिली है। मुझे आप राजपुरुष ही समझिए।

प्रियंवदा—तब तो इस अंगूठी को आपकी अँगुली मे अलग करना अनुचित है। आपके कहने भर से ही ये ऋण से मुक्त हो गयीं। (कुछ मुस्कराकर) सखी शकुन्तला! इनकी या यों कहो कि महाराज की कृपा से तुम ऋणभार से मुक्त हो गयी। अब जा सकती हो।

शकुन्तला—(मन ही मन) अपना मन काबू में हो, तब तो जाऊँ। (प्रकट में) मुझे जाने देने या रोकनेवाली तुम कौन हो?

राजा—(शकुन्तला को देखकर, मन ही मन) कहीं यह भी तो हम पर वैसे ही नहीं रीझ

वाचं न मिश्रयति यद्यपि मद्वचोभिः कर्णं ददात्यभिमुखं मयि भाषमाणे।
कामं न तिष्ठति मदाननसम्मुखीना भूयिष्ठमन्यविषया न तु दृष्टिरस्याः॥ २९॥

(नेपथ्ये)

भो भोस्तपस्विनः! सन्निहितास्तपोवनसत्त्वरक्षायै भवत। प्रत्यासन्नः किल मृगयाविहारी पार्थिवो दुष्यन्तः।

तुरगखुरहतस्तथा हि रेणुर्विटपविषक्तजलार्द्रवल्कलेषु।
पतति परिणतारुणप्रकाशः शलभसमूह इवाश्रमद्रुमेषु॥ ३०॥

अपि च—

तीव्राघातप्रतिहततरुः स्कन्धलग्नैकदन्तः
पादाकृष्टव्रततिवलयासङ्गसञ्जातपाशः ।
मूर्तो विघ्नस्तपस इव नो भिन्नसारङ्गयूथो
धर्मारण्यं प्रविशति गजः स्यन्दनाल्लोकभीतः॥ ३१॥

(सर्वाः कर्णं दत्त्वा किञ्चिदिव सम्भ्रान्ताः)

राजा—(आत्मगतम्) अहो धिक्! सैनिका अस्मदन्वेषिणस्तपोवनमुपरुन्धन्ति। भवतु; प्रतिगमिष्यामस्तावत्।

गई है, जैसे हम इस पर रीझे हुए हैं? मुझे तो जान पडता है कि हमारे मनोरथ पूर्ण होने के दिन आ गये। क्योंकि—

यद्यपि यह स्वयं मुझसे बात नहीं करती, फिर भी जब मैं बोलता हूँ, तब कान लगाकर गौर से मेरी बातें सुनने लगती है। यद्यपि मेरे सामने मुँह करके नहीं बैठती, फिर भी इसकी आँखें मेरी ही ओर लगी रहती हैं॥ २९॥

(नेपथ्य में)

हे तपस्वियो! तपोवन के प्राणियों की रक्षा के लिए सन्नद्ध हो जाओ। क्योंकि आखेट का प्रेमी राजा दुष्यन्त आ पहुँचा है।

क्योंकि उसके घोडों की टापों से उठी हुई साँझ की लाली जैसी लाल-लाल धूल-टिड्डी-दल के समान उडकर आश्रम के उन वृक्षों पर पड रही है, जिनकी शाखाओं पर गीले वल्कल के वस्त्र फैलाये हुए हैं॥ ३०॥

और देखो—

राजा के रथ से डरा हुआ यह जंगली हाथी हमारी तपस्या के लिए साक्षात् विघ्न बनकर हरिणों के झुण्ड को तितर-बितर करता हुआ तपोवन में घुसा आ रहा है। इसने अपने मस्तक की करारी टक्कर से एक वृक्ष उखाड़ दिया है, जिसमें उसका एक दाँत फँसा हुआ है और टूटी हुई लताएँ फन्दे के समान उसके पैरों में लिपटी हुई हैं॥ ३१॥

(यह सुनकर सब कुमारियाँ कुछ घबरा जाती हैं)

राजा—(मन ही मन) अरे, धिक्कार है इन सैनिकों को। जान पडता है कि हमें ढूँढने के लिए ये सारे तपोवन को रौंदे डाल रहे हैं। अब हमें उधर ही चलना चाहिए।

सख्यौ—अज्ज ! इमिणा अरण्णअवुत्तंतेण पज्जाउला म्ह। अणुजाणीहि णो उडअगमणस्स।

[आर्य ! अनेनारण्यकवृत्तान्तेन पर्याकुलाः स्मः। अनुजानीहि न उटजगमनाय।]

राजा—(ससम्भ्रमम्) गच्छन्तु भवत्यः। वयमप्याश्रमपीडा यथा न भवति तथा प्रयतिष्यामहे।

(सर्वे उत्तिष्ठन्ति)

सख्यौ—अज्ज ! असंभवाविदअदिहिसक्कारं भूओ वि पेक्खणणिमित्तं लज्जेमो अज्जं विण्णविदुं।

[आर्य ! असम्भावितातिथिसत्कारं भूयोऽपि प्रेक्षणनिमत्तं लज्जावहे आर्य विज्ञापयितुम्।]

राजा—मा मैवम्। दर्शनेनैवात्र भवतीनां पुरस्कृतोऽस्मि।

(शकुन्तला राजानमवलोकयन्ती सव्याजं विलम्व्य सह सखीभ्यां निष्क्रान्ता)

राजा—मन्दौत्सुक्योऽस्मि नगरगमनं प्रति। यावदनुयात्रिकान्समेत्य नातिदूरे तपोवनस्य निवेशयेयम्। न खलु शक्नोमि शकुन्तलाव्यापारादात्मानं निवर्तयितुम्। मम हि—

गच्छति पुरः शरीरं धावति पश्चादसंस्तुतं चेतः।
चीनांशुकमिव केतोः प्रतिवातं नीयमानस्य॥ ३२॥

(इति निष्क्रान्ताः सर्वे)

॥ इति प्रथमोऽङ्कः ॥

दोनों—आर्य ! इस जंगली हाथी के आगमन की बात सुनकर हम लोग डर गयी हैं। अब हमें कुटी में जाने की आज्ञा दीजिए।

राजा—(**कुछ घबराहट के साथ**) आप लोग चलें। मैं भी ऐसा प्रयत्न करता हूँ कि जिससे तपोवन के निवासियों को कष्ट न हो।

(सभी उठती हैं)

दोनों—आर्य ! हमने आपका कुछ भी सत्कार नहीं किया। इसलिए आपसे यह प्रार्थना करने में बड़ा संकोच हो रहा है कि हमें दर्शन दीजिएगा।

राजा—नहीं-नहीं, ऐसा न कहिए। आप लोगों के दर्शन से ही हमें फिर बहुत बडा पुरस्कार मिल गया।

(राजा को देखती हुई शकुन्तला कुशा चुभने और शाखा में धोती फँसने का बहाना करके थोड़ा रुककर सखियों के साथ चली जाती है)

राजा—नगर में लौटने की सारी उत्सुकता जाती रही। इसलिए आश्रम के पास ही सैनिकों के साथ डेरा डालता हूँ। ऐसा लगता है कि शकुन्तला के इस प्रेम-व्यवहार से मैं छुटकारा न पा सकूँगा। क्योंकि—

जैसे पवन के सामने वाली रेशमी झण्डी पीछे को फरफराती है, वैसे ही मेरा शरीर ज्यों-ज्यों आगे बढ़ता है, त्यों-त्यों चञ्चल मन पीछे की ओर दौड़ रहा है॥ ३२॥

(सभी का प्रस्थान)

॥ पहला अङ्क समाप्त ॥

द्वितीयोऽङ्कः

(ततः प्रविशति विषण्णो विदूषकः)

विदूषकः—(निःश्वस्य) भो! दिट्ठं। एदस्स मअआसीलस्स रण्णो वअस्सभावेण णिव्विण्णो म्हि। अअं मओ अअं वराहो अअं सद्दूलो त्ति मज्झण्णे वि गिम्हविरअपाअवच्छाआसु वणराईसु आहिण्डीअदि अडवीदो अडवी। पत्तसंकरकसाआइं कडुआइं गिरिणईजलाइं पीअंति। अणिअदवेलं सुल्लमंसभूइट्ठो आहारो अण्हीअदि। तुरगाणुधावणकंडिदसंधिणो रत्तिम्मि वि णिकामं सइदव्वं णत्थि। तदो महंते एव्व पच्चूसे दासीए-पुत्तेहिं सउणिलुद्धएहिं वणग्गहणकोलाहलेण पडिबोधिदो म्हि। एत्तएण दाणिं वि पीडा ण णिक्कमदि। तदो गंडस्स उवरि पिंडओ संवुत्तो। हिओ किल अम्हेसु ओहीणेसु तत्तहोदो मआणुसारेण अस्समपदं पविट्ठस्स तावसकण्णआ सउंदला मम अधण्णदाए दंसिदा। संपदं णअरगमणस्स मणं कहं वि ण करेदि। अज्ज वि से तं एव्व चिंतअंतस्स अक्खीसु पभादं आसि। का गदी ? जाव णं किदाचारपरिक्कमं पेक्खामि। (इति परिक्रम्यावलोक्य च) एसो बाणासणहत्थाहिं जवणीहिं वणपुप्फमालाधारिणीहिं पडिवुदो इदो एव्व आअच्छदि पिअवअस्सो। होदु; अंगभंगविअलो विअ भविअ चिट्ठिस्सं। जइ एव्वं वि णाम विस्समं लहेअं। [**भो! दृष्टम्। एतस्य मृगयाशीलस्य राज्ञो वयस्यभावेन निर्विण्णोऽस्मि। अयं मृगोऽयं वराहोऽयं शार्दूल इति मध्याह्नेऽपि ग्रीष्मविरलपादपच्छायासु वनराजीष्वाहिण्ड्यतेऽटवीतोऽटवी। पत्रसङ्करकषायाणि कटूनि गिरिनदीजलानि पीयन्ते। अनियतवेलं शूल्यमांसभूयिष्ठ आहारो भुज्यते। तुरगानुधावनकण्डितसन्धे रात्रावपि निकामं शयितव्यं नास्ति। ततो महत्येव प्रत्यूषे दास्याः-पुत्रैः शकुनिलुब्धकैर्वनग्रहणकोलाहलेन प्रतिबोधितोऽस्मि। इयतेदानीमपि पीडा न निष्क्रामति। ततो गण्डस्योपरि पिण्डकः संवृत्तः। ह्यः किलास्मास्ववहीनेषु तत्रभवतो मृगानुसारेणाश्रमपदं प्रविष्टस्य तापसकन्यका शकुन्तला ममाधन्यतया दर्शिता। साम्प्रतं नगरगमनस्य मनः कथमपि न करोति। अद्यापि तस्य तामेव चिन्तयतोऽक्ष्णोः**

(उदास मन से विदूषक का प्रवेश)

विदूषक—(लम्बी साँस लेता हुआ) बस देख चुके। इस शिकारी राजा की मित्रता से तो जी ऊब गया है। भरी दुपहरी में भी एक वन से दूसरे वन में भटकते हुए उन जंगली प्रदेशों में होकर चलना पडता है, जहाँ गर्मी के कारण पेडों में कहीं-कहीं छाँह रह गई है और दिन-रात यही शोर कान फाडे डालता है—यह मृग आया, वह सूअर निकला, यह सिंह रहा। फिर सड़े हुए पत्तों से मिश्रित जलवाली नदियों का कसैला और कडुआ पानी पीना पड़ता है और देर-सबेर लोहे की सीखों पर भुना हुआ मांस खाने को मिलता है। घोडे के पीछे दौडते-दौड़ते शरीर के जोड-जोड ऐसे ढीले पड़ गये हैं कि रात में ठीक से नींद भी नहीं आती। उसपर ये दासीपुत्र चिडीमार भोर में ही—'चलो वन को, चलो वन को'—यों चिल्ला-चिल्लाकर ऐसा शोर मचाते हैं कि नींद उचट जाती है। अभी यह विपत्ति टली ही नहीं थी कि उधर फोड़े के ऊपर फुन्सी के समान दूसरी विपत्ति आ टपकी। सुनते हैं कि कल हम लोगों का साथ छूट जाने पर मृग का पीछा करते-करते महाराज दुष्यन्त तपस्वियों के आश्रम में जा पहुँचे। मेरे दुर्भाग्य से वहाँ उन्हें मुनिकन्या शकुन्तला दीख गई। अब किसी भी प्रकार उनका मन नगर लौटने को कहता ही नहीं। आज भी रात भर उसी की चिन्ता में जागते हुए उनकी आँखों

प्रभातमासीत्। का गतिः? यावत्तं कृताचारपरिक्रमं पश्यामि। एष बाणासनहस्ताभिर्यवनी-भिर्वनपुष्पमालाधारिणीभिः परिवृत इत एवागच्छति प्रियवयस्यः। भवतु; अङ्गभङ्गविकल इव भूत्वा स्थास्यामि। यद्येवमपि नाम विश्रामं लभेय।] (इति दण्डकाष्ठमवलम्ब्य स्थितः)

(ततः प्रविशति यथानिर्दिष्टपरिवारो राजा)

राजा—(आत्मगतम्)

कामं प्रिया न सुलभा मनस्तु तद्भावदर्शनाश्वासि।
अकृतार्थेऽपि मनसिजे रतिमुभयप्रार्थना कुरुते॥ १॥

(स्मितं कृत्वा) एवमात्माभिप्रायसम्भावितेष्टजनचित्तवृत्तिः प्रार्थयिता विडम्ब्यते। तथा हि—

स्निग्धं वीक्षितमन्यतोऽपि नयने यत्प्रेरयन्त्या तया
यातं यच्च नितम्बयोर्गुरुतया मन्दं विलासादिव।
मा गा इत्युपरुद्धया यदपि सा सासूयमुक्ता सखी
सर्वं तत्किल मत्परायणमहो कामी स्वतां पश्यति॥ २॥

विदूषकः—(तथास्थित एव) भो वअस्स! ण मे हत्थपाआ पसरंति। ता वाआमेत्तएण जई-करीयसि। जेदु जेदु भवं [भो वयस्य! न मे हस्तपादाः प्रसरन्ति। तद् वाचा मात्रेण जयीक्रियते। जयतु जयतु भवान्।]

राजा—(सस्मितम्) कुतोऽयं गात्रोपघातः?

ने सबेरा कर दिया। क्या करूँ? चलूँ, वे नित्यकर्म कर चुके हों तो उनसे बातें करूँ। (घूम और देखकर) अरे, मेरे मित्र तो इधर ही चले आ रहे हैं, जिनके साथ हाथ में धनुष लिये और गले में जंगली फूलों की माला पहने हुए बहुत-सी यवनी सेविकाएँ भी चली आ रही हैं। अच्छी बात है, मै भी लुंज-पुंज-सा बनकर खडा हो जाता हूँ। सम्भव है कि इसी बहाने थोडा विश्राम ही मिल जाय। (लाठी टेककर खड़ा हो जाता है)

(पूर्वोक्त निर्देशानुसार यवनी सेविकाओं के साथ राजा दुष्यन्त का प्रवेश)

राजा—(मन ही मन) यद्यपि प्यारी का मिलना कठिन है, किन्तु उसकी चाल-ढाल देखने से मन को बड़ा सन्तोष मिल रहा है। हम दोनों का मिलन भले ही न हो, किन्तु इतना तो सन्तोष है कि मिलने की उतावली दोनो ओर एक-सी है॥ १॥

(मुस्कराकर) जो प्रेमी अपनी प्रियतमा के मन को अपने मन से परखता है, वह इसी प्रकार धोखा खाता है और देखो—

जब वह आँखें घुमाती थी, तब मै समझता था कि वह मुझे ही प्यार-भरी आँखों से देख रही है। नितम्बों के भारी होने के कारण जब वह धीरे-धीरे चलती थी, तब मै समझता था कि वह मुझे अपनी चटक-मटक दिखा रही है। उसकी सखियों ने जब उसे जाने से रोका, उस समय अपनी सखियों पर जो वह लाल-पीली हुई, तभी मैंने समझा कि यह सब मेरे ही प्रेम के कारण हो रहा है। आह, कामी को सर्वत्र अपने ही स्वार्थ की बात दिखलायी देती है॥ २॥

विदूषक—(उसी मुद्रा में खडा हुआ) मित्र! मेरे हाथ-पैर तो फैल ही नहीं रहे हैं, इसलिए मुँह से ही मैं आपकी जय-जयकार करता हूँ। आपकी जय हो, जय हो।

राजा—तुम्हारा अंग-भंग कैसे हो गया?

विदूषकः—कुदो किल सअं अच्छी आउलीकरिअ अस्सुकारणं पुच्छेसि ? [कुतः किल स्वयमक्ष्याकुलीकृत्याश्रुकारणं पृच्छसि ?]

राजा—न खल्ववगच्छामि ?

विदूषकः—भो वअस्स ! जं वेदसो कुज्जलीलं विडंबेदि तं किं अत्तणो पहावेण उद णईवेअस्स ? [भो वयस्य ! यद्वेतसः कुब्जलीलां विडम्बयति तत्किमात्मनः प्रभावेण उत नदीवेगस्य।]

राजा—नदीवेगस्तत्र कारणम्।

विदूषकः—मम वि भवं। [ममापि भवान्।]

राजा—कथमिव ?

विदूषकः—एव्वं राअकज्जाणि उज्झिअ तारिसे आउलप्पदेसे वणचरवुत्तिणा तुए होदव्वं। जं सच्चं पच्चहं सावदसमुच्छारणेहिं संखोहिअसंधिबंधाणं मम गत्ताणं अणीसो म्हि संवुत्तो। ता पसादइस्सं विसज्जिदुं मं एक्काहं वि दाव विस्समिदुं। [एवं राजकार्याण्युज्झित्वा तादृश आकुलप्रदेशे वनचरवृत्तिना त्वया भवितव्यम्। यत्सत्यं प्रत्यहं श्वापदसमुत्सारणैः सङ्क्षोभितसन्धिबन्धानां मम गात्राणामनीशोऽस्मि संवृत्तः। तत्प्रसादयिष्यामि विसर्जितुं मामेकाहमपि तावद्विश्रमितुम्।]

राजा—(स्वगतम्) अयं चैवमाह, ममापि कण्वसुतामनुस्मृत्य मृगयाविक्लवं चेतः। कुतः ?

न नमयितुमधिज्यमस्मि शक्तो धनुरिदमाहितसायकं मृगेषु।
सहवसतिमुपेत्य यैः प्रियायाः कृत इव मुग्धविलोकितोपदेशः ॥ ३ ॥

विदूषकः—(राजो मुखं विलोक्य) अत्तभवं किं वि हिअए करिअ मंतेदि। अरण्णे मए रुदिअं आसि। [अत्रभवान्किमपि हृदये कृत्वा मन्त्रयते। अरण्ये मया रुदितमासीत्।]

राजा—(सस्मितम्) किमन्यत् ? अनतिक्रमणीयं मे सुहृद्वाक्यमिति स्थितोऽस्मि।

विदूषक—कैसे क्या ? स्वयं आँखों मे अँगुली कोंचकर आप पूछ रहे हैं कि आँसू कैसे आए ?

राजा—मैं तो कुछ भी नहीं समझ सका।

विदूषक—अच्छा मित्र ! यह तो बताइए कि नदी में जो बेंत की लता कुबडी बनी खडी रहती है, वह अपने मन से वैसी रहती है या नदी के वेग के कारण टेढी हो जाती है ?

राजा—नदी का वेग ही उसका कारण है।

विदूषक—तो मेरे भी अङ्ग-भङ्ग के कारण आप ही हैं।

राजा—वह कैसे ?

विदूषक—आप तो राज्य-कार्य छोडकर इस वीहड़ वन में जंगलियों के समान घूम रहे हैं। यहाँ जंगली जन्तुओं का पीछा करते-करते मेरे अङ्गों के जोड-जोड टूट गये हैं, जिससे हिला भी नहीं जाता। अब आप कृपा करके मुझे तो कम से कम एक दिन विश्राम करने की आज्ञा दे ही दीजिए।

राजा—(मन ही मन) इधर यह ऐसा कह रहा है, उधर कण्व की कन्या का ध्यान करते-करते मेरा मन भी आखेट से ऊब गया है। क्योंकि—

जिन हरिणों ने शकुन्तला के साथ रहकर उसे भोली चितवन की शिक्षा दी है, उन्हें मारने के लिए यह बाण चढाया हुआ धनुष मुझसे खींचते ही नहीं बनता ॥ ३ ॥

विदूषक—(राजा का मुँह निहारकर) आप तो मन ही मन न जाने क्या बडबड़ा रहे हैं। मैं यह सब कहकर क्या जंगल में रोता रहा।

राजा—(मुस्कराकर) नहीं-नहीं, मै भी यही सोच रहा था कि मित्र की बात नहीं टालनी चाहिए। इसीलिए मैं चुप हो गया था।

विदूषकः—चिरं जीअ। [**चिरं जीव।**] (इति गन्तुमिच्छति)

राजा—वयस्य! तिष्ठ। सावशेषं मे वचः।

विदूषकः—आणवेदु भवं। [**आज्ञापयतु भवान्।**]

राजा—विश्रान्तेन भवता ममाप्यनायासे कर्मणि सहायेन भवितव्यम्।

विदूषकः—किं मोदअखंडिआए? तेण हि अअं सुगहीदो खणो। [**किं मोदकखण्डिकायाम्? तेन ह्ययं सुगृहीतः क्षणः।**]

राजा—यत्र वक्ष्यामि। कः कोऽत्र भोः?

(प्रविश्य)

दौवारिकः—(प्रणम्य) आणवेदु भट्टा। [**आज्ञापयतु भर्ता।**]

राजा—रैवतक! सेनापतिस्तावदाह्वयताम्।

दौवारिकः—तह। (इति निष्क्रम्य सेनापतिना सह पुनः प्रविश्य) एसो अण्णावअणुक्कंठो भट्टा इदो दिण्णदिट्ठी एव्व चिट्ठदि। उवसप्पदु अज्जो। [**तथा। एष आज्ञावचनोत्कण्ठो भर्ता इतो दत्तदृष्टिरेव तिष्ठति। उपसर्पत्वार्यः।**]

सेनापतिः—(राजानमवलोक्य) दृष्टदोषाऽपि स्वामिनि मृगया केवलं गुण एवं संवृत्ता। तथा हि देवः—

अनवरतधनुर्ज्यास्फालनक्रूरपूर्वं रविकिरणसहिष्णु स्वेदलेशैरभिन्नम्।
अपचितमपि गात्रं व्यायतत्वादलक्ष्यं गिरिचर इव नागः प्राणसारं बिभर्ति॥ ४॥

विदूषक—बहुत दिन जीते रहिए मित्र! **(जाना चाहता है)**

राजा—मित्र! ठहरो, मेरी बात अभी पूरी नहीं हुई है।

विदूषक—तो और भी कहिये महाराज।

राजा—देखो, विश्राम कर लो तो आकर मेरे भी एक सहज काम में सहायता कर देना।

विदूषक—क्या लड्डू खाने हैं? तब तो उसके लिए इससे बढकर और कौन-सा उपयुक्त अवसर हो सकता है?

राजा—ठहरो, बताता हूँ। अरे, यहाँ कौन है?

(प्रवेश कर)

दौवारिक—**(प्रणाम करके)** आज्ञा कीजिए स्वामी।

राजा—रैवतक! सेनापति को बुला लाओ।

दौवारिक—अच्छा। **(बाहर जाकर सेनापति को साथ लेकर लौटता है)** यह सामने इधर ही दृष्टि किये हुए स्वामी बैठे हैं और कुछ आज्ञा देने ही वाले हैं। आगे चलिए आर्य।

सेनापति—**(राजा को देखकर)** लोग आखेट को इतना बुरा बताते हैं, किन्तु स्वामी को तो इससे बड़ा लाभ हुआ है। क्योंकि—

पहाड़ों में घूमनेवाले हाथी के समान इनके बलवान् शरीर के आगे का भाग निरन्तर धनुष की डोरी खींचने से इतना कड़ा हो गया है कि उस पर न तो धूप का प्रभाव पड़ता है और न पसीना ही छूटता है। बहुत दौड़-धूप के कारण यद्यपि ये दुबले हो गये हैं, किन्तु पुट्ठों के पक्के होने के कारण इनका दुबलापन दिखाई नहीं देता॥ ४॥

(उपेत्य) जयतु जयतु स्वामी; गृहीतश्वापदमरण्यम्। किमद्याप्यवस्थीयते।

राजा—मन्दोत्साहः कृतोऽस्मि मृगयापवादिना माढव्येन।

सेनापतिः—(जनान्तिकम्) सखे! स्थिरप्रतिबन्धो भव। अहं तावत्स्वामिनश्चित्तवृत्तिमनुवर्तिष्ये। (प्रकाशम्) प्रलपत्वेष वैधेयः। ननु प्रभुरेव निदर्शनम्—

मेदश्छेदकृशोदरं लघु भवत्युत्थानयोग्यं वपुः
सत्त्वानामपि लक्ष्यते विकृतिमच्चित्तं भयक्रोधयोः।
उत्कर्षः स च धन्विनां यदिषवः सिध्यन्ति लक्ष्ये चले
मिथ्यैव व्यसनं वदन्ति मृगयामीदृग्विनोदः कुतः ?॥५॥

विदूषकः—अवेहि रे उत्साहहेतुअ! अत्तभवं पकिदिं आपण्णो। तुमं दाव अडवीदो अडवीं आहिंडंतो णरणासिआलोलुवस्स जिण्णरिच्छस्स कस्स वि मुहे पडिस्ससि। [अपेहि रे उत्साहहेतुक! अत्रभवान्प्रकृतिमापन्नः। त्वं तावदटवीतोऽटवीमाहिण्डमानो नरनासिकालोलुपस्य जीर्णर्क्षस्य कस्यापि मुखे पतिष्यसि।]

राजा—भद्र सेनापते! आश्रमसन्निकृष्टे स्थिताः स्मः। अतस्ते वाचो नाभिनन्दामि। अद्य तावत्—

गाहन्तां महिषा निपानसलिलं शृङ्गैर्मुहुस्ताडितं
छायाबद्धकदम्बकं मृगकुलं रोमन्थमभ्यस्यतु।
विश्रब्धं क्रियतां वराहपतिभिर्मुस्ताक्षतिः पल्वले
विश्रामं लभतामिदं च शिथिलज्याबन्धमस्मद्धनुः॥६॥

(पास जाकर) स्वामी की जय हो, जय हो। हमने वन में आखेट के लिए पशुओं को घेर लिया है। अब बिलम्ब किसलिए कर रहे हैं?

राजा—आखेट के निन्दक इस माधव्य ने मेरा मारा उत्साह ही ठण्डा कर दिया है।

सेनापति—(अलग विदूषक से) अच्छा मित्र! तुम डटकर विरोध करो। देखो, मै भी स्वामी के मन को कैसे पलट देता हूँ। (प्रकट में) इस मूर्ख को बकने दीजिए महाराज! स्वयं स्वामी ही उदाहरण हैं कि—

आखेट से चर्बी घट जाती है और तोंद छँट जाती है, शरीर हलका और फुर्तीला हो जाता है। पशुओं के मुँह पर भय और क्रोध देखकर उनके चित्त का ज्ञान हो जाता है और चलते हुए लक्ष्यों पर बाण चलाने में हाथ सध जाते हैं, जो धनुषधारियों के लिए बड़े गौरव की बात है। लोग झूठ-मूठ ही आखेट को व्यसन बतलाते हैं। वास्तव में ऐसा मन-बहलाव अन्यत्र मिलता कहाँ है?॥५॥

विदूषक—अरे चल-चल, ओ उत्साह दिलानेवाले! अब महाराज फिर मनुष्य बन गये हैं। तू तो एक दिन इसी प्रकार इस वन से उस वन में घूम-घूमकर आखेट करते हुए मनुष्य की नाक के लोभी किसी बूढे भालू के मुँह में पडेगा ही।

राजा—भद्र सेनापति! हम लोग इस समय तपोवन के पास विद्यमान हैं। इसलिए तुम्हारी बात मुझे जँच नहीं रही है। आज तो—

भैंसे अपनी सींगों से पानी हिलोरते हुए तालों में तैरें, हरिणों के झुण्ड पेडों की घनी छाया में बैठकर जुगाली करें, बड़े-बड़े सूअर निडर होकर छिछले तालों में मोथे की जड़ें खोदें और मेरे धनुष की ढीली डोरी भी कुछ देर विश्राम करे॥६॥

सेनापतिः—यत्प्रभविष्णवे रोचते।

राजा—तेन हि निवर्तय पूर्वगतान्वनग्राहिणः। यथा न मे सैनिकास्तपोवनमुपरुन्धन्ति तथा निषेद्धव्याः। पश्य—

शमप्रधानेषु तपोधनेषु गूढं हि दाहात्मकमस्ति तेजः।
स्पर्शानुकूला इव सूर्यकान्तास्तदन्यतेजोऽभिभवाद्वहन्ति॥ ७॥

सेनापतिः—यथाज्ञापयति स्वामी।

विदूषकः—धंसदु दे उच्छाहवुत्तंतो। [ध्वंसतां ते उत्साहवृत्तान्तः।]

(निष्क्रान्तः सेनापतिः)

राजा—(परिजनं विलोक्य) अपनयन्तु भवन्तो मृगयावेषम्। रैवतक! त्वमपि स्वं नियोगमशून्यं कुरु।

परिजनः—जं देवो आणवेदि। [यद्देव आज्ञापयति।] (इति निष्क्रान्तः)

विदूषकः—किदं भवदा णिम्मच्छिअं। संपदं एदस्सिं पादवच्छाआए विरइदलदाविदाणदंसणीआए आसणे णिसीददु भवं, जाव अहं वि सुहासीणो होमि। [कृतं भवता निर्मीक्षकम्। साम्प्रतमेतस्यां पादपच्छायायां विरचितलतावितानदर्शनीयायामासने निषीदतु भवान्, यावदहमपि सुखासीनो भवामि।]

राजा—गच्छाग्रतः।

विदूषकः—इदु भवं। [एतु भवान्।]

(इत्युभौ परिक्रम्योपविष्टौ)

सेनापति—जैसी महाराज की इच्छा।

राजा—तो जिन हँकवा करने वालों को आगे भेज दिया है, उन्हें लौटा लो और सैनिकों को समझा दो कि कोई ऐसा काम न करें कि जिससे तपोवन के काम में विघ्न पड़े। देखो—

सूर्यकान्तमणि ऐसे तो छूने में ठण्डा होता है, किन्तु जब उस पर सूर्य अपना प्रकाश डालता है, तब वह भी आग उगलने लगता है। उसी प्रकार ऋषि लोग यद्यपि बड़े शान्त स्वभाव के होते हैं, किन्तु उनमें इतना तेज होता है कि यदि कोई उन्हें कष्ट देता है तो वे उसे जलाकर भस्म कर देते हैं॥ ७॥

सेनापति—जैसी स्वामी की आज्ञा।

विदूषक—तुम्हारी उत्साह की बातें भाड़ में जायें।

(सेनापति चला जाता है)

राजा—(सेवकों को देखकर) तुम लोग भी अपने आखेट के वस्त्र उतार डालो। रेवतक! जाओ, तुम भी अपना काम करो।

सेवक—जैसी देव की आज्ञा। (सभी चले जाते हैं)

विदूषक—अच्छा किया आपने, जो ये मक्खियाँ भगा दीं। अब चलकर इन वृक्षों की घनी छायावाले लतामण्डप के नीचे सुन्दर आसन पर बैठिए और मैं भी बैठकर थोड़ा सुस्ता लूँ।

राजा—अच्छा, तो आगे-आगे चलो।

विदूषक—आप भी आइए।

(दोनों घूमकर बैठते हैं)

राजा—माढव्य! अनवाप्तचक्षुःफलोऽसि, येन त्वया दर्शनीयं न दृष्टम्।

विदूषकः—णं भवं अग्गदो मे वट्टदि। [ननु भवानग्रतो मे वर्तते।]

राजा—सर्वः खलु कान्तमात्मानं पश्यति। अहं तु तामाश्रमललामभूतां शकुन्तलामधिकृत्य ब्रवीमि।

विदूषकः—(स्वगतम्) होदु; से अवसरं ण दाइस्सं। (प्रकाशम्) भो वअस्स! ते तावसकण्णआ अब्भत्थणीआ दीसदि। [भवतु; अस्यावसरं न दास्ये। भो वयस्य! ते तापसकन्यकाऽभ्यर्थनीया दृश्यते।]

राजा—सखे! न परिहार्ये वस्तुनि पौरवाणां मनः प्रवर्तते—

सुरयुवतिसम्भवं किल मुनेरपत्यं तदुज्झताधिगतम्।
अर्कस्योपरि शिथिलं च्युतमिव नवमालिकाकुसुमम्॥८॥

विदूषकः—(विहस्य) जह कस्स वि पिंडखज्जूरेहिं उव्वेजिदस्स तिंतिणीए अहिलासो भवे तह इत्थिआरअणपरिभाविणो भवदो इअं अब्भत्थणा। [यथा कस्यापि पिण्डखर्जूरैरुद्वेजितस्य तिन्तिण्याभिलाषो भवेत् तथा स्त्रीरत्नपरिभाविनो भवत इयमभ्यर्थना।]

राजा—न तावदेनां पश्यसि येनैवमवादीः।

विदूषकः—तं खु रमणिज्जं जं भवदो विम्हअं उप्पादेदि। [तत्खलु रमणीयं यद्भवतोऽपि विस्मयमुत्पादयति।]

राजा—वयस्य! किं बहुना—

चित्रे निवेश्य परिकल्पितसत्त्वयोगा रूपोच्चयेन मनसा विधिना कृता नु।
स्त्रीरत्नसृष्टिरपरा प्रतिभाति सा मे धातुर्विभुत्वमनुचिन्त्य वपुश्च तस्याः॥९॥

राजा—माधव्य! यदि तुमने देखने योग्य वस्तु नहीं देखी तो आँखें पाने से तुम्हें लाभ ही क्या हुआ?

विदूषक—आप तो मेरी आँखों के आगे हैं न।

राजा—वैसे तो सभी लोग अपने को सुन्दर समझते हैं, किन्तु इस समय तो मै शकुन्तला की बात कर रहा हूँ, जो इस आश्रम की शोभा है।

विदूषक—(मन ही मन) अच्छा, मैं इस बात को यहीं समाप्त कर देता हूँ। (प्रकट में) मित्र! ऐसा जान पड़ता है कि आप उस तपस्वी की कन्या पर मोहित हो गये हैं।

राजा—मित्र! पुरुवंशियों का मन कुपंथ की ओर नहीं बढता—

मैने सुना है कि उसकी माँ कोई अप्सरा थी। वह जब इसे वन में छोडकर चली गयी, तब कण्व मुनि उसे उठा लाये। यह तो ऐसा ही हुआ कि मानो नवमल्लिका का फूल अपनी डाली से टूटकर मदार पर आ गिरा हो॥८॥

विदूषक—(हँसकर) जैसे कोई व्यक्ति मीठा पिंड खजूर खाते-खाते ऊबकर इमली पर ललचाने लगे, वैसे ही आप भी रनिवास की एक-मे-एक बढ़कर सुन्दरियों को भुलाकर इस पर मुग्ध हो गये हैं।

राजा—अभी तुमने उसे देखा नहीं है, इसी से ऐसा कहते हो।

विदूषक—तो ठीक है। जब आप उसे देखकर चकित हो गये हैं, तब तो वह अवश्य रूपवती होगी।

राजा—मित्र! और क्या कहूँ, बस यही समझ लो कि—

ब्रह्मा ने जब उसे बनाया होगा, तब पहले उसका चित्र बनाकर या मन में संसार की सभी

विदूषकः—जइ एव्वं पच्चादेसो दाणिं रूववदीणां। [यद्येवं प्रत्यादेश इदानीं रूपवतीनाम्।]

राजा—इदं च मे मनसि वर्तते—

अनाघ्रातं पुष्पं किसलयमलूनं कररुहै-
रनाविद्धं रत्नं मधु नवमनास्वादितरसम्।
अखण्डं पुण्यानां फलमिव च तद्रूपमनघं
न जाने भोक्तारं कमिह समुपस्थास्यति विधिः॥ १०॥

विदूषकः—तेण हि लहु परित्ताअदु णं भवं। मा कस्स वि तवस्सिणो इंगुदीतेल्लमिस्स-चिक्कणसिरस्स आरण्णअस्स हत्थे पडिस्सदि। [तेन हि लघु परित्रायतामेनां भवान्। मा कस्यापि तपस्विन इङ्गुदीतैलमिश्रचिक्कणशीर्षस्य हस्ते पतिष्यति।]

राजा—परवती खलु तत्रभवती। न च सन्निहितोऽत्र गुरुजनः।

विदूषकः—अत्तभवंतं अंतरेण कीदिसो से दिट्ठिराओ? [अत्रभवन्तमन्तरेण कीदृशस्तस्या दृष्टिरागः?]

राजा—वयस्य! निसर्गादेवाप्रगल्भस्तपस्विकन्याजनः। तथापि तु—

अभिमुखे मयि संहृतमीक्षितं हसितमन्यनिमित्तकृतोदयम्।
विनयवारितवृत्तिरतस्तया न विवृतो मदनो न च संवृतः॥ ११॥

विदूषकः—(विहस्य) णं क्खु दिट्ठमेत्तस्स तुह अंकं समारोहदि। [न खलु दृष्टमात्रस्य तवाङ्कं समारोहति।]

राजा—मिथः प्रस्थाने पुनः शालीनतयाऽपि काममाविष्कृतो भावस्तत्रभवत्या। तथा हि—

सुन्दरियों के रूपों को इकट्ठा करके उसमें प्राण डाले होंगे; क्योंकि ब्रह्मा का कौशल और शकुन्तला दोनों पर बारम्बार विचार करने से यही ज्ञात होता है कि उन्होंने यह कोई निराले ही ढंग की सुन्दरी बनायी है॥ ९॥

विदूषक—यदि ऐसी बात है, तब तो इसने सभी सुन्दरियों को परास्त कर दिया।

राजा—मेरी समझ में तो—

उसका रूप वैसा ही पवित्र है, जैसे बिना सूँघा हुआ फूल, नखों से अछूते पत्ते, बिना बिंधा हुआ रत्न, बिना चखा हुआ नया मधु और बिना भोगा हुआ पुण्यों का फल। परन्तु यह नहीं मालूम कि इस रूप को भोगने के लिए ब्रह्मा ने किसे चुना है॥ १०॥

विदूषक—तब तो आप इसे तुरन्त अपना लीजिए, अन्यथा वह हिंगोट के तेल चुपड़ने से चिकने सिरवाले किसी तपस्वी के हाथ में चली जायेगी।

राजा—अरे, वह स्वाधीन थोड़े ही है; और फिर इस समय उसके पिता भी यहाँ नहीं है।

विदूषक—अच्छा, यह तो बतलाइये कि वह आपको किस भाव से देख रही थी?

राजा—मित्र! ऋषियों की कन्याएँ बहुत भोली होती हैं। फिर भी—

जब मैं उसकी ओर ताकता था, तब वह आँखे चुरा लेती थी और किसी न किसी बहाने हँस पड़ती थी। वह शील से इतनी दबी हुई थी कि न तो वह अपने प्रेम को छिपा पाती थी और न ही खुलकर स्वयं को प्रकट ही कर पा रही थी॥ ११॥

विदूषक—(हँसकर) तो क्या वह देखते ही आपकी गोद में आ बैठती।

राजा—अरे सुनो तो। जब वह सखियों के साथ जाने लगी, उस समय शिष्टता की रक्षा करते हुए भी उसने अपना प्रेम प्रकट कर ही दिया। क्योंकि—

दर्भाङ्कुरेण चरणः क्षत इत्यकाण्डे तन्वी स्थिता कतिचिदेव पदानि गत्वा।
आसीद्विवृत्तवदना च विमोचयन्ती शाखासु वल्कलमसक्तमपि द्रुमाणाम्॥ १२॥

विदूषकः—तेण हि गहीदपाहेओ होहि। किदं तुए उववणं तवोवणं त्ति पेक्खामि। [तेन हि गृहीतपाथेयो भव। कृतं त्वयोपवनं तपोवनमिति पश्यामि।]

राजा—सखे! तपस्विभिः कैश्चित्परिज्ञातोऽस्मि। चिन्तय तावत्केनापदेशेन सकृदप्याश्रमे वसामः।

विदूषकः—को अवरो अवदेसो तुह रण्णो। णीवारच्छट्ठभाअं अम्हाणं उवहरंतु त्ति। [कोऽपरोऽपदेशस्तव राज्ञः? नीवारषष्ठभागमस्माकमुपहरन्त्विति।]

राजा—मूर्ख! अन्यद्भागधेयमेतेषां रक्षणे निपतति यद्रत्नराशीनपि विहायाभिनन्द्यम्। पश्य—

यदुत्तिष्ठति वर्णेभ्यो नृपाणां क्षयि तत्फलम्।
तपःषड्भागमक्षय्यं ददत्यारण्यका हि नः॥ १३॥

(नेपथ्ये)

हन्त सिद्धार्थो स्वः।

राजा—(कर्ण दत्त्वा) अये धीरप्रशान्तस्वरैस्तपस्विभिर्भवितव्यम्।

(प्रविश्य)

दौवारिकः—जेदु जेदु भट्टा। एदे दुवे इसिकुमारआ पडिहारभूमिं उवट्ठिदा। [जयतु जयतु भर्ता। एतौ द्वौ ऋषिकुमारौ प्रतीहारभूमिमुपस्थितौ।]

राजा—तेन ह्यविलम्बितं प्रवेशय तौ।

कुछ दूर चलने पर वह सुन्दरी सहसा यह कहकर रुक गयी—अरे, मेरे पाँव में कुश का काँटा चुभ गया है। यद्यपि उसका वल्कल कहीं उलझा नहीं था, फिर भी धीरे-धीरे वल्कल छुडाने का बहाना करके वह मेरी ओर देखती हुई कुछ देर खडी रही॥ १२॥

विदूषक—तब तो आप अपना सारा साज-सरञ्जाम यहीं मँगा लीजिए। क्योंकि आपने इस तपोवन को सर्वथा प्रमोदवन बना डाला है।

राजा—मित्र! कुछ ऋषियों ने मुझे पहचान लिया है। अब सोच-विचारकर कोई ऐसा उपाय बतलाओ कि जिससे एक बार तो किसी बहाने आश्रम तक हो आऊँ।

विदूषक—आप जैसे राजाओं के लिए कोई बहाना बनाने की क्या आवश्यकता? जाकर यही कहिए कि आप लोग राजकर के रूप में हमें तिन्नी का छठा भाग दीजिए।

राजा—अरे मूर्ख! इन ऋषियों की रक्षा के बदले तो हमें ऐसा अनूठा कर मिलता है कि उसके आगे रत्नों का ढेर भी तुच्छ है। देखा—

चारों वर्णों से हम राजाओं को जो कर मिलता है, उसका फल तो नष्ट हो जाता है। किन्तु ये वनवासी ऋषि अपने तप का छठा भाग हमें देते हैं, जो कभी नष्ट नहीं होता॥ १३॥

(नेपथ्य में)

अहा, हमारे सब काम बन गये।

राजा—(कान लगाकर) अरे, यह गम्भीर और शान्त स्वर तो ऋषियों जैसा लगता है।

(प्रवेश करके)

द्वारपाल—महाराज की जय हो, जय हो। दो ऋषिकुमार आकर द्वार पर उपस्थित हैं।

राजा—तो उन्हें तुरन्त यहाँ ले आओ।

दौवारिकः—एसो पवेसेमि। (इति निष्क्रम्य, ऋषिकुमाराभ्यां सह प्रविश्य) इदो इदो भवंतौ। **[एष प्रवेशयामि। इत इतो भवन्तौ।]**

(उभौ राजानं विलोकयतः)

प्रथमः—अहो दीप्तिमतोऽपि विश्वसनीयताऽस्य वपुषः। अथवोपपन्नमेतदृषिभ्यो नातिभिन्ने राजनि। कुतः—

अध्याक्रान्ता वसतिरमुनाऽप्याश्रमे सर्वभोग्ये
रक्षायोगादयमपि तपः प्रत्यहं सञ्चिनोति।
अस्यापि द्यां स्पृशति वसिनश्चारणद्वन्द्वगीतः
पुण्यः शब्दो मुनिरिति मुहुः केवलं राजपूर्वः॥ १४॥

द्वितीयः—गौतम! अयं स बलभित्सखो दुष्यन्तः।

प्रथमः—अथ किम्?

द्वितीयः—तेन हि—

नैतच्चित्रं यदयमुदधिश्यामसीमां धरित्री-
मेकः कृत्स्नां नगरपरिघप्रांशुबाहुर्भुनक्ति।
आशंसन्ते सुरयुवतयो बद्धवैरा हि दैत्यै-
रस्याधिज्ये धनुषि विजयं पौरुहूते च वज्रे॥ १५॥

उभौ—(उपगम्य) विजयस्व राजन्!

राजा—(आसनादुत्थाय) अभिवादये भवन्तौ।

उभौ—स्वस्ति भवते। (इति फलान्युपहरतः)

राजा—(सप्रणामं परिगृह्य) आज्ञापयितुमिच्छामि।

द्वारपाल—अभी लाया। **(प्रस्थान कर और ऋषिकुमारों को साथ लेकर पुनः प्रवेश कर)** इधर से आइए भगवन्, इधर से।

(दोनों राजा को देखते हैं)

पहला—अहा! ये इतने तेजस्वी हैं कि इन्हें देखकर हमारे मन को बड़ा भरोसा मिल रहा है। क्यों न हो, ये भी तो ऋषियों जैसे ही रहते हैं। क्योंकि—

जैसे ऋषि लोग आश्रम में रहते हैं, वैसे ही ये भी अपना नगर छोड़कर सबको सुख देने वाले इस आश्रम में आ टिके हैं। प्रजा की रक्षा करके ये भी नित्य तपस्या ही करते हैं। चारण-चारणियाँ जो इन जितेन्द्रिय राजर्षि के गुण गाती हैं, वे गीत स्वर्ग तक सुनाई देते हैं॥ १४॥

दूसरा—गौतम! इन्द्र के मित्र राजा दुष्यन्त ये ही हैं?

पहला—हाँ, ये ही हैं।

दूसरा—इसीलिए—

हमें यह देखकर तनिक भी आश्चर्य नहीं है कि नीले समुद्र से घिरी हुई सारी पृथ्वी पर ये नगर के फाटक की अर्गला के समान अपनी लम्बी भुजाओं से अकेले शासन करते हैं और दैत्यों से वैर बाँधनेवाली देवताओं की स्त्रियाँ इन्हीं के चढ़े हुए धनुष और इन्द्र के वज्र पर अपनी विजय की आशा रखती हैं॥ १५॥

दोनों—**(पास जाकर)** राजन्! आपकी जय हो।

राजा—**(आसन से उठकर)** मै आप लोगों का अभिवादन करता हूँ।

दोनों—आपका कल्याण हो। **(फल भेंट करते हैं)**

उभौ—विदिता भवानाश्रमसदामिहस्थः। तेन भवन्तं प्रार्थयन्ते।

राजा—किमाज्ञापयन्ति ?

उभौ—तत्रभवतः कण्वस्य महर्षेरसान्निध्याद्रक्षांसि न इष्टिविघ्नमुत्पादयन्ति। तत्कतिपयरात्रं सारथिद्वितीयेन भवता सनाथीक्रियतामाश्रम इति।

राजा—अनुगृहीतोऽस्मि।

विदूषकः—(अपवार्य) एसा दाणिं अणुऊला ते अब्भत्थणा। [एषेदानीमनुकूला तेऽभ्यर्थना।]

राजा—(स्मितं कृत्वा) रैवतक! मद्वचनादुच्यतां सारथिः सवाणासनं रथमुपस्थापयेति।

दौवारिकः—जं देवो आणवेदि। [यद्देव आज्ञापयति] (इति निष्क्रान्तः)

उभौ—(सहर्षम्)

अनुकारिणि पूर्वेषां युक्तरूपमिदं त्वयि।
आपन्नाभयसत्रेषु दीक्षिताः खलु पौरवाः॥१६॥

राजा—(सप्रणामम्) गच्छतां पुरो भवन्तौ। अहमप्यनुपदमागत एव।

उभौ—विजयस्व। (इति निष्क्रान्तौ)

राजा—माढव्य! अप्यस्ति शकुन्तलादर्शने कुतूहलम् ?

विदूषकः—पढमं सपरीवाहं आसि। दाणिं रक्खसवुत्तंतेण विंदु वि णावसेसिदो। [प्रथमं सपरीवाहमासीत्। इदानीं राक्षसवृत्तान्तेन बिन्दुरपि नावशेषितः।]

राजा—मा भैषीः। ननु मत्समीपे वर्तिष्यसे।

राजा—(प्रणामपूर्वक फल लेकर) आज्ञा कीजिए।

दोनों—सभी आश्रमवासी जान गये हैं कि आप यहाँ ठहरे हुए हैं। इसलिए उनकी प्रार्थना है।

राजा—उनकी क्या आज्ञा है ?

दोनों—उन्होंने कहलाया है कि आदरणीय महर्षि कण्व के न रहने से राक्षस लोग हमारे यज्ञ में विघ्न न डालें। इसलिए आप अपने सारथी के साथ यहाँ कुछ रातें रहकर इस आश्रम को सनाथ कीजिए।

राजा—यह उनकी बड़ी कृपा है।

विदूषक—(अलग से) आप तो यही चाहते भी थे।

राजा—(मुस्कराकर) *रेवतक! सारथी से कहो कि रथ और धनुष-बाण लेता आये।*

द्वारपाल—महाराज की जो आज्ञा। **(प्रस्थान करता है)**

दोनों—(प्रसन्न होकर)

राजन्! आप वही कर रहे हैं, जो आपके पूर्वज करते आये हैं। आश्रम की रक्षा करना तो आपका धर्म ही है। क्योंकि यह बात जगजाहिर है कि शरणागतों को अभयदान देने में पुरुवंशी कभी किसी से पीछे नहीं रहते॥ १६॥

राजा—(प्रणाम कर) आप लोग चलें। मैं भी अभी आ रहा हूँ।

दोनों—आपकी विजय हो। **(प्रस्थान करते हैं)**

राजा—माधव्य! क्या शकुन्तला को देखने की इच्छा है ?

विदूषक—पहले तो इच्छा बाढ पर थी, पर जब से राक्षसों का नाम सुना है, तब से बूँद भर भी इच्छा नहीं रह गयी है।

राजा—डरो मत। हम तुम्हें अपने साथ रखेंगे।

विदूषकः— एसो रक्खसादो रक्खिदो म्हिं। [एष राक्षसाद्रक्षितोऽस्मि।]

(प्रविश्य)

दौवारिकः—सज्जो रधो भट्टिणो विजअप्पत्थाणं अवेक्खदि। एस उण णअरादो देवीनं आणत्तिहरओ करभओ आअदो। [सज्जो रथो भर्तुर्विजयप्रस्थानमपेक्षते। एष पुनर्नगराद्देवीनामाज्ञाहरः करभक आगतः।]

राजा—(सादरम्) किमम्बाभिः प्रेषितः ?

दौवारिकः— अह इं। [अथ किम्।]

राजा—ननु प्रवेश्यताम्।

दौवारिकः—तह। (इति निष्क्रम्य करभकेण सह प्रविश्य) एसो भट्टा। उवसप्प [तथा। एष भर्ता। उपसर्प।]

करभकः—जेदु भट्टा। देवी आणवेदि—आआमिणि चउत्थदिअहे पऊत्तपारणो मे उववासो भविस्सदि। तहिं दीहाउणा अवस्सं संभाविदव्वा त्ति। [जयतु भर्ता। देव्याज्ञापयति–आगामिनि चतुर्थदिवसे प्रवृत्तपारणो मे उपवासो भविष्यति। तत्र दीर्घायुषाऽवश्यं सम्भावितव्येति।]

राजा—इतस्तपस्विकार्यम्; इतो गुरुजनाज्ञा। द्वयमप्यनतिक्रमणीयम्। किमत्र प्रतिविधेयम्?

विदूषकः—तिसंकू विअ अंतराले चिट्ठ। [त्रिशङ्कुरिवान्तराले तिष्ठ।]

राजा—सत्यमाकुलीभूतोऽस्मि—

कृत्ययोर्भिन्नदेशत्वाद् द्वैधीभवति मे मनः।
पुरः प्रतिहतं शैले स्रोतः स्रोतोवहो यथा॥ १७॥

(विचिन्त्य) सखे! त्वमम्बया पुत्र इति प्रतिगृहीतः। अतो भवानितः प्रतिनिवृत्य तपस्विकार्यव्यग्रमानसं मामावेद्य तत्रभवतीनां पुत्रकृत्यमनुष्ठातुमर्हति।

विदूषक—तब तो राक्षसों से मेरे प्राण बच जायेंगे।

(प्रवेश करके)

द्वारपाल—महाराज! रथ तैयार है और आपकी विजय-यात्रा के लिए चलने की प्रतीक्षा कर रहा है। और हाँ, राजमाता की आज्ञा लेकर नगर से करभक आया हुआ है।

राजा—(आदर के साथ) क्या माताजी ने उसे भेजा है?

द्वारपाल—जी हाँ।

राजा—तो उसे यहाँ ले आओ।

द्वारपाल—जो आज्ञा। (प्रस्थान कर करभक को साथ लेकर पुनः प्रवेश कर) महाराज ये बैठे हैं। आगे बढ़ जाओ।

करभक—महाराज की जय हो। माताजी ने कहलाया है कि आज से चौथे दिन मेरे व्रत का पारण होगा। उस अवसर पर चिरञ्जीव (आप) भी अवश्य उपस्थित रहें।

राजा—इधर ऋषियों का काम और उधर बड़ों की आज्ञा है। दोनों ही नहीं टाले जा सकते। क्या करूँ?

विदूषक—त्रिशंकु के समान बीच में लटक जाइए।

राजा—सचमुच मैं बड़ी उलझन में पड़ गया हूँ। क्या बतलाऊँ?

दोनों कार्य दो अलग-अलग स्थानों में पड़ रहे हैं। अतएव इस समय दुविधा में पड़े हुए मेरे मन की वही दशा हो रही है, जो पहाड से रुकी हुई नदी की धारा की होती है॥ १७॥

विदूषकः—ण क्खु मं रक्खोभीरुअं गणेसि। [न खलु मां रक्षोभीरुकं गणयसि।]

राजा—(सस्मितम्) कथमेतद्भवति सम्भाव्यते ?

विदूषकः—जह राआणुएण गंतव्वं तह गच्छामि। [यथा राजानुजेन गन्तव्यं तथा गच्छामि।]

राजा—ननु तपोवनोपरोधः परिहरणीय इति सर्वानानुयांत्रिकाँस्त्वयैव सह प्रस्थापयामि।

विदूषकः—(सगर्वम्) तेण हि जुवराओ म्हि दाणिं संवुत्तो। [तेन हि युवराजोऽस्मीदानीं संवृत्तः।]

राजा—(स्वगतम्) चपलोऽयं वटुः। कदाचिदस्मत्प्रार्थनामन्तःपुरेभ्यः कथयेत्। भवतु; एनमेवं वक्ष्ये। (विदूषकं हस्ते गृहीत्वा प्रकाशम्) वयस्य! ऋषिगौरवादाश्रमं गच्छामि। न खलु सत्यमेव तापसकन्यकायां ममाभिलाषः। पश्य—

क्व वयं क्व परोक्षमन्मथो मृगशावैः सममेधितो जनः।
परिहासविजल्पितं सखे! परमार्थेन न गृह्यतां वचः॥ १८॥

विदूषकः—अहं इं। [अथ किम्।]

(इति निष्क्रान्ताः सर्वे)

॥ इति द्वितीयोऽङ्कः ॥

(सोंचकर) मित्र! देखो, माताजी तुम्हें भी पुत्र के समान मानती हैं। इसलिए तुम जाओ और माताजी से कह दो कि मै ऋषियों की रक्षा में लगा हुआ हूँ। वहाँ जो कुछ मेरे करने का काम हो, वह सब तुम्हीं कर डालना।

विदूषक—पर इससे यह न समझियेगा कि मैं राक्षसों से डरता हूँ।

राजा—(मुस्कराकर) भला तुम्हारे विषय में क्या कभी ऐसा भी सोचा जा सकता है ?

विदूषक—तो मैं वैसे ही ठाट-बाट से वहाँ जाऊँगा, जैसे राजा का छोटा भाई जाता है।

राजा—ठीक है, जहाँ तक हो तपोवन से सब बखेडा दूर ही रखना चाहिए। अतएव सेना को भी तुम्हारे ही साथ भेजे देता हूँ।

विदूषक—(गर्व के साथ) तब तो मैं इस समय साक्षात् युवराज बन गया हूँ।

राजा—(मन ही मन) यह ब्राह्मण बडा चंचल है। कहीं यह रनिवास में जाकर मेरी सब बातें न कह डाले। अच्छा इसे इस प्रकार समझाऊँ। (विदूषक का हाथ पकड़कर, प्रकट में) मित्र! मैं ऋषियों का बडा आदर करता हूँ। इसीलिए उनके आश्रम मे जाता हूँ। उस ऋषि-कन्या के लिए मेरे मन में तनिक भी प्रेम नहीं है। देखो—

कहाँ हम और कहाँ प्रेम की बातों मे बिल्कुल अनजान और मृगछौनों के साथ पली हुई वह कन्या। मित्र हँसी में जो बातें तुमसे कही हैं, उन्हें तुम सत्य न समझ लेना॥ १८॥

विदूषक—बहुत अच्छा।

(सभी चले जाते हैं)

दूसरा अङ्क समाप्त।

तृतीयोऽङ्कः

(ततः प्रविशति कुशानादाय यजमानशिष्यः)

शिष्यः—अहो! महानुभावः पार्थिवो दुष्यन्तः, प्रविष्टमात्र एवाश्रमं तत्रभवति राज्ञि निरुपद्रवाणि नः कर्माणि प्रवृत्तानि भवन्ति।

का कथा बाणसन्धाने ज्याशब्देनैव दूरतः।
हुङ्कारेणेव धनुषः स हि विघ्नानपोहति॥१॥

यावदिमान्वेदिसंस्तरणार्थं दर्भानृत्विग्भ्य उपनयामि। (परिक्रम्यावलोक्य च आकाशे) प्रियंवदे! कस्येदमुशीरानुलेपनं मृणालवन्ति च नलिनीपत्राणि नीयन्ते? (आकर्ण्य) किं ब्रवीषि? आतपलङ्घनाद्बलवदस्वस्था शकुन्तला; तस्याः शरीरनिर्वापणायेति? तर्हि त्वरितं गम्यताम्। सा खलु भगवतः कण्वस्य कुलपतेरुच्छ्वसितम्। अहमपि तावद्वैतानिकं शान्त्युदकमस्यै गौतमीहस्ते विसर्जयिष्यामि। (इति निष्क्रान्तः)

॥ विष्कम्भकः ॥

(ततः प्रविशति कानयनानावस्थो राजा)

राजा—(सचिन्तं निःश्वस्य)

जाने तपसो वीर्यं सा बाला परवतीति मे विदितम्।
अलमस्मि ततो हृदयं तथापि नेदं निवर्तयितुम्॥२॥

(हाथ में कुशा लिये हुए कण्व के एक शिष्य का प्रवेश)

शिष्य—अहा! महाराज दुष्यन्त का कितना प्रताप है कि जब से वे आश्रम में पधारे हैं, तभी से हमारे सब काम बेरोक-टोक चल रहे हैं—

बाण चढ़ाने की तो बात ही क्या, केवल अपने धनुष की टंकार से ही वे विघ्नों को दूर भगा देते हैं॥१॥

तो चलूँ, ऋत्विजों के लिए वेदी पर बिछाने की कुशा ले जाकर पहुँचा आऊँ। (घूमकर आकाश की ओर देखते हुए) अरी प्रियंवदे! ये डंठलवाले कमल के पत्ते और खस मिला हुआ लेप किसके लिए ले जा रही हो? (सुनने का अभिनय करते हुए) क्या कहा—शकुन्तला लू लग जाने से बड़ी बेचैन हो गई है, उसके शरीर को ठंडक पहुँचाने के लिए ही यह सब ले जा रही हूँ। तो तुरन्त जाओ। क्योंकि वह भगवान् कुलपति कण्व के प्राण के समान प्रिय है। मैं भी तब तक उसके लिए गौतमी के हाथ यज्ञ का शान्ति-जल भेजता हूँ। (प्रस्थान करता है)

॥ विष्कम्भक ॥

(काम से पीड़ित दशा में राजा दुष्यन्त का प्रवेश)

राजा—(ठंडी साँसें लेकर) मैं तपस्वियों की शक्ति भलीभाँति जानता हूँ। इसलिए मैं उसे हरकर नहीं ले जा सकता, और यह भी मालूम है कि विवाह करना या न करना उस कुमारी के हाथ में नहीं है। अतएव वह स्वयं भी मेरे साथ नहीं जा सकती। फिर भी न जाने क्यों मैं अपना मन उस पर से हटा ही नहीं पाता॥२॥

(मदनबाधां निरूप्य) भगवन्कुसुमायुध! त्वया चन्द्रमसा च विश्वसनीयाभ्यामतिसन्धीयते कामिजनसार्थः। कुतः?—

तव कुसुमशरत्वं शीतरश्मित्वमिन्दोर्द्वयमिदमयथार्थं दृश्यते मद्विधेषु।
विसृजति हिमगर्भैरग्निमिन्दुर्मयूखैस्त्वमपि कुसुमबाणान्वज्रसारीकरोषि॥ ३॥

अथवा—

अनिशमपि मकरकेतुर्मनसो रुजमावहन्नभिमतो मे।
यदि मदिरायतनयनां तामधिकृत्य प्रहरतीति॥ ४॥

(सखेदं परिक्रम्य) क्व नु खलु संस्थिते कर्मणि सदस्यैरनुज्ञातः श्रमक्लान्तमात्मानं विनोदयामि? (निःश्वस्य) किं नु खलु मे प्रियादर्शनादृते शरणमन्यत्? यावदेनामन्विष्यामि। (सूर्यमवलोक्य) इमामुग्रातपवेलां प्रायेण लतावलयवत्सु मालिनीतीरेषु ससखीजना शकुन्तला गमयति। तत्रैव तावद् गच्छामि। (परिक्रम्य संस्पर्शं रूपयित्वा) अहो, प्रवातसुभगोऽयमुद्देशः।

शक्यमरविन्दसुरभिः कणवाही मालिनीतरङ्गाणाम्।
अङ्गैरनङ्गतप्तैरविरलमालिङ्गितुं पवनः॥ ५॥

(परिक्रम्यावलोक्य च) अस्मिन्वेतसपरिक्षिप्ते लतामण्डपे सन्निहितया शकुन्तलया भवितव्यम्। तथा हि (अधो विलोक्य)—

अभ्युन्नता पुरस्तादवगाढा जघनगौरवात्पश्चात्।
द्वारेऽस्य पाण्डुसिकते पदपङ्क्तिर्दृश्यतेऽभिनवा॥ ६॥

(काम पीड़ा का प्रदर्शन करते हुए) हे फूलों के धनुष-बाण धारण करनेवाले कामदेव! तुमने और चन्द्रमा ने उन सब कामियों को बडा धोखा दिया है, जो तुम पर विश्वास करते थे। क्योंकि—

तुम्हारा फूलों के बाणवाला और चन्द्रमा का ठण्ढी किरणों वाला कहा जाना, ये दोनों ही बातें मुझ जैसे विरहियों को झूठी ही जान पड़ती हैं। क्योंकि चन्द्रमा अपनी ठण्ढी किरणों से आग बरसाता है और तुमने भी अपने फूल के बाणों में वज्र की कठोरता भर रखी है॥ ३॥

अथवा—

यदि तुम मदभरी बड़ी-बडी आँखोंवाली उस शकुन्तला के कारण बार-बार मेरा जी दुखाते हो, तो ठीक ही करते हो॥ ४॥

(दुःखी मन से घूमकर) यज्ञ हो जाने पर जब ये ऋषि मुझे विदा कर देंगे, तब मै अपने दुःखी प्राण लेकर अपना मन कहाँ बहलाऊँगा। **(ठण्डी साँस लेकर)** प्रिया का दर्शन छोडकर अब मेरा और क्या सहारा है। चलूँ, उसी को ढूँढूँ। **(सूर्य को देखकर)** ऐसी भरी दुपहरी में शकुन्तला प्रायः अपनी सखियों के साथ मालिनी के तटपर बने लतामण्डपों में ही जाकर बैठा करती हैं। तो वहीं चलूँ। **(घूमकर और वायु के स्पर्श होने का अनुभव करता हुआ)** वाह, यहाँ कैसी अच्छी हवा बह रही है—

कमल में बसा और मालिनी की लहरों की फुहारों से लदा हुआ यह पवन काम से सन्तप्त तेरे अंगों को बडा सुहावना लग रहा है॥ ५॥

(घूम और देखकर) बेतों से घिरे हुए इस लतामण्डप में ही कहीं शकुन्तला बैठी होगी। क्योंकि **(नीचे देखकर)**—

इस कुञ्ज के द्वार पर पीली रेती में भारी नितम्बवाली सखियों के पैरों के नये चिह्न उभड़े हुए दिखलाई दे रहे हैं, जो एडी की ओर गहरे और आगे की ओर उठे हुए हैं॥ ६॥

यावद्विटपान्तरेणावलोकयामि। (परिक्रम्य तथा कृत्वा, सहर्षम्) अये, लब्धं नेत्रनिर्वाणम्। एषा मे मनोरथप्रियतमा सुकुसुमास्तरणं शिलापट्टमधिशयाना सखीभ्यामन्वास्यते। भवतु; श्रोष्याम्यासां विस्रम्भकथितानि। (इति विलोकयन् स्थितः)

(ततः प्रविशति यथोक्तव्यापारा सह सखीभ्यां शकुन्तला)

सख्यौ—(उपवीज्य सस्नेहम्) हला सउंदले! अवि सुहेदि दे णलिणीपत्तवादो? [हला शकुन्तले! **अपि सुखयति ते नलिनीपत्रवातः?**]

शकुन्तला—किं वीअंति मं सहीओ? [**किं वीजयतो मां सख्यौ?**]

(सख्यौ विषादं नाटयित्वा परस्परमवलोकयतः)

राजा—बलवदस्वस्थशरीरा शकुन्तला दृश्यते। (सवितर्कम्) तत्किमयमातपदोषः स्यात् उत यथा मे मनसि वर्तते? (साभिलाषं निर्वर्ण्य) अथवा कृतं सन्देहेन—

स्तनन्यस्तोशीरं शिथिलितमृणालैकवलयं
प्रियायाः साबाधं किमपि कमनीयं वपुरिदम्।
समस्तापः कामं मनसिजनिदाघप्रसरयो-
र्न तु ग्रीष्मस्यैव सुभगमपराद्धं युवतिषु॥ ७॥

प्रियंवदा—(जनान्तिकम्) अणसूए! तस्स राएसिणो पढमदंसणादो आरहिअ पज्जुस्सुआ विअ सउंदला। किं णु क्खु से तण्णिमित्तो अअं आतंको भवे? [अनसूये! **तस्य राजर्षेः प्रथमदर्शनादारभ्य पर्युत्सुकेव शकुन्तला। किं न खलु तस्यास्तन्निमित्तोऽयमातङ्को भवेत्?**]

अनसूया—सहि! मम वि ईदिसी आसंका हिअअस्स। होदु; पुच्छिस्सं दाव णं। (प्रकाशम्)

अच्छा, इन वृक्षों की ओट से देखता हूँ। **(घूमकर वैसा करते हुए, प्रसन्न मन से)** वाह! मेरी आँखें ठण्डी हो गयीं। यहाँ मेरी प्यारी शकुन्तला सुन्दर फूलों के बिछौनेवाली पत्थर की पटियापर लेटी हुई है और 'दोनो सखियाँ इसकी सेवा कर रही हैं। अच्छा! अब सुनूँ कि ये आपस में क्या बातें कर रही हैं। **(खड़ा होकर सुनता है)**

(तत्पश्चात् पूर्वोक्त दशा में दोनों सखियों के साथ शकुन्तला का प्रवेश)

सखियाँ—**(बड़े प्यार से पंखा झलती हुई)** सखी शकुन्तला! कमल के पत्तों की हवा से कुछ सुख मिल रहा है?

शकुन्तला—क्या तुम दोनों मुझे पंखा झल रही थीं?

(दोनों सखियाँ दुःखी होने का अभिनय करती हुई एक दूसरे को देखती हैं)

राजा—शकुन्तला तो बड़ी बेचैन दीख रही है। **(विचार कर)** क्या इसे लू लग गयी है? अथवा जो दशा मेरे मन की है, वही इसके मन की भी तो नहीं है? **(ललचाई आँखों से देखता हुआ)** किन्तु यह सन्देह व्यर्थ है। क्योंकि—

इसके स्तनों पर खस का लेप लगा है और एक हाथ में कमल की नाल का ढीला कंगन बँधा हुआ है। किन्तु इतनी बेचैन होने पर भी इसका शरीर अत्यन्त सुन्दर लग रहा है। यद्यपि लू लगने और प्रेम में पड़ने पर बेचैनी एक-सी होती है, किन्तु लू लग जाने पर युवतियों में इतनी सुन्दरता नहीं रह जाती॥ ७॥

प्रियंवदा—**(अलग से)** अनसूया! जब से शकुन्तला ने उस राजर्षि को देखा है, तभी से यह उन पर आसक्त हो गयी है। सम्भव है कि यह बेचैनी उन्हीं के कारण हो?

सहि! पुच्छिदव्वासि किं पि। बलवं क्खु दे संदावो। [सखि! ममापीदृश्याशङ्क हृदयस्य। भवतु; प्रक्ष्यामि तावदेनाम्। सखि! प्रष्टव्याऽसि किमपि। बलवान्खलु ते सन्तापः।]

शकुन्तला—(पूर्वार्धेन शयनादुत्थाय) हला! किं वत्तुकामासि? [हला! किं वक्तुकामासि?]

अनसूया—हला सउंदले! अणब्भंतरा क्खु अम्हे मदणगदस्स वुत्तंतस्स। किंदु जादिसी इदिहासणिबंधेसु कामअमाणाणं अवत्था सुणीअदि तादिसीं दे पेक्खामि। कहेहि किं णिमित्तं संदावो। विआरं क्खु परमत्थदो अजाणिअ अणारंभो पडिआरस्स। [हला शकुन्तले! अनभ्यन्तरे खल्वावां मदनगतस्य वृत्तान्तस्य। किन्तु यादृशीतिहासनिबन्धेषु कामयमानानामवस्था श्रूयते तादृशीं ते पश्यामि। कथय किन्निमित्तं ते सन्तापः। विकारं खलु परमार्थतोऽज्ञात्वाऽनारम्भः प्रतीकारस्य।]

राजा—अनसूयामप्यनुगतो मदीयस्तर्कः। न हि स्वाभिप्रायेण मे दर्शनम्।

शकुन्तला—(आत्मगतम्) बलवं क्खु मे अहिणिवेसो। दाणिं वि सहसा एदाणं ण सक्कणोमि णिवेदिदुं। [बलवान्खलु मेऽभिनिवेशः। इदानीमपि सहसैतयोर्न शक्नोमि निवेदयितुम्।]

प्रियंवदा—सहि सउंदले! सुट्ठु एसा भणादि। किं अत्तणो आतंकं उवेक्खसि? अणुदिअहं क्खु परिहीअसि अंगेहिं। केवलं लावण्णमई छाआ तुमं ण मुंचदि। [सखि शकुन्तले! सुष्ठ्वेषा भणति। किमात्मन आतङ्कमुपेक्षसे? अनुदिवसं खलु परिहीयसेऽङ्गैः। केवलं लावण्यमयी छाया त्वां न मुञ्चति।]

राजा—अवितथमाह प्रियंवदा। तथा हि—

क्षामक्षामकपोलमाननमुरः काठिन्यमुक्तस्तनं
मध्यः क्लान्ततरः प्रकामविनतावंसौ छविः पाण्डुरा।
शोच्या च प्रियदर्शना च मदनक्लिष्टेयमालक्ष्यते
पत्राणामिव शोषणेन मरुता स्पृष्टा लता माधवी॥८॥

अनसूया—सखी! मैं भी कुछ ऐसी ही बात सोंचती हूँ। अच्छा! इसी से पूछकर देखती हूँ। (प्रकट में) सखी! मैं तुमसे कुछ पूछना चाहती हूँ। क्योंकि तुम्हारी बेचैनी बहुत बढी जा रही है।

शकुन्तला—(बिछौने पर आधी उठकर) सखी! क्या पूछना चाहती हो?

अनसूया—सखी शकुन्तला! हम लोग तो कामदेव सम्बन्धी बातें तो कुछ जानती नहीं हैं। फिर भी कथा-कहानियों में हमने प्रेमियों की जो दशा सुनी है, इस समय ठीक वैसी ही दशा तुम्हारी भी दीख रही है। तो बतलाओ, तुम किसके लिए इतनी बेचैन हो? क्योंकि जब तक रोग का ठीक-ठीक पता न लगे तब तक उसका प्रतीकार कैसे किया जा सकता है?

राजा—मैं जो सोच रहा था, वही बात अनसूया भी सोच रही है। तो जो मैने सोचा था, वह केवल मेरे ही मन की बात नहीं थी।

शकुन्तला—(मन ही मन) सचमुच मेरा प्रेम बहुत आगे बढ गया है और मुझसे एकाएक कुछ कहते नहीं बनता।

प्रियंवदा—सखी शकुन्तला! अनसूया ठीक कह रही है। तुम क्यों अपने रोग की उपेक्षा कर रही हो? दिन-पर-दिन तुम इतनी सूखती चली जा रही हो कि तुम्हारे शरीर पर केवल सुन्दरता की झलक भर बची रह गयी है।

राजा—प्रियंवदा सच कहती है। क्योंकि—

इसके गाल मुरझा गये हैं, मुँह सूख गया है, स्तनो की कठोरता जाती रही, कमर और भी पतली हो गई है, कन्धे झुक गये हैं और देह पीली पड़ गई है। अतएव वायु के स्पर्श से मुरझाई पत्तियोंवाली माधवीलता सरीखी यह सुन्दर भी लगती है और दयनीय भी॥८॥

शकुन्तला—सहि ! कस्स वा अण्णस्य कहइस्सं ? आआसइत्तिआ दाणिं वो भविस्सं। [सखि! कस्य वाऽन्यस्य कथयिष्यामि ? आयासयित्रीदानीं वां भविष्यामि।]

उभे—अदो एव्व खु णिब्बंधो। सिणिद्धजणसंविभत्तं हि दुक्खं सज्झवेदणं होदि। [अत एव खलु निर्बन्धः। स्निग्धजनसंविभक्तं हि दुःखं सह्यवेदनं भवति।]

राजा—

पृष्टा जनेन समदुःखसुखेन बाला नेयं न वक्ष्यति मनोगतमाधिहेतुम्।
दृष्टो विवृत्य बहुशोऽप्यनया सतृष्णमत्रान्तरे श्रवणकातरतां गतोऽस्मि॥ ९॥

शकुन्तला—सहि ! जदो पहुदि मम दंसणपहं आअदो सो तवोवणरक्खिदा राएसी तदो आरहिअ तग्गदेण अहिलासेण एतदवत्थम्हि संवुत्ता [सखि ! यतः प्रभृति मम दर्शनपथमागतः स तपोवनरक्षिता राजर्षिः तत आरभ्य तद्गतेनाभिलाषेणैतदवस्थास्मि संवृत्ता।]

राजा—(सहर्षम्) श्रुतं श्रोतव्यम्—

स्मर एव तापहेतुर्निर्वापयिता स एव मे जातः।
दिवस इवार्धश्यामस्तपात्यये जीवलोकस्य॥ १०॥

शकुन्तला—तं जइ वो अणुमदं ता तह वट्टह जह तस्स राएसिणो अणुकंपणिज्जा होमि। अण्णहा अवस्सं सिंचध मे तिलोदअं। [तद्यदि वामनुमतं तदा तथा वर्तेथां यथा तस्य राजर्षेरनुकम्पनीया भवामि। अन्यथाऽवश्यं सिञ्चतं मे तिलोदकम्।]

राजा—संशयच्छेदि वचनम्।

प्रियंवदा—(जनान्तिकम्) अणसूए! दूरगअमन्महा अक्खमा इअं कालहरणस्स। जस्सिं बद्धभावा एसा सो ललामभूदो पोरवाणं। ता जुत्तं से अहिलासो अहिणंदिदुं। [अनसूये!

शकुन्तला—सखी ! तुमसे न कहूँगी तो किससे कहूँगी ? अब तुम दोनों को मेरे लिए कुछ कष्ट सहना पडेगा।

दोनों—इसीलिए तो हम तुमसे आग्रह कर रही हैं। देखो, अपने स्नेहियों में दुःख बाँट देने पर वह कम हो जाता है।

राजा—दुःख-सुख में साथ देनेवाली अपनी इन सखियों के पूछने पर यह बाला अवश्य ही अपने मन की बात बता देगी। यद्यपि शकुन्तला ने उस समय बड़े प्यार और बार-बार ललचाई आँखों से मुझे देखा था। फिर भी मेरे जी में बडी बेचैनी हो रही है कि देखें, यह अपनी बेचैनी का क्या कारण बतलाती है॥ ९॥

शकुन्तला—सखी ! आश्रम की रक्षा करने वाले वे राजर्षि जब से मेरी आँखों में समाये हैं तभी से उन्हीं के प्रेम में मेरी यह दशा हो गई है।

राजा—(हर्ष से) मैं यही सुनना चाहता था—

जिस कामदेव ने मुझे इतना सन्ताप पहुँचाया उसी ने मुझे इस प्रकार जिला दिया जैसे गर्मी का दिन पहले तो जीवों को व्याकुल करता है, पर गर्मी बीत जाने पर बरसात में वही सबका जी हरा कर देता है॥ १०॥

शकुन्तला—यदि तुम दोनों उचित समझो तो कोई ऐसा उपाय करो कि उन राजर्षि की मुझ पर कृपा हो जाय। नहीं तो तुम्हें मुझको तिलाञ्जलि ही देनी पडेगी।

राजा—यह बात सुनकर सन्देह जाता रहा।

प्रियंवदा—(अनसूया से अलग से) सखी ! इसकी प्रेम व्यथा इतनी बढ़ गई है कि कोई उपाय

दूरगतमन्मथाऽक्षमेयं कालहरणस्य। यस्मिन् बद्धभावैषा स ललामभूतः पौरवाणाम्। तद्युक्तमस्या अभिलाषोऽभिनन्दितुम्।]

अनसूया—तह जह भणसि। [तथा यथा भणसि।]

प्रियंवदा—(प्रकाशम्) सहि! दिट्ठिआ अणुरूवो दे अहिणिवेसो। साअरं उज्झिअ कहिं वा महाणई ओदरइ? को दाणिं सहआरं अंतरेण अदिमुत्तलदं पल्लविदं सहेदि? [सखि! दिष्ट्याऽनुरूपस्तेऽभिनिवेशः। सागरमुज्झित्वा कुत्र वा महानद्यवतरति? क इदानीं सहकारमन्तरेणातिमुक्तलतां पल्लवितां सहते?]

राजा—किमत्र चित्रं यदि विशाखे शशाङ्कलेखमानुवर्तेते?

अनसूया—को उण उवाओ भवे जेण अविलंबिअं णिहुअं अ सहीए मनोरहं संपादेम्ह? [कः पुनरुपायो भवेद्येनाविलम्बितं निभृतं च सख्या मनोरथं सम्पादयावः?]

प्रियंवदा—णिहुअं त्ति चिंतणिज्जं भवे। सिग्घं त्ति सुअरं। [निभृतमिति चिन्तनीयं भवेत्। शीघ्रमिति सुकरम्।]

अनसूया— कहं विअ? [कथमिव?]

प्रियंवदा—णं सो राएसी इमस्सिं सिणिद्धदिट्ठीए सूइदाहिलासो इमाइँ दिअहाइँ पजाअरकिसो लक्खीअदि। [ननु स राजर्षिरितस्यां स्निग्धदृष्ट्या सूचिताभिलाष एतान्दिवसान् प्रजागरकृशो लक्ष्यते।]

राजा—सत्यमित्थम्भूत एवास्मि। तथा हि—

इदमशिशिरैरन्तस्तापाद्विवर्णमणीकृतं
निशि निशि भुजन्यस्तापाङ्गप्रसारिभिरश्रुभिः।
अनभिलुलितज्याघाताङ्कं मुहुर्मणिबन्धनात्
कनकवलयं स्रस्तं स्रस्तं मया प्रतिसार्यते॥ ११॥

शीघ्र ही करना चाहिए। इस बात की तो सराहना करनी ही पडेगी कि शकुन्तला ने प्रेम भी किया तो पुरुवंश-भूषण दुष्यन्त से।

अनसूया—हाँ, यह तो सत्य है।

प्रियंवदा—(प्रकट में) सखी! तू बड़ी भाग्यवान् है कि ऐसे योग्य व्यक्ति से तूने प्रेम किया। सागर को छोड़कर महानदी भला और कहाँ जायेगी? आम के वृक्ष को छोड़कर नये पत्तोंवाली माधवी लता और किसके सहारे चढेगी?

राजा—यदि विशाखा के दोनों नक्षत्र चन्द्रकला के पीछे-पीछे चलें तो इसमें आश्चर्य ही क्या है?

अनसूया—तो कोई ऐसा उपाय बताओ कि जिससे इसकी इच्छा तुरन्त पूरी हो जाय और कोई जान भी न सके।

प्रियंवदा—उपाय तो तुरन्त हो सकता है, किन्तु बात छिपी रहे, इसी के लिए थोड़ा सोचना पड़ेगा।

अनसूया—क्यों?

प्रियंवदा—सच तो यह है कि राजर्षि दुष्यन्त शकुन्तला मे प्रेम करते हैं। तभी तो सदा जागते रहने के कारण इन दिनों वे कुछ दुबले दीखने लगे हैं।

राजा—वास्तव में मेरी ऐसी ही दशा हो गयी है। क्योंकि—

इन दिनों मैं इतना दुबला हो गया हूँ कि सिर के तले लगी हुई भुजा पर बँधा हुआ और रात-रात भर मेरी आँखों की कोरों से गिरे हुए गर्म आँसुओं से मैले रत्नोंवाला यह सोने का भुजबन्ध इतना ढीला

प्रियंवदा—(विचिन्त्य) हला ! मअणलेहो से करीअदु। इमं देवप्पसादस्सावदेसेण सुमणोगोविदं करिअ से हत्थअं पावइस्सं। [**हला ! मदनलेखोऽस्य क्रियताम्। इमं देवप्रसादस्यापदेशेन सुमनोगोपितं कृत्वा तस्य हस्तं प्रापयिष्यामि।**]

अनसूया—रोअइ मे सुउमारो पओओ। किं वा सउंदला भणादि ? [**रोचते मे सुकुमारः प्रयोगः। किं वा शकुन्तला भणति ?**]

शकुन्तला—को णिओओ विकप्पीअदि ? [**को नियोगो विकल्प्यते ?**]

प्रियंवदा—तेण हि अत्तणो उवण्णासपुव्वं चिंतेहि दाव ललिअपदबंधणं। [**तेन ह्यात्मन उपन्यासपूर्वं चिन्तय तावल्ललितपदबन्धनम्।**]

शकुन्तला—हला ! चिंतेमि अहं। अवहीरणभीरुअं पुणो वेवइ मे हिअअं। [**हला ! चिन्तयाम्यहम्। अवधीरणभीरुकं पुनर्वेपते मे हृदयम्।**]

राजा—(सहर्षम्)

अयं स ते तिष्ठति सङ्गमोत्सुको विशङ्कसे भीरु ! यतोऽवधीरणाम्।
लभेत वा प्रार्थयिता न वा श्रियं श्रिया दुरापः कथमीप्सितो भवेत्॥ १२॥

सख्यौ—अत्तगुणावमाणिणि ! को दाणिं सरीरणिंव्वावत्तिअं सारदिअं जोसिणिं पडंतेण वारेदि ? [**आत्मगुणावमानिनि ! क इदानीं शरीरनिर्वापयित्रीं शारदीं ज्योत्स्नां पटान्तेन वारयति ?**]

शकुन्तला—(सस्मितम्) णिओइआ दाणि म्हि। [**नियोजितेदानीमस्मि।**] (इत्युपविश्य चिन्तयति)

राजा—स्थाने खलु विस्मृतनिमेषेण चक्षुषा प्रियामवलोकयामि। यतः—

पड़ गया है कि बार-बार ऊपर सरकाने पर भी यह गट्टे पर खिसक आता है, किन्तु धनुष की डोरी की फटकार से पड़े हुए घट्ठों पर भी नहीं ठहरता॥ ११॥

प्रियंवदा—(**सोचकर**) सखी ! इससे एक प्रेम-पत्र लिखवाया जाय और उसे फूलों में छिपाकर देवता का प्रसाद कहकर राजा को दे दिया जाय।

अनसूया—यह उपाय तो मुझे भी बडा सुन्दर लगा। किन्तु शकुन्तला से भी तो पूछ लो कि वह क्या कहती है।

शकुन्तला—तुम्हारी बात में मैं भला क्या दोष निकाल सकती हूँ।

प्रियंवदा—तब अपनी दशा का चित्रण करते हुए एक अच्छी-सी कविता तो बनाओ।

शकुन्तला—सखी ! कविता तो मै बना लूँगी। पर यह सोचकर हृदय काँप उठता है कि कहीं वे मेरा निरादर न कर दें।

राजा—(**हर्ष से**) तुम जिससे निरादर की आशंका कर रही हो, वह तुमसे मिलने को उतावला खडा है। जो लक्ष्मी पाने का इच्छुक हो, उसे लक्ष्मी भले ही न मिले। किन्तु जिसे स्वयं लक्ष्मी चाहे वह लक्ष्मी को न मिले, यह कैसे हो सकता है ?॥ १२॥

दोनों—तू अपने को इतना तुच्छ क्यों समझती है ? बता तो सही ऐसा कौन मूर्ख होगा, जो शरीर को शान्ति देनेवाली शरद की चाँदनी को रोकने के लिए अपने सिर पर कपड़ा ओढ ले ?

शकुन्तला—(**मुस्कराकर**) अच्छा, तुम जो कहती हो वही करती हूँ। (**यह कहकर बैठी-बैठी सोचती है**)

राजा—अपनी प्यारी को अपलक नयनों से देखने का यह अच्छा अवसर मिला है। क्योंकि—

उन्नमितैकभ्रूलतमाननमस्याः पदानि रचयन्त्याः।
कण्टकितेन प्रथयति मय्यनुरागं कपोलेन॥ १३॥

शकुन्तला—हला! चिंतिदं मए गीदवत्थु। ण खु सण्णिहिदाणि उण लेहणसाहणाणि। [हला! चिन्तितं मया गीतवस्तु। न खलु सन्निहितानि पुनर्लेखनसाधनानि।]

प्रियंवदा—इमस्सिं सुओदरसुउमारे णलिणीपत्ते णहेहिं णिक्खित्तवण्णं करेहि। [एतस्मिञ्छुकोदरसुकुमारे नलिनीपत्रे नखैर्निक्षिप्तवर्णं कुरु।]

शकुन्तला—(यथोक्तं रूपयित्वा) हला! सुणुद दाणिं संगदत्थं ण वेति। [हला! शृणुतमिदानीं सङ्गतार्थं न वेति।]

उभे—अवहिद म्ह। [अवहिते स्वः।]

शकुन्तला—(वाचयति)

तुज्झ ण आणे हिअअं मम उण कामो दिवावि रत्तिम्मि।
णिग्घिण! तवइ बलीअं तुइ वुत्तमणोरहाइँ अंगाइँ॥ १४॥
[तव न जाने हृदयं मम पुनः कामो दिवाऽपि रात्रिमपि।
निर्घृण! तपसि बलीयस्त्वयि वृत्तमनोरथान्यङ्गानि॥]

राजा—(सहसोपसृत्य)

तपति तनुगात्रि! मदनस्त्वामनिशं मां पुनर्दहत्येव।
ग्लपयति यथा शशाङ्कं न तथा हि कुमुद्वतीं दिवसः॥ १५॥

सख्यौ—(सहर्षम्) साअदं अविलंबिणो मणोरहस्स। [स्वागतमविलम्बिनो मनोरथस्य।]

(शकुन्तलाऽभ्युत्थातुमिच्छति)

राजा—अलमलमायासेन—

इस गीत बनाने वाली सुन्दरी का लता के सदृश, चढी हुई एक भौंहयुक्त और हर्ष से पुलकित गालोंवाला मुख ही बतला रहा है कि यह मुझसे कितना प्रेम करती है॥ १३॥

शकुन्तला—सखी! कविता तो मैंने सोच ली है। किन्तु लिखने की सामग्रियाँ तो यहाँ कुछ भी नहीं हैं।

प्रियंवदा—सुग्गे की छाती जैसे कोमल इस कमलिनी के पत्ते पर नखों से ही लिख डालो न।

शकुन्तला—(ऐसा ही करती हुई) सखी! अब सुनो, यह गीत ठीक बना है या नहीं।

दोनों—हाँ, हम सुन रही हैं।

शकुन्तला—(बाँचती है)

हे निर्दयी! मैं तुम्हारे मन की बात तो नहीं जानती, किन्तु तुम्हारे प्रेमपाश में आबद्ध मेरे समस्त अंगों को बलवान् कामदेव दिन-रात सन्तप्त करता है॥ १४॥

राजा—(शीघ्र आगे बढकर) सुन्दरी! तुम्हें तो कामदेव केवल सन्तप्त करता है, पर मुझे तो वह एकदम जलाये ही जा रहा है। क्योंकि दिन में कुमुदिनी उतनी नहीं कुम्हलाती, जितना चन्द्रमा कुम्हलाता है॥ १५॥

सखियाँ—(सहर्ष) स्वागत है श्रीमान्! हम सब अभी आपके दर्शन की ही बात सोच रही थी कि आप स्वयं आ गये।

(शकुन्तला उठना चाहती है)

राजा—बस-बस, कष्ट करने की आवश्यकता नहीं है।

सन्दष्टकुसुमशयनान्याशुक्लान्तबिसभङ्गसुरभीणि ।
गुरुपरितापानि न ते गात्राण्युपचारमर्हन्ति ॥ १६ ॥

अनसूया—इदो सिलातलेक्कदेसं अलंकरेदु वअस्सो । [इतः शिलातलैकदेशमलङ्करोतु वयस्यः ।]

(राजोपविशति । शकुन्तला सलज्जा तिष्ठति)

प्रियंवदा—दुवेणं णु वो अणोण्णाणुराओ पच्चक्खो । सहीसिणेहो मं पुणरुत्तवादिणिं करेदि।

[द्वयोर्ननु युवयोरन्योन्यानुरागः प्रत्यक्षः । सखीस्नेहो मां पुनरुक्तवादिनीं करोति ।]

राजा—भद्रे ! नैतत्परिहार्यम् । विवक्षितं ह्यनुक्तमनुतापं जनयति ।

प्रियंवदा—आवण्णस्स विसअणिवासिणो जणस्स अत्तिहरेण रण्णा होदव्वं त्ति एसो वो धम्मो।

[आपन्नस्य विषयनिवासिनो जनस्यार्तिहरेण राज्ञा भवितव्यमित्येष युष्माकं धर्मः ।]

राजा—नास्मात्परम् ।

प्रियंवदा—तेण हि इअं णो पिअसही तुमं उद्दिसिअ इमं अवत्थंतरं भअवता मअणेण आरोविदा। ता अरुहसि अब्भुववत्तीए जीविदं से अवलंबिदुं। [तेन हीयं नौ प्रियसखी त्वामुद्दिश्येदमवस्थान्तरं भगवता मदनेनारोपिता । तदर्हस्यभ्युपपत्त्या जीवितं तस्या अवलम्बितुम् ।]

राजा—भद्रे ! साधारणोऽयं प्रणयः सर्वथाऽनुगृहीतोऽस्मि ।

शकुन्तला—(प्रियंवदामवलोक्य) हला ! किं अंतेउरविरहपज्जुस्सुअस्स राएसिणो उवरोहेण ? [हला ! किमन्तःपुरविरहपर्युत्सुकस्य राजर्षेरुपरोधेन ?]

राजा—सुन्दरि !

इदमनन्यपरायणमन्यथा हृदयसन्निहिते ! हृदयं मम ।
यदि समर्थयसे मदिरेक्षणे ! मदनबाणहतोऽस्मि हतः पुनः ॥ १७ ॥

विरह के अत्यन्त ताप से तुमने फूल के बिछौने पर जो इधर-उधर करवटें बदलीं थीं, इससे फूलों की पंखुड़ियाँ तुम्हारे शरीर में पसीने से चिपक गई हैं। तुमने सुगन्धित कमलनाल के जो आभूषण पहन रखे हैं, वे भी मुरझा गये हैं। इससे स्पष्ट है कि तुम्हारा शरीर बहुत विकल है और तुम इस समय उठकर किसी का आदर-सत्कार करने योग्य नहीं हो ॥ १६ ॥

अनसूया—मित्र ! आप भी इसी पत्थर की पटिया के एक कोने को सुशोभित कीजिए।

(राजा बैठते हैं और शकुन्तला सकुचाजाती है)

प्रियंवदा—यह बात तो प्रत्यक्ष है कि आप दोनों एक-दूसरे से प्रेम करते हैं, फिर भी मुझे अपनी सखी का प्रेम आपसे पुनः कुछ कहने को विवश कर रहा है।

राजा—भद्रे ! अपने मन की बात कह डालिए। क्योंकि मन में आई हुई बात यदि नहीं कही जाती है तो पीछे बहुत पछतावा होता है।

प्रियंवदा—राजा होने के नाते आपका यह धर्म है कि अपने राज्य में रहने वाले दुःखी लोगों का दुख दूर करें।

राजा—बस, इतनी सी बात है।

प्रियंवदा—हाँ, भगवान् कामदेव ने आपके ही कारण हमारी सखी की ऐसी दशा कर दी है। अब आप ही कृपा करें तो उसके प्राण बच सकते हैं।

राजा—भद्रे ! यह तो बड़ी साधारण माँग है। इसे उपस्थित करके आपने बड़ी कृपा की है।

शकुन्तला—(प्रियंवदा को देखकर) सखी ! रनिवास की रानियों के विरह में व्याकुल महाराज से तुम ऐसा दुराग्रह क्यों करती हो ?

अनसूया—वअस्स ! बहुवल्लहा राआणो सुणीअंति। जह णो पिअसही बंधुअणसोअणिज्जा ण होइ तह णिव्वत्तेहि। [वयस्य ! बहुवल्लभा राजानः श्रूयन्ते। यथा नौ प्रियसखी बन्धुजनशोचनीया न भवति तथा निर्वर्तय।]

राजा—भद्रे ! किं बहुना—

परिग्रहबहुत्वेऽपि द्वे प्रतिष्ठे कुलस्य मे।
समुद्रवसना चोर्वी सखी च युवयोरियम्॥ १८॥

उभे—णिव्वुदे म्ह। [निर्वृते स्वः।]

प्रियंवदा—(सदृष्टिक्षेपम्) अणसूए ! जह एसो इदो दिण्णदिट्ठी उस्सुओ मिअपोदओ मादरं अण्णेसदि। एहि; संजोएम णं। [अनसूये ! यथैष इतो दत्तदृष्टिरुत्सुको मृगपोतको मातरमन्विष्यति। एहि; संयोजयाव एनम्।] (इत्युभे प्रस्थिते)

शकुन्तला—हला ! असरण म्हि। अण्णदरा वो आअच्छदु। [हला ! अशरणास्मि। अन्यतरा युवयोरागच्छतु।]

उभे—पुहवीए जो सहणं सो तुह समीवे वट्टइ। [पृथिव्या यः शरणं स तव समीपे वर्तते।]

(इति निष्क्रान्ते)

शकुन्तला—कहं गदाओ एव्व ? [कथं गते एव ?]

राजा—अलमावेगेन। नन्वयमाराधयिता जनस्तव समीपे वर्तते।

किं शीतलैः क्लमविनोदिभिरार्द्रवातान्सञ्चारयामि नलिनीदलतालवृन्तैः।
अङ्के निधाय करभोरु ! यथासुखं ते संवाहयामि चरणावुत पद्मताम्रौ॥ १९॥

राजा—सुन्दरी ! मेरा हृदय तुम्हें छोडकर और किसी से प्रेम नहीं करता। फिर भी हे मदभरी नयनोंवाली हृदयेश्वरी ! यदि तुम इसका विश्वास नहीं करती तो मैं यही समझूँगा कि कामदेव के बाणों से एक बार घायल इस व्यक्ति को तुम दुबारा घायल कर रही हो॥ १७॥

अनसूया—वयस्य ! ऐसा सुना जाता है कि राजाओं के पास बहुत-सी रानियाँ होती हैं। तो हमारी प्यारी सखी के लिए कुछ ऐसा प्रबन्ध अवश्य कर दीजिए कि जिससे हम सगे-साथियों को पछताना न पड़े।

राजा—भद्रे ! मैं और क्या कहूँ (इतना ही कह सकता हूँ कि—)

रनिवास में बहुतेरी रानियों के होते हुए भी मेरे कुल में दो ही बड़ी समझी जायेंगी। एक तो सागर से घिरी हुई पृथ्वी और दूसरी तुम्हारी सखी शकुन्तला॥ १८॥

दोनों—तब तो हमें सन्तोष है।

प्रियंवदा—(बाहर देखकर) अनसूया ! देख, वह मृगशावक इधर ही देखता हुआ अपनी माँ को ढूढ रहा है। चल, इसे इसकी माँ से मिला दें। (दोनों चलने को उद्यत होती हैं)

शकुन्तला—सखियो ! मुझे किसके सहारे छोड़े जा रही हो ? दोनों में से कोई एक तो यहाँ रहो।

दोनों—सारी पृथ्वी को शरण देनेवाला तो तुम्हारे पास बैठा ही है। (प्रस्थान करती हैं)

शकुन्तला—अरे, क्या वे चली ही गईं ?

राजा—घबराती क्यों हो। तुम्हारी सेवा करने के लिए यह सेवक तो यहाँ बैठा ही है।

हे सुन्दरी ! हे करभ के समान जाँघों वाली ! इस समय जो तुम्हें सुहाता हो, मैं वही करने को तत्पर हूँ। कहो तो थकावट दूर करनेवाले ठंडे कमलिनी के इन पत्तों से पंखा झलूँ या कहो तो तुम्हारे लाल कमलों जैसे दोनों चरणों को अपनी गोद में रखकर धीरे-धीरे दबाऊँ॥ १९॥

शकुन्तला—ण माणणीएसु अत्ताणं अवराहइस्सं। [न माननीयेष्वात्मानमपराधयिष्ये।]

(इत्युत्थाय गन्तुमिच्छति)

राजा—सुन्दरि! अनिर्वाणो दिवसः। इयं च ते शरीरावस्था।

उत्सृज्य कुसुमशयनं नलिनीदलकल्पितस्तनावरणम्।
कथमातपे गमिष्यसि परिबाधापेलवैरङ्गैः॥ २०॥

(इति बलादेनां निवर्तयति)

शकुन्तला—पोरव! रक्ख अविणअं। मअणसंतत्तावि ण हु अत्तणो पहवामि। [पौरव! रक्षाविनयम्। मदनसन्तप्ताऽपि न खल्वात्मनः प्रभवामि।]

राजा—भीरु! अलं गुरुजनभयेन। दृष्ट्वा ते विदितधर्मा तत्रभवान्नात्र दोषं ग्रहीष्यति कुलपतिः। पश्य—

गान्धर्वेण विवाहेन बह्व्यो राजर्षिकन्यकाः।
श्रूयन्ते परिणीतास्ताः पितृभिश्चाभिनन्दिताः॥ २१॥

शकुन्तला—मुंच दाव मं। भूओ वि सहीजणं अणुमाणइस्सं। [मुञ्च तावन्माम्। भूयोऽपि सखीजनमनुमानयिष्ये।]

राजा—भवतु; मोक्ष्यामि।

शकुन्तला—कदा? [कदा?]

राजा—

अपरिक्षतकोमलस्य यावत्कुसुमस्येव नवस्य षट्पदेन।
अधरस्य पिपासता मया ते सदयं सुन्दरि! गृह्यते रसोऽस्य॥ २२॥

शकुन्तला—पूज्य लोगों से सेवा कराकर मैं अपने सिर पाप नहीं लेना चाहती।

(उठकर जाना चाहती है)

राजा—सुन्दरी! अभी दिन नहीं ढला है और तुम्हारे शरीर की यह दशा है।

इस दुपहरी में फूलों का बिस्तर छोड़ और कमल के पत्तों मे स्तन ढँककर विरह से सन्ताप अपने दुर्बल अंगों को लेकर तुम धूप में कहाँ जाओगी? ॥ २० ॥

(शकुन्तला को बरबस रोक लेता है)

शकुन्तला—पौरव! शील का भी कुछ ध्यान रखो। प्रेम से व्याकुल होने पर भी मैं अपने मन से कुछ नहीं कर सकती।

राजा—अरी भीरु! गुरुजनों से तो डरने की तो कोई बात ही नहीं है। पूज्य कुलपति धर्म को भलीभाँति जानते हैं। यदि वे सब बातें ज़ान लेंगे, तब भी इसे बुरा नहीं कहेंगे। देखो—

बहुत से राजर्षियों की कन्याओं नें गान्धर्व विवाह किया है और यह भी सुना जाता है कि उनके पिताओं ने उनका समर्थन ही किया है॥ २१॥

शकुन्तला—अच्छा, अभी मुझे छोड़ दीजिए। मै एक बार अपनी सखियों से तो पूछ लूँ।

राजा—अच्छा, छोड़ दूँगा।

शकुन्तला—कब?

राजा—जैसे भौंरा नवीन और कोमल फूल का रस बड़े चाव से पीता है, वैसे ही जब मुझ प्यासे को तुम्हारे कोमल अधरों का रसपान करने पीने को मिल जायेगा, तब मैं छोड़ दूँगा॥ २२॥

(इति मुखमस्याः समुन्नमयितुमिच्छति। शकुन्तला परिहरति नाट्येन)

(नेपथ्ये) चक्कवाकबहुए! आमंतेहि सहअरं। उवट्ठिआ रअणी। [चक्रवाकवधुके! आमन्त्रयस्व हचरम्। उपस्थिता रजनी।]

शकुन्तला—(ससम्भ्रमम्) पोरव! असंसअं मम सरीरवुत्तंतोवलंभस्स अज्जा गोदमी इदो एव्व आअच्छदि, ता विडवंतरिदो होहि। [पौरव! असंशयं मम शरीरवृत्तान्तोपलम्भायार्या गौतमीत वागच्छति, तद्विटपान्तरितो भव।]

राजा—तथा (इत्यात्मानमावृत्य तिष्ठति)

(ततः प्रविशति पात्रहस्ता गौतमी सख्यौ च)

सख्यौ—इदो इदो अज्जा गोदमी। [इत इत आर्या गौतमी।]

गौतमी—(शकुन्तलामुपेत्य) जादे! अवि लहुसंदावाइँ दे अंगाइँ? [जाते! अपि लघुसन्तापानि ऽङ्गानि?]

शकुन्तला—अज्जे! अत्थि मे विसेसो। [आर्ये! अस्ति मे विशेषः।]

गौतमी—इमिणा दब्भोदएण णिरावाधं एव्व दे शरीरं भविस्सदि। (शिरसि शकुन्तलामभ्युक्ष्य) वच्छे! परिणदो दिअहो। एहि, उडजं एव्व गच्छम्ह। [अनेन दर्भोदकेन निरावाधमेव ते शरीरं भविष्यति। वत्से! परिणतो दिवसः। एहि, उटजमेव गच्छामः।] (इति प्रस्थिताः)

शकुन्तला—(आत्मगतम्) हिअअ! पढमं एव्व सुहोवणदे मणोरहे कादरभावं ण मुंचसि। सााणुसअविहडिअस्स कहं दे संपदं संदावो? (पदान्तरे स्थित्वा प्रकाशम्) लदावलअ! संदावहारअ! आमंतेमि तुमं भूओ वि परिभोअस्स। [हृदय! प्रथममेव सुखोपनते मनोरथे कातरभावं न मुञ्चसि। सानुशयविघटितस्य कथं ते साम्प्रतं सन्तापः? लतावलय! सन्तापहारक! आमन्त्रये त्वां भूयोऽपि परिभोगाय।] (इति दुःखेन निष्क्रान्ता शकुन्तला सहेतराभिः)

(ऐसा कहकर राजा उसका मुँह ऊपर उठाना चाहता है और शकुन्तला उन्हें रोकने का अभिनय करती है)

(नेपथ्य में) अरी चकवी! अपने प्यारे से विदा ले। क्योंकि रात आ गयी है।

शकुन्तला—(घबराकर) पौरव! ऐसा लगता है कि मेरे शरीर की दशा जानने के लिए आर्या गौतमी यहाँ आ रही हैं। अतएव आप इस वृक्ष की ओट में छिप जाइये।

राजा—अच्छा। (एकान्त में जाकर छिप जाता है)

(हाथ में पात्र लिये दोनों सखियों के साथ गौतमी का प्रवेश)

सखियाँ—आर्या गौतमी! इधर आइये, इधर।

गौतमी—(शकुन्तला के पास जाकर) वत्से! तुम्हारे शरीर का ताप तो कुछ कम हुआ न?

शकुन्तला—आर्ये! अब मैं कुछ ठीक हूँ।

गौतमी—इस कुशा के जल से तुम बिल्कुल अच्छी हो जाओगी। (शकुन्तला के सिर पर जल छिड़कती है) वत्से! दिन ढल गया है। आओ चलो, कुटी में चलें। (सभी चली जाती हैं)

शकुन्तला—(मन ही मन) हृदय! जब तुम्हारा प्यारा स्वयं आ पहुँचा था, तब तो तुम डरपोक बने रहे। अब बिछुड़ जाने पर क्यों इतने विकल हो रहे हो? (कुछ पग चलकर, प्रकट में) हे सन्ताप हरनेवाले लतापुंज! विहार के लिए मैं तुम्हें फिर आने का निमन्त्रण देती हूँ। (दुःख के साथ शकुन्तला अन्य स्त्रियों के साथ चली जाती है)

राजा—(पूर्वस्थानमुपेत्य सनिःश्वासम्) अहो, विघ्नवत्यः प्रार्थितार्थसिद्धयः। मया हि—

मुहुरङ्गुलिसंवृताधरोष्ठं प्रतिषेधाक्षरविक्लवाभिरामम्।
मुखमंसविवर्ति पक्ष्मलाक्ष्याः कथमप्युन्नमितं न चुम्बितं तु॥ २३॥

क्व नु खलु सम्प्रति गच्छामि ? अथवा—इहैव प्रियापरिभुक्तमुक्ते लतावलये मुहूर्तं स्थास्यामि।

(सर्वतोऽवलोक्य)

तस्याः पुष्पमयी शरीरलुलिता शय्या शिलायामियं
क्लान्तो मन्मथलेख एष नलिनीपत्रे नखैरर्पितः।
हस्ताद् भ्रष्टमिदं विसाभरणमित्यासज्यमानेक्षणो
निर्गन्तुं सहसा न वेतसगृहाच्छक्नोमि शून्यादपि॥ २४॥

(आकाशे)

राजन्!
सायन्तने सवनकर्मणि सम्प्रवृत्ते वेदीं हुताशनवतीं परितः प्रयस्ताः।
छायाश्चरन्ति बहुधा भयमादधानाः सन्ध्यापयोदकपिशाः पिशिताशनानाम्॥२५॥

राजा—अयमयमागच्छामि। (इति निष्क्रान्ताः)

॥ इति तृतीयोऽङ्कः ॥

राजा—(पहले स्थान पर पहुँचकर ठंडी साँसें लेते हुए) आह! मन की साध पूरी होने में कितनी बाधाएं आती हैं। क्योंकि—

सुन्दर पलकोंवाली शकुन्तला के उस मुख को उठाकर मैं चूम भी नहीं पाया, जो अपने होंठ को बार-बार अपनी अंगुलियों से ढँकती रहती थी, जो बार-बार नहीं-नहीं कहते हुए बड़ा सुन्दर लग रहा था और जिसे वह बार-बार अपने कन्धे की ओर मोड़ लेती थी॥ २३॥

अब मैं कहाँ जाऊं? अच्छा इसी लतागुंज में थोड़ी देर ठहर जाता हूँ, जहाँ मेरी प्यारी इतनी देर रहकर चली गई है। (चारों ओर देखकर)

इस पटिया पर उसके शरीर से मसला हुआ फूलों का बिछावन पड़ा है। कमलिनी के पत्ते पर नखों से लिखा और मुरझाया हुआ प्रेम-पत्र भी रखा है। उसके हाथों से सूखकर गिरे हुए ये कमलनाल के आभूषण भी बिखरे पड़े हैं। अतएव अपने नेत्रों को उलझानेवाली इतनी वस्तुओं के होते हुए बेतों से घिरे इस सूने लतामण्डप को इतनी जल्दी छोड़कर मैं कहीं भी जाने में असमर्थ हूँ॥ २४॥

(आकाश में)

राजन्! सायंकालीन यज्ञकर्म के आरम्भ होते ही जलती हुई अग्निवाली वेदियों के चारों ओर साँझ के बादलों जैसे काले-काले और लाल-लाल डरावने राक्षस इधर-उधर घूमने लगे हैं॥ २५॥

राजा—मै अभी आता हूँ। (प्रस्थान करता है)

तीसरा अङ्क समाप्त।

चतुर्थोऽङ्कः

(ततः प्रविशतः कुसुमावचयं नाटयन्त्यौ सख्यौ)

अनसूया—पिअंवदे ! जइ वि गंधव्वेण विहिणा णिव्वुत्तकल्लाणा सउंदला अणुरूवभत्तुगामिणी संवुत्तेति णिव्वुदं में हिअअं, तह वि एत्तिअं चिंतणिज्जं। [**प्रियंवदे! यद्यपि गान्धर्वेण विधिना निर्वृत्तकल्याणा शकुन्तलाऽनुरूपभर्तृगामिनी संवृत्तेति मे हृदयम्, तथाप्येतावच्चिन्तनीयम्।**]

प्रियंवदा—कहं विअ ? [**कथमिव ?**]

अनसूया—अज्ज सो राएसी इट्ठि परिसमाविअ इसीहिं विसज्जिओ अत्तणो णअरं पविसिअ अंतेउरसमागदो इदोगदं वुत्तंतं सुमरदि वा ण वे त्ति। [**अद्य स राजर्षिरिष्टिं परिसमाप्य ऋषिभिर्विसर्जित आत्मनो नगरं प्रविश्यान्तःपुरसमागत इतोगतं वृत्तान्तं स्मरति वा न वे ति।**]

प्रियंवदा—वीसद्धा होहि। ण तादिसा आकिदिविसेसा गुणविरोहिणो होंति। तादो दाणिं इमं वुत्तंतं सुणिअ ण जाणे किं पडिवज्जिसदि त्ति। [**विस्रब्धा भव। न तादृशा आकृतिविशेषा गुणविरोधिनो भवन्ति। तात इदानीमिमं वृत्तान्तं श्रुत्वा न जाने किं प्रतिपत्स्यत इति।**]

अनूसया—जह अहं देक्खामि तह तस्स अणुमदं भवे। [**यथाऽहं पश्यामि तथा तस्यानुमतं भवेत्।**]

प्रियंवदा—कहं विअ ? [**कथमिव ?**]

अनूसया—गुणवदे कण्णआ पडिवादणिज्जे त्ति अअं दाव पढमो संकप्पो। तं जइ देव्वं एव्व संपादेदि णं अप्पआसेण किदत्थो गुरुअणो। [**गुणवते कन्यका प्रतिपादनीयेत्ययं तावत्प्रथमः सङ्कल्पः। तं यदि दैवमेव सम्पादयति नन्वप्रयासेन कृतार्थो गुरुजनः।**]

प्रियंवदा—(पुष्पभाजनं विलोक्य) सहि ! अवइदाइं बलिकम्मपज्जत्ताइं कुसुमाइं। [**सखि! अवचितानि बलिकर्मपर्याप्तानि कुसुमानि।**]

(**फूल चुनने का अभिनय करती हुई दोनों सखियों का प्रवेश**)

अनसूया—प्रियंवदा ! यद्यपि शकुन्तला का गान्धर्व विवाह हो गया और उसे योग्य पति भी मिला, किन्तु एक बात की बड़ी चिन्ता है।

प्रियंवदा—कैसी चिन्ता ?

अनसूया—वह यह कि आज यज्ञ पूर्ण हो चुकने पर जब राजा दुष्यन्त ऋषियों से विदा लेकर अपने नगर के रनिवास में पहुँच जायँगे, तब उनको यहाँ की सुधि रहेगी भी या नहीं।

प्रियंवदा—तू इसकी चिन्ता मत कर। क्योंकि ऐसी आकृति के लोग कपटी नहीं होते। किन्तु ये सभी बातें सुनकर पिताजी न जाने क्या करेंगे ?

अनसूया—जहाँ तक मै समझती हूँ, वे भी इसका समर्थन ही करेंगे।

प्रियंवदा—वह कैसे ?

अनसूया—क्योंकि उनका तो यह संकल्प ही था कि कोई योग्य वर मिल जायेगा तो इसका विवाह कर देंगे। अब जब दैव ने ही वह काम पूरा कर दिया, तब तो बिना परिश्रम के ही उनका मनोरथ सफल हो गया।

अनसूया—णं सहीए सउंदलाए सोहग्गदेवआ अच्चणीआ। [ननु सख्याः शकुन्तलायाः सौभाग्यदेवताऽर्चनीया।]

प्रियंवदा—जुज्जदि। [युज्यते।] (इति तदेव कर्मारभेते)

(नेपथ्ये) अयमहं भोः!

अनसूया—(कर्णं दत्त्वा) सहि! अदिधीणं विअ णिवेदिदं। [सखि! अतिथीनामिव निवेदितम्।]

प्रियंवदा—णं उंडजसंणिहिदा सउंदला। (आत्मगतम्) अज्ज उण हिअएण असंणिहिदा। [ननूटजसन्निहिता शकुन्तला। अद्य पुनर्हृदयेनासन्निहिता।]

अनसूया—होदु; अलं एत्तिएहिं कुसुमेहिं। [भवतु; अलमेतावद्भिः कुसुमैः।]

(इति प्रस्थिते)

(नेपथ्ये) आः अतिथिपरिभाविनि!

विचिन्तयन्ती यमनन्यमानसा तपोधनं वेत्सि न मामुपस्थितम्।
स्मरिष्यति त्वां न स बोधितोऽपि सन् कथां प्रमत्तः प्रथमं कृतामिव॥ १॥

प्रियंवदा—हद्धी हद्धी। अप्पिअं एव्व संवुत्तं। कस्सिं पि पूआरहे अवरद्धा सुण्णहिअआ सउंदला। (पुरोऽवलोक्य) ण हु जस्सिं कस्सिं पि। एसो दुव्वासो सुलहकोवो महेसी तह सविअ वेअवलुप्फुल्लाए दुव्वाराए गईए पडिणिवुत्तो। को अण्णो हुदवहादो दहिदुं पहवदि? [हा धिक् हा धिक्। अप्रियमेव संवृत्तम्। कस्मिन्नपि पूजार्हेऽपराद्धा शून्यहृदया शकुन्तला। न खलु यस्मिन्कस्मिन्नपि। एष दुर्वासाः सुलभकोपो महर्षिः तथा शप्त्वा वेगबलोत्फुल्लया दुर्वारया गत्या प्रतिनिवृत्तः। कोऽन्यो हुतवहादृते प्रभवति?]

प्रियंवदा—(फूलों की डोलची दिखलाकर) सखी! बलि-कर्म के लिए इतने फूल पर्याप्त होंगे न?

अनसूया—क्यों, अभी शकुन्तला के सौभाग्य-देवता का भी तो पूजन करना है।

प्रियंवदा—ठीक कहती हो। (पुनः फूल चुनने लगती है)

(नेपथ्य में) अरे मैं यहां आया हुआ हूं।

अनसूया—(कान लगाकर) यह तो किसी अतिथि की आवाज जान पडती है।

प्रियंवदा—शकुन्तला तो कुटी में है ही। (मन ही मन) किन्तु वह आज कुछ अनमनी-सी है।

अनसूया—चलो, इतने फूलों से काम चल जायेगा।

(दोनों प्रस्थान करती हैं)

(नेपथ्य में) अरी वो अतिथि का अपमान करनेवाली!

जिसके ध्यान में इतनी मग्न होकर तू मुझ जैसे तपस्वी के आने की भी परवाह नहीं कर रही है, वह स्मरण दिलाने पर भी तुझे उसी प्रकार भूल जायेगा, जैसे पागल मनुष्य अपनी पिछली बातें भूल जाया करता है॥ १॥

प्रियंवदा—हाय हाय! यह तो बडा अनर्थ हो गया। ऐसा लगता है कि अपने अनमनेपन से शकुन्तला ने किसी पूजनीय पुरुष का अपमान कर दिया है। (सामने देखकर) और वह भी किसी ऐसे-वैसे का नहीं, ये जरा सी बात पर बिगड जानेवाले महर्षि दुर्वासा हैं, जो शाप देकर क्रोध के मारे लडखडाते पैरों से लौटे चले जा रहे हैं। भला आग के अतिरिक्त जलाने का कार्य और कौन कर सकेगा?

अनसूया—गच्छ, पादेसु पणमिअ णिवत्तेहि णं जाव अहं अग्घोदअं उवकप्पेमि। [गच्छ, पादयोः प्रणम्य निवर्तयैनं यावदहमर्घोदकमुपकल्पयामि।]

प्रियंवदा—तह। [तथा।] (इति निष्क्रान्ता)

अनसूया—(पदान्तरे स्खलितं निरूप्य) अव्वो! आवेअक्खलिदाए गईए पब्भट्ठं मे अग्गहत्थादो पुप्फभाअणं। [अहो! आवेगस्खलितया गत्या प्रभ्रष्टं ममाग्रहस्तात्पुष्पभाजनम्।] (इति पुष्पोच्चयं रूपयति)

(प्रविश्य)

प्रियंवदा—सहि! पकिदिवक्को सो कस्स अणुणअं पडिगेण्हदि? किं वि उण साणुक्कोसो किदो। [सखि! प्रकृतिवक्रः स कस्यानुनयं प्रतिगृह्णाति? किमपि पुनः सानुक्रोशः कृतः।]

अनसूया—(सस्मितम्) तस्सिं बहु एदं पि कहेहि। [तस्मिन्बहेतदपि कथय।]

प्रियंवदा—जदा णिवत्तिदुं ण इच्छदि तदा विण्णविदो मए—भअवं! पढम त्ति पेक्खिअ अविण्णादतवप्पहावस्स दुहिदुजणस्स भअवदा एक्को अवराहो मरिसिदव्वो त्ति। [यदा निवर्तितुं नेच्छति तदा विज्ञापितो मया— भगवन्! प्रथम इति प्रेक्ष्याऽविज्ञाततपःप्रभावस्य दुहितृजनस्य भगवतैकोऽपराधो मर्षयितव्य इति।]

अनसूया—तदो तदो? [ततस्ततः?]

प्रियंवदा—ततो ण मे वअणं अण्णहाभविदुं अरिहदि, किंदु अहिण्णाणाभरणदंसणेण सावो णिवत्तिस्सदि त्ति मंतअंतो सअं अंतरिहिदो। [ततो न मे वचनमन्यथाभवितुमर्हति, किन्त्वभिज्ञानाभरणदर्शनेन शापो निवर्तिष्यते इति मन्त्रयन् स्वयमन्तर्हितः।]

अनसूया—सक्कं दाणिं अस्ससिदुं। अत्थि तेण राएसिणा संपत्थिदेण सणामहेअंकिअं अंगुलीअअं

अनसूया—जा, उनके पैरों पड़कर उन्हें लौटा ला। तब तक मैं अर्घ्य का जल जुटाती हूँ।

प्रियंवदा—अच्छी बात है। (जाती है)

अनसूया—(दो-एक पग चलकर ठोकर खाने का अभिनय करती हुई) हाय हाय! वेग से चलने के कारण ऐसी ठोकर लगी कि हाथ से फूल की डोलची ही छूट पडी। (फूल बटोरने का अभिनय करती है)

(प्रवेश करके)

प्रियंवदा—सखी! वे तो बड़े क्रोधी स्वभाव के व्यक्ति हैं। वे क्या किसी की विनती सुनते हैं? फिर भी मैंने उन्हें बडी कठिनाई से थोड़ा-बहुत अपने अनुकूल कर लिया है।

अनसूया—(मुस्कराकर) उनके विषय में इतना भी क्या कम है। कहो, क्या किया तुमने?

प्रियंवदा—जब वे किसी तरह लौटने को राजी नहीं हुए, तब मैंने प्रार्थना की—भगवन्! एक तो शकुन्तला का यह पहला ही अपराध है, फिर वह आपके तेज का प्रभाव भी नहीं जानती। इसलिए इस बार उसे क्षमा कर दीजिए।

अनसूया—तब क्या हुआ?

प्रियंवदा—तब वे यही कहकर अन्तर्धान हो गये कि 'मेरा वचन तो झूठा नहीं जा सकता। हाँ, यह सम्भव है कि यदि वह कन्या अपने प्रेमी को कोई पहचान का आभूषण दिखला देगी तो मेरा शाप छूट जायेगा'।

सुमरणीअं त्ति सअं पिणद्धं। तस्सिं साहीणोवाआ सउंदला भविस्सदि। [शक्यमिदानीमाश्वसितुम्। अस्ति तेन राजर्षिणा सम्प्रस्थितेन स्वनामधेयाङ्कितमङ्गुलीयकं स्मरणीयमिति स्वयं पिनद्धम्। तस्मिन् स्वाधीनोपाया शकुन्तला भविष्यति।]

प्रियंवदा—सहि! एहि; देवकज्जं दाव से णिव्वत्तेम्ह। [सखि! एहि; देवकार्यं तावदस्या निर्वर्तयावः।] (इति परिक्रामतः)

प्रियंवदा—(विलोक्य) अणसूए! पेक्ख दाव। वामहत्थोवहिदवअणा आलिहिदा विअ पिअसही। भत्तुगदाए चिंताए अत्ताणं पि ण एसा विभावेदि। किं उण आअंतुअं? [अनसूये! पश्य तावत्; वामहस्तोपहितवदनाऽऽलिखितेव प्रियसखी। भर्तृगतया चिन्तयाऽऽत्मानमपि नैषा विभावयति। किं पुनरागन्तुकम्?]

अनसूया—पिअंवदे! दुवेणं एव्व णं णो मुहे एसो वुत्तंतो चिट्ठदु। रक्खिदव्वा खु पकिदिपेलवा पिअसही। [प्रियंवदे! द्वयोरेव ननु नौ मुख एष वृत्तान्तस्तिष्ठतु। रक्षितव्या खलु प्रकृतिपेलवा प्रियसखी।]

प्रियंवदा—को णाम उण्होदएण णोमालिअं सिंचेदि? [को नामोष्णोदकेन नवमालिकां सिञ्चति?]

(इत्युभे निष्क्रान्ते)

॥ विष्कम्भकः ॥

(ततः प्रविशति सुप्तोत्थितः शिष्यः)

शिष्यः—वेलोपलक्षणार्थमादिष्टोऽस्मि तत्रभवता प्रवासादुपावृत्तेन कण्वेन। प्रकाशं निर्गतस्तावदवलोकयामि कियदवशिष्टं रजन्या इति। (परिक्रम्यावलोक्य च) हन्त प्रभातम्। तथा हि—

अनसूया—चलो कुछ तो आश्वासन मिला। क्योंकि राजर्षि दुष्यन्त ने जाते समय अपने नाम से अंकित अँगूठी स्मृति के लिए शकुन्तला की अँगुली में स्वयं पहना दी थी। बस, वह अँगूठी ही शकुन्तला को शाप से छुटकारा पाने का एकमात्र उपाय है।

प्रियंवदा—सखी! चलो, तब तक देवपूजन का काम कर लें। **(दोनों घूमती हैं)**

प्रियंवदा—**(देखकर)** अनसूया! देखो तो, बायें हाथ पर गाल रखकर, बैठी हुई प्यारी सखी कैसी चित्रलिखित-सी दीख रही है। पति की चिन्ता में जब यह अपनी ही सुध-बुध में खोये बैठी है; तब फिर अतिथि का कौन सोचे?

अनसूया—प्रियंवदा! देखो, यह बात हमारे-तुम्हारे तक ही सीमित रहे। क्योंकि शकुन्तला बड़े कोमल स्वभाव की है और उसकी रक्षा तो हमें ही करनी है।

प्रियंवदा—यह तो ठीक ही है। नवमल्लिका की लहलहाती लता को गरम पानी से भला कौन सींचेगा?

(दोनों का प्रस्थान)

॥ विष्कम्भक ॥

(सोकर उठे हुए एक शिष्य का प्रवेश)

शिष्य—प्रवास से अभी लौटे हुए पूज्य कण्व ने मुझे समय जानने के लिए आज्ञा दी है। अतः बाहर चलकर देखूँ कि रात कितनी बाकी है। **(इधर-उधर घूमकर तथा आकाश की ओर देखकर)** अरे, यह तो सबेरा हो गया। क्योंकि—

यात्येकतोऽस्तशिखरं पतिरोषधीनामाविष्कृतोऽरुणपुरःसर एकतोऽर्कः।
तेजोद्वयस्य युगपद्व्यसनोदयाभ्यां लोको नियम्यत इवात्मदशान्तरेषु॥ २॥

अपि च—

अन्तर्हिते शशिनि सैव कुमुद्वती मे दृष्टिं न नन्दयति संस्मरणीयशोभा।
इष्टप्रवासजनितान्यबलाजनस्य दुःखानि नूनमतिमात्रसुदुःसहानि॥ ३॥

(प्रविश्यापटीक्षेपेण)

अनसूया—जइ वि णाम विसअपरम्मुहस्स वि जणस्स एदं ण विदिअं तह वि तेण रण्णा संउंदलाए अणज्जं आअरिदं। [**यद्यपि नाम विषयपराङ्मुखस्यापि जनस्यैतन्न विदितं तथापि तेन राज्ञा शकुन्तलायामनार्यमाचरितम्।**]

शिष्यः—यावदुपस्थितां होमवेलां गुरवे निवेदयामि। (इति निष्क्रान्तः)

अनसूया—पढिबुद्धा वि किं करिस्सं? ण मे उइदेसु वि णिअकरणिज्जेसु हत्थपाआ पसरंति। कामो दाणिं सकामो होदु। जेण असच्चसंधे जणे अणण्णहिआ सही पदं कारिदा। अहवा दुव्वाससो कोवो एसो विआरेदि। अण्णहा कहं सो राएसी तारिसाणि मंतिअ एत्तिअस्स् कालस्स लेहमेत्तं पि ण विसज्जेदि? ता इदो अहिण्णाणं अंगुलीअअं से विसज्जेम। दुक्खसीले तवस्सिजणे को अब्भत्थीअदु? णं सहीगामी दोसो त्ति व्ववसिदा वि ण पारेमि, पवासपडिणिउत्तस्स तादकण्णस्स दुस्संतपरिणीदं आवण्णसत्तं सउंदलं णिवेदिदुं। इत्थंगए अम्हेहिं किं करणिज्जं? [**प्रतिबुद्धाऽपि किं करिष्ये? न म उचितेष्वपि निजकार्येषु हस्तपादं प्रसरति। काम इदानीं सकामो भवतु। येनासत्यसन्धे जने अनन्यहृदया सखी पदं कारिता। अथवा दुर्वाससः कोप एष विकारयति। अन्यथा कथं स राजर्षिस्तादृशानि मन्त्रयित्वैतावत्कालस्य लेखमात्रमपि न विसृजति?, तदितोऽभिज्ञानमङ्गुलीयकं तस्य विसृजावः। दुःखशीले तपस्विजने कोऽभ्यर्थ्यताम्? ननु सखीगामी दोष इति व्यवसिताऽपि न पारयामि,**

एक ओर ओषधियों के पति चन्द्रमा अस्ताचल को चल पड़े हैं और दूसरी ओर अपने सारथी अरुण को आगे किये हुए सूर्य निकल रहे हैं। इन दो तेजस्वियों का एक साथ उदय और अस्त देखकर संसार को यही शिक्षा मिलती है कि दुःख के पीछे सुख और सुख के पीछे दुःख होता ही रहता है॥ २॥

और भी देखो—

चन्द्रमा के अस्त हो जाने पर वह कुमुदिनी आँखों को नहीं भाती, जिसकी शोभा कल्पनामात्र में ही शेष रह गई है। क्योंकि जिन स्त्रियों के पति परदेश चले जाते हैं, उनके पतिवियोग का दुःसह दुःख झेलना पड़ता है॥ ३॥

(झटके से परदे को उठाकर अनसूया का प्रवेश)

अनसूया—यद्यपि विषयों से विमुख रहने के कारण मैं प्रेम की बातें कुछ भी नहीं जानती। फिर भी यह अवश्य कह सकती हूँ कि उस राजा ने शकुन्तला के साथ अच्छा व्यवहार नहीं किया।

शिष्य—जरा चलकर गुरुजी को बता दूँ कि होम का समय हो गया। (**जाता है**)

अनसूया—जागकर भी क्या करूँगी? यहाँ अपने नित्य के काम के लिए भी हाथ-पैर नहीं उठ रहे हैं। अब तो कामदेव का भी जी भर गया होगा। क्योंकि मेरी सच्ची सखी ने उस झूठे राजा पर इतना विश्वास कर लिया। अथवा सम्भव है कि यह दुर्वासा के शाप का ही फल हो। अन्यथा ऐसी मीठी-मीठी बातें करनेवाला वह राजर्षि इतने दिन बीत जाने पर भी क्या एक पत्र भी न लिखता? अब उसे स्मरण दिलाने के लिए उसके पास अँगूठी भेजनी ही पडेगी। पर कठोर जीवन बितानेवाले

प्रवासप्रतिनिवृत्तस्य तातकण्वस्य दुष्यन्तपरिणीतामापन्नसत्त्वां शकुन्तलां निवेदयितुम्। इत्यङ्गतेऽस्माभिः किं करणीयम्?]

(प्रविश्य)

प्रियंवदा—(सहर्षम्) सहि! तुवर तुवर सउंदलाए पत्थाणकोदुअं णिव्वत्तिदुं। [सखि! त्वरस्व त्वरस्व शकुन्तलायाः प्रस्थानकौतुकं निर्वर्तयितुम्।]

अनसूया—सहि। कहं एदं? [सखि! कथमेतत्?]

प्रियंवदा—सुणाहि। दाणिं सुहसइनपुच्छिआ सउंदलासआसं गदम्हि। [शृणु। इदानीं सुखशयनपृच्छिका शकुन्तलासकाशं गताऽस्मि।]

अनसूया—तदो तदो? [ततस्ततः?]

प्रियंवदा—तदो जाव एणं लज्जावणदमुहिं परिस्सजिअ तादकण्णेण एव्वं अहिणंदिदं—दिट्ठिआ धूमाउलिददिट्ठिणो वि जअमाणस्स पाअए एव्व आहुदी पडिदा। वच्छे! सुसिस्सपरिदिण्णा विज्जा विअ असोअणिज्जा संवुत्ता। अज्ज एव्व इसिरक्खिदं तुमं भत्तुणो सआसं विसज्जेमि त्ति। [ततो यावदेनां लज्जावनतमुखीं परिष्वज्य तातकण्वेनैवमभिनन्दितम्—दिष्ट्या धूमाकुलितदृष्टेरपि यजमानस्य पावक एवाहुतिः पतिता। वत्से! सुशिष्यपरिदत्ता विद्येवाशोचनीया संवृत्ता। अद्यैव ऋषिरक्षितां त्वां भर्तुः सकाशं विसर्जयामीति।]

अनसूया—अह केण सूइदो तादकण्णस्स वुत्तंतो? [अथ केन सूचितस्तातकण्वस्य वृत्तान्तः?]

प्रियंवदा—अग्गिसरणं पविट्ठस्स सरीरं विणा छंदोमईए वाणिआए। [अग्निसरणं प्रविष्टस्य शरीरं विना छन्दोमय्या वाण्या।]

अनसूया—(सविस्मयम्) कहं विअ? [कथमिव?]

इन तपस्वियों में से किसको अँगूठी पहुँचाने के लिए कहा जाय? बाहर से लौटे हुए पिता कण्व से मैं न तो सखी के अपराध की बात कह सकती हूँ और न उनसे यही कह पाऊँगी कि शकुन्तला का राजा दुष्यन्त से विवाह हो गया है और उसे गर्भ भी है। ऐसी गम्भीर स्थिति में मैं क्या करूँ?

(प्रवेश कर)

प्रियंवदा—(सहर्ष) सखी! चलो-चलो। शकुन्तला की विदाई का प्रबन्ध करना होगा।

अनसूया—सखी! यह सब कैसे हो गया?

प्रियंवदा—सुन, मैं अभी शकुन्तला के पास पूछने गई थी कि तू रात में सुख से सोई या नहीं?

अनसूया—तब-तब?

प्रियंवदा—तब तब पिता कण्व आ पहुँचे और लाज में गडी हुई शकुन्तला को गले से लगाकर उसका अभिनन्दन करते हुए बोले—आँखों में धुआँ भर जाने पर भी सौभाग्य से यजमान की आहुति ठीक अग्नि के बीच में पड़ी। वत्से! जैसे योग्य शिष्य को विद्या देने मे मन में दुःख नहीं होता, वैसे ही तुझे भी योग्य पति के हाथ में देते हुए मुझे दुःख नहीं है। मैं आज ही तुझे ऋषियों के साथ तेरे पति के घर भेज दूँगा।

अनसूया—किन्तु पिता कण्व को इस बात का पता कैसे लगा?

प्रियंवदा—जैसे ही पिता कण्व यज्ञशाला में पहुँचे, वैसे ही यह छन्दोबद्ध आकाशवाणी सुनाई दी—

अनसूया—(आश्चर्य से) क्या?

प्रियंवदा—(संस्कृतमाश्रित्य)

दुष्यन्तेनाहितं तेजो दधानां भूतये भुवः।
अवेहि तनयां ब्रह्मन्नग्निगर्भां शमीमिव॥ ४॥

अनसूया—(प्रियंवदामाश्लिष्य) सहि! पिअं मे। किदु अज्ज एव्व सउंदला णीअदि त्ति उक्कंठासाहारणं परितोसं अणुहोमि। [सखि! प्रियं मे। किन्त्वद्यैव शकुन्तला नीयत इत्युत्कण्ठासाधारणं परितोषमनुभवामि।]

प्रियंवदा—सहि! वअं दाव उक्कंठं विणोदइस्सामो। सा तवस्सिणी णिव्वुदा होदु। [सखि! आवां तावदुत्कण्ठां विनोदयिष्यावः। सा तपस्विनी निर्वृता भवतु।]

अनसूया—तेण हि एदस्सिं चूदसाहावलंबिदे णारिएरसमुग्गए एतण्णिमित्तं एव्वं कालंतरक्खमा णिक्खित्ता मए केसरमालिआ। ता इमं हत्थसंणिहिदं करेहि जाव अहं पि से मिअलोअणं तित्थमित्तिअं दुव्वाकिसलआणि त्ति मंगलसमालंभणामि विरएमि। [तेन ह्येतस्मिंश्चूतशाखावलम्बिते नारिकेल-समुद्गके एतन्निमित्तमेव कालान्तरक्षमा निक्षिप्ता मया केसरमालिका। तदिमां हस्तसन्निहितां कुरु। यावदहमपि तस्यै मृगरोचनां तीर्थमृत्तिकां दूर्वाकिसलयानीति मङ्गलसमालम्भनानि विरचयामि।]

प्रियंवदा— तह करीअदु। [तथा क्रियताम्।]

(अनसूया निष्क्रान्ता। प्रियंवदा नाट्येन सुमनसो गृह्णाति)

(नेपथ्ये)

गौतमि! आदिश्यन्तां शार्ङ्गरवमिश्राः शकुन्तलानयनाय।

प्रियंवदा—(कर्ण दत्त्वा) अणसूए! तुवर तुवर। एदे क्खु हत्थिणाउरगामिणो इसीओ सद्दावीअंति। [अनसूये! त्वरस्व त्वरस्व। एते खलु हस्तिनापुरगामिन ऋषयः शब्दापयन्ते।]

प्रियंवदा—(संस्कृत में बोलती है)

हे महर्षे! जैसे शमीवृक्ष में आग होती है, वैसे ही आपकी पुत्री शकुन्तला के गर्भ में राजा दुष्यन्त के द्वारा स्थापित विश्व का कल्याणकारी तेज विद्यमान है॥ ४॥

अनसूया—(प्रियंवदा से गले लगकर) सखी! यह सुनकर मैं तो बहुत प्रसन्न हूँ। दुःख की बात इतनी ही है कि शकुन्तला आज ही चली जायेगी।

प्रियंवदा—सखी! हमलोग किसी तरह अपने मन को समझा लेंगी, किन्तु वह बेचारी तो किसी प्रकार से सुखी रहे।

अनसूया—वह जो आम की डाली पर नारियल का सम्पुट लटक रहा है, उसमें मैंने बहुत दिनों तक सुगन्धित रहनेवाली बकुल की माला आज के लिए ही रख छोड़ी थी। तू उसे उतार तो ले आ। तब तक मैं गोरोचन, तीर्थ की मिट्टी और कोमल दूब के अंकुर आदि मङ्गलमयी सामग्रियाँ जुटा लाती हूँ।

प्रियंवदा—अच्छा ऐसा ही करो।

(अनसूया चली जाती है और प्रियंवदा माला उतारने का अभिनय करती है)

(नेपथ्य में)

गौतमी! शार्ङ्गरव आदि से कहो कि शकुन्तला को पहुँचा आने के लिए तैयार हो जायें।

प्रियंवदा—(कान लगाकर) अनसूया! चलो-चलो, हस्तिनापुर जानेवाले ऋषिगण बुलाये जा रहे हैं।

(प्रविश्य समालम्भनहस्ता)

अनसूया—सहि ! एहि; गच्छम्ह। [**सखि ! एहि; गच्छावः।**] (इति परिक्रामतः)

प्रियंवदा—(विलोक्य) एसा सुज्जोदए एव्व सिहामज्जिदा पडिच्छिदणीवारहत्थाहि सोत्थिवाअणकाहिं तावसीहिं अहिणंदीअमाणा सउंदला चिट्ठइ। उवसप्पम्ह णं। [**एषा सूर्योदय एव शिखामज्जिता प्रतिष्ठितनीवारहस्ताभिः स्वस्तिवाचनिकाभिस्तापसीभिरभिनन्द्यमाना शकुन्तला तिष्ठति। उपसर्पाव एनाम्।**] (इत्युपसर्पतः)

(ततः प्रविशति यथोद्दिष्टव्यापाराऽऽसनस्था शकुन्तला)

तापसीनामन्यतमा—(शकुन्तलां प्रति) जादे ! भत्तुणो बहुमाणसूअअं महादेईसद्दं लहेहि। [**जाते ! भर्तुर्बहुमानसूचकं महादेवीशब्दं लभस्व।**]

द्वितीया—वच्छे ! वीरप्पसविणी होहि, [**वत्से ! वीरप्रसविनी भव।**]

तृतीया—वच्छे ! भत्तुणो बहुमदा होहि। [**वत्से ! भर्तुर्बहुमता भव।**]

(इत्याशिषो दत्त्वा गौतमीवर्ज निष्क्रान्ताः)

सख्यौ—(उपसृत्य) सहि ! सुहमज्जणं दे होदु। [**सखि ! सुखमज्जनं ते भवतु।**]

शकुन्तला—साअदं मे सहीणं। इदो णिसीदह। [**स्वागतं मे सख्योः। इतो निषीदतम्।**]

उभे—(मङ्गलपात्राण्यादाय उपविश्य) हला ! सज्जा होहि, जाव दे मंगलसमालंभणं विरएम। [**हला ! सज्जा भव, यावत्ते मङ्गलसमालम्भनं विरचयावः।**]

शकुन्तला—इदं पि बहु मंतव्वं, दुल्लहं दाणिं मे समीमंडणं भविस्सदि त्ति। [**इदमपि बहु मन्तव्यम्, दुर्लभमिदानीं मे सखीमण्डनं भविष्यतीति।**] (इति वाष्पं विसृजति)

उभे—सहि ! उइअं ण दे मंगलकाले रोइदुं। [**सखि ! उचितं न ते मङ्गलकाले रोदितुम्।**]

(हाथ में मांगलिक सामग्री लिये हुए प्रवेश कर)

अनसूया—सखी, आओ चलें। **(दोनों चलती हैं)**

प्रियंवदा—**(देखकर)** यह लो, शकुन्तला तो सूर्योदय होते ही नहा-धोकर बैठी है और ये सभी तपस्विनियाँ हाथ में तिन्नी के दानें लेकर उसे आशीर्वाद दे रही हैं ! चलो, हम भी चलें **(आगे बढती हैं)**

(उपरोक्त निर्दिष्ट अवस्था में आसनस्थ शकुन्तला का प्रवेश)

पहली तपस्विनी—**(शकुन्तला से)** वत्से ! तुम पति से प्रचुर आदर पानेवाली पटरानी बनो।

दूसरी तपस्विनी—वत्से ! तुम वीर पुत्र की माता बनो।

तीसरी तपस्विनी—वत्से ! तू पति की प्यारी हो।

(यह आशीर्वाद देकर गौतमी के अतिरिक्त अन्य सभी चली जाती हैं)

दोनों सखियाँ—**(शकुन्तला के पास जाकर)** सखी ! तुम्हारा नहाना-धोना सफल हो।

शकुन्तला—**सखियों मैं** तुम्हारा स्वागत करती हूँ। आओ, यहाँ बैठो।

दोनों—**(मङ्गल-पात्र लिये हुए बैठती हैं)** अच्छा सखी ! तैयार हो जाओ। हम तुम्हारा मङ्गल-शृङ्गार करेंगी।

शकुन्तला—यह तो बड़े सौभाग्य की बात है। क्योंकि सखियों के हाथ का शृङ्गार अब मुझे कहाँ मिल पायेगा। **(रोने लगती है)**

दोनों—सखी ! ऐसे शुभ अवसर पर रोना उचित नहीं है।

(इत्यश्रूणि प्रमृज्य नाटयेन प्रसाधयतः)

प्रियंवदा—आहरणोइदं रूवं अस्समसुलहेहिं पसाहणेहिं विप्पआरीअदि। [आभरणोचितं रूपमाश्रमसुलभैः प्रसाधनैर्विप्रकार्यते।]

(प्रविश्योपायनहस्तावृषिकुमारकौ)

उभौ—इदमलङ्करणम्। अलङ्क्रियतामत्रभवती।

(सर्वा विलोक्य विस्मिताः)

गौतमी—वच्छ णारअ! कुदो एदं? [वत्स नारद! कुत एतत्?]

प्रथमः—तातकण्वप्रभावात्।

गौतमी—किं माणसी सिद्धी? [किं मानसी सिद्धिः?]

द्वितीयः—न खलु; श्रूयताम्। तत्रभवता वयमाज्ञप्ताः शकुन्तलाहेतोर्वनस्पतिभ्यः कुसुमान्याहरतेति। तत इदानीं—

क्षौमं केनचिदिन्दुपाण्डुतरुणा माङ्गल्यमाविष्कृतं
निष्ठ्यूतश्चरणोपभोगसुलभो लाक्षारसः केनचित्।
अन्येभ्यो वनदेवताकरतलैरापर्वभागोत्थिते-
र्दत्तान्याभरणानि तत्किसलयोद्भेदप्रतिद्वन्द्विभिः॥५॥

प्रियंवदा—(शकुन्तलां विलोक्य) हला! इमाए अब्भुववत्तीए सूइया दे भत्तुणो गेहे अणुहोदव्वा राअलच्छित्ति। [हला! अनयाऽभ्युपपत्त्या सूचिता ते भर्तुर्गेहेऽनुभवितव्या राजलक्ष्मीरिति।]

(शकुन्तला व्रीडां रूपयति)

प्रथमः—गौतम! एह्योहि; अभिषेकोत्तीर्णाय कण्वाय वनस्पतिसेवां निवेदयावः।

(दोनों अपने आँसू पोंछकर उसे सजाने का अभिनय करती हैं)

प्रियंवदा—सखी! तुम्हारे रूप के लिए तो बहुत अच्छे-अच्छे आभूषणों की आवश्यकता थी। आश्रम से जुटाई हुई इन सिंगार की सामग्रियों से तो तुम्हारे रूप का अपमान हो रहा है।

(हाथों में उपहार लिये हुए दो ऋषिकुमारों का प्रवेश)

दोनों ऋषिकुमार—यह लीजिए आभूषण, देवी को इनसे सजाइए।

(देखकर सभी चकित हो जाती हैं)

गौतमी—वत्स नारद! यह सब तुमने कहाँ पाया?

पहला—पिता कण्व के प्रभाव से।

गौतमी—क्या उनकी मानसी सिद्धि से?

दूसरा—नहीं, सुनिए। पूज्य कण्व ने हमें शकुन्तला के लिए लता-वृक्षों से फूल-पत्ते ले आने की आज्ञा दी थी। इस पर—

किसी वृक्ष ने शुभ्र मांगलिक वस्त्र दिया, किसी ने पैरों में लगाने कि महावर दी और वनदेवियों ने तो कोपलों से होड करके वृक्षों में से कलाई तक अपने हाथ बाहर निकालकर बहुत से आभूषण दे दिये॥५॥

प्रियंवदा—(शकुन्तला को देखकर) सखी! इन लक्षणों से तो ऐसा लगता है कि पति के घर में तुम राजलक्ष्मी बनकर सुख पाओगी।

(शकुन्तला लज्जा का अभिनय करती है)

द्वितीयः—तथा।

(इति निष्क्रान्तौ)

सख्यौ—अए! अणुवजुत्तभूसणो अअं जणो। चित्तकम्मपरिअएण अंगेसु दे आहरणविणिओअं करेम्ह। [अये! अनुपयुक्तभूषणोऽयं जनः। चित्रकर्मपरिचयेनाङ्गेषु ते आभरणविनियोगं कुर्वः।]

शकुन्तला—जाणे वो णेउणं। [जाने वां नैपुणम्।]

(उभे नाट्येनालङ्कुरुतः)

(ततः प्रविशति स्नानोत्तीर्णः कण्वः)

(प्रथमः श्लोकः)

कण्वः—यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया
कण्ठः स्तम्भितबाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम्।
वैक्लव्यं मम तावदीदृशमिदं स्नेहादरण्यौकसः
पीड्यन्ते गृहिणः कथं नु तनयाविश्लेषदुःखैर्नवैः ॥ ६ ॥

(इति परिक्रामति)

सख्यौ—हला सउंदले! अवसिदमंडणासि। परिधेहि संपदं खोमजुअलं। [हला शकुन्तले! अवसितमण्डनासि। परिधत्स्व साम्प्रतं क्षौमयुगलम्।]

(शकुन्तलोत्थाय परिधत्ते)

गौतमी—जादे! एसो दे आणंदपरिवाहिणा चक्खुणा परिस्सजंतो विअ गुरू उवट्ठिदो। आआरं दाव पडिवज्जस्स। [जाते! एष ते आनन्दपरिवाहिणा चक्षुषा परिष्वजमान इव गुरुरुपस्थितः। आचारं तावत्प्रतिपद्यस्व।]

पहला—चलो, गौतम! स्नान करके गुरुजी आ गये होंगे। इन पेड़-पौधों ने जो वस्तुएँ दी हैं, यह समाचार उन्हें भी सुना दिया जाय।

दूसरा—चलो।

(दोनों का प्रस्थान)

दोनों सखियाँ—सखी! हमने तो कभी आभूषण पहने नहीं हैं। किन्तु चित्रों में जैसा देखा है, उसी के अनुसार तुम्हारे शरीर पर ये आभूषण पहनाये देती हैं।

शकुन्तला—मैं तुम दोनों की चतुराई भलीभाँति जानती हूँ।

(दोनों आभूषण पहनाने का अभिनय करती हैं)

(स्नान करके लौटे हुए कण्व का प्रवेश)

कण्व—आज शकुन्तला चली जायेगी, यह सोचकर जी बैठा जा रहा है। आँसुओं को रोकने से गला रुँध गया है जिससे मुँह मे शब्द नहीं निकल पा रहे हैं और इसी चिन्ता में आँखें धुँधली पड़ गई हैं। जब मुझ जैसे वनवासी को इतना कष्ट हो रहा है, तब उन बेचारे गृहस्थों को कितना क्लेश होता होगा, जो पहले-पहल अपनी कन्या को विदा करते होंगे॥ ६॥

(घूमते हैं)

सखियाँ—शकुन्तला! तुम्हारा शृंगार तो पूरा हो गया। लो, अब यह रेशमी वस्त्रों का जोड़ा भी पहन लो।

(शकुन्तला उठकर उसे पहनती है)

शकुन्तला—(सव्रीडम्) ताद! वंदामि। [तात! वन्दे।]

कण्वः—वत्से!

ययातेरिव शर्मिष्ठा भर्तुर्बहुमता भव।
सुतं त्वमपि सम्राजं सेव पूरुमवाप्नुहि॥७॥

गौतमी—भअवं! वरो क्खु एसो, ण आसिसा। [भगवन्! वरः खल्वेषः, नाशिषः।]

कण्वः—वत्से! इतः सद्योहुताग्नीन् प्रदक्षिणीकुरुष्व।

(सर्वे परिक्रामन्ति)

कण्वः—(ऋक्छन्दसाऽऽशास्ते)

अमी वेदिं परितः क्लृप्तधिष्ण्याः समिद्धन्तः प्रान्तसंस्तीर्णदर्भाः।
अपघ्नन्तो दुरितं हव्यगन्धैर्वैतानास्त्वां वह्नयः पावयन्तु॥८॥

प्रतिष्ठस्वेदानीम्। (सदृष्टिक्षेपम्) क्व ते शार्ङ्गरवमिश्राः।

(प्रविश्य)

शिष्यः—भगवन्! इमे स्मः।

कण्वः—भगिन्यास्ते मार्गमादेशय।

शार्ङ्गरवः—इत इतो भवती।

(सर्वे परिक्रामन्ति)

कण्वः—भो भोः सन्निहितदेवतास्तपोवनतरवः!

गौतमी—पुत्री! आनन्द से उत्पन्न आँसुओं को बहाने वाले नेत्रों से मानो तुमको गले लगाते हुए से तेरे पिता यहाँ उपस्थित हैं, उचित शिष्टाचार का पालन करो।

शकुन्तला—(लजाती हुई) पिताजी! प्रणाम करती हूँ।

कण्व—वत्से! जैसे राजा ययाति अपनी पत्नी शर्मिष्ठा का आदर करते थे, वैसे ही तेरे पति भी तेरा आदर करें और शर्मिष्ठा के पुत्र पुरु के समान ही तुझे चक्रवर्ती पुत्र प्राप्त हो॥७॥

गौतमी—भगवन्! यह तो आपने वरदान दिया है, आशीर्वाद तो दिया ही नहीं।

कण्व—वत्से! चलो, अग्नि में अभी ही आहुति पड़ी है, चलकर उसकी प्रदक्षिणा तो कर लो।

(सभी लोग अग्नि की प्रदक्षिणा करते हैं)

कण्व—(ऋग्वेद के छन्द में आशीर्वाद देते हैं)

वेदीपर यथास्थान स्थापित, कुशा से घिरे, समिधा के ईंधन से प्रज्वलित एवं हवि की सुगन्ध से सुगन्धित अग्निदेव तुम्हें पवित्र करें॥८॥

अब चलो। (इधर-उधर देखकर) अरे, वे शार्ङ्गरव आदि कहाँ हैं?

(प्रवेश करके)

शिष्य—भगवन् हमलोग उपस्थित हैं।

कण्व—चलो! अपनी बहन को मार्ग दिखलाओ।

शार्ङ्गरव—इधर से आओ देवी, इधर से।

(सभी चलते हैं)

कण्व—वन-देवताओं से भरे हुए हे तपोवन के वृक्षो!

(द्वितीयः श्लोकः)

पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्।
आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्॥ ९॥

(कोकिलरवं सूचयित्वा)

अनुमतगमना शकुन्तला तरुभिरियं वनवासबन्धुभिः।
परभृतविरुतं कलं यथा प्रतिवचनीकृतमेभिरीदृशम्॥ १०॥

(आकाशे)

रम्यान्तरः कमलिनीहरितैः सरोभिश्छायाद्रुमैर्नियमितार्कमयूखतापः।
भूयात्कुशेशयरजोमृदुरेणुरस्याः शान्तानुकूलपवनश्च शिवश्च पन्थाः॥ ११॥

(सर्वे सविस्मयमाकर्णयन्ति)

गौतमी—जादे! ण्णादिजणसिणिद्धाहिं अणुण्णादगमणासि तवोवणदेवदाहिं। पणम भअवदीणं।
[जाते! ज्ञातिजनस्निग्धाभिरनुज्ञातगमनासि तपोवनदेवताभिः। प्रणत भगवतीः।]

शकुन्तला—(सप्रणामं परिक्रम्य जनान्तिकम्) हला पिअंवदे! णं अज्जउत्तदंसणुस्सुआए वि अस्समपदं परिच्चअंतीए दुक्खेण मे चलणा पुरदो पवट्टंति। [हला प्रियंवदे! नन्वार्यपुत्रदर्शनोत्सुकाया अप्याश्रमपदं परित्यजन्त्या दुःखेन मे चरणौ पुरतः प्रवर्तते।]

प्रियंवदा—ण केवलं तवोवणविरहकादरा सही एव्व। तुए उवट्ठिदविओअस्स तवोवणस्स वि दाव समवत्था दीसइ। पेक्ख— [न केवलं तपोवनविरहकातरा सख्येव। त्वयोपस्थितवियोगस्य तपोवनस्यापि तावत्समवस्था दृश्यते। पश्य—]

जो तुम्हें पिलाये बिना स्वयं जल नहीं पीती थी, आभूषण पहनने का प्रेम होने पर भी जो स्नेह वश तुम्हारे कोमल पत्तों को नहीं तोड़ती थी; तुम्हारी नयी कली देखकर जो आनन्दविभोर हो जाती थी, वही शकुन्तला आज अपने पति के घर जा रही है। तुम सभी इसे विदा दो॥ ९॥

(कोयल की कूक की ओर संकेत करके)

इस शकुन्तला को तपोवन निवास के बन्धुसदृश वृक्षों ने प्रस्थान की अनुमति दे दी है, क्योंकि अस्पष्ट तथा मधुर कोयल की ध्वनि को इन वृक्षों ने इस प्रकार अपना प्रत्युत्तर बनाया है॥ १०॥

(आकाश में)

शकुन्तला की यात्रा मङ्गलमयी हो। इसके मार्ग में बीच-बीच में नीली कमलिनियों से भरे हुए ताल हों, एक पंक्तिमें थोड़ी-थोड़ी दूर पर लगे और धूप से बचनेवाली घनी छाँहवाले वृक्ष हों, धूल में कमल के पराग की कोमलता हो तथा मार्ग भर सुख देनेवाला पवन बहता रहे॥ ११॥

(सभी आश्चर्य से सुनते हैं)

गौतमी—वत्से! सगे-सम्बन्धियों के समान प्रिय वनदेवियाँ तुझे आशीर्वाद दे रही हैं। इन्हें प्रणाम करो।

शकुन्तला—(प्रणाम करती हुई घूमकर प्रियंवदा से) सखी प्रियंवदा। यद्यपि मुझे आर्यपुत्र के दर्शन की बड़ी उतावली हो रही है, तथापि आश्रम को छोड़ते हुए मेरे पैर आगे नहीं बढ़ पा रहे।

प्रियंवदा—केवल तुम्हीं तपोवन के विरह से दुःखी नहीं हो। जैसे-जैसे तुम्हारी विदाई की घड़ी पास आती जा रही है, वैसे-वैसे तपोवन भी उदास होता जा रहा है। देखो—

उग्गलिअदब्भकवला मिआ परिच्चत्तणच्चणा मोरा।
ओसरिअपंडुपत्ता मुअंति अस्सू विअ लदाओ॥ १२॥

[उद्गलितदर्भकवला मृगाः परित्यक्तनर्तना मयूराः।
अपसृतपाण्डुपत्रा मुञ्चन्त्यश्रूणीव लताः॥]

शकुन्तला—(स्मृत्वा) ताद! लदावहिणिअं वणजोसिणिं दाव आमंतइस्सं। [तात! लताभगिनीं वनज्योत्स्नां तावदामन्त्रयिष्ये।]

कण्वः—अवैमि ते तस्यां सोदर्यस्नेहम्। इयं तावद्दक्षिणेन।

शकुन्तला—(उपेत्य, लतामालिङ्ग्य) वणजोसिणि! चूदसंगता वि मं पच्चालिंग इदोगदाहिं साहावाहाहिं। अज्जप्पहुदि दूरपरिवत्तिणी दे खु भविस्सं। [वनज्योत्स्ने! चूतसङ्गताऽपि मां प्रत्यालिङ्गेतोगताभिः शाखाबाहुभिः। अद्यप्रभृति दूरपरिवर्तिनी ते खलु भविष्यामि।]

कण्वः—

सङ्कल्पितं प्रथममेव मया तवार्थे भर्तारमात्मसदृशं सुकृतैर्गता त्वम्।
चूतेन संश्रितवती नवमालिकेयमस्यामहं त्वयि च सम्प्रति वीतचिन्तः॥ १३॥

इतः पन्थानं प्रतिपद्यस्व।

शकुन्तला—(सख्यौ प्रति) हला! एसा दुवेणं वो हत्थे णिक्खेओ। [हला! एषा द्वयोर्युवयोर्हस्ते निक्षेपः।]

सख्यौ—अअं जणो कस्स हत्थे समप्पिदो? [अयं जनः कस्य हस्ते समर्पितः?] (इति वाष्पं विसृजतः)

कण्वः—अनसूये! अलं रुदित्वा। ननु भवतीभ्यामेव स्थिरीकर्तव्या शकुन्तला।

(सर्वे परिक्रामन्ति)

हरिणियाँ कुशा के कौर उगल रही हैं, मोरों ने नाचना छोड़ दिया है और लताओं से पीले-पीले पत्ते इस प्रकार झड़ रहे हैं लगता है जैसे उनके आँसू गिर रहे हों॥ १२॥

शकुन्तला—(स्मरण करके) पिताजी! मैं अपनी बहन वनज्योत्स्ना लता से भी विदा ले लेना चाहती हूँ।

कण्व—मैं जानता हूँ कि तू उसे सगी बहन जैसा प्यार करती है। देखा वह दाहिनी ओर है।

शकुन्तला—(लता के पास जाकर और उससे लिपटकर) प्यारी वनज्योत्स्ना! तू आम के वृक्ष से लिपटी होने पर भी अपनी फैली हुई शाखारूपिणी बाहों में मुझे समेट ले। क्योंकि आज के बाद तो मैं तुझसे बहुत दूर चली जाऊँगी।

कण्व—तेरे लिए मैंने जैसे पति का संकल्प किया था, तूने अपने पुण्य-प्रभाव से वैसा ही पति पा लिया है और इस नवमालिका वनज्योत्स्ना को भी आम का ठीक सहारा मिल गया है। अब मैं दोंनो की चिन्ता से मुक्त हो गया हूँ॥ १३॥

इधर आओ।

शकुन्तला—(सखियों से) सखियो! इस वनज्योत्स्ना को मैं तुम दोनों के हाथों सौंप रही हूँ।

दोनों—और हम लोगों को किसके हाथों सौंपे जा रही हो? **(दोनों रोने लगती हैं)**

कण्व—रोओ मत अनसूया! तुम दोनों को चाहिए कि शकुन्तला को धीरज बँधाओ।

(सभी घूमते हैं)

शकुन्तला—ताद ! एसा उडजपज्जंतचारिणी गब्भमंथरा मिअवहू जदा अणघप्पसवा होइ तदा मे कंपि पिअणिवेदइत्तअं विसज्जइस्सह। [तात ! एषोटजपर्यन्तचारिणी गर्भमन्थरा मृगवधूर्यदाऽनघ-प्रसवा भवति तदा मह्यं कमपि प्रियनिवेदयितृकं विसर्जयिष्यथ।]

कण्वः—नेदं विस्मरिष्यामः।

शकुन्तला—(गतिभङ्गं रूपयित्वा) को णु क्खु एसो णिवसणे मे सज्जइ ? [को नु खल्वेष निवसने मे सज्जते ?] (इति परावर्तते)

कण्वः—वत्से !

यस्य त्वया व्रणविरोपणमिङ्गुदीनां तैलं न्यषिच्यत मुखे कुशसूचिविद्धे।
श्यामाकमुष्टिपरिवर्धितको जहाति सोऽयं न पुत्रकृतकः पदवीं मृगस्ते॥ १४॥

शकुन्तला—वच्छ ! किं सहवासपरिच्चाइणिं मं अणुसरसि ? अचिरप्पसूदाए जणणीए विणा वड्ढिदो एव्व। दाणिं पि मए विरहिदं तुमं तादो चिंतइस्सदि। णिवत्तेहि दाव। [वत्स ! किं सहवासपरित्यागिनीं मामनुसरसि ? अचिरप्रसूतया जनन्या विना वर्धित एव। इदानीमपि मया विरहितं त्वां तातश्चिन्तयिष्यति। निवर्तस्व तावत्।] (इति रुदती प्रस्थिता)

कण्वः—

उत्पक्ष्मणोर्नयनयोरुपरुद्धवृत्तिं बाष्पं कुरु स्थिरतया विहतानुबन्धम्।
अस्मिन्नलक्षितनतोन्नतभूमिभागे मार्गे पदानि खलु ते विषमीभवन्ति॥ १५॥

शार्ङ्गरवः—भगवन् ! ओदकान्तं स्निग्धो जनोऽनुगन्तव्य इति श्रूयते। तदिदं सरस्तीरम्। अत्र सन्दिश्य प्रतिगन्तुमर्हसि।

शकुन्तला—तात ! गर्भ के भार से अलसाती हुई आश्रम में चारों ओर घूमनेवाली इस हरिणी को जब सुन्दर शिशु हो जाय, तब किसी के द्वारा यह प्रिय समाचार मेरे पास अवश्य भिजवाइयेगा।

कण्व—यह हम नहीं भूलेंगे।

शकुन्तला—(**चलने में रुकावट-सा अनुभव करती हुई**) अरे ! यह मेरा पल्ला पकड़ कर कौन खींच रहा है ? (**पीछे घूमकर देखती है**)

कण्व—वत्से ! कुशा के काँटे से भिदे हुए जिसके मुँह को ठीक करने के लिए तू उस पर हिंगोट का तेल लगाया करती थी, वही तेरे हाथ के दिये हुए मुट्ठी-मुट्ठी भर साँवा के दानों पर पला हुआ तेरा पुत्र जैसा प्यारा हिरण मार्ग रोके हुए खडा है॥ १४॥

शकुन्तला—वत्स ! मुझ साथ छोड़कर जानेवाली के पीछे-पीछे तू क्यों चला आ रहा है ? तुझे जन्म देकर तेरी माँ जब मर गई थी, उस समय मैंने तुझे पाल-पोसकर बडा किया था। अब मेरे बाद पिताजी तेरी देखभाल करेंगे। जा, लौट जा। (**रोती हुई आगे बढती है**)

कण्व—वत्से ! धीरज धर और अपने आँसू पोंछ डाल। इन आँसुओं के कारण तेरी उभड़ी हुई बरौनियोंवाली आँखें ठीक से नहीं देख पातीं। अतएव यहाँ की ऊबड-खाबड़ धरती पर तेरे पैर सीधे नहीं पड़ रहे हैं॥ १५॥

शार्ङ्गरव—भगवन् ! मैंने सुना है कि प्रियजनों को विदा देते समय जलाशय तक पहुँचाकर लौट जाना चाहिए। अब सरोवर का तट आ गया है। अतः जो कुछ सन्देश कहलाना हो, वह यहीं कहकर आप लोग आश्रम को लौट जायें।

कण्वः— तेन हीमां क्षीरवृक्षच्छायामाश्रयामः।

(सर्वे परिक्रम्य स्थिताः)

कण्वः—(आत्मगतम्) किं नु खलु तत्रभवतो दुष्यन्तस्य युक्तरूपमस्माभिः सन्देष्टव्यम्। (इति चिन्तयति)

शकुन्तला—(जनान्तिकम्) हला! पेक्ख; णलिणीपत्तंतरिदं वि सहअरं अदेक्खंती आदुरा चक्कवाई आरडदि दुक्करं अहं करेमि त्ति तक्केमि। [हला! पश्य; नलिनीपत्रान्तरितमपि सहचरमपश्यन्त्यातुरा चक्रवाक्यारटति दुष्करमहं करोमीति तर्कयामि।]

अनसूया—सहि! मा एव्वं मंतेहि। [सखि! मैवं मन्त्रय।]

एसा वि पिएण विणा गमेइ रअणिं विसाअदीहअरं।
गरुअं पि विरहदुक्खं आसाबंधो सहावेदि॥ १६।

[एषाऽपि प्रियेण विना गमयति रजनीं विषाददीर्घतराम्।
गुर्वीपि विरहदुःखमाशाबन्धः साहयति॥]

कण्वः—शार्ङ्गरव! इति त्वया मद्वचनात्स राजा शकुन्तलां पुरस्कृत्य वक्तव्यः।

शार्ङ्गरवः— आज्ञापयतु भवान्।

(तृतीयः श्लोकः)

कण्वः—अस्मान्साधु विचिन्त्य संयमधनानुच्चैः कुलं चात्मन-
स्त्वय्यस्याः कथमप्यबान्धवकृतां स्नेहप्रवृत्तिं च ताम्।
सामान्यप्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया
भाग्यायत्तमतः परं न खलु तद्वाच्यं वधूबन्धुभिः॥ १७॥

कण्व—तो चलो, इस बरगद की छाया में थोड़ा बैठ लिया जाय।

(सभी जाकर बैठ जाते हैं)

कण्व—(मन ही मन) माननीय राजा दुष्यन्त के लिए कौन-सा सन्देश भेजना ठीक होगा। **(सोचते हैं)**

शकुन्तला—(सखी से अलग में) सखी! देख, कमलिनी के पत्ते की ओट में छिपे अपने चकवे को न देख पाने के कारण यह चकवी विकल होकर किस तरह चिल्ला रही है। अतः मैं जिस दुष्कर कार्य के लिए जा रही हूँ, वह पूरा नहीं होगा।

अनसूया—सखी! ऐसा नहीं सोचना चाहिए।

जानती हो, यह चकवी विरह की लम्बी रातें पति से बिछुडकर अकेली काट देती है। क्योंकि विरह के समय भी इसे यही आशा रहती है कि प्रातःकाल तो मिलन होगा ही॥ १६॥

कण्व—शार्ङ्गरव! शकुन्तला को दुष्यन्त के हाथों सौंपते हुए मेरी ओर से कहना।

शार्ङ्गरव—हाँ, आज्ञा कीजिए।

कण्व—राजन्! कहाँ हमलोग सीधे-साधे संयमी तपस्वी और कहाँ आप उच्चकुल के राजा। तथापि आपने स्वतः इस कन्या से विवाह कर लिया है। इन सभी बातों को ध्यान में रखकर आप कम से कम दूसरी रानियों के समान तो शकुन्तला का आदर अवश्य कीजियेगा। इससे भी बढकर इसे जो सौभाग्य मिले, वह इसके भाग्य की बात है। उसके लिए हम कन्या के बान्धव लोग और कह ही क्या सकते हैं॥ १७॥

शार्ङ्गरवः—गृहीतः सन्देशः।

कण्वः—वत्से ! त्वमिदानीमनुशासनीयाऽसि। वनौकसोऽपि सन्तो लौकिकज्ञा वयम्।

शार्ङ्गरवः—न खलु धीमतां कश्चिदविषयो नाम।

कण्वः—सा त्वमितः पतिकुलं प्राप्य—

(चतुर्थः श्लोकः)

शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने
पत्युर्विप्रकृताऽपि रोषणतया मा स्म प्रतीपं गमः।
भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः॥ १८॥

कथं वा गौतमी मन्यते ?

गौतमी— एत्तिओ बहूजणस्स उवदेसो। जादे ! एदं क्खु सव्वं ओधारेहि। [एतावान्वधूजनस्योपदेशः। जाते ! एतत्खलु सर्वमवधारय।]

कण्वः—वत्से ! परिष्वजस्व मां सखीजनञ्च।

शकुन्तला—ताद ! इदो एव्व किं पिअंवदाअणसूआओ सहीओ णिवत्तिस्संति। [तात ! इत एव किं प्रियंवदाऽनसूये सख्यौ निवर्तिष्यन्ते ?]

कण्वः—वत्से ! इमे अपि प्रदेये। न युक्तमनयोस्तत्र गन्तुम्। त्वया सह गौतमी यास्यति।

शकुन्तला—(पितरमाश्लिष्य) कहं दाणिं तादस्स अंकादो परिब्भट्ठा मलअतरुम्मूलिआ चंदणलदा विअ देसंतरे जीविअं धारइस्सं ? [कथमिदानीं तातस्याङ्कात्परिभ्रष्टा मलयतरून्मूलिता चन्दनलतेव देशान्तरे जीवितं धारयिष्यामि।]

शार्ङ्गरव—इस सन्देश को मैंने हृदयङ्गम कर लिया।

कण्व—वत्से ! आओ, तुम्हें कुछ सीख देनी है। देखो, वन में रहते हुए भी सांसारिक व्यवहार से हमलोग भलीभाँति परिचित हैं।

शार्ङ्गरव—ऐसी कौन-सी बात है, जिसे बुद्धिमान् लोग न जानते हों।

कण्व—देखो ! तुम यहाँ से अपने ससुराल पहुँचकर—

पति के घर के सभी बडे-बूढ़ों की सेवा करना। अपनी सौतों के साथ सखियों जैसा प्रेम करना। पति कदाचित निरादर भी करे तो क्रोध करके झगड़ा मत करना। अपने दास-दासियों को प्यार से रखना और अपने सौभाग्य पर इतराना नहीं। जो स्त्रियाँ घर में इस प्रकार व्यवहार करती हैं, वे ही सच्ची गृहणी होती हैं और जो इससे विपरीत काम करती हैं, वे खोटी स्त्रियाँ तो अपने कुल की व्याधि होती हैं॥ १८॥

क्यों गौतमी ! तुम्हारा क्या विचार है ?

गौतमी—कुल-वधुओं के लिए इससे बढकर और कौन-सा उपदेश होगा ? वत्से ! ये सभी बातें हृदयङ्गम कर लो।

कण्व—वत्से ! आओ, मुझसे और अपनी सखियों से गले तो मिल लो।

शकुन्तला—तात ! क्या प्रियंवदा-अनसूया ये दोनों सखियाँ यहीं से लौट जायेंगी ?

कण्व—वत्से ! अभी इनका भी तो विवाह करना है। इसलिए इनका वहाँ जाना उचित नहीं है। तेरे साथ तो गौतमी जा रही है।

कण्वः—वत्से ! किमेवं कातरासि ?

अभिजनवतो भर्तुः श्लाघ्ये स्थिता गृहिणीपदे
विभवगुरुभिः कृत्यैस्तस्य प्रतिक्षणमाकुला।
तनयमचिरात् प्राचीवार्क प्रसूय च पावनं
मम विरहजां न त्वं वत्से! शुचं गणयिष्यसि॥ १९॥

(शकुन्तला पितुः पादयोः पतति)

कण्वः—यदिच्छामि ते तदस्तु।

शकुन्तला—(सख्यावुपेत्य) हला! दुवे वि मं समं एव्व परिस्सजह। [हला! द्वे अपि मां सममेव परिष्वजेथाम्।]

सख्यौ—(तथा कृत्वा) सहि! जइ णाम सो राआ पच्चहिण्णाणमंथरो भवे तदो से इमं अत्तणामहेअअंकिअं अंगुलीअअं दंसेहि। [सखि! यदि नाम स राजा प्रत्यभिज्ञानमन्थरो भवेत्ततस्तस्येदमात्मनामधेयाङ्कितमङ्गुलीयकं दर्शय।]

शकुन्तला—इमिणा संदेहेण वो आकंपिद म्हि। [अनेन सन्देहेन वामाकम्पितास्मि।]

सख्यौ—मा भाआहि। सिणेहो पावसंकी। [मा भैषीः। स्नेहः पापशङ्की।]

शार्ङ्गरवः—युगान्तरमारूढः सविता। त्वरतामत्रभवती।

शकुन्तला—(आश्रमाभिमुखी स्थित्वा) ताद ! कदा णु भूओ तवोवणं पेक्खिस्सं ? [तात! कदा नु भूयस्तपोवनं प्रेक्षिष्ये ?]

कण्वः—श्रूयताम्

शकुन्तला—(पिता के गले लगकर) पिता की गोद से अलग होकर मलयपर्वत से उखाडे हुए चन्दन के पौधों के समान मैं परदेश में कैसे जी सकूँगी ?

कण्व—वत्से! तुम इतनी अधीर क्यों हो रही हो ?

जब तुम ऊँचे कुलवाले पति की पटरानी बनकर उनके घर के कामकाज में दिन-रात लगी रहोगी; और जैसे पूर्व दिशा सूर्य को उत्पन्न करती है, वैसे ही जब पवित्र पुत्र उत्पन्न करोगी, उस समय तुम मेरे विछोह का सारा दुःख भूल जाओगी॥ १९॥

(शकुन्तला पिता के पैरों पर पड़ती है)

कण्व—तुम्हारे लिए मैं जो-जो चाहता हूँ, वह सब तुम्हें मिले।

शकुन्तला—(दोनों सखियों के पास जाकर) सखियो! आओ, तुम दोनों मेरे साथ गले लग जाओ।

सखियाँ—(गले लगकर) सखी! देखो, यदि राजा तुम्हें पहचानने में भूल करें तो यह उनके नाम की अँगूठी तुम उन्हें दिखला देना।

शकुन्तला—तुम्हारी इस सन्देह भरी बात ने तो मेरे मन में खटका उत्पन्न कर दिया है।

सखियाँ—नहीं-नहीं डरो मत। प्रेम में तो खटका होता ही है।

शार्ङ्गरव—दिन बहुत चढ आया है। अब शीघ्रता कीजिए।

शकुन्तला—(आश्रम की ओर मुँह करके) तात! अब मैं आश्रम को फिर कब देखूँगी ?

कण्व—सुनो—

भूत्वा चिराय चतुरन्तमहीसपत्नी दौष्यन्तिमप्रतिरथं तनयं निवेश्य।
भर्त्रा तदर्पितकुटुम्बभरेण सार्धं शान्ते करिष्यसि पदं पुनराश्रमेऽस्मिन्॥ २०॥

गौतमी—जादे! परिहीअदि गमणवेला। णिवत्तेहि पिदरं। अहवा चिरेण वि पुणो पुणो एसा एव्वं मंतइस्सदि। णिवत्तदु भवं। [जाते! परिहीयते गमनवेला। निवर्तय पितरम्। अथवा चिरेणापि पुनः पुनरेषैवं मन्त्रयिष्यते। निवर्ततां भवान्।]

कण्वः—वत्से! उपरुध्यते तपोऽनुष्ठानम्।

शकुन्तला—(भूयः पितरमाश्लिष्य) तवच्चरणपीडिदं तादसरीरं, ता मा अदिमेत्तं मम किदे उक्कंठिदुं। [तपश्चरणपीडितं तातशरीरम्, तन्मातिमात्रं मम कृत उत्कण्ठितुम्।]

कण्वः—(सनिःश्वासम्)

शममेष्यति मम शोकः कथं नु वत्से! त्वया रचितपूर्वम्।
उटजद्वारविरूढं नीवारबलिं विलोकयतः॥ २१॥

गच्छ; शिवास्ते पन्थानः सन्तु।

(निष्क्रान्ता शकुन्तला सहयायिनश्च)

सख्यौ—(शकुन्तलां विलोक्य) हद्धी हद्धी। अंतलिहिदा सउंदला वणराईए। [हा धिक् हा धिक्। अन्तर्हिता शकुन्तला वनराज्या।]

कण्वः—(सनिःश्वासम्) अनसूये! गतवती वां सहधर्मचारिणी। निगृह्य शोकमनुगच्छतं मां प्रस्थितम्।

वहुत दिनों तक इस पृथिवी की सौत वनकर अपने अद्वितीय वीर पुत्र को राज्य तथा कुटुम्ब का भार सौंपने के वाद जव तुम अपने पति के साथ यहाँ आओगी, तव इस शान्त आश्रम में फिर सुख से रहना॥ २०॥

गौतमी—वत्से! विदाई की घड़ी वीती जा रही है। पिता जी को जाने दो। अथवा (कण्व से) आप अव लौट जायें, नहीं तो यह वहुत देर तक यों ही कुछ-न-कुछ कहती ही रहेगी।

कण्व—वत्से! अव जाओ। हमारे तपस्या के कर्मों में विलम्ब हो रहा है।

शकुन्तला—(फिर पिता के गले लगकर) आप तो तप के कारण ऐसे ही वहुत दुवले हो गये हैं। अतः आप मेरी वहुत अधिक चिन्ता न कीजियेगा।

कण्व—(लम्वी साँस लेकर)

वत्से! तुमने वलि के लिए जो तिन्नी के धान छींटे थे, उनके अंकुर जव तक कुटी के द्वार पर दिखलाई देते रहेंगे, तव तक मेरा शोक कैसे शान्त होगा?॥ २१॥

जाओ; तुम्हारा मार्ग मंगलमय हो।

(साथियों के साथ शकुन्तला चली जाती है)

दोनों सखियाँ—(शकुन्तला को देखकर) हाय, हाय! शकुन्तला तो वृक्षों की ओट में ओझल हो गई।

कण्व—(लम्वी साँस लेकर) अनसूया! तुम दोनों की सखी तो चली गयी। अव रोना-धोना छोड़ो और मेरे साथ लौट चलो।

उभे—ताद ! सउंदलाविरहिदं सुण्णं विअ तवोवणं कहं पविसावो ? [तात ! शकुन्तलाविरहितं शून्यमिव तपोवनं कथं प्रविशावः ?]

कण्वः—स्नेहप्रवृत्तिरेवंदर्शिनी। (सविमर्शं परिक्रम्य) हन्त भोः ! शकुन्तलां पतिकुलं विसृज्य लब्धमिदानीं स्वास्थ्यम्। कुतः—

अर्थो हि कन्या परकीय एव तामद्य सम्प्रेष्य परिग्रहीतुः।
जातो ममायं विशदः प्रकामं प्रत्यर्पितन्यास इवान्तरात्मा॥ २२॥

(इति निष्क्रान्ताः सर्वे)

॥ इति चतुर्थोऽङ्कः ॥

दोनों—तात ! शकुन्तला के विना सूने आश्रम में हम कैसे चलेंगी ?

कण्व—प्रेम में ऐसा ही होता है। (कुछ विचारते हुए घूमकर) ओह ! शकुन्तला को पति के घर भेजकर मुझे राहत मिली। क्योंकि—

कन्या सचमुच पराया धन ही होती है। आज उसे पति के घर भेजकर मेरा मन वैसे ही निश्चिन्त हो गया है, जैसे किसी की धरोहर लौटा दी गयी हो॥ २२॥

(इस प्रकार सभी चले जाते हैं)

चौथा अङ्क समाप्त।

पञ्चमोऽङ्कः

(ततः प्रविशत्यासनस्थो राजा विदूषकश्च)

विदूषकः—(कर्णं दत्त्वा) भो वअस्स! संगीतसालंतरे अवधाणं देहि। कलविसुद्धाए गोदीए सरसंजोओ सुणीअदि। जाणे तत्तहोदी हंसवदिआ वण्णपरिअअं करोदि त्ति। [भो वयस्य! सङ्गीतशालान्तरेऽवधानं देहि। कलविशुद्धाया गीतेः स्वरसंयोगः श्रूयते। जाने तत्रभवती हंसपदिका वर्णपरिचयं करोतीति।]

राजा— तूष्णीं भव। यावदाकर्णयामि।

(आकाशे गीयते)

अहिणवमहुलोलुवो भवं तह परिचुंबिअ चूअमंजरिं।
कमलवसइमेत्तणिव्वुदो महुअर! विम्हरिओ सि णं कहं॥ १॥

[अभिनवमधुलोलुपो भवाँस्तथा परिचुम्ब्य चूतमञ्जरीम्।
कमलवसतिमात्रनिर्वृतो मधुकर! विस्मृतोऽस्येनां कथम्॥]

राजा—अहो रागपरिवाहिनी गीतिः।

विदूषकः—किं दाव गीदीए अवगओ अक्खरत्थो। [किं तावद् गीत्या अवगतोऽक्षरार्थः।]

राजा—(स्मितं कृत्वा) सकृत्कृतप्रणयोऽयं जनः। तदस्या देवीवसुमतीमन्तरेण मदुपालम्भमवगतोऽस्मि। सखे माढव्य! मद्वचनादुच्यतां हंसपदिका—निपुणमुपालब्धोऽस्मीति।

विदूषकः—जं भवं आणवेदि। (उत्थाय) भो वअस्स! गहीदस्स ताए परकीएहिं हत्थेहिं सिहंडए ताडीअमाणस्स अच्छराए वीदराअस्स विअ णत्थि दाणिं मे मोक्खो। [यद्भवानाज्ञापयति। भो वयस्य! गृहीतस्य तया परकीयैर्हस्तैः शिखण्डके ताड्यमानस्याप्सरसा वीतरागस्येव नास्तीदानीं मे मोक्षः।]

(सिंहासन पर विराजमान राजा दुष्यन्त के साथ विदूषक का प्रवेश)

विदूषक—**(कान लगाकर)** सुनो, वयस्य! संगीतशाला की ओर कान लगाकर सुनो। कोई बड़े लय-ताल से अत्यन्त मीठे स्वरों में गीत गा रहा है। जान पड़ता है कि महारानी हंसपदिका स्वरसाधना कर रही हैं।

राजा—अच्छा तुम चुप हो जाओ तो सुनूँ।

(नेपथ्य में गायन हो रहा है)

हे नये-नये मधु के लोभी भ्रमर! तुम आम्रमंजरी का चुम्बन करके कमलवन में जा रमे और मुझ बेचारी को क्यों एकदम भूल गये? ॥ १॥

राजा—वाह, इस गीत में प्रेम की कैसी धारा बह रही है?

विदूषक—किन्तु इस गीत का मतलब भी समझते हो?

राजा—**(मुस्कराते हुए)** हाँ-हाँ समझ लिया। इस रानी से मैंने केवल एक ही बार प्रेम किया है। इसलिए आजकल मैं जो देवी वसुमती से प्रेम करने लगा हूँ, उसी पर ये छींटे कसे गये हैं। मित्र माधव्य! तुम जाकर मेरी ओर से हंसपदिका से कहो कि तुमने बडी मीठी चुटकी ली है।

राजा—गच्छ। नागरिकवृत्त्या संज्ञापयैनाम्।

विदूषकः—का गई ? [का गतिः ?] (इति निष्क्रान्तः)

राजा—(आत्मगतम्) किं नु खलु गीतार्थमाकर्ण्येष्टजनविरहादृतेऽपि बलवदुत्कण्ठितोऽस्मि। अथवा—

रम्याणि वीक्ष्य मधुराँश्च निशम्य शब्दान्पर्युत्सुकीभवति यत्सुखितोऽपि जन्तुः।
तच्चेतसा स्मरति नूनमबोधपूर्वं भावस्थिराणि जननान्तरसौहृदानि॥ २॥

(इति पर्याकुलस्तिष्ठति)

(ततः प्रविशति कञ्चुकी)

कञ्चुकी—अहो नु खल्वीदृशीमवस्थां प्रतिपन्नोऽस्मि।

आचार इत्यवहितेन मया गृहीता या वेत्रयष्टिरवरोधगृहेषु राज्ञः।
काले गते बहुतिथे मम सैव जाता प्रस्थानविक्लवगतेरवलम्बनार्था॥ ३॥

भोः! कामं धर्मकार्यमनतिपात्यं देवस्य। तथापीदानीमेव धर्मासनादुत्थिताय पुनरुपरोधकारि कण्वशिष्यागमनमस्मै नोत्सहे निवेदितुम्। अथवाऽविश्रमोऽयं लोकतन्त्राधिकारः। कुतः—

भानुः सकृद्युक्ततुरङ्ग एव रात्रिन्दिवं गन्धवहः प्रयाति।
शेषः सदैवाहितभूमिभारः षष्ठांशवृत्तेरपि धर्म एषः॥ ४॥

विदूषक—जैसी आपकी आज्ञा। (**उठकर**) किन्तु वयस्य! जैसे अप्सराओं के हाथों में पड़कर बड़े-बड़े वैरागी ऋषि नहीं छूट पाते, वैसे ही जब अपनी दासियों द्वारा मेरी चोटी पकड़वाकर वे मुझे पीटने लगेंगी, उस समय उनसे छुटकारा पाना मेरे लिए असम्भव हो जायेगा।

राजा—जाओ, चतुराई के साथ उन्हें यह सन्देश सुना देना।

विदूषक—तो क्या उपाय है, जाना ही पडेगा। (**चला जाता है**)

राजा—(**मन ही मन**) मेरे सभी सगे-सम्बन्धी पास ही हैं, फिर भी न जाने क्यों इस गीत को सुनकर मैं बहुत अनमना-सा हो रहा हूँ। अथवा—

सुन्दर वस्तुएँ देख और मीठे शब्द सुनकर जब सुखी लोग भी उदास हो जायें, तब यही समझना चाहिए कि उनके मन में पिछले जन्म के प्रेमियों के जो संस्कार बैठे हुए थे, वे ही जाग उठे हैं॥ २॥

(यह कहकर व्याकुल हो बैठ जाते हैं)

(तभी कंचुकी प्रवेश करता है)

कञ्चुकी—आह, मेरी भी क्या दशा हो चली है।

जिस बेंत की छडी को कभी मैं रनिवास के द्वारपालक का नियम समझकर हाथ में लिये रहता था, वही अब इस बुढापे में लड़खड़ाते पैरवाले बूढे का सहारा बन गयी है॥ ३॥

यह तो ठीक है कि महाराज को धर्मकार्य करना चाहिए। फिर भी वे अभी-अभी न्यायासन से उठकर गये हैं। अब उन्हें फिर से कष्ट देने के लिए जो ये कण्व के शिष्य आ धमके हैं। इनकी सूचना पहुँचाने की इच्छा नहीं होती, किन्तु प्रजा के शासनकार्य में विश्राम कहाँ ? क्योंकि—

सूर्य एक ही बार अपने घोड़े जोतकर निरंतर चल रहा है, पवन रात-दिन बहता रहता है और शेषनाग पृथ्वी के भार को अपने ऊपर सदा धारण किये रहते हैं। ठीक यही दशा उपज का छठा अंश लेनेवाले राजा की भी है॥ ४॥

यावन्नियोगमनुतिष्ठामि। (परिक्रम्यावलोक्य च) एष देवः—

प्रजाः प्रजाः स्वा इव तन्त्रयित्वा निषेवते शान्तमना विविक्तम्।
यूथानि सञ्चार्य रविप्रतप्तः शीतं दिवा स्थानमिव द्विपेन्द्रः॥५॥

(उपगम्य) जयतु जयतु देवः। एते खलु हिमगिरेरुपत्यकारण्यवासिनः कण्वसन्देशमादाय सस्त्रीकास्तपस्विनः सम्प्राप्ताः। श्रुत्वा देवः प्रमाणम्।

राजा—(सादरम्) किं कण्वसन्देशहारिणः ?

कञ्चुकी—अथ किम्।

राजा—तेन हि मद्वचनाद्विज्ञाप्यतामुपाध्यायः सोमरातः। अमूनाश्रमवासिनः श्रौतेन विधिना सत्कृत्य स्वयमेव प्रवेशयितुमर्हतीति। अहमप्येतांस्तपस्विदर्शनोचिते प्रदेशे स्थितः प्रतिपालयामि।

कञ्चुकी—यदाज्ञापयति देवः। (इति निष्क्रान्तः)

राजा—(उत्थाय) वेत्रवति ! अग्निशरणमार्गमादेशय।

प्रतीहारी—इदो इदो देवो। [इत इतो देवः।]

राजा—(परिक्रामति, अधिकारखेदं निरूप्य) सर्वः प्रार्थितमर्थमधिगम्य सुखी सम्पद्यते जन्तुः। राज्ञां तु चरितार्थता दुःखान्तरैव।

औत्सुक्यमात्रमवसाययति प्रतिष्ठा क्लिश्नाति लब्धपरिपालनवृत्तिरेव।
नातिश्रमापनयनाय न च श्रमाय राज्यं स्वहस्तधृतदण्डमिवातपत्रम्॥६॥

इसलिए चलकर मैं अपना कर्तव्य पालन करूँ। (इधर-उधर देखकर) ये महाराज—

अपनी सन्तान जैसी प्रजा का काम करके थक जाने पर यहाँ एकान्त में उसी प्रकार विश्राम कर रहे हैं, जैसे दिन की धूप से तपा हुआ गजराज हाथियों के झुण्ड को चरने के लिए छोड़कर स्वयं ठंडे स्थान में विश्राम करता है॥५॥

(पास जाकर) महाराज की जय हो, जय हो। हिमालय की तराई में रहनेवाले कुछ तपस्वी महर्षि कण्व का सन्देश लेकर स्त्रियों के साथ यहाँ आये हुए हैं। अब आप जैसा ठीक समझें वैसा करें।

राजा—(आदर से) क्या वे महर्षि कण्व का सन्देश लेकर आये हुए हैं ?

कञ्चुकी—जी हाँ !

राजा—तब कुलपुरोहित सोमरातजी को मेरी जबानी कहला दो कि वे इन आश्रमवासियों का वैदिक रीति से सत्कार करके इन्हें अपने ही साथ ले आयें। मैं भी तब तक उधर चलकर बैठता हूँ, जहाँ ऋषियों से भेंट की जाती है।

कञ्चुकी—जैसी महाराज की आज्ञा। (चला जाता है)

राजा—(उठकर) वेत्रवती ! चलो, हमें यज्ञशाला का मार्ग दिखलाओ।

प्रतीहारी—इधर आइये महाराज, इधर।

राजा—(घूमकर, राजकाज का दुःख दर्शाते हुए) मन की साध पूरी हो जाने पर अन्य सभी जीवों को तो सुख मिलता है। किन्तु जब हम लोगों की राजा बनने की इच्छा पूरी हो जाती है, तब केवल कष्ट ही हाथ लगता है।

राजा बनकर प्रतिष्ठा पा लेने से मन की उमंग तो पूरी हो जाती है, किन्तु जब राज्य का पालन करना पड़ता है तब कष्ट का अन्त नहीं रहता। इसलिए राज्य उस छतरी के समान है, जिसकी मूठ अपने हाथ में ले लेने पर थकावट ही अधिक होती है और आराम कम मिलता है॥६॥

(नेपथ्ये)

वैतालिकौ—विजयतां देवः।

प्रथमः—

स्वसुखनिरभिलाषः खिद्यसे लोकहेतोः प्रतिदिनमथवा ते वृत्तिरेवंविधैव।
अनुभवति हि मूर्ध्ना पादपस्तीव्रमुष्णं शमयति परितापं छायया संश्रितानाम्॥ ७॥

द्वितीयः—

नियमयसि विमार्गप्रस्थितानात्तदण्डः प्रशमयसि विवादं कल्पसे रक्षणाय।
अतनुषु विभवेषु ज्ञातयः सन्तु नाम त्वयि तु परिसमाप्तं बन्धुकृत्यं प्रजानाम्॥ ८॥

राजा— एते क्लान्तमनसः पुनर्नवीकृताः स्मः। (इति परिक्रामति)

प्रतीहारी— एसो अहिणवसम्मज्जणसस्सिरीओ सण्णिहिदहोमधेणू अग्गिसरणालिंदो। आरोहदु देवो। [एषोऽभिनवसम्मार्जनसश्रीकः सन्निहितहोमधेनुरग्निशरणालिन्दः। आरोहतु देवः।]

राजा—(आरुह्य परिजनांसावलम्बी तिष्ठति) वेत्रवति! किमुद्दिश्य भगवता कण्वेन मत्सकाशमृषयः प्रेषिताः स्युः?

किं तावद् व्रतिनामुपोढतपसां विघ्नैस्तपो दूषितं
धर्मारण्यचरेषु केनचिदुत प्राणिष्वसच्चेष्टितम्।
आहोस्वित्प्रसवो ममापचरितैर्विष्टम्भितो वीरुधा-
मित्यारूढबहुप्रतर्कमपरिच्छेदाकुलं मे मनः॥ ९॥

(नेपथ्य में)

दो वैतालिक—महाराज की जय हो।

पहला—अपने सुख की इच्छा छोड़कर आप नित्य प्रजा की भलाई में लगे रहते हैं। और ऐसा करके आप अपना धर्म ही पाल रहे हैं। क्योंकि वृक्ष अपने सिर पर कड़ी धूप सहता हुआ भी अपने नीचे बैठे हुए जीवों को छाया ही देता है॥ ७॥

दूसरा—आप अपने राजदण्ड से दुष्टों को ठीक रखते हैं और सबके आपसी झगड़े मिटाकर प्रजा की रक्षा करते हैं। प्रजा में धनी लोगों के बहुत से सगे-सम्बन्धी होते हैं, किन्तु साधारण प्रजाजनों के तो बन्धु-बान्धव सभी कुछ एकमात्र आप ही हैं॥ ८॥

राजा—मेरा उदास मन इनकी बातें सुनकर फिर से हरा हो गया। (चारों ओर घूमते हैं)

प्रतीहारी—यह झाड़-बुहारकर स्वच्छ की हुई यज्ञशाला की बैठक है, जहाँ पास ही हवन के लिए घी-दूध देनेवाली गायें बँधी हुई हैं। महाराज इसी पर विराजमान हों।

राजा—(चढ़कर परिचारकों के कन्धों के सहारे खड़ा होता है) वेत्रवती! भगवान् कण्व ने इन ऋषियों को मेरे पास किसलिए भेजा होगा?

कहीं उपद्रवी राक्षसों ने बहुत प्रकार की तपस्या करनेवाले इन ऋषियों के तप में तो बाधा नहीं डाल दी है? या कहीं कोई तपोवन के प्राणियों को तो नहीं सता रहा है? या कहीं मेरे पापों के कारण तपोवन की लताओं और वृक्षों का फलना-फूलना तो नहीं बन्द हो गया है? मेरे मन में अनेक प्रकार की ऐसी-ऐसी आशंकाएँ उठ रही हैं कि कुछ ठीक-ठीक समझ न पाने के कारण हृदय में बड़ी खलबली मची हुई है॥ ९॥

प्रतीहारी—सुचरिदणंदिणो इसीओ देवं सभाजइदुं आअदेत्ति तक्केमि। [सुचरितनन्दिन ऋषयो देवं सभाजयितुमागता इति तर्कयामि।]

(ततः प्रविशन्ति गौतमीसहिताः शकुन्तलां पुरस्कृत्य मुनयः, पुरश्चैषां कञ्चुकी पुरोहितश्च)

कञ्चुकी—इत इतो भवन्तः।

शार्ङ्गरवः—शारद्वत!

महाभागः कामं नरपतिरभिन्नस्थितिरसौ
न कश्चिद्वर्णानामपथमपकृष्टोऽपि भजते।
तथापीदं शश्वत्परिचितविविक्तेन मनसा
जनाकीर्णं मन्ये हुतवहपरीतं गृहमिव॥ १०॥

शारद्वतः—स्थाने भवान्पुरप्रवेशादित्थम्भूतः संवृतः। अहमपि—

अभ्यक्तमिव स्नातः शुचिरशुचिमिव प्रबुद्ध इव सुप्तम्।
बद्धमिव स्वैरगतिर्जनमिह सुखसङ्गिनमवैमि॥ ११॥

शकुन्तला—(निमित्तं सूचयित्वा) अम्महे! किं मे वामेदरं णअणं विप्फुरदि? [अहो! किं मे वामेतरं नयनं विस्फुरति?]

गौतमी—जादे! पडिहदं अमंगलं! सुहाइं दे भत्तुकुलदेवदाओ वितरंदु। [जाते! प्रतिहतममङ्गलम्। सुखानि ते भर्तृकुलदेवताः वितरन्तु।] (इति परिक्रामति)

पुरोहितः—(राजानं निर्दिश्य) भो भोस्तपस्विनः! असावत्रभवान् वर्णाश्रमाणां रक्षिता प्रागेव मुक्तासनो वः प्रतिपालयति। पश्यतैनम्।

प्रतीहारी—ऐसा मालूम होता है कि ये ऋषि लोग महाराज के अच्छे कामों से प्रसन्न होकर बधाई देने के लिए आये होंगे।

(तदनन्तर शकुन्तला को आगे किये हुए गौतमी के साथ ऋषियों का प्रवेश। उनके आगे कञ्चुकी और पुरोहित हैं)

कञ्चुकी—आप लोग, इधर से आइए इधर से।

शार्ङ्गरव—शारद्वत!

मै मानता हूँ कि ये राजा इतने धर्मात्मा हैं कि कभी मर्यादा का उल्लंघन नहीं करते और इनके राज्य में जो नीच-से-नीच वर्ण के लोग हैं, वे भी कभी कोई अधर्म का काम नहीं करते, किन्तु इतने लोगों से भरे हुए इस आँगन को देखकर ऐसा ज्ञात होता है कि मानों यहाँ आग की लपटें उठी हुई हैं। अकेले में रमनेवाला मेरा मन तो ऐसा करता है कि अभी यहाँ मे भाग जाऊँ॥ १०॥

शारद्वत—नगर में आने पर ऐसा ही लगता होगा, और मैं भी—

सांसारिक भोगों में लिप्त यहाँ वालों को वैसा ही हीन समझता हूँ जैसे कि नहाया हुआ व्यक्ति तेल लगाये हुए मनुष्य को, पवित्र अपवित्र को, जागता हुआ सोते हुए को तथा स्वतन्त्र व्यक्ति बँधे हुए को हीन समझता है॥ ११॥

शकुन्तला—**(अपशकुन का प्रदर्शन कर)** हैं! मेरी दाहिनी आँख क्यों फड़कने लग गयी?

गौतमी—पुत्री! तेरे असगुन दूर हों, तेरे पतिकुल के देवता तुझे सुख दें। **(घूमती है)**

पुरोहित—**(राजा को दिखलाकर)** तपस्वियो! देखिए, वर्णाश्रमधर्म का पालन करने वाले महाराज पहले से ही आसन छोड़कर खड़े-खड़े आप लोगों के आगमन की प्रतीक्षा कर रहे हैं। इन्हें देखिए।

शार्ङ्गरवः—भो महाब्राह्मण ! काममेतदभिनन्दनीयं तथापि वमयत्र मध्यस्थाः। कुतः—

भवन्ति नम्रास्तरवः फलागमैर्नवाम्बुभिर्दूरविलम्बिनो घनाः।
अनुद्धताः सत्पुरुषाः समृद्धिभिः स्वभाव एवैष परोपकारिणम्॥ १२॥

प्रतिहारी—देव ! पसण्णमुहवण्णा दीसंति। जाणामि विसद्धकज्जा इसीओ। [**देव ! प्रसन्नमुखवर्णा दृश्यन्ते। जानामि विश्रब्धकार्या ऋषयः।**]

राजा—(शकुन्तलां दृष्ट्वा) अथात्रभवती—

का स्विदवगुण्ठनवती नातिपरिस्फुटशरीरलावण्या।
मध्ये तपोधनानां किसलयमिव पाण्डुपत्राणाम्॥ १३॥

प्रतिहारी—देव ! कुतूहलगब्भोपहिदो ण मे तक्को पसरदि। णं दंसणीआ उण से आकिदी लक्खीअदि। [**देव ! कूतूहलगर्भोपहितो न मे तर्कः प्रसरति। ननु दर्शनीया पुनरस्या आकृतिर्लक्ष्यते।**]

राजा— भवतु; अनिर्वर्णनीयं परकलत्रम्।

शकुन्तला—(हस्तमुरसि कृत्वा, आत्मगतम्) हिअअ ! किं एव्वं वेवसि ? अज्जउत्तस्स भावं ओहारिअ धीरं दाव होहि। [**हृदय ! किमेवं वेपसे ? आर्यपुत्रस्य भावमवधार्य धीरं तावद्भव।**]

पुरोहितः—(पुरो गत्वा) एते विधिवदर्चितास्तपस्विनः। कश्चिदेषामुपाध्यायसन्देशः। तं देवः श्रोतुमर्हति।

राजा—अवहितोऽस्मि।

ऋषयः—(हस्तानुद्यम्य) विजयस्व राजन्।

शार्ङ्गरव—राजपुरोहित ! माना कि महाराज प्रशंसा के योग्य हैं, किन्तु हम इसे कोई नयी बात नहीं समझते। क्योंकि—

फल लगने पर पेड़ झुक जाते हैं, नये जल से भरे हुए बादल नीचे आ जाते हैं और सज्जन लोग धन पाकर नम्र हो जाते हैं। यह तो परोपकारियों का स्वभाव ही होता है॥ १२॥

प्रतीहारी—महाराज ! ये ऋषि लोग बडे प्रसन्न दीख रहे हैं। इसलिए ऐसा लगता है कि ये लोग किसी अच्छे काम से ही यहाँ आए हैं।

राजा—(शकुन्तला को देखकर) ये देवी कौन हैं ?—

इन तपस्वियों के बीच पीले पत्तों में नई कोपल के समान दीखनेवाली यह कौन हो सकती है, जिसकी सुन्दरता घूँघट के कारण भली प्रकार नहीं दीखती॥ १३॥

प्रतीहारी—महाराज मैं भी यही जानने को उतावली हूँ, किन्तु ठीक-ठीक कुछ समझ में नहीं आ रहा है। किन्तु इसकी सुन्दर आकृति दर्शनीय है।

राजा—हुआ करे, पराई स्त्री पर आँख नहीं उठानी चाहिए।

शकुन्तला—(**हृदय पर हाथ धरकर, मन ही मन**) मेरे हृदय ! इस प्रकार काँप क्यों रहे हो ? आर्यपुत्र के प्रेम का ध्यान करके धीरज धरो।

पुरोहित—(आगे बढ़कर) महाराज ! इन तपस्वियों का विधिवत् सत्कार हो चुका है। ये अपने गुरुजी का कोई सन्देश लाये हैं, उसे आप सुन लें।

राजा—आप लोग वह सन्देश कहें, मैं सुन रहा हूँ।

ऋषिगण—(हाथ उठाकर) महाराज की विजय हो।

राजा—सर्वानभिवादये।

ऋषयः—इष्टेन युज्यस्व।

राजा—अपि निर्विघ्नतपसो मुनयः।

ऋषयः—

कुतो धर्मक्रियाविघ्नः सतां रक्षितरि त्वयि।
तमस्तपति घर्मांशौ कथमाविर्भविष्यति॥ १४॥

राजा—अर्थवान्खलु मे राजशब्दः। अथ भगवाँल्लोकानुग्रहाय कुशली कण्वः।

ऋषयः—स्वाधीनकुशलाः सिद्धिमन्तः। स भवन्तमनामयप्रश्नपूर्वकमिदमाह।

राजा— किमाज्ञापयति भगवान् ?

शार्ङ्गरवः—यन्मिथः समयादिमां मदीयां दुहितरं भवानुपायँस्त तन्मया प्रीतिमता युवयोरनुज्ञातम्। कुतः—

त्वमर्हतां प्राग्रसरः स्मृतोऽसि नः शकुन्तला मूर्तिमती च सत्क्रिया।
समानयँस्तुल्यगुणं वधूवरं चिरस्य वाच्यं न गतः प्रजापतिः॥ १५॥

तदिदानीमापन्नसत्त्वेयं प्रतिगृह्यतां सहधर्मचरणायेति।

गौतमी— अज्ज ! किंपि वत्तुकाम म्हि। ण मे वअणावसरो अत्थि। कहं त्ति। [आर्य ! किमपि वक्तुकामास्मि। न मे वचनावसरोऽस्ति। कथमिति।]

णावेक्खिओ गुरुअणो इमाइ तुए पुच्छिदो ण बंधुअणो।
एक्कक्कमेव्व चरिए भणामि किं एक्कमेक्कस्स॥ १६॥

राजा—मैं आप सबको प्रणाम करता हूँ।

ऋषिगण—आपका मनोरथ पूर्ण हो।

राजा—कहिए, ऋषियों की तपस्या में कोई विघ्न-बाधा तो नहीं आती ?

ऋषिगण—जहाँ आप जैसे राजा पृथ्वी की रक्षा करते हों, वहाँ सज्जनों के धर्म-कार्य में विघ्न कौन डालेगा ? सूर्य के चमकते रहने पर भला कहीं अँधेरा भी रह सकता है ?॥ १४॥

राजा—आज मेरा राजा कहलाना सार्थक हुआ। अच्छा यह तो बताइये कि संसार का कल्याण करने के लिए तत्पर भगवान् कण्व तो सकुशल हैं ?

ऋषिगण—कुशलता तो ऐसे सिद्ध पुरुषों के अधीन रहती है। उन्होंने आपका कुशल पूछते हुए कहा है।

राजा—हाँ, भगवान् कण्व की क्या आज्ञा है ?

शार्ङ्गरव—उन्होंने कहलाया है कि आपने जो मेरी कन्या से गुपचुप विवाह कर लिया है, उसे मै प्रसन्न होकर स्वीकार करता हूँ। क्योंकि—

आप आदरणीय व्यक्तियों में सबसे श्रेष्ठ हैं और शकुन्तला पुण्यकर्म की मूर्ति है। आज बहुत दिनों बाद ब्रह्मा ने एक जैसे गुणवाले वर-वधू की जोड़ी मिलाकर अपने को दोषी कहलाने से बचा लिया है॥ १५॥

अब आप इस गर्भवती को अपनी धर्मपत्नी बनाकर घर में शरण दीजिये।

गौतमी—आर्य! मैं भी कुछ कहना चाहती हूँ। यद्यपि मुझे आप लोगों के बीच में कुछ भी बोलना नहीं चाहिए। क्योंकि—

[नापेक्षितो गुरुजनोऽनया त्वया पृष्टो न बन्धुजनः।
एकैकमेव चरिते भणामि किमेकमेकस्य॥]

शकुन्तला—(आत्मगतम्) किं णु खु अज्जउत्तो भणादि ? [किं नु खल्वार्यपुत्रो भणति ?]

राजा—किमिदमुपन्यस्तम् ?

शकुन्तला—(आत्मगतम्) पावओ खु वअणोवण्णासो। [पावकः खलु वचनोपन्यासः।]

शार्ङ्गरवः— कथमिदं नाम ? भवन्त एव सुतरां लोकवृत्तान्तनिष्णाताः।

सतीमपि ज्ञातिकुलैकसंश्रयां जनोऽन्यथा भर्तृमतीं विशङ्कते।
अतः समीपे परिणेतुरिष्यते प्रियाप्रिया वा प्रमदा स्वबन्धुभिः॥ १७॥

राजा—किं चात्रभवती मया परिणीतपूर्वा ?

शकुन्तला—(सविषादम्, आत्मगतम्) हिअअ! संपदं दे आसंका। [हृदय! साम्प्रतं ते आशङ्का।]

शार्ङ्गरवः—

किं कृतकार्यद्वेषी धर्म प्रति विमुखता कृतावज्ञा।

राजा—कुतोऽयमसत्कल्पनाप्रश्नः ?

शार्ङ्गरवः—

मूर्च्छन्त्यमी विकाराः प्रायेणैश्वर्यमत्तेषु॥ १८॥

राजा—विशेषेणाक्षिप्तोऽस्मि।

न तो इसी ने अपने बड़ों से कुछ कहा-सुना, न आपने ही इसके सगे-सम्बन्धियों से कुछ पूँछा-जाँचा। अतएव जब आप लोगों ने आपस में ही सब कुछ कर डाला, तब मैं आप दोनों को क्या कहूँ॥ १६॥

शकुन्तला—(मन ही मन) देखें, इस बात पर आर्यपुत्र क्या कहते हैं?

राजा—आप लोग यह क्या कह रहे हैं?

शकुन्तला—(मन ही मन) इनकी बात का आरम्भ तो आग उगल रहा है।

शार्ङ्गरव—ऐसा क्यों कह कर रहे हैं? आप तो लोकाचार की सभी बातें जानते हैं।

जो सुहागिन स्त्री अपने पिता के घर में रहती है, वह चाहे जितनी पतिव्रता हो, फिर भी उसके सम्बन्ध में लोग बड़ी उल्टी-सीधी बातें उड़ा दिया करते हैं। इसलिए वह युवती चाहे सबकी दुलारी ही क्यों न हो, पर उसके भाई-बन्धु सदा यही चाहते हैं कि वह अपने पति के साथ रहे॥ १७॥

राजा—क्या इन देवी के साथ कभी मेरा विवाह हो चुका है?

शकुन्तला—(दुःखी होकर, मन ही मन) हृदय! तुम्हें जो खटका था, अब वह आगे आ रहा है।

शार्ङ्गरव—क्या अब आपको अपनी करतूत पर पछतावा होता है या आप कर्त्तव्य से भाग रहे हैं अथवा जान-बूझकर अपने किये हुए कर्म को भुला देना चाहते हैं?

राजा—आपने यह कैसी वेसिर-पैर की बातें छेड दी हैं?

शार्ङ्गरव—जो ऐश्वर्य से मतवाले हो जाते हैं, वे प्रायः ऐसे ही खोटे काम करते हैं॥ १८॥

राजा—आप लोग मुझपर बहुत बड़ा लांछन लगा रहे हैं।

गौतमी—जादे ! मुहुत्तअं मा लज्ज । अवणइस्सं दाव दे ओउंठण । तदो तुमं भट्टा अहिजाणिस्सदि । [जाते मुहूर्तं मा लज्जस्व । अपनेष्यामि तावत्तेऽवगुण्ठनम् । ततस्त्वां भर्ताऽभिज्ञास्यति ।] (इति यथोक्तं करोति)

राजा—(शकुन्तलां निर्वर्ण्य आत्मगतम्)

इदमुपनतमेवं रूपमक्लिष्टकान्ति प्रथमपरिगृहीतं स्यान्न वेत्यध्यवस्यन् ।
भ्रमर इव विभाते कुन्दमन्तस्तुषारं न च खलु परिभोक्तुं नैव शक्नोमि हातुम् ॥ १९ ॥

(इति विचारयन्स्थितः)

प्रतीहारी—(स्वगतम्) अहो धम्मावेक्खिआ भट्टिणो । ईदिसं णाम सुहोवणदं रूवं देक्खिअ को अण्णो विआरेदि ? [अहो धर्मावेक्षिता भर्तुः । ईदृशं नाम सुखोपनतं रूपं दृष्ट्वा कोऽन्यो विचारयति ?]

शार्ङ्गरवः—भो राजन् ! किमिति जोषमास्यते ?

राजा—भोस्तपोधनाः ! चिन्तयन्नपि न खलु स्वीकरणमत्रभवत्याः स्मरामि । तत्कथमिमामभिव्यक्तसत्त्वलक्षणां प्रत्यात्मानं क्षेत्रिणमाशङ्कमानः प्रतिपत्स्ये ?

शकुन्तला—(अपवार्य) अज्जस्स परिणए एव्व संदेहो । कुदो दाणिं मे दूरादिरोहिणी आसा ? [आर्यस्य परिणय एव सन्देहः । कुत इदानीं मे दूराधिरोहिण्याशा ?]

शार्ङ्गरवः—मा तावत्—

कृताभिमर्शामनुमन्यमानः सुतां त्वया नाम मुनिर्विमान्यः ।
मुष्टं प्रतिग्राहयता स्वमर्थं पात्रीकृतो दस्युरिवासि येन ॥ २० ॥

गौतमी—वत्से ! थोड़ी देर के लिए लाज छोड़ दो । आओ, मै तुम्हारा घूँघट उठा दूँ । जिससे तुम्हारे पति तुम्हें पहचान लें । (घूँघट हटा देती है)

राजा—(शकुन्तला को देखकर, मन ही मन)

मैं निश्चय नहीं कर पा रहा हूँ कि यह जो अत्यन्त रूपवती सुन्दरी यहाँ अपने आप आ पहुँची है, इसके साथ मैंने पहले कभी विवाह किया भी है या नहीं । इसीलिए जैसे प्रातःकाल की ओस पड़े हुए कुन्द के फूल पर भौंरा न तो बैठता ही है न उसे छोड़ता ही है । वैसे ही मैं भी न तो इसे ग्रहण ही कर सकता हूँ और न छोड़ ही पा रहा हूँ ॥ १९ ॥

(यह विचार करते हुए बैठ जाता है)

प्रतीहारी—(स्वगत) हमारे महाराज धर्म का कितना ध्यान रखते हैं । नहीं तो, अपने आप प्राप्त ऐसे रूप को पाकर भला कौन इतना सोचेगा ?

शार्ङ्गरव—महाराज ! आप चुप क्यों हो गये ?

राजा—तपस्वियो ! बार-बार स्मरण करने पर भी मुझे इस देवी के साथ विवाह करने की बात स्मरण ही नहीं आती । तब बताइये कि गर्भवती के स्पष्ट लक्षणोंवाली इस देवी को स्वीकार करके दूसरे का गर्भधारण करनेवाली स्त्री का पति कहलाने का अपजस मैं कैसे ले सकता हूँ ?

शकुन्तला—(अलग से) जब इन्हें विवाह में ही सन्देह हो रहा है, तब मैंने जो बड़ी-बड़ी आशाएँ बाँध रखी थीं, उनका फिर ठिकाना ही कहाँ है ?

शार्ङ्गरव—हाँ-हाँ, मत स्वीकार करो ।

तुम्हें ऋषि का अपमान करना ही चाहिए । क्योंकि उन्होंने तुम्हारे साथ यह भलमनसाहत की

शारद्वतः—शार्ङ्गरव! विरम त्वमिदानीम्। शकुन्तले! वक्तव्यमुक्तमस्माभिः। सोऽयमत्र-भवानेवमाह। दीयतामस्मै प्रत्ययप्रतिवचनम्।

शकुन्तला—(स्वगतम्) इमं अवत्थंतरं गदे तारिसे अणुराए किं वा सुमराविदेण। अत्ता दाणिं मे सोअणीओ त्ति ववसिदं एदं। (प्रकाशम्) अज्जउत्त! (इत्यर्धोक्ते-) संसइदे दाणिं ण एसो समुदाआरो। पोरव! ण जुत्तं णाम दे तह पुरा अस्समपदे सहावुत्ताणहिअअं इमं जणं समअपुव्वं पतारिअ ईदिसेहिं अक्खरेहिं पच्चाचक्खिदुं। [इदमवस्थान्तरं गते तादृशेऽनुरागे किं वा स्मारितेन? आत्मेदानीं मे शोचनीय 'इति व्यवसितमेतत्। आर्यपुत्र! संशयित इदानीं नैष समुदाचारः। पौरव! न युक्तं नाम ते तथा पुराऽऽश्रमपदे स्वभावोत्तानहृदयमिमं जनं समयपूर्व प्रतार्येदृशैरक्षरैः प्रत्याख्यातुम्।]

राजा—(कर्णौ पिधाय)शान्तं पापम्।

व्यपदेशमाविलयितुं किमीहसे जनमिमं च पातयितुम्।
कूलङ्कषेव सिन्धुः प्रसन्नमम्भस्तटतरुं च॥ २१॥

शकुन्तला—होदु; जइ परमत्थतो परपरिग्गहसंकिणा तुए एव्वं वत्तुं पउत्तं ता अहिण्णाणेण इमिणा तुह आसंकं अवणइस्सं। [भवतु; यदि परमार्थतः परपरिग्रहशङ्किना त्वयैवं वक्तुं प्रवृत्तं तदभिज्ञानेनानेन तवाशङ्कामपनेष्यामि।]

राजा—उदारः कल्पः।

शकुन्तला—(मुद्रास्थानं परामृश्य) हद्धी हद्धी, अंगुलीअअसुण्णा मे अंगुली। [हा धिक् हा धिक्, अङ्गुलीयकशून्या मेऽङ्गुलिः।] (इति सविषादं गौतमीमवेक्षते)

गौतमी—णूणं दे सक्कावदारब्भंतरे सचीतित्थसलिलं वंदमाणाए पब्भट्ठं अंगुलीअअं। [नूनं ते शक्रावताराभ्यन्तरे शचीतीर्थसलिलं वन्दमानायाः प्रभ्रष्टमङ्गुलीयकम्।]

है कि उनकी जिस कन्या को तुमने छल से दूषित कर दिया है, उसे वे तुम्हें योग्य पात्र समझकर इसी प्रकार सौंप रहे हैं, जैसे कोई अपनी चोरी गई हुई वस्तु मिल जाने पर फिर चोर को ही लौटा दे॥ २०॥

शारद्वत—अच्छा शार्ङ्गरव! अब तुम चुप हो जाओ। शकुन्तला! हमें जो कहना था, सो कह चुके। राजा जो कह रहे हैं, वह सुन ही लिया। अब तुम्हीं इनको विश्वास दिलाओ।

शकुन्तला—**(मन ही मन)** जब बात यहाँ तक बढ गयी है, तब मैं इन्हें उस प्रेम की याद दिलाकर ही क्या करूँगी। अब तो मुझे अपने आपको ही कोसना है। **(प्रकट)** आर्यपुत्र! **(आधा कहकर रुक जाती है)** पर जब इन्हें विवाह में ही सन्देह है, तब ऐसा सम्बोधन करना अनुपयुक्त है। हे पौरव! आश्रम में मुझ भोली-भाली को अपनी मीठी-मीठी बातों के जाल में फँसाकर अब इस तरह मेरा अपमान करना आपको शोभा नहीं देता।

राजा—**(कान बन्दकर)** शिव! शिव! तुम यह क्या कह रही हो?

अपने स्वच्छ जल को गन्दा करने के लिए तटवर्ती वृक्षों को ढाहने और तट को बहा ले जानेवाली नदी की भाँति तुम अपना कुल कलंकित करके मुझे भी क्यों विनाश की ओर ले जाना चाहती हो?॥ २१॥

शकुन्तला—अच्छा, यदि आप सचमुच मुझे पराई स्त्री समझते हैं तो मैं यह पहचान दिखलाकर आपका सन्देह दूर करती हूँ।

राजा—हाँ, दिखलाइए।

शकुन्तला—**(अँगुली टटोलकर)** हाय-हाय, मेरी अँगुली से अँगूठी कहाँ गायब हो गई?

(रुआँसी जैसी होकर गौतमी की ओर निहारती है)

राजा—(सस्मितम्) इदं तत्प्रत्युत्पन्नमति स्त्रैणमिति यदुच्यते।

शकुन्तला—एत्थ दाव विहिणा दंसिदं पहुत्तणं। अवरं दे कहिस्सं। [अत्र तावद्विधिना दर्शितं प्रभुत्वम्। अपरं ते कथयिष्यामि।]

राजा—श्रोतव्यमिदानीं संवृत्तम्।

शकुन्तला—णं एक्कस्सिं दिअहे णोमालिआमंडवे णलिणीपत्तभाअणगअं उअअं तुह हत्थे संणिहिदं आसि। [नन्वेकस्मिन्दिवसे नवमालिकामण्डपे नलिनीपत्रभाजनगतमुदकं तव हस्ते सन्निहितमासीत्।]

राजा—शृणुमस्तावत्।

शकुन्तला—तक्खणं सो मे पुत्तकिदओ दीहापंगो णाम मिअपोदओ उवट्ठिदो। तुए अअं दाव पढमं पिअउ त्ति अणुअंपिणा उवच्छंदिदो उअएण। ण उण दे अपरिचआदो हत्थब्भासं उवगदो। पच्छा तस्सिं एव्व मए गहिदे सलिले णेण किदो पणओ। तदा तुमं इत्थं पहसिदो सि—सव्वो सगंधेसु विस्ससिदि। दुवेवि एत्थ आरण्णआत्ति। [तत्क्षणं स मे पुत्रकृतको दीर्घापाङ्गो नाम मृगपोतक उपस्थितः। त्वयायं तावत्प्रथमं पिबत्वित्यनुकम्पिनोपच्छन्दित उदकेन। न पुनस्तेऽपरिचयाद्धस्ताभ्यासमुपगतः। पश्चात्तस्मिन्नेव मया गृहीते सलिलेऽनेन कृतः प्रणयः। तदा त्वमित्थं प्रहसितोऽसि—सर्वः सगन्धेषु विश्वसिति। द्वावप्यत्रारण्यकाविति।]

राजा—एवमादिभिरात्मकार्यनिर्वर्तिनीनामनृतमयवाङ्मधुभिराकृष्यन्ते विषयिणः।

गौतमी—महाभाअ! ण अरुहसि एव्वं मंतिदुं। तवोवणसंवड्ढिदो अणभिण्णो अअं जणो कइदवस्स। [महाभाग! नार्हस्येवं मन्त्रयितुम्। तपोवनसंवर्धितोऽनभिज्ञोऽयं जनः कैतवस्य।]

गौतमी—ऐसा लगता है कि शक्रावतार में शचीतीर्थ के जल को प्रणाम करते समय तुम्हारी अँगूठी निकल गई।

राजा—(मुस्कराकर) इसी को स्त्रियों की प्रतिभा कहते हैं।

शकुन्तला—यहाँ भी मेरे दुर्भाग्य ने मेरा पीछा नहीं छोड़ा। अच्छा, मैं अब दूसरी बात बताती हूँ।

राजा—अच्छा कहो, उसे भी सुनना पडेगा।

शकुन्तला—स्मरण कीजिये, एक दिन आप नवमालिका के कुञ्ज में अपने हाथों में पानी से भरा कमल के पत्ते का दोना लिए खड़े थे।

राजा—और कहें, मैं सुन रहा हूँ।

शकुन्तला—इतने में ही वहाँ मेरा पुत्र सदृश पालित दीर्घापांग नाम का मृग-छौना आ पहुँचा। तब आपने उस पर दया करके कहा—'पहले इसे जल पी लेने दो'। यह कहकर आप उसे जल पिलाने लगे। पर अपरिचित होने के कारण वह आपके पास नहीं गया। तब आपके हाथ से दोना मैंने ले लिया और वह मेरे हाथ से जल पीने लगा। तब आपने हँसकर कहा कि अपने सगे-सम्बन्धियों को सब पहचानते हैं। तुम दोनों ही वनवासी हो न!

राजा—अपना काम साधनेवाली स्त्रियों की ऐसी झूठी और मीठी-मीठी बातों में केवल कामी लोग ही फँसते हैं।

गौतमी—महाभाग! आपको ऐसी बात नहीं कहनी चाहिए। तपोवन में पली हुई और विषय-वासना से अनभिज्ञ कन्या भला छल-कपट की बात क्या जाने।

राजा—तापसवृद्धे!

स्त्रीणामशिक्षितपटुत्वममानुषीषु सन्दृश्यते किमुत याः प्रतिबोधवत्यः।
प्रागन्तरिक्षगमनात् स्वमपत्यजातमन्यैर्द्विजैः परभृताः खलु पोषयन्ति॥ २२॥

शकुन्तला—(सरोषम्) अणज्ज! अत्तणो हिअआणुमाणेण पेक्खसि। को दाणिं अण्णो धम्मकंचुअप्पवेसिणो तिणच्छण्णकूवोवमस्स तव अणुकिदिं पडिवदिस्सदि? [अनार्य! आत्मनो हृदयानुमानेन प्रेक्षसे। क इदानीमन्यो धर्मकञ्चुकप्रवेशिनस्तृणच्छन्नकूपोपमस्य तवानुकृतिं प्रपिपत्स्यते?]

राजा—(आत्मगतम्) सन्दिग्धबुद्धिं मां कुर्वन्निकैतव इवास्याः कोपो लक्ष्यते। तथा ह्यनया—

मय्येव विस्मरणदारुणचित्तवृतौ वृत्तं रहः प्रणयमप्रतिपद्यमाने।
भेदाद् भ्रुवोः कुटिलयोरतिलोहिताक्ष्या भग्नं शरासनमिवातिरुषा स्मरस्य॥ २३॥

(प्रकाशम्) भद्रे! प्रथितं दुष्यन्तस्य चरितम्। तथापीदं न लक्षये।

शकुन्तला—सुट्ठु दाव अत्त सच्छंदचारिणी किदम्हि, जा अहं इमस्स पुरवंसप्पच्चएण मुहमहुणो हिअअट्ठिअविसस्स हत्थब्भासं उवगदा। [सुष्ठु तावदत्र स्वच्छन्दचारिणी कृताऽस्मि, याऽहमस्य पुरुवंशप्रत्ययेन मुखमधोर्हृदयस्थितविषस्य हस्ताभ्याशमुपगता।] (इति पटान्तेन मुखमावृत्य रोदिति)

शार्ङ्गरवः—इत्थमात्मकृतं प्रतिहतं चापलं दहति।

अतः परीक्ष्य कर्तव्यं विशेषात्सङ्गतं रहः।
अज्ञातहृदयेष्वेवं वैरीभवति सौहृदम्॥ २४॥

राजा—वृद्ध तपस्विनी!

अमानवी स्त्रियाँ भी विना सिखाए-पढाए बड़ी चतुर होती हैं, फिर ऐसी समझदार स्त्रियों का क्या कहना। जब तक कोयल के बच्चे उडना नहीं सीख जाते, तब तक वह उनका पालन दूसरे पक्षियों (कौओं) से ही कराती हैं॥ २२॥

शकुन्तला—(क्रोध से) अनार्य! तुम अपने ही हृदय के समान सबके हृदय को खोटा समझते हो? तुम्हारे सिवाय और कौन ऐसा होगा, जो घास-फूस से ढँके हुए कुएँ जैसे धर्म का ढोंग रचकर ऐसा नीच काम करेगा?

राजा—(मन ही मन) इसके क्रोध में सच्चाई दीख रही है। इसी से मेरे मन का सन्देह बढता जा रहा है।

ठीक से स्मरण न आने के कारण अकेले में किये हुए प्रेम को जो मैंने इतनी कठोरता से ठुकरा दिया है, अतएव लाल-लाल आँखें करके अत्यन्त क्रोध से इसने जो भौंहें चढ़ा ली है, उन्होंने इस समय कामदेव के धनुष को भी टूक-टूक कर डाला है॥ २३॥

(प्रकट में) भद्रे! दुष्यन्त के चरित्र को सारा संसार जानता है। किन्तु ऐसी बात तो आजतक कभी नहीं सुनी गई।

शकुन्तला—तुमने ठीक ही किया, जो मुझे कुलटा बना डाला। क्योंकि पुरु कुल के धोखे में आकर मैं ऐसे नीच के हाथ में जा पड़ी, जिसके मुँह में मधु और हृदय में विष भरा हुआ था। **(आँचल से मुँह ढँककर रोने लगती है)**

शार्ङ्गरव—विना विचारे जो काम किया जाता है, उस चपलता से ऐसा ही दुःख मिलता है।

इसलिए गुप्त प्रेम बहुत सोच-समझकर करना चाहिए। क्योंकि बिना जाने-बूझे स्वभाववाले व्यक्ति के साथ जो मित्रता की जाती है, वह एक न एक दिन शत्रुता के रूप में परिणत होती ही है॥ २४॥

राजा—अयि भोः ! किमत्रभवतीप्रत्ययादेवास्मान्संवृतदोषाक्षरेण क्षिणुथ ?

शार्ङ्गरवः—(सासूयम्) श्रुतं भवद्भिरधरोत्तरम्।

आजन्मनः शाठ्यमशिक्षितो यस्तस्याप्रमाणं वचनं जनस्य।
परातिसन्धानमधीयते यैर्विद्येति ते सन्तु किलाप्तवाचः॥ २५॥

राजा—भोः सत्यवादिन् ! अभ्युपगतं तावदस्माभिरेवम्। किं पुनरिमामतिसन्धाय लभ्यते ?

शार्ङ्गरवः—विनिपातः।

राजा—विनिपातः पौरवैः प्रार्थयत इति न श्रद्धेयम्।

शारद्वतः—शार्ङ्गरव ! किमुत्तरेण ? अनुष्ठितो गुरोः सन्देश। प्रतिनिवर्तामहे वयम्।

(राजानं प्रति)—

तदेषा भवतः कान्ता त्यज वैनां गृहाण वा।
उपपन्ना हि दारेषु प्रभुता सर्वतोमुखी॥ २६॥

गौतमि ! गच्छाग्रतः।

(इति प्रस्थिताः)

शकुन्तला—कहं इमिणा किदवेण विप्पलद्ध म्हि ? तुम्हे वि मं परिच्चअह। [कथमनेन कितवेन विप्रलब्धाऽस्मि ? यूयमपि मां परित्यजथ ?] (इत्यनुप्रतिष्ठते)

गौतमी—(स्थित्वा) वच्छ संगरव ! अणुगच्छदि इअं क्खु णो करुणपरिदेविणी सउंदला। पच्चादेसपरुसे भत्तुणि किं वा मे पुत्तिआ करेदु ? [वत्स शार्ङ्गरव ! अनुगच्छतीयं खलु नः करुणपरिदेविनी शकुन्तला। प्रत्यादेशपरुषे भर्तरि किं वा मे पुत्रिका करोतु ?]

राजा—सुनिए तो सही, इस देवी की बात का विश्वास करके आप मुझे उल्टी-सीधी बातें कहकर क्यों दोषी बना रहे हैं ?

शार्ङ्गरव—(अपने साथियों से क्रोधपूर्वक) आपने सुनी इनकी उल्टी बातें।

जिसने जन्म से लेकर अब तक छल का नाम भी नहीं जाना, उसकी बात झूठ समझी जाय और जिन्होंने दूसरों को धोखा देने की चालें विद्या समझकर सीखी हों, वे सत्यवादी समझे जायें॥ २५॥

राजा—अच्छा सत्यवादी महोदय ! मान लीजिए कि हम झूठे हैं। पर इसे छलकर हमें क्या लाभ होगा ?

शार्ङ्गरव—पतन।

राजा—मैं इस बात को सही नहीं मानता कि कोई पुरुवंशी पतन की ओर जाना चाहेगा।

शारद्वत—शार्ङ्गरव ! इस कहा-सुनी से क्या लाभ ? गुरुजी का सन्देश हम इन्हें दे ही चुके। चलो, अब लौटा जाय। (राजा के प्रति)—

यह आपकी पत्नी है। इसे रखिए या निकालिये। क्योंकि पति का अपनी स्त्री पर पूर्ण अधिकार होता है॥ २६॥

गौतमी ! आगे-आगे चलो।

(सभी चलते हैं)

शकुन्तला—इस धूर्त ने तो छला ही, अब क्या आपलोग भी मुझे त्याग रहे हैं ? (उनके पीछे-पीछे चलती है)

गौतमी—(खड़ी होकर) वत्स शार्ङ्गरव ! शकुन्तला रोती हुई हमलोगों के पीछे-पीछे चली आ रही है। बतलाओ, अब ऐसे निर्दयी के द्वारा ठुकराई हुई मेरी बच्ची कहाँ जाय ?

शार्ङ्गरवः—(सरोषं निवृत्य) किं पुरोभागे! स्वातन्त्र्यमवलम्बसे?

(शकुन्तला भीता वेपते)

शार्ङ्गरवः—शकुन्तले!

यदि यथा वदति क्षितिपस्तथा त्वमसि किं पितुरुत्कुलया त्वया।
अथ तु वेत्सि शुचि व्रतमात्मनः पतिकुले तव दास्यमपि क्षमम्॥ २७॥

तिष्ठ; साधयामो वयम्।

राजा—भोस्तपस्विन्! किमत्रभवतीं विप्रलभसे?

कुमुदान्येव शशाङ्कः सविता बोधयति पङ्कजान्येव।
वशिनां हि परपरिग्रहसंश्लेषपराङ्मुखी वृत्तिः॥ २८॥

शार्ङ्गरवः—यदा तु पूर्ववृत्तमन्यसङ्गाद्विस्मृतो भवाँस्तदा कथमधर्मभीरुः?

राजा—(पुरोहितं प्रति) भवन्तमेवात्र गुरुलाघवं पृच्छामि।

मूढः स्यामहमेषा वा वदेन्मिथ्येति संशये।
दारत्यागी भवाम्याहो परस्त्रीस्पर्शपांसुलः॥ २९॥

पुरोहितः—(विचार्य) यदि तावदेवं क्रियताम्।

राजा—अनुशास्तु मां भवान्।

पुरोहितः—अत्रभवती तावदा प्रसवादस्मद्गृहे तिष्ठतु। कुत इदमुच्यत इति चेत्? त्वं

शार्ङ्गरव—(क्रोध से लौटकर) क्यों दुष्टे! क्या तू मनमानी करना चाहती है?

(शकुन्तला भय से काँप उठती है)

शार्ङ्गरव—शकुन्तला!

यदि राजा की बात सत्य है तो तुझ जैसी कुल-कलंकिनी का पिता के घर जाने का कोई काम नहीं है और यदि तू अपने को पवित्र समझती है तो तुझे दासी बनकर भी अपने पति के घर में ही रहना चाहिए॥ २७॥

बस अब तू यहीं रह, हम लोग जाते हैं।

राजा—तपस्वी! आप इसे क्यों धोखे में डाल रहे हैं?

क्योंकि जैसे चन्द्रमा केवल कुमुदों को और सूर्य केवल कमलों को ही खिलाता है, वैसे ही जितेन्द्रिय लोग अपनी स्त्री को ही अपनाते हैं। पराई स्त्री को वे छूना भी नहीं चाहते॥ २८॥

शार्ङ्गरव—जब आप अपनी रानियों के पास आकर अन्य पिछली बातें भूल सकते हैं, तब आपको अधर्म से क्या डर है?

राजा—(पुरोहित से) अब मैं आपसे ही पूछता हूँ कि ऐसी दुविधा में मुझे क्या करना चाहिए।

या तो मैं भूल गया हूँ या ये झूठ कह रही हैं। अब मैं अपनी पत्नी को छोड़ने का पाप करूँ अथवा पराई स्त्री को छूने का पाप सिर पर लूँ॥ २९॥

पुरोहित—(सोचकर) जब ऐसी दुविधा है तो आप ऐसा कीजिये।

राजा—बतलाइये।

पुरोहित—सन्तति होने के समय तक ये मेरे घर रहे। यदि आप पूछें क्यों? तो इसलिए कि आपको ऋषियों ने पहले ही आशीर्वाद दे दिया है कि आपको चक्रवर्ती पुत्र उत्पन्न होगा। यदि कण्वमुनि

साधुभिरुद्दिष्टः प्रथममेव चक्रवर्तिनं पुत्रं जनयिष्यसीति। स चेन्मुनिदौहित्रस्तल्लक्षणोपपन्नो भविष्यति, अभिनन्द्य शुद्धान्तमेनां प्रवेशयिष्यसि। विपर्यये तु पितुरस्याः समीपनयनमवस्थितमेव।

राजा—यथा गुरुभ्यो रोचते।

पुरोहितः—वत्से! अनुगच्छ माम्।

शकुन्तला—भअवदि वसुहे! देहि मे विवरं। [भगवति वसुधे! देहि मे विवरम्।] (इति रुदती प्रस्थिता, निष्क्रान्ता सह पुरोधसा तपस्विभिश्च)

(राजा शापव्यवहितस्मृतिः शकुन्तलागतमेव चिन्तयति)

(नेपथ्ये)

आश्चर्यम् आश्चर्यम्।

राजा—(आकर्ण्य) किं नु खलु स्यात्?

(प्रविश्य)

पुरोहितः—(सविस्मयम्) देव! अद्भुतं खलु संवृत्तम्।

राजा— किमिव?

पुरोहितः—देव! परावृत्तेषु कण्वशिष्येषु—

सा निन्दन्ती स्वानि भाग्यानि बाला बाहूत्क्षेपं क्रन्दितुं च प्रवृत्ता।

राजा—किं च?

पुरोहितः—

स्त्रीसंस्थानं चाप्सरस्तीर्थमारादुत्क्षिप्यैनां ज्योतिरेकं जगाम॥ ३०॥

के नाती में चक्रवर्ती के लक्षण मिल जायें, तब तो इन्हें आदर के साथ रनिवास में रख लीजियेगा और यदि लक्षण न मिलें तो बाद में इन्हें इनके पिता के घर भेज दिया जायेगा।

राजा—जैसा गुरुजी ठीक समझें।

पुरोहित—वत्से! आओ, मेरे साथ चलो।

शकुन्तला—भगवती वसुन्धरे! तू फट जा और मुझे अपनी गोद में ले ले।

(रोती हुई शकुन्तला पुरोहित और ऋषियों के पीछे-पीछे चलती है)

(शाप के कारण भूला हुआ राजा शकुन्तला के ही बारे में सोचता है)

(नेपथ्य में)

आश्चर्य है! आश्चर्य है!

राजा—(सुनते हुए) अरे, क्या हुआ?

(प्रवेश कर)

पुरोहित—(आश्चर्य से) महाराज! बड़ी ही अद्भुत घटना हुई।

राजा—वह क्या?

पुरोहित—महाराज! कण्व के शिष्यों के चले जाने पर
वह ऋषिकन्या जैसे ही अपने भाग्य को कोसती हुई बाँहें फैलाकर रोने लगी—

राजा—तब क्या हुआ?

पुरोहित—वैसे ही स्त्री सरीखी एक ज्योति आकाश से उतरी और उसे अपनी गोद में लेकर अप्सरा तीर्थ की ओर चली गई॥ ३०॥

(सर्वे विस्मयं रूपयन्ति)

राजा—भगवन्! प्रागपि सोऽस्माभिरर्थः प्रत्यादिष्ट एव। किं वृथा तर्केणान्विष्यते। विश्राम्यतु भवान्।

पुरोहितः—(विलोक्य) विजयस्व। (इति निष्क्रान्तः)

राजा— वेत्रवति! पर्याकुलोऽस्मि। शयनभूमिमार्गमादेशय।

प्रतीहारी—इदो इदो देवो। [इत इतो देवः।] (इति प्रस्थिता)

राजा— कामं प्रत्यादिष्टां स्मरामि न परिग्रहं मुनेस्तनयाम्।
बलवत्तु दूयमानं प्रत्याययतीव मे हृदयम्॥ ३१॥

(इति निष्क्रान्ताः सर्वे)

इति पञ्चमोऽङ्कः।

(सभी आश्चर्य प्रकट करते हैं)

राजा—भगवन्! हमने तो उसे पहले ही छोड दिया है। इसलिए उसके विषय में कुछ सोचना व्यर्थ है। अब आप जाकर विश्राम करें।

पुरोहित—(देखकर) महाराज की विजय हो। (चला जाता है)

राजा—वेत्रवती! मै व्याकुल-सा हो गया हूँ। मुझे शयनकक्ष तक पहुँचा दो।

प्रतीहारी—इधर से आइए महाराज, इधर से। (राजा चलता है)

राजा—यद्यपि विवाह की सुधि न होने से मैंने उस मुनिकन्या का अत्यन्त तिरस्कार कर दिया है। तथापि मेरा कचोटता हुआ हृदय न जानें क्यों रह-रहकर उसकी बातों पर विश्वास करने को विवश कर रहा है॥ ३१॥

(सभी चले जाते हैं)

पाँचवाँ अंक समाप्त।

षष्ठोऽङ्कः

(ततः प्रविशति नागरिकः श्यालः पश्चाद्बद्धं पुरुषमादाय रक्षिणौ च)

रक्षिणौ—(ताडयित्वा) अले कुंभीलआ! कहेहि कहिं तुए एशे मणिबंधणुक्किण्णणामहेए लाअकीए अंगुलीअए शमाशादिए? [अरे-कुम्भीरक! कथय कुत्र त्वयैतन्मणिबन्धनोत्कीर्णनामधेयं राजकीयमङ्गुलीयकं समासादितम्?]

पुरुषः—(भीतिनाटितकेन) पशीदंतु भावमिश्शे। हगे ण ईदिशकम्मकाली। [प्रसीदन्तु भावमिश्राः। अहं नेदृशकर्मचारी।]

प्रथमः—किं शोहणे बम्हणो त्ति कलिअ रज्जा पडिग्गहे दिण्णे? [किं शोभनो ब्राह्मण इति कलयित्वा राज्ञा प्रतिग्रहो दत्तः?]

पुरुषः—सुणुध दाणिं। हगे शक्कावदालब्भंतरालवाशी धीवले। [शृणुतेदानीम्। अहं शक्रावताराभ्यन्तरालवासी धीवरः।]

द्वितीयः—पाडच्चल! किं अम्हेहिं जादी पुच्छिदा? [पाटच्चर! किमस्माभिर्जातिः पृष्टाः?]

श्यालः—सूअअ! कहेदु शव्वं अणुक्कमेण। मा णं अंतरा पडिबंधह। [सूचक! कथयतु सर्वमनुक्रमेण। मैनमन्तरा प्रतिबन्धय।]

उभौ—जं आवुत्तो आणवेदि। कहेहि। [यदावुत्त आज्ञापयति। कथय।]

पुरुषः—अहके जालुग्गालादिहिं मच्छबंधणोवाएहिं कुडुंबभलणं कलेमि। [अहं जालोद्गालादिभिर्मत्स्यबन्धनोपायैः कुटुम्बभरणं करोमि।]

श्यालः—(विहस्य) विशुद्धो दाणिं आजीवो। [विशुद्ध इदानीमाजीवः।]

पुरुषः—भट्टा! मा एव्वं भण। [भर्तः! मैवम् भण।]

(राजा का साला नगर-रक्षक (कोतवाल) और उसके पीछे-पीछे दो सिपाही एक पुरुष को बाँधे हुए प्रवेश करते हैं)

दोनों सिपाही—**(बन्दी को पीटते हुए)** अरे चोर! यह राजा के नाम से अंकित रत्न-जडी अँगूठी तुझे कहाँ मिली?

पुरुष—**(डरने का अभिनय करता हुआ)** हे मालिक, मुझ पर दया कीजिए। मैं ऐसा चोरी का काम कभी नहीं करता।

पहला सिपाही—तो क्या तुझे कोई सुपात्र ब्राह्मण समझकर राजा ने यह अँगूठी दान में दी है?

पुरुष—सुनिए तो सही। मैं शक्रावतार गाँव के पास का निवासी एक धीवर (मछुआ) हूँ।

दूसरा सिपाही—अरे चोर! क्या हम तेरी जाति पूछते हैं?

श्याल—सूचक! इसे सब बातें ठीक से कहने दो, बीच में मत टोको।

दोनों—जैसी आपकी आज्ञा। हाँ बतला।

पुरुष—मैं जाल-कँटिया आदि से मछली फँसाता हूँ और उसी से अपने बाल-बच्चों का भरण-पोषण करता हूँ।

श्याल—**(हँसकर)** बड़ी अच्छी जीविका है तुम्हारी।

पुरुष—मालिक! ऐसा न कहिए।

सहजे किल जे विणिंदए ण हु दे कम्म विवज्जणीअए।
पशुमालणकम्मदालुणे अणुकंपामिदु एव्व शोत्तिए॥ १॥
[सहजं किल यद्विनिन्दितं न खलु तत्कर्म विवर्जनीयम्।
पशुमारणकर्मदारुणोऽनुकम्पामृदुरेव श्रोत्रियः॥]

श्यालः—तदो तदो ? [ततस्ततः ?]

पुरुषः—एक्कश्शिं दिअशे खंडशो लोहिअमच्छे मए कप्पिदे। जाव तश्श उदलब्भंतले एदं लंदणभाशुलं अंगुलीअअं देक्खिअ पच्छा अहके शे विक्कआअ दंशअंते गहीदे भावमिश्शेहिं। मालेह वा मुंचेह वा। अअं शे आअमवुत्तंते। [एकस्मिन्दिवसे खण्डशो रोहितमत्स्यो मया कल्पितः। यावत् तस्योदराभ्यन्तर इदं रत्नभासुरमङ्गुलीयकं दृष्ट्वा पश्चादहं तस्य विक्रयाय दर्शयन्गृहीतो भावमिश्रैः॥ मारयत वा मुञ्चत वा। अयमस्यागमवृत्तान्तः।]

श्यालः—जाणुअ! विस्सगंधी गोहादी मच्छबंधो एव्व णिस्संसअं। अंगुलीअअदंसणं शे विमरिसिदव्वं। राअउलं एव्व गच्छामो। [जानुक! विस्रगन्धी गोधादी मत्स्यबन्ध एव निःसंशयम्। अङ्गुलीयकदर्शनमस्य विमर्शयितव्यम्। राजकुलमेव गच्छामः।]

रक्षिणौ—तह। गच्छ अले गंडभेदअ! [तथा। गच्छ अरे गण्डभेदक!]

(सर्वे परिक्रामन्ति)

श्यालः—सूअअ! इमं गोपुरदुआरे अप्पमत्ता पडिवालह जाव इमं अंगुलीअअं जहागमणं भट्टिणो णिवेदिअ तदो सासणं पडिच्छिअ णिक्कमामि। [सूचक! इमं गोपुरद्वारेऽप्रमत्तौ प्रतिपालयतं यावदिदमङ्गुलीयकं यथाऽऽगमनं भर्तुर्निवेद्य ततः शासनं प्रतीक्ष्य निष्क्रमामि।]

उभौ—पविशदु आवुत्ते शामिपशादश्श। [प्रविशत्वावुत्तः स्वामिप्रसादाय।]

(इति निष्क्रान्तः श्यालः)

जिस जाति को भगवान् ने जो बुरा या भला काम दे दिया है, वह छोड़ा नहीं जाता। देखिए, पशुओं को मारना बडा बुरा काम है, किन्तु बड़े-बड़े दयालु और वेद जाननेवाले ब्राह्मण भी यज्ञ के लिए पशुओं का वध करते हैं॥ १॥

श्याल—अच्छा, आगे बतला।

पुरुष—एक दिन मैंने एक रोहू मछली काटी। उसके पेट में यह रत्न-जडी चमकीली अँगूठी दीख गई। इसे बेचने के लिए लाकर मैं दिखला ही रहा था कि आपने मुझे बाँध लिया। यही इस अँगूठी के मिलने की कहानी है। अब आप चाहे मुझे मारिए, चाहे छोडिए।

श्याल—जानुक! निःसन्देह यह गोह खानेवाला मछुआ ही है। क्योंकि इसके शरीर से कच्चे मांस की दुर्गन्ध आ रही है। यह जो अँगूठी मिलने की बात बतला रहा है, उसकी चलकर ठीक-ठीक जाँच कर लेनी चाहिए। अतएव चलो, इसे राजा के ही पास ले चलें।

दोनों—बहुत अच्छा। चल रे गिरहकट! चल।

(सभी घूमते हैं)

श्याल—सूचक! जब तक मैं महाराज को अँगूठी मिलने का समाचार सुना कर और उनकी आज्ञा लेकर न लौटूँ, तब तक तुम दोनों नगर के फाटक पर भलीभाँति इसकी चौकसी करना।

दोनों—स्वामी की कृपा पाने के लिए आप जाइए।

(श्याल जाता है)

प्रथमः—जाणुअ ! चिलाअदि क्खु आवुत्ते। [जानुक! चिरायते खल्वावुत्तः।]

द्वितीयः—णं अवशलोवशप्पणीआ लाआणो। [नन्ववसरोपसर्पणीया राजानः।]

प्रथमः—जाणुअ ! फुल्लंति मे हत्था इमश्श वहस्स शुमणा पिणद्धुं। [जानुक! प्रस्फुरतो मम हस्तावस्य वधस्य सुमनसः पिनद्धुम्।] (इति पुरुषं निर्दिशति)

पुरुषः—ण अलुहदि भावे अकालणमालणं भविदुं। [नार्हति भावोऽकारणमारणं भवितुम्।]

द्वितीयः—(विलोक्य) एशे अम्हाणं शामी पत्तहत्थे लाअशाशणं पडिच्छिअ इदोमुहे देक्खीअदि। गिद्धवली भविश्शशि, शुणो मुहं वा देक्खिश्शशि। [एष नः स्वामी पत्रहस्तो राजशासनं प्रतीक्ष्येतोमुखो दृश्यते। गृध्रबलिर्भविष्यसि, शुनो मुखं वा द्रक्ष्यसि।]

(प्रविश्य)

श्यालः—सूअअ ! मुंजेदु ऐसो जालोअजीवी। उववण्णो क्खु अंगुलीअअस्स आअमो। [सूचक! मुच्यतामेष जालोपजीवी। उपपन्नः खल्वङ्गुलीयकस्यागमः।]

सूचकः—जह आवुत्ते भणादि। [यथाऽऽवुत्तो भणति।]

द्वितीयः—एशे जमशदणं पविशिअ पडिणिवुत्ते। [एष यमसदनं प्रविश्य प्रतिनिवृत्तः।] (इति पुरुषं परिमुक्तबन्धनं करोति)

पुरुषः—(श्यालं प्रणम्य) भट्टा ! अह कीलिशे मे आजीवे ? [भर्तः ! अथ कीदृशो मे आजीवः ?]

श्यालः—एसो भट्टिणा अंगुलीअअमुल्लसम्मिदो पसादो वि दाविदो। [एष भर्त्राङ्गुलीयक-मूल्यसम्मितः प्रसादोऽपि दापितः।] (इति पुरुषाय स्वं प्रयच्छति)

पुरुषः—(सप्रणामं प्रतिगृह्य) भट्टा ! अणुग्गहीद म्हि। [भर्तः ! अनुगृहीतोऽस्मि।]

सूचकः—एशे णाम अणुग्गहे जे शूलादो अवदालिअ हत्थिक्कंधे पडिट्ठाविदे। [एष नामानुग्रहो यच्छूलादवतार्य हस्तिस्कन्धे प्रतिष्ठापितः।]

पहला—जानुक! उन्होंने तो बड़ी देर लगा दी।

दूसरा—अरे भाई! राजा के पास अवसर देखकर ही तो जाया जाता है।

पहला—जानुक! इसे लाल फूलों की माला पहनाकर फाँसी के तख्ते पर चढाने के लिए मेरे हाथ फडक रहे हैं। (मछुए की ओर संकेत करता है)

पुरुष—भाई, अकारण तुम मुझे क्यों मारने को उद्यत हो ?

दूसरा—(देखकर) वह देखो! हमारे स्वामी हाथ में राजा का आज्ञापत्र लिये चले आ रहे हैं। अब या तो तू गिद्धों का भोजन बनेगा या कुत्तों से नोचवाया जायेगा।

(प्रवेश कर)

श्याल—सूचक! छोड़ दो, इस मछुए को। अँगूठी मिलने का ठीक-ठीक पता चल गया।

सूचक—जैसी स्वामी की आज्ञा।

दूसरा—अरे, यह तो यमराज के घर जाकर लौट आया। (उसका बन्धन खोलता है)

पुरुष—(श्याल को प्रणाम कर) कहिए स्वामी! मेरी जीविका कैसी निकली ?

श्याल—महाराज ने इस अँगूठी के दाम के बराबर धन भी तुझे प्रसादरूप में दिया है। (मछुए को धन देता है)

पुरुष—(हाथ जोड़कर धन लेता है) मालिक! आपकी बड़ी दया है।

सूचक—वास्तव में दया तो इसी का नाम है कि तुझे शूली से उतारकर हाथी की पीठ पर बैठा दिया गया है।

जानुकः—आवुत्त ! पलिदोशं कहेहि। तेण अंगुलीअएण भट्टिणो शम्मदेण होदव्वं। [आवुत्त! परितोषं कथय। तेनाङ्गुलीयकेन भर्तुः सम्मतेन भवितव्यम्।]

श्यालः—ण तस्सिं महारुहं रदणं भट्टिणो वहुमदं त्ति तक्केमि। तस्स दंसणेण भट्टिणो अभिमदो जणो सुमराविदो। मुहुत्तअं पकिदिगंभीरो वि पज्जुस्सुअणअणो आसि। [न तस्मिन्महार्हं रत्नं भर्तुर्बहुमतमिति तर्कयामि। तस्य दर्शनेन भर्तुरभिमतो जनः स्मारितः। मुहूर्तं प्रकृतिगम्भीरोऽपि पर्युत्सुकनयन आसीत्।]

सूचकः—शेविदं णाम आवुत्तेण। [सेवितं नामावुत्तेन।]

जानुकः—णं भंणाहि। इमश्श कए मच्छिआभत्तुणो त्ति। [ननु भण। अस्य कृते मात्स्यिकभर्तुरिति।] (इति पुरुषमसूयया पश्यति)

पुरुषः—भट्टालक ! इदो अद्धं तुम्हाणं शुमणोमुल्लें होदु। [भट्टारक! इतोऽर्धं युष्माकं सुमनोमूल्यं भवतु।]

जानुकः—एत्तके जुज्जइ। [एतावद्युज्यते।]

श्यालः—धीवर ! महत्तरो तुमं पिअवअस्सओ दाणिं मे संवुत्तो। कादंवरीसक्खिअं अम्हाणं पढमसोहिदं इच्छीअदि। ता सोंडिआपणं एव्व गच्छामो। [धीवर! महत्तरस्त्वं प्रियवयस्यक इदानीं मे संवृत्तः। कादम्वरीसाक्षिकमस्माकं प्रथमसौहृदमिष्यते। तच्छौण्डिकापणमेव गच्छामः।]

(इति निष्क्रान्ताः सर्वे)

॥ प्रवेशकः ॥

(ततः प्रविशत्याकाशयानेन सानुमती नामाप्सराः)

सानुमती—णिव्वट्टिदं मए पज्जाअणिव्वत्तणिज्जं अच्छरातित्थसण्णिज्झं जाव साहुजणस्स अभिसेअकालो त्ति। संपदं इमस्स राएसिणो उदंतं पच्चक्खीकरिस्सं। मेणआसंबंधेण सरीरभूदा मे

जानुक—इसे प्रसाद नहीं, पारितोषिक कहिए स्वामी! जान पडता है कि वह अँगूठी महाराज को बडी अच्छी लगी है।

श्याल—उस अँगूठी के बहुमूल्य रत्न के कारण महाराज ने उसका आदर नहीं किया। बल्कि उसे देखते ही उन्हें अपने किसी प्रियजन का स्मरण हो आया है। यद्यपि महाराज स्वभावतः बड़े गम्भीर हैं। फिर भी वह अँगूठी देखकर वे थोडी देर के लिए अनमने-से हो गये।

सूचक—तब तो आपने राजा का बहुत बड़ा काम किया है।

जानुक—ऐसा कहो कि इस मछुए ने राजा का वह काम किया है। (मछुए को ईर्ष्याभरी दृष्टि से देखता है)

पुरुष—मालिक! इस धन में से आधा आप भी अपने पान-फूल के लिए ले लीजिए।

जानुक—यह तो उचित ही है।

श्याल—मछुए! आज से तुम हमारे बड़े प्यारे मित्र हो गये। चलो, हम तुम चलें और मदिरा के आगे अपनी मित्रता पक्की कर लें। तो चलो, मदिरालय में ही चला जाय।

(सभी चले जाते हैं)

॥ प्रवेशक ॥

(आकाश में विमान पर आरूढ सानुमती नाम की अप्सरा का प्रवेश)

सानुमती—साधुजनों के स्नान के समय इस अप्सरा-तीर्थ की देखभाल करने की आज मेरी वारी

सउंदला। ताए अ दुहिदुणिमित्तं आदिट्ठपुव्व म्हि। (समन्तादवलोक्य) किं णु खु उदुच्छवे वि णिरुच्छवारंभं विअ राअउलं दीसइ। अत्थि मे विहवो पणिधाणेण सव्वं परिण्णादुं। किं दु सहीए आदरो मए माणइदव्व होदु। इमाणं एव्व उज्जाणपालिआणं तिरक्खरिणीपडिच्छण्णा पस्सवत्तिणी भविअ उवलहिस्सं। [निर्वर्तितं मया पर्यायनिर्वर्तनीयमप्सरस्तीर्थसान्निध्यं यावत्साधुजनस्याभिषेककाल इति। साम्प्रतमस्य राजर्षेरुदन्तं प्रत्यक्षीकरिष्यामि। मेनकासम्बन्धेन शरीरभूता मे शकुन्तला। तया च दुहितृनिमित्तमादिष्टपूर्वाऽस्मि। किं नु खलु ऋतूत्सवेऽपि निरुत्सवारम्भमिव राजकुलं दृश्यते। अस्ति मे विभवः प्रणिधानेन सर्वं परिज्ञातुम्। किं तु सख्या आदरो मया मानयितव्यः। भवतु; अनयोरेवोद्यान-पालिकयोस्तिरस्करिणीप्रतिच्छन्ना पार्श्ववर्तिनी भूत्वोपलप्स्ये।] (इति नाट्येनावतीर्य स्थिता)

(ततः प्रविशति चूताङ्कुरमवलोकयन्ती चेटी; अपरा च पृष्ठतस्तस्याः)

प्रथमा—आतम्महरिअपंडुर जीविदसव्वं वसंतमासस्स।
दिट्ठो सि चूदकोरअ! उदुमंगल! तुमं पसाएमि॥ २॥

[आताम्रहरितपाण्डुर जीवितसर्वं वसन्तमासस्य।
दृष्टोऽसि चूतकोरक! ऋतुमङ्गल! त्वां प्रसादयामि॥]

द्वितीया—परहुदिए! किं एआइणी मंतेसि? [परभृतिके! किमेकाकिनी मन्त्रयसे?]

प्रथमा—महुअरिए! चूदकलिअं देक्खिअ उम्मतिआ परहुदिआ होदि। [मधुकरिके! चूतकलिकां दृष्ट्वोन्मत्ता परभृतिका भवति।]

द्वितीया—(सहर्षं त्वरयोपगम्य) कहं उवट्ठिदो महुमासो? [कथमुपस्थितो मधुमासः?]

प्रथमा—महुअरिए! तव दाणिं कालो एसो मदविब्भमगीदाणं। [मधुकरिके! तवेदानीं काल एष मदविभ्रमगीतानाम्।]

द्वितीया—सहि! अवलंब्ब मं जाव अग्गपादट्ठिआ भविअ चूदकलिअं गेण्हिअ कामदेवच्चणं करेमि। [सखि! अवलम्ब्यस्व मां यावदग्रपादस्थिता भूत्वा चूतकलिकां गृहीत्वा कामदेवार्चनं करोमि।]

थी। वह काम तो कर चुकी। अब चलकर अपनी आँखों से उस राजर्षि की दशा तो देख लूँ। क्योंकि मेनका की कन्या होने के नाते शकुन्तला मेरी भी कन्या ही हुई। उसी मेनका ने अपनी कन्या के लिए कुछ उपाय करने को मुझे पहले से ही कह रक्खा है। (चारों ओर देखकर) अरे वसन्तोत्सव का दिन आ पहुँचा और यहाँ राजभवन में एकदम सन्नाटा छाया हुआ है। यद्यपि दिव्यदृष्टि से मैं सब कुछ देख सकती हूँ, तथापि अपनी सखी की बात तो रखनी ही होगी। अच्छा, तिरस्करिणी विद्या के द्वारा अपने को छिपाकर इन मालिनों के साथ-साथ चलकर समीप से यहाँ का सब समाचार लेती हूँ। (विमान से उतरने का अभिनय करके खड़ी हो जाती है)

(इसके बाद आम की बौर देखती हुई एक दासी आती है। उसके पीछे दूसरी दासी है)

पहली—हे वसन्त ऋतु के जीवनसर्वस्व! हे वसन्त के मंगल स्वरूप! हे लाल, हरे और पीले रंगवाले बौर! आज पहले-पहल तुम्हारा दर्शन हो रहा है। तुम हम पर प्रसन्न होओ॥ २॥

दूसरी—अरी परभृतिके (कोयल)! तू अकेले-अकेले क्यों कूकती है?

पहली—मधुकरिके (भौंरी)! आम की बौर देखकर परभृतिका मतवाली हो ही जाती है।

दूसरी—(उल्लास से भरी हुई शीघ्रता से पास आती है) क्या वसन्त आ गया?

पहली—मधुरिके (भौंरी)! तेरे भी तो मस्तीभरे गीत गाने के ये ही दिन हैं।

दूसरी—सखी! तू यदि मुझे सहारा दे तो अपने पञ्जों के बल खड़ी होकर कामदेव की पूजा के लिए कुछ आम की बौर तोड़ लूँ।

प्रथमा—जइ मम वि क्खु अद्धं अच्चणफलस्स। [यदि ममापि खल्वर्धमर्चनफलस्य।]

द्वितीया—अकहिदे वि एदं संपज्जइ, जदो एक्कं एव्व णो जीविदं दुधा ट्ठिदं सरीरं। (सखीमवलम्व्य स्थिता चूताङ्कुरं गृह्णाति) अए अप्पडिबुद्धो वि चूदप्पसवो एत्थ बंधणभंगसुरभी होदि। (इति कपोतहस्तकं कृत्वा) [अकथितेऽप्येतत्सम्पद्यते, यत एकमेव नौ जीवितं द्विधा स्थितं शरीरम्। अये! अप्रतिबुद्धोऽपि चूतप्रसवोऽत्र बन्धनभङ्गसुरभिर्भवति।]

तुमं सि मए चूदंकुर दिण्णो कामस्य गहीदधणुअस्स।
पहिअजणजुवइलक्खो पंचब्भहिओ सरो होहि॥ ३॥
[त्वमसि मया चूताङ्कुर दत्तः कामाय गृहीतधनुषे।
पथिकजनयुवतिलक्ष्यः पञ्चाभ्यधिकः शरो भव॥]

(इति चूताङ्कुरं क्षिपति)

(प्रविश्यापटीक्षेपेण कुपितः)

कञ्चुकी—मा तावत्। अनात्मज्ञे! देवेन प्रतिषिद्धे वसन्तोत्सवे त्वमाम्रकलिकाभङ्गं किमारभसे?

उभे—(भीते) पसीददु अज्जो। अग्गहीदत्थाओ वअं। [प्रसीदत्वार्यः। अगृहीतार्थे आवाम्।]

कञ्चुकी—न किल श्रुतं युवाभ्यां यद्वासन्तिकैस्तरुभिरपि देवस्य शासनं प्रमाणीकृतं तदाश्रयिभिः पत्रिभिश्च। तथा हि—

चूतानां चिरनिर्गताऽपि कलिका बध्नाति न स्वं रजः
सन्नद्धं यदपि स्थितं कुरबकं तत्कोरकावस्थया।
कण्ठेषु स्खलितं गतेऽपि शिशिरे पुंस्कोकिलानां रुतं
शङ्के संहरति स्मरोऽपि चकितस्तूणार्धकृष्टं शरम्॥ ४॥

पहली—यदि पूजन का आधा फल मुझे भी मिले तो सहारा दूँ।

दूसरी—वह तो बिना कहे ही मिल जायेगा। क्योंकि हम-तुम तो दो शरीर और एक प्राण हैं। (सखी के सहारे से आम के बौर तोड़ती है) वाह! यद्यपि अभी बौर अच्छी तरह खिल नहीं पाया है, तथापि डाल से तोडते ही कैसी सुगन्ध फूट रही है। (अञ्जलि बाँधकर)

अरी आम की मञ्जरी! मैं तुझे धनुषधारी कामदेव को भेंट करती हूँ। परदेश में गये हुए लोगों की युवती स्त्रियों को काम-पीडा देने के लिए तुम कामदेव के पाँचों बाणों में सबसे अधिक पैने बाण बन जाओ॥ ३॥

(आम की मञ्जरी डाल देती है)

(सहसा परदा उठाकर क्रोध में कञ्चुकी का प्रवेश)

कञ्चुकी—हैं, हैं। यह क्या कर रही हो नासमझ बालिकाओ! जब महाराज ने इस वर्ष वसन्तोत्सव स्थगित कर दिया है, तब तुम लोग आम की मञ्जरी क्यों तोड़ रही हो?

दोनों—(डरकर) क्षमा कीजिए आर्य! हमें इसका ज्ञान नहीं था।

कञ्चुकी—क्या तुम लोगों ने यह नहीं सुना कि वसन्त में फूलने-फलनेवाले वृक्षों ने भी महाराज की आज्ञा मान ली है। देखो—

आम की बौर बहुत पहले ही फूट आयी थीं, परन्तु उनमें पराग अब तक नहीं आ पाया है। कुरबक का फूल खिलना ही चाहता था, पर अभी ज्यों-का-त्यों बँधा पडा है। जाडा बीत जाने पर

सानुमती—णत्थि संदेहो। महाप्पहाओ राएसी। [नास्ति सन्देहः। महाप्रभावो राजर्षिः।]

प्रथमा—अज्ज ! कति दिअहाइं अम्हाणं मित्तावसुणा रट्ठिएण भट्टिणीपाअमूलं पेसिदाणं ? एत्थ अ णो पमदवणस्स पालणकम्म समप्पिदं। ता आअंतुअदाए अस्सुदपुव्वो अम्हेहिं एसो वुत्तंतो। [आर्य! कति दिवसान्यावयोर्मित्रावसुना राष्ट्रियेण भट्टिनीपादमूलं प्रेषितयोः ? अत्र च नौ प्रमदवनस्य पालनकर्म समर्पितम्। तदागन्तुकतयाऽश्रुतपूर्व आवाभ्यामेष वृत्तान्तः।]

कञ्चुकी—भवतु। न पुनरेवं प्रवर्तितव्यम्।

उभे—अज्ज ! कोदूहलं णो। जइ इमिणा जणेण सोदव्वं कहेदु अज्जो किं णिमित्तं भट्टिणा वसंतुस्सवो पडिसिद्धो। [आर्य! कौतूहलं नौ। यद्यनेन जनेन श्रोतव्यं कथयत्वार्यः किन्निमित्तं भर्त्रा वसन्तोत्सवः प्रतिषिद्धः।]

सानुमती—उस्सवप्पिआ खु मणुस्सा। गुरुणा कारणेण होदव्वं। [उत्सवप्रियाः खलु मनुष्याः। गुरुणा कारणेन भवितव्यम्।]

कञ्चुकी—बहुलीभूतमेतत्किं न कथ्यते। किमत्रभवत्योः कर्णपथं नायातं शकुन्तलाप्रत्यादेश-कौलीनम् ?

उभे—सुदं रट्ठिअमुहादो जाव अंगुलीअदंसणं। [श्रुतं राष्ट्रियमुखाद्यावदङ्गुलीयकदर्शनम्।]

कञ्चुकी—(आत्मगतम्) तेन ह्यल्पं कथयितव्यम्। (प्रकाशम्) यदैव खलु स्वाङ्गुलीयक-दर्शनादनुस्मृतं देवेन सत्यमूढपूर्वा मे तत्रभवती रहसि शकुन्तला मोहात्प्रत्यादिष्टेति। तदाप्रभृत्येव पश्चात्तापमुपगतो देवः। तथा हि—

रम्यं द्वेष्टि यथा पुरा प्रकृतिभिर्नं प्रत्यहं सेव्यते
शय्याप्रान्तविवर्तनैर्विगमयत्युन्निद्र एव क्षपाः।

भी कोयल की कूक उनके गले तक आकर रुक गई है। मुझे तो ऐसा लग रहा है कि कामदेव भी अपने तूणीर से आधा बाण निकालता है और फिर डरकर उसी में रख लेता है॥ ४॥

सानुमती—इसमें कोई सन्देह नहीं है। राजर्षि का बडा भारी प्रताप है।

पहली—आर्य! नगर-रक्षक मित्रावसु ने हमलोगों को अभी कुछ ही दिन पहले महारानी की सेवा में प्रमदवन की रखवाली करने के लिए भेजा है। अतएव अजनबी होने के कारण हम लोगों को इस बात का ज्ञान ही नहीं था।

कञ्चुकी—अच्छा, फिर कभी ऐसा न करना।

दोनों—आर्य! हमें भी यह बात सुनने की बडी इच्छा है। यदि सुनाने में आपत्ति न हो तो कृपा करके बतला दीजिए कि इस वर्ष महाराज ने वसन्तोत्सव किस कारण से रोक दिया है।

सानुमती—मनुष्यों को तो उत्सव प्रिय होते हैं। उत्सव रोक देने का कोई बहुत बड़ा कारण होगा।

कञ्चुकी—अच्छा, यह बात जब चारों ओर फैल ही गयी है, तब मैं भी क्यों न कह डालूँ? क्या शकुन्तला के छोडे जाने की बात तुम लोगों ने नहीं सुनी है ?

दोनों—हाँ, राजा को अँगूठी मिलने तक की बात तो नगर-रक्षक के मुँह से हमने सुनी है।

कञ्चुकी—(मन ही मन) तब तो बहुत थोड़ा-सा हाल सुनाना बाकी है। (प्रकट में) उस अँगूठी को देखते ही महाराज को स्मरण हो आया कि मैंने एकान्त में शकुन्तला से विवाह किया था और भूल से अब उसे त्याग दिया है। तभी से राजा को बडा पछतावा हो रहा है। क्योंकि—

दाक्षिण्येन ददाति वाचमुचितामन्तःपुरेभ्यो यदा
गोत्रेषु स्खलितस्तदा भवति च व्रीडाविलक्षश्चिरम्॥ ५॥

सानुमती—पिअं मे। [प्रियं मे।]

कञ्चुकी—अस्मात्प्रभवतो वैमनस्यादुत्सवः प्रत्याख्यातः।

उभे—जुज्जइ। [युज्यते।]

(नेपथ्ये)

एदु एदु भवं। [एतु एतु भवान्।]

कञ्चुकी— (कर्ण दत्त्वा) अये! इत एवाभिवर्तते देवः। स्वकर्मानुष्ठीयताम्।

उभे—तह। [तथा।] (इति निष्क्रान्ते)

(ततः प्रविशति पश्चात्तापसदृशवेषो राजा विदूषकः प्रतीहारी च)

कञ्चुकी—(राजानमवलोक्य) अहो सर्वास्ववस्थासु रमणीयत्वमाकृतिविशेषाणाम्। एवमुत्सुकोऽपि प्रियदर्शनो देवः। तथा हि—

प्रत्यादिष्टविशेषमण्डनविधिर्वामप्रकोष्ठार्पितं
बिभ्रत्काञ्चनमेकमेव वलयं श्वासोपरक्ताधरः।
चिन्ताजागरणप्रतान्तनयनस्तेजोगुणादात्मनः
संस्कारोल्लिखितो महामणिरिव क्षीणोऽपि नालक्ष्यते॥ ६॥

अब उनके मन को न तो कोई सुन्दर वस्तु भाती है और न वे पहले के समान मन्त्रियों के साथ रोज बैठते हैं। पलङ्ग पर करवट बदलते हुए वे जाग-जागकर रात बिता देते हैं। रनिवास की रानियाँ जब उनसे हठ करके इस उदासी का कारण पूछती हैं, तब भूल से उनके मुँह से शकुन्तला नाम निकल जाता है और वे बड़ी देर तक लाज के मारे चुप रह जाते हैं॥ ५॥

सानुमती—यही तो सुनने की मेरी इच्छा थी।

कञ्चुकी—बस, इसी दुःख से वसन्तोत्सव रोक दिया गया है।

दोनों—ऐसा होना ही चाहिए।

(नेपथ्य में)

आइए महाराज, आइए।

कञ्चुकी—**(कान लगाकर)** अरे! महाराज तो इधर आ ही रहे हैं। अब जाओ, तुम लोग अपना-अपना काम करो।

दोनों—बहुत अच्छा। **(दोनों चली जाती हैं)**

(विदूषक और प्रतिहारी के साथ पश्चात्ताप से व्यथित राजा का प्रवेश)

कञ्चुकी—**(राजा को देखकर)** अहा! जो सुन्दर होते हैं, उनकी शोभा सभी दशाओं में अच्छी ही लगती है। देखो, इतने उदास होते हुए भी महाराज कैसे अच्छे लग रहे हैं। क्योंकि—

केवल बायें हाथ के सोने के एक भुजबन्द के सिवाय उन्होंने शोभा बढानेवाले सभी गहने उतार डाले हैं। उनकी उसाँसों से नीचे का ओठ लाल हो गया है और चिन्ता के कारण रात भर जागने से उनकी आँखें भी अलसायी हुई हैं। किन्तु इतना दुःखी होने पर भी वे उसी प्रकार दुबले नहीं लगते, जैसे खराद पर चढ़ाकर काटा हुआ महामणि छोटा हो जाने पर भी अपनी चमक के कारण छोटा नहीं लगता॥ ६॥

सानुमती—(राजानं दृष्ट्वा) ठाणे क्खु पच्चादेसविमाणिदा वि इमस्स किदे सउंदला किलम्मदि त्ति। [स्थाने खलु प्रत्यादेशविमानिताऽप्यस्य कृते शकुन्तला क्लाम्यतीति।]

राजा—(ध्यानमन्दं परिक्रम्य)

प्रथमं सारङ्गाक्ष्या प्रियया प्रतिबोध्यमानमपि सुप्तम्।
अनुशयदुःखायेदं हतहृदयं सम्प्रति विबुद्धम्॥ ७॥

सानुमती—णं ईदिसाणि तवस्सिणीए भाअहेआणि। [नन्वीदृशानि तपस्विन्या भागधेयानि।]

विदूषकः—(अपवार्य) लंघिदो एसो भूओ वि सउंदलावाहिणा। ण आणे कहं चिकिच्छिदव्वो भविस्सदि त्ति। [लङ्घित एष भूयोऽपि शकुन्तलाव्याधिना। न जाने कथं चिकित्सितव्यो भविष्यतीति।]

कञ्चुकी—(उपगम्य) जयतु जयतु देवः। महाराज! प्रत्यवेक्षिताः प्रमदवनभूमयः। यथाकाममध्यास्तां विनोदस्थानानि महाराजः।

राजा—वेत्रवति! मद्वचनादमात्यमार्यपिशुनं ब्रूहि। चिरप्रबोधनान्न सम्भावितमस्माभिरद्य धर्मासनमध्यासितुम्। यत्प्रत्यवेक्षितं पौरकार्यमार्येण तत्पत्रमारोप्य दीयतामिति।

प्रतीहारी—जं देवो आणवेदि। [यद्देव आज्ञापयति।] (इति निष्क्रान्ता)

राजा—वातायन! त्वमपि स्वं नियोगमशून्यं कुरु।

कञ्चुकी—यदाज्ञापयति देवः। (इति निष्क्रान्तः)

विदूषक—किदं भवदा णिम्मच्छिअं। संपदं सिसिरातवच्छेअरमणीए इमस्सिं पमदवणुद्देसे अत्ताणं रमइस्ससि। [कृतं भवता निर्मीक्षिकम्। साम्प्रतं शिशिरातपच्छेदरमणीयेऽस्मिन्प्रमदवनोद्देशे आत्मानं रमयिष्यसि।]

सानुमती—(राजा को देखकर) यद्यपि शकुन्तला को छोडकर इन्होंने उसका बड़ा भारी निरादर किया है, उस पर भी ये इस योग्य हैं कि इनके लिए शकुन्तला का तडपना उचित ही है।

राजा—(चिन्तित दशा में घूमता हुआ)

उस समय जब वह मृग-सदृश नयनोंवाली प्यारी शकुन्तला बार-बार मुझे समझा रही थी, तब तो मेरी आँखें नहीं खुलीं। अब तो केवल पश्चात्ताप का क्लेश सहने के लिए मेरा यह अभागा हृदय जागा है॥ ७॥

सानुमती—क्या करें, बेचारी शकुन्तला के भाग्य ही ऐसे हैं।

विदूषक—(अलग) ओह! एक बार गये हुए शकुन्तला के रोग ने इन्हें फिर आ घेरा, न जाने कैसे यह रोग जायेगा।

कञ्चुकी—(पास जाकर) महाराज की जय हो, जय हो। महाराज! प्रमदवन की भूमि झाड़-बुहार दी गई है। अब आप चलकर जब तक जी चाहे, तब तक उस मनबहलाव की भूमि में विश्राम करें।

राजा—प्रतीहारी! जाकर मेरी जबानी अमात्य आर्य पिशुन से कहना कि आज मैं देर से उठा हूँ। अतः न्याय करने के लिए सभाभवन में मेरा आना असम्भव है। इसलिए प्रजा का जो कुछ भी काम हो, वह आप लिखकर मेरे पास भेज दीजिएगा।

प्रतीहारी— जैसी महाराज की आज्ञा। **(चली जाती है)**

राजा—जाओ वातायन! तुम भी अपना काम करो।

कञ्चुकी—जैसी देव की आज्ञा। **(जाता है)**

विदूषक—अच्छा किया जो आपने यहाँ से सबको हटा दिया। अब आप चलकर उस प्रमदवन में मन बहलाइए, जहाँ न जाड़े की ठंढक है और न गर्मी की तपन।

राजा—वयस्य! यदुच्यते रन्ध्रोपनिपातिनोऽनर्था इति तदव्यभिचारि वचः। कुतः—

मुनिसुताप्रणयस्मृतिरोधिना मम च मुक्तमिदं तमसा मनः।
मनसिजेन सखे! प्रहरिष्यता धनुषि चूतशरश्च निवेशितः॥८॥

विदूषकः—चिट्ठ दाव। इमिणा दंडकट्ठेण कंदप्पवाणं णासइस्सं। [तिष्ठ तावत्। अनेन दण्डकाष्ठेन कन्दर्पबाणं नाशयिष्यामि।] (इति दण्डकाष्ठमुद्यम्य चूताङ्कुरं पातयितुमिच्छति)

राजा—(सस्मितम्) भवतु; दृष्टं ब्रह्मवर्चसम्। सखे! क्वोपविष्टः प्रियायाः किञ्चिदनुकारिणीषु लतासु दृष्टं विलोभयामि।

विदूषकः—णं आसण्णपरिआरिआ चदुरिआ भवदा संदिट्ठा—माहवीमंडवे इमं वेलं अदिवाहिस्सं। तहिं मे चित्तफलअगदं सहत्थलिहिदं तत्तहोदीए सउंदलाए पडिकिदिं आणेहि त्ति। [नन्वासन्नपरिचारिका चतुरिका भवता सन्दिष्टा—माधवीमण्डप इमां वेलामतिवाहयिष्ये। तत्र मे चित्रफलकगतां स्वहस्तलिखितां तत्रभवत्याः शकुन्तलायाः प्रतिकृतिमानयेति।]

राजा—ईदृशं हृदयविनोदनस्थानम्। तत्तमेव मार्गमादेशय।

विदूषकः—इदो इदो भव। [इत इतो भवान्।]

(उभौ परिक्रामतः, सानुमत्यनुगच्छति)

विदूषकः—एसो मणिसिलापट्टअसणाहो माहवीमंडवो उवआररमणिज्जदाए णिस्संसअं साअदेण विअ णो पडिच्छदि। ता पविसिअ णिसीददु भवं। [एष मणिशिलापट्टकसनाथो माधवीमण्डप उपचाररमणीयतया निःसंशयं स्वागतेनेव नौ प्रतीच्छति। तत्प्रविश्य निषीदतु भवान्।]

(उभौ प्रवेशं कृत्वोपविष्टौ)

राजा—वयस्य! बहुत ठीक कहा गया है कि विपत्ति सदा अवसर की प्रतीक्षा में रहती है। क्योंकि—

अभी मेरे मन से शकुन्तला को भुला देनेवाला मोह उतरा ही नहीं था, तभी मुझपर प्रहार करने के लिए अपने धनुष पर आम की बौर का नया बाण चढाकर कामदेव भी आ धमका॥८॥

विदूषक—अच्छा ठहरिए। मैं अभी अपनी लाठी से काम के बाण को नष्ट कर देता हूँ। **(अपना डंडा उठाकर आम की बौर तोड़ना चाहता है)**

राजा—**(हँसते हुए)** अच्छा-अच्छा, रहने दो। देख लिया, तुम्हारा ब्रह्मतेज। अब चलो मित्र, मुझे कोई ऐसी जगह बतलाओ जहाँ बैठकर मैं अपनी प्रिया से कुछ मिलती-जुलती लताओं को देखकर आँखें ठण्डी कर सकूँ।

विदूषक—किन्तु आपने तो अभी दासी चतुरिका को आदेश दिया है कि हम माधवीमण्डप में जाकर जी बहलाते हैं। तुम हमारे हाथ का बनाया हुआ शकुन्तला का चित्र वहाँ लेती आना।

राजा—यदि वह ऐसा मनबहलाव का स्थान है तो मुझे उधर ही ले चलो।

विदूषक—इधर से आइए महाराज, इधर से।

(दोनों घूमते हैं, सानुमती पीछे-पीछे चलती है)

विदूषक—देखिए, फूलों से सजी हुई मणिशिला की सुन्दर चौकी बिछाकर यह माधवीकुंज जैसे आपका स्वागत करने की प्रतीक्षा कर रहा है। तो चलिए वहीं बैठिए।

(दोनों प्रविष्ट होकर बैठते हैं)

सानुमती—लदासंस्सिदा देक्खिस्सं दाव सहीए पडिकिदिं। तदो से भत्तुणो वहुमुहं अणुराअं णिवेदइस्सं। [लतासंश्रिता द्रक्ष्यामि तावत्सख्याः प्रतिकृतिम्। ततोऽस्या भर्तुर्वहुमुखमनुरागं निवेदयिष्यामि।] (इति तथा कृत्वा स्थिता)

राजा—सखे! सर्वमिदानीं स्मरामि शकुन्तलायाः प्रथमवृत्तान्तम्। कथितवानस्मि भवते च। स भवान्प्रत्यादेशवेलायां मत्समीपगतो नासीत्। पूर्वमपि न त्वया कदाचित्सङ्कीर्तितं तत्रभवत्या नाम। कच्चिदहमिव विस्मृतवानसि त्वम्।

विदूषकः—ण विसुमरामि। किंतु सव्वं कहिअ अवसाणे उण तुए परिहासविअप्पओ एसो ण भूदत्थो त्ति आचक्खिदं। मए वि मिप्पिंडवुद्धिणा तह एव्व गहीदं। अहवा भविदव्वदा क्खु वलवदी। [न विस्मरामि। किन्तु सर्वं कथयित्वाऽवसाने पुनस्त्वया परिहासविजल्प एष न भूतार्थ इत्याख्यातम्। मयापि मृत्पिण्डवुद्धिना तथैव गृहीतम्। अथवा भवितव्यता खलु बलवती।]

सानुमती—एव्वं णेदं। [एवं नु एतत्]

राजा—(ध्यात्वा) सखे! त्रायस्व माम्।

विदूषकः—भो! किं एदं? अणुववण्णं क्खु ईदिसं तुइ। कदा वि सप्पुरिसा सोअवत्तव्वा ण होंति। णं पवादे वि णिक्कंपा गिरिओ। [भोः! किमेतत्? अनुपपन्नं खल्वीदृशं त्वयि। कदाऽपि सत्पुरुषाः शोकवक्तव्या न भवन्ति। ननु प्रवातेऽपि निष्कम्पा गिरयः।]

राजा—वयस्य! निराकरणविक्लवायाः प्रियायाः समवस्थामनुस्मृत्य वलवदशरणोऽस्मि। सा हि—

इतः प्रत्यादेशात् स्वजनमनुगन्तुं व्यवसिता
स्थिता तिष्ठेत्युच्चैर्वदति गुरुशिष्ये गुरुसमे।

सानुमती—मैं लता की ओट मे देखती हूँ कि मेरी सखी का चित्र कैसा है। तभी तो मैं जाकर उसे बता सकूँगी कि तुम्हारे पति तुमको कितना प्यार करते हैं। (वैसा ही करती है)

राजा—मित्र! अब शकुन्तला की सभी बातें याद आ रही हैं और तुम्हें तो मैं सब कुछ बता ही चुका हूँ। जब मैंने शकुन्तला को लौटाया था, उस समय न तुम थे और न तुमने वे सब बातें ही स्मरण दिलाई। ऐसा जान पड़ता है कि मेरे ही समान तुम भी भूल गये थे।

विदूषक—मैं भूला नहीं था। किन्तु सब कुछ कहने के बाद आपने अन्त में जब यह कह दिया कि 'ये सब बातें तो हमने हँसी मे कही थीं' तब मेरी मिट्टी की बुद्धि भी वही सच समझ बैठी। या यों कहिए कि होनी बड़ी प्रबल होती है। जो होने वाला होता है, वह होकर ही रहता है।

सानुमती—यही बात है।

राजा—(सोचकर) मित्र! मुझे बचाओ।

विदूषक—अरे, आप यह क्या कह रहे हैं? ऐसा कहना आपको शोभा नहीं देता। सज्जन लोग कभी ऐसे दीन वचन नहीं बोलते। देखिए, आँधी से भी पहाड़ नहीं हिला करते हैं।

राजा—सखे! यहाँ से लौटायी जानेपर मेरी प्रेयसी की जो दशा थी, उसे स्मरण करके मैं आपे में नहीं रह पाता। क्योंकि उस समय—

जब वह यहाँ से लौटा दी गयी, तब अपने साथियों के पीछे-पीछे चलने लगी। उस समय गुरु के समान पूज्य कण्व के शिष्यों ने डाँटकर कहा—तुम यहीं रहो तो वह खड़ी हो गई। उस समय

पुनर्दृष्टिं बाष्पप्रसरकलुषामर्पितवती
मयि क्रूरे यत्तत्सविषमिव शल्यं दहति माम्॥ ९॥

सानुमती—अम्महे, ईदिसी स्वकज्जपरदा। इमस्स संदावेण अहं रमामि। [अहो, ईदृशी वकार्यपरता। अस्य सन्तापेनाहं रमे।]

विदूषकः—भो! अत्थि मे तक्को—केण वि तत्तहोदी आआसचारिणा णीदे त्ति। [भोः! स्ति मे तर्कः—केनापि तत्रभवत्याकाशचारिणा नीतेति।]

राजा—कः पतिदेवतामन्यः परामर्ष्टुमुत्सहेत? मेनका किल सख्यास्ते जन्मप्रतिष्ठेति श्रुतवानस्मि। तत्सहचारिणीभिः सखी ते हृतेति मे हृदयमाशङ्कते।

सानुमती—संमोहो क्खु विम्हअणिज्जो ण पडिबोहो। [सम्मोहः खलु विस्मयनीयो न तिबोधः।]

विदूषकः—जइ एव्वं अत्थि क्खु समाअमो कालेण तत्तहोदीए। [यद्येवमस्ति खलु समागमः कालेन तत्रभवत्या।]

राजा—कथमिव?

विदूषकः—ण क्खु मादापिदरा भत्तुविओअदुक्खिअं दुहिदरं चिरं पेक्खिदुं पारेंति। [न खलु मातापितरौ भर्तृवियोगदुःखितां दुहितरं चिरं द्रष्टुं पारयतः।]

राजा—वयस्य!

स्वप्नो नु माया मतिभ्रमो नु क्लिष्टं नु तावत्फलमेव पुण्यम्।
असंनिवृत्त्यै तदतीतमेते मनोरथा नाम तटप्रपाताः॥ १०॥

आँसूभरी आँखों से मुझ निष्ठुर की ओर उसने जो देखा था, वह मुझे ऐसा सन्तप्त कर रहा है कि जैसे किसी ने विष से बुझे हुए शस्त्र को मेरे शरीर में चुभो दिया हो॥ ९॥

सानुमती—अरे! अपनी करनी पर इतना पछतावा! इनके सन्ताप को देखकर मुझे बड़ा सन्तोष मिल रहा है।

विदूषक—महाराज! मेरी तो ऐसी धारणा है कि देवी शकुन्तला को कोई स्वर्गीय दूत उठा ले गया है।

राजा—अरे, उस पतिव्रता को दूसरा कौन छू सकेगा? पर सुना है कि उसकी माँ मेनका है। मुझे डर है कि कहीं उसकी सखियाँ ही उसको न उठा ले गयी हों।

सानुमती—अब राजा को जो बातें स्मरण हो रही हैं, उन्हें सुनकर मुझे इतना विस्मय नहीं होता, जितना इस बात पर कि उस समय वे भूल कैसे गये।

विदूषक—यदि वास्तव में उसकी सखियाँ ही उसे उठा ले गई होंगी, तब तो थोडे दिनों में मिल ही जायेगी।

राजा—वह कैसे?

विदूषक—माता-पिता पति से बिछुडी हुई अपनी कन्या का दुःख अधिक दिनों तक नहीं देख सकेंगे।

राजा—मित्र! मैं ठीक-ठीक समझ ही नहीं पाता कि शकुन्तला का वह मिलाप सपना था, जादू था, भ्रम था या किसी ऐसे पुण्य का फल था जिसका भोग पूरा हो चुका था। इन बातों ने मेरी सभी आशाओं को पहाड़ से गिराकर चूर-चूर कर दिया है॥ १०॥

विदूषकः—मा एव्वं। णं अंगुलीअअं एव्व णिदंसणं अवस्संभावी अचिंतणिज्जो समाअमो होदि त्ति। [**मैवम्। नन्वङ्गुलीयकमेव निदर्शनमवश्यम्भाव्यचिन्तनीयः समागमो भवतीति।**]

राजा—(अङ्गुलीयकं विलोक्य) अये! इदं तावदसुलभस्थानभ्रंशि शोचनीयम्।

तव सुचरितमङ्गुलीय! नूनं प्रतनु ममेव विभाव्यते फलेन।
अरुणनखमनोहरासु तस्याश्च्युतमसि लब्धपदं यदङ्गुलीषु॥ ११॥

सानुमती—जइ अण्णहत्थगदं भवे सच्चं एव्व सोअणिज्जं भवे। [**यद्यन्यहस्तगतं भवेत् सत्यमेव शोचनीयं भवेत्।**]

विदूषकः—भो! इअं णाममुद्दा केण उग्घादेण तत्तहोदीए हत्थाब्भासं पाविदा? [**भोः! इयं नाममुद्रा केनोद्घातेन तत्रभवत्या हस्ताभ्याशं प्रापिता?**]

सानुमती—मम वि कोदूहलेण अआरिदो एसो। [**ममापि कौतूहलेनाकारित एषः।**]

राजा—श्रूयताम्। स्वनगराय प्रस्थितं मां प्रिया सबाष्पमाह—कियच्चिरेणार्यपुत्रः प्रतिपत्तिं दास्यतीति।

विदूषकः—तदो तदो? [**ततस्ततः?**]

राजा—पश्चादिमां मुद्रां तदङ्गुलौ निवेशयता मया प्रत्यभिहिता—

एकैकमत्र दिवसे दिवसे मदीयं नामाक्षरं गणय गच्छति यावदन्तम्।
तावत्प्रिये! मदवरोधगृहप्रवेशं नेता जनस्तव समीपमुपैष्यतीति॥ १२॥

तच्च दारुणात्मना मया मोहान्नानुष्ठितम्।

सानुमती—रमणीओ क्खु अवही विहिणा विसंवादिदो। [**रमणीयः खल्ववधिर्विधिना विसंवादितः।**]

विदूषक—ऐसा न कहिए। यह अँगूठी ही कह रही है कि उससे मिलन अवश्य होगा।

राजा—(**अँगूठी को देखकर**) हाय! इस पर भी मुझे बड़ा तरस आता है कि ऐसे सुन्दर स्थान पर पहुँचकर भी यह अँगूठी निकलकर कैसे गिर पड़ी।

अरी मुद्रिके! तेरी इस दशा से ही पता चलता है कि मेरे ही समान तेरे पुण्यों का भी भोग पूरा हो गया था। नहीं तो शकुन्तला के लाल नखोंवाली अँगुलियों से तू क्यों निकलकर गिर जाती॥ ११॥

सानुमती—हाँ, यदि यह किसी दूसरे के हाथ पड़ गई होती, तब तो सचमुच इसकी दशा सोचनीय हो जाती।

विदूषक—हे मित्र! आपकी अँगूठी किस उद्देश्य से देवी शकुन्तला के पास जा पहुँची?

सानुमती—मेरे मन के समान ही इसके मन में भी यह बात जानने की उत्कण्ठा है।

राजा—अच्छा सुनो, जब मैं आश्रम से अपनी राजधानी लौट रहा था, तब प्यारी शकुन्तला ने आँखों में आँसू भरकर पूछा अब कितने दिनों बाद मेरी सुधि लीजियेगा?

विदूषक—तब उसके बाद क्या हुआ?

राजा—तब उसकी अँगुली में यह अँगूठी पहनाते हुए मैंने कहा था—

प्यारी! इस अँगूठी पर लिखे हुए मेरे नाम के अक्षरों को रोज गिनती रहना। जब सभी अक्षर गिन लोगी, तब रनिवास का कोई सेवक तुम्हें बुलाने के लिए यहाँ आ जायेगा॥ १२॥

पर मुझ कठोर हृदय से ऐसा करते नहीं बना।

सानुमती—अवधि तो बड़ी अच्छी थी, पर भाग्य ने सब नष्ट कर डाला।

विदूषकः—अध कहं धीवलकप्पिअस्स लोहिअमच्छस्स उदलब्भंतले आसि ? [अथ कथं धीवरकल्पितस्य रोहितमत्स्यस्योदराभ्यन्तर आसीत् ?]

राजा—शचीतीर्थ वन्दमानायाः सख्यास्ते हस्ताद् गङ्गास्रोतसि परिभ्रष्टम्।

विदूषकः—जुज्जइ। [युज्यते।]

सानुमती—अदो एव्व तवस्सिणीए सउंदलाए अधम्मभीरुणो इमस्स राएसिणो परिणए संदेहो आसि। अहवा, ईदिसो अणुराओ अहिण्णाणं अवेक्खदि। कहं विअ एदं ? [अत एव तपस्विन्याः शकुन्तलाया अधर्मभीरोरस्य राजर्षेः परिणये सन्देह आसीत्। अथवेदृशोऽनुरागोऽभिज्ञानमपेक्षते। कथमिवैतत् ?]

राजा— उपालप्स्ये तावदिदमङ्गुलीयकम्।

विदूषकः—(आत्मगतम्) गहीदो णेण पंथा उम्मत्तआणं। [गृहीतोऽनेन पन्था उन्मत्तानाम्।]

राजा—(अनाकर्णितनाटितकेन अङ्गुलीयकं विलोक्य) मुद्रिके !

कथं नु तं बन्धुरकोमलाङ्गुलिं करं विहायासि निमग्नमम्भसि।

अथवा—

अचेतनं नाम गुणं न लक्षयेन्मयैव कस्मादवधीरिता प्रिया॥ १३॥

विदूषकः—(आत्मगतम्) अहं क्खु बुभुक्खाए खादिदव्व त्ति। [अहं खलु बुभुक्षया खादितव्य इति।]

राजा—अकारणपरित्यागानुशयतप्तहृदयस्तावदनुकम्प्यतामयं जनः पुनर्दर्शनेन।

(प्रविश्यापटीक्षेपेण चित्रफलकहस्ता)

चतुरिका—इअं चित्तगदा भट्टिणी। [इयं चित्रगता भट्टिनी।] (इति चित्रफलकं दर्शयति)

विदूषक—अच्छा, यह तो बताइए कि उस मछुए ने जिस रोहू मछली को काटा था, उसके पेट में यह कैसे जा पहुँची ?

राजा—शकुन्तला जब शचीतीर्थ को प्रणाम कर रही थी, तभी अँगूठी अँगुली से निकलकर गङ्गाजी की धारा में गिर गई।

विदूषक—ठीक ही है।

सानुमती—तो इसीलिए इन राजर्षि ने अधर्म के भय से बेचारी शकुन्तला के साथ विवाह होने में सन्देह किया था। नहीं तो ऐसे प्रेम में क्या किसी पहचान की जरूरत पड़ती है ?

राजा—मैं अभी इस अँगूठी को कोसता हूँ न।

विदूषक—(आप ही आप) अरे, ये तो पागल हो चले।

राजा—(न सुना हो, ऐसा अभिनय करते हुए अँगूठी को देखकर) अरी ओ अँगूठी !

उन सुन्दर और कोमल अँगुलियों को छोडकर तू क्यों जल में कूद गई ? किन्तु अँगूठी में तो जीव नहीं था, इसलिए उसने गुण की परख न की हो तो ठीक ही है, किन्तु मैंने मनुष्य होकर भी उसका निरादर क्यों किया ? ॥ १३ ॥

विदूषक—(स्वगत) तुम मुझको भूख से सममुच ही मार डालोगे।

राजा—प्यारी ! तुम्हें बिना कारण छोड़ देने की जलन से मेरा हृदय जला जा रहा है। मुझे फिर अपना दर्शन देने की दया करो।

(सहसा परदा उठाकर चित्रफलक लिये हुए प्रवेश कर)

चतुरिका—यह रहा देवी का चित्र। (चित्रफलक दिखलाती है)

विदूषकः—साहु वअस्स! महुरावत्थाणदंसणिज्जो भावाणुप्पवेसो। क्खलदि विअ मे दिट्ठी णिण्णुण्णअप्पदेसेसु। [साधु वयस्य! मधुरावस्थानदर्शनीयो भावानुप्रवेशः। स्खलतीव मे दृष्टिर्निम्नोन्नतप्रदेशेषु।]

सानुमती—अंमो, एसा राएसिणो णिउणदा। जाणे सही अग्गदो मे वट्टदि त्ति। [अहो, एषा राजर्षेर्निपुणता। जाने सख्यग्रतो मे वर्तत इति।]

राजा— यद्यत्साधु न चित्रे स्यात्क्रियते तत्तदन्यथा।
तथापि तस्या लावण्यं रेखया किञ्चिदन्वितम्॥ १४॥

सानुमती—सरिसं एदं पच्छाद्दावगुरुणो सिणेहस्स अणवलेवस्स अ। [सदृशमेतत्पश्चात्तापगुरोः स्नेहस्यानवलेपस्य च।]

विदूषकः—भो! दाणिं तिण्हिओ तत्तहोदीओ दीसंति। सव्वाओ अ दंसणीआओ। कदमा एत्थ तत्तहोदी सउंदला। [भोः! इदानीं तिस्रस्तत्रभवत्यो दृश्यन्ते। सर्वाश्च दर्शनीयाः। कतमात्र तत्रभवती शकुन्तला।]

सानुमती—अणभिण्णो क्खु ईदिसस्स रूवस्स मोहदिट्ठी अअं जणो। [अनभिज्ञः खल्वीदृशस्य रूपस्य मोघदृष्टिरयं जनः।]

राजा—त्वं तावत्कतमां तर्कयसि?

विदूषकः—तक्केमि जा एसा सिढिलकेसबंधणुव्वंतकुसुमेण केसंतेण उब्भिण्णस्सेअबिंदुणा-वअणेण विसेसदो ओसरिआहिं बाहाहिं अवसेअसिणिद्धतरुणपल्लवस्स चूअपाअवस्स पासे इसिपरिस्संता विअ आलिहिदा सा सउंदला। इदराओ सहीओ त्ति। [तर्कयामि यैषा शिथिलकेशबन्धनोद्वान्तकुसुमेन केशान्तेनोद्भिन्नस्वेदबिन्दुना वदनेन विशेषतोऽपसृताभ्यां बाहुभ्यामवसेकस्निग्धतरुणपल्लवस्य चूतपादस्य पार्श्वे ईषत्परिश्रान्तेवालिखिता सा शकुन्तला। इतरे सख्याविति।]

विदूषक—वाह मित्र! वाह! इसके अङ्ग-प्रत्यङ्ग आपने ऐसे सुन्दर बनाये हैं कि मनोभाव तक उतर आये हैं। मेरी आँखें तो इस चित्र में बने ऊँचे-नीचे स्थलों में जैसे ठोकरें खाकर लड़खड़ाने लगी हैं।

सानुमती—अरे! ये राजर्षि तो बड़े ही चतुर चित्रकार हैं। इस चित्र को देखकर ऐसा लगता है कि मानो सखी शकुन्तला सामने खड़ी है।

राजा—मैंने यद्यपि इस चित्र के सब दोष ठीक कर दिये हैं। तथापि इन रेखाओं में देवी की सुन्दरता का बहुत थोड़ा अंश आ पाया है॥ १४॥

सानुमती—ऐसे पछतावे और नम्रता से परिपूर्ण प्रेमी को ऐसा ही कहना चाहिए।

विदूषक—अरे! इस चित्र में तो तीन-तीन देवियाँ दीख रही हैं और तीनों दर्शनीय हैं। हाँ इनमें देवी शकुन्तला कौन हैं?

सानुमती—इस नासमझ को रूप और सुन्दरता की कुछ भी परख नहीं है।

राजा—अच्छा, तुम इन तीनों में से किसे शकुन्तला समझते हो?

विदूषक—पानी के छिड़काव से जो यह आम का पेड़ चमक रहा है, उसी से सटकर कुछ थकी हुई-सी जो देवी खड़ी दिखलायी देती हैं, वे ही शकुन्तला हैं। जिनके ढीले जूड़ों से फूल गिर रहे हैं, मुँह पर पसीने की बूँदें झलक रही हैं और दोनों कन्धे झुके हुए हैं। इनके साथवाली ये दोनों इसकी सखियाँ हैं।

राजा—निपुणो भवान्। अस्त्यत्र मे भावचिह्नम्।

स्विन्नाङ्गुलिविनिवेशो रेखाप्रान्तेषु दृश्यते मलिनः।
अश्रु च कपोलपतितं दृश्यमिदं वर्तिकोच्छ्वासात्॥ १५॥

चतुरिके! अर्धलिखितमेतद्विनोदस्थानम्। गच्छ, वर्तिकां तावदानय।

चतुरिका—अज्ज माढव्व! अवलंब चित्तफलअं जाव आअच्छामि। [आर्य माढव्य! अवलम्बस्व चित्रफलकं यावदागच्छामि।]

राजा—अहमेवैतदवलम्बे। (इति यथोक्तं करोति)

(निष्क्रान्ता चेटी)

राजा—(निःश्वस्य) अहं हि—

साक्षात्प्रियामुपगतामपहाय पूर्वं चित्रार्पितां पुनरिमां बहुमन्यमानः।
स्रोतोवहां पथि निकामजलामतीत्य जातः सखे! प्रणयवान्मृगतृष्णिकायाम्॥ १६॥

विदूषकः—(आत्मगतम्) एसो अत्तभवं णदिं अदिक्कमिअ मिअतिण्हिआं संकंतो। (प्रकाशम्) भो! अवरं किं एत्थ लिहिदव्वं? [एषोऽत्रभवान्नदीमतिक्रम्य मृगतृष्णिकां सङ्क्रान्तः। भोः! अपरं किमत्र लिखितव्यम्।]

सानुमती—जो जो पदेशो सहीए मे अहिरूवो तं तं आलिहिदुकामो भवे। [यो यः प्रदेशः सख्या मेऽभिरूपस्तं तमालिखितुकामो भवेत्।]

राजा—श्रूयताम्—

कार्या सैकतलीनहंसमिथुना स्रोतोवहा मालिनी
पादास्तामभितो निषण्णहरिणा गौरीगुरोः पावनाः।

राजा—तुम बडे चतुर हो। यहाँ मेरे प्रेम के चिह्न भी बने हुए हैं। क्योंकि—

चित्र की कोरों पर मेरी पसीजी हुई अँगुलियों के काले धब्बे पड़े हुए हैं और मेरी आँखों से जो आँसू टपका था, उसकी कूँची द्वारा शकुन्तला के गाल पर का रङ्ग उभर आया है॥ १५॥

अरी चतुरिके! अभी इस विनोद-स्थल का चित्र पूरा नहीं हो पाया है। जा, चित्र बनाने की कूँची तो ले आ।

चतुरिका—आर्य माधव्य! जरा इस चित्रपट को तो सम्हालिए, मैं अभी आ रही हूँ।

राजा—तब तक मैं ही इसे लिये रहता हूँ। (चित्रफलक ले लेता है)

(दासी चतुरिका चली जाती है)

राजा—(ठण्डी साँस लेकर) मित्र! जब वह स्वयं मेरे पास आई, तब तो मैंने निरादर करके उसे लौटा दिया और अब उसके चित्र पर इतना प्रेम दिखा रहा हूँ, जैसे कोई भलीभाँति जल से भरी नदी को छोड़कर मृगतृष्णा की ओर दौडे॥ १६॥

विदूषक—(आप ही आप) महाराज तो नदी को छोड़कर मृगतृष्णा के पीछे दौड़ने लगे हैं। (प्रकट में) मित्र! अब इस चित्र में और क्या बनाना बाकी है?

सानुमती—सम्भवतः अब राजा चित्र में उन स्थानों को बनायेंगे, जो मेरी सखी को विशेष प्रिय थे।

राजा—सुनो, अभी वह मालिनी नदी बनानी है, जिसकी रेती में हंस के जोडे बैठे हों। उसके दोनों ओर हिमालय की वह तलहटी दिखानी है, जहाँ हरिणों के झुण्ड बैठे हुए हों। मैं एक ऐसा पेंड

शाखालम्बितवल्कलस्य च तरोर्निर्मातुमिच्छाम्यधः
शृङ्गे कृष्णमृगस्य वामनयनं कण्डूयमानां मृगीम्॥ १७॥

विदूषकः—(आत्मगतम्) जह अहं देक्खामि पूरिदव्वं णेण चित्तफलअं लंबकुच्चाणं तावसाणं कदंबेहिं। [**यथाऽहं पश्यामि पूरितव्यमनेन चित्रफलकं लम्बकूर्चानां तापसानां कदम्बैः।**]

राजा—वयस्य! अन्यच्च शकुन्तलायाः प्रसाधनमभिप्रेतमत्र विस्मृतमस्माभिः।

विदूषकः—किं विअ? [**किमिव?**]

सानुमती—वणवासस्स सोउमारस्स अ जं सरिसं भविस्सदि। [**वनवासस्य सौकुमार्यस्य च यत्सदृशं भविष्यति।**]

राजा—

कृतं न कर्णार्पितबन्धनं सखे! शिरीषमागण्डविलम्बिकेसरम्।
न वा शरच्चन्द्रमरीचिकोमलं मृणालसूत्रं रचितं स्तनान्तरे॥ १८॥

विदूषकः—भो! किं णु तत्तहोदी रत्तकुवलअपल्लवसोहिणा अग्गहत्थेण मुहं ओवारिअ चइदचइदा विअ ट्ठिआ। (सावधानं निरूप्य दृष्ट्वा) आ, एसो दासीएपुत्तो कुसुमरसपाडच्चरो तत्तहोदीए वअणं अहिलंघेदि महुअरो। [**भोः! किं नु तत्रभवती रक्तकुवलयपल्लवशोभिनाऽग्रहस्तेन मुखमपवार्य चकितचकितेव स्थिता। आः, एष दास्याः पुत्रः कुसुमरसपाटच्चरस्तत्रभवत्या वदनमभिलङ्घति मधुकरः।**]

राजा—ननु वार्यतामेष धृष्टः।

विदूषकः—भवं एव्व अविणीदाणं सासिदा इमस्स वारणे पहिविस्सदि। [**भवानेवाविनीतानां शासिताऽस्य वारणे प्रभविष्यति।**]

राजाः—युज्यते। अयि भोः कुसुमलताप्रियातिथे! किमत्र परिपतनखेदमनुभवसि?

भी बनाना चाहता हूँ कि जिस पर वल्कल के वस्त्र टँगे हों और जिसमें नीचे एक हरिणी अपनी बाईं आँख किसी काले मृग की सींग पर रगड़कर खुजला रही हो॥ १७॥

विदूषक—(**स्वगत**) मैं सोचता हूँ कि आप इस चित्र को लम्बी-लम्बी दाढ़ीवाले तपस्वियों से भर दीजियेगा।

राजा—मित्र! अभी तो शकुन्तला को जो आभूषण पहनाने हैं, उन्हें बनाना भूल ही गया हूँ।

विदूषक—वे कौन-कौन से आभूषण?

सानुमती—जो उसके समान सुकुमार और वनवासिनी कुमारियाँ पहनती होंगी।

राजा—वयस्य! अभी तो मैं सिरस का वह फूल भी नहीं बना सका, जिसकी डंठल उसने कानों में खोंस रखी थी और जिसके पराग उसके गालों पर चिपके थे। अभी उसके स्तनों के बीच में चन्द्रमा की किरण सरीखे पतले कमलतन्तुओं की माला भी मैंने नहीं बनायी है॥ १८॥

विदूषक—वयस्य! ये देवी अपनी कमल की पंखुड़ी जैसी कोमल और लाल हथेलियों से अपना मुँह ढँके बहुत भयभीत-सी खड़ी क्यों दीख रही हैं? (**भलीभाँति देखकर**) अरे! देखिए तो फूलों के रस का चोर यह नीच भौंरा देवी के मुँह पर मँडरा रहा है।

राजा—मित्र! इस दुष्ट को भगाओ।

विदूषक—ऐसे दुष्टों को दंड देना आपका काम है। सो आप ही भगाइये।

राजा—अच्छी बात है। अरे ओ फूलों और लताओं के प्रिय अतिथि! तू इसके मुँह पर मँडराने का कष्ट क्यों कर रहा है?

एषा कुसुमनिषण्णा तृषितापि सती भवन्तमनुरक्ता।
प्रतिपालयति मधुकरी न खलु मधु विना त्वया पिबति॥ १९॥

सानुमती—अज्ज वि अभिजादं क्खु एसो वारिदो। [अद्याप्यभिजातं खल्वेष वारितः।]

विदूषकः—पडिसिद्धा वि वामा एसा जादी। [प्रतिषिद्धाऽपि वामैषा जातिः।]

राजा—एवं भोः, न मे शासने तिष्ठसि ? श्रूयतां तर्हि सम्प्रति—

अक्लिष्टबालतरुपल्लवलोभनीयं पीतं मया सदयमेव रतोत्सवेषु।
बिम्बाधरं स्पृशसि चेद् भ्रमर ! प्रियायास्त्वां कारयामि कमलोदरबन्धनस्थम्॥ २०॥

विदूषकः—एव्वं तिक्खणदंडस्स किं ण भाइस्सदि ? (प्रहस्य आत्मगतम्) एसो दाव उम्मत्तो। अहं पि एदस्स संगेण ईदिसवण्णो विअ संवुत्तो। (प्रकाशम्) भो ! चित्तं क्खु एदं। [एवं तीक्ष्णदण्डस्य किं न भेष्यति ? एष तावदुन्मत्तः। अहमप्येतस्य सङ्गेनेदृशवर्ण इव संवृत्तः। भोः ! चित्रं खल्वेतत्।]

राजा—कथं चित्रम् ?

सानुमती—अहं पि दाणिं अवगदत्था। किं उण जहालिहिदाणुभावी एसो। [अहमपीदानीमवगतार्था। किं पुनर्यथालिखितानुभाव्येषः।]

राजा—वयस्य ! किमिदमनुष्ठितं पौरोभाग्यम् ?

दर्शनसुखमनुभवतः साक्षादिव तन्मयेन हृदयेन।
स्मृतिकारिणा त्वया मे पुनरपि चित्रीकृता कान्ता॥ २१॥

(इति बाष्पं विहरति)

सानुमती—पुव्वावरविरोही अपुव्वो एसो विरहमग्गो। [पूर्वापरविरोध्यपूर्व एष विरहमार्गः।]

तुझ पर आसक्त भौंरी तेरी ओर आँख लगाये फूल पर बैठी हुई है, किन्तु तेरे बिना पुष्परस नहीं पी रही है॥ १९॥

सानुमती—अब भी ये कितनी कोमलतापूर्वक भौंरे को वहाँ से हट जाने के लिए कह रहे हैं।

विदूषक—ऐसे दुष्ट लोग इस प्रकार कहने से नहीं मानते।

राजा—क्यों रे भ्रमर ! तू मेरा कहना नहीं मानता ? तो सुन—

मैंने प्यारी का जो ओठ अछूते नन्हें पौधे की कोमल कपोल जैसे लाल हैं और जिन्हें मैंने रति के समय भी बहुत बचाकर पिया था, उसे यदि तूने छुआ तो तुझे कमल के कोश में बन्द करा दूँगा॥ २०॥

विदूषक—क्या तू ऐसे कठोर दण्ड देनेवाले से भी नहीं डरता ? (**मन ही मन हँसकर**) ये तो एकदम पागल ही हो गये हैं। इनके साथ रहने से मैं भी कुछ-कुछ इन्हीं जैसा हो चला हूँ। (**प्रकट में**) हे महाराज ! यह तो चित्र है।

राजा—सचमुच चित्र है ?

सानुमती—स्वयं मैं भी अब समझ सकी कि यह चित्र है। फिर उसका क्या कहना, जिसने तन्मय होकर शकुन्तला का चित्र बनाया है।

राजा—मित्र ! यह तुमने क्या दुष्कर्म कर डाला ?

मैं तो बड़ा मगन होकर सामने खड़ी शकुन्तला के दर्शन का आनन्द ले रहा था। पर तुमने मुझे स्मरण दिलाकर मेरी प्यारी का चित्र बना दिया॥ २१॥

(ऐसा कहकर राजा आँसू बहाने लगता है)

सानुमती—यह तो विरह का निराला ही ढङ्ग है, जिसमें पहले कुछ था, अब कुछ और ही दीख रहा है।

राजा—वयस्य ! कथमेवमविश्रान्तदुःखमनुभवामि ?

प्रजागरात्खलीभूतस्तस्याः स्वप्ने समागमः।
बाष्पस्तु न ददात्येनां द्रष्टुं चित्रगतामपि॥ २२॥

सानुमती—सव्वहा पमज्जिदं तुए पच्चादेसदुक्खं सउंदलाए। [सर्वथा प्रमार्जितं त्वया प्रत्यादेशदुःखं शकुन्तलायाः।]

(प्रविश्य)

चतुरिका—जेदु जेदु भट्टा। वट्टिआकरंडअं गेण्हअ इदोमुहं पत्थिद म्हि। [जयतु जयतु भर्ता। वर्तिकाकरण्डकं गृहीत्वेतोमुखं प्रस्थितास्मि।]

राजा—किं च ?

चतुरिका—सो मे हत्थादो अंतरा तरलिआदुदीआए देवीए वसुमदीए अहं एव्व अज्जउत्तस्स उवणइस्सं त्ति सबलक्कारं गहीदो। [स मे हस्तादन्तरा तरलिकाद्वितीयया देव्या वसुमत्याऽहमेवार्य-पुत्रस्योपनेष्यामीति सबलात्कारं गृहीतः।]

विदूषकः—दिट्ठिआ तुमं मुक्का। [दिष्ट्या त्वं मुक्ता।]

चतुरिका—जाव देवीए विडवलग्गं उत्तरीअं तरलिआ मोचेदि ताव मए णिव्वाहिदो अत्ता। [यावद् देव्या विटपलग्नमुत्तरीयं तरलिका मोचयति तावन्मया निर्वाहित आत्मा।]

राजा—वयस्य ! उपस्थिता देवी बहुमानगर्विता च। भवानिमां प्रतिकृतिं रक्षतु।

विदूषकः—अत्ताणं त्ति भणाहि। (चित्रफलकमादायोत्थाय च) जह भवं अंतेउरकालकूडादो मुंचीअदि तदो मं मेहप्पडिच्छंदे प्पासादे सद्दावेहि। (इति द्रुतपदं निष्क्रान्तः) [आत्मानमिति भण। यदि भवानन्तःपुरकालकूटान्मोक्ष्यते तदा मां मेघप्रतिच्छन्दे प्रासादे शब्दापय।]

राजा—मित्र ! तुम जानते हो कि इस समय मुझपर क्या बीत रही है ?

नींद न लगने से मैं स्वप्न में नहीं मिल पाता और सदा बहते रहनेवाले मेरे आँसू उसे चित्र में भी नहीं देखने देते॥ २२॥

सानुमती—शकुन्तला को छोड़कर तुमने हमलोगों के मन में जो असन्तोष भर दिया था, वह सब आज तुमने धो डाला।

(प्रवेश करके)

चतुरिका—महाराज की जय हो, जय हो। चित्र-सामग्री की पिटारी लेकर मैं इधर आ रही थी—

राजा—तब क्या हुआ ?

चतुरिका—तभी तरलिका के साथ आती हुई महारानी वसुमती ने यह कहकर मुझसे बलपूर्वक वह पेटी छीन ली और कहा कि मैं स्वयं इसे आर्यपुत्र के पास पहुँचा दूँगी।

विदूषक—तेरा बड़ा भाग्य है कि तू उनके हाथ से बिना पिटे बचकर चली आई।

चतुरिका—तरलिका वृक्ष की डालों में महारानी की फँसी हुई ओढनी छुड़ाने लगी, तब तक मैं चुपचाप चली आयी।

राजा—मित्र ! महारानी मुँह फुलाए इधर ही आ रही हैं। सो तुम इस चित्र को ले जाकर कहीं छिपा दो।

विदूषक—यह क्यों नहीं कहते कि हमें कहीं छिपा लो ? (चित्रपट लेकर और उठकर)

सानुमती—अण्णसंकंतहिअओ वि पढमसंभावणं अवेक्खदि। अदिसिढिलसोहदो दाणिं एसो। [अन्यसङ्क्रान्तहृदयोऽपि प्रथमसम्भावनामपेक्षते। अतिशिथिलसौहार्द इदानीमेषः।]

(प्रविश्य पत्रहस्ता)

प्रतीहारी—जेदु जेदु देवो। [जयतु जयतु देवः।]

राजा—वेत्रवति! न खल्वन्तरा दृष्टा त्वया देवी।

प्रतीहारी—अह इं। पत्तहत्थं मं देक्खिअ पडिणिउत्ता। [अथ किम्। पत्रहस्तां मां प्रेक्ष्य प्रतिनिवृत्ता।]

राजा—कार्यज्ञा कार्योपरोधं मे परिहरति।

प्रतीहारी—देव! अमच्चो विण्णवेदि—अत्थजादस्स गणणावहुलदाए एकं एव्व पोरकज्जं अवेक्खिदं तं देवो पत्तारूढं पच्चक्खीकरेदु त्ति। [देव! अमात्यो विज्ञापयति—अर्थजातस्य गणनाबहुलतयैकमेव पौरकार्यमवेक्षितं तद्देवः पत्रारूढं प्रत्यक्षीकरोत्विति।]

राजा—इतः पत्रिकां दर्शय।

(प्रतीहार्युपनयति)

राजा—(अनुवाच्य) कथं समुद्रव्यवहारी सार्थवाहो धनमित्रो नाम नौव्यसने विपन्नः? अनपत्यश्च किल तपस्वी। 'राजगामी तस्यार्थसञ्चयः' इत्येतदमात्येन लिखितम्। (सविषादं) कष्टं खल्वनपत्यता। वेत्रवति! वहुधनत्वाद् वहुपत्नीकेन तत्रभवता भवितव्यम्। विचीयतां यदि काचिदापन्नसत्त्वा तस्य भार्यासु स्यात्।

अच्छा अव आपको रनिवास के कालकूट से छुटकारा मिले तो मुझे मेघप्रतिच्छन्द भवन में पुकार लीजिएगा। (यह कहकर शीघ्र चला जाता है)

सानुमती—यद्यपि इन्होंने दूसरों को अपना हृदय दे डाला है, किन्तु ये अपनी पहली रानी के प्रेम को भी नहीं ठुकराना चाहते। पर राजा के मन में रानी के लिए कुछ भी प्रेम नहीं वचा रह गया है।

(हाथ में पत्र लिये हुए प्रवेश कर)

प्रतीहारी—महाराज की जय हो, जय हो।

राजा—वेत्रवती! तुम्हें वीच में महारानी तो नहीं मिलीं।

प्रतीहारी—मिली थीं। पर मेरे हाथ में पत्र देखकर वापस लौट गयीं।

राजा—वे समय को पहचानती हैं, इसीलिए मेरे काम में वाधा नहीं डालतीं।

प्रतीहारी—महाराज! अमात्य ने कहलाया है कि आज सारा दिन कई विभागों के कररूप में प्राप्त द्रव्यसमूह का हिसाव लगाने में ही वीत गया। अतएव प्रजा का केवल एक ही काम मैं देख सका। उसे पत्र में पढकर समझ लें।

राजा—लाओ, पत्र मुझे दो।

(प्रतीहारी पत्र देती है)

राजा—(वाँचकर) अरे! क्या समुद्र का व्यापारी धनमित्र नाव-दुर्घटना में मर गया। वेचारे को कोई सन्तान भी नहीं थी। तिसपर प्रधानमन्त्रीजी लिखते हैं कि 'उसका सारा धन राजकोष में आ जाना चाहिए।' (दुःखी होकर) निःसन्तान होना भी वड़े दुःख की वात है। वेत्रवती! उस सेठ के पास वहुत धन था। इसलिए उसकी वहुत-सी स्त्रियाँ तो होंगी हीं। पता लगाओ, उनमें से कोई गर्भवती भी है।

प्रतिहारी—देव ! दाणिं एव्व साकेदअस्स सेट्ठिणो दुहिआ णिव्वुत्तपुंसवणा जाआ से सुणीअदि।
[देव ! इदानीमेव साकेतस्य श्रेष्ठिनो दुहिता निर्वृत्तपुंसवना जायाऽस्य श्रूयते।]

राजा—ननु गर्भः पित्र्यं रिक्थमर्हति। गच्छ, एवममात्यं ब्रूहि।

प्रतीहारी—जं देवो आणवेदि। [यद्देव आज्ञापयति।] (इति प्रस्थिता)

राजा—एहि तावत्।

प्रतीहारी—इअ म्हि। [इयमस्मि।]

राजा—किमनेन सन्ततिरस्ति नास्तीति।

येन येन वियुज्यन्ते प्रजाः स्निग्धेन बन्धुना।
स स पापादृते तासां दुष्यन्त इति घुष्यताम्॥ २३॥

प्रतीहारी—एव्वं णाम घोसइदव्वं। (निष्क्रम्य, पुनः प्रविश्य) काले पवुट्ठं विअ अहिणंदिदं देवस्स सासणं। [एवं नाम घोषयितव्यम्। काले प्रवृष्टमिवाभिनन्दितं देवस्य शासनम्।]

राजा—(दीर्घमुष्णं च निःश्वस्य) एवं भोः, सन्ततिच्छेदनिरवलम्बानां कुलानां मूलपुरुषावसाने सम्पदः परमुपतिष्ठन्ति। ममाप्यन्ते पुरुवंशश्रिय एष एव वृत्तान्तः।

प्रतीहारी—पडिहदं अमंगलं। [प्रतिहतममङ्गलम्।]

राजा—धिङ्मामुपस्थितश्रेयोऽवमानिनम्।

सानुमती—असंसअं सहि एव्व हिअए करिअ णिंदिदो णेण अप्पा। [असंशयं सखीमेव हृदये कृत्वा निन्दितोऽनेनात्मा।]

राजा—संरोपितेऽत्यात्मनि धर्मपत्नी त्यक्ता मया नाम कुलप्रतिष्ठा।
कल्पिष्यमाणा महते फलाय वसुन्धरा काल इवोप्तबीजा॥ २४॥

प्रतीहारी—देव ! ऐसा सुना जाता है कि अयोध्यावाले सेठ की जो कन्या उसे व्याही थी, उसका अभी थोड़े दिन पहले पुंसवनसंस्कार हुआ है।

राजा—तब जाकर अमात्य से कह दो कि वह गर्भ का बालक ही सेठ के धन का स्वामी होगा।

प्रतीहारी—जैसी महाराज की आज्ञा। (यह कहकर चली जाती है)

राजा—हाँ, जरा सुनो तो।

प्रतीहारी—आ गई।

राजा—किसी को सन्तान हो या न हो इससे कोई मतलब नहीं।
जाकर राज्य भर में ढिंढोरा पिटवा दो कि पापियों के सिवाय बाकी हमारी प्रजा के और जितने लोग हैं, उनके जो-जो कुटुम्बी न रहें, उनका वह कुटुम्बी दुष्यन्त होगा॥ २३॥

प्रतीहारी—ऐसी ही घोषणा करा दी जायगी। (जाने के बाद पुनः लौटकर) महाराज की यह घोषणा सुनकर प्रजा वैसे ही मगन हो उठी है, जैसे समय पर पानी बरसने से खेती लहलहा उठती है।

राजा—(लम्बी और गरम साँस लेकर) इसी तरह निपूतों का सारा धन उनके मर जाने पर दूसरों के हाथ चला जाता है। मेरे बाद पुरुवंश की राज्यलक्ष्मी का भी यही हाल होनेवाला है।

प्रतीहारी—भगवान् आपको ऐसे-बुरे दिन न दिखायें।

राजा—अपने घर आयी हुई लक्ष्मी का निरादर करनेवाले मुझ अभागे को धिक्कार है।

सानुमती—निःसन्देह राजा ने शकुन्तला के सन्दर्भ में ही अपने आपको धिक्कारा है।

राजा—जैसे समय पर बोई हुई पृथ्वी फलवती होती है, वैसे ही मुझसे गर्भ-धारण करके कुल को चलानेवाली अपनी धर्मपत्नी को ही मैंने अपमानपूर्वक त्याग दिया॥ २४॥

सानुमती—अपरिच्छिण्णा दाणिं दे संददी भविस्सदि। [अपरिच्छिन्नेदानीं ते सन्ततिर्भविष्यति।]

चतुरिका—(जनान्तिकम्) अए! इमिणा सत्थवाहवुत्तंतेण दिउणुव्वेओ भट्टा। णं अस्सासिदुं मेहप्पडिच्छंदादो अज्जं माढव्वं गेण्हिअ आअच्छेहि। [अयि! अनेन सार्थवाहवृत्तान्तेन द्विगुणोद्वेगो भर्ता। एनमाश्वासयितुं मेघप्रतिच्छन्दादार्य माढव्यं गृहीत्वागच्छ।]

प्रतीहारी—सुट्ठु भणासि। [सुष्ठु भणसि।] (इति निष्क्रान्ता)

राजा—अहो दुष्यन्तस्य संशयमारूढाः पिण्डभाजः। कुतः—

अस्मात्परं बत यथाश्रुति सम्भृतानि को नः कुले निवपनानि करिष्यतीति।
नूनं प्रसूतिविकलेन मया प्रसिक्तं धौताश्रुशेषमुदकं पितरः पिबन्ति॥ २५॥

(इति मोहमुपगतः)

चतुरिका—(ससम्भ्रममवलोक्य) समस्ससदु समस्ससदु भट्टा। [समाश्वसितु समाश्वसितु भर्ता।]

सानुमती—हद्धी हद्धी। सदि क्खु दीवे ववधाणदोसेण एसो अंधआरदोसं अणुहोदि। अहं दाणिं एव्व णिव्वुदं करेमि। अहवा सुदं मए सउंदलं समस्सासअंतीए महेंदजणणीए मुहादो—जण्णभाओस्सुआ देवा एव्व तह अणुचिट्ठिस्संति जह अइरेण धम्मपदिणिं भट्टा अहिणंदिस्सदि त्ति। ता ण जुत्तं कालं पडिपालिदुं। जाव इमिणा वुत्तंतेण पिअसहिं समस्सासेमि। [हा धिक् हा धिक्। सति खलु दीपे व्यवधानदोषेणैषोऽन्धकारदोषमनुभवति। अहमिदानीमेव निर्वृतं करोमि। अथवा श्रुतं मया शकुन्तलां समाश्वासयन्त्या महेन्द्रजनन्या मुखाद्—यज्ञभागोत्सुका देवा एव तथानुष्ठास्यन्ति यथाऽचिरेण धर्मपत्नीं भर्ताऽभिनन्दिष्यतीति। तन्न युक्तं कालं प्रतिपालयितुम्। यावदनेन वृत्तान्तेन प्रियसखीं समाश्वासयामि।] (इत्युद्भ्रान्तकेन निष्क्रान्ता)

सानुमती—तुम्हारी सन्तान तुम्हारा वंश चलायेगी।

चतुरिका—(अलग) प्रतीहारी! यह सेठवाली बात सुनकर तो राजा का दुःख दूना हो गया है। अतएव इनका मन बहलाने के लिए आर्य माधव्य को मेघप्रतिच्छन्न-भवन से जाकर बुला ला।

प्रतीहारी—यह तो तुम ठीक कह रही हो। (जाती है)

राजा—दुष्यन्त के पितर भी सन्देह में पड़ गये होंगें। क्योंकि—

वे विकल होकर सोचते होंगें कि दुष्यन्त के बाद कौन हमारा वैदिक विधि से तर्पण करेगा। इसी सोच में वे मेरे हाथ से तर्पण किये हुए जल के कुछ भाग से अपने आँसू धोने के बाद बाकी जल पीते होंगे॥ २५॥

(ऐसा कहकर महाराज मूर्च्छित हो जाते हैं)

चतुरिका—(घबराहट के साथ देखकर) धीरज धरिए महाराज! धीरज धरिए।

सानुमती—हाय-हाय दीपक के रहते हुए भी जैसे बीच में किसी चीज की ओट पड जाने से अँधेरा छा जाता है, वैसे ही इस राजा को भी मोह हो गया है। मैं तो इसको निश्चिन्त कर देती, पर देवमाता अदिति ने शकुन्तला को समझाते हुए कहा था कि 'यज्ञ में भाग पाने के लिए उत्सुक देवता लोग ही ऐसा कुछ करेंगे कि जिससे राजा दुष्यन्त शीघ्र तुम्हें अपनी धर्मपत्नी बनाकर तुम्हारा अभिनन्दन करेंगे'। तो अब देर नहीं करनी चाहिए। चलकर शकुन्तला को ये सभी बातें सुना दूँ, जिससे उसे भी धीरज हो जाय। **(झटके से चली जाती है)**

(नेपथ्ये) अव्वम्हण्णं। [अब्रह्मण्यम्।]

राजा—(प्रत्यागतः कर्ण दत्त्वा) अये, माधव्यस्येवार्तस्वरः। कः कोऽत्र भोः ?

(प्रविश्य)

प्रतीहारी—(ससम्भ्रमम्) परित्ताअदु देवो संसअगदं वअस्सं। [परित्रायतां देवः संशयगतं वयस्यम्।]

राजा—केनात्तगन्धो माणवकः ?

प्रतीहारी—अदिट्ठरूवेण केण वि सत्तेण अदिक्कमिअ मेहप्पडिच्छंदस्स प्पासादस्स अग्गभूमिं आरोविदो। [अदृष्टरूपेण केनापि सत्त्वेनातिक्रम्य मेघप्रतिच्छन्दस्य प्रासादस्याग्रभूमिमारोपितः।]

राजा—(उत्थाय) मा तावत्। ममापि सत्त्वैरभिभूयन्ते गृहाः। अथवा—

अहन्यहन्यात्मन एव तावज्ज्ञातुं प्रमादस्खलितं न शक्यम्।
प्रजासु कः केन पथा प्रयातीत्यशेषतो वेदितुमस्ति शक्तिः॥ २६॥

(नेपथ्ये) भो वअस्स! अविहा अविहा। [भो वयस्य! अविहा अविहा।]

राजा—(गतिभेदेन परिक्रामन्) सखे! न भेतव्यं न भेतव्यम्।

(नेपथ्ये)

(पुनस्तदेव पठित्वा) कहं ण भाइस्सं ? एस मं को वि पच्चवणदसिरोहरं इक्खुं विअ तिण्णभंगं करेदि। [कथं न भेष्यामि ? एष मां कोऽपि प्रत्यवनतशिरोधरमिक्षुमिव त्रिभङ्गं करोति।]

राजा—(सदृष्टिक्षेपम्) धनुस्तावत्।

(नेपथ्य में) अरे! मार डाला, मुझ ब्राह्मण को किसी ने मार डाला।

राजा—(सजग भाव से कान लगाकर) अरे! यह तो माधव्य के जैसा करुण रुदन सुनाई दे रहा है। अरे कोई है ?

(प्रवेश करके)

प्रतीहारी—(घबराहट के साथ) आपके मित्र बड़े संकट में पड़ गये हैं। चलकर उन्हें बचाइए।

राजा—माधव्य को किसने सताया है ?

प्रतीहारी—प्रच्छन्नरूप से किसी भूत-प्रेत ने उन्हें पकड़कर मेघप्रतिच्छन्न भवन की मुँडेर पर टाँग दिया है।

राजा—(उठकर) यह कैसे हो सकता है ? क्या मेरे घर में भी भूत-प्रेत आने लगे हैं ? पर यह तो सम्भव है। अथवा—

जब मनुष्य यही नहीं जान सकता कि वह स्वयं अपनी भूल से नित्य कितने पाप करता है, तो यह भलीभाँति कैसे ज्ञात हो कि प्रजा में कौन किस राह पर चल रहा है॥ २६॥

(नेपथ्य में) मित्र! दुहाई है, दुहाई।

राजा—(वेग से घूमकर) मित्र! डरो मत, डरो मत।

(नेपथ्य में)

(पुनः उसी बात को कहकर) हाय, हाय! डरूँ क्यों नहीं ? यहाँ तो कोई मेरे गले को ईख के समान मरोड़कर उसके तीन टुकड़े किये दे रहा है।

राजा—(चारों ओर देखकर) अरे, मेरा धनुष तो ले आओ।

(प्रविश्य शार्ङ्गहस्ता)

यवनी—भट्टा ! एदं हत्थावावसहिदं सरासणं। [भर्तः ! एतद्धस्तावापसहितं शरासनम्।]

(राजा सशरं धनुरादत्ते)

(नेपथ्ये)

एष त्वामभिनवकण्ठशोणितार्थी शार्दूलः पशुमिव हन्मि चेष्टमानम्।
आर्तानां भयमपनेतुमात्तधन्वा दुष्यन्तस्तव शरणं भवत्विदानीम्॥ २७॥

राजा—(सरोषम्) कथं मामेवोद्दिशति ? तिष्ठ कुणपाशन ! त्वमिदानीं न भविष्यसि। (शार्ङ्गमारोप्य) वेत्रवति ! सोपानमार्गमादेशय।

प्रतीहारी—इदो इदो देवो ! [इत इतो देवः।]

(सर्वे सत्वरमुपसर्पन्ति)

राजा—(समन्ताद्विलोक्य) शून्यं खल्विदम्।

(नेपथ्ये)

अविहा अविहा। अहं अत्तभवंतं पेक्खामि ? तुमं मं ण पेक्खसि। बिडालग्गहीदो मूसओ विअ णिराओ म्हि जीविदे संवुत्तो। [अविहा अविहा। अहमत्रभवन्तं पश्यामि। त्वं मां न पश्यसि ? बिडालगृहीतो मूषक इव निराशोऽस्मि जीविते संवृत्तः।]

राजा—भोस्तिरस्करिणीगर्वित ! मदीयमस्त्रं त्वां द्रक्ष्यति। एष तमिषुं सन्दधे।

यो हनिष्यति वध्यं त्वां रक्ष्यं रक्षिष्यति द्विजम्।
हंसो हि क्षीरमादत्ते तन्मिश्रा वर्जयत्यपः॥ २८॥

(इत्यस्त्रं सन्धत्ते)

(हाथ में धनुष लिये हुए प्रवेश कर)

यवनी—महाराज ! यह लीजिए धनुष और हस्तरक्षक।

(राजा धनुष-बाण लेते हैं)

(नेपथ्य में)

तेरे गले के गरम रुधिर का प्यासा मैं अभी तुझे उसी प्रकार मार डालूँगा, जैसे तड़पते हुए पशु को सिंह मार डालता है। अब पीड़ितों के रक्षक धनुषधारी दुष्यन्त आकर तुझे बचायें॥ २७॥

राजा—(क्रोधपूर्वक) तो क्या तू मुझे भी चुनौती दे रहा है ? तो ठहर सड़ा मांस खानेवाले पिशाच ! मैं अभी तुझे मारता हूँ। (धनुष चढाकर) वेत्रवती ! आगे-आगे सीढ़ी पर चल।

प्रतीहारी—इधर से आइए देव, इधर से।

(सभी वेग से आगे बढते हैं)

राजा—(चारों ओर देखकर) यहाँ तो कोई नहीं दिखाई देता ?

(नेपथ्य में)

हाय ! हाय ! मैं तो आपको देख रहा हूँ, पर आप मुझे नहीं देखते। मै तो बिल्ली के पंजों में पड़े हुए चूहे के समान अपने प्राणों से हाथ धो बैठा हूँ।

राजा—अरे कपट विद्या के घमंडी ! अब मेरा बाण ही तुझे देखेगा। लो, मैं बाण चढाता हूँ।

जैसे हंस पानी मिले दूध में से दूध पी जाता है और पानी छोड देता है, वैसे ही यह बाण भी तुझ मारे जाने योग्य पापी को मार डालेगा और इस बचाये जाने योग्य ब्राह्मण को बचा लेगा॥ २८॥

(बाण चढाता है)

(ततः प्रविशति विदूषकमुत्सृज्य मातलिः)

मातलिः—राजन्!

कृताः शरव्यं हरिणा तवासुराः शरासनं तेषु विकृष्यतामिदम्।
प्रसादसौम्यानि सतां सुहृज्जने पतन्ति चक्षूंषि न दारुणाः शराः॥ २९॥

राजा—(ससम्भ्रममासनमुपसंहरन्) अये, मातलिः। स्वागतं महेन्द्रसारथे!

(प्रविश्य)

विदूषकः—अहं जेण इट्टिपसुमारं मारिदो सो इमिणा साअदेण अहिणंदीअदि। [अहं येनेष्टि-पशुमारं मारितः सोऽनेन स्वागतेनाभिनन्द्यते।]

मातलिः—(सस्मितम्) आयुष्मन्! श्रूयतां यदर्थमस्मि हरिणा भवत्सकाशं प्रेषितः।

राजा—अवहितोऽस्मि।

मातलिः—अस्ति कालनेमिप्रसूतिर्दुर्जयो नाम दानवगणः।

राजा—अस्ति। श्रुतपूर्वं मया नारदात्।

मातलिः—

सख्युस्ते स किल शतक्रतोरजय्यस्तस्य त्वं रणशिरसि स्मृतो निहन्ता।
उच्छेत्तुं प्रभवति यन्न सप्तसप्तिस्तन्नैशं तिमिरमपाकरोति चन्द्रः॥ ३०॥

स भवानात्तशस्त्र एव इदानीं तमैन्द्ररथमारुह्य विजयाय प्रतिष्ठताम्।

राजा—अनुगृहीतोऽहमनया मघवतः सम्भावनया। अथ माधव्यं प्रति भवता किमेवं प्रयुक्तम्?

(विदूषक को छोड़कर मातलि का प्रवेश)

मातलि—राजन्! देवराज इन्द्र ने राक्षसों को मारने का काम आपको ही सौंपा है। अब आप उन राक्षसों पर ही बाण चलाइए। क्योंकि सज्जन लोग अपने मित्रों पर बाण नहीं, कृपा बरसाते है॥ २९॥

राजा—(शीघ्रता से बाण उतारता हुआ) इन्द्र के सारथी मातलि! आइए, आपका स्वागत है।

(प्रवेश करके)

विदूषक—अरे! जो मुझको बलिपशु के समान मारे डाल रहा था, उसका महाराज स्वागत कर रहे हैं?

मातलि—(मुस्कुराकर) आयुष्मन्! मुझे जिस काम से इन्द्र ने आपके पास भेजा है, सो सुनिए।

राजा—कहिए, मैं सुन रहा हूँ।

मातलि—कालनेमि का वंशज दुर्जय नामक दानवों का एक समूह है।

राजा—हाँ, नारद मुनि के मुख से बहुत पहले मैंने यह वृत्तान्त सुना था।

मातलि—आपके मित्र इन्द्र उन्हें नहीं जीत पा रहे हैं। अब यह समझा जा रहा है कि आप ही उन्हें रणक्षेत्र में पछाड़ सकते हैं। क्योंकि रात के जिस अँधेरे को सूर्य नहीं दूर कर सकता, उसे चन्द्रमा ही दूर करता है॥ ३०॥

अब यह धनुष-बाण लिये ही आप इन्द्र के इसी रथ पर चढ़कर विजय के लिए चल पड़िए।

राजा—भगवान् इन्द्र के इस सम्मान से मै बड़ा अनुग्रहीत हुआ हूँ। पर आपने माधव्य के साथ ऐसा दुर्व्यवहार क्यों किया?

मातलिः—तदपि कथ्यते। किञ्चिन्निमित्तादपि मनःसन्तापादायुष्मान्मया विक्लवो दृष्टः। पश्चात्कोपयितुमायुष्मन्तं तथा कृतवानस्मि। कुतः—

ज्वलित चलितेन्धनोऽग्निर्विप्रकृतः पन्नगः फणां कुरुते।
प्रायः स्वं महिमानं क्षोभात् प्रतिपद्यते हि जनः॥ ३१॥

राजा—(जनान्तिकम्) वयस्य! अनतिक्रमणीया दिवस्पतेराज्ञा। तदत्र परिगतार्थं कृत्वा मद्वचनादमात्यपिशुनं ब्रूहि—

त्वन्मतिः केवला तावत्परिपालयतु प्रजाः।
अधिज्यमिदमन्यस्मिन्कर्मणि व्यापृतं धनुः॥ ३२॥

इति।

विदूषक—जं भवं आणवेदि। [यद्भवानाज्ञापयति।] (इति निष्क्रान्तः)

मातलिः—आयुष्मान्! रथमारोहतु।

(राजा रथाधिरोहणं नाटयति)

(इति निष्क्रान्ताः सर्वे)

॥ इति षष्ठोऽङ्कः ॥

मातलि—वह भी बतलाता हूँ। मैंने यहाँ आकर देखा कि आपका मन न जाने क्यों बड़ा दुःखी है। सो आपका क्रोध जगाने के लिए मैंने ऐसा करना ही ठीक समझा। क्योंकि—

आग तभी जगती है, जब ईंधन को हिला-डुला दिया जाय; और साँप भी अपना फन उठाकर तभी फुफकारता है, जब कोई उसे छेड़े। इसी प्रकार मनुष्य को भी जब तक कोई उकसाकर न भड़काये, तब तक वह अपना तेज नहीं प्रकट करता॥ ३१॥

राजा—(हाथ से ओट लेकर विदूषक से) मित्र! भगवान् इन्द्र की आज्ञा नहीं टाली जा सकती। इसलिए अमात्य पिशुन को यह सब समाचार सुनाकर मेरी जबानी उनसे कह देना कि—

जब तक मेरा धनुष उधर दूसरे काम में फँसा हुआ है, तब तक तुम अपनी बुद्धि से ही प्रजा का पालन करो॥ ३२॥

विदूषक—जैसी आपकी आज्ञा। (चला जाता है)

मातलि—आयुष्मान्! रथ पर आरूढ हों।

(राजा रथ पर चढ़ने का अभिनय करते हैं)

(सभी का प्रस्थान)

छठा अङ्क समाप्त।

सप्तमोऽङ्कः

(ततः प्रविशत्याकाशयानेन रथाधिरूढो राजा मातलिश्च)

राजा—मातले! अनुष्ठितनिदेशोऽपि मघवतः सत्क्रियाविशेषादनुपयुक्तमिवात्मानं समर्थये।

मातलिः—(सस्मितम्) आयुष्मन्! उभयमप्यपरितोषं समर्थये।

प्रथमोपकृतं मरुत्वतः प्रतिपत्त्या लघु मन्यते भवान्।
गणयत्यवदानविस्मितो भवतः सोऽपि न सत्क्रियागुणान्॥ १॥

राजा—मातले! मा मैवम्। स खलु मनोरथानामप्यभूमिर्विसर्जनावसरसत्कारः। मम हि दिवौकसां समक्षमर्धासनोपवेशितस्य—

अन्तर्गतप्रार्थनमन्तिकस्थं जयन्तमुद्वीक्ष्य कृतस्मितेन।
आमृष्टवक्षोहरिचन्दनाङ्क मन्दारमाला हरिणा पिनद्धा॥ २॥

मातलिः—किमिव नामायुष्मानमरेश्वरान्नार्हति। पश्य—

सुखपरस्य हरेरुभयैः कृतं त्रिदिवमुद्धृतदानवकण्टकम्।
तव शरैरधुना नतपर्वभिः पुरुषकेसरिणश्च पुरा नखैः॥ ३॥

राजा—अत्र खलु शतक्रतोरेव महिमा स्तुत्यः।

(विमान पर आरूढ़ राजा दुष्यन्त और मातलि का प्रवेश)

राजा—मातलि! मैंने तो भगवान् इन्द्र की आज्ञा का पालनमात्र किया था, किन्तु उन्होंने जैसा मेरा स्वागत-सत्कार किया, उसके योग्य मैं अपने को नहीं समझता।

मातलि—(मुस्कराकर) आयुष्मन्! मैं तो समझता हूँ कि आप दोनों का मन एक-दूसरे का आदर करके भरा नहीं है।

राजन्! इन्द्र का इतना बड़ा उपकार करके भी आप जो अपनी सेवा को तुच्छ समझते हैं, वह इसलिए कि आप भगवान् इन्द्र को महत्त्व देना चाहते हैं। वे भी आपकी वीरता से इतने आश्चर्य में पड़ गये हैं कि आपका ऐसे धूमधाम से सम्मान करके भी वे समझते हैं कि आपका समुचित आदर हो नहीं सका॥ १॥

राजा—मातलि! नहीं यह बात नहीं है। वहाँ से चलते समय मेरा जो सम्मान हुआ है, उसकी तो कोई कल्पना ही नहीं कर सकता। देवताओं के सामने ही उन्होंने मुझे अपने आधे आसन पर बिठा लिया और—

अपनी छाती पर शोभा देती हुई हरिचन्दन लगी यह मन्दार-माला अपने गले से उतारकर मुस्कराते हुए मेरे गले में डाल दी, जिसे पाने के लिए उनका पुत्र जयन्त ललचाया हुआ था॥ २॥

मातलि—ऐसा कौन-सा सम्मान है, जो देवराज इन्द्र के हाथों आप नहीं पा सकते। देखिए—

सदा सुखमय जीवन बितानेवाले इन्द्र के लिए दो ही तो ऐसे महापुरुष हैं, जिन्होंने स्वर्ग से राक्षसरूपी काँटे उखाड़ फेंके हैं। एक तो थे नृसिंह भगवान्, जिन्होंने अपने नखों से देवताओं के शत्रु हिरण्यकशिपु का पेट फाड़ डाला था और दूसरे आप हैं, जिन्होंने इस बार अपने अवनत जोड़वाले बाणों से शत्रुओं को परास्त किया है॥ ३॥

राजा—यह सब तो भगवान् इन्द्र की स्तुत्य महिमा का फल है। क्योंकि—

सिध्यन्ति कर्मसु महत्स्वपि यन्नियोज्याः सम्भावनागुणमवेहि तमीश्वराणाम्।
किं वाऽभविष्यदरुणस्तमसां विभेत्ता तं चेत्सहस्रकिरणो धुरि नाकरिष्यत्॥ ४॥

मातलिः—सदृशमेवैतत्। (स्तोकमन्तरमतीत्य) आयुष्मन्! इतः पश्य नाकपृष्ठप्रतिष्ठितस्य सौभाग्यमात्मयशसः।

विच्छित्तिशेषैः सुरसुन्दरीणां वर्णैरमी कल्पलतांऽशुकेषु।
विचिन्त्य गीतक्षममर्थजातं दिवौकसस्त्वच्चरितं लिखन्ति॥ ५॥

राजा—मातले! असुरसम्प्रहारोत्सुकेन पूर्वेद्युर्दिवमधिरोहता मया न लक्षितः स्वर्गमार्गः। कतमस्मिन्मरुतां पथि वर्तामहे?

मातलिः—

त्रिस्रोतसं वहति यो गगनप्रतिष्ठां ज्योतींषि वर्तयति च प्रविभक्तरश्मिः।
तस्य द्वितीयहरिविक्रमनिस्तमस्कं वायोरिमं परिवहस्य वदन्ति मार्गम्॥ ६॥

राजा—मातले! अतः खलु सबाह्यान्तःकरणो ममान्तरात्मा प्रसीदति। (रथाङ्गमवलोक्य) मेघपदवीमवतीर्णौ स्वः।

मातलिः—कथमवगम्यते।

राजा—

अयमरविवरेभ्यश्चातकैर्निष्पतद्भिर्हरिभिरचिरभासां तेजसा चानुलिप्तैः।
गतमुपरि घनानां वारिगर्भोदराणां पिशुनयति रथस्ते सीकरक्लिन्ननेमिः॥ ७॥

यदि कोई सेवक बड़ा काम करके आये तो वह यही समझेगा कि स्वामी ने यह काम सौंपकर उसे जो बड़ा भारी सम्मान दिया था, तो उसी का फल है। यदि सूर्य अपने आगे अरुण को न बिठाये तो भला अरुण में इतनी शक्ति कहाँ कि वे अँधेरे को दूर कर सके॥ ४॥

मातलि—ऐसी बातें कहना आपका बड़प्पन है **(थोड़ी दूर आगे चलकर)** आयुष्मन्! इधर स्वर्ग में फैला हुआ अपने यश का प्रताप तो देखिए।

देवता लोग आपके पराक्रम के गीत बना-बनाकर कल्पवृक्ष से बने कपड़ों पर उन रंगों से लिख रहे हैं, जो अप्सराओं के सिंगार से बचे रह गये थे॥ ५॥

राजा—मातलि! आते समय मैं राक्षसों से युद्ध करने के ध्यान में इतना तन्मय था कि स्वर्ग का मार्ग भलीभाँति देखा ही नहीं। यह तो बताइए कि इस समय हम लोग पवन के किस मार्ग में चल रहे हैं?

मातलि—यह वही मार्ग है जिसे लोग कहते हैं कि वामन भगवान् ने अपने दूसरे पग से नापकर पवित्रकर दिया है। यहाँ परिवह नाम का वह पवन चलता है, जिसमें आकाशगंगा बहती हैं और जो अपनी वायु-धाराओं से नक्षत्रों को सन्तुलित रखता है॥ ६॥

राजा—मातलि! इसी से भीतरी और बाहरी सब इन्द्रियों के साथ-साथ मेरी अन्तरात्मा भी प्रसन्न हो उठी है। **(रथ के पहिए को देखते हुए)** अब हम आकाश के उस भाग पर आ गये हैं, जहाँ बादल चला करते हैं।

मातलि—यह आपने कैसे जाना?

राजा—जलकणों से भीगा हुआ आपके रथ का धुरा ही यह बतला रहा है कि हम जलभरे मेघों के ऊपर चल रहे हैं। बिजली की चमक से घोड़े भी चमक उठे हैं और रथ के पहियों के अरों के बीच से निकल-निकलकर चातक इधर-उधर उड़ रहे हैं॥ ७॥

मातलिः—क्षणादायुष्मान् स्वाधिकारभूमौ वर्तिष्यते।

राजा—(अधोऽवलोक्य) मातले! वेगावतरणादाश्चर्यदर्शनः संलक्ष्यते मनुष्यलोकः। तथा हि—

शैलानामवरोहतीव शिखरादुन्मज्जतां मेदिनी
पर्णस्वान्तरलीनतां विजहति स्कन्धोदयात्पादपाः।
सन्तानैस्तनुभावनष्टसलिला व्यक्तिं भजन्त्यापगाः
केनाप्युत्क्षिपतेव पश्य भुवनं मत्पार्श्वमानीयते॥८॥

मातलिः—साधु दृष्टम्। (सबहुमानमवलोक्य) अहो! उदाररमणीया पृथिवी।

राजा—मातले! कतमोऽयं पूर्वापरसमुद्रावगाढः कनकरसनिष्यन्दी सान्ध्य इव मेघपरिधिः सानुमानालोक्यते?

मातलिः—आयुष्मन्! एष खलु हेमकूटो नाम किम्पुरुषपर्वतस्तपःसंसिद्धिक्षेत्रम्। पश्य—

स्वायम्भुवान् मरीचेर्यः प्रबभूव प्रजापतिः।
सुरासुरगुरुः सोऽत्र सपत्नीकस्तपस्यति॥९॥

राजा—तेन ह्यनतिक्रमणीयानि। श्रेयांसि प्रदक्षिणीकृत्य भगवन्तं गन्तुमिच्छामि।

मातलिः—प्रथमः कल्पः।

(नाट्येनावर्तार्णौ)

राजा—(सविस्मयम्)

उपोढशब्दा न रथाङ्गनेमयः प्रवर्तमानं न च दृश्यते रजः।
अभूतलस्पर्शतयानिरुद्धतस्तवावतीर्णोऽपि रथो न लक्ष्यते॥१०॥

मातलि—क्षण भर में ही आयुष्मन् अपने राज्य की भूमि पर पहुँच जायेंगे।

राजा—(नीचे देखकर) मातलि! वेग से उतरने के कारण नीचे का मनुष्यलोक कितना विचित्र दीख रहा है। क्योंकि—

ऐसा लगता है कि मानों धरती पहाडों की ऊँची चोटियों मे नीचे उतर रही है, पत्तों में छिपी हुई वृक्ष की शाखाएँ अब दीखती जा रही हैं, दूर से पतली दीखने वाली नदियाँ चौड़ी होती जा रही हैं और पृथ्वी इस प्रकार ऊपर उठी चली आ रही है, जैसे कोई इसे ऊपर उछाल रहा है॥८॥

मातलि—ठीक देखा आपने। (आदर से देखकर) वाह! पृथिवी कैसी सुहावनी दीख रही है।

राजा—मातलि! बताओ, यह पूर्व और पश्चिम के समुद्रों तक फैला हुआ, सुनहरी धारा बहानेवाला और सन्ध्या के मेघों की परिधि के समान लम्बा-चौडा कौन-सा पहाड़ है?

मातलि—आयुष्मन्! यह तो हेमकूट पर्वत है, जिसमें किन्नर लोग रहते हैं और जहाँ तपस्या करनेवालों को शीघ्र ही सिद्धि प्राप्त हो जाया करती है। देखिए—

यहाँ देवताओं और दानवों के पिता स्वयम्भू मरीचि के पुत्र प्रजापति कश्यप अपनी पत्नी के साथ रहते हुए तप कर रहे हैं॥९॥

राजा—तब तो हाथ में आया हुआ ऐसा सौभाग्य नहीं छोडना चाहिए। मै चाहता हूँ कि भगवान् कश्यप की प्रदक्षिणा करता चलूँ।

मातलि—यह तो आपने ठीक सोचा है।

(दोनों उतरने का अभिनय करते हैं)

राजा—(आश्चर्य से)

मातलिः—एतावानेव शतक्रतोरायुष्मतश्च विशेषः।

राजा—मातले! कतरस्मिन्प्रदेशे मारीचाश्रमः।

मातलिः—(हस्तेन दर्शयन्)

वल्मीकार्धनिमग्नमूर्तिरुरसा सन्दष्टसर्पत्वचा
कण्ठे जीर्णलताप्रतानवलयेनात्यर्थसम्पीडितः।
अंसव्यापि शकुन्तनीडनिचितं बिभ्रज्जटामण्डलं
यत्र स्थाणुरिवाचलो मुनिरसावभ्यर्कबिम्बं स्थितः॥ ११॥

राजा—नमोऽस्मै कष्टतपसे।

मातलिः—(संयतप्रग्रहं रथं कृत्वा) महाराज! एतावदितिपरवर्धितमन्दारवृक्षं प्रजापतेराश्रमं प्रविष्टौ स्वः।

राजा—स्वर्गादधिकतरं निर्वृतिस्थानम्। अमृतह्रदमिवावगाढोऽस्मि।

मातलिः—(रथं स्थापयित्वा) अवतरत्वायुष्मान्।

राजा—(अवतीर्य) मातले! भवान्कथमिदानीम्?

मातलिः—संयन्त्रितो मया रथः। वयमप्यवतरामः। (तथा कृत्वा) इत आयुष्मन्। (परिक्रम्य) दृश्यन्तामत्रभवतामृषीणां तपोवनभूमयः।

राजा—ननु विस्मयादवलोकयामि।

प्राणानामनिलेन वृत्तिरुचिता सत्कल्पवृक्षे वने
तोये काञ्चनपद्मरेणुकपिशे धर्माभिषेकक्रिया।

अरे! तुम्हारा रथ कब नीचे उतर आया, यह तो पता ही नहीं चला। क्योंकि पृथ्वी के संस्पर्श से न तो इसके पहियों की घरघराहट सुनाई दी, न धूल उडी और न ही तुमने रास ही खींची॥ १०॥

मातलि—यही तो आयुष्मान् के और इन्द्र के रथ में अन्तर है।

राजा—मातलि! मरीचि के तनय कश्यप का आश्रम किधर है?

मातलि—(हाथ से दिखलाते हुए) वह है कश्यप ऋषि का आश्रम, जहाँ वे ऐसी तपस्या कर रहे हैं कि उनके आधे शरीर पर दीमकों ने बाँबी लगा ली है, छाती पर साँप की केचुलियाँ छितरायी हुई हैं, गले में सूखी बेलें उलझी हैं, कन्धों तक लटकी हुई जटाओं में चिड़ियों ने घोंसले बना रखे हैं और सूखे पेड की ठूँठ सदृश अचल होकर वे सूर्य पर आँखें जमाये हुए बैठे हैं॥ ११॥

राजा—ऐसी कठोर तपस्या करनेवाले महात्मा को प्रणाम है।

मातलि—(रास खींच तथा रथ रोककर) महाराज! अतिति द्वारा अपने हाथों से लगाये गये सुन्दर मन्दार वृक्षोंवाले प्रजापति काश्यप के आश्रम में हम लोग पहुँच गये हैं।

राजा—यहाँ पर तो स्वर्ग से भी बढकर शान्ति है। ऐसा लगता है कि मानो मैं अमृतकुण्ड में कूद पड़ा हूँ।

मातलि—(रथ रोककर) उतरें आयुष्मन्!

राजा—(उतरकर) मातलि! अब आप क्या करेंगे?

मातलि—मैंने भलीभाँति रथ रोक लिया है। मैं भी आपके साथ ही उतर रहा हूँ। (उतरकर) इधर से आइए आयुष्मन्! (घूमकर) आइए, यहाँ ऋषि की तपोभूमि देखिए।

राजा—मुझे तो यह देखकर बड़ा विस्मय हो रहा है कि—

ध्यानं रत्नशिलातलेषु विबुधस्त्रीसन्निधौ संयमौ
यत्काङ्क्षन्ति तपोभिरन्यमुनयस्तस्मिंस्तपस्यन्त्यमी ॥ १२ ॥

मातलिः—उत्सर्पिणी खलु महतां प्रार्थना। (परिक्रम्य आकाशे) अये वृद्धशाकल्य! किमनुतिष्ठति भगवान्मारीचः? किं ब्रवीषि? दाक्षायण्या पतिव्रताधर्ममधिकृत्य पृष्टस्तस्यै महर्षिपत्नीसहितायै कथयतीति।

राजा—(कर्ण दत्त्वा) अये! प्रतिपाल्यावसरः खलु प्रस्तावः।

मातलिः—(राजानमवलोक्य) अस्मिन्नशोकवृक्षमूले तावदास्तामायुष्मान्, यावत्त्वामिन्द्रगुरवे निवेदयितुमन्तरान्वेषी भवामि।

राजा—यथा भवान्मन्यते। (इति स्थितः)

मातलिः—आयुष्मन्! साधयाम्यहम्। (इति निष्क्रान्तः)

राजा—(निमित्तं सूचयित्वा)

मनोरथाय नाशंसे किं बाहो! स्पन्दसे वृथा।
पूर्वविधीरितं श्रेयो दुःखं हि परिवर्धते ॥ १३ ॥

(नेपथ्ये) मा खलु चावलं करेहि। कहं गदो जेव अत्तणो पकिदिं? [मा खलु चापलं कुरु। कथं गत एवात्मनः प्रकृतिम्?]

राजा—(कर्ण दत्त्वा) अभूमिरियमविनयस्य। को नु खल्वेष निषिध्यते। (शब्दानुसारेणावलोक्य सविस्मयम्) अये! को नु खल्वयमनुवध्यमानस्तपस्विनीभ्यामबालसत्त्वो बालः?

यहाँ ये तपस्वी उन वस्तुओं के बीच में बैठकर तप कर रहे हैं, जिन्हें पाने के लिए अन्य ऋषि तपस्या किया करते हैं। यहाँ पर ये लोग कल्पवृक्षों के वन की वायु पी-पीकर जीते हैं, सुनहरे कमल के पराग से सुवासित जल में स्नान करके पूजा-पाठ करते हैं, रत्न-शिलाओं पर बैठकर समाधि लगाते हैं और अप्सराओं के बीच में बैठकर संयम साधते हैं ॥ १२ ॥

मातलि—ऐसे महापुरुषों की आकांक्षाएँ भी तो उतनी ही बड़ी होती हैं। (**घूमकर आकाश में**) वृद्ध शाकल्य! इस समय भगवान् कश्यप क्या कर रहे हैं? क्या कहा—दाक्षायणी ने पातिव्रत धर्म के सम्बन्ध में जो प्रश्न किया था, उसका उत्तर वे उन्हें और ऋषि-पत्नियों को दे रहे हैं?

राजा—(**कान लगाकर**) अरे, यह तो ऐसा कथा-प्रसङ्ग छिड़ गया है कि अब इसके समाप्त होने तक रुकना पड़ेगा।

मातलि—(**राजा को देखकर**) जब तक मैं इन्द्र के पिता महर्षि कश्यप को आपके आगमन की सूचना देने का कोई अवसर ढूँढ निकालूँ, तब तक आप इसी अशोक वृक्ष के नीचे बैठिए।

राजा—जैसा आप उचित समझें। (**बैठता है**)

मातलि—आयुष्मान्! अच्छा तो मै जा रहा हूँ (**चला जाता है**)

राजा—(**शुभ शकुन देखकर**)

शकुन्तलाप्राप्ति रूप अपनी अभिलाषा के लिए तो मैं आशा ही नहीं करता, हे बाँह! तब तू व्यर्थ क्यों फड़क रही है? क्योंकि जिस कल्याणकारक वस्तु का पहले तिरस्कार कर दिया जाता है, वह फिर दुःख के रूप में ही बदल जाती है, अर्थात् उसकी पुनः प्राप्ति बड़ी कठिनाई से होती है ॥ १३ ॥

(**नेपथ्य में**) बस, चंचलता न कर। क्यों तू फिर अपने स्वभाव पर उतर आया?

राजा—(**कान लगाकर**) अरे यहाँ तो नटखटपन होना ही नहीं चाहिए, फिर यहाँ कौन किसे डाँट रहा है? (**जिधर से आवाज सुनाई देती है, उधर देखकर आश्चर्य से**) अरे, यह कौन पराक्रमी बालक है जिसके पीछे-पीछे दो तपस्विनियाँ चली आ रही हैं और जो—

अर्धपीतस्तनं मातुरामर्दक्लिष्टकेसरम्।
प्रक्रीडितुं सिंहशिशुं बलात्कारेण कर्षति॥ १४॥

(ततः प्रविशति यथानिर्दिष्टकर्मा तपस्विनीभ्यां सह बालः)

बालः—जिंभ सिंघ! दंताइं दे गणइस्सं। [जृम्भस्व सिंह! दन्तांस्ते गणयिष्ये।]

प्रथमा—अविणीद! किं णो अपच्चणिव्विसेसाणि सत्ताणि विप्पअरेसि? हंत, वड्ढइ दे संरंभो। ठाणे क्खु इसिजणेण सव्वदमणो त्ति किदणामहेओ सि। [अविनीत! किं नोऽपत्यनिर्विशेषाणि सत्त्वानि विप्रकरोषि? हन्त, वर्धते तव संरम्भः। स्थाने खलु ऋषिजनेन सर्वदमन इति कृतनामधेयोऽसि।]

राजा—किं न खलु बालेऽस्मिन्नौरस इव पुत्रे स्निह्यति मे मनः? नूनमनपत्यता मां वत्सलयति।

द्वितीया—एषा क्खु केसरिणी तुमं लंघेदि जइ से पुत्तअं ण मुंचेसि। [एषा खलु केसरिणी त्वां लङ्घयिष्यति यदि तस्याः पुत्रकं न मुञ्चसि।]

बालः—(सस्मितम्) अम्हहे, वलिअं क्खु भीदो म्हि। [अहो, बलीयः खलु भीतोऽस्मि।]

(इत्यधरं दर्शयति)

राजा—
महतस्तेजसो बीजं बालोऽयं प्रतिभाति मे।
स्फुलिङ्गावस्थया वह्निरेधापेक्ष इव स्थितः॥ १५॥

प्रथमा—वच्छ! एदं बालमिइंदअं मुंच। अवरं दे कीलणअं दाइस्सं। [वत्स! एनं बालमृगेन्द्रं मुञ्च। अपरं ते क्रीडनकं दास्यामि।]

बालः—कहिं? देहि णं। [कुत्र? देहि तत्] (इति हस्तं प्रसारयति)

राजा—(बालस्य हस्तमवलोक्य) कथं चक्रवर्तिलक्षणमप्यनेन धार्यते? तथा ह्यस्य—

अपने साथ खेलने के लिए सिंहनी के स्तनों से आधा दूध पिये हुए उस सिंह शावक को बलपूर्वक घसीटे ला रहा है, जिसके केसर इस खींचा-तानी में छितरा गये हैं॥ १४॥

(तदनन्तर ऊपर कही हुई दशा में तपस्विनियों के साथ बालक का प्रवेश)

बालक—खोल रे सिंह! अपना मुँह। मैं तेरे दाँत गिनूँगा।

पहली—अरे ढीठ! जिन पशुओं को हमने अपनी सन्तान के समान पाला है, उन्हें तू क्यों इस तरह सताया करता है? क्या कहें, तेरा नटखटपन दिन-प्रतिदिन बढता ही जा रहा है। ऋषियों ने तेरा नाम सर्वदमन ठीक ही रखा है।

राजा—इस बालक पर मेरे मन में वैसा ही प्रेम उमड़ रहा है, जैसे यह मेरा अपना ही पुत्र हो। किन्तु निपूत होने के कारण ही मेरे मन में ऐसा वात्सल्य भाव उमडा है।

दूसरी—यदि इसके बच्चे को तू नहीं छोड़ेगा तो यह सिंहनी तेरे ऊपर झपट पडेगी।

बालक—(मुस्कराते हुए) अरे! मैं तो बहुत डर गया हूँ। (ओठ निकालकर मुँह बनाता है)

राजा—यह बालक तो मुझे किसी बडे तेजस्वी पुरुष का पुत्र जान पड़ता है। यह उस चिनगारी के रूप में रहनेवाली अग्नि के समान दीख रहा है, जो भडक उठने के लिए ईधन की राह देखती है॥ १५॥

पहली—वत्स! इस सिंह के बच्चे को छोड दे। मै तुझे दूसरा खिलौना ला देती हूँ।

बालक—कहाँ है? लाओ दो। (यह कहकर हाथ फैलाता है)

राजा—(बालक का हाथ देखकर) अरे, इसके हाथ में तो चक्रवर्तियों के लक्षण विद्यमान हैं। क्योंकि—

प्रलोभ्यवस्तुप्रणयप्रसारितो विभाति जालग्रथिताङ्गुलिः करः।
अलक्ष्यपत्रान्तरमिद्धरागया नवोषसा भिन्नमिवैकपङ्कजम्॥ १६॥

द्वितीया—सुव्वदे। ण सक्को एसो वाआमत्तेण विरमयिदुं। गच्छ तुमं। ममकेरए उडए मक्कंडेअस्स इसिकुमारअस्स वण्णंचित्तिदो मित्तिआमोरओ चिट्ठदि। तं से उवहर। [सुव्रते! न शक्य एषो वाचामात्रेण विरमयितुम्। गच्छ त्वम्। मदीये उटजे मार्कण्डेयस्यर्षिकुमारस्य वर्णचित्रितो मृत्तिकामयूरस्तिष्ठति। तमस्योपहर।]

प्रथमा—तह। [तथा।] (इति निष्क्रान्ता)

बालः—इमिणा एव्व दाव कीलिस्सं। [अनेनैव तावत्क्रीडिष्यामि।] (इति तापसीं विलोक्य हसति)

राजा—स्पृहयामि खलु दुर्ललितायास्मै।

आलक्ष्यदन्तमुकुलाननिमित्तहासैरव्यक्तवर्णरमणीयवचःप्रवृत्तीन्।
अङ्काश्रयप्रणयिनस्तनयान्वहन्तो धन्यास्तदङ्गरजसा मलिनीभवन्ति॥ १७॥

तापसी—होदु; ण मं अअं गणेदि। (पार्श्वमवलोकयति) को एत्थ इसिकुमाराणं? (राजानमवलोक्य) भद्दमुह! एहि दाव। मोएहि इमिणा दुम्मोअहत्थग्गहेण डिंभलीलाए बाहीअमाणं बालमिइंदअं। [भवतु; न मामयं गणयति। कोऽत्र ऋषिकुमाराणाम्? भद्रमुख! एहि तावत्। मोचयानेन दुर्मोकहस्तग्रहेण डिम्भलीलया बाध्यमानं बालमृगेन्द्रम्।]

राजा—(उपगम्य सस्मितम्) अयि भो महर्षिपुत्र!

एवमाश्रमविरुद्धवृत्तिना संयमः किमिति जन्मतस्त्वया।
सत्त्वसंश्रयसुखोऽपि दूष्यते कृष्णसर्पशिशुनेव चन्दनः॥ १८॥

खिलौने के लोभ मे फैलाया हुआ यह जाल जैसी मिली हुई अँगुलियोंवाला इसका हाथ उस अकेले कमल के जैसा दीख रहा है, जो प्रातःकाल की लाली मे चमकता हो और जिसकी पंखुडियाँ अभी पूरी तरह मे खुल भी न सकी हों॥ १६॥

दूसरी—सुव्रते! यह मात्र बातों से नहीं फुसलाया जा सकता। तू जा, मेरी कुटी में जो ऋषिकुमार मार्कण्डेय का मिट्टी का रंगीन मोर रक्खा है, उसे उठा ला और इसे दे दे।

पहली—अच्छा। **(जाती है)**

बालक—तब तक मैं इसी से खेलता हूँ। **(यह कह और तपस्विनी को देखकर हँसता है)**

राजा—मुझे तो यह नटखट बालक न जाने क्यों बडा प्यारा लगता है।

वह भाग्यवान् धन्य है, जिसकी गोद में बैठकर स्वभाव से हँसमुख, कली के समान कुछ-कुछ झलकते हुए दाँतों और तुतला-तुतलाकर बातें करनवाले बालक अपने अंग की धूल उसके अंग में लगाकर गन्दा करते हैं॥ १७॥

तपस्विनी—अरे! यह तो मुझे कुछ समझता ही नहीं। **(इधर-उधर देखकर)** अरे कोई ऋषिकुमार यहाँ है? **(राजा को देखकर)** भद्र! जरा आप ही आकर इस बालक के मजबूत हाँथ से इस सिंह के बच्चे को छुड़ा दीजिए।

राजा—**(पास जाकर मुस्कराहट के साथ)** अरे, हे महर्षितनय!

तुम यहाँ आश्रम के नियमों से विपरीत काम क्यों कर रहे हो? ये बेचारे जीव जो जन्म से ही सीधे-साधे रहकर सुखी जीवन बिता रहे हैं। उन्हें तुम इस तरह क्यों सताते हो, जैसे काले सर्प का बच्चा चन्दन के वृक्ष को सताता है॥ १८॥

तापसी—भद्दमुह ! ण क्खु अअं इसिकुमारओ। [भद्रमुख ! न खल्वयमृषिकुमारः।]

राजा—आकारसदृशं चेष्टितमेवास्य कथयति। स्थानप्रत्ययात्तु वयमेवं तर्किणः। (यथाऽभ्यर्थित-मनुतिष्ठन्बालस्पर्शमुपलभ्य, आत्मगतम्)

अनेन कस्यापि कुलाङ्कुरेण स्पृष्टस्य गात्रेषु सुखं ममैवम्।
कां निर्वृतिं चेतसि तस्य कुर्याद्यस्यायमङ्गात्कृतिनः प्ररूढः॥ १९॥

तापसी—(उभौ निर्वर्ण्य) अच्छरिअं। अच्छरिअं। [आश्चर्यमाश्चर्यम्।]

राजा—आर्ये किमिव ?

तापसी—इमस्स बालअस्स दे वि संवादिणी आकिदी त्ति विम्हाविद म्हि। अपरिइदस्स वि दे अप्पडिलोमो संवुत्तो त्ति। [अस्य बालकस्य तेऽपि संवादिन्याकृतिरिति विस्मापितास्मि। अपरिचितस्यापि तेऽप्रतिलोमः संवृत्त इति।]

राजा—(बालकमुपलालयन्) न चेन्मुनिकुमारोऽयम्, अथ कोऽस्य व्यपदेशः ?

तापसी—पुरुवंसो। [पुरुवंशः।]

राजा—(आत्मगतम्) कथमेकान्वयो मम ? अतः खलु मदनुकारिणमेनमत्रभवती मन्यते। अस्त्येतत्पौरवाणामन्त्यं कुलव्रतम्।

भवनेषु रसाधिकेषु पूर्वं क्षितिरक्षार्थमुशन्ति ये निवासम्।
नियतैकपतिव्रतानि पश्चात्तरुमूलानि गृहीभवन्ति तेषाम्॥ २०॥

(प्रकाशम्) न पुनरात्मगत्या मानुषाणामेष विषयः।

तपस्विनी—भद्र ! यह ऋषिपुत्र नहीं है।

राजा—इसके आकार और चेष्टा से ही ज्ञात होता है कि यह ऋषिपुत्र नहीं है। यहाँ तपोवन में देखकर मैंने इसे ऋषिकुमार समझ लिया था। (जी भर बालक के शरीर पर हाथ फेरकर मन ही मन)

पता नहीं यह बालक किस वंश का है। इसे छू लेने से ही जब मेरे शरीर को इतना सुख मिल रहा है, तब उस भाग्यवान् को कितना आनन्द मिलता होगा, जिसका यह अपना पुत्र होगा॥ १९॥

तपस्विनी—(दोनों को देखकर) आश्चर्य है ! आश्चर्य है !!

राजा—आर्ये ! आश्चर्य की क्या बात है ?

तपस्विनी—आपकी और इस बालक की बिल्कुल मिलती-जुलती आकृति देखकर मैं तो आश्चर्य में पड़ गयी हूँ। और फिर देखिए कि अनजान होते हुए भी इसने आपकी बात नहीं टाली।

राजा—(बच्चे को दुलारते हुए तपस्विनी से) अच्छा यह तो बताइये कि यह ऋषिकुमार नहीं है तो फिर किस वंश का है ?

तपस्विनी—पुरुवंश का।

राजा—(मन ही मन) क्या यह मेरे ही वंश का है ? तभी ये तपस्विनी मेरी आकृति से मिलती-जुलती इसकी आकृति बतला रही है। किन्तु पुरुवंशियों की तो यह वंश्य रीति है कि वे—

युवावस्था में पृथ्वी की रक्षा के लिए विलास की सामग्रियों से भरे भवनों में रहना चाहते हैं और बुढ़ापे में अपनी पतिव्रता स्त्री को साथ लेकर वृक्ष के नीचे आसन लगाते हैं॥ २०॥

(प्रकट में) किन्तु यहाँ तो अपनी शक्ति से कोई भी मनुष्य नहीं पहुँच सकता।

तापसी—जह भद्दमुहो भणादि। अच्छरासंबंधेण इमस्स जणणी एत्थ देवगुरुणो तवोवणे प्पसूदा। **[यथा भद्रमुखो भणति। अप्सरःसम्बन्धेनास्य जनन्यत्र देवगुरोस्तपोवने प्रसूता।]**

राजा—(अपवार्य) हन्त, द्वितीयमिदमाशाजननम्। (प्रकाशम्) अथ सा तत्रभवती किमाख्यस्य राजर्षेः पत्नी ?

तापसी—को तस्स धम्मदारपरिच्चाइणो णाम संकीतिदुं चिंतिस्सदि ? **[कस्तस्य धर्मदारपरित्यागिनो नाम सङ्कीर्तयितुं चिन्तयिष्यति ?]**

राजा—(स्वगतम्) इयं खलु कथा मामेव लक्ष्यीकरोति। यदि तावदस्य शिशोर्मातरं नामतः पृच्छामि अथवाऽनार्यः परदारव्यवहारः।

(प्रविश्य मृण्मयूरहस्ता)

तापसी—सव्वदमण ! सउंदलावण्णं पेक्ख। **[सर्वदमन ! शकुन्तलावण्यं प्रेक्षस्व।]**

बालः—(सदृष्टिक्षेपम्) कहिं वा मे अज्जू ? **[कुत्र वा मम माता ?]**

उभे—णामसारिस्सेण वंचिदो माउवच्छलो। **[नामसादृश्येन वञ्चितो मातृवत्सलः।]**

द्वितीया—वच्छ ! इमस्स मित्तिआमोरअस्स रम्मत्तणं देक्ख त्ति भणिदो सि। **[वत्स ! अस्य मृत्तिकामयूरस्य रम्यत्वं पश्येति भणितोऽसि।]**

राजा—(आत्मगतम्) किं वा शकुन्तलेत्यस्य मातुराख्या। सन्ति पुनर्नामधेयसादृश्यानि। अपि नाम मृगतृष्णिकेव नाममात्रप्रस्तावो मे विषादाय कल्पते।

बालः—अज्जुए ! रोअदि मे एसो भद्दमोरओ। **[मातः ! रोचते म एष भद्रमयूरः।]** (इति क्रीडनकमादत्ते)

तपस्विनी—आप जो कह रहे हैं, वह सच है। इसकी माँ एक अप्सरा की कन्या है और उसने यहाँ मरीचि के आश्रम में ही इसे जन्म दिया है।

राजा—(अपने आप) अरे ! यह तो मेरी आशा की दूसरी मंजिल भी मिल गयी। **(प्रकट में)** अच्छा तो वे देवी किस राजर्षि की पत्नी हैं ?

तपस्विनी—जिसने अपनी धर्म-पत्नी को छोड दिया भला ऐसे पापी का नाम भी कोई अपने मुँह से लेने की बात सोचेगा ?

राजा—(स्वगत) यह बात तो मुझ पर ही लागू होती है। अच्छा, उसके माता-पिता का नाम पूछूँ। किन्तु पराई स्त्री के विषय में कुछ पूछना ठीक नहीं है।

(हाथ में मिट्टी का मोर लिये हुए प्रवेश कर)

तपस्विनी—सर्वदमन ! शकुन्त-लावण्य (इस पक्षी की सुन्दरता) तो देख।

बालक—(चारों ओर देखकर) कहाँ है मेरी माँ ?

दोनों—अपनी माँ पर इसे ऐसा स्नेह है कि उसके नाम के सदृश अक्षर सुनते ही इसे धोखा हो गया।

दूसरी—वत्स ! मैंने कहा था कि तुम इस मिट्टी के मोर की सुन्दरता देखो।

राजा—(मन ही मन) तो क्या इसकी माता का नाम शकुन्तला है। किन्तु संसार में एक जैसे अनेकों के नाम होते हैं। सम्भव है कि यह नाम भी मेरे दुःख को और बढाने के लिए मृग-तृष्णा के समान ही आ गया हो।

बालक—माँ ! यह मोर तो मुझे बड़ा अच्छा लगता है। **(खिलौना ले लेता है)**

प्रथमा—(विलोक्य सोद्वेगम्) अम्हहे, रक्खाकरंडअं से मणिबंधे ण दीसदि। [अहो, शाकरण्डकमस्य मणिबन्धे न दृश्यते।]

राजा—अलमलमावेगेन। नन्विदमस्य सिंहशावविमर्दात्परिभ्रष्टम्। (इत्यादातुमिच्छति)

उभे—मा खु एदं अवलंबिअ। कहं गहीदं णेण ? [मा खल्विदमवलम्बय। कथं गृहीतमनेन ?]

(इति विस्मयादुरोनिहितहस्ते परस्परमवलोकयतः)

राजा—किमर्थं प्रतिषिद्धाः स्मः ?

प्रथमा—सुणादु महाराओ। एसा अवराजिदा णाम ओसही इमस्स जातकम्मसमए भअवदा मारीएण दिण्णा। एदं किल मादापिदरो अप्पाणं च वज्जिअ अवरो भूमिपडिदं ण गेण्हादि। [शृणोतु महाराजः। एषाऽपराजिता नामौषधिरस्य जातकर्मसमये भगवता मारीचेन दत्ता। एतां किल मातापितरावात्मानं च वर्जयित्वाऽपरो भूमिपतितां न गृह्णाति।]

राजा—अथ गृह्णाति।

प्रथमा—तदो तं सप्पो भविअं दंसइ। [ततस्तं सर्पो भूत्वा दशति।]

राजा—भवतीभ्यां कदाचिदस्याः प्रत्यक्षीकृता विक्रिया ?

उभे—अणेअसो। [अनेकशः।]

राजा—(सहर्षम्, आत्मगतम्) कथमिव सम्पूर्णमपि मे मनोरथं नाभिनन्दामि ? (इति बालं परिष्वजते)

द्वितीया—सुव्वदे! एहि। इमं वुत्तंतं णिअमव्वावुडाए सउंदलाए णिवेदेम्ह। [सुव्रते! एहि। इमं वृत्तान्तं नियमव्यापृतायै शकुन्तलायै निवेदयावः।] (इति निष्क्रान्ते)

बालः—मुंच मं। जाव अज्जुए सआसं गमिस्सं। [मुञ्च माम्। यावन्मातुः सकाशं गमिष्यामि।]

पहली—(देखकर घबराहट के साथ) अरे, इसके हाथ में बँधी हुई रक्षा की जड़ी नहीं दीख रही है।

राजा—घबराइये नहीं। सिंह के बच्चे से खींचा-तानी करते समय वह यहीं गिर पडी थी।

(उठाना चाहता है)

दोनों—हाँ-हाँ उसे छुइए मत। अरे, इन्होंने तो उसे उठा लिया।

(आश्चर्य से छाती पर हाथ रखकर एक-दूसरी को निहारती हैं)

राजा—आप लोगों ने मुझे इसे उठाने से क्यों रोका ?

पहली—सुनिये महाराज! जब इसका जातकर्म-संस्कार हो रहा था, उस समय भगवान् मरीचि ने अपराजिता नाम की यह जडी इसके हाथ में बाँधकर कहा था कि यदि यह पृथ्वी पर गिर पडे तो इसके माता-पिता के सिवाय दूसरा कोई इसे न उठाये।

राजा—यदि उठा ले तो क्या होगा ?

पहली—तो यह जडी साँप बनकर तत्काल उसे डँस लेगी।

राजा—आप लोगों ने इसे कभी ऐसा करते देखा है ?

दोनों—बहुत बार।

राजा—(सहर्ष, मन ही मन) तब मैं अपना मनोरथ पूर्ण होने पर क्यों न आनन्दित होऊँ।

(यह सोचकर बालक को छाती से लगाता है)

दूसरी—सुव्रते! आओ, यह समाचार उस तपस्विनी शकुन्तला को सुना दें। (चली जाती है)

बालक—छोडो, हम अपनी माँ के पास जायेंगे।

राजा—पुत्रक ! मया सहैव मातरमभिनन्दिष्यसि।

बालः—मम क्खु तादो दुस्संदो। ण तुमं। [मम खलु तातो दुष्यन्तः। न त्वम्।]

राजा—(सस्मितम्) एष विवाद एव प्रत्याययति।

(ततः प्रविशत्येकवेणीधरा शकुन्तला)

शकुन्तला—विआरआले वि पकिदित्थं सव्वदमणस्स ओसहिं सुणिअ ण मे आसा आसि अत्तणो भाअहेएसु। अहवा जह साणुमदीए आचक्खिदं तह संभावीअदि एदं। [विकारकालेऽपि प्रकृतिस्थां सर्वदमनस्यौषधिं श्रुत्वा न म आशाऽऽसीदात्मनो भागधेयेषु। अथवा यथा सानुमत्याऽऽख्यातं तथा सम्भाव्यत एतत्।]

राजा—(शकुन्तलां विलोक्य) अये ! सेयमत्रभवती शकुन्तला। यैषा—

वसने परिधूसरे वसाना नियमक्षाममुखी धृतैकवेणिः।
अतिनिष्करुणस्य शुद्धशीला मम दीर्घं विरहव्रतं बिभर्ति॥ २१॥

शकुन्तला—(पश्चात्तापविवर्णं राजानं दृष्ट्वा) ण क्खु अज्जउत्तो विअ। तदो को एसो दाणिं किदरक्खामंगलं दारअं मे गत्तसंसग्गेण दूसेदि। [न खल्वार्यपुत्र इव। ततः कं एष इदानीं कृतरक्षा-मङ्गलं दारकं मे गात्रसंसर्गेण दूषयति।]

बालः—(मातरमुपेत्य) अज्जुए ! एसो को वि पुरिसो मं पुत्त त्ति आलिंगदि। [मातः ! एष कोऽपि पुरुषो मां पुत्र इत्यालिङ्गति।]

राजा—प्रिये ! क्रौर्यमपि मे त्वयि प्रयुक्तमनुकूलपरिणामं संवृत्तम्, यदहमिदानीं त्वया प्रत्यभिज्ञातमात्मानं पश्यामि।

राजा—वत्स ! मेरे ही साथ चलकर अपनी माता को आनन्दित करना।

बालक—तुम नहीं, मेरे पिता तो दुष्यन्त हैं।

राजा—(मुस्कराकर) यह विवाद ही मेरे विश्वास को पक्का कर रहा है।

(तदनन्तर बालों को एक लट में बाँधे हुए शकुन्तला का प्रवेश)

शकुन्तला—सर्वदमन के हाथ से गिरी हुई रक्षा की जड़ी उनके छूने पर साँप नहीं बनी, यह सुनकर भी मुझे अपने भाग्य पर भरोसा नहीं हुआ अथवा मानुमती ने जो कहा है, सम्भवतः वह ठीक ही हो।

राजा—(शकुन्तला को देखकर) अरे ! ये ही तो देवी शकुन्तला हैं—

जिनके शरीर पर मैले कपड़ों का जोड़ा पड़ा हुआ है, तप करते-करते जिनका मुँह सूख गया है, जिनके बाल एक लट में उलझे हुए हैं और जो शुद्ध मन मे मुझ जैसे निर्दयी के वियोग में इतने दिनों से विरह व्रत का पालन कर रही हैं॥ २१॥

शकुन्तला—(पछतावे से उदास मुख राजा को देखकर) ये तो आर्यपुत्र जैसे नहीं दीखते। तब ये कौन हैं, जो रक्षा जडी बाँधे हुए मेरे पुत्र को अपने शरीर मे चिपकाकर अपनी देह मलिन कर रहे हैं।

बालक—(माता के पास आकर) देखो माँ, ये कोई पुरुष मुझे बेटा कहकर मुझे गले लगा रहे हैं।

राजा—प्रिये ! मैंने जो तुम्हारे साथ क्रूरता की थी, उसका यही उचित दंड है कि जो तुम अब तक मुझे नहीं पहचान रही हो।

शकुन्तला—(आत्मगतम्) हिअअ ! समस्सस समस्सस। परिच्चत्तमच्छरेण अणुअप्पिअं म्हि देव्वेण। अज्जउत्तो क्खु एसो। [हृदय! समाश्वसिहि समाश्वसिहि। परित्यक्तमत्सरेणानुकम्पितास्मि दैवेन। आर्यपुत्रः खल्वेषः।]

राजा—प्रिये !

स्मृतिभिन्नमोहतमसो दिष्ट्या प्रमुखे स्थिताऽसि मे सुमुखि !
उपरागान्ते शशिनः समुपगता रोहिणीयोगम्॥ २२॥

शकुन्तला—जेदु जेदु अज्जउत्तो···। [जयतु जयत्वार्यपुत्र···] (इत्यर्धोक्ते वाष्पकण्ठी विरमति)

राजा—सुन्दरि !

वाष्पेण प्रतिषिद्धेऽपि जयशब्दे जितं मया।
यत्ते दृष्टमसंस्कारपाटलोष्ठपुटं मुखम्॥ २३॥

बालः— आज्जुए ! को एसो ? [मातः ! क एषः ?]

शकुन्तला—वच्छ ! दे भाअहेआइं पुच्छेहि। [वत्स ! ते भागधेयानि पृच्छ।]

राजा—(शकुन्तलायाः पादयोः प्रणिपत्य)

सुतनु ! हृदयात्प्रत्यादेशव्यलीकमपैतु ते
किमपि मनसः सम्मोहो मे तदा बलवानभूत्।
प्रबलतमसामेवम्प्रायाः शुभेषु हि प्रवृत्तयः
स्रजमपि शिरस्यन्धः क्षिप्तां धुनोत्यहिशङ्कया॥ २४॥

शकुन्तला—उट्ठेदु अज्जउत्तो। णूणं मे सुअरिअप्पडिबंधअं पुराकिदं तेसु दिअहेसु परिणाममुहं आसि जेण साणुक्कोसो वि अज्जउत्तो मइ विरसो संवत्तो। [उत्तिष्ठत्वार्यपुत्रः। नूनं मे सुचरितप्रतिबन्धकं पुराकृतं तेषु दिवसेषु परिणाममुखमासीद्येन सानुक्रोशोऽप्यार्यपुत्रो मयि विरसः संवृत्तः।]

शकुन्तला—(मन ही मन) मेरे हृदय! धीरज धरो, धीरज धरो। आज देव ने पिछला सब वैर भुलाकर मुझपर कृपा की है। वस्तुतः ये हीं तो हैं मेरे आर्यपुत्र।

राजा—प्रिये ! मेरा बडा सौभाग्य है कि मेरी स्मृति पर पडा हुआ मोह का परदा हट गया और तुम आज मुझे वैसे हीं मिल गई, जैसे चन्द्रग्रहण बीत जाने पर रोहिणी चन्द्रमा से जा मिलती है॥ २२॥

शकुन्तला—जय हो आर्यपुत्र, जय···· (आधा वाक्य कहने पर ही गला भर आने के कारण रुक जाती है)

राजा—सुन्दरी ! तुमने अपने अश्रुरुद्ध कण्ठ से जो जय शब्द कहा है, उसी से मेरी जीत हो गयी। क्योंकि आज मेरी आँखों ने तुम्हारे उस मुंह को फिर से देखा है, जिसके ओठ रंगे न जाने के कारण पीले पड़ गये हैं॥ २३॥

बालक—माँ ! ये कौन हैं ?

शकुन्तला—पुत्र ! यह अपने भाग्य से पूछो।

राजा—(शकुन्तला के पैरों पड़कर)

सुन्दरी ! मैंने तुम्हारा जो निरादर किया था, उस पीड़ा को तुम अपने मन से निकाल दो। क्योंकि उस समय न जाने कैसे मेरे मन पर अज्ञान का अन्धकार छा गया था। जो तमोगुणी होते हैं, वे अच्छे कामों में भी ऐसी भूल कर गुजरते हैं। क्योंकि यदि अन्धे के गले में कोई माला भी पहनाये तो वह उसे साँप समझकर झटके से उतार फेंकता है॥ २४॥

(राजोत्तिष्ठति)

शकुन्तला—अह कहं अज्जउत्तेण सुमरिदो दुक्खभाई अअं जणो ? [अथ कथमार्यपुत्रेण स्मृतो दुःखभाग्ययं जनः ?]

राजा—उद्धृतविषादशल्यः कथयिष्यामि।

मोहान्मया सुतनु ! पूर्वमुपेक्षितस्ते यो वाष्पबिन्दुरधरं परिबाधमानः।
तं तावदाकुटिलपक्ष्मविलग्नमद्य वाष्पं प्रमृज्य विगतानुशयो भवेयम्॥ २५॥

(इति यथोक्तमनुतिष्ठति)

शकुन्तला—(नाममुद्रां दृष्ट्वा) अज्जउत्त! एदं दे अंगुलीअअं। [आर्यपुत्र! इदं तेऽङ्गुलीयकम्।]

राजा—अस्मादङ्गुलीयोपलम्भात्खलु स्मृतिरुपलब्धा।

शकुन्तला—विसमं किदं णेण जं तदा अज्जउत्तस्स पच्चअकाले दुल्लहं आसि। [विषमं कृतमनेन यत्तदाऽऽर्यपुत्रस्य प्रत्ययकाले दुर्लभमासीत्।]

राजा—तेन ह्युतुसमवायचिह्नं प्रतिपद्यतां लताकुसुमम्।

शकुन्तला—ण से विस्ससामि। अज्जउत्तो एव्व णं धारेदु। [नास्य विश्वसिमि। आर्यपुत्र एवैतद्धारयतु।]

(ततः प्रविशति मातलिः)

मातलिः—दिष्ट्या धर्मपत्नीसमागमेन पुत्रमुखदर्शनेन चायुष्मान्वर्धते।

शकुन्तला—उठिए आर्यपुत्र। उन दिनों पिछले जन्म का कोई पाप उदित हो गया होगा कि जिसने इतने दयालु आर्यपुत्र भी मुझपर इतने कठोर बन गये थे।

(राजा उठते हैं)

शकुन्तला—किन्तु यह तो बतलाइए कि आर्यपुत्र को इस दुखिया का स्मरण कैसे हो आया?

राजा—पहले मैं अपने जी से विषाद का काँटा निकालूँ, तब कुछ कहूँ।

सुन्दरी! तुम्हारी आँखों के आँसुओं की जो बूँदें उस दिन गालों पर से ढुलक-ढुलककर तुम्हारे अधरों को चोट पहुँचा रही थीं और जिनका मैंने उस दिन अनजाने निरादर कर दिया था, वे आज भी तुम्हारी टेढ़ी बरौनियों में उलझी हुई दीख रही हैं। उन्हें जब मैं अपने हाथ से पोंछ लूँगा, तभी मेरे मन को शान्ति मिलेगी॥ २५॥

(महाराज अपने हाथ से शकुन्तला के आँसू पोंछते हैं)

शकुन्तला—(दुष्यन्त के हाथ में उनकी नामांकित अंगूठी देखकर) आर्यपुत्र! यही तो वह अँगूठी है।

राजा—इसी के मिलने पर तो मुझे सारी बातें स्मरण हो आईं।

शकुन्तला—सचमुच उस समय इनने बहुत अनुचित काम किया था, जब आर्यपुत्र को इसे दिखलाकर विश्वास दिलाने के समय न जाने कहाँ दुर्लभ हो गयी।

राजा—हे कृशोदरी! तुम्हारे अधरपल्लव को पाँड़ित करता हुआ जिस आँसू की बूँद की मैंने पहले अज्ञानवश उपेक्षा कर दी थी, तुम्हारी तिरछी पलकों में लगे हुए उस आँसू को पोंछ कर पहले मैं पश्चात्ताप रहित हो जाना चाहता हूँ॥ २५॥

शकुन्तला—नहीं, अब मै इसका विश्वास नहीं करती। आर्यपुत्र ही इसे पहने रहें।

राजा—अभूत्सम्पादितस्वादुफलो मे मनोरथः। मातले! न खलु विदितोऽयमाखण्डलेन वृत्तान्तः स्यात्।

मातलिः—(सस्मितम्) किमीश्वराणां परोक्षम्। एत्वायुष्मान्; भगवान्मारीचस्ते दर्शनं वितरति।

राजा—शकुन्तले! अवलम्ब्यतां पुत्रः। त्वां पुरस्कृत्य भगवन्तं द्रष्टुमिच्छामि।

शकुन्तला—हिरिआमि अज्जउत्तेण सह गुरुसमीवं गंतुं। [जिह्रम्यार्यपुत्रेण सह गुरुसमीपं गन्तुम्।]

राजा—अप्याचरितव्यमभ्युदयकालेषु। एह्येहि।

(सर्वे परिक्रामन्ति)

(ततः प्रविशत्यदित्या सार्धमासनस्थो मारीचः)

मारीचः—(राजानमवलोक्य) दाक्षायणि!

पुत्रस्य ते रणशिरस्ययमग्रयायी दुष्यन्त इत्यभिहितो भुवनस्य भर्ता।
चापेन यस्य विनिवर्तितकर्म जातं तत्कोटिमत्कुलिशमाभरणं मघोनः॥ २६॥

अदितिः—संभावणीआणुभावा से आकिदी। [सम्भावनीयानुभावाऽस्याकृतिः।]

मातलिः—आयुष्मन्! एतौ पुत्रप्रीतिपिंशुनेन चक्षुषा दिवौकसां पितरावायुष्मन्तमवलोकयतः। तावुपसर्प।

(तदनन्तर मातलि का प्रवेश)

मातलि—अपनी धर्मपत्नी से मिलने और पुत्र का मुँह देखने की आयुष्मान् को बधाई है।

राजा—मेरे मनोरथ को तो सचमुच बडा मीठा फल प्राप्त हुआ है। मातलि! किन्तु इन्द्र भगवान् को तो इस बात का पता न होगा।

मातलि—(हँसकर) देवताओं से भी भला कोई बात छिपी रहती है। आइये आयुष्मन्! भगवान् मारीच आपको दर्शन देना चाहते हैं।

राजा—शकुन्तला! बालक की अँगुली पकड लो। मैं तुम्हें अपने साथ लेकर ही भगवान् के दर्शनार्थ चलना चाहता हूँ।

शकुन्तला—आर्यपुत्र के साथ बड़ों के पास जाने में मुझे तो लाज लग रही है।

राजा—हर्ष के समय तो साथ ही चला जाता है। आओ, आओ।

(सभी घूमते हैं)

(अदिति के साथ आसन पर बैठे हुए कश्यप दिखायी देते हैं)

मारीच—(राजा को देखकर) दाक्षायणी!

ये ही समस्त संसार के पालक राजा दुष्यन्त हैं, जो तुम्हारे पुत्र इन्द्र की लड़ाई में सबसे आगे रहते हैं और इनके धनुष ने ही इतना काम कर डाला है कि इन्द्र का तीखी धारवाला वज्र उनका आभूषणमात्र रह गया है॥ २६॥

अदिति—इनके आकार से ही इनके पराक्रम का पता चल रहा है।

मातलि—आयुष्मन्! देखो, ये ही हैं देवताओं के माता-पिता, जो आपकी ओर ऐसे प्रेम से देख रहे हैं, जैसे सगे माता-पिता अपने बच्चों को देखते हैं। जाओ, उनके पास चले जाओ।

राजा—मातले! एतौ—

प्राहुर्द्विशघा स्थितस्य मुनयो यत्तेजसः कारणं
भर्तारं भुवनत्रयस्य सुषुवे यद्यज्ञभागेश्वरम्।
यस्मिन्नात्मभुवः परोऽपि पुरुषश्चक्रे भवायास्पदं
द्वन्द्वं दक्षमरीचिसम्भवमिदं तत्प्रष्टुरेकान्तरम्॥ २७॥

मातलिः—अथ किम्?

राजा—(उपगम्य) उभाभ्यामपि वासवनियोज्यो दुष्यन्तः प्रणमति।

मारीचः—वत्स! चिरं जीव। पृथिवीं पालय।

अदितिः—वच्छ! अप्पडिरहो होहि। [वत्स! अप्रतिरथो भव।]

शकुन्तला—दारअसहिदा वो पादवंदणं करेमि। [दारकसहिता वां पादवन्दनं करोमि।]

मारीचः—वत्से!

आखण्डलसमो भर्ता जयन्तप्रतिमः सुतः।
आशीरन्या न ते योग्या पौलोमीसदृशी भव॥ २८॥

अदितिः—जादे! भत्तुणो अभिमदा होहि। अवस्सं दीहाऊ वच्छओ उहअकुलणंदणो होदु। उवविसह। [जाते! भर्तुरभिमता भव। अवश्यं दीर्घायुर्वत्सक उभयकुलनन्दनो भवतु। उपविशत।]

(सर्वे प्रजापतिमनित उपविशन्ति)

मारीचः—(एकैकं निर्दिशन्)

दिष्ट्या शकुन्तला साध्वी सदपत्यमिदं भवान्।
श्रद्धा वित्तं विधिश्चेति त्रितयं तत्समागतम्॥ २९॥

राजा—मातलि! क्या, ये वे ही स्त्री-पुरुष हैं।

जो ब्रह्मा से एक पीढ़ी बाद दक्ष और मरीचि से उत्पन्न हुए हैं, जिन्हें ऋषिगण बारहों सूर्यों के जनक मानते हैं, यज्ञ में भाग लेनेवाले इन्द्र ने जिनसे जन्म पाया है और स्वयंभू ब्रह्मा संसार के कल्याणार्थ जिनसे जन्म लेते हैं?॥ २७॥

मातलि—और क्या! ये वे ही हैं।

राजा—(पास जाकर) सदा इन्द्र की आज्ञा का पालन करनेवाला यह दुष्यन्त आप दोनों को प्रणाम कर रहा है।

मारीच—वत्स! जीते रहो और बहुत दिनों तक पृथ्वी का पालन करो।

अदिति—वत्स! तुम इतने बलवान् होओ कि कोई शत्रु तुम्हारे रथ को न रोक सके।

शकुन्तला—अपने पुत्र के साथ मैं भी आपके चरणों में प्रणाम करती हूँ।

मारीच—वत्से! तुम्हारा पति स्वतः इन्द्र जैसा है और पुत्र जयन्त के समान है। इसलिए तुम्हें और आशीर्वाद क्या दूँ। तथापि मेरा यही आशीष है कि तुम इन्द्राणी के समान होओ॥ २८॥

अदिति—बेटी! तुम सदा अपने पति का आदर पाओ और तुम्हारा पुत्र चिरंजीवी होकर दोनों कुलों को सुख दे। बैठ जाओ।

(सभी प्रजापति के चारों ओर बैठ जाते हैं)

मारीच—(एक-एक करके सबको संकेत करते हुए)

राजा—भगवन्! प्रागभिप्रेतसिद्धिः पश्चाद्दर्शनम्। अतोऽपूर्वः खलु वोऽनुग्रहः। कुतः—

उदेति पूर्वं कुसुमं ततः फलं घनोदयः प्राक् तदनन्तरं पयः।
निमित्तनैमित्तिकयोरयं क्रमस्तव प्रसादस्य पुरस्तु सम्पदः॥ ३०॥

मातलिः—एवं विधातारः प्रसीदन्ति।

राजा—भगवन्! इमामाज्ञाकरीं वो गान्धर्वेण विवाहविधिनोपयम्य कस्यचित्कालस्य बन्धुभिरानीतां स्मृतिशैथिल्यात्प्रत्यादिशन्नपराद्धोऽस्मि तत्रभवतो युष्मत्सगोत्रस्य कण्वस्य। पश्चादङ्गुलीयकदर्शनाद्दूढपूर्वा तद्दुहितरमवगतोऽहम्। तच्चित्रमिव मे प्रतिभाति।

यथा गजो नेति समक्षरूपे तस्मिन्नपक्रामति संशयः स्यात्।
पदानि दृष्ट्वा तु भवेत्प्रतीतिस्तथाविधो मे मनसो विकारः॥ ३१॥

मारीचः—वत्स! अलमात्मापराधशङ्कया। सम्मोहोऽपि त्वय्यनुपपन्नः। श्रूयताम्।

राजा—अवहितोऽस्मि।

मारीचः—यदैवाप्सरस्तीर्थावतरणात्प्रत्यक्षवैक्लव्यां शकुन्तलामादाय मेनका दाक्षायणीमुपगता तदैव ध्यानादवगतोऽस्मि दुर्वाससः शापादियं तपस्विनी सहधर्मचारिणी त्वया प्रत्यादिष्टा नान्यथेति। स चायमगुङ्लीयकदर्शनावसानः।

सौभाग्यवश आज पतिव्रता शकुन्तला, यह श्रेष्ठ बालक और तुम तीनों ऐसे मिल गये हो जैसे श्रद्धा, धन और कर्म तीनों एक साथ मिल गये हों॥ २९॥

राजा—भगवन्! आपकी अनोखी कृपा से दर्शन के पहले ही मनचाहा फल मिल गया। क्योंकि—

कार्य और कारण का तो यही क्रम है कि पहले फूल लगता है, तब फल आता है। पहले बादल उठते हैं, तब वर्षा होती है। किन्तु आपके यहाँ तो सभी सुख आपकी कृपा से आगे-आगे चला करते हैं॥ ३०॥

मातलि—भाग्यविधाताओं की कृपा ऐसी ही होती है।

राजा—भगवन्! आपकी आज्ञाकारिणी कन्या शकुन्तला के साथ मैंने गान्धर्व विवाह कर लिया था। कुछ दिनों बाद जब इनके सगे-सम्बन्धी इन्हें मेरे पास लाये, तब मेरी स्मृति लुप्त हो गयी और मैं इन्हें बिल्कुल भूल गया। जिससे मैंने इनको लौटा दिया। ऐसा करके मैं आपके सगोत्र भगवान् कण्व का बडा भारी अपराध कर बैठा। फिर जब मैंने यह अँगूठी देखी, तब मुझे स्मरण हुआ कि मैंने तो महर्षि कण्व की कन्या से विवाह किया था। ये सब बातें बडी विचित्र लग रही हैं।

मेरी यह भूल ठीक वैसी ही है, जैसे आँख के सामने विद्यमान हाथी को देखकर मन में यह सन्देह हो कि यह हाथी है या नहीं और उसके चले जाने पर पैरों की छाप देखकर यह विश्वास हो जाय कि 'वह सचमुच हाथी ही था'॥ ३१॥

मारीच—वत्स! तुम अपने अपराध की बात एकदम मन मे निकाल दो। क्योंकि ऐसी भूल तुमसे हो ही नहीं सकती। सुनो, मैं बतलाता हूँ।

राजा—सुन रहा हूँ भगवन्।

मारीच—बिलखती हुई मेनका शकुन्तला को लेकर जब अप्सरातीर्थ से यहाँ दाक्षायणी अदिति के पास आयी, तभी मैंने ध्यान से जान लिया था कि दुर्वासा के शाप से ही तुमने अपनी इस तपस्विनी धर्मपत्नी को त्यागा है और वह शाप तब तक के लिए है, जब तक कि तुम वह अँगूठी न देख लो।

राजा—(सोच्छ्वासम्) एष वचनीयान्मुक्तोऽस्मि।

शकुन्तला—(स्वगतम्) दिट्ठिआ अकारणपच्चादेसी ण अज्जउत्तो। ण हु सत्तं अत्ताणं सुमिरेमि। अहवा पत्तो मए स हि सावो विरहसुण्णहिअआए ण विदिदो। अदो सहीहिं संदिट्ठम्हि भत्तुणो अंगुलीअअं दंसइदव्वं त्ति। [दिष्ट्याऽकारणप्रत्यादेशी नार्यपुत्रः। न खलु शप्तमात्मानं स्मरामि। अथवा प्राप्तो मया स हि शापो विरहशून्यहृदयया न विदितः। अतः सखीभ्यां सन्दिष्टाऽस्मि भर्तुरङ्गुलीयकं दर्शयितव्यमिति।]

मारीचः—वत्से! विदितार्याऽसि। तदिदानीं सहधर्मचारिणं प्रति न त्वया मन्युः कार्यः। पश्य—

शापादसि प्रतिहता स्मृतिरोधरूक्षे भर्तर्यपेततमसि प्रभुता तवैव।
छाया न मूर्च्छति मलोपहतप्रसादे शुद्धे तु दर्पणतले सुलभावकाशा॥ ३२॥

राजा—यथाऽऽह भगवान्।

मारीचः—वत्स! कच्चिदभिनन्दितस्त्वया विधिवदस्माभिरनुष्ठितजातकर्मा पुत्र एष शाकुन्तलेयः।

राजा—भगवन्! अत्र खलु मे वंशप्रतिष्ठा। (इति बालं हस्तेन गृह्णाति)

मारीचः—तया भाविनमेनं चक्रवर्तिनमवगच्छतु भवान्। पश्य—

रथेनानुद्घातस्त्रिमितगतिना तीर्णजलधिः
पुरा सप्तद्वीपां जयति वसुधामप्रतिरथः।
इहायं सत्त्वानां प्रसभदमनात् सर्वदमनः
पुनर्यास्यत्याख्यां भरत इति लोकस्य भरणात्॥ ३३॥

राजा—(ठण्डी साँस लेकर) चलो, अपयश से छुटकारा तो मिला।

शकुन्तला—(मन ही मन) बड़े भाग्य की बात है कि आर्यपुत्र ने मुझे अकारण नहीं त्यागा था। किन्तु यह नहीं मालूम कि मुझे शाप कब मिला था। यह भी संभव है कि मुझे शाप मिला हो और विरह की धुन में पड़े रहने के कारण मुझे उसका पता ही न चला हो। यह बात अब मेरी समझ में आ रही है कि चलते समय सखियों ने यह क्यों कहा था कि पति को अँगूठी दिखला देना।

मारीच—वत्से! तुमने ठीक समझा। अब कभी तुम अपने पति पर क्रोध न करना। देखो—

जैसे धूल पड़ी रहने से दर्पण पर ठीक से छाया नहीं दिखलाई देती और वही जब पोंछ दिया जाता है, तब छाया आसानी से दीखने लगती है। वैसे ही शाप के कारण स्मृति धुँधली पड़ जाने पर इन्होंने तुम्हें छोड़ दिया था, किन्तु अब शाप छूट जाने से इन्होंने तुम्हें महारानी बना लिया है॥ ३२॥

राजा—आप ठीक कहते हैं भगवन्।

मारीच—वत्स! शकुन्तला के जिस पुत्र का जातकर्म-संस्कार हमने विधिवत् किया है, उसका तुमने अभिनन्दन किया या नहीं?

राजा—भगवन्! यही बालक तो हमारा वंश चलायेगा। (यह कहकर बालक को गोद में ले लेते हैं)

मारीच—यह तुम्हारा वंश तो चलायेगा ही, साथ ही चक्रवर्ती राजा भी होगा। देखो—

यह बालक अपने सीधे चलनेवाले रथ से समुद्र पार करके सातों द्वीपोंवाली पृथ्वी को अकेला ही जीत लेगा। संसार का कोई वीर इसके सामने न टिक पायेगा। यहाँ इसने सब जीवों को दबोच

राजा—भगवता कृतसंस्कारे सर्वमस्मिन्वयमाशास्महे।

अदितिः—भअवं! इमाए दुहिदुमणोरहसंपत्तीए कण्णो वि दाव सुदवित्थारो करीअदु। दुहिदुवच्छला मेणआ इह एव्व उपचरंती चिट्ठदि। [भगवन्! अनया दुहितृमनोरथसम्पत्त्या कण्वोऽपि तावच्छ्रुतविस्तारः क्रियताम्। दुहितृवत्सला मेनकेहैवोपचरन्ती तिष्ठति।]

शकुन्तला—(आत्मगतम्) मणोरहो क्खु मे भणिदो भअवदीए। [मनोरथः खलु मे भणितो भगवत्या।]

मारीचः—तपःप्रभावात्प्रत्यक्षं सर्वमेव तत्रभवतः।

राजा—अतः खलु मम नातिक्रुद्धो मुनिः।

मारीचः—तथाप्यसौ प्रियमस्माभिः श्रावयितव्यः। कः कोऽत्र भोः ?

(प्रविश्य)

शिष्यः—भगवन्! अयमस्मि।

मारीचः—गालव! इदानीमेव विहायसा गत्वा मम वचनात्तत्रभवते कण्वाय प्रियमावेदय यथा पुत्रवती शकुन्तला तच्छापनिवृत्तौ स्मृतिमता दुष्यन्तेन प्रतिगृहीतेति।

शिष्यः—यदाज्ञापयति भगवान्। (इति निष्क्रान्तः)

मारीचः—वत्स! त्वमपि स्वापत्यदारसहितः सख्युराखण्डलस्य रथमारुह्य ते राजधानीं प्रतिष्ठस्व।

राजा—यदाज्ञापयति भगवान्।

रक्खा था, इसीलिए इसका नाम 'सर्वदमन' पड गया था। आगे चलकर यह समस्त संसार का भरण-पोषण करेगा। इसीलिए इसका नाम भरत होगा॥ ३३॥

राजा—जिसका संस्कार स्वयं आपने किया हो, उससे हमें इन्हीं सब बातों की आशा है।

अदिति—भगवन्! इस कन्या की कामना पूर्ण होने की बात महर्षि कण्व को भी कहला भेजिये। क्योंकि इसे प्यार करनेवाली इसकी माँ मेनका हम लोगों की सेवा करती हुई यहाँ ही रहती है।

शकुन्तला—**(मन ही मन)** देवी ने मेरे मन की बात कही है।

मारीच—अपने तप के प्रभाव से महामुनि कण्व सब कुछ प्रत्यक्ष देखते हैं।

राजा—इसलिए उन्होंने मुझ पर क्रोध नहीं किया।

मारीच—फिर भी यह प्रिय समाचार उनके पास कहला ही भेजना चाहिए। अरे कोई है ?

(प्रवेश कर)

शिष्य—भगवन्! उपस्थित हूँ।

मारीच—गालव! तुम अभी आकाशमार्ग से जाकर मेरी ओर से कण्व को यह प्रिय समाचार सुना दो कि शाप छूट जाने पर दुष्यन्त ने स्मरण करके शकुन्तला और उसके पुत्र को स्वीकार कर लिया है।

शिष्य—भगवन् की जैसी आज्ञा। **(चला जाता है)**

मारीच—*वत्स! अब तुम भी पुत्र और स्त्री के साथ अपने मित्र इन्द्र के रथ पर चढकर अपनी* राजधानी को चले जाओ।

राजा—भगवन् की जैसी आज्ञा।

मारीचः—अपि च

भवतु तव बिडौजाः प्राज्यवृष्टिः प्रजासु
त्वमपि वितनयज्ञो वज्रिणं भावयेथाः।
गणशतपरिवर्तैरेवमन्योन्यकृत्यै-
र्नियतमुभयलोकानुग्रहश्लाघनीयैः ॥ ३४॥

राजा—भगवन्! यथाशक्ति श्रेयसे यतिष्ये।

मारीचः—वत्स! किं ते भूयः प्रियमुपकरोमि?

राजा—अतः परमपि प्रियमस्ति। यदिह भगवान्प्रियं कर्तुमिच्छति तर्हीदमस्तु।

(भरतवाक्यम्)

प्रवर्ततां प्रकृतिहिताय पार्थिवः सरस्वती श्रुतिमहती महीयताम्।
ममापि च क्षपयतु नीललोहितः पुनर्भवं परिगतशक्तिरात्मभूः ॥ ३५॥

(इति निष्क्रान्ताः सर्वे)

॥ इति सप्तमोऽङ्कः ॥

॥ समाप्तमिदमभिज्ञानशाकुन्तलं नाम नाटकम् ॥

मारीच—और सुनो—

तुम्हारी प्रजा के लिए इन्द्र भरपूर वर्षा करें और तुम भी सैकड़ों गणतन्त्रों पर राज्य करते हुए बहुतेरे यज्ञ करके सदा इन्द्र को प्रसन्न रखो। इस प्रकार तुम दोनो एक-दूसरे के लिए ऐसे अच्छे-अच्छे काम करो कि दोनों लोक सुखी रह सकें॥ ३४॥

राजा—भगवन्! मैं यथाशक्ति अच्छे काम करने का प्रयत्न करूँगा।

मारीच—वत्स! यदि तुम्हारी और कुछ इच्छा हो तो वह भी कह डालो।

राजा—इससे बढकर भी क्या कोई बात हो सकती है? तथापि यदि आप मुझपर कुछ और कृपा करना चाहते हों तो ऐसा कीजिए कि—

(भरतवाक्य)

राजा सदा अपनी प्रजा की भलाई में लगे रहें, बड़े-बडे विद्वान् कवियों की वाणी का सर्वत्र आदर हो और अपने से ही उत्पन्न होकर चारों ओर अपनी शक्ति फैलानेवाले महादेवजी ऐसी कृपा करें कि मुझे फिर जन्म न लेना पड़े॥ ३५॥

(सभी चले जाते हैं)

सातवाँ अङ्क समाप्त।



'अनुत्सेकः खलु विक्रमालङ्कारः'

विक्रमोर्वशीयम्

डॉ० ब्रह्मानन्द त्रिपाठी

पात्र-परिचय

पुरुष-पात्र

सूत्रधार	: अभिनय का प्रारम्भकर्त्ता, नट।
पारिपार्श्वक	: सूत्रधार का सहायक।
पुरूरवा	: नाटक का नायक, चन्द्रवंशी, प्रतिष्ठानपुर का राजा।
माणवक	: राजा का मित्र विदूषक।
आयुष्कुमार	: राजा का उर्वशी से उत्पन्न हुआ पुत्र।
चित्ररथ	: गन्धर्वराज।
नारद	: देवर्षि।
गालव पेलव	: भरत मुनि के शिष्य।
सूत	: राजा का सारथि।
लातव्य	: राजा का कञ्चुकी।

स्त्री-पात्र

उर्वशी	: नाटक की नायिका, अप्सरा।
चित्रलेखा	: उर्वशी की प्रिय सखी
औशीनरी	: काशिराजदुहिता, पटरानी।
रम्भा मेनका सहजन्या	: अप्सराएँ।
निपुणिका	: महारानी की दासी।
तापसी	: सत्यवती, आयुष्कुमार की धात्री।
यवनी	: राजा की परिचारिका।
चेटी	: राजसेविका।

॥ श्रीः ॥

विक्रमोर्वशीयम्

प्रथमोऽङ्कः

वेदान्तेषु यमाहुरेकपुरुषं व्याप्य स्थितं रोदसी
यस्मिन्नीश्वर इत्यनन्यविषयः शब्दो यथार्थाक्षरः।
अन्तर्यश्च मुमुक्षुभिर्नियमितप्राणादिभिर्मृग्यते
स स्थाणुः स्थिरभक्तियोगसुलभो निःश्रेयसायाऽस्तु वः॥ १॥

(नान्द्यन्ते)

सूत्रधारः—अलमतिविस्तरेण। (नेपथ्याभिमुखमवलोक्य) मारिष! इतस्तावत्।

(प्रविश्य)

पारिपार्श्वकः—भाव! अयमस्मि।

सूत्रधारः—मारिष! परिषदेषा पूर्वेषां कवीनां दृष्टरसप्रबन्धा। अहमस्यां कालिदासग्रथितवस्तुना नवेन विक्रमोर्वशीयनामधेयेन त्रोटकेनोपस्थास्ये। तदुच्यतां पात्रवर्गः स्वेषु स्वेषुपाठेष्ववहितैर्भवितव्यमिति।

वेदान्तों (द्वैत, अद्वैत, विशिष्टाद्वैत आदि) में जिसे एक ऐसा पुरुष कहा गया है, जो आकाश तथा पृथ्वी में व्याप्त है, जिसका ईश्वर यह नाम सार्थक है और इस ईश्वर नाम से अन्य कोई नहीं पुकारा जा सकता, मोक्षप्राप्ति के इच्छुक पुरुष जिसे प्राणायाम द्वारा अपने हृदय के भीतर ढूँढा करते हैं, वह स्थिर भक्तियोग (सच्ची भक्ति) द्वारा प्राप्त होने वाला परमदेव शिव आप सबका कल्याण करें॥ १॥

(नान्दीपाठ के अन्त में)

सूत्रधार—अब अधिक विस्तार मत करो। (नेपथ्य की ओर देखकर) मारिष! इधर आओ।

(प्रवेश करके)

पारिपार्श्वक—आर्य! मैं आ गया।

सूत्रधार—मारिष! यह सभा प्राचीन कवियों के अनेक नाटकों के रसों का आस्वादन कर चुकी है। आज मैं इसे कालिदास द्वारा विरचित 'विक्रमोर्वशीय' नामक नये त्रोटक का अभिनय दिखलाना चाहता हूँ, अतः सभी पात्रों को सावधान कर दो कि वे अपनी-अपनी भूमिका का समुचित अभिनय करें।

पारिपार्श्वकः—यथाज्ञापयति भावः। (इति निष्क्रान्तः)

सूत्रधारः—यावदिदानीमार्यविदग्धमिश्रान् विज्ञापयामि। (प्रणिपत्य)

प्रणयिषु वा दाक्षिण्यादथवा सद्वस्तुपुरुषबहुमानात्।
शृणुत जना अवधानात् क्रियामिमां कालिदासस्य॥ २॥

(नेपथ्ये)

अज्जा! परित्ताअध परित्ताअध। जो सुरपक्खवादी, जस्स वा अंवरअले गई अत्थि। [आर्याः! परित्रायध्वं परित्रायध्वम्। यः सुरपक्षपाती यस्य वाऽम्बरतले गतिरस्ति।]

सूत्रधारः—(कर्ण दत्त्वा) अये, किं नु खलु मद्विज्ञापनानन्तरमार्तानां कुररीणामिवाकाशे शब्दः श्रूयते?

मत्तानां कुसुमरसेन षट्पदानां शब्दोऽयं परभृतनाद एष धीरः।
आकाशे सुरगणसेविते समन्तात् किं नार्यः कलमधुराक्षरं प्रगीताः॥ ३॥

(विचिन्त्य) भवतु, ज्ञातम्।

ऊरूद्भवा नरसखस्य मुनेः सुरस्त्री कैलासनाथमनुसृत्य निवर्तमाना।
वन्दीकृता विबुधशत्रुभिरर्धमार्गे क्रन्दत्यतः करुणमप्सरसां गणोऽयम्॥ ४॥

(इति निष्क्रान्तः)

॥ प्रस्तावना ॥

पारिपार्श्वक—जैसी आपकी आज्ञा। (ऐसा कहकर चला जाता है)

सूत्रधार—इस समय तव तक मैं रसास्वादन में चतुर विद्वान् दर्शकों से कुछ निवेदन करता हूँ। (सिर झुकाकर)

सज्जनो! आप सबसे प्रार्थना है कि हम विनम्र सेवकों पर अपनी चतुरता से अथवा इस नाटक के नायक के प्रति विशेष आदर से आप सब कालिदास की इस कृति को सावधान होकर (देखें) तथा सुनें ॥ २॥

(नेपथ्य में)

आर्यो! बचाओ, बचाओ, जो देवताओं का पक्षपाती हो अथवा जिसकी शक्ति आकाश में जाने की हो, वह हमारी रक्षा करे।

सूत्रधार—(कान लगाकर) अरे! यह क्या हुआ, मेरी प्रार्थना के समाप्त होते ही यह आकाश में कुररियों के रोने जैसा शब्द सुनायी दे रहा है?

क्या यह फूलों के रसपान से मदमत्त भौंरों की गुंजार है? अथवा कहीं यह कोयल की नशीली कूक तो नहीं है? अथवा देवताओं द्वारा सेवित आकाश में चारों ओर आयी हुई सुरसुन्दरियाँ मीठी तान तो नहीं छेड़ी हुई हैं? ॥ ३॥

(सोचकर) अच्छा मैंने जान लिया।

नर के मित्र (नारायण) की जाँघ से जो उर्वशी नामक अप्सरा उत्पन्न हुई थी, वह कुबेर की सेवा करके लौट रही थी, उसे आधे मार्ग में ही राक्षस वन्दी बनाकर ले गये, अतएव यह अप्सराओं का समूह रो रहा है और चिल्ला रहा है॥ ४॥

(ऐसा कहकर चला जाता है।)

॥ प्रस्तावना ॥

(ततः प्रविशन्त्यप्सरसः)

अप्सरसः—अज्जा ! परित्ताअध परित्ताअध। जो सुरपक्खवादी जस्स वा अंबरअंले गई अत्थि। [आर्याः ! परित्रायध्वं परित्रायध्वम्। यः सुरपक्षपाती यस्य वाऽम्बरतले गतिरस्ति।]

(ततः प्रविशत्यपटीक्षेपेण राजा पुरूरवा रथेन सूतश्च)

राजा—अलमाक्रन्दितेन। सूर्योपस्थाननिवृत्तं पुरूरवसं मामेत्य कथ्यतां कुतो भवत्यः परित्रातव्या इति।

रम्भा—असुरावलेवादो। [असुरावलेपात्।]

राजा—किं पुनरसुरावलेपेन भवतीनामपराद्धम् ?

रम्भा—सुणादु महाराओ। जा तवोविसेससंकिदस्स सुउमारं पहरणं महेंदस्स, पच्चादेसो रूवगव्विदाए सिरिगोरिए, अलंकारो सग्गस, सा णो पिअसही उव्वसी कुबेरभवणादो णिवत्तमाणा केणावि दाणवेण चित्तलेहादुदीआ अद्धपथं ज्जेव्व बंदिग्गाहं गिहीदा। [शृणोतु महाराजः। याः तपोविशेषशङ्कितस्य सुकुमारं प्रहरणं महेन्द्रस्य, प्रत्यादेशो रूपगर्वितायाः श्रीगौर्याः, अलङ्करः स्वर्गस्य, सा नः प्रियसख्युर्वशी कुबेरभवनान्निवर्तमाना केनापि दानवेन चित्रलेखाद्वितीया अर्धपथ एव बन्दिग्राहं गृहीता।]

राजा—अपि ज्ञायते कतमेन दिग्विभागेन गतः स जाल्मः ?

अप्सरसः—ईसाणीए दिसाए। [ऐशान्या दिशा।]

राजा—तेन हि मुच्यतां विषादः। यतिष्ये वः सखीप्रत्यानयनाय।

अप्सरसः—सरिसं एदं सोमवंससंभवस्स। [सदृशमेतत्सोमवंशसम्भवस्य।]

(उसके बाद ही अप्सराएँ प्रवेश करती हैं।)

अप्सराएँ—आर्यो ! बचाओ, बचाओ, जो देवताओं का पक्षपाती हो अथवा जिसकी शक्ति आकाश में जाने की हो, वह हमारी रक्षा करे।

(तब पर्दा गिराये बिना रथ पर सवार राजा पुरूरवा और सारथी का प्रवेश)

राजा—बस, अब मत रोओ। सूर्योपस्थान करके लौटकर आये हुए मेरे पास आ जाने पर कहिये, किससे आप लोगों को बचाना है ?

रम्भा—राक्षसों के अत्याचार से।

राजा—राक्षसों ने आप लोगों पर क्या अपराध किया है?

रम्भा—सुनिये महाराज ! किसी की विशेष तपस्या से घबडाकर उसे तप से विचलित करने के लिए देवराज इन्द्र जिसे अपना सुकुमार शस्त्र बनाकर भेजते हैं, जिसकी कमनीय कान्ति के आगे लक्ष्मी का सौन्दर्य भी तुच्छ है और जो स्वर्ग की शोभा है, वही हमारी प्यारी सखी उर्वशी जब कुबेर के भवन से लौट रही थी उस समय किसी राक्षस ने उसके साथ आती हुई चित्रलेखा को बन्दी की भाँति पकड़ लिया।

राजा—क्या आप लागों को यह मालूम है कि वह दुष्ट किस दिशा की ओर गया ?

अप्सराएँ—पूर्व-उत्तर के कोण में स्थित ईशान की ओर।

राजा—तब आप लोग चिन्ता न करें। मैं प्रयत्न करता हूँ आपकी सखी को लौटाकर ले आने का।

अप्सराएँ—चन्द्रवंश में उत्पन्न हुए आपके अनुरूप यह कार्य है।

राजा—क्व पुनर्मा भवत्यः प्रतिपालयिष्यन्ति ?

अप्सरसः—एदस्सिं हेमकूडसिहरे। [एतस्मिन् हेमकूटशिखरे।]

राजा—सूत ! ऐशानीं दिशं प्रति चोदयाश्वानाशुगमनाय।

सूतः—यदाज्ञापयत्यायुष्मान्। (इति यथोक्तं करोति)

राजा—(रथवेगं रूपयित्वा) साधु, साधु ! अनेन रथवेगेन पूर्वप्रस्थितं वैनतेयमप्यासादयेयम्, किं पुनस्तमपकारिणं मघोनः ? मम—

अग्रे यान्ति रथस्य रेणुपदवीं चूर्णीभवन्तो घना-
श्चक्रभ्रान्तिररान्तरेषु वितनोत्यन्यामिवारावलीम्।
चित्रारम्भविनिश्चलं हरिशिरस्यायामवच्चामरं
यन्मध्ये समवस्थितो ध्वजपटः प्रान्ते च वेगानिलात्॥५॥

(निष्क्रान्तो रथेन राजा सूतश्च)

सहजन्या—हला ! गदो राएसी। ता अम्हे वि जधासंदिट्ठं पदेसं गच्छम्ह। [हला ! गतो राजर्षिः। तद्वयमपि यथासन्दिष्टं प्रदेशं गच्छामः।]

मेनका—सहि ! एव्वं करेम्ह। [सखि ! एवं कुर्मः।]

(इति हेमकूटशिखरे नाट्येनाधिरोहन्ति)

रम्भा—अवि णाम सो राएसी उद्धरदि णो हिअअसल्लं। [अपि नाम स राजर्षिरुद्धरति नो हृदयशल्यम्।]

मेनका—सहि ! मा दे संसओ भोदु। [सखि ! मा ते संशयो भवतु।]

राजा—आप लोग मेरी कहाँ प्रतीक्षा करेंगी ?

अप्सराएँ—इस हेमकूट पर्वत की चोटी पर।

राजा—सारथी! ईशान कोण की ओर शीघ्र चलने के लिए घोड़ों को हाँको।

सूत—जैसी आपकी आज्ञा। (वैसा ही करता है।)

राजा—(रथ के वेग को देखकर) वाह ! वाह ! इस प्रकार के रथ के वेग से तो हम पहले उड़े हुए गरुड़ को भी पकड़ लेंगे, इन्द्र के शत्रु उस राक्षस को पकड़ने की तो बात ही क्या है ?

मेरा रथ इतने वेग से दौड़ रहा है कि उसकी रगड़ से बादल भी पिसकर धूल जैसे हो गये हैं। इसके पहिये इतने वेग से घूम रहे हैं कि मानो पहियों के अरों (तीलियों) के बीच में और बहुत से अरों की पंक्तियाँ बनती चली जा रही हों। घोड़ों के सिरों के ऊपर लगी हुई चौरियाँ निश्चल खड़ी हैं, मानो ये चित्र में लिखी गयी हों और रथ के वेग से जो हवा चल रही है, उससे रथ का ध्वजपट सीधा फैला हुआ दिखलायी दे रहा है॥५॥

(राजा तथा सारथी रथ द्वारा आगे निकल जाते हैं।)

सहजन्या—सखियो ! राजर्षि चले गये। तो हम भी वहाँ पहुँचें, जहाँ हमने मिलने के लिए कहा था।

मेनका—सखी ! ऐसा ही करते हैं।

(इस प्रकार नाटकीय ढंग से हेमकूट शिखर पर चढ़ती है।)

रम्भा—क्या वे राजर्षि सचमुच हमारे हृदय के काँटे को निकाल पायेंगे ?

मेनका—सखी ! इस विषय में आप सन्देह न करें।

रम्भा—णं दुज्जआ दाणवा। [ननु दुर्जया दानवाः।]

मेनका—उवट्ठिदसंपराओ महिंदो वि मज्झमलोआदो सवहुमाणं आणाविअं तं एव्व विबुधविजआअ सेणामुहे णिओजेदि। [उपस्थितसम्परायो महेन्द्रोऽपि मध्यमलोकात् सबहुमानमानाय्य तमेव विबुधविजयाय सेनामुखे नियुङ्क्ते।]

रम्भा—सव्वहा विअई भोदु। [सर्वथा विजयी भवतु।]

मेनका—(क्षणमात्रं स्थित्वा) हला! समस्ससध समस्ससध। एस उल्लसिदहरिणकेदणो तस्स राएसिणो सोमदत्तो रहो दीसदि। ण एसो अकिदत्थो पडिणिउत्तिस्सदि त्ति तक्केमि। [सख्यः! समाश्वसित समाश्वसित। एष उल्लसितहरिणकेतनस्तस्य राजर्षेः सोमदत्तो रथो दृश्यते। नैषोऽकृतार्थः प्रतिनिवर्तिष्यति इति तर्कयामि।]

(निमित्तं सूचयित्वावलोकयन्त्यः स्थिताः)

(ततः प्रविशति रथारूढो राजा सूतश्च। भयनिमीलिताक्षी चित्रलेखा, दक्षिणहस्तावलम्बिका उर्वशी च)

चित्रलेखा—सहि! समस्सस, समस्सस। [सखि! समाश्वसिहि, समाश्वसिहि।]

राजा—सुन्दरि! समाश्वसिहि—

गतं भयं भीरु! सुरारिसम्भवं त्रिलोकरक्षी महिमा हि वज्रिणः।
तदेतदुन्मीलय चक्षुरायतं निशावसाने नलिनीव पङ्कजम्॥ ६॥

चित्रलेखा—अम्महे, कहं उस्ससिदमेत्तसंभाविदजीविदा अज्ज वि एसा सण्णां ण पडिवज्जदि। [अहो, कथमुच्छ्वसितमात्रसम्भावितजीविता अद्याप्येषा संज्ञां न प्रतिपद्यते।]

रम्भा—यह सच है कि राक्षस आसानी से जीते नहीं जा सकते।

मेनका—तुमको मालूम है, जब युद्ध की स्थिति उत्पन्न हो जाती है तब देवराज इन्द्र भी बड़े आदर के साथ भूलोक से इसी राजा को बुलाकर देवताओं को विजय दिलाने के लिए इन्हें ही अपना सेनापति बनाते हैं।

रम्भा—मैं मनाती हूँ कि उनकी सब प्रकार से जीत हो।

मेनका—(थोड़ी देर रुककर) सखियो! धैर्य रखो, धैर्य रखो। प्रसन्न हरिण जिसकी ध्वजा पर चित्रित है, ऐसे राजर्षि का सोमदत्त नामक रथ दिखलायी दे रहा है। यह सफल हुए बिना नहीं लौटेगा, ऐसा मैं सोच रही हूँ।

(शुभ शकुन को सूचित कर उधर देख रही है।)

(रथ पर बैठे राजा तथा सारथी का प्रवेश)

(डर से आँखें मूँदी हुई चित्रलेखा और उसके दाहिने हाथ का सहारा ली हुई उर्वशी का भी प्रवेश)

चित्रलेखा—सखी! धीरज धरो, धीरज धरो।

राजा—सुन्दरी! धीरज धरो।

अब देवेन्द्र के शत्रुओं (राक्षसों) का कोई डर नहीं है, क्योंकि इन्द्र की महिमा तीनों लोकों की रक्षा करने की है। अतः अब तुम अपनी बड़ी-बड़ी आँखों को उस प्रकार खोलो, जैसे रात्रि के बीत जाने पर कमल खिल जाता है॥ ६॥

चित्रलेखा—आश्चर्य है, उसाँसें लेने मात्र से जिसके जीवित होने की आशा है ऐसी वह अभी तक होश में नहीं आ रही है।

राजा—बलवदत्रभवती परित्रस्ता। तथाहि—

मन्दारकुसुमदाम्ना गुरुरस्याः सूच्यते हृदयकम्पः।
मुहुरुच्छ्वसता मध्ये परिणाहवतोः पयोधरयोः ॥७॥

चित्रलेखा—(सकरुणम्) हला उव्वसि! पज्जवत्थावेहि अत्ताणं। अणच्छरा विअ पडिभासि। [सखि उर्वशि! पर्यवस्थापयात्मानम्। अनप्सरेव प्रतिभासि।]

राजा— **मुञ्चति न तावदस्या भयकम्पः कुसुमकोमलं हृदयम्।**
सिचयान्तेन कथञ्चित्स्तनमध्योच्छ्वासिना कथितः ॥८॥

(उर्वशी प्रत्यागच्छति)

राजा—(सहर्षम्) चित्रलेखे! दिष्ट्या वर्धसे। प्रकृतिमापन्ना ते प्रियसखी। पश्य—

आविर्भूते शशिनि तमसा मुच्यमानेव रात्रि-
र्नैशस्यार्चिर्हुतभुज इव च्छिन्नभूयिष्ठधूमा।
मोहेनान्तर्वरतनुरियं लक्ष्यते मुक्तकल्पा
गङ्गारोधःपतनकलुषा गच्छतीव प्रसादम् ॥९॥

चित्रलेखा—सहि उव्वसि! वीसद्धा भव। आवण्णाणुकंपिणा महाराएण पडिहदा क्खु दे तिदसपरिपंथिणो हदासा दाणवा। [सखि उर्वशि! विस्रब्धा भव। आपन्नानुकम्पिना महाराजेन प्रतिहताः खलु ते त्रिदशपरिपन्थिनो हताशा दानवाः।]

उर्वशी—(चक्षुषी उन्मील्य) किं पहावदंसिणा महिंदेण अब्भुवपट्ठम्हि। [किं प्रभावदर्शिना महेन्द्रेणाभ्युपपन्नास्मि।]

राजा—यह बहुत अधिक डर गयी है। फिर भी—

इसके बड़े-बड़े स्तनों के बीच में पड़ी हुई मन्दारमाला के बार-बार हिलने से मालूम हो रहा है कि इसका हृदय अभी तक काँप रहा है ॥७॥

चित्रलेखा—(दुःखी होकर) सखी उर्वशी! अपने मन को स्थिर करो। इस अधीरता से तो तुम अप्सरा जैसी नहीं लग रही हो।

राजा—इसके स्तनों के ऊपर हिलने वाले वस्त्र से मालूम पड़ रहा है कि इसके कुसुमकोमल हृदय से भय की विभीषिका अभी तक दूर नहीं हुई ॥८॥

(उर्वशी होश में आती है)

राजा—(प्रसन्न होकर) चित्रलेखा! तुम भाग्यवती हो। तुम्हारी प्रिय सखी होश में आ गयी है। देखो—

बेहोशी के दूर हो जाने पर तुम्हारी सखी ऐसी लग रही है, जैसे चन्द्रमा के उदय हो जाने पर अन्धकार से रहित रात हो, अथवा रात के समय धुआँ से रहित आग की लपट हो अथवा गंगा की उस धारा की भाँति जो कगार के गिर जाने से कुछ क्षणों के लिए गँदली होकर फिर निर्मल (पूर्ववत्) हो गयी हो ॥९॥

चित्रलेखा—सखी उर्वशी! आश्वस्त हो जाओ। दीनों पर दया करने वाले महाराज ने देवताओं के शत्रु उन हताश दानवों को मार डाला है।

उर्वशी—(आँखें खोलकर) क्या अपने प्रभाव को दिखलाने वाले इन्द्र ने मेरी रक्षा की है?

चित्रलेखा—ण महिंदेण। महिंदसरिसाणुभावेण राएसिणा पुरूरवसेण। [न महेन्द्रेण। महेन्द्रसदृशानुभावेन राजर्षिणा पुरूरवसा।]

उर्वशी—(राजानमवलोक्य आत्मगतम्) उवकिदं खु दाणवेंदसंरंभेण। [उपकृतं खलु दानवेन्द्रसंरम्भेण।]

राजा—(उर्वशीं विलोक्य आत्मगतम्) स्थाने खलु नारायणमृषिं विलोभयन्त्यस्तदूरुसम्भवामिमां विलोक्य व्रीडिताः सर्वा अप्सरस इति। अथवा नेयं तपस्विनः सृष्टिरित्यवैमि। कुतः—

अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कान्तिप्रदः
शृङ्गारैकरसः स्वयं नु मदनो मासो नु पुष्पाकरः।
वेदाभ्यासजडः कथं नु विषयव्यावृत्तकौतूहलो
निर्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिः॥ १०॥

उर्वशी—हला चित्तलेहे! सहीअणो कहिं खु भवे? [सखि! चित्रलेखे! सखीजनः कुत्र खलु भवेत्?]

चित्रलेखा—सहि! अभअप्पदाई महाराओ जाणादि। [सखि! अभयप्रदायी महाराजो जानाति।]

राजा—(उर्वशीं विलोक्य) महति विषादे वर्तते सखीजनः। पश्यतु भवती—

यदृच्छया त्वं सकृदप्यबन्ध्ययोः पथि स्थिता सुन्दरि! यस्य नेत्रयोः।
त्वया विना सोऽपि समुत्सुको भवेत् सखीजनस्ते किमुदार्द्रसौहृदः॥ ११॥

उर्वशी—(आत्मगतम्) अमिअं खु दे वअणं। अहवा चंदादो अमिअं त्ति किं अच्चरिअं? (प्रकाशम्) अदो एव्व मे पेक्खिदुं तुवरदि हिअअं। [अमृतं खलु ते वचनम्। अथवा चन्द्रादमृतमिति किमाश्चर्यम्? अत एव मे प्रेक्षितुं त्वरते हृदयम्।]

चित्रलेखा—महेन्द्र ने नहीं, अपितु महेन्द्र के समान प्रभावशाली राजर्षि पुरूरवा ने।

उर्वशी—(राजा को देखकर, मन ही मन) तब तो राक्षसों के उपद्रव ने उपकार ही किया है।

राजा—(उर्वशी को देखकर, मन ही मन) यह उचित ही है—नारायण ऋषि को लुभाती हुई अप्सराओं ने जब उनकी जाँघ से पैदा हुई इस उर्वशी को देखा तो वे सब लज्जित हो गयीं। मैं समझता हूँ कि ऐसे सुन्दर रूपवाली सुन्दरी को कोई तपस्वी पैदा ही नहीं कर सकता। क्योंकि—

इसकी रचना करने के लिए या तो कान्ति को देने वाला चन्द्रमा प्रजापति बना होगा, अथवा शृंगार रस के देवता कामदेव ने इसे स्वयं रचा हो, अथवा वसन्त ऋतु ने इसकी रचना की हो; नहीं तो भला बतलाइये वेद का स्वाध्याय करने के कारण जड तथा सांसारिक विषयवासना से दूर रहने वाला प्राचीन मुनि (ब्रह्मा) ऐसी सुन्दर आकृति का निर्माण कैसे कर पाता॥ १०॥

उर्वशी—सखी चित्रलेखा! हमारी सखियाँ इस समय कहाँ होंगी?

चित्रलेखा—सखी! अभयदान देने वाले महाराज ही जानते होंगे।

राजा—(उर्वशी को देखकर) आपकी सखियाँ अत्यन्त दुःखी है। आप देखिये—

यदि आपको कोई दैवयोग से एक बार भी देख ले तो वह भी आपको देखे बिना व्याकुल हो जायेगा, फिर आपके प्रेमरस में सनी हुई आपकी सखियों के बारे में तो कहा ही क्या जा सकता है?॥ ११॥

उर्वशी—(मन ही मन) आपके वचन अमृत (के समान) हैं। अथवा यदि चन्द्रमा से अमृत

राजा—(हस्तेन दर्शयन्)

एताः सुतनु मुखं ते सख्यः पश्यन्ति हेमकूटगताः।
उत्सुकनयना लोकाश्चन्द्रमिवोपप्लवान्मुक्तम्॥ १२॥

(उर्वशी साभिलाषं पश्यति)

चित्रलेखा—हला! किं पेक्खसि? [सखि! किं प्रेक्षसे?]

उर्वशी—णं समदुक्खगदो पिवीअदि लोअणेहिं। [ननु समदुःखगतः पीयते लोचनाभ्याम्।]

चित्रलेखा—(सस्मितम्) अइ को? [अयि कः?]

उर्वशी—णं पणइअणो। [ननु प्रणयिजनः।]

रम्भा—(सहर्षमवलोक्य) हला! चित्तलेहादुदीअं पिअसहीं उव्वसीं गेण्हिअ विसाहासहिदो विअ भअवं सोमो समुवट्ठिदो राएसी। [सखि! चित्रलेखाद्वितीयां प्रियसखीमुर्वशीं गृहीत्वा विशाखासहित इव भगवान् सोमः समुपस्थितो राजर्षिः।]

मेनका—(निर्वर्ण्य) हला! दुवे वि णो एत्थ प्पिआ उवणदा। इअं पच्चाणीदा पिअसही, अअं च अपरिक्खदसरीरो राएसी दीसदि। [सखि! द्वे अपि नोऽत्र प्रिये उपनते। इयं प्रत्यानीता प्रियसखी, अयं चापरिक्षतशरीरो राजर्षिर्दृश्यते।]

सहजन्या—सहि! जुत्तं भणासि दुज्जओ दाणओ त्ति। [सखि! युक्तं भणसि दुर्जयो दानव इति।]

राजा—सूत! इदं तच्छैलशिखरम्। अवतारय रथम्।

की बूँदें बरसें तो क्या आश्चर्य है? (प्रकट में) इसीलिए अपनी सखियों के लिए मेरा हृदय उतावला हो रहा है।

राजा—(हाथ के संकेत से दिखलाता हुआ)

हे कृशोदरी! हेमकूट पर्वत पर स्थित ये आपकी सखियाँ उत्सुकतापूर्ण नेत्रों से आपको उस प्रकार देख रही हैं, जैसे लोग ग्रहण से छूटे हुए (अतएव अपनी चन्द्रिका से युक्त) चन्द्रमा को देखते हैं॥ १२॥

(उर्वशी राजा को प्रेमभरी दृष्टि से देखती है)

चित्रलेखा—सखी! क्या देख रही हो?

उर्वशी—अपने दुःख में साथ देने वाले महाराज के सौन्दर्य का दोनों आँखों से पान कर रही हूँ।

चित्रलेखा—(मुस्कराती हुई) अरी! किनको?

उर्वशी—अपने प्रिय जन को।

रम्भा—(प्रसन्नता के साथ देखकर) सखी! चित्रलेखा के साथ प्रिय सखी उर्वशी को लेकर राजर्षि उस प्रकार इधर ही आ रहे हैं, जैसे मानो विशाखा के दो तारों के साथ साक्षात् चन्द्रमा आ रहे हों।

मेनका—(विचार कर) सखी! इस अवसर पर ये दोनों बातें अच्छी हो गयीं। एक तो हमारी सखी सकुशल लौटकर आ गयी और राजर्षि को भी किसी प्रकार की चोट नहीं लगी।

सहजन्या—सखी! यह तुम ठीक कह रही हो, क्योंकि राक्षस को जीतना कठिन होता है।

राजा—सारथी! यह वह पहाड की चोटी है, यहाँ रथ को उतारो।

सूतः—यदाज्ञापयत्यायुष्मान्। (इति तथा करोति)

(उर्वशी रथावतारक्षोभं नाटयन्ती सत्रासं राजानमवलम्बते)

राजा—(स्वगतम्) हन्त! सफलो मे विषमावतारः।

यदिदं रथसङ्क्षोभादङ्गेनाङ्गं ममायतेक्षणया।
स्पृष्टं सरोमकण्टकमङ्कुरितं मन्मथेनेव॥ १३॥

उर्वशी—हला! किं वि परदो ओसर। [सखि! किमपि परतोऽपसर।]

चित्रलेखा— णाहं सक्केमि। [नाहं शक्नोमि।]

रम्भा— एत्थ पिअआरिणं संभावेम्ह राएसिं। [अत्र प्रियकारिणं सम्भावयामो राजर्षिम्।]

(सर्वा उपसर्पन्ति)

राजा—सूत! उपश्लेषय रथम्—

यावत्पुनरियं सुभ्रूरुत्सुकाभिः समुत्सुका।
सखीभिर्याति सम्पर्कं लताभिः श्रीरिवार्तवी॥ १४॥

(सूतो रथं स्थापयति)

अप्सरसः—दिट्ठिआ महाराओ विजएण वड्ढदि। [दिष्ट्या महाराजो विजयेन वर्धते।]

राजा—भवत्यश्च सखीसमागमेन।

उर्वशी—(चित्रलेखादत्तहस्तावलम्बा रथादवतीर्य) हला! अधिअं परिस्सजह। ण क्खु मे आसी आसासो जहा पुणो वि सहीअणं पेक्खिस्सं त्ति। [सख्यः! अधिकं परिष्वजथ। न खलु मे आसीदाश्वासो यथा पुनरपि सखीजनं प्रेक्षिष्य इति।]

सूत—जैसी आयुष्मान् की आज्ञा। (ऐसा कहकर रथ को उतारता है।)

(उर्वशी रथ के उतरने से उत्पन्न झटके का अभिनय करती हुई डरकर राजा का सहारा लेती है।)

राजा—(मन ही मन) आश्चर्य! इस ऊबड-खाबड भूमि पर रथ का उतरना मेरे लिए सफल ही हुआ। क्योंकि—

रथ के हिलने से इस बडी आँखों वाली सुन्दरी के शरीर मे मेरे शरीर के बार-बार स्पर्श होने पर जो रोमांच हुआ है उससे ऐसा लग रहा है, मानो मेरे शरीर में प्रेम के अंकुर फूट आये हों॥ १३॥

उर्वशी—सखी! थोडा-सा उधर को हट जाओ।

चित्रलेखा—मैं तो नहीं हट सक रही हूँ।

रम्भा—इस अवसर पर अपने ऊपर दया करने वाले राजर्षि का हम लोग स्वागत करें।

(सभी राजा की ओर जाती हैं)

राजा—सारथी! रथ को इनके पास तक ले चलो—

जिससे ये एक-दूसरे से मिलने के लिए उत्सुक सखियाँ परस्पर उस प्रकार मिल सकें, जैसे लताओं से वसन्त काल की शोभा जा मिलती है॥ १४॥

(सारथी उनके पास ले जाकर रथ खड़ा कर देता है)

अप्सराएँ—महाराज को इस विजय के उपलक्ष्य में बधाई है।

राजा—सखियों का परस्पर मिलन होने से आप सब भी बधाई के पात्र हैं।

उर्वशी—(चित्रलेखा के हाथ का सहारा लेकर उतर कर) सखियो! मुझसे भरपूर गले मिल लो। मुझे तो तुम सब से पुनः भेंट होगी, इस बात की आशा ही नहीं थी।

(सख्यः परिष्वजन्ते)

मेनका—(साशंसम्) सव्वहा कप्पसदं महाराओ पुहविं पालअंतो होदु। [सर्वथा कल्पशतं महाराजः पृथिवीं पालयन् भवतु।]

सूतः—आयुष्मन्! पूर्वस्यां दिशि महता रथवेगेनोपदर्शितः शब्दः।

अयञ्च गगनात् कोऽपि तप्तचामीकराङ्गदः।
अधिरोहति शैलाग्रं तडित्वानिव तोयदः॥ १५॥

अप्सरसः—(पश्यन्त्यः) अम्मो, चित्तरहो। [अहो, चित्ररथः।]

(ततः प्रविशति चित्ररथः)

चित्ररथः—(राजानं दृष्ट्वा सबहुमानम्) दिष्ट्या महेन्द्रोपकारपर्याप्तेन विक्रममहिम्ना वर्धते भवान्।

राजा—अये गन्धर्वराजः। (रथादवतीर्य) स्वागतं प्रियसुहृदे।

(परस्परं हस्तौ स्पृशतः)

चित्ररथः—वयस्य! केशिना हृतामुर्वशीं नारदादुपश्रुत्य प्रत्याहरणार्थमस्याः शतक्रतुना गन्धर्वसेना समादिष्टा। ततो वयमन्तरा चारणेभ्यस्त्वदीयं जयोदाहरणं श्रुत्वा त्वामिहस्थमुपागताः। स भवानिमां पुरस्कृत्य सहास्माभिर्मघवन्तं द्रष्टुमर्हति। महत्खलु तत्रभवतो मघोनः प्रियमनुष्ठितं भवता। पश्य—

पुरा नारायणेनेयमतिसृष्टा मरुत्वते।
दैत्यहस्तादपाच्छिद्य सुहृदा सम्प्रति त्वया॥ १६॥

(सखियाँ परस्पर एक-दूसरे के गले मिलती हैं।)

मेनका—(शुभाशंसा करते हुए) महाराज! पृथिवी का आप सौ कल्प तक पालन करते रहें।

सूत—आयुष्मन्! पूर्व दिशा की ओर से वेग से आते हुए किसी रथ का शब्द सुनाई पड रहा है।

यह कोई तपाये हुए सोने से निर्मित बाजूबन्द को धारण किया हुआ इस पर्वत की चोटी पर आकाश से उस प्रकार उतर रहा है, जैसे कोई बिजली वाला बादल हो॥ १५॥

अप्सराएँ—(देखती हुई) अरे! ये तो महाराज चित्ररथ है।

(तदनन्तर चित्ररथ का प्रवेश)

चित्ररथ—(राजा को आदर के साथ देखकर) इन्द्र का उपकार करने में अपने पराक्रम द्वारा समर्थ आपको बधाई है महाराज!

राजा—अरे! आप गन्धर्वराज हैं। (रथ से उतर कर) प्रिय मित्र! आपका स्वागत करता हूँ।

(आपस में दोनों हाथ मिलाते हैं)

चित्ररथ—मित्र! नारद से इन्द्र ने यह सुना कि केशी नामक राक्षस उर्वशी को हरकर ले गया है, तब उन्होंने गन्धर्वों की सेना को यह आज्ञा दी कि तुम उसे छुड़ा लाओ। इसी बीच हमने देखा कि चारण लोगों से आपकी विजय के गीतों को सुनकर हम लोग यहाँ आपके पास चले आये हैं। अब आप इस (उर्वशी) को लेकर हमारे साथ देवराज इन्द्र से मिल लीजिये। इस कार्य द्वारा आपने इन्द्र का बहुत बडा उपकार किया है। देखिये—

पहले नारायण ने इसे उत्पन्न करके इन्द्र को उपहार के रूप में सौंप दिया था, उसी प्रकार आज आपने दैत्य के हाथ से छुड़ाकर मित्र के नाते आप इसे इन्द्र को भेंट कर दीजिये॥ १६॥

राजा—सखे ! मैवम्—

ननु वज्रिण एव वीर्यमेतद् विजयन्ते द्विषतो यदस्य पक्ष्याः।
वसुधाधरकन्दराविसर्पी प्रतिशब्दो हि हरेर्हिनस्ति नागान्॥ १७॥

चित्ररथः—युक्तमेतत्। अनुत्सेकः खलु विक्रमालङ्कारः।

राजा—सखे ! नायमवसरो मम शतक्रतुं द्रष्टुम्। अतस्त्वमेवात्रभवतीं प्रभोरन्तिकं प्रापय।

चित्ररथः—यथा भवान् मन्यते। इत इतो भवत्यः।

(सर्वाः प्रस्थिताः)

उर्वशी—(जनान्तिकम्) हला चित्तलेहे ! उवआरिणं राएसिं ण सक्कणोमि आमंतेदुं। ता तुमं एव्व मे मुहं होहि। [**सखि चित्रलेखे ! उपकारिणं राजर्षिं न शक्नोम्यामन्त्रयितुम्। तत् त्वमेव मे मुखं भव।**]

चित्रलेखा—(राजानमुपेत्य) महाराअ ! उव्वसी विण्णवेदि—महाराएण अब्भणुण्णादा इच्छामि पिअसहिं विअ महाराअस्स कित्तिं सुरलोअं णेदुं। [**महाराज ! उर्वशी विज्ञापयति—महाराजेनाभ्यनुज्ञातेच्छामि प्रियसखीमिव महाराजस्य कीर्तिं सुरलोकं नेतुम्।**]

राजा—*गम्यतां* पुनर्दर्शनाय।

(सर्वाः सगन्धर्वा आकाशोत्पतनं रूपयन्ति)

उर्वशी—(उत्पतनभङ्गं रूपयित्वा) अम्मो ! लदाविडवे एसा एआवली वैआअंतिआ मे लग्गा। (सव्याजमुपसृत्य राजानं पश्यन्ती) सहि चित्तलेहे ! मोआवेहि दाव णं। [**अहो ! लताविटप एषैकावली वैजयन्तिका मे लग्ना। सखि चित्रलेखे ! मोचय तावदेनाम्।**]

राजा—मित्र ! ऐसा मत कहो।

यह सब देवराज इन्द्र के ही पराक्रम का फल है कि उनके मित्र वैसे ही अपने शत्रुओं पर विजय पाते हैं, जैसे पहाड की गुफा मे टकरा कर गूँजती हुई सिंह की दहाड हाथियों को घबड़ा कर भगा देती है॥ १७॥

चित्ररथ—आपका यह कहना उचित ही है। पराक्रमी का अलंकार ही विनय होता है।

राजा—मित्र ! मेरे लिए इन्द्र को देखने का यह अवसर नहीं है। इसलिए आप ही इन्हें (उर्वशी को) महाराज़ इन्द्र के पास पहुँचा दीजिये।

चित्ररथ—जैसा आप उचित समझते हों। आप लोग इधर मे आइये, इधर से।

(सभी चली जाती हैं)

उर्वशी—(अलग से) सखी चित्रलेखा ! मेरे ऊपर उपकार करने वाले राजर्षि से विदाई लेने में मुझे लज्जा आ रही है, अतः तुम्हीं मेरी ओर से विदाई ले लो।

चित्रलेखा—(राजा के समीप जाकर) महाराज ! उर्वशी निवेदन कर रही है कि यदि महाराज की आज्ञा हो तो उनकी कीर्ति को अपनी सखी बनाकर सुरलोक में लेती जाऊँ।

राजा—फिर दर्शन देने के लिए, इस समय जाइये।

(सभी अप्सराएँ गन्धर्वों के साथ आकाश की ओर उडने का अभिनय करती हैं।)

उर्वशी—(उड़ने में बाधा पड़ जाने का अभिनय करके) अरे ! लता की शाखा में मेरी एक लड़ वाली वैजयन्ती माला ही फँस गयी है। (घूमकर राजा को देखती है) सखी चित्रलेखा ! जरा इसे छुड़ा दो।

चित्रलेखा—(विलोक्य विहस्य च) आं, दिढं क्खु लग्गा सा। असक्का मोआविदुं। [आम्, दृढं खलु लग्ना सा। अशक्या मोचयितुम्।]

उर्वशी—अलं पडिहासेन। मोआवेहि दाव णं। [अलं परिहासेन। मोचय तावदेनाम्।]

चित्रलेखा—आं, दुम्मोआ विअ मे पडिहादि। तहा वि मोआविस्सं दाव। [आम्, दुर्मोच्येव मे प्रतिभाति। तथापि मोचयिष्ये तावत्।]

उर्वशी—(स्मितं कृत्वा) पिअसहि! सुमरेहि क्खु एदं अत्तणो वअणं। [प्रियसखि! स्मर खल्वेतदात्मनो वचनम्।]

राजा—(स्वगतम्)

प्रियमाचरितं लते त्वया मे गमनेऽस्याः क्षणविघ्नमाचरन्त्या।
यदियं पुनरप्यपाङ्गनेत्रा परिवृत्तार्धमुखी मया हि दृष्टा॥१८॥

(चित्रलेखा मोचयति। उर्वशी राजानमालोक्यन्ती
सनिःश्वासं सखीजनमुत्पतन्तं पश्यति)

सूतः—आयुष्मन्!

अदः सुरेन्द्रस्य कृतापराधान् प्रक्षिप्य दैत्यांल्लवणाम्बुराशौ।
वायव्यमस्त्रं शरधिं पुनस्ते महोरगः श्वभ्रमिव प्रविष्टम्॥१९॥

राजा—तेन ह्युपश्लेषय रथम्। यावदारोहामि।

(सूतस्तथा करोति। राजा नाट्येन रथमारोहति)

उर्वशी—(सस्पृहं राजानमवलोक्यन्ती) अवि णाम पुणो वि उअआरिणं एदं पेक्खिस्सं? [अपि नाम पुनरप्युपकारिणमेनं प्रेक्षिष्ये?]

चित्रलेखा—(देखकर हँसते हुए) हाँ, यह तो बहुत उलझ गयी है। इसे तो छुड़ाना बड़ा कठिन है।

उर्वशी—अधिक परिहास मत करो। पहले इसे छुड़ा दो।

चित्रलेखा—हाँ, मुझे लगता है यह तो नहीं छुड़ायी जा सकेगी। तो भी मैं छुड़ाने का प्रयत्न करती हूँ।

उर्वशी—(मुस्कुराकर) प्रियसखी! इस अपने वचन को अवश्य याद रखना।

राजा—(मन ही मन में) अरी लता! इसे रोक कर तुमने मेरे ऊपर बड़ी कृपा की, जो मेरी ओर आधा मुख फेर कर देख रही थी। इस बड़े-बड़े नयनों वाली को इसी बहाने मैंने इसे भलीभाँति देख तो लिया॥१८॥

(चित्रलेखा माला को छुड़ा देती है, उर्वशी राजा को देखती हुई लम्बी साँसें लेकर ऊपर की ओर जाती हुई सखियों को देखती है।)

सूत—आयुष्मन्! देवराज इन्द्र के साथ वैर करने वाले राक्षसों को आपका यह वायव्यास्त्र (बाण) आपके तरकस में उस प्रकार लौट आया है, जैसे कोई साँप पुनः अपने बिल में आकर घुस जाता है॥१९॥

राजा—अच्छा, रथ को समीप ले आओ, जिससे मैं चढ़ सकूँ।

(सारथी रथ को समीप ले आता है, राजा चढ़ने का अभिनय करता है।)

उर्वशी—(बड़ी चाह के साथ राजा को देखती हुई) अपने ऊपर उपकार करने वाले महाराज को क्या फिर कभी देख सकूँगी?

(इति सगन्धर्वा सह सखीभिर्निष्क्रान्ता)

राजा—(उर्वशीवर्त्मोन्मुखः) अहो ! दुर्लभाभिलाषी मदनः—

एषा मनो मे प्रसभं शरीरात् पितुः पदं मध्यममुत्पतन्ती।
सुराङ्गना कर्षति खण्डिताग्रात् सूत्रं मृणालादिव राजहंसी॥ २०॥

(इति निष्क्रान्तौ)

इति प्रथमोऽङ्कः।

(इस प्रकार गन्धर्व तथा सखियों के साथ उर्वशी चली जाती है।)

राजा—(उर्वशी के मार्ग की ओर देखता हुआ) आश्चर्य है, कामदेव भी जिसका मिल सकना कठिन होता है, उसी की ओर मन को खींच ले जाता है।

यह देवांगना (उर्वशी) आकाश में उड़कर जाती हुई मेरे शरीर से मेरे मन को उसी प्रकार बलपूर्वक खींचे चली जा रही है, जैसी राजहंसी टूटे हुए कमलनाल से उसका तंतु खींचे चली जा रही हो॥ २०॥

(सभी चले जाते हैं।)

पहला अङ्क समाप्त।

द्वितीयोऽङ्कः

(ततः प्रविशति विदूषकः)

विदूषकः—ही ही भो! णिमंतणिओ परमण्णेण विअ राअरहस्सेण फुट्टमाणो ण सक्कणोमि जनाइण्णे अइण्णणेण अत्तणो जीहं धारिदुं। ता जाव सो राआ धम्मासणगदो इदो आअच्छइ दाव इमस्सिं विरलजणसंवादे देवच्छंदअप्पासादे आरुहिअ चिट्ठिस्सं। (परिक्रम्योपविश्य पाणिभ्यां मुखं पिधाय स्थितः।) [ही ही भोः! निमन्त्रणिकः परमान्नेनेव राजरहस्येन स्फुटन्न शक्नोमि जनाकीर्णेऽकीर्तनानेनात्मनो जिह्वां धारयितुम्। तद्यावत् स राजा धर्मासनगत इत आयाति तावदेतस्मिन् विरलजनसम्पाते देवच्छन्दकप्रासाद आरुह्य स्थास्ये।]

(ततः प्रविशति चेटी)

चेटी—आणत्तम्हि देवीए कासिराअदुहिदाए जधा—हंजे णिउणिए! जदो पहुदि भअवदो सुज्जस्स उंअत्थाणं कदुअ पडिणिउत्तो महाराओ तदो पहुदि सुण्णहिअओ विअ लक्खीअदि। ता तुमं वि दाव अज्जमाणवआदो जाणाहि से उक्कंठाकालणं त्ति। ता कहं सो वम्हवंधु अदिसंधादव्वो। अहवा तणग्गलग्गं विअ अवस्साअसलिलं ण तस्सिं राअरहस्सं चिरं चिट्ठदि त्ति तक्केमि। ता जाव णं अण्णेसामि। (परिक्रम्यावलोक्य च) अम्मो! आलेक्खवाणरो विअ किं पि मंतअंतो णिहुदो अज्जमाणअवो चिट्ठदि। ता जाव णं उवसप्पामि। (उपसृत्य) अज्ज! वंदामि। [आज्ञप्ताऽस्मि देव्या काशिराजदुहित्रा यथा—हञ्जे निपुणिके! यतः प्रभृति भगवतः सूर्यस्योपस्थानं कृत्वा प्रतिनिवृत्तो महाराजस्ततः प्रभृति शून्यहृदय इव लक्ष्यते। तत् त्वमपि तावदार्यमाणवकाज्जानीह्यस्योत्कण्ठाकारणमिति। तत् कथं स ब्रह्मबन्धुरतिसन्धातव्यः। अथवा तृणाग्रलग्नमिवावश्यायसलिलं न तस्मिन् राजरहस्यं चिरं तिष्ठतीति तर्कयामि। तद्यावदेनमन्वेषयामि। अहो! आलेख्यवानर इव किमपि मन्त्रयन्निभृत आर्यमाणवकस्तिष्ठति। तद्यावदेनमुपसर्पामि। आर्य! वन्दे।]

(तदनन्तर विदूषक का प्रवेश)

विदूषक—(घूमकर बैठकर दोनों हाथों से मुख को बन्द कर बैठ जाता है।) ही ही अरे! निमन्त्रण खाने वाले भोजनभट्ट ब्राह्मण का पेट जैसे अधिक खा लेने से फटने लगता है, वैसे ही राजा के प्रेम की गुप्त बात को छिपाये रखने से मेरा भी पेट फटा जा रहा है। अब मैं इतने लोगों की भीड़ में उस गुप्त बात को बिना कहे अपनी जीभ को रोक नहीं पा रहा हूँ। इसलिए जब तक वह राजा धर्मासन (राजसभा) से इधर आये तब तक मैं जहाँ किसी का प्रवेश नहीं हो पाता उस देवच्छन्दक नामक राजमहल में चढकर बैठता हूँ।

(तदनन्तर चेटी का प्रवेश)

चेटी—मुझे काशीनरेश की पुत्री ने आज्ञा दी है, सखी निपुणिका! जब से भगवान् सूर्य की उपासना करके महाराज लौटे हैं तब से वे खोये-खोये-से लग रहे हैं। इसलिये तुम भी इसका कारण आर्य माणवक से जानने का प्रयत्न करो। तो मैं कैसे उस ब्रह्मबन्धु को ठगकर इस बात का पता लगाऊँ? किन्तु मैं सोच रही हूँ, जैसे घास के ऊपर पड़ी हुई ओस की बूँद बहुत देर तक टिक नहीं पाती, वैसे ही उस (विदूषक) के पेट में राजा की गुप्त बातें देर तक नहीं रह पायेंगी। तो जब तक मैं इसे ढूँढती

विदूषकः—सत्थि भोदीए। (आत्मगतम्) एदं दुट्ठचेडिअं पेक्खिअ तं राअरहस्सं हिअअं भिंदिअ णिक्कमदि विअ। (किञ्चिन्मुखं संवृत्य प्रकाशम्) भोदि णिउणिए! संगीदवावारं उज्झिअ कहिं पत्थिदासि ? [**स्वस्ति भवत्यै। एतां दुष्टचेटिकां प्रेक्ष्य तद्राजरहस्यं हृदयं भित्त्वा निष्क्रामतीव। भवति निपुणिके! सङ्गीतव्यापारमुज्झित्वा कुत्र प्रस्थिताऽसि ?**]

चेटी—देवीए वअणेण अज्जं एव्व पेक्खिदुं। [**देव्या वचनेनार्यमेव प्रेक्षितुम्।**]

विदूषकः—किं तत्तभोदी आणवेदि ? [**किं तत्रभवत्याज्ञापयति ?**]

चेटी—देवी भणादि जधा—अज्जस्स मम उअरिं अदक्खिण्णं। ण मं अणुइदवेअणं दुक्खिदं अवलोअदि त्ति। [**देवी भणति यथा—आर्यस्य ममोपरि अदाक्षिण्यम्। न मामनुचितवेदनां दुःखितामवलोकयतीति ।**]

विदूषकः—णिउणिए! किं वा पिअवअस्सेण तत्तभोदीए पडिऊलं किं वि समाचरिदं? [**निपुणिके! किं वा प्रियवयस्येन तत्रभवत्याः प्रतिकूलं किमपि समाचरितम् ?**]

चेटी—जं णिमित्तं उण भट्टा उक्कंठिदो ताए इत्थिआए णामेण भट्टिणा देवी आलविदा। [**यन्निमित्तं पुनर्भर्ता उत्कण्ठितस्तस्याः स्त्रिया नाम्ना भर्त्रा देवी आलपिता।**]

विदूषकः—(स्वगतम्) कहं सअं एव्व तत्तभोदा वअस्सेण रहस्सभेदो किदो ? किं दाणिं अहं बम्हणो जीहं रक्खिदुं समत्थोम्हि ? (प्रकाशम्) किं तत्तभोदा उव्वसीणामधेएण आमंतिदा ? [**कथं स्वयमेव तत्रभवता वयस्येन रहस्यभेदः कृतः ? किमिदानीमहं ब्राह्मणो जिह्वां रक्षितुं समर्थोऽस्मि। किं तत्रभवता उर्वशीनामधेयेनामन्त्रिता ?**]

चेटी—अज्ज! का सा उव्वसी ? [**आर्य! का सा उर्वशी ?**]

हूँ। (**घूमकर देखती हुई**) अरे! आर्य माणवक तो यहाँ चित्रलिखित वानर की भाँति कुछ सोच-विचार करते हुए जैसे यहाँ छिपे हैं। तो चलूँ इनके पास। (**पास जाकर**) आर्य! प्रणाम करती हूँ।

विदूषक—आपका कल्याण हो। (**मन ही मन**) इस दुष्ट दासी को देखकर वे राजा की गुप्त बातें मानो हृदय को फाडकर बाहर निकलना चाह रही है। (**मुख को कुछ बन्द करके, प्रकट में**) अरे निपुणिका! अपना गाना-बजाना छोड़कर किधर जा रही हो ?

चेटी—देवी (काशीनरेश की पुत्री) की आज्ञा मे आपको ही देखने आ रही थी।

विदूषक—महारानी ने क्या आज्ञा दी है ?

चेटी—देवी ने इस प्रकार कहलाया है—आर्य आजकल मेरे ऊपर कृपा नहीं कर रहे हैं और अकारण इतनी मानसिक पीडा से पीड़ित मुझे देखने के लिए भी नहीं आ रहे हैं।

विदूषक—निपुणिका! क्या महाराज ने महारानी की इच्छा के विपरीत कोई कार्य कर दिया है ?

चेटी—हाँ, आजकल महाराज जिस (उर्वशी) को प्यार करने के लिए उत्कण्ठित रहते हैं उसी का नाम लेकर महाराज ने देवी को पुकारा।

विदूषक—(**मन ही मन**) क्या स्वंय मेरे मित्र महाराज ने गुप्त बात का भेद खोल दिया है? तब इस समय मैं ब्राह्मण होकर भी अपनी जीभ को कैसे वश में रख सकता हूँ? (**प्रकट में**) क्या महाराज ने उर्वशी कहकर महारानी को सम्बोधित किया था ?

चेटी—आर्य! वह उर्वशी कौन है ?

विदूषकः—अत्थि उव्वसि त्ति अच्छरा। ताए दंसणेण उम्मादिदो ण केवलं तं आआसेदि, मं वि बम्हणं असिदव्वविमुहं दिढं पीडेदि। [अस्त्युर्वशीत्यप्सराः। तस्या दर्शनेनोन्मादितो न केवलं तामायासयति मामपि ब्राह्मणमशितव्यविमुखं दृढं पीडयति।]

चेटी—(स्वगतम्) उव्वादिदो मए भेओ भट्टिणो रहस्सदुग्गस्स। ता गदुअ देवीए एदं णिवेदेमि। (इति प्रस्थिता) [उत्पादितो मया भेदो भर्तू रहस्यदुर्गस्य। तद्गत्वा देव्यै एतन्निवेदयामि।]

विदूषकः—णिउणिए! विण्णावेहि मम वअणेण कासिराअदुहिदरं—परिस्संतम्हि इमाए मिअतिण्हिआए वअस्सं णिअत्तावेदुं। जइ भोदीए मुहकमलं पेक्खिस्सदि तदो णिअत्तिस्सदि त्ति। [निपुणिके! विज्ञापय मम वचनेन काशिराजदुहितरम्—परिश्रान्तोऽस्म्येतस्या मृगतृष्णिकाया वयस्यं निवर्तयितुम्। यदि भवत्या मुखकमलं प्रेक्षिष्यते ततो निवर्तिष्यत इति।]

चेटी—जं अज्जो आणवेदि। [यदार्य आज्ञापयति।] (इति निष्क्रान्ता)

(नेपथ्ये वैतालिकः) जयतु जयतु देवः।

आ लोकान्तात् प्रतिहततमोवृत्तिरासां प्रजानां
तुल्योद्योगस्तव च सवितुश्चाधिकारो मतो नः।
तिष्ठत्येकः क्षणमधिपतिर्ज्योतिषां व्योममध्ये
षष्ठे काले त्वमपि लभसे देव विश्रान्तिमहः॥ १॥

विदूषकः—(कर्ण दत्त्वा) एसो उण पिअवअस्सो धम्मासणसमुत्थिदो इदो एव आअच्छदि। ता जाव पासपडिवत्ती होमि। (इति निष्क्रान्तः) [एष पुनः प्रियवयस्यो धर्मासनसमुत्थित इत एवागच्छति। तद्यावत् पार्श्वपरिवर्ती भवामि।]

॥ प्रवेशकः ॥

विदूषक—उर्वशी नाम की एक अप्सरा है। उसके दर्शन के समय से वे अपनी सुध-बुध खो बैठे हैं, अतः वे केवल महारानी को ही कष्ट नहीं पहुँचा रहे हैं अपितु मुझ ब्राह्मण का भी भोजन-पानी छुड़ाकर मुझे भी वे दुःख दे रहे हैं।

चेटी—(मन ही मन) महाराज के अनमना होने का जो रहस्य रूपी किला था, उसका मैंने भेदन कर दिया। तो जाकर महारानी से मैं ये ही सब बातें कह देती हूँ। (ऐसा कहकर चली जाती है)

विदूषक—निपुणिका! मेरी ओर से काशिराज की पुत्री से कह देना कि मैं तो अपने मित्र महाराज को इस मृगतृष्णा से बचाने की बात कहते-कहते थक गया। यदि वे आपके मुखकमल का दर्शन कर लेंगे तो उनका मन उर्वशी से स्वयं फिर जायगा।

चेटी—जैसी आर्य की आज्ञा। (ऐसा कहकर वह चली जाती है)

(नेपथ्य में वैतालिक) महाराज की जय हो, जय हो।

हमारे विचार से आप और सूर्य ये दोनों प्रतिदिन का अपना-अपना कार्य यथोचित विधि से समान रूप से करते हैं, क्योंकि सूर्यदेव संसार का अन्धकार दूर करते हैं और आप प्रजा का कष्ट दूर करते हैं। नक्षत्रों के राजा सूर्य अपने कार्य से अवकाश पाकर आकाश में क्षणभर विश्राम करते हैं और आप भी अपने राजकाज से अवकाश पाकर तीसरे पहर विश्राम लेते हैं॥ १॥

विदूषक—(कान लगाकर) ये मेरे प्रियमित्र (महाराज) धर्मासन से उठकर इधर ही आ रहे हैं। तो तब तक मैं भी उनके समीप पहुँच जाऊँ। (ऐसा कहकर चला जाता है)

॥ प्रवेशक ॥

(ततः प्रविशत्युत्कण्ठितो राजा विदूषकश्च)

राजा— आ दर्शनात् प्रविष्टा सा मे सुरलोकसुन्दरी हृदयम्।
बाणेन मकरकेतोः कृतमार्गमवन्ध्यपातेन ॥ २ ॥

विदूषकः—सपीडा क्खु जादा तत्तभोदी कासिराअदुहिदा। [सपीडा खलु जाता तत्रभवती काशिराजदुहिता।]

राजा—(निरीक्ष्य) अपि रक्ष्यते भवता रहस्यनिक्षेपः ?

विदूषकः—(आत्मगतम्) हद्धी हद्धी। वंचिदोम्हि दुट्ठदासीए णिउणिआए। अण्णधा कधं एव्वं पुच्छदि वअस्सो ? [हा धिग् हा धिक्। वञ्चितोऽस्मि दुष्टदास्या निपुणिकया। अन्यथा कथमेवं पृच्छति वयस्यः ?]

राजा— किं भवाँस्तूष्णीमास्ते ?

विदूषकः—भो ! एव्वं मए जीहा संजंतिदा जेण भवदो वि णत्थि पडिवअणं। [भोः ! एवं मया जिह्वा संयन्त्रिता येन भवतोऽपि नास्ति प्रतिवचनम्।]

राजा—युक्तम्। अथ केनेदानीमात्मानं विनोदयामि ?

विदूषकः—भो ! महाणसं गच्छम्ह ! [भो ! महानसं गच्छावः।]

राजा—किं तत्र ?

विदूषकः—तहिं पंजविहस्स अब्भवहारस्स उवणदसंभारस्स जोअणां पेक्खमाणेहिं सक्कं उक्कंठां विणोदेदुं। [तत्र पञ्चविधस्याभ्यवहारस्योपनतसम्भारस्य योजनां प्रेक्षमाणाभ्यां शक्यमुत्कण्ठां विनोदयितुम्।]

राजा—(सस्मितम्) तत्रेप्सितसन्निधानाद् भवान् रंस्यते। मंया खलु दुर्लभप्रार्थनः कथमात्मा विनोदयितव्यः ?

(उत्कण्ठित हृदय से राजा का विदूषक के साथ प्रवेश)

राजा—कामदेव ने मेरे हृदय में बाण मारकर उस सुरसुन्दरी के प्रवेश करने के लिए मार्ग बनाया था, उसमें वह देखने मात्र से प्रविष्ट हो गयी ॥ २ ॥

विदूषक—देवी काशिराजपुत्री के सचमुच भाग फूट गये।

राजा—(देखकर) मेरी रहस्य रूपी धरोहर को तुमने सुरक्षित रखा है ?

विदूषक—(मन ही मन) हाय ! हाय ! उस दुष्ट दासी निपुणिका ने मुझे ठग लिया है। नहीं तो मेरे मित्र मुझसे ऐसा क्यों पूछते ?

राजा—आप चुप क्यों हो गये हैं ?

विदूषक—महाराज ! मैंने अपनी जीभ को ऐसा बाँध दिया है, अतएव आपकी बात का भी उत्तर नहीं दे पा रहा हूँ।

राजा—ठीक है। अब मैं अपने मन को किससे बहलाऊँ ?

विदूषक—अरे ! हम दोनों रसोईघर में चलें।

राजा—वहाँ क्या है ?

विदूषक—वहाँ पाँच प्रकार के पकवानों की सामग्री को देखने मात्र से हम लोगों की सम्पूर्ण उत्कण्ठा दूर हो जायेगी।

राजा—(मुस्कराकर) वहाँ आपको तो मन बहलाने की अर्थात् पेट भरने की पूरी सामग्री

विदूषकः—णं भवं वि तत्तभोदीए उव्वसीए दंसणपहं गदो ? [ननु भवानपि तत्रभवत्या उर्वश्या दर्शनपथं गतः ?]

राजा—ततः किम् ?

विदूषकः—ण क्खु दे दुल्लह त्ति तक्केमि। [न खलु ते दुर्लभेति तर्कयामि।]

राजा—पक्षपातोऽपि तस्यां सद्रूपस्यालौकिक एव।

विदूषकः—एव्वं मंतअंतेण मे वड्ढिदं कोदूहलं। किं तत्तभोदी उव्वसी अद्दुदीआ रूवेण, अहं वि विरूवदाए ? [एवं मन्त्रयता मम वर्धितं कौतूहलम्। किं तत्रभवत्युर्वश्यद्वितीया रूपेण, अहमिव विरूपतया ?]

राजा—माणवक ! प्रत्यवयवमशक्यवर्णनां तामवेहि। तेन हि समासतः श्रूयताम्।

विदूषकः—भोः ! अवहिदोम्हि। [भोः ! अवहितोऽस्मि।]

राजा— आभरणस्याभरणं प्रसाधनविधेः प्रसाधनविशेषः।
उपमानस्यापि सखे प्रत्युपमानं वपुस्तस्याः ॥ ३ ॥

विदूषकः—अदो दाव तुए दिव्वरसाहिलासिणा चादअव्वदं गहीदं। ता दाव तुमं कहिं पत्थिदो ? [अतस्तावत् त्वया दिव्यरसाभिलाषिणा चातकव्रतं गृहीतम्। तत्तावत् त्वं कुत्र प्रस्थितः ?]

राजा—विविक्तादृते नान्यदुत्सुकस्य शरणमस्ति। तद् भवान् प्रमदवनमार्गमादेशयतु।

विदूषकः—(आत्मगतम्) का गदी ? (प्रकाशम्) इदो इदो भवं। [का गतिः ? इत इतो भवान्।]

मिल जायेगी, परन्तु बड़ी कठिनाई से मिलने वाली वस्तु के लिए तड़पने वाला मैं किससे अपना मन बहलाऊँगा ?

विदूषक—आप को भी तो उर्वशी ने देखा होगा ?

राजा—उससे क्या होता है ?

विदूषक—मैं सोचता हूँ कि वह तो आपके लिए दुर्लभ नहीं हो सकती।

राजा—यदि उसे हम अलौकिक सुन्दरी कहें तो यह भी उसके लिए पक्षपात ही है।

विदूषक—इस प्रकार आपसे बात करने से मेरा कुतूहल और भी बढ़ता जा रहा है। क्या सुन्दरता में उर्वशी इतनी अनुपम है जितना मैं कुरूपता में हूँ ?

राजा—माणवक ! ऐसा समझो कि उसके एक-एक अंग का वर्णन करना किसी के लिए भी असम्भव है। फिर भी थोड़े में हम से सुनो।

विदूषक—राजन् ! मैं सावधान होकर सुन रहा हूँ।

राजा—उस (उर्वशी) का शरीर अलंकारों का भी अलंकार है, शृंगार की सामग्री का भी वह शृंगार है और उपमा देने योग्य वस्तुओं की भी उसे उपमा दी जा सकती है ॥ ३ ॥

विदूषक—इसीलिए आपने दिव्य रस को प्राप्त करने की इच्छा से चातकव्रत धारण कर लिया है। अच्छा, अब आप बतलाइये कि इस समय कहाँ जा रहे हैं ?

राजा—उत्सुक पुरुष एकान्त स्थान को छोड़कर और जा ही कहाँ सकते हैं। इसलिए आप मुझे प्रमदवन का मार्ग बतलाइये।

विदूषक—(मन ही मन) और उपाय ही क्या है ? (प्रकट रूप में) महाराज ! इधर से चलिए, इधर से।

(इति परिक्रामतः)

विदूषकः—एसो पमदवणपरिसरो। आणमिअ पच्चुवगदो भवं आअंतुओ दक्खिणमारुदेण। [एष प्रमदवनपरिसरः। आनम्य प्रत्युपगतो भवानागन्तुको दक्षिणमारुतेन।]

राजा—(विलोक्य) उपपन्नं विशेषणमस्य वायोः। अयं हि—

निषिञ्चन् माधवीं लक्ष्मीं लतां कौन्दीं च लासयन्।
स्नेहदाक्षिण्ययोर्योगात् कामीव प्रतिभाति मे॥ ४॥

विदूषकः—सरिसो एव्व से अहिणिवेसो। (इति परिक्रामन्) एदं पमदवणं। पविसदु भवं। [सदृशं एवास्याभिनिवेशः। एतत्प्रमदवनम्। प्रविशतु भवान्।]

राजा—वयस्य! प्रविशाग्रतः।

(उभौ प्रवेशं नाटयतः)

राजा—(त्रासं रूपयित्वा) वयस्य! साधुमनसा समर्थित आपत्प्रतीकारः किल ममोद्यानप्रवेशः तद्यान्यथैवोपपन्नम्।

विविक्षोर्यदिदं नूनमुद्यानं तापशान्तये।
स्रोतसेवोह्यमानस्य प्रतीपतरणं महत्॥ ५॥

विदूषकः—कहं विअ? [कथमिव?]

राजा—

इदमसुलभवस्तुप्रार्थनादुर्निवारं प्रथममर्पि मनो मे पञ्चबाणः क्षिणोति।
किमुत मलयवातोन्मूलिता पाण्डुपत्रैरुपवनसहकारैर्दर्शितेष्वङ्कुरेषु॥ ६॥

(दोनों घूमते हैं)

विदूषक—यह प्रमदवन का परिमर आ गया है। आपको आगन्तुक समझकर मलयमारुत सादर अगवानी करने आया है।

राजा—(देखकर) मलयपवन का यह दक्षिण विशेषण ममुचित ही है। क्योंकि—

माधवीलता को मींचता हुआ तथा कुन्दलता को नचाता हुआ यह पवन मुझे ऐसा लग रहा है कि मानो यह कोई कामी पुरुष प्रेम तथा कुशलता के संयोग मे सबको एक साथ प्रसन्न कर रहा हो॥ ४॥

विदूषक—इसके स्नेह करने का प्रकार भी आपके जैसा हीं है। (ऐसा कहकर घूमता हुआ) यह प्रमदवन आ गया, आप इसके भीतर प्रवेश कीजिए।

राजा—मित्र! आगे-आगे तुम चलो।

(दोनों प्रवेश करने का अभिनय करते हैं।)

राजा—(भयभीत होने का अभिनय करता हुआ) मित्र! तुमने मेरी आपत्ति को दूर करने के लिए उपवन में प्रवेश करने रूप यह अच्छा उपाय सोचा। यह तो एकदम विपरीत-सा हो गया।

मन की उलझन की शान्ति के लिए मेरा इस बगीचे में प्रवेश करना वैसा हीं हो गया, जैसा बहाव की ओर तैरकर आगे बढने वाले को एकाएक उसके विपरीत तैरना पडे॥ ५॥

विदूषक—क्यों यह कैसे?

राजा—अत्यन्त कठिनता से प्राप्त होने वाली जिस वस्तु (उर्वशी) के लिए जो मेरा मन उतावला हो रहा था, उसे कामदेव ने पहले ही बींध डाला था। उस पर भी हम यहाँ देख रहे हैं कि उपवन

विदूषकः—अलं परिदेविदेण। अइरेण दे इट्ठसंपादणेण अणंगो एव्व दे सहाओ भविस्सदि। [अलं परिदेवितेन। अचिरेण तवेष्टसम्पादनेनानङ्गः एव ते सहायो भविष्यति।]

राजा—प्रतिगृहीतं ब्राह्मणवचनम्।

(इति परिक्रामतः)

विदूषकः—पेक्खदु भवं वसंतावदारसूअअं अहिरामत्तणं पमदवणस्स। [प्रेक्षतां भवान् वसन्तावतारसूचकमभिरामत्वं प्रमदवनस्य।]

राजा—ननु प्रतिपादपमेवावलोकयामि। अत्र हि—

अग्रे स्त्रीनखपाटलं कुरबकं श्यामं द्वयोर्भागयोः
रक्ताशोकमुपोढरागसुभगं भेदोन्मुखं तिष्ठति।
ईषद्बद्धरजःकणाग्रकपिशा चूते नवा मञ्जरी
मुग्धत्वस्य च यौवनस्य च सखे मध्ये मधुश्रीः स्थिता ॥७॥

विदूषकः—भो, एसो क्खु मणिसिलापट्टअसणाहो अदिमुत्तलदामंडवो भमरसंघट्टपडिदेहिं कुसुमेहिं सअं विअ किदोवआरो भवंतं पडिच्छदि। ताअणुकेण्हिअदु दाव एसो। [भोः, एष मणिशिलापट्टकसनाथोऽतिमुक्तलतामण्डपो भ्रमरसङ्घट्टपतितैः कुसुमैः स्वयमिव कृतोपचारो भवन्तं प्रतीच्छति। तदनुगृह्यतां तावदेषः।]

राजा—यथा भवते रोचते।

(परिक्रम्योपविशतः)

के उन आम के पेड़ों में कोपलें भी फूटने लगी है, जिनकी पीली पँखुडियों को मलयमारुत ने गिरा दिया है। इस विषम स्थिति में भला मेरे मन को कैसे शान्ति मिल मकती है? ॥ ६॥

विदूषक—आप पछताइये नहीं। यही कामदेव आपको आपकी प्रियतमा से मिलाने में शीघ्र ही सहायक होगा।

राजा—ब्राह्मण का आशीर्वादस्वरूप यह वचन मैंने शिरोधार्य किया।

(ऐसा कहकर दोनों घूमते हैं)

विदूषक—आप देखिये, इस प्रमदवन की शोभा स्वयं बंतला रही है कि चारों ओर वसन्त छा गया।

राजा—सचमुच मैं प्रत्येक पेड़ में वसन्तावतार की शोभा देख रहा हूँ। यहाँ तो—

सामने यह कुरबक का फूल है, जिसके सामने का भाग स्त्री के नख के जैसा लाल है तथा जिसके दोनों छोर साँवले दिख रहे हैं। अपनी लालिमा से मनोहर लगने वाली यह लाल अशोक की कली ऐसी लग रही है मानो क्षणभर में खिलने वाली हो। आम के पेड़ो में पराग के कारण कुछ-कुछ पीली बौर दिखलायी दे रही है। हे मित्र! इस प्रकार यह वसन्त की शोभा ऐसी लग रही है, मानो वह अपने बचपन और जवानी के बीच में आ खडी हुई हो॥ ७॥

विदूषक—अरे! यह अतिमुक्तलतामंडप है, जिसके नीचे रत्नजटित पत्थर की चौकी है, जिस पर भ्रमर-समूह के एक साथ बैठने से फूल गिरकर बिखरे हैं, मानो ये आपका स्वागत कर रहे हों। चलिये, इन पर भी आप कृपा कीजिये।

राजा—जैसा तुम्हें अच्छा लगे।

(दोनों घूमकर बैठते हैं)

विदूषकः—दाणिं इह सुहासीणोभवं ललिदलदाविलोहीअमाणणअणो उव्वसीगदं उक्कंठं विणोदेदु। [इदानीमिह सुखासीनो भवॉल्ललितलताविलोभ्यमाननयन उर्वशीगतामुत्कण्ठां विनोदयतु।]

राजा—(निःश्वस्य)

मम कुसुमितास्वपि सखे नोपवनलतासु नम्रविटपासु ।
चक्षुर्बध्नाति धृतिं तद्रूपालोकदुर्ललितम् ॥८॥

तदुपायश्चिन्त्यतां यथा सफलप्रार्थनो भवेयम्।

विदूषकः—(विहस्य) भो! अहल्लाकामुअस्स महिंदस्स वेज्जो सचिवो उव्वसीपज्जुच्छअस्स अ भवदो अहं दुवे वि एत्थ उम्मत्तआ। [भोः! अहल्याकामुकस्य महेन्द्रस्य वैद्यः सचिवः उर्वशीपर्युत्सुकस्य च भवतोऽहं द्वावप्यत्रोन्मत्तौ।]

राजा—मा मैवम्। अतिस्नेहः खलु कार्यदर्शी। तदुपायश्चिन्त्यताम्।

विदूषकः—एसो चिंतेमि। मा उण परिदेविदेण मम समाधिं भिंधि। [एष चिन्तयामि। मा पुनः परिदेवितेन मम समाधिं भिन्धि।] (इति चिन्तां नाटयति)

राजा—(निमित्तं सूचयित्वा स्वगतम्)

न सुलभा सकलेन्दुमुखी च सा किमपि चेदमनङ्गविचेष्टितम् ।
अभिमुखीष्विव काङ्क्षितसिद्धिषु व्रजति निर्वृतिमेकपदे मनः ॥९॥

(इति जाताशस्तिष्ठति)

(ततः प्रविशत्याकाशयानेनोर्वशी चित्रलेखा च)

चित्रलेखा—हला! कहिं दाणिं अणिदिट्ठकालणं गच्छीअदि? [हला! क्वेदानीमनिर्दिष्टकारणं गम्यते?]

विदूषक—इस समय यहाँ सुखपूर्वक बैठे तथा ललित लताओं से लुभाये गये नयनों वाले आप उर्वशी के कारण उत्पन्न उत्कण्ठा को भुला दीजिये।

राजा—(उसाँस लेकर) उस (उर्वशी) की नयनाभिराम रमणीयता को देखने के बाद से अब मेरी दुलारी आँखों को इस उपवन की फूलों के भार से झुकी हुई लताएँ अच्छी ही नहीं लगतीं ॥८॥

इसलिए कोई ऐसा उपाय सोचो जिससे मेरे मन की लगन पूरी हो सके।

विदूषक—(हँसकर) अरे! अहल्या को प्राप्त करने के इच्छुक देवराज इन्द्र का सहायक चन्द्रमा और उर्वशी को पाने की कामना करने वाले आपका सहायक मैं, हम दोनों की बुद्धि मारी गयी है।

राजा—ऐसा मत कहो। अधिक स्नेह करने वाला ही समुचित पथप्रदर्शक होता है। इसलिए कोई कार्यसाधक उपाय सोचो।

विदूषक—अच्छा अब मैं सोचता हूँ, किन्तु अपने विलाप मे ध्यान में लगे मेरे मन में विघ्न मत डालना। (ऐसा कहकर सोचने का अभिनय करता है।)

राजा—(शुभ शकुन की सूचना देकर मन ही मन)

यद्यपि पूर्णचन्द्र के समान मुखमण्डल वाली उस सुनयना के मिलने की कोई सम्भावना तो नहीं है, फिर भी न मालूम क्यों कामदेव मुझे शुभ शकुन दिखला रहा है? इस लक्षण से मेरा मन सहसा ऐसा खिल गया है, जैसे मेरी मनोरथ की सिद्धि होने ही वाली हो॥९॥

(इस प्रकार वह आशा लगाकर बैठ जाता है)

(इतने ही में विमान से उर्वशी तथा चित्रलेखा का प्रवेश)

चित्रलेखा—सखी! बिना किसी उद्देश्य के इस समय कहाँ जा रही हो?

उर्वशी—(मदनवेदनामभिनीय सलज्जम्) सहि! तदा हेमऊडसिहरे लदाविडवेण खणविग्घिदआआसगमणं मं ओहसिअ किं दाणिं पुच्छसि कहिं गच्छीअदि त्ति। [सखि! तदा हेमकूटशिखरे लताविटपेन क्षणविघ्नताकाशगमनां मामुपहस्य किमिदानीं पृच्छसि क्व गम्यत इति।]

चित्रलेखा—किं णु क्खु तस्स राएसिणो पुरूरवस्स सआसं पत्थिदासि ? [किं नु खलु तस्य राजर्षेः पुरूरवसः सकाशं प्रस्थितासि ?]

उर्वशी—अह इं? अअं मे अवहत्थिदलज्जो ववसाओ। [अथ किम्? अयं मेऽपहस्तितलज्जो व्यवसायः।]

चित्रलेखा—को उण सहीए तहिं पुडमं पेसिदो ? [कः पुनः सख्या तत्र पुरतः प्रेषितः ?]

उर्वशी—णं हिअअं। [ननु हृदयम्।]

चित्रलेखा—तधा वि सअं एव्व साहु संपधारीअदु दाव। [तथापि स्वयमेव साधु सम्प्रधार्यतां तावत्।]

उर्वशी—सहि! मअणो क्खु मं णिओएदि। किं एत्थ संपधारीअदि। [सखि! मदनः खलु नियोजयति। किमत्र सम्प्रधार्यते।]

चित्रलेखा—अदो वरं णत्थि मे वअणं। [अतः परं नास्ति मे वचनम्।]

उर्वशी—तेण हि आदिसीअदु मग्गो जेण तहिं गच्छंतीणं अंतराओ ण भवे। [तेन ह्यादिश्यतां मार्गो येन तत्र गच्छन्त्योरन्तरायो न भवेत्।]

चित्रलेखा—सहि! विस्सद्धा होहि। णं भअवदा देवगुरुणा अवराइदं णाम सिहावंधणविज्जं उवदिसंतेण तिदसपडिवक्खस्स अलंघाणिज्जा कदम्ह। [सखि! विश्रब्धा भव। ननु भगवता देवगुरुणा अपराजिता नाम शिखावन्धनविद्यामुपदिशता त्रिदशप्रतिपक्षस्यालङ्घनीये कृते स्वः।]

उर्वशी—(सलज्जम्) अहो, विसुमरिदं मे हिअअं। [अहो! विस्मृतं मे हृदयम्।]

उर्वशी—(मदनवेदना का अभिनय करती हुई लज्जा के साथ) सखी! उस समय जब हेमकूट पर्वत की चोटी पर लता की शाखा से मेरी माला उलझने के कारण आकाश की ओर जाने में क्षणभर का विघ्न उपस्थित हो गया था तब तुमने मेरा उपहास किया था। अब इस समय कहाँ जा रही हो, ऐसा मुझसे क्या पूछ रही हो ?

चित्रलेखा—तो क्या तुम उस राजर्षि पुरूरवा के पास जा रही हो ?

उर्वशी—और क्या ? आज मैंने लोकलाज छोड़कर यही निश्चय किया है।

चित्रलेखा—तब सखी ने वहाँ पहले किसी के हाथ सन्देश भेजा है ?

उर्वशी—निश्चय ही मैंने अपने हृदय द्वारा।

चित्रलेखा—तो भी इस कार्य के सम्बन्ध में तुम स्वयं भलीभाँति पहले सोच लो।

उर्वशी—सखी! कामदेव मुझे स्वयं प्रेरित कर रहा है, अब मैं इसमें क्या विचार करूँ ?

चित्रलेखा—अब इसके आगे मुझे कुछ भी कहना नहीं है।

उर्वशी—तो मुझे तुम मार्गनिर्देश करो, जिससे हम दोनों के जाने में कोई बाधा न हो।

चित्रलेखा—सखी! चिन्ता मत करो। क्योंकि देवगुरु बृहस्पति ने अपराजिता नाम की चोटी बाँधने की विद्या का उपदेश देते समय हमें ऐसी शक्ति दी है कि देवताओं के शत्रु भी हमारा कुछ नहीं बिगाड़ सकते।

उर्वशी—(लजाती हुई) अरे! इस बात को तो मैं सर्वथा भूल ही गयी थी।

(उभे भ्रमणं रूपयतः)

चित्रलेखा—सहि ! पेक्ख पेक्ख। एदं भअवदीए भाईरहीए जमुणासंगमविसेसपावणेसु सलिलेसु अत्ताणअं ओलोअंतस्स विअ पइट्ठाणस्स सिहाभरणभूदं तस्स राएसिणो भवणं उवट्ठिदम्ह। [सखि! प्रेक्षस्व प्रेक्षस्व। एतद्भगवत्या भागीरथ्या यमुनासङ्गमविशेषपावनेषु सलिलेष्वात्मानमवलोकयत इव प्रतिष्ठानस्य शिखाभरणभूतं तस्य राजर्षेर्भवनमुपस्थिते स्वः।]

उर्वशी—(सस्पृहमवलोक्य) णं वत्तव्वं ठाणंतरगदो सग्गो त्ति। (विमृश्य) सहि ! कहिं णु क्खु सो आवण्णाणुकंपी भवे ? [ननु वक्तव्यं स्थानान्तरगतः स्वर्ग इति। सखि ! क्व नु खलु स आपन्नानुकम्पी भवेत् ?]

चित्रलेखा—हला ! एदस्सिं णंदणवणेक्कदेसे विअ पमदवणे ओदरिअ जाणिस्सामो। [हला ! एतस्मिन्नन्दनवनैकदेश इव प्रमदवने अवतीर्य ज्ञास्यावः।]

(उभे अवतरतः)

चित्रलेखा—(राजानं दृष्ट्वा सहर्षम्) सहि ! एसो क्खु पदमोदिदो विअ चंदो कोमुदिं विअ तुमं पडिच्छदि। [सखि ! एष खलु प्रथमोदित इव चन्द्रः कौमुदीमिव त्वां प्रतीच्छति।]

उर्वशी—(विलोक्य) हला ! दाणिं पढमदंसणादो सविसेसं पिअदंसणो महाराओ पडिहादि। [हला ! इदानीं प्रथमदर्शनात्सविशेष प्रियदर्शनो महाराजः प्रतिभाति।]

चित्रलेखा—जुज्जदि। ता एहि उवसप्पम्ह। [युज्यते। तदेहि उपसर्पावः।]

उर्वशी—ण दाव उवसप्पिस्सं। तिरक्खरिणीपडिच्छण्णा पासगदा से भविअ सुणिस्सं दाव पासवत्तिणं वअस्सेण सह विअणे किं मंतअंतो चिट्ठदि त्ति। [न तावदुपसर्पिष्ये। तिरस्करिणीप्रतिच्छन्ना पार्श्वगतास्य भूत्वा श्रोष्यामि तावत् पार्श्ववर्तिना वयस्येन सह विजने किं मन्त्रयमाणस्तिष्ठतीति।]

(दोनों घूमती हैं)

चित्रलेखा—अरी सखी ! देखो देखो, हम दोनों राजर्षि के उस भवन पर पहुँच चुकी है जो प्रतिष्ठानपुरी का सर्वश्रेष्ठ अलंकारस्वरूप है और जो यमुना के संगम के कारण अधिक पवित्र बने हुए गंगा के जल में मानो अपना प्रतिबिम्ब देख रहा हों।

उर्वशी—(अत्यन्त प्रेम से देखकर) निश्चय ही तुम्हें तो ऐसा कहना चाहिए कि यह भूलोक में स्थित स्वर्ग ही है। (विचार कर) सखी ! दुःखियों पर दया करने के स्वभाव वाले वे राजा इस समय कहाँ होंगे ?

चित्रलेखा—सखी ! नन्दनवन के समान सुन्दरता से समृद्ध इस प्रमदवन के किसी स्थान-विशेष में उतरकर उनका पता लगाया जाय।

(दोनों उतरती हैं)

चित्रलेखा—(राजा को देखकर प्रसन्नता से) सखी ! जैसे तत्काल उदय हुआ चन्द्रमा चाँदनी की प्रतीक्षा करता है, ठीक उसी प्रकार यह राजा तुम्हारी प्रतीक्षा कर रहा है।

उर्वशी—(देखकर) सखी ! आज तो महाराज पहले दिन से भी अधिक मनोहर लग रहे हैं।

चित्रलेखा—तुम ठीक कह रही हो। तो आओ, उनके पास चलें।

उर्वशी—नहीं, नहीं, मैं उनके पास नहीं जाऊँगी। मैं तो पर्दा की ओट में छिपकर उनके पास में खड़ी होकर सुनूँगी कि ये अपने पास में बैठे हुए मित्र से एकान्त में क्या बातें करते हैं।

चित्रलेखा—जं दे रोअहि। [यत्ते रोचते।]

(उभे यथोक्तमनुतिष्ठतः)

विदूषकः—भो, चिंतिदो मए दुल्लहप्पणइणीसमाअमोवाओ। [भोः! चिन्तितो मया दुर्लभप्रणयिनीसमागमोपायः।]

(राजा तूष्णीमास्ते)

उर्वशी—(सेर्ष्यम्) का णु क्खु धण्णा इत्थिआ जा इमिणा पत्थिअमाणा अत्ताणअं किदत्थेइ? [का नु खलु धन्या स्त्री या अनेन प्रार्थ्यमानात्मानं कृतार्थयति?]

चित्रलेखा—किं उण माणुत्तसअं विडंबीअदि। [किं पुनर्मानुष्यं विडम्ब्यते।]

उर्वशी—सहि! भीआमि सहसा प्पभावादो विण्णादुं। [सखि! बिभेमि सहसा प्रभावाद्विज्ञातुम्।]

विदूषकः—भो, णं भणामि चिंतिदो मए उवाओ त्ति। [भोः! ननु भणामि चिन्तितो मया उपाय इति।]

राजा—तेन हि कथ्यताम्।

विदूषकः—सिविणसमाअमआरिणिं णिद्दं सेवदु भवं। अहवा तत्तभोदीए उव्वसीए पडिकिदिं चित्तफलए आलिहिअ ओलोअंतो चिट्ठदु। [स्वप्नसमागमकारिणीं निद्रां सेवतां भवान्। अथवा तत्रभवत्या उर्वश्याः प्रतिकृतिं चित्रफलक आलिख्यावलोकयंस्तिष्ठतु।]

उर्वशी—(सहर्षमात्मगतम्) हीणसत्त हिअअ। समस्सस समस्सस। [हीनसत्त्व हृदय! समाश्वसिहि समाश्वसिहि।]

राजा—उभयमप्यनुपपन्नम्। पश्य—

हृदयमिषुभिः कामस्यान्तः सशल्यमिदं सदा
कथमुपलभे निद्रां स्वप्ने समागमकारिणीम्।

चित्रलेखा—जो तुम्हें अच्छा लगे (वैसा करो)।

(दोनों वैसा ही करती हैं)

विदूषक—अरे! मैंने आपकी उस प्यारी से मिलने का सरल उपाय सोच लिया है, जिसे आप दुर्लभ-दर्शना कह रहे थे।

(राजा चुप हो जाते हैं)

उर्वशी—(डाह के साथ) वह कौन-सी भाग्यवती स्त्री होगी जिसे राजा चाहते हों और वह अपने भाग्य को सराहती होगी?

चित्रलेखा—क्या फिर तुम भूतल की स्त्रियों की-सी बातें करने लगी हो?

उर्वशी—सखी! मैं अपने प्रभाव (दैवीशक्ति) से जान लेने में थोड़ा डरती हूँ।

विदूषक—अरे! मैं कह रहा हूँ कि मैंने उससे मिलने का उपाय सोच लिया है।

राजा—ऐसा है तो बतलाओ।

विदूषक—या तो आप गहरी नींद में सो जाइये, जिससे आपकी उससे स्वप्न में भेंट हो जाय अथवा चित्रफलक पर आदरणीय उर्वशी का चित्र बनाकर उसे देखते रहें।

उर्वशी—(प्रसन्न होकर मन ही मन) अरे पापी मन! धीरज धर, धीरज धर।

राजा—तुम्हारी कही हुई दोनों ही बातें उचित नहीं हैं। देखो—

कामदेव दिन-रात अपने बाणों से मेरे हृदय को बेंधता रहता है, ऐसी स्थिति में भला उसने

न च सुवदनामालेख्येऽपि प्रियामसमाप्य तां
मम नयनयोरुद्वाष्पत्वं सखे न भविष्यति ॥ १० ॥

चित्रलेखा—सुदं तुए वअणं। [श्रुतं त्वया वचनम्।]

उर्वशी—सहि ! सुदं। ण उण पज्जत्तं हिअअस्स। [सखि ! श्रुतम्। न पुनः पर्याप्तं हृदयस्य।]

विदूषकः—ऐत्तिओ एव्व मे महिविहओ [एतावानेव मे मतिविभवः।]

राजा—(निःश्वस्य)

नितान्तकठिनां रुजं मम न वेद सा मानसीं
प्रभावविदितानुरागमवमन्यते वापि माम् ।
अलब्धफलनीरसं मम विधाय तस्मिञ्जने
समागममनोरथं भवतु पञ्चबाणः कृती ॥ ११ ॥

चित्रलेखा—सहि ! सुदं तुए। [सखि ! श्रुतं त्वया।]

उर्वशी—हद्धी हद्धी। मं एव्वं अवगच्छदि। (सखीमवलोक्य) सहि ! असमत्थम्हि अग्गदो भविअ से पडिवअणस्स। ता पहावणिम्मिदेण भुज्जवत्तेण संपादिदउत्तरा होदु इच्छामि। [हा धिक् हा धिक्। मामेवमवगच्छति। सखि ! असमर्थास्म्यग्रतो भूत्वास्य प्रतिवचनस्य। तत्प्रभावनिर्मितेन भूर्जपत्रेण सम्पादितोत्तरां भवितुमिच्छामि।]

चित्रलेखा—हला ! अणुमदं मे। [हला ! अनुमतं मे।]

(उर्वशी नाट्येन ससम्भ्रममभिलिख्यान्तरा क्षिपति।)

विदूषकः—(दृष्ट्वा ससम्भ्रमम्) अविहा अविहा। भो ! किं णु क्खु एदं भुअंगणिम्मोअं मं खादिदुं णिवडिदो ? [अविधा अविधा। भोः किन्नु खलु एतत् भुजङ्गनिर्मोकः किं मां खादितुं निपतितः ?]

भेंट होने योग्य गहरी नींद मुझे कैसे आ सकती है, जिससे उससे भेंट हो सके ? और मैं प्रिया का पूरा चित्र भी नहीं बना पाऊँगा, क्योंकि बीच में ही मेरी आँखें डबडबाने लग जायेंगी ॥ १० ॥

चित्रलेखा—अब तो तुमने राजा की बातें सुन लीं।

उर्वशी—सखी ! सुन तो लिया है, किन्तु मेरे मन की शान्ति के लिए ये वचन पर्याप्त नहीं है।

विदूषक—मेरी बुद्धि की शक्ति यहीं तक है।

राजा—**(उसाँसें लेकर)** या तो वह मेरे मन की व्याकुलता को नहीं जानती होगी अथवा उसे अपने अप्सरा होने का घमंड है, जिसमे वह मेरे सहज प्रेम को ठुकरा रही है। ऐसा लगता है कि मेरे मन में उस सुन्दरी मे मिलने की जो इच्छा है, उसे विफल करके ही कामदेव सफलमनोरथ होगा ॥ ११ ॥

चित्रलेखा—सखी ! राजा का विलाप तुमने सुना ?

उर्वशी—हाय मुझे धिक्कार है, हाय मुझे धिक्कार है। ये (राजा) मुझे ऐसी (नीच) समझ रहे हैं। **(सखी को देखकर)** सखी ! इनके सामने पहुँचकर इनकी बातों का मैं उत्तर नहीं दे सकूँगी, अतः मैं अपने प्रभाव से भोजपत्र को उत्पन्न कर उसी पर इन आरोपों का उत्तर लिख देना चाहती हूँ।

चित्रलेखा—सखी ! मैं भी इसी को उचित समझ रही हूँ।

(उर्वशी नाटकीय ढंग से शीघ्र पत्र लिखकर राजा के सामने उसे डालती है।)

विदूषक—**(देखकर घबराता हुआ)** हाय, हाय, क्या साँप की केंचुली मुझे खा डालने के लिए यहाँ कहाँ से आ टपकी ?

राजा—(विभाव्य विहस्य च) वयस्य ! नायं भुजङ्गनिर्मोकः, भूर्जपत्रगतोऽयमक्षरविन्यासः।

विदूषकः—णं अदिट्ठाए उव्वसीए भवदो परिदेविदं सुणिअ समाणानुराअसूअआइं अक्खराइं विसञ्जिआइं होंति। [ननु अदृष्टयोर्वश्या भवतः परिदेवितं श्रुत्वा समानानुरागसूचकान्यक्षराणि विसृष्टानि स्युः।]

राजा—नास्त्यगतिर्मनोरथानाम्। (गृहीत्वानुवाच्य च सहर्षम्) सखे ! प्रसन्नस्ते तर्कः।

विदूषकः—ही ही भो ! किं बम्हणवअणाणि अण्णधा होंति ? दाणिं प्पसीददु भवं। जं एत्थ लिहिदं तं सुणिदुं इच्छामि। [ही ही भोः ! किं ब्राह्मणवचनान्यन्यथा भवन्ति ? तदिदानीं प्रसीदतु भवान्। यदत्र लिखितं तच्छ्रोतुमिच्छामि।]

उर्वशी—साहु। अज्जणाअरिओसि। [साधु। आर्यनागरिकोऽसि।]

राजा—वयस्य ! श्रूयताम्।

विदूषकः—अवहिदो म्हि। [अवहितोऽस्मि।]

राजा—श्रूयताम्। (वाचयति)

सामिअ संभाविआ जह अहं तुए अणुमिआ
तह अणुरत्तस्स जइ णाम तुह उवरि।
किं मे ललिअपारिजाअसणिज्जयम्मि होंतिं
णंदणवणवादा वि अच्चुण्हआ सरीरए ॥१२॥

[स्वामिन्सम्भाविता यथाहं त्वयाऽज्ञाता तथानुरक्तस्य यदि नाम तवोपरि।
किं मे ललितपारिजातशयनीये भवन्ति नन्दनवनवाता अप्यत्युष्णकाः शरीरके॥]

उर्वशी—किं णु क्खु संपदं भणिस्सदि। [किं नु खलु साम्प्रतं भणिष्यति।]

राजा—(देखकर तथा हँसकर) मित्र ! यह साँप की केंचुल नहीं है, यह तो लिखा हुआ भोजपत्र है।

विदूषक—निश्चय ही जिसे आप नहीं देख पा रहे हैं, ऐसी उर्वशी ने आपका विलाप सुनकर आपके प्रति अपने प्रेम को भी सूचित करने वाला यह पत्र भेजा हो।

राजा—मनोरथों की गति की कोई सीमा नहीं होती। (उठाकर पढकर तथा प्रसन्न होकर) मित्र ! तुम्हारा विचार ठीक ही था।

विदूषक—हा हा ! क्या ब्राह्मण की बातें भी कभी झूठी होती हैं ? अब आप प्रसन्न होइए। इस पत्र में जो लिखा है, उसे मैं भी सुनना चाहता हूँ।

उर्वशी—ठीक है; तुम सचमुच कुलीन नागरिक हो।

राजा—मित्र ! सुनो।

विदूषक—मैं सावधानी से सुन रहा हूँ।

राजा—सुनो। (बाँचता है)

स्वामी ! आपने जिस प्रकार मुझे आदर दिया है और मैं भी तदनुरूप आपके प्रति अनुरागवती हूँ। फिर भी यदि आप मुझे वैसी समझते हैं जैसा कि आप अभी कह रहे थे तो भला आप ही बतलाइये कि जब मैं सुकोमल पारिजात के फूलों की सेज पर लेटती हूँ तो उस समय नन्दनवन का शीतल पवन मेरे शरीर को क्यों जलाने लगता है ? ॥ १२॥

उर्वशी—देखती हूँ, इसका ये क्या उत्तर देते हैं ?

चित्रलेखा—णं भणिदं एव्व मिलाणकमलणालाअमाणेहिं अंगेहिं। [ननु भणितमेव म्लानकमलनालायमानैरङ्गैः।]

विदूषकः—दिट्ठि आ मए वुभुक्खिदेण सोत्थिवाअणं विअ उवलद्धं भवदा उक्कंठिदेण समासासणं। [दिष्ट्या मया बुभुक्षितेन स्वस्तिवायनमिवोपलब्धं भवतोत्कण्ठितेन समाश्वासनम्।]

राजा—समाश्वासनमिति किमुच्यते ?

तुल्यानुरागपिशुनं ललितार्थबन्धं पत्रे निवेशितमुदाहरणं प्रियायाः ।
उत्पक्ष्मणा मम सखे मदिरेक्षणायास्तस्याः समागतमिवाननमाननेन ॥ १३ ॥

उर्वशी—एत्थ णो समविभाआ पीदी। [अत्रावयोः समविभागा प्रीतिः।]

राजा—वयस्य ! अङ्गुलिस्वेदेन दूष्येरन्नक्षराणि धार्यतामयं मम प्रियायाः स्वहस्तः।

विदूषकः—(गृहीत्वा) किं दाणिं तत्तभोदी उव्वसी भवदो मणोरहाणं कुसुमं दंसिअ फले विसंवददि। [किमिदानीं तत्रभवत्युर्वशी भवतो मनोरथानां कुसुमं दर्शयित्वा फले विसंवदति।]

उर्वशी—सहि ! जाव उवगमणकादरं हिअअं पज्जवत्थावेमि दाव तुमं से अत्ताणं दंसिअ जं मे खमं तं भणाहि। [सखि ! यावदुपगमनकातरं हृदयं पर्यवस्थापयामि तावत्त्वमस्यात्मानं दर्शयित्वा यन्मम क्षमं तद्भण।]

चित्रलेखा—तह। [तथा।] (तिरस्करिणीमपनीय राजानमुपेत्य) जेदु जेदु महाराओ। [जयतु जयतु महाराजः।]

राजा—(दृष्ट्वा सहर्ष) स्वागतं भवत्यै। (पार्श्वमवलोक्य) भद्रे !

न तथा नन्दयसि मां सख्या विरहिता तया ।
सङ्गमे दृष्टपूर्वेव यमुना गङ्गया विना ॥ १४ ॥

चित्रलेखा—मुरझाये हुए कमलनाल के समान उनके अंगों ने ही सब कुछ कह डाला।

विदूषक—यह सौभाग्य की बात है कि आपकी बेचैनी को दूर करने के लिए यह वैसा समाश्वासन (सहारा) मिल गया जैसा भूख लगने पर मुझे कहीं से चबैना मिल गया हो।

राजा—इसे तुम केवल समाश्वासन कह रहे हो ?

मैं तो जब उस मदभरे नयनों वाली (उर्वशी) के उदार मानसिक भावों से परिपूर्ण इन शब्दों को तथा उसके मन में भी मेरे ही मन के जैसे प्रेमभाव को प्रकट करने वाले प्रेमपत्र को पढता हूँ, तब मुझे ऐसा लगता है कि मानो हम दोनों आमने-सामने खडे हों॥ १३॥

उर्वशी—अब जाकर हम दोनों का प्रेम समान हो पाया है।

राजा—मित्र ! मेरी प्रिया के इस प्रेमपत्र को तुम पकड़े रहो, कहीं मेरी अंगुलियों के पसीने से इसके अक्षर मलिन न हो जायें।

विदूषक—(हाथ में लेकर) जिस आदरणीया उर्वशी ने पत्र भेजकर आपके मनोरथों को पुष्पित किया है, क्या वह फल देने में विवाद करेगी ?

उर्वशी—सखी ! अभी तो मेरा हृदय उनके समीप जाने में हिचक रहा है, जब तक मैं अपने मन को सुस्थिर करती हूँ तब तक तुम इनके सामने जाकर मेरी ओर से जो कहना चाहो कह सकती हो।

चित्रलेखा—अच्छा। (पर्दा हटाकर राजा के पास पहुँचकर) महाराज की जय हो, जय हो।

राजा—(देखकर प्रसन्नता से) आप का स्वागत है। (अगल-बगल देखकर) सुन्दरी !

जैसे प्रयाग का संगम देखने की इच्छा वाले पुरुष को गंगा के बिना केवल अकेली यमुना अच्छी नहीं लगती, वैसे ही अपनी सखी (उर्वशी) के बिना तुम भी मुझे अच्छी नहीं लग रही हो॥ १४॥

चित्रलेखा—णं पढमं मेहराई दीसदि पच्छा विज्जुलदा। [ननु प्रथमं मेघराजिर्दृश्यते पश्चाद्विद्युल्लता।]

विदूषकः—(अपवार्य) कहं ण एसा उव्वसी। ताए तत्तहोदीए अहिमदा सहअरी। [कथं नैषोर्वशी। तस्यास्तत्रभवत्या अभिमता सहचरी।]

राजा—एतदासनमास्यताम्।

चित्रलेखा—उव्वसी महाराअं सिरसा पणमिअ विण्णवेदि। [उर्वशी महाराजं शिरसा प्रणम्य विज्ञापयति।]

राजा—किमाज्ञापयति ?

चित्रलेखा—तस्सिं सुरारिसंभवे दुज्जादे महाराओ एव्व सरणं आसि। सा अहं संपदं तुह दंसणसमुत्थेण मअणेण वलिअं दाहीअमाणा भूओ वि महाराएण अणुकंपणीअत्ति। [तस्मिन्सुरारिसम्भवे दुर्जाते महाराज एव मम शरणमासीत्। साहं साम्प्रतं तव दर्शनसमुत्थेन मदनेन वलवद्बाध्यमाना भूयोऽपि महाराजस्यानुकम्पनीया भवामि इति।]

राजा—अयि भद्रमुखि !

पर्युत्सुकां कथयसि प्रियदर्शनां तामार्ते न पश्यसि पुरूरवसं तदर्थे ।
साधारणोऽयमुभयोः प्रणयः स्मरस्य तप्तेन तप्तमयसा घटनाय योग्यम् ॥ १५॥

चित्रलेखा—(उर्वशीमुपेत्य) सहि ! एहि। तुवत्तो वि णिद्दअदरं मअणं पेक्खिअ पिअअमस्स दे दूदिम्हि संवुत्ता। [सखि ! एहि। त्वत्तोऽपि निर्दयतरं मदनं प्रेक्ष्य प्रियतमस्य ते दूत्यस्मि संवृत्ता।]

उर्वशी—(तिरस्करिणीमपनीय) अम्महे ! लहुअं तुए अणवेक्खिदं उज्झिदम्हि। [अहो ! लघु त्वयानवेक्षितमुज्झितास्मि।]

चित्रलेखा—(सस्मितम्) सहि ! इदो मुहुत्तादो जाणिस्सं का कं उज्झिस्सदि। आआरं दाव पडिवज्ज। [सखि ! इतो मुहूर्तादेव ज्ञास्यामि का कामुज्झिष्यतीति। आचारं तावत्प्रतिपद्यस्व।]

चित्रलेखा—किन्तु महाराज ! पहले बदली दिखलायी देती है, उसके बाद बिजली चमकती है।

विदूषक—(अलग से) तो क्या ये उनकी प्रिय सखी है, उर्वशी नहीं है।

राजा—आइये, इस आसन पर बैठिए।

चित्रलेखा—उर्वशी ने महाराज को सिर नवाकर प्रणाम करते हुए कहलवाया है।

राजा—उन्होंने क्या आज्ञा दी है ?

चित्रलेखा—उस बार जब मुझे दैत्य पकड़ ले गये थे, तब उस समय महाराज ने ही मेरी रक्षा की थी। वही मैं इस समय आपको देखकर मदनपीडा से व्याकुल है, अतः फिर भी आपकी कृपा को चाह रही हूँ।

राजा—अरी सुन्दरी ! उस मुग्धा अपनी सखी को तुम प्रेम में व्याकुल बतला रही हो, पर तुम यह नहीं देख रही हो कि यह पुरूरवा उसके विरह में पीडा का अनुभव कर रहा है। हम दोनों का कामजनित प्रेम समान रूप से ही बढा है। इसलिए तपे हुए लोहे को तपे हुए लोहे से जोड़ देना चाहिए॥ १५॥

चित्रलेखा—(उर्वशी के पास जाकर) आओ सखी ! कामदेव ने तुमसे भी अधिक क्रूरता के साथ उन्हें सता रखा है, अतः मैं तुम्हारे प्रियतम की दूती बनकर तुम्हारे पास आयी हूँ।

उर्वशी—(पर्दा को हटाकर) अरे ! तू शीघ्र ही मुझे छोडकर उधर चली गयी।

उर्वशी—(ससाध्वसं राजानमुपेत्य प्रणम्य च सव्रीडम्) जेदु जेदु महाराओ। [जयतु जयतु महाराजः।]

राजा—(सहर्षम्) सुन्दरि!

मया नाम जितं यस्य त्वयायं समुदीर्यते ।
जयशब्दः सहस्राक्षादगतः पुरुषान्तरम् ॥ १६ ॥

(हस्ते गृहीत्वैनामुपवेशयति)

विदूषकः—भोदि! रण्णो पिअवअस्सो वम्हणो किं ण वंदीअदि। [भवति! राज्ञः प्रियवयस्यो ब्राह्मणः किं न वन्द्यते।]

(उर्वशी सस्मितं प्रणमति)

विदूषकः—सत्थि भोदीए। [स्वस्ति भवत्यै।]

(नेपथ्ये देवदूतः) चित्रलेखे! त्वरय त्वरयोर्वशीम्।

मुनिना भरतेन यः प्रयोगो भवतीष्वष्टरसाश्रयो नियुक्तः ।
ललिताभिनयं तमद्य भर्ता मरुतां द्रष्टुमनाः सलोकपालः ॥ १७ ॥

(सर्वे कर्ण ददति। उर्वशी विषादं रूपयति)

चित्रलेखा—सुदं पिअसहीए देवदूदस्स वअणं। ता अणुमाणीअदु महाराओ। [श्रुतं प्रियसख्या देवदूतस्य वचनम्। तदनुमान्यतां महाराजः।]

उर्वशी—णत्थि मे वाआ। [नास्ति मे वाचा।]

चित्रलेखा—महाराअ! उव्वसी विण्णवेदि—परवसो अअं जणो। ता महाराएण अब्भणुण्णादा इच्छामि देवेसु अणवरुद्धं अत्ताणअं कादुं त्ति। [महाराज! उर्वशी विज्ञापयति—परवशोऽयं जनः। तन्महाराजेनाभ्यनुज्ञाता इच्छामि देवेष्वनपराद्धमात्मानं कर्तुमिति।]

चित्रलेखा—(मुस्कराकर) सखी! अभी थोड़ी देर में देखती हूँ, कौन किसको छोड़कर जाती है। अच्छा, पहले महाराज को प्रणाम तो कर लो।

उर्वशी—(घबराहट के साथ राजा के समीप जाकर लजाती हुई प्रणाम करके) महाराज की जय हो, महाराज की जय हो।

राजा—(प्रसन्न होकर) सुन्दरी! जिस 'जय' शब्द का प्रयोग तुमने हजार आँखों वाले देवराज इन्द्र के लिए किया था, उसी 'जय' शब्द का प्रयोग आज तुमने मेरे लिए किया है, अतः सचमुच मैं विजयी हो गया हूँ॥ १६॥

(हाथ से पकड़कर उसे बैठाता है)

विदूषक—देवीजी! महाराज के प्रिय मित्र ब्राह्मण को क्या आप प्रणाम नहीं करेंगी?

(उर्वशी मुस्कराती हुई प्रणाम करती है)

विदूषक—आपका कल्याण हो।

(नेपथ्य में देवदूत कहता है) चित्रलेखा! उर्वशी को यहाँ आने के लिए शीघ्र तय्यार करो। भरत मुनि ने तुम लोगों को आठ रसों से युक्त जो नाटक सिखलाया है, उसी का ललित अभिनय देवताओं के स्वामी इन्द्र लोकपालों के साथ देखना चाहते हैं॥ १७॥

(सब कान लगाकर सुनते हैं। उर्वशी दुःखी होने का अभिनय करती है।)

चित्रलेखा—प्रियसखी! आपने देवदूत का सन्देश सुना? तो अब महाराज से अनुमति ले लो।

उर्वशी—मुझसे तो कुछ कहा नहीं जा रहा है।

राजा—(कथं कथमपि वाचं व्यवस्थाप्य) नास्मि भवत्योरीश्वरनियोगप्रत्यर्थी। स्मर्तव्यस्त्वयं जनः।

(उर्वशी वियोगदुःखं रूपयित्वा राजानं पश्यन्ती सह सख्या निष्क्रान्ता।)

राजा—(निःश्वस्य) सखे! वैयर्थ्यमिव मे चक्षुषोः सम्प्रति।

विदूषकः—(पत्रं दर्शयितुकामः) णं एदं·····। (इति अर्धोक्ति सविषादमात्मगतम्) हद्धी हद्धी! उव्वसीदंसणविम्हिदेण मए तं भुज्जवत्तअं पब्भट्ठं वि हत्थादो पमादेण ण विण्णादं। [ननु एतत्·····हा धिक् हा धिक्! उर्वशीदर्शनविस्मितेन मया तद्भूर्जपत्रकं प्रभ्रष्टमपि हस्तात्प्रमादेन न विज्ञातम्।]

राजा—भद्र! किमसि वक्तुकाम इव?

विदूषकः—एव्वं वत्तुकामोम्हि—मा भवं अंगाइं मुंचदु। दिढं क्खु तुइ वद्धभावा उव्वसी ण सा इदोगदं अणुराअं सिढिलेदि त्ति। [एवं वक्तुकामोऽस्मि—मा भवानङ्गानि मुञ्चतु दृढं खलु त्वयि वद्धभावा उर्वशी न सा इतोगतमनुरागं शिथिलयति इति।]

राजा—ममाप्येतदाशंसि मनः। तया खलु प्रस्थाने—

अनीशया शरीरस्य स्ववशं हृदयं मयि।
स्तनकम्पक्रियालक्ष्यैर्न्यस्तं निःश्वसितैरिव ॥१८॥

विदूषकः—(स्वगतम्) वेवदि मे हिअअं इमं वेलं अत्तभवदा तस्स भुज्जवत्तस्स णाम गेण्हिदव्वं त्ति। [वेपते मे हृदयमिमां वेलामत्रभवता तस्य भूर्जपत्रस्य नाम ग्रहीतव्यमिति।]

राजा—वयस्य! केनेदानीं दृष्टिं विलोभयामि। (स्मृत्वा) आः! उपनयतु भवान्भूर्जपत्रम्।

चित्रलेखा—महाराज! उर्वशी निवेदन कर रही है—मैं तो पराधीन हूँ। यदि महाराज की आज्ञा मिल जाय तो मैं चली जाऊँ, क्योंकि ऐसा करने से मैं देवताओं के अपराध से बच जाऊँगी।

राजा—(किसी-किसी प्रकार लडखड़ाती हुई वाणी को स्थिर करके) मैं आप दोनों के स्वामी की आज्ञा का भला कैसे विरोध कर सकता हूँ?

(उर्वशी विरहवेदना का प्रदर्शन करके राजा को देखती हुई अपनी सखी के साथ चली जाती है।)

राजा—(उसाँसें भरकर) मित्र! अब तो मेरी आँखें व्यर्थ जैसी लग रही हैं।

विदूषक—(उस पत्र को दिखलाने की इच्छा वाला) किन्तु यह·····(इस प्रकार आधी बात कहकर दुःख के साथ मन ही मन) हाय मुझे धिक्कार है। हाय मुझे धिक्कार है। उस उर्वशी के दर्शन से चकित हुए मैंने वह भोजपत्र मेरे हाथ से कहाँ छूट गया मुझे मालूम ही नहीं है।

राजा—मित्र! तुम कुछ कहना चाह रहे हो, ऐसा लग रहा है।

विदूषक—मैं ऐसा कहना चाह रहा था कि आप अपने शरीरावयवों को दुःखी न करें। आपके प्रति स्नेह करने वाली उर्वशी यहाँ से चली जाने पर भी अपने प्रेम को शिथिल नहीं करेगी।

राजा—मेरा मन भी यही कह रहा है। उसने अपने प्रस्थान काल में—

अपने शरीर पर अधिकार न होने पर भी अपने वश वाले हृदय को अपने उसाँसों के साथ मुझे सौंप गयी, जो उसके स्तनों के कम्पन से स्पष्ट प्रतीत हो रहा था॥ १८॥

विदूषक—(मन ही मन) आप द्वारा भोजपत्र का नाम लिया जायगा, यह सोचकर इस समय मेरा हृदय काँप रहा है।

राजा—मित्र! बतलाओ, अब मैं इस समय किससे अपनी दृष्टि को शीतल करूँ। (सोचकर) अरे! वह भोजपत्र तो ले आओ।

विदूषकः—(सर्वतो दृष्ट्वा विषादं नाटयति) हंत, ण दिस्सदि। भो दिव्वं क्खु तं भुज्जवत्तं गदं उव्वसीए मग्गेण। [हन्त, न दृश्यते। भोः! दिव्यं खलु तद्भूर्जपत्रं गतमुर्वश्या मार्गेण।]

राजा—(सासूयम्) अहो, सर्वत्र प्रमादी वैधेयः। ननु विचिनोतु भवान्।

विदूषकः—(उत्थाय) ण इदो भवे। इह वा भवे। इह वा भवे। [ननु इतो भवेत्। इह वा भवेत्। इह वा भवेत्।] (इति विचेतव्यं नाटयति)

(ततः प्रविशति सपरिवारा काशिराजपुत्री देवी चेटी च)

देवी—हंजे णिउणिए! सच्चं तुए भणिदं इमं लदागेहं पविसंतो अज्जमाणवअसहाओ अज्जउत्तो दिट्ठो त्ति। [हञ्जे निपुणिके! सत्यं त्वया भणितमिदं लतागेहं प्रविशन्नार्यमाणवकसहाय आर्यपुत्रो दृष्ट इति।]

निपुणिका—किं अण्णहा भट्टिणी मए कदा वि विण्णविदपुव्वा? [किमन्यथा भट्टिनी मया कदापि विज्ञापितपूर्वा?]

देवी—तेण हि लदाविडवंतरिदा सुणिस्सं दाव से विस्सद्धा मंत्तिदाणि जं तुए कहिदं तं सच्चं ण वत्ति। [तेन हि लताविटपान्तरिता श्रोष्यामि तावदस्य विश्रब्धा मन्त्रितानि यत्त्वया कथितं तत्सत्यं न वेति।]

निपुणिका—जं भट्टिणीए रुच्चदि। [यद्भट्टिन्यै रोचते।]

देवी—(परिक्रम्य पुरस्तादवलोक्य च) हंजे णिउणिए! किं णु क्खु एदं जिण्णचीअरं विअ इदोमुहं दक्खिणमारुदेण आणीअदि। [हञ्जे निपुणिके! किं नु खल्वेतज्जीर्णचीवरमिवेतोमुखं दक्षिणमारुतेनानीयते।]

निपुणिका—(विभाव्य) भट्टिणी! पडिवत्तणविभाविदक्खरं भुज्जवत्तं क्खु एदं। हंत भट्टिणीए एव्व णेउरकोडीए लग्गं। (गृहीत्वा) णं वाईअंदु एदं। [भट्टिनि! परिवर्त्तनविभावितार्क्षरं भूर्जपत्रं खल्वेतत्। हन्त, भट्टिन्या एव नूपुरकोट्या लग्नम्। ननु वाच्यतामेतत्।]

विदूषक—(चारों ओर देखकर दुःखी होने का अभिनय करता है) हाय! वह तो कहीं नहीं दिख रहा है। अरे! वह भोजपत्र तो स्वर्गीय था, अतएव वह भी उर्वशी के साथ चला गया होगा।

राजा—(क्रोध से) अरे! यह मूर्ख सब जगह असावधान रहता है। जाओ उसे ढूँढो।

विदूषक—(उठकर) निश्चय ही वह इधर होगा या यहाँ होगा अथवा यहाँ होगा। (इस प्रकार इधर-उधर ढूँढने का नाटक करता है।)

(उसके बाद काशीनरेश की पुत्री महारानी अपनी दासियों के साथ आती हैं।)

देवी—सखी निपुणिका! तुमने ठीक ही कहा था कि आर्य माणवक के साथ आर्यपुत्र लतामंडप में गये हैं।

निपुणिका—क्या मैंने आज तक कभी आप से मिथ्या भाषण किया है?

देवी—अच्छा, तो मैं लतावृक्षों की ओट में खड़ी होकर इनकी बातों को विश्वासपूर्वक सुनती हूँ कि जो तुमने कहा था, वह सत्य है या नहीं।

निपुणिका—जैसा स्वामिनी को अच्छा लगे।

देवी—(घूमकर सामने की ओर देखकर) सखी निपुणिका! देखो, यह मलयपवन के साथ पुराने वस्त्र जैसा इधर की ओर को मुख किया हुआ उड़कर आ रहा है।

निपुणिका—(विचारकर) स्वामिनी! यह तो भोजपत्र है, जो उलटा-पलटा होकर इधर आ

देवी—अणुवाएहि दाव एदं। जदि अविरुद्धं तदो सुणिस्सं। [अनुवाचय तावदेतत्। यद्यविरुद्धं ततः श्रोष्यामि।]

निपुणिका—(तथा कृत्वा) भट्टिणी ! तं एव्व कोलीणं विअ पडिहादि। भट्टारअं उद्दिसिअ उव्वसीए कव्ववंधो त्ति तक्केमि। अज्जमाणवअप्पमादेण अ अम्हाणं हत्थं आगदो त्ति। [भट्टिनि ! तदेव कौलीनमिव प्रतिभाति। भट्टारकमुद्दिश्योर्वश्याः काव्यबन्ध इति तर्कयामि। आर्यमाणवकप्रमादेन चावयोर्हस्तमागत इति।]

देवी—तेण हि से गहीदत्था होमि। [तेन ह्यस्य गृहीतार्था भवामि।]

(निपुणिका वाचयति)

देवी—(श्रुत्वा) एत्थ इमिणा एव्व उवाअणेण दं अच्छराकामुअं पेक्खामि। [अत्रानेनैवोपायनेन तमप्सरःकामुकं प्रेक्षे।]

निपुणिका—तह। [तथा।]

(इति परिजनसहिते लतागृहं परिक्रामतः)

विदूषकः—(विलोक्य) भो वअस्स ! किं एदं पवणवसगामि पमदवणसमीवगदकीलापव्वदपज्झं ते दीसदि। [भो वयस्य ! किमेतत्पवनवशगामि प्रमदवनसमीपगतक्रीडापर्वतपर्यन्ते दृश्यते।]

राजा—(उत्थाय) भगवन्वसन्तप्रिय दक्षिणवायो !

वासार्थं हर सम्भृतं सुरभिणा पौष्पं रजो वीरुधां
किं कार्यं भवतो हृतेन दयितास्नेहस्वहस्तेन मे।
जानीते हि मनोविनोदनशतैरेवंविधैर्धारितं
कामार्तं जनमज्जनां प्रति भवानालक्षितप्रार्थनः ॥ १९ ॥

रहा है, जिसमें लिखे गये अक्षर पढे नहीं जा रहे हैं। अरे ! यह तो स्वामिनी के नूपुर (पायल) के कोने में आकर सट गया है। (पकड़कर) जरा इसे पढ लीजिए।

देवी—तुम्हीं इसे पढ़ डालो। यदि मेरे मन के अनुकूल विषय होगा तो मैं भी सुन लूँगी।

निपुणिका—(वैसा ही करके) स्वामिनी ! वही कोई प्रेम की-सी बात लग रही है। महाराज को लक्ष्य करके उर्वशी द्वारा लिखा गया यह पद्य है, ऐसा मैं सोचती हूँ। आर्य माणवक की असावधानी से यह उर्वशी का हस्तलेख हमारे हाथ में आ गया है, ऐसा लगता है।

देवी—अच्छा इसे पढो, इसका अर्थ तो मैं समझूँ।

(निपुणिका उसे पढ़ती है)

देवी—(सुनकर) तो चलो, हम इसी उपहार से उस अप्सरा के प्रेमी को देखें।

निपुणिका—अच्छा चलिए।

(दासियों के साथ लतामंडप की ओर घूम जाती है)

विदूषक—(देखकर) अरे मित्र ! यह प्रमदवन के समीप क्रीड़ापर्वत के कोने पर हवा के झोंके से हिलता हुआ जैसा क्या दिखलायी दे रहा है ?

राजा—(उठकर) वसन्त के प्रियमित्र ! मलयानिल !

तुम्हें यदि अपना शरीर सुवासित करना हो तो तुम लताओं में खिले हुए तथा वसन्त के द्वारा एकत्रित किये हुए फूलों के पराग को उठाकर क्यों नहीं ले जाते ? मेरी प्रियतमा के प्रेम युक्त हाथ से लिखे हुए पत्र से तुम्हें क्या काम है ? तुम तो स्वयं अञ्जना से प्रेम कर चुके हो, अतएव तुम जानते

निपुणिका—भट्टिणि ! पेक्ख पेक्ख। एदस्स एव्व अण्णेसणा वट्टदि। [भट्टिनी ! प्रेक्षस्व प्रेक्षस्व। एतस्यैवान्वेषणा वर्तते।]

देवी—णं पेक्खामि दाव। तुण्हिं चिट्ठ। [ननु पश्यामि तावत्। तूष्णीं तिष्ठ।]

विदूषकः—(सविषादम्) हद्धी हद्धी भो, मिलाअमाणकेसरच्छविणा मोरपिच्छेण विप्पलद्धो म्हि। [हा धिक् हा धिक् भोः, म्लायमानकेशरच्छविना मयूरपिच्छेन विप्रलब्धोऽस्मि।]

राजा—सर्वथा हतोऽस्मि।

देवी—(सहसोपसृत्य) अज्जउत्त अलं आवेएण। एदं तं भुज्जवत्तं। [आर्यपुत्र ! अलमावेगेन। एतत्तद्भूर्जपत्रम्।]

राजा—(ससम्भ्रमम्) अये देवी ! स्वागतं देव्यै।

विदूषकः—(अपवार्य) दुरागदं दाणिं संवुत्तं। [दुरागतमिदानीं संवृत्तम्।]

राजा—(जनान्तिकम्) वयस्य ! किमत्र प्रतिविधेयम् ?

विदूषकः—(अपवार्य) लोत्थेण गहीदस्स कुंभीलअस्स अत्थि वा पडिवअणं। [लोत्रेण गृहीतस्य कुम्भीरकस्यास्ति वा प्रतिवचनम्।]

राजा—(जनान्तिकम्) मूढ ! नायं परिहासकालः। (प्रकाशम्) देवि ! नेदं मया मृग्यते। अयं खलु परान्वेषणार्थमारम्भः।

देवी—जुज्जदि अत्तणो सोहग्गं पच्छदेदुं। [युज्यते आत्मनः सौभाग्यं प्रच्छादयितुम्।]

विदूषकः—भोदि ! तुवरेहि से भोअणं जं पित्तोवसमणसमत्थं होदि। [भवति ! त्वरयास्य भोजनं यत्पित्तोपशमनसमर्थं भवति।]

ही होगे कि ऐसी ही मन को वहलाने वाली अनेक वस्तुओं को देखकर ही तो प्रणयी पुरुष जीवन बिताया करते हैं॥ १९॥

निपुणिका—स्वामिनी ! देखिए, देखिए। ये लोग इसी को ढूँढ रहे हैं।

देवी—तुम चुपचाप रहो, मैं देखती हूँ (ये क्या करते हैं)।

विदूषक—(**दुःखी होकर**) हाय हाय मुझे धिक्कार है, क्योंकि मैं इस मुरझाये हुए केसर जैसा दिखलायी देने वाले मोरपंख से ठगा गया हूँ।

राजा—मैं तो सब प्रकार से लुट गया।

देवी—(**एकाएक पास जाकर**) आर्यपुत्र ! घबराइये मत, यह वही भोजपत्र है।

राजा—(**घबराकर**) अये ! महारानी ! आपका स्वागत है।

विदूषक—(**हटाकर**) इस समय इनका यहाँ पधारना अच्छा नहीं हुआ।

राजा—(**एकान्त में**) मित्र ! अब क्या उपाय करना चाहिए ?

विदूषक—(**हटाकर**) चोरी के सामान के साथ पकडा गया चोर उत्तर ही क्या दे सकता है ?

राजा—(**एकान्त में**) मूर्ख ! यह परिहास करने का समय नहीं है। (**प्रकट में**) देवी ! मैं इसे नहीं खोज रहा था। मैं तो कुछ और ही खोजने में लगा था।

देवी—आपके लिए यह उचित ही है कि आप अपना सौभाग्य मुझसे छिपायें।

विदूषक—देवी ! महाराज के भोजन के प्रबन्ध में शीघ्रता कीजिए, जिससे इनके पित्त की शान्ति हो सके।

देवी—णिउणिए! सोहणं क्खु बम्हणेण आसासिदो वअस्सो। [**निपुणिके! शोभनं खलु ब्राह्मणेनाश्वासितो वयस्यः।**]

विदूषकः—भोदि! णं पेक्ख आसासिदो पिसाचो वि भोअणेण। [**भवति! ननु पश्य आश्वासितः पिशाचोऽपि भोजनेन?**]

राजा—मूर्ख! बलादपराधिनं मां प्रतिपादयसि।

देवी—णत्थि क्खु भवदो अवराहो। अहं एव्व एत्थ अवरद्धा जा पडिऊलदंसणा भविअ अग्गदो दे. चिट्ठामि। इदो अहं गमिस्सं। णिउणिए! एहि गच्छम्ह। [**नास्ति खलु भवतोऽपराधः। अहमेवात्रापराद्धा या प्रतिकूलदर्शना भूत्वाग्रतस्ते तिष्ठामि। इतोऽहं गमिष्यामि। निपुणिके! एहि गच्छामः।**] (इति कोपं नाटयित्वा प्रस्थिता)

राजा—(अपसृत्य)

अपराधी नामाहं प्रसीद रम्भोरु विरम संरम्भात्।
सेव्यो जनश्च कुपितः कथं नु दासो निरपराधः ॥२०॥

(इति पादयोः पतति)

देवी—(स्वगतम्) मा क्खु लहुहिअआ अहं अणुणअं बहु मण्णे। किं दु अदक्खिण्णकिदस्स. पच्छादावस्स भाएमि। [**मा खलु लघुहृदयाहमनुनयं बहु मन्ये। किन्त्वदाक्षिण्यकृतात्पश्चात्तापाद्-बिभेमि।**]

(इति राजानमपहाय सपरिवारा निष्क्रान्ता)

विदूषकः—पाउसणदी विअ अप्पसण्णा गदा देवी। ता उट्ठेहि उट्ठेहि। [**प्रावृण्नदीवाप्रसन्ना गता देवी। तदुत्तिष्ठ उत्तिष्ठ।**]

राजा—(उत्थाय) वयस्य! नेदमुपपन्नम्। पश्य—

देवी—निपुणिका! इस ब्राह्मण (विदूषक) ने अपने मित्र (राजा) को अच्छा बचाया।

विदूषक—देवी! देखिए, भोजन देकर तो भूत-पिशाच भी आश्वस्त हो जाते हैं।

राजा—अरे मूर्ख! तू मुझे बिना बात के अपराधी बना रहा है?

देवी—यह आपका अपराध नहीं है, यह मेरा ही अपराध है, जो मैं इस अनुचित समय में आपके काम में विपरीत दृष्टि वाली बनकर यहाँ आ गयी। अब मैं यहाँ से चली जाऊँगी। निपुणिका! आओ चलें। **(इस प्रकार क्रोध का अभिनय करके चली जाती है।)**

राजा—**(पीछे-पीछे जाकर)** सुनिए देवी! अपराधी मैं ही हूँ। सुन्दरी! मान जाओ, इतनी नाराज मत हो। जब स्वामिनी ने क्रोध किया है तो दास (सेवक) निरपराधी कैसे हो सकता है? ॥२०॥

(ऐसा कहकर राजा पैरों पर गिरता है।)

देवी—**(मन ही मन)** मुझे ऐसी सरल हृदय वाली मत समझिए जो आपके इस अनुनय वाली बातों से मैं सरलता मे प्रसन्न हो जाऊँगी। मैं तो केवल अकुशलतापूर्ण व्यवहार से डरती हूँ, क्योंकि उसका बाद में पश्चात्ताप करना पड़ता है।

(ऐसा कहकर रानी राजा को छोड़कर दासियों के साथ चली जाती है।)

विदूषक—वर्षाकालीन नदी की भाँति अप्रसन्न मन वाली देवी चली गयी। अब आप उठिए, उठिए।

राजा—**(उठकर)** मित्र! यह अच्छा नहीं हुआ। देखो—

प्रियवचनकृतोऽपि योषितां दयितजनानुनयो रसादृते ।
प्रविशति हृदयं न तद्विदां मणिरिव कृत्रिमरागयोजितः ॥ २१ ॥

विदूषकः—अणुऊलं एव्व अत्तभवदो एदं ण। क्खु अक्खिदुक्खिदो अहिमुहे दीवसिहं सहेदि। [अनुकूलमेवात्रभवत एतत्। न खल्वक्षिदुःखितोऽभिमुखे दीपशिखां सहते।]

राजा—मा मैवम्! उर्वशीगतमनसोऽपि मे स एव देव्यां बहुमानः। किन्तु प्रणिपातलङ्घनादहमस्यां धैर्यमवलम्बयिष्ये।

विदूषकः—भो!. चिट्ठदु दाव भवदो धीरदा। बुभुक्खिदस्स बम्हणस्स जीविदं अवलंबदु भवं। समओ क्खु ण्हाणभोअणं सेविदुं। [भो! तिष्ठतु तावद्भवतो धीरता। बुभुक्षितस्य ब्राह्मणस्य जीवितमवलम्बतां भवान्। समयः खलु स्नानभोजनं सेवितुम्।]

राजा—(ऊर्ध्वमवलोक्य) गतमर्धं दिवसस्य। अतः खलु—

उष्णालुः शिशिरे निषीदति तरोर्मूलालवाले शिखी
निर्भिद्योपरि कर्णिकारमुकुलान्यालीयते षट्पदः ।
तप्तं वारि विहाय तीरनलिनीं कारण्डवः सेवते
क्रीडावेश्मनि चैष पञ्जरशुकः क्लान्तो जलं याचते ॥ २२ ॥

(इति निष्क्रान्तौ)

॥ इति द्वितीयोऽङ्कः ॥

यदि पति वास्तविक प्रेम के बिना ऊपरी मन से चिकनी-चुपड़ी बाते करके अपनी प्रियतमा को मनाने लगता है, तो उसकी वे बातें स्त्रियों के मन में उसी प्रकार प्रवेश नहीं करतीं जैसे बनावटी रंग से रँगा हुआ मणि जौहरी को नहीं जँचता ॥ २१ ॥

विदूषक—आपके लिए तो यह अच्छा ही हुआ। जिसकी आँखें आ गयी हों, उसे सामने रखी हुई दीपक की लौ अच्छी थोड़ी लगती है।

राजा—ऐसा मत कहो। उर्वशी से प्रेम होने पर भी मेरे मन में महारानी के प्रति पूर्ववत् वही सम्मान है, किन्तु मेरे इतने अनुनय-विनय करके प्रणाम करने के बाद भी जब वह उसका अनादर कर दी तो अब मैं भी धैर्य का सहारा लिया करूँगा।

विदूषक—अरे ! आपकी धीरता अपनी जगह रहे। इस समय पहले आप भूखे ब्राह्मण के प्राणों को बचाइये। चलिए स्नान तथा भोजन करने का समय हो गया है।

राजा—(ऊपर की ओर देखकर) आधा दिन बीत गया। इसीलिए—

यह मोर गर्मी से घबराकर पेड के नीचे बने हुए शीतल थाले में बैठ गया है, भौंरा कनेर की कली को खोलकर उसके भीतर छिप रहा है, यह जलकुक्कुट तालाब के गरम पानी को छोडकर कमलिनी की छाया में बैठा है और क्रीडागृह में पाला गया यह शुक (तोता) पिंजडे में उदास होकर जल माँग रहा है ॥ २२ ॥

(दोनों चले जाते हैं।)

दूसरा अंक समाप्त।

तृतीयोऽङ्कः

(ततः प्रविशतो भरतशिष्यौ)

गालवः—सखे पेलव! महेन्द्रभवनं गच्छता भगवतोपाध्यायेन त्वमासनं प्रतिग्राहितः। अग्निशरणसंरक्षणाय स्थापितोऽहम्। अतः खलु पृच्छामि—अपि गुरोः प्रयोगेण दिव्या परिषदाराधिता।

पेलवः—गालव! ण जाणे आराहिदा ण वत्ति। तस्सिं उण सरस्सईकिदकव्ववंधे लच्छीसअंवरे तेसु तेसु रसंतरेसु तम्मई आसि। किंतु—। [**गालव! न जाने आराधिता न वा इति। तस्मिन्पुनः सरस्वतीकृतकाव्यबन्धे लक्ष्मीस्वयंवरे तेषु तेषु रसान्तरेषु तन्मयी आसीत्। किन्तु—**]

गालवः—सदोषावकाश इव ते वाक्यशेषः]

पेलवः—आं, तस्सिं उव्वसीए वअणं पमादक्खलिदं आसि। [**आम्, तस्मिन्नुर्वश्या वचनं प्रमादस्खलितमासीत्।**]

गालवः—कथमिव ?

पेलवः—लच्छीभूमिआए वट्टमाणा उव्वसी वारुणीभूमिआए वट्टमाणाए मेणआए पुच्छिदा—सहि! समागदा एदे तेलोक्कसुपुरिसा सकेसवा अ लोअवाला। कदमस्सिं दे भावाहिणिवेसो त्ति। [**लक्ष्मीभूमिकायां वर्त्तमानोर्वशी वारुणीभूमिकायां वर्त्तमानया मेनकया पृष्टा—सखि! समागता एते त्रैलोक्यसुपुरुषाः सकेशवाश्च लोकपालाः कतमस्मिंस्ते भावाभिनिवेश इति।**]

गालवः—ततस्ततः।

पेलवः—तदो ताए पुरुसोत्तमे त्ति भणिदव्वे पुरूरवसि त्ति ताए निग्गदा वाणी। [**ततस्तया पुरुषोत्तमे इति भणितव्ये पुरूरवसीति तस्या निर्गता वाणी।**]

(भरत मुनि के दो शिष्यों का प्रवेश)

गालव—मित्र पेलव! देवराज इन्द्र के भवन को जाते समय गुरुजी ने अपना आसन ले चलने के लिए तुम्हें पकडाया था तथा मुझे अग्निहोत्र के लिए यहीं रोक लिया था। इसीलिए मैं पूछता हूँ कि गुरुजी द्वारा अभिनीत नाटक से देवताओं की सभा आनन्दित हुई ?

पेलव—गालव! मैं नहीं जानता कि देवसभा प्रसन्न हुई या नहीं, किन्तु वहाँ जो 'लक्ष्मीस्वयंवर' नामक नाटक हुआ था और जिसके गीत स्वयं सरस्वती ने वनाये थे, उन-उन में जो-जो रस जव-जव दिखलाये जाते थे, तव-तव उन रसों के प्रसंग में वह सभा मगन हो जाती थी। परन्तु····

गालव—तुम्हारी वातों से ऐसा लगता है कि उसमें कुछ दोष भी आ गये थे।

पेलव—हाँ, उस नाटक में उर्वशी ने वोलने में कुछ भूलें कर दीं।

गालव—किस प्रकार की भूलें कर दीं ?

पेलव—उस नाटक में वारुणी का अभिनय करती हुई मेनका ने लक्ष्मी का अभिनय करती हुई उर्वशी से पूछा—सखी! यहाँ तीनों लोकों से सुरूप पुरुष लोकपाल तथा स्वयं विष्णु भगवान् भी पधारे हैं, इनमें तुम्हें सवसे अच्छा कौन लग रहा है ?

गालव—तव उसके वाद ?

पेलव—तव उसे 'पुरुषोत्तम विष्णु' ऐसा कहना चाहिए था, किन्तु उस समय उसके मुख से यह वाणी निकली कि मुझे तो पुरूरवा अच्छे लग रहे हैं।

गालवः—भवितव्यतानुविधायीनि इन्द्रियाणि। न खलु तामभिक्रुद्धो गुरुः ?

पेलवः—सा क्खु सत्ता उवज्झाएण। महिंदेण उण अणुगहीदा। [सा खलु शप्तोपाध्यायेन। महेन्द्रेण पुनरनुगृहीता।]

गालवः—कथमिव ?

पेलवः—जेण मम उवदेसो तुए लंघिदो तेण ण दे दिव्वं ठाणं हविस्सदि त्ति उवज्झाअस्स सावो। महिंदेण उण पेक्खणावसाणे लज्जावणदमुही सा एव्वं भणिदा—जस्सिं तुमं वद्धभावासि तस्स मे रणसहाअस्स राएसिणो पिअं एत्थ करणिज्जं। ता दाव तुमं जहाकामं पुरूरवसं उवचिट्ठ जाव सो तुइ दिट्ठसंताणो भोदि त्ति। [येन ममोपदेशस्त्वया लङ्घितस्तेन न ते दिव्यं स्थानं भविष्यति इति उपाध्यायस्य शापः। महेन्द्रेण पुनः प्रेक्षणावसाने लज्जावनतमुखी सा एवं भणिता—यस्मिंस्त्वं बद्धभावासि तस्य मे रणसहायस्य राजर्षेः प्रियमत्र करणीयम्। तत्तावत्त्वं यथाकामं पुरूरवसमुपतिष्ठस्व यावत्स त्वयि दृष्टसन्तानो भवेदिति।]

गालवः—सदृशमेतत्पुरुषान्तरविदो महेन्द्रस्य।

पेलवः—(सूर्यमवलोक्य) कधापसंगेण अम्हेहिं अवरुद्धा अहिसेअवेला क्खु उवज्झाअस्स। ता एहि; से पासवत्तिणो होम। [कथाप्रसङ्गेनास्माभिरपराद्धाभिषेकवेला खलु उपाध्यायस्य। तदेहि, अस्य पार्श्ववर्तिनौ भवावः।]

गालवः—तथा।

(इति निष्क्रान्तौ)

॥ मिश्रविष्कम्भकः ॥

गालव—होनहार के अनुसार मनुष्य की इन्द्रियाँ काम करती है। तब क्या उस पर गुरुजी कुपित नहीं हुए ?

पेलव—गुरुजी ने तो उसे शाप दे ही दिया था, किन्तु देवराज इन्द्र ने उसे किसी प्रकार बचा लिया।

गालव—वह कैसे ?

पेलव—गुरुजी ने उसे यह शाप दे दिया था कि तूने मेरे उपदेश के अनुसार अभिनय नहीं किया, अतः तुझे स्वर्ग में निवास का सुख नहीं मिल सकेगा। नाटक की समाप्ति होने पर लज्जा से सिर झुकायी हुई उर्वशी से इन्द्र ने इस प्रकार कहा—जिस राजर्षि के प्रति तुम्हारे मन में अनुराग है और जो युद्धकाल में मेरी सहायता किया करते हैं, इस अवसर पर उनको तुम सन्तुष्ट कर लेना। इसलिए जब तक वे तुम्हारी सन्तान का मुख न देख लें तब तक तुम अपनी इच्छा के अनुसार राजा पुरूरवा के साथ जाकर रहो।

गालव—दूसरे के मन की बात जानने वाले इन्द्र को यही शोभा देता है।

पेलव—(सूर्य की ओर देखकर) बातचीत के सिलसिले में गुरुजी के स्नान का समय भी बीत गया। तो आओ, उनके पास चलें।

गालव—अच्छा चलते हैं।

(यह कहकर दोनों चले जाते हैं।)

॥ मिश्रविष्कम्भक ॥

(ततः प्रविशति कञ्चुकी)

कञ्चुकी—(विनिःश्वस्य)

सर्वः कल्ये वयसि यतते लब्धुमर्थान्कुटुम्बी
पश्चात्पुत्रैरपहृतभरः कल्पते विश्रमाय ।
अस्माकं तु प्रतिदिनमियं साधयन्ती प्रतिष्ठां
सेवाकारापरिणतिमभूत्स्त्रीषु कष्टोऽधिकारः ॥ १ ॥

(परिक्रम्य) आदिष्टोऽस्मि सनियमया काशिराजपुत्र्या—व्रतसम्पादनार्थं मया मानमुत्सृज्य निपुणिकामुखेन पूर्वं याचितो महाराजः। तदेव त्वं मद्वचनाद्विज्ञापय इति। यावदहमिदानीमवसितसन्ध्याजाप्यं महाराजं पश्यामि। (परिक्रम्यावलोक्य च) रमणीयः खलु दिवसावसानवृत्तान्तो राजवेश्मनः। इह हि—

उत्कीर्णा इव वासयष्टिषु निशानिद्रालसा बर्हिणो
धूपैर्जालविनिःसृतैर्वलभयः सन्दिग्धपारावताः ।
आचारप्रयतः सपुष्पबलिषु स्थानेषु चार्चिष्मतीः
सन्ध्यामङ्गलदीपिका विभजते शुद्धान्तवृद्धो जनः ॥ २ ॥

(नेपथ्याभिमुखमवलोक्य) अये ! इत एव प्रस्थितो देवः।

परिजनवनिताकरार्पिताभिः परिवृत एष विभाति दीपिकाभिः ।
गिरिरिव गतिमानपक्षलोपात् अनुतटपुष्पितकर्णिकारयष्टिः ॥ ३ ॥

यावदेनमवलोकनमार्गे स्थितः प्रतिपालयामि। (परिक्रम्य स्थितः)

(तदनन्तर कञ्चुकी का प्रवेश)

कञ्चुकी—(लम्बी साँस लेकर) जो लोग परिवार वाले होते हैं, वे जवानी में तो धन कमाने में लगे रहते हैं, बाद में वे ही जब पुत्र घर का भार सँभाल लेते हैं तो वे विश्राम करने लग जाते हैं। किन्तु यहाँ तो हमारी ऐसी दशा हो गयी है कि प्रतिदिन नौकरी करते-करते बूढे हो गये हैं। वास्तव में स्त्रियों की सेवा करना बड़ा ही टेढा काम होता है ॥ १ ॥

(घूमकर) आजकल काशीराज की पुत्री (महारानी) व्रत कर रही हैं। उन्होंने मुझे आज्ञा दी है कि मैंने मान छोड़कर निपुणिका द्वारा महाराज को कहला भेजा है कि वे यहाँ आकर मेरे व्रत को पूर्ण करें। अतः मेरी ओर से जाकर तुम उनसे कह दो। इस समय महाराज सायंकालीन सन्ध्या तथा जप को समाप्त करके बैठे होंगे, अतः जाकर उन्हें देखता हूँ। **(घूमकर और देखकर)** सायंकाल के समय राजद्वार कैसा सुहावना लगता है ? यहाँ तो—

सांयकाल के समय नींद से अलसाये हुए तथा अपने निवासस्थलों पर बैठे हुए मोर ऐसे लग रहे हैं, मानो पत्थरों के ऊपर खुदे हुए हों। छतों से बाहर निकले हुए झरोखों में बैठे हुए कबूतर और उनके छेदों से निकलने वाला धुआँ इस सन्देह को पैदा कर रहे हैं—इनमें कौन धुँआ है और कौन कबूतर। रनिवास के बूढ़े नौकर सन्ध्या के पूजन के लिए स्थान-स्थान पर दीपक सजा रहे हैं ॥ २ ॥

(नेपथ्य की ओर देखकर) अरे ! महाराज तो इधर ही आ रहे हैं।

महाराज के चारों ओर हाथों में जले हुए दीपकों को ली हुई बहुत-सी दासियाँ इधर की ओर चली आ रही हैं। इनके कारण महाराज उस पर्वत के सदृश लग रहे हैं जो पंख न कटने के कारण उड़ता चला आ रहा हो और जिसके दोनों तटों पर खिले हुए कनेर के पेड़ खड़े हुए हों ॥ ३ ॥

(ततः प्रविशति यथानिर्दिष्टो राजा विदूषकश्च)

राजा—(स्वगतम्) आः !

कार्यान्तरितोत्कण्ठं दिनं मया नीतमनतिकृच्छ्रेण ।
अविनोददीर्घयामा कथं नु रात्रिर्गमयितव्या ॥ ४॥

कञ्चुकी—(उपसृत्य) जयतु जयतु देवः । देव ! देवी विज्ञापयति—मणिहर्म्यपृष्ठे सुदर्शनश्चन्द्रः । तत्र सन्निहितेन देवेन प्रतिपालयितुमिच्छामि यावद्रोहिणीसंयोग इति ।

राजा—आर्य लातव्य ! विज्ञाप्यतां देवी यस्ते छन्द इति ।

कञ्चुकी—यदाज्ञापयति देवः । (इति निष्क्रान्तः)

राजा—वयस्य ! किं परमार्थत एव देव्या व्रतनिमित्तोऽयमारम्भः स्यात् ?

विदूषकः—भो ! तक्केमि संजादयच्छादावा तत्तभोदी वदावदेसेण भवदो पणिपादलंघणं पमज्जिदुकाम त्ति । [**भोः ! तर्कयामि सञ्जातपश्चात्तापा तत्रभवती व्रतापदेशेन भवतः प्रणिपातलङ्घनं प्रमार्ष्टुकामेति ।**]

राजा—उपपन्नं भवानाह—

अवधूतप्रणिपाताः पश्चात्सन्तप्यमानमनसो हि ।
विविधैरनुतप्यन्ते दयितानुनयैर्मनस्विन्यः ॥ ५॥

तदादेशय मणिहर्म्यपृष्ठमार्गम् ।

विदूषकः—इदो इदो भवं । इमिणा गंगातरंगसस्सिरीएण फडिअमणिसोवाणेण अरोहदु भवं पदोसावसररमणिज्जं मणिहम्मिअपिट्ठं । [**इत इतो भवान् । एतेन गङ्गातरङ्गसश्रीकेण स्फटिकमणि-सोपानेनारोहतु भवान् प्रदोषावसररमणीयं मणिहर्म्यपृष्ठम् ।**]

तब तक मैं जहाँ उनकी नजर पडे ऐसे स्थान पर खडा होकर उनके आने की राह देखता हूँ। **(घूमकर खड़ा हो जाता है)**

(उसके बाद राजा तथा विदूषक का प्रवेश)

राजा—**(मन ही मन)** अरे ! दिनभर काम में लगे रहने मे मैंने बडी कठिनता से किसी प्रकार दिन तो बिता दिया है, किन्तु मनोविनोद की सामग्री के बिना लम्बी रात कैसे कटेगी ? ॥ ३ ॥

कञ्चुकी—**(पास जाकर)** महाराज की जय हो, जय हो। महाराज ! महारानी निवेदन कर रही हैं कि मणिहर्म्य की छत पर से चन्द्रमा के सुखद दर्शन होंगे। अतः मैं चाहती हूँ कि मैं वहीं पर महाराज के साथ बैठकर चन्द्रमा तथा रोहिणी का संयोग देखूँ।

राजा—आर्य लातव्य ! महारानी से कह दो, जैसा वे कहेंगी मैं वैसा ही स्वीकार करूँगा।

कञ्चुकी—जैसी महाराज की आज्ञा। **(ऐसा कहकर चला जाता है।)**

राजा—मित्र ! क्या सचमुच यह उत्सव देवी ने व्रत के लिए ही किया है ?

विदूषक—अरे ! मैं अनुमान लगा रहा हूँ कि उस दिन जब आप उनके पैरों पर पड़े थे और वे नाराज होकर चली गयी थीं, उससे उन्हें पछतावा हुआ, अतएव वे व्रत के बहाने से उस आपके अपमान के दोष को दूर करना चाहती हैं।

राजा—ठीक कहा तुमने। क्योंकि—

मनस्विनी स्त्रियाँ जब रूठी रहती हैं, तब वे पैरों पर पडने पर भी अपने पति की बातों को नहीं मानतीं, फिर बाद में वे ही अपने व्यवहार से अनेक प्रकार से बहुत पछताने लगती हैं॥ ५ ॥

तो चलो मणिहर्म्य की छत पर जाने का मार्ग मुझे बतलाओ।

राजा—आरोहाग्रतः।

(सर्वे सोपानारोहणं नाटयन्ति)

विदूषकः—(निरूप्य) भो! पच्चासण्णेण चंदोदएण होदव्वं जह तिमिररेईअमाणं पुव्वदिसामुहं आलोअसुहअं दीसदि। [भोः! प्रत्यासन्नेन चन्द्रोदयेन भवितव्यं यथा तिमिररिच्यमानं पूर्वदिशामुखमालोकसुभगं दृश्यते।]

राजा—सम्यग्भवान्मन्यते।

उदयगूढशशाङ्कमरीचिभिस्तमसि दूरतरं प्रतिसारिते।
अलकसंयमनादिव लोचने हरति मे हरिवाहनदिङ्मुखम् ॥ ६॥

विदूषकः—(विलोक्य) ही ही भो! एसो क्खु खंडमोदअसस्सिरीओ उदिदो राआ दुआदीणं। [ही ही भोः! एष खलु खण्डमोदकसश्रीक उदितो राजा द्विजातीनाम्।]

राजा—(सस्मितम्) सर्वत्रौदरिकस्याभ्यवहार्यमिव विषयः। (प्राञ्जलिः) भगवन् क्षपानाथ!

रविमावसते सतां क्रियायै सुधया तर्पयते सुरान्पितॄंश्च।
तमसां निशि मूर्च्छतां निहन्त्रे हरचूडानिहितात्मने नमस्ते ॥ ७॥

(इत्युपतिष्ठते)

विदूषकः—भो! वम्हणसंकामिदक्खरेण दे पिदामहेण अब्भणुण्णादोसि। ता आसणट्ठिदो होहि जाव अहं वि सुहासीणो होमि। [भोः! ब्राह्मणसङ्क्रामिताक्षरेण ते पितामहेनाभ्यनुज्ञातोऽसि। तदासनस्थितो भव यावदहमपि सुखासीनो भवामि।]

विदूषक—आप इधर से आइये, इधर से। गंगा की लहरों के समान सफेद स्फटिकमणि की सीढ़ियों से आप सायंकाल के समय सुहावने लगने वाले इस मणिहर्म्य की छत पर चढ़ें।

राजा—आगे-आगे तुम चलो।

(सभी सीढ़ियों पर चढ़ने का अभिनय करते हैं।)

विदूषक—(देखकर) ऐसा लगता है कि चन्द्रोदय होने ही वाला है। जैसे अँधेरे के हट जाने से पूर्व दिशा का मुख कैसा सुहावना लग रहा है।

राजा—तुम ठीक ही सोच रहे हो।

उदयाचल के पीछे छिपे हुए चन्द्रमा की किरणों से अँधेरा मिटता जा रहा है, वह मेरे मन को ऐसा लुभा रहा है, मानो जैसे जूड़ा बँधा हुआ प्राची दिशा का मुखमंडल हो॥ ६॥

विदूषक—(देखकर) हें हें अरे! यह उदय होता हुआ द्विजराज (चन्द्रमा) ऐसा सुन्दर लग रहा है, जैसे खाँड़ का लड्डू हो।

राजा—(मुस्कराकर) भोजनभट्ट को सब जगह भोजन की सामग्री ही दिखलायी देती है। (हाथ जोड़कर) भगवन् चन्द्रमा!

सज्जनों की धार्मिक क्रियाओं में सूर्यदेव के साथ स्मरण किये जाने वाले, अमृत द्वारा देवता तथा पितरों को तृप्त कराने वाले, चारों ओर फैले हुए रात के अन्धकार को मिटाने वाले एवं शिवजी के जटाजूट पर निवास करने वाले आपको प्रणाम है॥ ७॥

(ऐसा कहकर पूजा करता है)

विदूषक—महाराज! आपके दादा चन्द्रमा ने मुझ ब्राह्मण द्वारा आपको यह आज्ञा दी है कि आप आसन में बैठ जाइये, जिससे मैं भी सुख से बैठ सकूँ।

राजा—(विदूषकवचनं परिगृह्योपविष्टः परिजनं विलोक्य) अभिव्यक्तायां चन्द्रिकायां किं दीपिकापौनरुक्त्येन ? तद्विश्राम्यन्तु भवत्यः।

परिजनः—जं देवो आणवेदि। [यद्देव आज्ञापयति।] (इति निष्क्रान्तः)

राजा—(चन्द्रमसमवलोक्य विदूषकं प्रति) वयस्य! परं मुहूर्तादागमनं देव्याः। तद्विविक्ते कथयिष्यामि स्वामवस्थाम्।

विदूषकः—णं दीसदि एव्व सा। किंदु तारिसं अणुराअं पेक्खिअ सक्कं क्खु आसाबंधेण अत्ताणं धारेदुं। [ननु दृश्यत एव सा। किन्तु तादृशमनुरागं प्रेक्ष्य शक्यं खल्वाशाबन्धेनात्मानं धारयितुम्।]

राजा—एवमेतत्। बलवान्पुनर्मे मनसोऽभितापः।

नद्या इव प्रवाहो विषमशिलासङ्कटस्खलितवेगः ।
विघ्नितसमागमसुखो मनसिजशरः शतगुणी भवति ॥८॥

विदूषकः—भो! जहा परिहीअमाणेहिं अंगेहिं अहिअं सोहसि तहा अदूरे पिआसमागमं दे पेक्खामि। [भोः! यथा परिहीयमाणैरङ्गैरधिकं शोभसे तथाऽदूरे प्रियासमागमं ते प्रेक्षे।]

राजा—(निमित्तं सूचयन्) वयस्य!

वचोभिराशाजननैर्भवानिव गुरुव्यथम् ।
अयं मां स्पन्दितैर्बाहुराश्वासयति दक्षिणः ॥९॥

विदूषकः—ण क्खु अण्णहा बम्हणस्स वअणं। [न खल्वन्यथा ब्राह्मणस्य वचनम्।]

(राजा सप्रत्याशस्तिष्ठति)

राजा—(विदूषक के कहने पर बैठकर अपनी दासियों को देखकर) चारों ओर चाँदनी के छिटक जाने के बाद भी इन दीपकों को जलाना पुनरुक्ति के समान ही है। अब आप लोग भी विश्राम करें।

परिजन—जैसी महाराज की आज्ञा। **(ऐसा कहकर दासियाँ चली जाती हैं।)**

राजा—(चन्द्रमा की ओर देखकर विदूषक से) मित्र! अभी महारानी के आने में थोड़ी देर है, इसलिए अकेले में बैठकर अपने मन का दुःख तुमसे कहूँगा।

विदूषक—वह तो दिखलायी ही दे रही है। किन्तु उर्वशी के आप पर वैसे अनुराग को देखकर उसके भरोसे तो आपको अपना मन सँभाले रखना चाहिए।

राजा—यह तो ठीक ही है। किन्तु मेरे मन में ऐसा सन्ताप हो रहा है जो मुझे अत्यन्त कष्ट दे रहा है।

जैसे ऊबड़-खाबड चट्टानों के बीच में आयी हुई नदी अधिक वेग से बहने लगती है, वैसे ही जब समागम-सुख में बाधा पड जाती है तो कामजनित पीड़ा सौगुनी बढ जाती है॥८॥

विदूषक—अरे! यह जो आप प्रतिदिन दुबले होने वाले अंगों से निखरते जा रहे हैं, इससे मुझे ऐसा लगता है कि निकट भविष्य में आपका प्रिया (उर्वशी) के साथ समागम होगा।

राजा—(शुभ शकुन की सूचना देता हुआ) मित्र! आशाभरी बातें कहकर विरहव्यथा से व्यथित मुझे जैसे तुम ढाढस दिला रहे हो, वैसे ही मेरी यह दाहिनी भुजा भी फडककर मुझे आश्वस्त करती जा रही है॥९॥

विदूषक—ब्राह्मण का वचन कभी भी झूठा नहीं होता।

(राजा बड़ी आशा लगाकर बैठता है)

(ततः प्रविशति आकाशयानेनाभिसारिकावेषा उर्वशी चित्रलेखा च)

उर्वशी—(आत्मानमवलोक्य) हला चित्तलेहे! अवि रोअदि दे अअं मम अप्पाभरणभूसिदो णीलंसुअपरिग्गहो अहिसारिआवेसो। [हला चित्रलेखे! अपि रोचते तेऽयं ममाल्पाभरणभूषितो नीलांशुकपरिग्रहोऽभिसारिकावेषः।]

चित्रलेखा—सहि! णत्थि मे वाआविहवो पसंसिदुं। इदं तु चिंतेमि अवि णाम अहं पुरूरवा भवेअं त्ति। [सखि! नास्ति मे वाग्विभवः प्रशंसितुम्। इदं तु चिन्तयामि अपि नामाहं पुरूरवा भवेयमिति।]

उर्वशी—सहि! मदणो क्खु तुमं आणवेदि। ता सिग्घं णेवि मं तस्स सुहअस्स वसदिं। [सखि! मदनः खलु त्वामाज्ञापयति। तच्छीघ्रं नय मां तस्य सुभगस्य वसतिम्।]

चित्रलेखा—(विलोक्य) णं एदं परिवत्तिदं विअ केलाससिहरं पिअदमस्स दे भवणं उवगद म्ह। [नन्वेतत्परिवर्तितमिव कैलासशिखरं प्रियतमस्य ते भवनमुपगते स्वः।]

उर्वशी—तेण हि पहावदो जाणीहि दाव कहिं सो मम हिअअचोरो किं वा अणुचिट्ठदि त्ति। [तेन हि प्रभावाज्जानीहि तावत्क्व स मम हृदयचौरः किं वानुतिष्ठतीति।]

चित्रलेखा—(ध्यात्वा विहस्यात्मगतम्) भोदु, कीलिस्सं दाव एदाए। (प्रकाशम्) हला दिट्ठो मए एसो मणोरहलद्धपिआसमाअमसुहं अणुहवंतो उवहोअक्खमे ओआसे चिट्ठदि त्ति। [भवतु, क्रीडिष्यामि तावदेतया। हला! दृष्टो मया एष मनोरथलब्धप्रियासमागमसुखमनुभवन्नुपभोगक्षमेऽवकाशे तिष्ठतीति।]

उर्वशी—(विषादं नाटयति। निःश्वस्य) धण्णो सो जणो जो एव्वं भवे। [धन्यः स जनो य एवं भवेत्।]

(इसी के बाद विमान द्वारा अभिसारिका वेश धारण की हुई उर्वशी तथा चित्रलेखा का प्रवेश होता है।)

उर्वशी—(अपनी ओर देखकर) सखी चित्रलेखा! थोड़े से अलंकार धारण कर और नीली रेशमी साड़ी पहना हुआ मेरा यह अभिसारिका का वेश तुझे अच्छा लग रहा है?

चित्रलेखा—मेरे पास इतनी शब्दशक्ति कहाँ कि मैं इस वेश की प्रशंसा कर सकूँ। मैं तो यही सोच रही हूँ कि कहीं मैं ही पुरूरवा बन सकती?

उर्वशी—सखी! मदन तुम्हें आज्ञा दे रहा है कि तुम मुझे शीघ्र उस भाग्यशाली के घर में ले चलो।

चित्रलेखा—(देखकर) हम तो तुम्हारे प्राणप्यारे के उस भवन में पहुँच चुके हैं, जो सचमुच आज बदले हुए कैलासशिखर जैसा दिखलायी दे रहा है।

उर्वशी—तुम दैवीशक्ति से मालूम करो कि वह मेरा चित्तचोर कहाँ है और क्या कर रहा है?

चित्रलेखा—(ध्यान करके हँसकर, मन ही मन) अच्छा, थोड़ी देर इससे ठिठोली कर ली जाय। **(प्रकट में)** सखी! मैंने इन्हें देख लिया। वे अपनी मनचाही प्राणप्रिया से समागम-सुख का लाभ लेते हुए आनन्दप्रद स्थान में सुख से बैठे हैं।

उर्वशी—(दुःखी होने का अभिनय करती है। लम्बी साँस लेकर) वह स्त्री धन्य है, जिसे महाराज के समागम का सुख प्राप्त है।

चित्रलेखा—मुद्धे ! का उण चिंता तुए विणा अण्णपिआसमाअमस्स। [मुग्धे ! का पुनश्चिन्ता त्वया विनान्यप्रियासमागमस्य।]

उर्वशी—(सोच्छ्वासम्) सहि ! अदक्खिणं संदेहदि मे हिअअं। [सखि ! अदक्षिणं सन्दिग्धं मे हृदयम्।]

चित्रलेखा—(विलोक्य) एसो मणिहम्मिअप्पासादपिट्ठगदो वअस्समेत्तसहाओ राएसी। ता एहि उवसप्पाम णं। [एष मणिहर्म्यप्रसादपृष्ठगतो वयस्यमात्रसहायो राजर्षिः। तदेहि उपसर्पाव एनम्।]

(उभे अवतरतः)

राजा—वयस्य ! रजन्या सह विजृम्भते मदनवाधा।

उर्वशी—अणिब्भिण्णत्थेण इमिणा वअणेण आकंपिदं मे हिअअं। ता अंतरिदा एव्व सुणाम से सेरालावं जाव णो संसअच्छेदो होदि। [अनिर्भिन्नार्थेनानेन वचनेनाकम्पितं मे हृदयम्। तदन्तर्हिते शृणुवोऽस्य स्वैरालापं यावदावयोः संशयच्छेदो भवति।]

चित्रलेखा—जं दे रोअदि। [यत्ते रोचते।]

विदूषकः—णं इमे अभिअगब्भा सेवीअंदु चंदवादा। [नन्वेतेऽमृतगर्भाः सेव्यन्तां चन्द्रपादाः।]

राजा—वयस्य ! एवमादिभिरनुपक्रम्योऽयमातङ्कः। पश्य—

कुसुमशयनं न प्रत्यग्रं न चन्द्रमरीचयो,
न च मलयजं सर्वाङ्गीणं न वा मणियष्टयः ।
मनसिजरुजं सा वा दिव्या ममालमपोहितुं,

उर्वशी—(उरसि हस्तं दत्वा) का वा अवरा ? [का वा अपरा ?]

राजा— **रहसि लघयेदारब्धा वा तदाश्रयिणी कथा ॥ १० ॥**

चित्रलेखा—अरी पगली ! तुम क्या चिन्ता कर रही हो, तुझे छोडकर वे कौन-सी दूसरी प्रेमिका से मिलेंगे ?

उर्वशी—(लम्बी साँस लेकर) सखी ! मेरा सरल हृदय कुछ ऐसा ही सोचने लगा था।

चित्रलेखा—(देखकर) ये राजर्षि मणिहर्म्य की छत पर अपने मित्र के साथ बैठे हैं। इसलिए चलो इनके पास चला जाय।

(दोनों उतरती हैं)

राजा—मित्र ! जैसे-जैसे रात बढ़ती जा रही है, वैसे-वैसे मेरी कामपीडा भी वढती जा रही है।

उर्वशी—इनकी इन अस्पष्ट बातों को सुनकर मेरा हृदय काँप उठा है। तो छिपकर इनकी गुप्त बातों को सुना जाय, जिनसे सन्देह दूर हो सके।

चित्रलेखा—जैसी प्रियसखी की इच्छा हो।

विदूषक—सचमुच ये अमृत से भरी हुई चन्द्रमा की किरणें हैं, इनका आनन्द लीजिए।

राजा—मित्र ! यह कामपीड़ा इन सव उपायों से शान्त होने वाली नहीं है। देखो—

मेरे इस कामरोग को न तो ताजे फूलों की सेज ही दूर कर सकती है, न चन्द्रमा की किरणें ही हटा सकती हैं, न सम्पूर्ण शरीर में किया हुआ चन्दन का लेप ही मिटा सकता है और न मोतियों की माला ही दूर कर सकती है। यदि इस रोग को कोई दूर कर सकता है तो वस एक वही स्वर्गवासी—।

उर्वशी—(छाती पर हाथ रखकर) वह मुझसे दूसरी कौन हो सकती है ?

राजा—अथवा फिर एकान्त में कही गयी उससे सम्बन्धित प्रेम की बातें ॥ १० ॥

उर्वशी—हिअअ ! मं उज्झिअ इदो संकंतेण तुए दाणिं फलं उवलद्धं। [हृदय ! मामुज्झित्वा इतः सङ्क्रान्तेन त्वयेदानीं फलमुपलब्धम्।]

विदूषकः—आं। हं वि पत्थयंतो जदा मिट्ठहरिणीमंसभोअणं ण लहे तदा णं संकित्तअंतो आसासेमि अत्ताणं। [आम्। अहमपि प्रार्थयमानो यदा मिष्टहरिणीमांसभोजनं न लभे तदैतत्सङ्कीर्तय-न्नाश्वासयाम्यात्मानम्।]

राजा—सम्पद्यते पुनरिदं भवतः।

विदूषकः—भवं वि तं अइरेण पाविस्सदि। [भवानपि तामचिरेण प्राप्स्यसि।]

राजा—सखे ! एवं मन्ये·····

चित्रलेखा—सुणु असंतुट्ठे ! सुणु। [शृणु असन्तुष्टे ! शृणु।]

विदूषकः—कहं विअ ? [कथमिव ?]

राजा— अयं तस्या रथक्षोभादंसेनांसो निपीडितः।
एकः कृती शरीरेऽस्मिन् शेषमङ्गं भुवो भरः ॥ ११ ॥

चित्रलेखा—सहि ! किं दाणिं विलंबीअदि। [सखि ! किमिदानीं विलम्ब्यते।]

उर्वशी—(सहसोपसृत्य) हला ! अग्गदो वि मम ट्ठिदाए उदासीणो विअ महाराओ। [हला ! अग्रतोऽपि मम स्थिताया उदासीन इव महाराजः।]

चित्रलेखा—(सस्मितम्) अइ अदितुवरिदे ! अणक्खित्ततिरक्खरिणी आसि। [अयि अतित्वरिते ! अनाक्षिप्ततिरस्करिणिकासि।]

(नेपथ्ये) इदो इदो भट्टिणी [इत इतो भट्टिनी।]

(सर्वे कर्ण ददति। उर्वशी सह सख्या विषण्णा)

उर्वशी—अरे हृदय ! तुम मुझे छोड़कर यहाँ से राजा के पास जाकर सौभाग्यफल पा चुके हो।

विदूषक—हाँ, मुझे जब कभी माँगने पर भी हरिणी के मधुर मांस खाने को नहीं मिलता तब मैं उसी का नाम लेकर अपने को आश्वस्त कर लेता हूँ।

राजा—पर तुम्हें यह सब खाने को तो मिल ही जाता है।

विदूषक—आप भी उस (उर्वशी) को शीघ्र ही पा जायेंगे।

राजा—मित्र ! मैं मन ही मन में सोचता हूँ····।

चित्रलेखा—सुन, असन्तोष करने वाली सखी ! सुन।

विदूषक—किस प्रकार ?

राजा—मेरे शरीर के सभी अंगों में यह कन्धा ही भाग्यवान् है, जो रथ के बार-बार हिलने-डुलने के समय मेरे साथ बैठी हुई उर्वशी के कन्धे से दबता रहता था। इसके अतिरिक्त मेरे शरीर के शेष अवयव तो इस धरती के भारस्वरूप हैं॥ ११॥

चित्रलेखा—सखी ! अब किसलिए देर कर रही हो ?

उर्वशी—(एकाएक आगे बढ़कर) सखी ! मैं आकर उनके सामने खडी भी हो गयी हूँ, फिर भी महाराज मेरे प्रति उदासीन जैसे लग रहे हैं।

चित्रलेखा—(मुस्कराकर) अरी बहुत जल्दीबाजी करने वाली ! अभी तूने पर्दा तो हटाया ही नहीं।

(नेपथ्य में) स्वामिनी ! इधर से, इधर से।

(सब कान लगाकर सुनते हैं। उर्वशी सखी के साथ चिन्तित होती है।)

विदूषकः—(सविस्मयम्) अइ भो ! उवट्ठिदा देवी। ता वाचंजमो होहि। [अयि भोः ! उपस्थिता देवी। तद्वाचंयमो भव।]

राजा—भवानपि संवृताकारमास्ताम्।

उर्वशी—सहि ! किं एत्थ करणिज्जं ? [सखि ! किमत्र करणीयम् ?]

चित्रलेखा—अलं आवेएण। अंतरिदा दाणिं वयं। विहिदणिअमवेसा राएसिमहिसी दीसदि। ता ण एसा इह चिरं चिट्ठिस्सदि। [अलमावेगेन। अन्तर्हिते इदानीमावाम्। विहितनियमवेषा राजर्षिमहिषी दृश्यते। तन्नैषेह चिरं स्थास्यति।]

(ततः प्रविशति औपहारिकहस्तपरिजना देवी चेटी च)

देवी—(परिक्रम्य चन्द्रमसमवलोक्य च) हंजे णिउणिए ! एसो रोहिणीसंजोएण अहिअं सोहदि भअवं मिअलंछणो। [हञ्जे निपुणिके ! एष रोहिणीसंयोगेनाधिकं भगवान् शोभते मृगलाञ्छनः।]

चेटी—णं भट्टिणीसहिदो भट्टा विसेसरमणिज्जो। [ननु भर्ट्टिनीसहितो भर्त्ता विशेषरमणीयः।]

(इति परिक्रामतः)

विदूषकः—(दृष्ट्वा) भो ! ण जाणामि सोत्थिवाअणं मे देइ त्ति आदु वदव्ववदेसेण मुक्करोसा भवदो पणिपादलंघणं पमज्जिदुकाम त्ति। अज्ज मे अक्खीणं सुहदंसणा देवी। [भोः ! न जानामि स्वस्तिवायनं मे ददातीति अथवा व्रतव्यपदेशेन मुक्तरोषा भवतः प्रणिपातलङ्घनं प्रमार्ष्टुकामेति। अद्य मेऽक्ष्णोः शुभदर्शना देवी।]

राजा—(सस्मितम्) उभयमपि घटते ! तथापि भवता यत्पश्चादभिहितं तन्मां प्रतिभाति यदत्रभवती।

सितांशुका मङ्गलमात्रभूषणा पवित्रदूर्वाङ्कुरलाञ्छितालका ।
व्रतापदेशोज्झितगर्ववृत्तिना मयि प्रसन्ना वपुषैव लक्ष्यते ॥ १२ ॥

विदूषक—(आश्चर्य से) अरे ! महादेवी आ गयीं, अतः चुप रहो।

राजा—तुम भी सँभलकर बैठ जाओ।

उर्वशी—सखी ! तुम बतलाओ, इस अवसर पर अब क्या करना चाहिए ?

चित्रलेखा—(घबराओ मत) इस समय हम दोनों छिपे ही हैं। इस समय राजर्षि की पटरानी व्रत-विशेष का परिधान पहनी हुई दिखलायी दे रही है। अतः ये देर तक यहाँ नहीं रुकेंगी।

(तदनन्तर हाथ में पूजन-सामग्री ली हुई दासियाँ, महारानी तथा चेटी का प्रवेश)

देवी—(घूमकर तथा चन्द्रमा की ओर देखकर) सखी निपुणिका ! यह भगवान् चन्द्रमा रोहिणी के साथ संयोग हो जाने के कारण और भी अच्छे लग रहे हैं।

चेटी—सचमुच जैसे स्वामिनी के साथ महाराज विशेष अच्छे लग रहे हैं। (ऐसा कहकर उधर से घूम जाती हैं।)

विदूषक—(देखकर) अरे ! यह मेरी समझ में नहीं आ रहा है कि ये (देवी) मुझे पूजा का प्रसाद रूपी आशीर्वाद देने आ रही हैं अथवा व्रत के बहाने ये उस दिन आप द्वारा किये गये प्रणाम के अनादर के साथ आपके प्रति किये हुए अपने मान (रोष) रूपी दोष को दूर करने की इच्छा से चली आ रही हैं। अतएव आज मेरी आँखों को महारानी और दिनों से अधिक सुरूप लग रही हैं।

राजा—(मुस्कराकर) दोनों ही बातें हो सकती हैं। तो भी तुमने जो बाद में बात कही वही मुझे अधिक उचित लग रही है। क्योंकि—

देवी—(उपसृत्य) जेदु जेदु अज्जउत्तो। [जयतु जयतु आर्यपुत्रः।]

परिजनः—जेदु जेदु भट्टारओ। [जयतु जयतु भट्टारकः।]

विदूषकः—सत्थि भोदीए। [स्वस्ति भवत्यै।]

राजा—स्वागतं देव्यै। (तां हस्तेन गृहीत्वोपवेशयति)

उर्वशी—हला! ठाणे क्खु इअं देवीसद्देण उवअरीअदि। ण किं वि परिहीअदि सचीए ओजस्सिदाए। [हला! स्थाने खलु इयं देवीशब्देनोपचर्यते। न किमपि परिहीयते शच्या ओजस्वितया।]

चित्रलेखा—साहु असूआपरम्मुहं मंतिदं तुए। [साधु असूयापराङ्मुखं मन्त्रितं त्वया।]

देवी—अज्जउत्तं पुरोकरिअ को वि वदविसेसो मए संपादणीओ। ता मुहुत्तं उवरोधो सहीअदु। [आर्यपुत्रं पुरस्कृत्य कोऽपि व्रतविशेषो मया सम्पादनीयः। तन्मुहूर्तमुपरोधः सह्यताम्।]

राजा—मा मैवम्। अनुग्रहः खलु अयं नोपरोधः।

विदूषकः—ईरिसो सोत्थिवाअणवंतो उवरोहो वहुसो होदु। [ईदृशः स्वस्तिवायनवानुपरोधो बहुशो भवतु।]

राजा—किं नामधेयमेतद्देव्या व्रतम्।

(देवी निपुणिकामुखमवेक्षते)

निपुणिका—भट्टा! पिआणुप्पसादणं णाम। [भर्तः! प्रियानुप्रसादनं नाम।]

राजा—(देवीं विलोक्य) यद्येवम्—

अनेन कल्याणि मृणालकोमलं व्रतेन गात्रं ग्लपयस्यकारणम्।
प्रसादमाकाङ्क्षति यस्तवोत्सुकः स किं त्वया दासजनः प्रसाद्यते ॥ १३ ॥

आज महारानी सफेद रेशमी साड़ी पहने, शरीर पर सुहाग के कुछेक गहने धारण की हुई, पवित्र दूब के अंकुरों को अपने केशपाश में सँजोयी हुई देवी को देखकर ऐसा लगता है कि ये व्रत के बहाने मान छोडकर तन-मन से मुझ पर प्रसन्न हो गयी है॥ १२॥

देवी—(पास जाकर) आर्यपुत्र की जय हो, जय हो।

परिजन—महाराज की जय हो, जय हो।

विदूषक—महारानी का कल्याण हो।

राजा—देवी का स्वागत है। (महारानी का हाथ पकड़कर आसन पर बैठाते हैं।)

उर्वशी—सखी! इस समय तो इनका स्वागत देवी शब्द से उचित ही हो रहा है, क्योंकि अपने तेज के कारण ये शची (इन्द्राणी) से किसी प्रकार कम नहीं लग रही हैं।

चित्रलेखा—तुमने इस समय डाह छोड़कर यह उचित ही कहा है।

देवी—आर्यपुत्र को साथ लेकर मैं एक विशेष व्रत करना चाहती हूँ। इसलिये मेरे कारण कुछ देर का कष्ट सहन करने की आप कृपा कीजिए।

राजा—नहीं नहीं, ऐसा मत कहो। यह कष्ट नहीं, अपितु यह तो आपकी कृपा है।

विदूषक—इस प्रकार का कष्ट जिसमें प्रसाद मिलता हो, बार-बार होता रहे।

राजा—देवी द्वारा किये गये इस व्रत का क्या नाम है?

(देवी निपुणिका के मुख की ओर देखती हैं)

निपुणिका—महाराज! इसे प्रिय को पुनः प्रसन्न करने वाला व्रत कहते हैं।

राजा—(देवी को देखकर) यदि ऐसा ही है तो तुम अपने कमल-कोमल कलेवर को अकारण

उर्वशी—महंतो क्खु से इमस्सिं बहुमाणो। [**महान् खलु अस्य एतस्यां बहुमानः।**]

चित्रलेखा—अइ मुद्धे! अण्णसंकंतप्पेमाणो णाअरिआ भारिआए अहिअं दक्खिणा होंति [**अयि मुग्धे! अन्यसङ्क्रान्तप्रेमाणो नागरिका भार्यायामधिकं दक्षिणा भवन्ति।**]

देवी—(सस्मितम्) णं इमस्स वदपरिग्गहस्स अअं पहावो जं एत्तिअं मंताविदो अज्जउत्तो। [**नन्वेतस्य व्रतपरिग्रहस्यायं प्रभावो यदेतावन्मन्त्रित आर्यपुत्रः।**]

विदूषकः—विरमदु भवं न जुत्तं सुहासिदं पच्चाचरिदुं। [**विरमतु भवान्। न युक्तं सुभाषितं प्रत्याचरितुम्।**]

देवी—दारिआओ! आणेध ओवहारिअं जाव मणिहम्मिअपिट्ठगदे चंदपादे अच्चेमि। [**दारिकाः! आनयतौपहारिकं यावन्मणिहर्म्यपृष्ठगतांश्चन्द्रपादानर्चामि।**]

परिजनः—जं भट्टिणी आणवेदी। एसो गंधकुसुमादि उवहारो। [**यद्भट्टिनी आज्ञापयति। एष गन्धकुसुमाद्युपहारः।**]

देवी—उवणेध। (नाट्येन गन्धपुष्पादिभिश्चन्द्रपादानभ्यर्च्य) हंजे णिउणिए! इमे ओहारिअमोदए अज्जमाणवअं लंभावेहि। [**उपनयत। हञ्जे निपुणिके! एतानौपहारिकमोदकानार्यमाणवकं लम्भय।**]

निपुणिका—जं भट्टिणी आणवेदी। अज्ज माणवअ! एवं दाव दे। [**यद्भट्टिन्याज्ञापयति। माणवक! इदं तावत्ते।**]

विदूषकः—(मोदकशरावं गृहीत्वा) सोत्थि भोदीए। बहुफलो दे एसो वदो भोदु। [**स्वस्ति भवत्यै। बहुफलं तवैतद्व्रतं भवतु।**]

देवी—अज्जउत्त! इदो दाव। [**आर्यपुत्र! इतस्तावत्।**]

ही व्रत करके सुखा रही हो; क्योंकि जो आपका दास स्वयं आपकी प्रसन्नता की कामना करने के लिए उत्सुक रहता है, उसे भी प्रसन्न करने की आवश्यकता रहती है? ॥ १३ ॥

उर्वशी—ऐसा लगता है कि महाराज अपनी महारानी को बहुत मानते हैं।

चित्रलेखा—अरी पगली! जो दूसरी स्त्री से प्रेम करने लगते हैं, वे चतुर नागरिक अपनी स्त्री का पहले से भी अधिक आदर किया करते हैं।

देवी—**(मुस्कराकर)** सचमुच यह व्रत धारण करने का ही प्रभाव है, जो आर्यपुत्र ने मेरे अनुकूल इतना तो कहा।

विदूषक—अच्छा, आप अपनी बातें रहने दीजिए। सुभाषित के प्रतिकूल आचरण करना उचित नहीं होता।

देवी—दासियो! पूजा की सामग्री ले आओ, जब तक मैं मणिहर्म्य के ऊपर बिखरी हुई चन्द्रकिरणों की पूजा करती हूँ।

परिजन—जैसी स्वामिनी की आज्ञा। लीजिए, यह चन्दन, फूल आदि पूजा की सामग्री है।

देवी—लाओ। **(गन्ध, फूल आदि पूजा की सामग्री लेकर चन्द्रकिरणों की पूजा का अभिनय करती है)** सखी निपुणिका! इन पूजा के लड्डुओं को आर्य माणवक को दे दो।

निपुणिका—जैसी स्वामिनी की आज्ञा। माणवक! ये लड्डू आपके लिए है।

विदूषक—**(लड्डू के पात्र को लेकर)** आपका कल्याण हो। यह आपका व्रत बहुत फलदायक हो।

देवी—आर्यपुत्र! इधर तो आइए।

राजा—अयमस्ति।

देवी—(राज्ञः पूजामभिनीय प्राञ्जलिः प्रणम्य) एसा अहं देवदामिहुणं रोहिणीमिअलंछणं सक्खीकरिअ अज्जउत्तं अणुप्पसादेमि—अज्जप्पहुदि जं इत्थिअं अज्जउत्तो पत्थेदि जा अ अज्जउत्तस्स समाअमप्पणयिणी ताए सह मए पीदिबंधेण वत्तिदव्वं त्ति। [एषाहं देवतामिथुनं रोहिणीमृगलाञ्छनं साक्षीकृत्यार्यपुत्रमनुप्रसादयामि—अद्यप्रभृति यां स्त्रियमार्यपुत्रः प्रार्थयते या चार्यपुत्रस्य समागमप्रणयिनी तया सह मया प्रीतिबन्धेन वर्तितव्यम् इति।]

उर्वशी—अम्महे! ण आणे किं परं से वअणं त्ति। मम उण विस्सासविसदं हिअअं संवुत्तं। [अहो! न जाने किमपरमस्या वचनमिति। मम पुनर्विश्वासविशदं हृदयं संवृत्तम्।]

चित्रलेखा—सहि! महाणुहावाए पदिव्वदाए अब्भणुण्णादो अणंतराओ दे पिअसमाअमो हविस्सदि। [सखि! महानुभावया पतिव्रतयाभ्यनुज्ञातः अनन्तरायस्ते प्रियसमागमो भविष्यति।]

विदूषकः—(अपवार्य) भिण्णहत्थे मच्छे पलायिदे णिव्विण्णो धीवरो भणादि—गच्छ, धम्मो मे हविस्सदि त्ति। (प्रकाशम्) भोदि! किं तारिसो दे पिओ तत्तभवं। [भिन्नहस्ते मत्स्ये पलायिते निर्विण्णो धीवरो भणति—गच्छ, धर्मो मे भविष्यतीति। भवति! किं तादृशस्ते प्रियस्तत्रभवान्।]

देवी—मूढ! अहं खु अत्तणो सुहावसाणेण अज्जउत्तं णिव्वुदसरीरं कादुं इच्छामि। एत्तिएण चिंतेहि दाव पिओ ण वत्ति। [मूढ! अहं खलु आत्मनः सुखावसानेनार्यपुत्रं निर्वृतशरीरं कर्तुमिच्छामि। एतावता चिन्तय तावत्प्रियो न वेति।]

राजा— दातुं वा प्रभवसि मामन्यस्मै कर्तुमेव वा दासम्।
नाहं पुनस्तथा त्वयि यथा हि मां शङ्कसे भीरु ॥१४॥

देवी—होहि वा मा वा। जधाणिद्दिट्ठं संपादिदं मए पिआणुप्पसादणं णाम वदं। दारिआओ

राजा—लीजिए, यह आ गया।

देवी—(राजा की पूजा का अभिनय कर हाथ जोड़कर प्रणाम करके) यह मैं रोहिणी तथा चन्द्रमा रूपी देवता के जोड़े को साक्षी बनाकर आर्यपुत्र को पुनः प्रसन्न कर रही हूँ। आज से लेकर आर्यपुत्र जिस स्त्री की कामना करेंगे अथवा जो आपके समागम की इच्छुक होगी, उसके साथ मैं सदा प्रेम के साथ व्यवहार किया करूँगी।

उर्वशी—अरे! न मालूम यह किस दूसरी स्त्री के लिए कह रही है? परन्तु इसके इस वचन से मेरे हृदय को विश्वास हो गया।

चित्रलेखा—सखी! इस उदार हृदय वाली पतिव्रता देवी की बातों से यह सुनिश्चित हो गया है कि अब तुम्हारे प्रियमिलन के मार्ग में कोई बाधा नहीं पड़ेगी।

विदूषक—(अलग, राजा से) मछली के हाथ से फिसलकर पानी में भाग जाने पर उदास हुआ मछुआ भी ऐसा ही कहता है—जा, मुझे पुण्य ही होगा। (प्रकट में) देवी! महाराज आपको इतने प्यारे हैं?

देवी—अरे मूर्ख! मैं अपने सुख का बलिदान देकर भी आर्यपुत्र (महाराज) को सुखी देखना चाहती हूँ। मेरे इस व्यवहार से ही समझ लो कि वे मेरे प्रिय हैं या नहीं?

राजा—देवी! तुम भले ही मुझे किसी को दे डालो, अथवा मुझे अपना दास बनाकर रखे रहो, परन्तु मैं तुम्हारे प्रति वैसा नहीं हूँ, हे भीरु! जैसी तुम मेरे बारे में शंका किया करती हो॥ १४॥

एध गच्छम्ह। [भव वा मा वा। यथानिर्दिष्टं सम्पादितं मया प्रियानुप्रसादनं नाम व्रतम्। दारिका एत गच्छामः।] (इति प्रस्थिता)

राजा—प्रिये ! न खलु प्रसादितोऽस्मि यदि सम्प्रति विहाय गम्यते।

देवी—अज्जउत्त ! अलंघिदपुव्वो मए णिअमो। [आर्यपुत्र ! अलङ्घितपूर्वो मया नियमः।]

(इति सपरिवारा निष्क्रान्ता)

उर्वशी—सहि ! पिअकलत्तो राएसी। ण उण हिअअं णिवत्तेदुं सक्केमि। [सखि ! प्रियकलत्रो राजर्षिः। न पुनर्हृदयं निवर्तयितुं शक्नोमि।]

चित्रलेखा—किं उण तुए णिरासाए णिवत्तीअदि। [किं पुनस्त्वया निराशया निवर्त्यते।]

राजा—(आसनमुपेत्य) वयस्य ! न खलु दूरं गता देवी।

विदूषकः—भण विस्सद्धं जं सि वत्तुकामो। असज्झो त्ति वेज्जेण आदुरो विअ सेरं मुत्तो भवं तत्तहोदीए। [भण विश्रब्धं यदसि वक्तुकामः। असाध्य इति वैद्येनातुर इव स्वैरं मुक्तो भवाँस्तत्रभवत्या।]

राजा—अपि नामोर्वशी·····;·····।

उर्वशी—·····अज्ज किदत्था भवे। [अद्य कृतार्था भवेत्।]

राजा—

गूढं नूपुरशब्दमात्रमपि मे कान्तं श्रुतौ पातयेत्
पश्चादेत्य शनैः कराम्बुजवृते कुर्वीत वा लोचने।
हर्म्येऽस्मिन्नवतीर्य साध्वसवशान्मन्दायमाना बलात्
आनीयेत पदात्पदं चतुरया सख्या ममोपान्तिकम् ॥ १५ ॥

देवी—आप दूर हों या न हों, किन्तु मैंने तो अपने प्रिय को प्रसन्न करने वाला जो व्रत प्रारम्भ किया था, उसे पूरा कर लिया। आओ दासियो ! चला जाय।

(यह कहकर चली जाती है)

राजा—प्यारी ! यदि तुम इस समय मुझे छोडकर चली जाओगी तो समझ लेना कि मैं प्रसन्न नहीं हुआ हूँ।

देवी—आर्यपुत्र ! मैंने आज तक कभी अपने व्रत का नियम नहीं तोड़ा।

(ऐसा कहकर वह दासियों के साथ चली जाती है।)

उर्वशी—सखी ! राजर्षि अपनी पत्नी को इतना प्यार करते हैं, फिर भी मैं उनकी ओर से अपना मन नहीं हटा पा रही हूँ।

चित्रलेखा—तो फिर तुम निराश होकर लौट जाना चाह रही हो ?

राजा—**(अपने सिंहासन पर बैठकर)** मित्र ! अभी देवी दूर तो नहीं पहुँची होंगी।

विदूषक—जो कहना हो निश्चिन्त होकर कहिए। जैसे असाध्य रोगी को चिकित्सक स्वयं छोड़ देता है, वैसे ही महारानी ने आपको छोडकर स्वच्छन्द कर दिया है।

राजा—क्या अच्छा हो इस समय उर्वशी····।

उर्वशी—····आज सफलमनोरथ हो जायेगी।

राजा—क्या अच्छा होता, यदि उर्वशी इस समय छिपकर आकर अपने नूपुरों का मधुर शब्द सुना जाय या पीछे से आकर अपने कमलकोमल करपल्लवों से मेरी आँखें मूँद दें या इस प्रासाद पर उतर कर वह भयभीत की भाँति धीर-धीरे आगे बढ़े और उसकी चतुर सखी उसे मेरे पास पहुँचा दें॥ १५॥

चित्रलेखा—सहि उव्वसि ! इमं दाव से मणोरहं संपादेहि। [सखि उर्वशी ! इमं तावदस्य मनोरथं सम्पादय।]

उर्वशी—(ससाध्वसम्) भोदु। कीलिस्सं दाव। [भवतु, क्रीडिष्यामि तावत्।] (इति तिरस्करिणीमपनीय पृष्ठतो गत्वा राज्ञो नयने संवृणोति।)

(चित्रलेखा तिरस्करिणीमपनीय विदूषकं संज्ञापयति।)

विदूषकः—भो वअस्स ! का उण एसा ? [भो वयस्य ! का पुनः एषा ?]

राजा—(स्पर्शं रूपयित्वा) सखे ! नारायणोरुसम्भवा सेयं वरोरुः।

विदूषकः—कहं भवं अवगच्छदि ? [कथं भवानवगच्छति ?]

राजा—किमत्र ज्ञेयम् ?

अङ्गमनङ्गक्लिष्टं सुखयेदन्या न मे करस्पर्शात् ।
नोच्छ्वसिति तपनकिरणैश्चन्द्रस्यैवांशुभिः कुमुदम् ॥ १६ ॥

उर्वशी—(हस्तौ अपनीय उत्तिष्ठति। किञ्चिदपसृत्य) जेदु जेदु महाराओ। [जयतु जयतु महाराजः।]

राजा—सुन्दरि ! स्वागतम्। (इत्येकासन उपवेशयति।)

चित्रलेखा—अवि सुहं वअस्सस्स। [अपि सुखं वयस्यस्य।]

राजा—नन्वेतदुपपन्नम्।

उर्वशी—हला ! देवीए दिण्णो महाराओ। अदो से पणअवदी विअ सरीरसंपक्कं गदम्हि। मा क्खु मं पुरोभाइणिं समत्थेहि। [हला ! देव्या दत्तो महाराजः। अतोऽस्य प्रणयवतीव शरीरसम्पर्कं गतास्मि। मा खलु मां पुरोभागिनीं समर्थयस्व।]

चित्रलेखा—सखी उर्वशी ! इनके इस मनोरथ को पूरा करो।

उर्वशी—(घबराकर) अच्छा पहले इनसे कुछ मनोविनोद कर लें। (इस प्रकार पर्दा हटाकर पीछे से जाकर राजा की आँखें ढँक लेती है।)

(चित्रलेखा पर्दा हटाकर विदूषक को संकेत करती है।)

विदूषक—अरे मित्र ! ये कौन हैं ?

राजा—(स्पर्श से पहचानता हुआ) मित्र ! नारायण की जाँघ से उत्पन्न हुई वह सुन्दर जाँघों वाली उर्वशी है।

विदूषक—आपने कैसे पहचान लिया ?

राजा—इसमें पहचानने की क्या बात है ?

ऐसी कोई दूसरी स्त्री है ही नहीं जो मेरे कामपीड़ा से दुःखित शरीर को अपने हाथ के स्पर्श से सुखी कर सके। चन्द्रमा की किरणों से विकसित होने वाला कुमुद कभी सूर्य की किरणों से नहीं खिलता ॥ १६ ॥

उर्वशी—(हाथों को हटाकर खड़ी हो जाती है। कुछ हटकर) महाराज की जय हो, जय हो।

राजा—सुन्दरी ! आपका स्वागत है। (ऐसा कहकर अपने ही आसन पर बैठाता है।)

चित्रलेखा—क्या अब आप सुखी हैं ?

राजा—निश्चित रूप से सुख अब मिल पाया।

उर्वशी—सखी ! महारानीजी ने मुझे महाराज को दे दिया है। इसीलिए मैं इनकी प्रेमिका की भाँति इनके शरीर से सटकर बैठी हूँ। तुम मुझे महादेवी के आगे का रोड़ा मत समझना।

विदूषकः—कहं इह ज्जेव दुम्हाणं अत्थमिदो सुज्जो ? [कथमिहैव युवयोरस्तमितः सूर्यः ?]

राजा—(उर्वशीमवलोकयन्)

देव्या दत्त इति यदि व्यापारं व्रजसि मे शरीरेऽस्मिन् ।
प्रथमं कस्यानुमते चोरितमयि मे त्वया हृदयम् ॥ १७॥

चित्रलेखा—वअस्स ! णिरुत्तरा एसा । संपदं मह विण्णवणा सुणीअदु । [वयस्य ! निरुत्तरा एषा । साम्प्रतं मम विज्ञापना श्रूयताम् ।]

राजा—अवहितोऽस्मि ।

चित्रलेखा—वसंताणंतरं उण्हसमए भअवं सुज्जो मए उवचरिदव्वो । ता जहा इअं मे पिअसही सग्गस्स ण उक्कंठेदि तहा वअस्सेण कादव्वं । [वसन्तानन्तरमुष्णसमसे भगवान्सूर्यो मयोपचरितव्यः । तद्यथेयं मे प्रियसखी स्वर्गाय नोत्कण्ठते तथा वयस्येन कर्तव्यम् ।]

विदूषकः—किं वा सग्गे सुमरिदव्वं । ण वा तत्थ अण्हीअदि ण वा पीअदि । केवलं अणिमिसेहिं णअणेहिं मीणा विडंवीअंति । [किं वा स्वर्गे स्मर्तव्यम् । न वा तत्राश्यते न वा पीयते । केवलमनिमिषैर्नयनैर्मीना विडम्ब्यन्ते ।]

राजा—भद्रे !

अनिर्देश्यसुखः स्वर्गः कस्तं विस्मारयिष्यति ।
अनन्यनारीसामान्यो दासस्त्वस्याः पुरूरवाः ॥ १८॥

चित्रलेखा—अणुगहीदम्हि । हला उव्वसि ! अकादरा भविअ विसज्जेहि मं । [अनुगृहीतास्मि । हला उर्वशि ! अकातरा भूत्वा विसर्जय माम् ।]

उर्वशी—(चित्रलेखां परिष्वज्य सकरुणम्) सहि ! मा क्खु मं विसुमरेहि । [सखि ! मा खलु मां विस्मर ।]

विदूषक—कैसे यहीं आप दोनों की साँझ हो गई ?

राजा—(उर्वशी को देखता हुआ) आज तो आप 'देवी ने आपको मेरे हाथों में सौंप दिया है' ऐसा कहकर मुझसे सम्बन्ध जोड़ रही हैं, परन्तु यह तो बतलाइए, जब आपने पहले मेरा हृदय चुरा लिया था, वह किससे पूछकर चुराया था ? ॥ १७॥

चित्रलेखा—मित्र ! इनके पास इस प्रश्न का कोई उत्तर नहीं है। अब आप मेरा निवेदन सुनिए।

राजा—कहिए, मैं सावधान होकर सुन रहा हूँ।

चित्रलेखा—वसन्त ऋतु के बीत जाने पर जब ग्रीष्म काल आयेगा उस समय मुझे सूर्यदेव की आराधना करनी है। उस समय ये मेरी प्रियसखी कहीं स्वर्ग जाने के लिए उत्कण्ठित न हो जाँय, ऐसी व्यवस्था आपको करनी चाहिए।

विदूषक—स्वर्ग की याद ही क्यों आती है ? न वहाँ कुछ खाया जाता है और न कुछ वहाँ पिया ही जाता है। वहाँ के निवासी तो केवल दिन-रात मछली की भाँति आँखें फाडे रहते हैं।

राजा—सुन्दरी ! स्वर्ग में अनेक प्रकार के सुख हैं, उन्हें कौन भुला सकता है। किन्तु मैं इतना ही कह सकता हूँ कि अन्य सभी स्त्रियों से मन हटाकर यह पुरूरवा केवल इसी का दास है ॥ १८॥

चित्रलेखा—यह तो आपकी मुझ पर बडी कृपा है। सखी उर्वशी ! प्रसन्न होकर अब मुझे तुम विदा कर दो।

उर्वशी—(करुणा के साथ चित्रलेखा को आलिंगन कर) सखी ! मुझे कहीं तुम भूल न जाना।

चित्रलेखा—(सस्मितम्) वअस्सेण संगदा तुमं एव्व एदं मए जाचिदव्वा। [वयस्येन सङ्गता त्वमेवैतन्मया याचितव्या।] (इति राजानं प्रणम्य निष्क्रान्ता।)

विदूषकः—दिट्ठिआ मणोरहसंपदीए वड्ढदि भवं। [दिष्ट्या मनोरथसम्पत्त्या वर्धते भवान्।]

राजा—इयं तावद्बुद्धिर्मम। पश्य—

सामन्तमौलिमणिरञ्जितपादपीठमेकातपत्रमवनेर्न तथा प्रभुत्वम्।
अस्याः सखे! चरणयोरहमद्य कान्तमाज्ञाकरत्वमधिगम्य यथा कृतार्थः ॥ १९ ॥

उर्वशी—णत्थि मे वाआविहवो अदो पिअदरं मंतिदुं। [नास्ति मे वाग्विभवोऽतः प्रियतरं मन्त्रयितुम्।]

राजा—(उर्वशीं हस्तेनावलम्ब्य) अहो, विरुद्धसंवर्धन ईप्सितलाभो नाम। यतः—

पादास्त एव शशिनः सुखयन्ति गात्रं बाणास्त एव मदनस्य मनोनुकूलाः।
संरम्भरूक्षमिव सुन्दरि! यद्यदासीत् त्वत्सङ्गमेन मम तत्तदिवानुनीतम् ॥ २० ॥

उर्वशी—अवरद्धम्हि चिरकारिआ अज्जउत्तस्स। [अपराद्धास्मि चिरकारिकार्यपुत्रस्य।]

राजा—सुन्दरि! मा मैवम्—

यदेवोपनतं दुःखात् सुखं तद्रसवत्तरम्।
निर्वाणाय तरुच्छाया तप्तस्य हि विशेषतः ॥ २१ ॥

विदूषकः—भो! सेविदा पदोसरमणीआ चंदवादा। समओ क्खु दे वासघरपवेसस्स। [भोः! सेविताः प्रदोषरमणीयाश्चन्द्रपादाः। समयः खलु ते वासगृहप्रवेशस्य।]

चित्रलेखा—(मुस्कराकर) अब तुम अपने मित्र से जुट गयी हो, ऐसा तो मुझे तुमसे कहना चाहिए था। **(ऐसा कहकर राजा को प्रणाम कर चली जाती है।)**

विदूषक—भाग्य से आपके मनोरथ पूर्ण हो गये।

राजा—यह मेरी सबसे बड़ी विजय है। देखो—

मित्र! जितना मैं आज इनके चरणों की आज्ञा पालन करने का अधिकार पाकर सफलमनोरथ हुआ हूँ, उतना मैं सम्पूर्ण भूतल का स्वामी तथा अपने पादपीठ को सामन्त राजाओं के मुकुटमणियों से रंगाने को भी अच्छा नहीं समझता॥ १९॥

उर्वशी—इससे बढ़कर अच्छी बात तो मैं सोच भी नहीं पा रही हूँ।

राजा—(उर्वशी को हाथ से पकड़कर) अरे! मनचाही वस्तु के मिल जाने पर विरोधी वस्तुएँ भी अच्छी लगने लगती हैं। क्योंकि—

आज चन्द्रमा की वे ही किरणें शरीर को सुखी कर रहीं हैं, आज वे ही कामदेव के बाण मन को अनुकूल लग रहे हैं; हे सुन्दरी! जो-जो वस्तुएँ पहले क्रोध के कारण रूखी जैसी लगती थीं, वे सभी वस्तुएँ तुम्हारे मिल जाने से मुझे अनुकूल प्रतीत हो रही हैं॥ २०॥

उर्वशी—मैंने आपके समीप आने में जो विलम्ब किया उसके लिए मैं आर्यपुत्र की अपराधिनी हूँ।

राजा—सुन्दरी! ऐसा मत कहो।

दुःख के बाद जो सुख मिलता है, वह बड़ा ही रसीला होता है। पेड़ की छाया उस मनुष्य को विशेष अच्छी लगती है, जो धूप से तपा हो॥ २१॥

विदूषक—अरे! सायंकालीन चन्द्रमा की किरणों का सेवन कर लिया है। अब आपके शयनगृह में प्रवेश करने का समय हो गया है।

राजा—तेन हि सख्यास्ते मार्गमादेशय।

विदूषकः—इदो इदो भवदी। [इत इतो भवती।]

(इति सर्वे परिक्रामन्ति)

राजा—सुन्दरि! इयमिदानीं मेऽभ्यर्थना।

उर्वशी—कीरिसी सा? [कीदृशी सा?]

राजा—

अनुपनतमनोरथस्य पूर्वं शतगुणितेव गता मम त्रियामा।
यदि तु तव समागमे तथैव प्रसरति सुभ्रु ततः कृती भवेयम् ॥ २२ ॥

(इति निष्क्रान्ताः सर्वे)

॥ इति तृतीयोऽङ्कः ॥

राजा—तब तो तुम सखी (उर्वशी) को भी मार्ग का निर्देश करो।

विदूषक—आप इधर से चलिये, इधर से।

(सभी घूमते हैं)

राजा—सुन्दरी! इस समय मेरी यह एक प्रार्थना है।

उर्वशी—वह (प्रार्थना) कैसी है?

राजा—यही कि मेरा मनोरथ सफल होने से पहले जैसी सौगुनी लम्बी रातें मुझे लगा करती थीं, यदि वे रातें तुम्हारे मिल जाने के बाद भी वैसी ही लम्बी हो जायँ तो हे सुभ्रू! मैं सफलमनोरथ हो जाऊँगा॥ २२॥

(सब चले जाते हैं।)

तीसरा अंक समाप्त।

चतुर्थोऽङ्कः

(नेपथ्ये सहजन्याचित्रलेखे प्रावेशिक्याक्षिप्तिका)

पिअसहिविओअविमणा सहिसहिआ व्वाउला समुल्लवइ ।
सूरकरफंसविअसिअतामरसे सरवरुच्छंगे ॥ १ ॥

[प्रियसखीवियोगविमनाः सखीसहिता व्याकुला समुल्लपति ।
सूर्यकरस्पर्शविकसिततामरसे सरोवरोत्सङ्गे ॥]

(ततः प्रविशति विमनस्का चित्रलेखा सहजन्या च)

चित्रलेखा—(प्रवेशानन्तरं द्विपदिकया दिशोऽवलोक्य)

सहअरिदुक्खालिद्धअं सरवरअम्मि सिणिद्धअं ।
वाहोवग्गिअणअणअं तम्मइ हंसीजुअलअं ॥ २ ॥

[सहचरीदुःखालीढं सरोवरे स्निग्धम् ।
बाष्पापवलितनयनं ताम्यति हंसीयुगलम् ॥]

सहजन्या—(चित्रलेखां विलोक्य सखेदम्) सहि चित्तलेहे ! मिलाअमाणसदवत्तस्स विअ दे मुहस्स छाआ हिअअस्स अस्सत्थदं सूएदि। ता कहेहि मे णिव्वेदकारणं। दे समदुक्खा भविदुं इच्छामि। **[सखि चित्रलेखे! म्लायमानशतपत्रस्येव ते मुखस्य छाया हृदयस्यास्वस्थतां सूचयति। तत्कथय मे निर्वेदकारणम्। ते समदुःखा भवितुमिच्छामि।]**

चित्रलेखा—(सकरुणम्) सहि ! अच्छरोवारपज्जाएण इह भअवदो सुज्जस्स पादमूलोवट्ठाणे वट्टदि त्ति बलिअं क्खु उव्वसीए उक्कंठिदम्हि। **[सखि! अप्सरोवारपर्यायेणेह भगवतः सूर्यस्य पादमूलोपस्थाने वर्तत इति बलवत्खलु उर्वश्या उत्कण्ठितास्मि।]**

सहजन्या—सहि ! जाणे वो अण्णोण्णसिणेहं। तदो तदो। **[सखि! जाने युवयोरन्योन्यस्नेहम्। ततस्ततः।]**

(नेपथ्य में सहजन्या तथा चित्रलेखा के प्रवेश की सूचना देने वाली आक्षिप्तिका गीत गा रही है।)

अपनी प्रिया सखी के विरह से पीड़ित तथा व्याकुल हुई हंसी उसी सरोवर के जल में, जिसमें सूर्य की किरणों के स्पर्श से कमल खिल गये हैं, अपनी सखी के लिए बैठकर रो रही है॥ १ ॥

(उसके बाद सहजन्या के साथ अनमनी चित्रलेखा का प्रवेश)

चित्रलेखा—(प्रवेश के बाद द्विपदिका नामक गीति के साथ दिशाओं की ओर देखकर)

अपनी सखी के विरह में व्याकुल तथा एक-दूसरी को प्यार करने वाली दो हंसिनियाँ आँखों से आँसू बहाते हुए सरोवर के तट पर बैठकर सिसक रही है॥ २ ॥

सहजन्या—(**चित्रलेखा को देखकर दुःख के साथ**) सखी चित्रलेखा ! मुरझाये हुए कमल के समान तुम्हारा मुखमंडल तुम्हारे हृदय की अस्वस्थता की सूचना दे रहा है। अतः तू मुझे अपनी उदासीनता का कारण बता। मैं भी तुम्हारे दुःख में सहभागिनी होना चाहती हूँ।

चित्रलेखा—(**दुःखी होकर**) सखी ! भगवान् सूर्य की सेवा करने के लिए यहाँ सभी अप्सराओं की पारी बँधी हुई है। अतः आज अपनी पारी पर मैं भी आयी थी, अतः मैं उर्वशी के लिए व्याकुल हूँ।

चित्रलेखा—तदो इमाइं दिवसाइं को णु क्खु वुत्तांतो त्ति प्पणिधाणट्ठिदाए मए अच्चाहिदं उवलद्धं। [ततः एतेषु दिवसेषु को नु खलु वृत्तान्त इति प्रणिधानस्थितया मयात्याहितमुपलब्धम्।]

सहजन्या—(सावेगम्) सहि! कीरिसं तं? [सखि! कीदृशं तत्?]

चित्रलेखा—(सकरुणम्) उव्वसी किल तं रदिसहाअं राएसिं अमच्चेसु णिवेसिदरज्जधुरं गेण्हिअ गंधमादणवणं विहरिदुं गदा। [उर्वशी किल तं रतिसहायं राजर्षिममात्येषु निवेशितराज्यधुरं गृहीत्वा गन्धमादनवनं विहर्तुं गता।]

सहजन्या—(सश्लाघम्) सो णाम संभोओ जो तारिसेसु पदेसेसु। तदो तदो। [स नाम सम्भोगो यस्तादृशेषु प्रदेशेषु। ततस्ततः।]

चित्रलेखा—तहिं क्खु मंदाइणीए पुलिणेसु गदा सिअदापब्बदकेलीहिं कीलमाणा विज्जाधरदारिआ उदयवदी णोम देण राएसिणा णिज्झाइद त्ति कुविदा उव्वसी। [तत्र खलु मन्दाकिन्याः पुलिनेषु गता सिकतापर्वतकेलिभिः क्रीडन्ती विद्याधरदारिकोदयवती नाम तेन राजर्षिणा निध्यातेति कुपिता उर्वशी।]

सहजन्या—होदव्वं। दूरारूढो क्खु पणओ असहणो। तदो तदो। [भवितव्यम्। दूरारूढः खलु प्रणयोऽसहनः। ततस्ततः।]

चित्रलेखा—तदो सा भट्टिणो अणुणअं अप्पडिवज्जमाणा गुरुसावसंमूढहिअआ विसुमरिद-देवदाणिअमा इत्थिआजणपरिहरणिज्जं कुमारवणं प्पविट्ठा। प्पवेसाणंतरं अ काणणोवंतवत्तिलदाभावेण परिणदं से रूवम्। [ततः सा भर्तुरनुनयमप्रतिपद्यमाना गुरुशापसम्मूढहृदया विस्मृतदेवतानियमा स्त्रीजनपरिहरणीयं कुमारवनं प्रविष्टा। प्रवेशानन्तरं च काननोपान्तवर्तिलताभावेन परिणतमस्या रूपम्।]

सहजन्या—(सशोकम्) सव्वधा णत्थि विहिणो अलंघणिज्जं णाम जेण तारिसस्स अणुराअस्स अअं एव्व एक्कवदे अण्णारिसो पलिणामो संवुत्तो। अह किमवंत्थो सो राएसी? [सर्वथा नास्ति विधेरलङ्घनीयं नाम येन तादृशस्यानुरागस्यायमेवैकपदेऽन्यादृशः परिणामः संवृत्तः। अथ किमवस्थः स राजर्षिः?]

सहजन्या—सखी! मैं जानती हूँ, तुम दोनों में परस्पर कितना स्नेह है। हाँ तब?

चित्रलेखा—तब मैंने इन दिनों उसका क्या समाचार है, जब यह जानना चाहा तब मैंने ध्यान लगाकर देखा तो मुझे मालूम हुआ कि वह संकट में पडी है।

सहजन्या—(घबराकर) सखी! कैसा संकट?

चित्रलेखा—(रुआँसी-सी होकर) सुना है कि उर्वशी मन्त्रियों के ऊपर राज्यभार को सौंपने के वाद राजर्षि को लेकर गन्धमादन पर्वत पर विहार करने के लिए गयी थी।

सहजन्या—(प्रशंसा करती हुई) वही सुखभोग कहा जाता है, जो ऐसे सुन्दर प्रदेशों में किया जाता है। हाँ, तो फिर उसके वाद क्या हुआ?

चित्रलेखा—वहाँ जब वह मन्दाकिनी के तट पर जाकर वालू के टीले वना-वना कर खेल रही थी, उस समय वह देखती है कि उदयवती नाम की एक विद्याधर की कन्या को राजा देख रहे थे, अतएव इनसे उर्वशी नाराज हो गयी।

सहजन्या—यह हो सकता है। जब प्रेम वहुत वढ जाता है, तब ऐसी वातें सहन नहीं हो पाती।

चित्रलेखा—उसके वाद भरत मुनि के शाप से उसकी बुद्धि ऐसी मारी गयी कि राजा के अनुनय को भी उसने ठुकरा दिया। देवता के ध्यान को भुलाकर वह उस कुमार-वन में चली गयी, जहाँ स्त्रियों को जाने की रोक है। वहाँ जाते ही वह लता के रूप में वदल गयी।

चित्रलेखा—सो वि तस्सिं एव्व काणणे पिअदमं विचिण्णतो अहोरत्ते अदिवाहेदि। (नभोऽवलोक्य) इमिणा उण णिव्वुदाणं वि उक्कंठाकारिणा मेहोदएण अणत्थाहीणो हविस्सदि। [सोऽपि तस्मिन्नेव कानने प्रियतमां विचिन्वन्नहोरात्रानतिवाहयति। एतेन पुनर्निर्वृतानामप्युत्कण्ठाकारिणा मेघोदयेनानर्थाधीनो भविष्यति।]

(नेपथ्ये जम्भलिका)

सहअरिदुक्खालिद्धअं सरवरअंमिसिणिद्धअं ।
अविरलवाहजलोल्लअं तम्मइ हंसी-जुअलअं ॥ ३॥
[सहचरीदुःखालीढं सरोवरे स्निग्धम् ।
अविरलबाष्पजलार्द्र ताम्यति हंसीयुगलम् ॥]

सहजन्या—सहि! ण क्खु तारिसा आकिदिविसेसा चिरं दुक्खभाइणो होंति। तां अवस्सं किंपि अणुग्गहणिमित्तं भूवो वि समाअमकारणं हविस्सदि। (प्राचीं दिशं विलोक्य) ता एहि। उदअंमुहस्स भअवदो सुज्झस्स उवट्ठाणं करेम्ह। [सखि! न खलु तादृशा आकृतिविशेषाश्चिरं दुःखभागिनो भवन्ति। तदवश्यं किमप्यनुग्रहनिमित्तं भूयोऽपि समागमकारणं भविष्यति। तदेहि। उदयोन्मुखस्य भगवतः सूर्यस्योपस्थानं कुर्वः।]

(नेपथ्ये खण्डधारा)

चिंतादुम्मिअमाणसिआ सहअरिदंसणलालसिआ ।
विअसिअ कमलमणोहरए विहरइ हंसी सरवरए ॥ ४॥
[चिन्तादूनमानसिका सहचरिदर्शनलालसिका ।
विकसितकमलमनोहरे विहरति हंसी सरोवरे ॥]

(इति निष्क्रान्ते)

॥ प्रवेशकः ॥

सहजन्या—(शोक के साथ) सचमुच विधि का विधान अटल होता है। भला बतलाइए, कहाँ तो ऐसा प्रेम और कहाँ उसका ऐसा विपरीत परिणाम? अच्छा, अब उन राजर्षि की क्या स्थिति है?

चित्रलेखा—वे भी उसी वन में अपनी प्यारी को दिन-रात खोजते हुए अपना समय बिता रहे हैं। (आकाश की ओर देखकर) इससे सुखी लोगों के मन में भी उत्कण्ठा उत्पन्न करने वाले इन बादलों को देखकर तो उनका मन ही टूट गया होगा।

(नेपथ्य में जम्भलिका नामक गीति के साथ)

अपनी सहचरी के दुःख में चिन्तित परस्पर एक-दूसरी के साथ प्रेम करने वाली दो हंसिनियाँ निरन्तर आँसू बहाते हुए सरोवर के तट पर बैठी हुई सिसक रही हैं॥ ३॥

सहजन्या—देखो सखी! विशेष आकृति वाले ऐसे पुरुष बहुत दिनों तक दुःखी नहीं होते। इसलिए कोई न कोई कृपा का कारण अवश्य ही उपस्थित हो जायगा, जिससे कि उन दोनों का फिर से मिलन हो जायेगा। (पूर्व दिशा की ओर देखकर) तो चलो। उदय होते हुए सूर्य की पूजा कर लें।

(नेपथ्य में खण्डधारा गीति के साथ)

चिन्ता से अनमनी तथा अपनी सहचरी (सखी) से मिलने के लिए उत्सुक हंसी विकसित कमलों के कारण नयनाभिराम सरोवर में विहार कर रही है॥ ४॥

(दोनों जाती हैं)

॥ प्रवेशक ॥

(नेपथ्ये पुरूरवसः प्रावेशिक्याक्षिप्तिका)

गहणं गइंदणाहो पिअविरहुम्माअपअत्तिअविआरो ।
विसइ तरुकुसुमकिसलअभूसिअणिअदेहपब्भारो ॥ ५ ॥

[गहनं गजेन्द्रनाथः प्रियाविरहोन्मदप्रकटितविकारः ।
विशति तरुकुसुमकिसलयभूषितनिजदेहप्राग्भारः ॥]

(ततः प्रविशति आकाशवद्धलक्ष्य उन्मत्तवेषो राजा)

राजा—(सक्रोधम्) आः दुरात्मन् रक्षः ! तिष्ठ तिष्ठ। मे प्रियतमामादाय गच्छसि ? (विलोक्य) हन्त ! शैलशिखराद्गगनमुत्पत्य वाणैर्मामभिवर्षति।

(नेपथ्ये)

हिअआहिअपिअदुक्खओ सरवरए धुदपक्खओ ।
वाहोवग्गिअणअणओ तम्मइ हंसजुआणओ ॥ ६ ॥

[हृदयाहितप्रियादुःखः सरोवरे धुतपक्षः ।
बाष्पापवल्गितनयनस्तास्यति हंसयुवा ॥]

(लोष्ठं गृहीत्वा हन्तुं धावन् विभाव्य सकरुणम्)

कथम्—

नवजलधरः सन्नद्धोऽयं न दृप्तनिशाचरः
सुरधनुरिदं दूराकृष्टं न नाम शरासनम् ।
अयमपि पटुर्धारासारो न बाणपरम्परा
कनकनिकषस्निग्धा विद्युत्प्रिया न ममोर्वशी ॥ ७ ॥

(नेपथ्ये)

मइं जाणिइं मिअलोअणी, णिसअरु कोइ हरेइ ।
जाव णु णवतडसामलि, धाराहरु वरिसेइ ॥ ८ ॥

(नेपथ्य में पुरूरवा के प्रवेश के लिए आक्षिप्तिका गीति का गान)

अपनी प्यारी के विरह में विधुर होने के कारण यह गजराज अपनी मानसिक पीडा को प्रकट करता हुआ पेडों के फूलों तथा किमलयों से अपने शरीर को सजाकर इस वन में प्रवेश कर रहा है॥ ५ ॥

(तदनन्तर आकाश की ओर मुख उठाये तथा पागल जैसा वेश बनाये राजा का प्रवेश)

राजा—(क्रोध से) अरे दुष्ट राक्षस ! खडा रह। तू मेरी प्रियतमा को ले जा रहा है ? **(देखकर)** अरे ! यह तो पहाड़ की चोटी से आकाश में जाकर मेरे ऊपर बाण बरसाने लगा है।

(नेपथ्य में)

यह हंसयुवक अपनी प्रिया के दुःख में दुःखी पंख फडफड़ाता हुआ आँखों से आँसू बरसाता हुआ तालाव में वैठा सिसकियाँ भर रहा है॥ ६ ॥

(पत्थर लेकर मारने के लिए दौड़ता हुआ समझकर दया के साथ)

कैसे—यह तो अभी बरसने वाला बादल है, राक्षस नहीं। इसमें खिंचा हुआ यह इन्द्रधनुष है, राक्षस का धनुष नहीं। ये जो निरन्तर बरस रहे हैं, ये बाण नहीं हैं, अपितु पानी की बूँदें हैं और जो यह कसौटी पर बनी हुई सोने की रेखा जैसी चमक रही है, यह मेरी प्रिया उर्वशी नहीं है, यह तो बिजली है॥ ७ ॥

[मया ज्ञातं मृगलोचनां निशाचरः कोऽपि हरति ।
यावन्नु नवतडिच्छ्यामलो धाराधरो वर्षति ॥]

(विचिन्त्य सकरुणम्) क्व नु खलु सा रम्भोरुर्गता स्यात् ?

तिष्ठेत्कोपवशात्प्रभावपिहिता दीर्घं न सा कुप्यति
स्वर्गायोत्पतिता भवेन्मयि पुनर्भावार्द्रमस्या मनः ।
तां हर्तुं विबुधद्विषोऽपि न च मे शक्ताः पुरोवर्तिनीं
सा चात्यन्तमदर्शनं नयनयोर्यातेति कोऽयं विधिः ॥ ९ ॥

(इति दिशोऽवलोक्य सनिःश्वासम्) अये ! परावृत्तभागधेयानां दुःखं दुःखानुबन्धि । कुतः—

अयमेकपदे तया वियोगः प्रियया चोपनतः सुदुःसहो मे ।
नववारिधरोदयादहोभिर्भवितव्यं च निरातपत्वरम्यैः ॥ १० ॥

जलहर संहर एहु कोपइं आढत्तओ
अविरलधारासारदिसामुहकंतओ ।
ए मइं पुहविं भमंतो जइ पिअं पेक्खिमि
तव्वे जं जु करीहिसि तं तु सहीहिमि ॥ ११ ॥

[जलधर संहरैतं कोपमाज्ञप्तः अविरलधारासारदिशामुखकान्तः ।
ए अहं पृथ्वीं भ्रमन्यदि प्रियां प्रेक्षे तदा यद्यत्करिष्यसि तत्तत्सहिष्ये ॥]

(विहस्य) मुधैव खलु मया मनसः परितापवृद्धिरुपेक्ष्यते । यथा मुनयोऽपि व्याहरन्ति—राजा कालस्य कारणमिति । तत्किमहं जलदसमयं न प्रत्यादिशामि ?

(नेपथ्य में)

मैंने समझा था कि मृग के समान नेत्रों वाली मेरी प्रिया को कोई राक्षस चुराकर ले जा रहा है, परन्तु यहाँ तो बिजली को चमकाता हुआ नया काला बादल केवल पानी बरसा रहा है ॥ ८ ॥

(सोचकर दुःख से) वह केले के समान जाँघों वाली (उर्वशी) कहाँ गयी होगी ?

वह कहीं मुझसे कुपित होकर अपने दैवी प्रभाव मे छिप न गयी हो ? वह कभी देर तक कुपित या कहीं वह स्वर्ग ही न चली गयी हो ? किन्तु ऐसा नहीं हो सकता, क्योंकि उसका मन तो मेरे प्रति अत्यन्त अनुराग युक्त था। मेरे सामने से उसे देवताओं तथा शत्रु राक्षस भी हरण नहीं कर सकते, फिर भी वह मुझे क्यों नहीं दिखलायी दे रही है ? यह मेरा कैसा दुर्भाग्य है ? ॥ ९ ॥

(चारों ओर देखकर लम्बी साँस लेकर) अरे ! फूटे भाग्यवालों के लिए तो विपत्ति पर विपत्ति आया ही करती है। क्योंकि—

कहाँ एक ओर एकाएक प्रिया का इस प्रकार बिछोह, जो मुझसे सहा नहीं जा रहा है और उसी समय दूसरी ओर ऐसा सुहावना अवसर, जो बादलों के छा जाने तथा धूप के छिप जाने से और भी मनमोहक हो गया है ॥ १० ॥

निरन्तर बरसने के कारण चारों ओर फैले हुए अरे मेघ ! मेरी आज्ञा को पाकर इस समय तुम अपना क्रोध शान्त करो। मैं सम्पूर्ण भूतल पर घूमकर जब अपनी प्रिया को पा जाऊँगा, तब तुम जो जो भी करोगे उस-उस को सहन कर लूँगा ॥ ११ ॥

(हँसकर) व्यर्थ ही मैं अपने मन की पीड़ा को बढाये जा रहा हूँ। जैसा कि मुनिजन भी कहा

गंधुम्माइअमहुअरगीएहिं वज्जंतेहिं परहुअ तूरेहिं ।
पसरिअपवणुव्वेल्लिअपल्लवणिअरु सुललिअविविहपआरेहिं णच्चइ कप्पअरु ॥ १२ ॥

[गन्धोन्मादितमधुकरगीतैर्वाद्यमानैः परभृततूर्यैः ।
प्रसूतपवनोद्वेल्लितपल्लवनिकरः सुललितविविधप्रकारं नृत्यति कल्पतरुः ॥]

अथवा न प्रत्यादिशामि जलदसमयं यत्प्रावृषेण्यैरेव लिङ्गैर्मम राजोपचारः सम्प्रति। कथमिव—

विद्युल्लेखाकनकरुचिरं श्रीवितानं ममाभ्रं
व्याधूयन्ते निचुलतरुभिर्मञ्जरीचामराणि ।
घर्मच्छेदात्पटुतरगिरो वन्दिनो नीलकण्ठाः
धाराहारोपनयनपरा नैगमाः सानुमन्तः ॥ १३ ॥

भवतु, किमेवं परिच्छदश्लाघया ? यावदस्मिन्कानने तां प्रियामन्वेषयामि।

(नेपथ्ये)

दइआरहिओ अहिअं दुहिओ बिरहाणुगओ परिमंथरओ ।
गिरिकाणणए कुसुमुज्जलए गजजूहवई बहुझीणगई ॥ १४ ॥

[दयितारहितोऽधिकं दुःखितो विरहानुगतः परिमन्थरः ।
गिरिकानने कुसुमोज्ज्वले गजयूथपतिर्बहुक्षीणगतिः ॥]

(परिक्रम्यावलोक्य च) हन्त हन्त ! व्यवसितस्य मे सन्दीपनमिव संवृत्तम्। कुतः—

आरक्तराजिभिरियं कुसुमैर्नवकन्दलीसलिलगर्भैः ।
कोपादन्तर्बाष्पे स्मरयति मां लोचने तस्याः ॥ १५ ॥

करते हैं—'राजा जैसा समय चाहे वैसा समय ला सकता है।' तो मैं इस वर्षाकाल को ही क्यों न आज्ञा दे दूँ ?

सुगन्ध से झूमने वाले भौंरों के गीतों के साथ-साथ तथा कोयल की बोली में बजने वाली बंसियों की धुन से गूँजते हुए वायु से जिस कल्पतरु के किसलय हिल रहे हैं, देखो—वह कल्पतरु विविध प्रकार के ललित भावों को अपने मन में सजोये हुए नाच रहा है॥ १२॥

अथवा इस वर्षाकाल को कुछ कहना ही व्यर्थ है। क्योंकि—

इस समय वर्षाकाल के जो लक्षण दिखलायी दे रहे हैं, उन्हीं लक्षणों के कारण मैं आज भी राजा के समान शोभा पा रहा हूँ। वह कैसे ? बिजली रूपी सोने से बना हुआ यह बादल ही मेरा छत्र है, निचुल के पेड ही मेरे ऊपर अपनी मंजरियों के चँवर डुला रहे हैं। गर्मी के समाप्त हो जाने के कारण तीव्र शब्द करने वाले ये मोर ही स्तुतिपाठकों के पद का निर्वाह कर रहे हैं और झरनों की मोतियों को भेंट करती हुई ये पहाडियाँ ही मेरी जनता है॥ १३॥

अच्छा, अपने राजकीय तत्त्वों की प्रशंसा करने से क्या लाभ ? जब तक इस वन में अपनी प्रिया को खोजता हूँ।

(नेपथ्य में)

अपनी प्रिया के विरह के कारण अधिक दुःखित विरही यह गजयूथपति फूलों से सुशोभित इस पहाडी में धीरे-धीरे घूम रहा है॥ १४॥

(घूमकर और देखकर) हाय ! हाय ! उर्वशी को ढूँढते-ढूँढते मेरी मानसिक पीडा को और भी अधिक बढा देने वाला यह दूसरा कारण सामने आ गया। क्योंकि—

इतो गतेति कथं नु तत्रभवति मया सूचयितव्या ? यतः—

पद्भ्यां स्पृशेद्वसुमतीं यदि सा सुगात्री मेघाभिवृष्टसिकतासु वनस्थलीषु ।
पश्चान्नता गुरुनितम्बतया ततोऽस्या दृश्येत चारुपदपङ्क्तिरलक्तकाङ्का ॥ १६ ॥

(परिक्रम्यावलोक्य च सहर्षम्) उपलब्धमुपलक्षणं येन तस्याः कोपनाया मार्गोऽनुमीयते।

हृतोष्ठरागैर्नयनोदबिन्दुभिः निमग्ननाभेर्निपतद्भिरङ्कितम् ।
च्युतं रुषाभिन्नगतेरसंशयं शुकोदरश्यामिमदं स्तनांशुकम् ॥ १७ ॥

भवतु, आदास्ये तावत्। (परिक्रम्य विभाव्य च सास्रम्) कथं सेन्द्रगोपं नवशाद्वलमिदम्। कुतो नु खलु निर्जने वने प्रियाप्रवृत्तिरवगमयितव्या ? (शिखिनं दृष्ट्वा) अये ! अयमासारोच्छ्वसितशैलेय-स्थलीपाषाणमारूढः—

आलोकयति पयोदान्प्रबलपुरोवाततताडितशिखण्डः ।
केका गर्भेण शिखी दूरोन्नमितेन कण्ठेन ॥ १८ ॥

(उपेत्य) भवतु, यावदेनं पृच्छामि।

(नेपथ्ये)

संपत्तविसूरणओ तुरिअं परवारणओ ।
पिअअमदंसणलालसओ गअवरु विम्हिअमाणसओ ॥ १९ ॥

[सम्प्राप्तविसूरणः त्वरितं परवारणः ।
प्रियतमदर्शनलालसो गजवरो विस्मितमानसः ॥]

नये कन्दली के पेड़ के जलभरे लाल फूलों को देखकर मुझे क्रोध से लाल हुई उर्वशी की आँखों का स्मरण हो आया, जिनमें आँसू भर आये थे ॥ १५ ॥

वह यहाँ से गयी है, यह मैं कैसे बता सकूँगा ? क्योंकि—

यदि वह सुन्दरी वर्षा से भीगी हुई बालू वाली इस वनभूमि पर चलती होती तो महावर से रंगे हुए उसके सुन्दर चरणों की टापें दूर तक अवश्य दिखलायी देतीं, जो उसके नितम्बों के भारी होने से एड़ी की ओर अधिक गहरी होती ॥ १६ ॥

(घूमकर देखकर और प्रसन्नता के साथ) उसके कुछ लक्षण तो मिल गये, जिनसे उस क्रोधी स्वभाव वाली उर्वशी के जाने के मार्ग का अनुमान लगाया जा सकता है। क्योंकि—

शुक (तोता) के पेट जैसे हरे रंग वाली उसकी चोली यही है, जिस पर उसके आँसुओं से धुलकर होठों से गिरी लाल रंग की बूँदें दिखलायी दे रही हैं और कुछ बूँदें क्रोध की हड़बड़ी से नाभि से खिसककर नीचे भी गिर गयी होंगी ॥ १७ ॥

अच्छा, मैं इस वस्त्र को उठा लेता हूँ। **(घूमकर पहचान कर रोता हुआ)** अरे ! यह तो हरी घास पर वीरबहूटियाँ फैली हुई हैं। इस निर्जन वन में प्रिया का पता कहाँ से लग पायेगा ? **(मोर को देखकर)** अरे, वर्षा से भींगने के कारण जिसमें से भाप निकल रही है, ऐसी चट्टान पर यह मोर बैठा है।

और सामने की तेज हवा से छितराती हुई कलँगी वाला यह मोर दूर से गर्दन उठाकर केकारव करता हुआ बादलों को देख रहा है ॥ १८ ॥

(पास जाकर) अच्छा, जब तक इससे पूछता हूँ।

(नेपथ्य में)

(अञ्जलिं बद्ध्वा)

बंहिण पइं इअ अब्भत्थिअम्मि ओअक्खहि मं ता
एत्थ वणे भम्मंते जइ पइं दिट्ठी सा महु कंता ।
णिसम्महि मिअंकसरिसवअणा हंसगई
ए चिण्हे जाणीहिसि आअक्खिउ तुज्झ मइं ॥ २० ॥

[बर्हिण परमित्यभ्यर्थये आचक्ष्व मे तत्
अत्र वने भ्रमता यदि त्वया दृष्टा सा मम कान्ता ।
निशामय मृगाङ्कसदृशवदना हंसगति-
रनेन चिह्नेन ज्ञास्यस्याख्यातं तव मया ॥]

नीलकण्ठ ममोत्कण्ठा वनेऽस्मिन्वनिता त्वया ।
दीर्घापाङ्गा सितापाङ्गं दृष्टा दृष्टिक्षमा भवेत् ॥ २१ ॥

(विलोक्य) कथमदत्त्वैव प्रतिवचनं नर्तितुं प्रवृत्तः ? किं नु खलु हर्षकारणमस्य ? (विचिन्त्य) आं ज्ञातम्—

मृदुपवनविभिन्नो मत्प्रियाया विनाशात्
घनरुचिरकलापो निःसपत्नोऽस्य जातः ।
रतिविगलितबन्धे केशपाशे सुकेश्याः
सति कुसुमसनाथे कं हरेदेष बर्हीं ॥ २२ ॥

भवतु, परव्यसननिर्वृतं न खलु एनं पृच्छामि। (परिक्रम्यावलोक्य च) अये, इयमातपान्तसन्धुक्षितमदा जम्बूविटपमध्यास्ते परभृता विहङ्गमेषु पण्डिता जातिरेषा। यावदेनामभ्यर्थये।

दुःखित, अपनी प्रियतमा को देखने के लिए उत्कंठित, अपने शत्रुओं को पराजित करने वाला गजराज बडे वेग से चला आ रहा है॥ १९ ॥

(हाथ जोड़कर)

अरे मोर! मैं तुझसे प्रार्थना करता हूँ कि तूने यदि मेरी खोई हुई प्रिया को घूमते-फिरते कहीं देखा हो तो मुझे बतला दो। उसका मुख चन्द्रमा के समान है और उसकी चाल हंस के सदृश है। बस, इन लक्षणों से तुम उसे पहचान लोगे॥ २० ॥

उजले नेत्रकोणों वाले मोर! तूने इस वन में मेरी प्रियतमा को देखा? उसकी बडी-बडी आँखें हैं तथा जो देखने योग्य है, उसे देखने के लिए मैं व्याकुल हूँ॥ २१ ॥

(देखकर) अरे! यह उत्तर दिये बिना ही नाचने लग गया? इसकी प्रसन्नता का क्या कारण होगा? **(सोचकर)** हाँ, समझ गया—

मेरी प्रिया के खो जाने से मन्द-मन्द पवन से छितराये बादलों के समान इसके सुन्दर पंखों को लज्जित कराने वाला आज कोई विपक्षी नहीं रह गया। कामक्रीडा के अवसर पर खुले हुए तथा फूलों से गूँथे हुए केशों की तुलना में इस मोर की शोभा को पूछता ही कौन? ॥ २२ ॥

अच्छा, दूसरों के कष्ट पर ध्यान न देने वाले इस मोर से अब मैं कुछ नहीं पूछता। **(घूमकर और देखकर)** अरे! गर्मी के बीत जाने से मतवाली कोयल जामुन की शाखा पर बैठी हुई है। पक्षियों में कोयल सबसे चतुर होती है। जब तक मैं इसी से पूछ लूँ।

(नेपथ्ये)

विज्झज्झरकाणणलीणओ दुक्खविणिग्गअबाहुप्पीडओ ।
दूरो सारिअ हिअ आणंदओ अंबरमाणेण भमइ गइंदओ ॥ २३ ॥

[विद्याधरकाननलीनो दुःखविनिर्गतबाष्पोत्पीडः ।
दूरोत्सारितहृदयानन्दोऽम्बरमानेन भ्रमति गजेन्द्रः ॥]

(इति नर्तित्वा वलन्तिकयोपसृत्य जानुभ्यां च स्थित्वा) हेले हेले !

परहुअ महुरपलाविणि कंती णंदणबण सच्छंद भमंती ।
जइ पइं पिअअम सा महु दिट्ठी ता आअक्खहि महु परपुट्टी ॥ २४ ॥

[परभृते ! मधुरप्रलापिनि कान्ते नन्दनवने स्वच्छन्दं भ्रमन्ती ।
यदि त्वया प्रियतमा सा मम दृष्टा तर्ह्याचक्ष्व मे परपुष्टे ! ॥]

भवति !

त्वां कामिनो मदनदूतिमुदाहरन्ति मानावभङ्गनिपुणं त्वममोघमस्त्रम् ।
तामानय प्रियतमां मम वा समीपं मां वा नयाशु कलभाषिणि यत्र कान्ता ॥ २५ ॥

किमाह भवती ? कथं त्वामेवमनुरक्तं विहाय गता इति । (अग्रतोऽवलोक्य) शृणोतु भवती ।

कुपिता न तु कोपकारणं सकृदप्यात्मगतं स्मराम्यहम् ।
प्रभुता रमणेषु योषितां नहि भावस्खलितान्यपेक्षते ॥ २६ ॥

(ससम्भ्रममुपविश्य अनन्तरं जानुभ्यां स्थित्वा कुपिता इति पुनः पठित्वा उत्थाय विलोक्य च) कथं कथाविच्छेदकारिणी स्वकार्य एव व्यासक्ता ?

(नेपथ्य में)

विद्याधरों के वन में छिपा हुआ, दुःख से आँसू बहाता हुआ और हृदय के सम्पूर्ण आनन्द को खोकर यह बादल के समान गजराज इधर-उधर घूम रहा है ॥ २३ ॥

(वलन्तिका राग के साथ नाचता हुआ आगे बढकर घुटने टेककर) अरे ! अरे !

मधुर कुहकने वाली सुन्दर कोयल ! यदि इस नन्दनवन में स्वतन्त्रतारूप से घूमती हुई तुमने कहीं मेरी प्रिया देखी हो तो मुझे बता दे ॥ २४ ॥

अरी कोयल ! कामी पुरुष तुम्हें कामदेव की दूती कहते हैं, मानिनियों के मान भंग करने के लिए तुम अमोघ अस्त्रसमझी जाती हो। हे मधुर भाषण करने वाली ! या तो उसे मेरे पास ले आओ अथवा मुझे शीघ्र उसके पास ले चलो ॥ २५ ॥

क्या कहा आपने ? इतना प्यार करने पर भी आपको छोड़कर वह कैसे चली गई ? **(आगे की ओर देखकर)** आप सुनिए—

वह कुपित तो हो गयी किन्तु मुझे उसके कुपित होने का थोडा-सा भी कारण याद नहीं आ रहा है। स्त्रियाँ तो वैसे ही अपने पतियों पर धाक जमाए रखती हैं। वे पति के अपराधों को नहीं देखा करतीं ॥ २६ ॥

(एकाएक बैठकर फिर घुटने टेककर 'कुपिता' इत्यादि पद्य को फिर पढकर, फिर उठकर तथा देखकर) कैसे यह मेरी बात पूरी होने से पहले ही अपने कार्य में लग गयी ?

अथवा—

महदपि परदुःखं शीतलं सम्यगाहुः प्रणयमगणयित्वा यन्ममापह्नुतस्य ।
अधरमिव मदान्धा पातुमेषा प्रवृत्ता फलमभिमुखपाकं राजजम्बूद्रुमस्य ॥ २७॥

एवंगतेऽपि प्रियेव मे मञ्जुस्वनेति न मे कोपोऽस्याम्। सुखमास्तां भवती। इतो वयं साधयामस्तावत्। (परिक्रम्य कर्णे दत्वा) अये! दक्षिणेन वनधारां प्रियाचरणनिक्षेपशंसी नूपुररवः श्रूयते, यावदेनमनुगच्छामि। (परिक्रम्य)

(नेपथ्ये)

प्पिअअमविरहकिलामिअवअणओ अविरलवाहजलाउलणअणओ ।
दूसहदुक्खविसंठुलगमणओ पसरिअउरुतावदिविअअंगओ ।
अहिअं दुम्मिअमाणसओ काणणं भमइ गइंदओ ॥ २८॥

[प्रियतमाविरहक्लान्तवदनोऽविरलवाष्पजलाकुलनयनः ।
दुःसहं दुःखविसंष्ठुलगमनः प्रसृतगुरुतापदीप्ताङ्गः ।
अधिकं दूनमानसः कानने भ्रमति गजेन्द्रः ॥]

(अनन्तरे द्विपदिकया दिशोऽवलोक्य)

(नेपथ्ये)

प्पिअकरिणीविच्छोइअओ गुरुसोआणलदीविअओ ।
वाहजलाउललोअणओ करिवरु भमइ समाउलओ ॥ २९॥

[प्रियकरिणीवियुक्तो गुरुशोकानलदीप्तः ।
वाष्पजलाकुललोचनः करिवरो भ्रमति समाकुलः ॥]

अथवा—दूसरे का दुःख भले ही कितना भी अधिक क्यों न हो, उसे लोग कम ही समझते हैं। इसलिए विपत्ति के मारे मेरी बात को यह कोयल भी अनसुनी करके उस प्रकार आँखें मूँदकर फरैना (जामुन) के रस को पीने लगी है, जैसे मदान्ध पुरुष अपनी प्यारी के अधरामृत का पान कर रहा हो॥ २७॥

इतना सब कुछ होने पर भी मेरी प्रिया के समान मधुर स्वर में गाती है, मैं इस पर कुपित नहीं हूँ। तुम सुख से बैठी रहो; हम यहाँ से चले जाते हैं। (घूमकर कान लगाकर) अरे! इस वन के दक्षिण की ओर से प्रिया के पैरों को रखने की सूचना देता हुआ पायल की-सी धुन सुनायी दे रही है। इस धुन की ओर चलकर देखूँ। (घूमता है)

(नेपथ्य में)

प्रिया के विरह से मलिन मुखवाला, नयनों से आँसूओं की धारा बहाता हुआ, असह्य दुःख के कारण लडखडाती गति वाला, शोक रूपी अग्नि से जिसके शरीरावयव सन्तप्त हुए हैं और जिसका मन अधिक दुःखित है, ऐसा गजराज वन में घूम रहा है॥ २८॥

(इसके बाद द्विपदिका गीति को गाने के साथ चारों ओर देखकर)

(नेपथ्य में)

अपनी प्यारी हथिनी के विरहाग्नि में जलता हुआ और रोता हुआ यह गजराज व्याकुल होकर घूम रहा है॥ २९॥

(सकरुणम्) हा-धिक् कष्टम्।

मेघश्यामा दिशो दृष्ट्वा मानसोत्सुकचेतसाम्।
कूजितं राजहंसानां नेदं नूपुरशिञ्जितम् ॥ ३० ॥

भवतु, यावदेते मानसोत्सुकाः पतत्रिणः सरसोऽस्मान्नोत्पतन्ति तावदेतेभ्यः प्रियाप्रवृत्तिरवगमयितव्या। (उपसृत्य) भो! भो! जलविहङ्गमराज!

पश्चात्सरः प्रतिगमिष्यसि मानसं तत् पाथेयमुत्सृज बिसं ग्रहणाय भूयः।
मां तावदुद्धर शुचो दयिताप्रवृत्त्या स्वार्थात्सतां गुरुतरा प्रणयिक्रियैव ॥ ३१ ॥

अये! तथोन्मुखो विलोकयति यथा मानसोत्सुकेन मया न लक्षितेत्येवं वचनमाह।

रे रे हंस किं गोइज्जइ गइअणुसारें मइं लक्खिज्जइ।
कइं पइं सिक्खिउ ए गइ लालस सा पइं दिट्ठी जहणभरालस ॥ ३२ ॥

[रे! रे! हंस! किं गोप्यते गत्यनुसारेण मया लक्ष्यते।
केन तव शिक्षिता एषा गतिर्लीलसा सा त्वया दृष्टा जघनभरालसा ॥]

यदि हंस गता न ते नतभ्रूः सरसो रोधसि दर्शनं प्रिया मे।
मदखेलपदं कथं नु तस्याः सकलं चोरगतं त्वया गृहीतम् ॥ ३३ ॥

अतश्च (इति अञ्जलिं बद्ध्वा)—

हंस प्रयच्छ मे कान्तां गतिरस्यास्त्वया हृता।
विभावितैकदेशेन देयं यदभियुज्यते ॥ ३४ ॥

(**दुःख के साथ**) हाय, धिक्कार है, बडे दुःख की बात है।

काले बादलों की अँधियारी छटा को देखकर मानसरोवर जाने के लिए उत्सुक मन वाले राजहंसों की यह कूक है, जिसे मैं पायलों की झनकार समझ रहा था ॥ ३० ॥

अच्छा, जब तक ये मानसरोवर जाने के लिए उत्सुक हँस उडते नहीं तब तक मैं इनसे अपनी प्यारी का पता पूछ लेता हूँ। (**समीप जाकर**) अरे! अरे! जलपक्षिराज!

तुम मानसरोवर बाद में जाना और जो यह रास्ते के चबैना के लिए तुमने कमलनाल तोड़ ली है, इसे भी फ़िर ले लेना। उससे पहले तुम मुझे मेरी प्रिया का समाचार देकर मेरा उद्धार करो, क्योंकि सत्पुरुष अपने मित्रों को सहायता देना अपने स्वार्थ से बढकर समझते हैं ॥ ३१ ॥

अरे! यह हंस तो ऊपर की ओर मुख करके वैसे देख रहा है, जैसे कह रहा हो कि मैंने मानसरोवर जाने की उत्सुकता से कुछ भी नहीं देखा।

अरे हंस! तुम छिपा क्या रहे हो? तुम्हारी चाल से ही मैं सब कुछ समझ गया। तुम बतलाओ कि यह चाल तुमने किससे सीखी? नितम्बों के भार से धीरे-धीरे चलने वाली उस मेरी प्यारी को तुमने अवश्य देखा है ॥ ३२ ॥

यदि तूने उस बाँकी चितवन वाली मेरी प्रिया को इस सरोवर के तट पर नहीं देखा, तो बता रे चोर! उसकी मद से इठलाती हुई मनोहर चाल को तूने कहाँ से सीखा? ॥ ३३ ॥

इसलिए (**हाथ जोड़कर**)

अरे हंस! मेरी प्यारी की जिस चाल को तूने चुराया है, उसे मुझे लौटा दे, क्योंकि यदि चोर के पास से चोरी का कुछ भी माल मिल जाय तो उसे पूरा माल देना पड़ता है ॥ ३४ ॥

(विहस्य) एष चौरानुशासी राजेति भयादुत्पतितः। यावदन्यमवकाशमवगाहिष्ये। (परिक्रम्यावलोक्य च) अयमिदानीं प्रियासहायश्चक्रवाकः। तावदेनं पृच्छामि।

(नेपथ्ये)

मंमररणिअमणोहरए कुसुमिअतरुवरपल्लवए ।
दइआविरहुम्माइअओ काणण भमइ गइंदओ ॥ ३५ ॥

[मर्मररणितमनोहरे कुसुमिततरुवरपल्लवे ।
दयिताविरहोन्मादितः कानने भ्रमति गजेन्द्रः ॥]

गोरोअणाकुंकुमवण्णा चक्का भणइ मइं ।
महुवासरकीलंती धणिआ ण दिट्ठी पइं ॥ ३६ ॥

[गोरोचनाकुङ्कुमवर्ण चक्र भण माम् ।
मधुवासरे क्रीडन्ती धन्या न दृष्टा त्वया ॥]

रथाङ्गनामन् वियुतो रथाङ्गश्रोणिबिम्बया ।
अयं त्वां पृच्छति रथी मनोरथशतैर्वृतः ॥ ३७ ॥

कथं कः क इत्याह माम् ? मा तावत्। न खलु विदितोऽहमस्य ?

सूर्याचन्द्रमसौ यस्य मातामहपितामहौ ।
स्वयं वृतः पतिर्द्वाभ्यामुर्वश्या च भुवा च यः ॥ ३८ ॥

कथं तूष्णीं स्थितः ? भवतु, उपालभे तावदेनम्।

सरसि नलिनीपत्रेणापि त्वमावृतविग्रहां
ननु सहचरीं दूरे मत्वा विरौषि समुत्सुकः ।

(हँसकर) इसने समझ लिया है कि मैं चोरों को दण्डित करने वाला राजा हूँ। बस, इसी डर से यह उड गया। जब तक और किसी स्थान पर ढूँढता हूँ। (घूमकर और देखकर) यहाँ यह अपनी प्यारी के साथ चकवा बैठा है, जरा इससे भी पूछ लेता हूँ।

(नेपथ्य में)

सूखे पत्तों की मनोहर खडखडाहट से भरे, फूलों से लदे हुए वृक्षों के पल्लवों वाले इस वन में प्रिया के विरह से पागल हुआ यह गजराज इधर-उधर घूम रहा है ॥ ३५ ॥

गोरोचन तथा कुंकम के वर्ण वाले अरे चकवे! मुझे बतला, कहीं तूने वसन्त के दिनों में खेलती हुई उस धन्य भाग्यवाली मेरी प्रिया को तो नहीं देखा ॥ ३६ ॥

अरे चकवे! पहिए के सदृश बड़े-बडे नितम्बों वाली अपनी प्रिया से बिछुड़ा हुआ और मन में सैकडों मनोरथों को सँजोया हुआ मैं महारथी तुझसे पूछ रहा हूँ ॥ ३७ ॥

कैसे यह मुझसे कौन है, कौन है, पूछ रहा है ? बस रहने दो। क्या यह मुझे जानता नहीं है ?

सूर्य और चन्द्रमा जिसके नाना और दादा हैं और जिन्हें उर्वशी और धरणी ने स्वयं अपना स्वामी बना लिया है, मैं वही पुरूरवा हूँ ॥ ३८ ॥

कैसे चुप हो गया ? अच्छा, मैं इसे उलाहना देता हूँ।

जब तालाब में तेरी प्यारी चकवी कमल के पत्ते के ओट में छिप जाती है, तब तू उसे दूर गई हुई समझकर घबराकर चिल्लाने लगता है। अपनी प्यारी से तो तू इतना प्रेम करता है कि थोड़ा

इति च भवतो जाया स्नेहात्पृथक्स्थितिभीरुता
मयि च विधुरे भावः कान्ताप्रवृत्तिपराङ्मुखः ॥ ३९ ॥

सर्वथा मदीयानां भागधेयानां विपर्ययेण प्रभावप्रकाशः। यावदन्यमवकाशमवगाहिष्ये। (पदान्तरे स्थित्वा) भवतु, न तावद्गच्छामि। (परिक्रम्यावलोक्य च)

इदं रुणद्धि मां पद्ममन्तःकूजितषट्पदम् ।
मया दष्टाधरं तस्याः ससीत्कारमिवाननम् ॥ ४० ॥

भवतु, इतो गतस्य मेऽनुशयो मा भूदित्यस्मिन्नपि कमलसेविनि मधुकरे प्रणयित्वं करिष्ये।

(नेपथ्ये)

एक्कक्कमवड्ढिअगुरुअरपेम्मरसें ।
सरे हंसजुआणओ कीलइ कामरसें ॥ ४१ ॥

[एकक्रमवर्धितगुरुतरप्रेमरसेन ।
सरसि हंसयुवा क्रीडति कामरसेन ॥]

मधुकर! मदिराक्ष्याः शंस तस्याः प्रवृत्तिं

(विभाव्य)

वरतनुरथवासौ नैव दृष्टा त्वया मे ।
यदि सुरभिमवाप्स्यस्तन्मुखोच्छ्वासगन्धं
तव रतिरभविष्यत्पुण्डरीके किमस्मिन् ॥ ४२ ॥

साधयामस्तावत्। (इति परिक्रम्यावलोक्य च) अये! एष नीपस्कन्धनिषण्णहस्तः करिणीसहायो नागराजस्तिष्ठति। अस्मात्प्रियोदन्तमुपलप्स्ये। यावदेनमुपसर्पामि।

बिछोह भी तुझसे सहा नहीं जाता और फिर भी देख अपनी प्रिया से बिछुड़े हुए मुझसे तू बातें तक नहीं करना चाह रहा है॥ ३९॥

मेरा भाग्य ही ऐसा है कि सब भाँति मुझे विपरीत ही फल मिलता जा रहा है। कहीं और स्थान पर जाकर उसे ढूँढता हूँ। **(कुछ कदम चलकर रुककर)** अच्छा, मैं अभी कहीं नहीं जाता। **(घूमकर और देखकर)**

यह भौंरें की गुंजार से भरा हुआ कमल मुझे बलपूर्वक रोक रहा है, क्योंकि यह उर्वशी के उस मुख के सदृश दिखलायी दे रहा है, जो होंठ पर मेरे द्वारा दन्तक्षत करने पर सी-सी कर रहा हो॥ ४०॥

अच्छा, कमल के ऊपर मँडराते हुए भौंरें से ही पूछकर देखूँ, जिससे यहाँ से चले जाने पर मुझे यह तो पछतावा न रह जाय कि मैंने उससे कुछ नहीं पूछा।

(नेपथ्य में)

तालाब में एक ऐसा हंस प्रेम के मद में भरा हुआ खेल रहा है, जिसके मन में अचानक प्रेम का भाव उदित हुआ है॥ ४१॥

अरे भौंरें! उस मदभरे नेत्रों वाली मेरी प्रिया का समाचार सुनाओ। **(सोचकर)** हो सकता है उस सुन्दरी को तुमने देखा ही न हो। यदि तुम्हें मेरी प्रिया के मुख की सुवास भरी साँस मिल गयी होती तो तुम इस कमल के साथ थोड़ा भी प्यार न करते॥ ४२॥

अब हम चलें यहाँ से। **(घूमकर तथा देखकर)** अरे! इस धूलिकदम्ब की डाल पर अपनी सूँड को टिकाये हुए हथिनी के साथ यह गजराज खडा हुआ है, जरा इसके पास जाऊँ।

(नेपथ्ये)

करिणीविरहसंताविअओ । काणणे गंधुद्धुअं महुअरु ॥४३॥

[करिणीविरहसन्तापितः । कानने गन्धोद्धतमधुकरः ॥]

(विलोक्य) अथवा न त्वरा कार्या। न तावदयमुपसर्पणकालः।

अयमचिरोद्गतपल्लवमुपनीतं प्रियकरेणुहस्तेन ।
अभिलषतु तावदासवसुरभिरसं शल्लकीभङ्गम् ॥४४॥

(क्षणमात्रं स्थित्वा अवलोक्य) हन्त, कृताह्निकः संवृत्तः। भवतु, समीपमस्य गत्वा पृच्छामि।

हउं पुच्छिमि आअक्खहि गअवरु ललिअपहारें णासिअतरुवरु ।
दूरविणिज्जिअ ससहरुकंती दिट्ठी पिअ पइं सम्मुह जंती ॥४५॥

*[अहं पृच्छामि आचक्ष्व गजवर! ललितप्रहारेण नाशिततरुवर ।
दूरविनिर्जितशशधरकान्तिर्दृष्टा प्रिया त्वया सम्मुखं यान्ती ॥]

(पदद्वयं पुरतः उपसृत्य)

मदकलयुवतिशशिकला गजयूथप! यूथिकाशबलकेशी ।
स्थिरयौवना स्थिता ते दूरालोके सुखालोका ॥४६॥

(आकर्ण्य सहर्षम्) अहह!! अनेन भवतः स्निग्धमन्द्रेण गर्जितेन प्रियोपलम्भशंसिना समाश्वासितोऽस्मि। साधर्म्याच्च त्वयि मे भूयसी प्रीतिः।

(नेपथ्य में)

हथिनी के वियोग से सन्तप्त यह हाथी वन में घूम रहा है, जिस पर मदगन्ध से मतवाले भौंरें मँडरा रहे हैं॥ ४३॥

(देखकर) अथवा शीघ्रता नहीं करनी चाहिए। अभी उसके पास जाना उचित नहीं लगता, क्योंकि—

अभी-अभी हथिनी ने अपनी सूँड से यह पत्तों वाली तथा आसव के समान मदगन्ध युक्त जो शल्लकी की डाल पकडकर तोडी है, उसे यह हाथी पसन्द कर ले, तब मैं इससे पूछूँगा॥ ४४॥

(थोड़ी देर रुककर देखकर) अब तो इसने दिन का कार्य (भोजन) कर लिया। अच्छा, अब इसके पास जाकर पूछता हूँ।

हलके प्रहार से बडे-बडे पेडों को उखाड़ फेंकने वाले गजराज! मैं तुम से पूछता हूँ, तुम बतलाओ, क्या तुमने मेरी उस प्रिया को सामने से जाते देखा, जो अपनी कान्ति से चन्द्रमा की चाँदनी को भी लजा देती है? ॥४५॥

(दो पग आगे जाकर)

अरे मतवाले गजराज! क्या तूने दूर तक देखने वाली अपनी आँखों से उस सदा युवती रहने वाली उर्वशी को कहीं देखा है, जो युवतियों में सदा चन्द्रमा की किरण के समान चमकती है और जिसके केशपाश में जूही के फूल गुँथे रहते हैं॥ ४६॥

(सुनकर प्रसन्नता के साथ) आहा! तुम्हारी इस कोमल, मन्द तथा मेरी प्रिया के स्थान को बतलाने वाली चिंग्घाड़ से मुझे आश्वासन मिला है। तुझमे और मुझमें अनेक गुणों की समानता है, इसलिए भी तुमसे मेरा अत्यधिक प्रेम है। देखो—

मामाहुः पृथिवीभृतामधिपतिं नागाधिराजो भवान्
अव्युच्छिन्नपृथुप्रवृत्ति भवतो दानं ममाप्यर्थिषु ।
स्त्रीरत्नेषु ममोर्वशी प्रियतमा यूथे तवेयं वशा
सर्वं मामनु ते प्रियाविरहजां त्वं तु व्यथां मानुभूः ॥ ४७ ॥

सुखमास्तां भवान्। साधयामस्तावत्। (परिक्रम्य पार्श्वतो दृष्टिं दत्त्वा) अये ! अयमसौ सुरभिकन्दरो नाम विशेषरमणीयः सानुमानालोक्यते। प्रियश्चायमप्सरसाम्। अपि नाम सा सुतनुरस्योपत्यकायामुपलभ्येत। (परिक्रम्यावलोक्य च) कथमन्धकारः ? भवतु, विद्युत्प्रकाशेनावलोकयामि। हन्त! मदीयैर्दुरितपरिणामैर्मेघोऽपि शतह्रदा शून्यः संवृत्तस्तथापि शिलोच्चयमेनमपृष्ट्वा न निवर्तिष्ये।

प्पसरिअखरखुरदारिअमेइणि वणगहणे अविचल्लु ।
परिसप्पइ पेच्चह अइ लीणो णिअकज्जुज्जुअ कोलु ॥ ४८ ॥
[प्रसृतखरदारितमेदिनिर्वनगहनेऽविचलः ।
परिसर्पति पश्यत लीनो निजकार्योद्युक्तः कोलः ॥]

अपि वनान्तरमल्पकुचान्तरा श्रयति पर्वतपर्वसु सन्नता ।
इदमनङ्गपरिग्रहमङ्गना पृथुनितम्बनितम्बवती तव ॥ ४९ ॥

कथं तूष्णीमेवास्ते ? शङ्के विप्रकर्षान्न शृणोतीति। भवतु, समीपेऽस्य गत्वा पुनरेनं पृच्छामि।

फलिहसिलाअलणिम्मलणिज्झरु बहुविहकुसुमें विरइअसेहरु ।
किंणरमहुरुग्गीअमणोहरु देक्खावहि महु पिअअम महिहरु ॥ ५० ॥
[स्फटिकशिलातलनिर्मलनिर्झर! बहुविधकुसुमैर्विरचितशेखर ।
किन्नरमधुरोद्गीतमनोहर दर्शय मम प्रियतमां महीधर ॥]

मुझे लोग राजाओं का स्वामी कहते हैं और तुम्हें हाथियों का स्वामी। तुम भी दिन-रात अपना दान (मद) बहाया करते हो और मेरे यहाँ भी दिन-रात याचकों को दान दिया जाता है। स्त्रियों में रत्न के समान जैसे उर्वशी मेरी प्रियतमा है, वैसे ही यह हथिनी तुम्हारी प्यारी है। इस प्रकार हम दोनों सभी प्रकार से समान है, किन्तु तुम को मेरे समान प्रियाविरह का दुःख कभी न हो ॥ ४७ ॥

तुम सुखी रहो। हम जा रहे हैं। **(घूमकर एक ओर देखकर)** अरे! यह सुरभिकन्दर नाम का बड़ा रमणीय पर्वत दिखलायी दे रहा है तथा यह पर्वत अप्सराओं को अत्यन्त प्रिय लगता है। हो सकता है, वह कृशोदरी इस पर्वत की तलहटी में ही मिल जाय ? **(घूमकर और देखकर)** यहाँ कितना अँधेरा है ? अच्छा बिजली के प्रकाश से देखता हूँ। हाय! मेरे पापों के परिणाम से मेघ भी बिजली से रहित हो गया है, फिर भी इस पर्वत से पूछे बिना मैं यहाँ से हटूँगा नहीं।

अपने फैले पैने खुरों से भूतल को रौंदता हुआ और अपनी टेक पर अड़ा हुआ एक जंगली सूअर अपनी धुन में मस्त होकर देखो घूम रहा है ॥ ४८ ॥

अरे पर्वत! अपने इस कामदेव के वन में तुमने सुन्दर नितम्बों वाली तथा पोर-पोर पर झुकी हुई उस सुन्दरी को क्या कभी देखा, जिसके दोनों स्तनों के बीच में थोडा-सा ही अन्तर है ? ॥ ४९ ॥

अरे! यह चुप क्यों हो गया है ? हो सकता है, दूर होने से न सुनता हो। अच्छा, इसके पास जाकर इससे पूछता हूँ।

स्फटिक की चट्टानों पर बहते हुए उजले झरनों वाले! रंग-बिरंगे फूलों से अपना मुकुट बनाने वाले! किन्नरों के मधुर गीतों से सुन्दर लगने वाले हे पर्वतराज! मेरी प्रिया को मुझे दिखला दो ॥ ५० ॥

(इति परिक्रम्य अञ्जलिं बद्ध्वा)

सर्वक्षितिभृतां नाथ दृष्टा सर्वाङ्गसुन्दरी ।
रम्भा रम्ये वनान्तेऽस्मिन्मया विरहिता त्वया ॥५१॥

(नेपथ्ये तदेवाकर्ण्य सहर्षम्) कथं यथाक्रमं दृष्टा इत्याह ? भवानपि अतःप्रियतरं शृणोतु। क्व तर्हि मे प्रियतमा ? (पुनरेव 'सर्वक्षितिभृतां नाथ' इति पठति। नेपथ्ये तदेव आकर्ण्य विभाव्य च) हा धिक्। ममैवायं कन्दरमुखविसर्पी प्रतिशब्दः। (इति मूर्च्छति। उत्थाय सविषादम्) अहह !! श्रान्तोऽस्मि। अस्यास्तावद्गिरिनद्यास्तीरे स्थितस्तरङ्गवातमासेविष्ये। (परिक्रम्यावलोक्य च) इमां नवाम्बुकलुषामपि स्रोतोवहां पश्यतो मे रमते मनः। कुतः—

तटभ्रूभङ्ग क्षुभितविहगश्रेणिरशना
विवर्तन्ती फेनं वसनमिव संरम्भशिथिलम् ।
भृशं विद्धं याति स्खलितमभिसन्धाय बहुशो
नदीभावेनेयं ध्रुवमसहना सा परिणता ॥५२॥

भवतु, प्रसादयामि तावदेनाम्। (अञ्जलिं बद्ध्वा)

प्पसीअ पिअअम सुंदरि एणए खुहिआकरुणविहंगमए णए ।
सुरसरितीरसमूसुअ एणए अलिउलझंकारिअए णए ॥५३॥

[प्रसीद प्रियतमे सुन्दरि नदि क्षुभिताकरुणविहङ्गमे नदि ।
सुरसरितीरसमुत्सुके नदि अलिकुलझङ्कारिते नदि ॥]

(नेपथ्ये)

(इस प्रकार घूमकर हाथ जोड़कर)

सभी पर्वतों के स्वामी! क्या तुमने इस वन के छोर में मुझ से बिछुड़ी हुई उस अनुपम सुन्दरी उर्वशी को कहीं देखा ?॥५१॥

(नेपथ्य में उसी शब्दों को सुनकर प्रसन्नता के साथ) कैसे क्रमशः 'देखा' ऐसा कहा। आप भी इससे प्रिय बात को सुनो। तब वह मेरी प्रियतमा कहाँ हैं? **(फिर 'सर्वक्षितिभृतां नाथ' इत्यादि पद्य को पढता है। नेपथ्य मे उसी को सुनकर और समझकर)** हाय धिक्कार है, यह तो गुफा के मुख द्वारा फैलने वाला मेरा ही शब्द था। **(इस प्रकार वह मूर्च्छित हो जाता है। उठकर दुःख के साथ)** अरे! अब तो मैं थक गया हूँ। अतः इस झरने के तट पर तरंगों की शीतल बयार का सेवन करता हूँ । **(घूमकर और देखकर)** अभी-अभी बरसने के कारण गँदली नदी को देखकर मेरा मन प्रसन्न हो रहा है। क्योंकि—

मार्ग में आने वाली चट्टानों से बचने के लिए यह टेढा होकर बह रहा है। इसकी लहरें कुपित हुई भौंहों के समान हो रही हैं। व्याकुल हुई पक्षियों की पंक्तियाँ ही इसकी तगडी है, इसका झाग ही वस्त्र है, जो चलते ढीला पड़ गया है, जिसे वह खींचती हुई चली जा रही है। इन सभी भावों से मुझे ऐसा लग रहा कि मेरी बातों को न सह सकने वाली प्रिया ही नदी बन गयी है॥५२॥

अच्छा, मैं चलकर इसे मनाता हूँ। **(हाथ जोड़कर)**

उड़ते हुए तथा कर्कशस्वरों में चहचहाते हुए पक्षियों वाली, गंगा से मिलने की उत्सुकता वाली और भौंरों की कतारों से गूँजने वाली अरी सुन्दर नदी! तुम मुझ पर प्रसन्न हो जाओ॥५३॥

(नेपथ्य में)

पुव्वदिसापवणाहअकल्लोलुग्गअबाहओ
मेहअंगे णच्चइ सललिअं जलणिहिणाहओ ।
हंसविहंगमकुंकुम संखकआभरणु
करिमअराउलकसणकमलकुआवरणु ।
वेलासलिलुव्वेल्लिअहत्थदिण्णतालु
ओत्थरइ दसदिस रुंधेविणु णवमेहआलु ॥५४॥

[पूर्वदिक्पवनाहतकल्लोलोद्गतबाहुर्मेघाङ्गैर्नृत्यति सललितं जलनिधिनाथः ।
हंसविहङ्गमकुङ्कुमशङ्खकृताभरणः करिमकराकुलकृष्णकमलकृतावरणः ।
वेलासलिलोद्वेल्लितदत्तहस्ततालोऽवस्तृणाति दशदिशो रुद्ध्वा नवमेघकालः ॥]

त्वयि निबद्धरतेः प्रियवादिनः प्रणयभङ्गपराङ्मुखचेतसः ।
कमपराधलवं मम पश्यसि त्यजसि मानिनि दासजनं यतः ॥५५॥

कथं तूष्णीमेवास्ते ? (विचिन्त्य) अथवा परमार्थसरिदेवैषा। न खलूर्वशी पुरूरवसमपहाय समुद्राभिसारिणी भविष्यति। भवतु, अनिर्वेदप्राप्याणि श्रेयांसि। यावत्तमेव प्रदेशं गच्छामि यत्र मे नयनयोः सा सुनयना तिरोहिता। (परिक्रम्य विलोक्य च) इमं तावत्प्रियाप्रवृत्तये सारङ्गमासीनमभ्यर्थये।

अभिनवकुसुमस्तबकिततरुवरस्य परिसरे
मदकलकोकिलकूजितरवझङ्कारमनोहरे ।
नन्दनविपिने निजकरिणीविरहानलेन सन्तप्तो
विचरति गजाधिपतिरैरावतनामा ॥५६॥

कृष्णसारच्छविर्योऽसौ दृश्यते काननश्रिया ।
नवशष्पावलोकाय कटाक्ष इव पातितः ॥५७॥

यह देखो! जलनिधिनाथ का कितना उत्तम नृत्य हो रहा है। जल में पड़ी हुई बादलों की छाया ही उसका शरीर है। पुरवैया हवा से उठी हुई लहरें ही नृत्य के लिए उठाये गये मानों उनके हाथ हैं। हंस आदि पक्षी, कुंकुम तथा शंख उसके आभूषण हैं। हाथियों तथा मगरों के झुंड ही उनके नीलवस्त्र हैं, नीलकमल ही उनकी माला है, तीर मे टकराती हुई लहरें ही मानों ताल दे रहीं हैं और इसी बीच वर्षाऋतु ने आकर सभी दिशाओं को ढँक दिया है॥५४॥

अरी नदी! तुमसे इतना प्रेम करने वाले, सदा मधुर भाषण करने वाले, प्रेम के टूट जाने से ही जो तुमसे विपरीत मन वाला हो गया हो, उसके किस छोटे मे अपराध को देखकर तुम उसे छोड़ रही हो॥५५॥

अरे! यह चुप क्यों है? (**विचारकर**) अथवा यह वास्तव में नदी ही होगी, क्योंकि यदि यह उर्वशी होती तो पुरूरवा को छोड़कर इस समुद्र की ओर न जाती। अच्छा, बिना दुःख उठाये सुख नहीं मिलता। अब उसी स्थान पर जाता हूँ जहाँ मेरे नयनों के सामने से वह सुन्दर नयनों वाली ओझल हुई थी। (**घूमकर और देखकर**) चलूँ इस बैठे हुए हरिण से अपनी प्रिया का पता पूछता हूँ।

नन्दन वन के नये फूलों के गुच्छों से लदे हुए तथा मदमत्त कोयल की मधुर कूक से सुहावने लगने वाले वृक्षराज के पास यह ऐरावत नामक गजराज अपनी हथिनी की विरहाग्नि की आँच से झुलसा हुआ इधर-उधर घूम रहा है॥५६॥

(विलोक्य) किं नु खलु मामवधीरयन्निवान्यतो मुखः संवृत्तः ? (दृष्ट्वा)

अस्यान्तिकमायान्ती शिशुना स्तनपायिना मृगी रुद्धा ।
तामयमनन्यदृष्टिर्भुग्नग्रीवो विलोकयति ॥५८॥

सुरसुन्दरि जहणभरालस पीणुत्तुंगघणत्थणि
थिरजोव्वण तणुसरीरि हंसगई ।
गअणुज्जलकाणणे मिअलोअणि भमंती
दिट्ठी पइं तह विरहसमुद्दंतरे उत्तारहि मइं ॥५९॥

[सुरसुन्दरी जघनभरालसा पीनोत्तुङ्घनस्तनी
स्थिरयौवना तनुशरीरा हंसगतिः ।
गगनोज्ज्वलकानने मृगलोचना भ्रमन्ती
दृष्टा त्वया तर्हि विरहसमुद्रान्तरादुत्तारय माम् ॥]

(उपसृत्य अञ्जलिं बद्ध्वा) हंहो हरिणीपते !

अपि दृष्टवानसि मम प्रियां वने कथयामि ते तदुपलक्षणं शृणु ।
पृथुलोचना सहचरी यथैव ते सुभगं तथैव खलु सापि वीक्षते ॥६०॥

कथमनादृत्य मद्वचनं कलत्राभिमुखं स्थितः ? उपपद्यते परिभवास्पदं दशाविपर्ययः । यावदितोऽहमन्यमवकाशमवगाहिष्ये । (परिक्रम्यावलोक्य च) हन्त ! दृष्टमुपलक्षणं तस्या मार्गस्य ।

रक्तकदम्बः सोऽयं प्रियया घर्मान्तशंसि यस्येदम् ।
कुसुममसमग्रकेसरविषममपि कृतं शिखाभरणम् ॥६१॥

कृष्णसार मृग के सदृश दिखलायी देने वाले इस मृग के ऊपर वनलक्ष्मी ने मानों वन की नयी हरियाली को निहारने के लिए इस पर अपनी चितवन डाली हो ॥५७॥

(देखकर) इसने तो मेरी बात को अनसुनी करके अपना मुख दूसरी ओर फेर लिया । (देखकर) इसकी ओर जो हरिणी आ रही थी और जिसे बीच ही में दूध पीने वाले मृग के छौने ने रोक लिया, उसकी ओर यह टेढी गरदन कर टुकुर-टुकुर देख रहा है ॥५८॥

नितम्बों के भार के कारण धीरे-धीरे चलने वाली और ऊँचे उठे हुए मोटे-मोटे स्तनों वाली, सदा जवान रहने वाली, कृशोदरी, हंस के समान गतिवाली उस मृगनयनी को तुमने इस आकाश के समान स्वच्छ वन में कहीं देखा हो तो मुझे इस विरहसमुद्र से उबार लो ॥५९॥

(पास जाकर हाथ जोड़कर) अरे हरिणी के स्वामी !

क्या तुमने इस वन में मेरी प्यारी को कहीं देखा है ? मैं उसके लक्षण तुमसे कहता हूँ, तुम सुनो । जैसे तुम्हारी हरिणी की बडी-बडी आँखों की चितवन है, ठीक वैसी ही उसकी भी है ॥६०॥

यह मेरी बात का अनादर करके अपनी हरिणी की ओर मुख करके क्यों बैठ गया है ? जब खोटे दिन आते हैं तब व्यक्ति सभी ओर से अपमानित होता है, यह उचित ही है । अब मैं यहाँ कहीं दूसरे स्थान पर जाकर उसे ढूँढता हूँ । (घूमकर और देखकर) अरे ! मैं तो उसके मार्ग का लक्षण पा गया ।

यह वही लाल कदम्ब का पेड है जिसके फूल बतला रहे हैं कि गर्मी बीत गयी । उसी के फूल को लेकर अपना जूडा बनाया, जिसमें अभी केसर न फूटने के कारण वह अभी तक मुरझाया

(परिक्रम्याशोकमवलोक्य च)

रक्ताशोक! कृशोदरी क्व नु गता त्यक्त्वानुरक्तं जनं

(पवनधूयमानमूर्धानमवलोक्य सक्रोधम्)

नो दृष्टेति मुधैव चालयसि किं वाताभिभूतं शिरः ।

उत्कण्ठाघटमानषट्पदघटासङ्गदृदष्टच्छद-

स्तत्पादाहतिमन्तरेण भवतः पुष्पोद्गमोऽयं कुतः ॥६२॥

भवतु, सुखमास्तां भवान्। (परिक्रम्यावलोक्य च) किं नु खलु एतच्छिलाभेदान्तरगतं नितान्तरक्तमवलोक्यते?

प्रभालेपी नायं हरिहतगजस्यामिषलवः

स्फुलिङ्गो वा नाग्नेर्गहनमभिवृष्टं यत इदम् ।

(विमाव्य)

अये! रक्ताशोकप्रसवसमरागो मणिरयं

यमुद्धर्तुं पूषा व्यवसित इवालम्बितकरः ॥६३॥

अहो, अयं हरति मे मनः। भवतु, आदास्ये तावदेनम्।

(नेपथ्ये)

प्पणइणिबद्धासाइअओ वाहाउलणिअणअणओ ।

गअवइ गहणे दुहिअओ भमइ क्खामिअवअणओ ॥६४॥

[प्रणयिनिबद्धाशाको बाष्पाकुलनिजनयनः ।

गजपतिर्गहने दुःखितः भ्रमति क्षामितवदनः ॥]

(ग्रहणं नाटयति। गृहीत्वा) अथवा—

(घूमकर और अशोक की ओर देखकर)

हे लाल अशोक! तू बता, इस प्रेमी को छोड़कर वह कहाँ चली गयी? (हवा के वेग से हिलती हुई अशोक की चोटी को देखकर क्रोध से) हवा से झूमता हुआ अपना सिर हिलाकर यह क्यों कह रहा है कि मैंने उसे नहीं देखा? यदि तूने उसे नहीं देखा तो बता, मधु के लालच में इकट्ठे हुए भौंरों द्वारा कुतरी जाने वाली पंखुड़ियों वाले तुम्हारे ये फूल उसकी लात खाये बिना कैसे उत्पन्न हुए? ॥६२॥

अच्छा, आप सुख से रहिए। (घूमकर और देखकर) यह फटी हुई पत्थर की दरार के भीतर अत्यन्त लालमणि दिखलायी दे रहा है।

यह इतना चमक रहा है कि सिंह से मारे हुए हाथी के मांस का टुकड़ा भी नहीं हो सकता। यह आग की चिनगारी भी नहीं हो सकती, क्योंकि अभी-अभी घनघोर वर्षा हुई है। (देखकर) अरे! यह तो अशोकपुष्प के समान वर्ण वाला मणि है, जिसे उठाने के लिए सूर्य ने भी अपने कर फैला रखे हैं॥६३॥

अरे! यह तो मेरे मन को लुभा रहा है। अच्छा, इसे निकाल लेता हूँ।

(नेपथ्य में)

अपनी प्रिया को पाने की आशा लगाये, आँखों में आँसू भरे तथा सूखे मुख वाला यह गजराज इस वन में दुःखी होकर घूम रहा है॥६४॥

(मणि को पकड़ने का अभिनय करता है, उसे लेकर) अथवा—

मन्दारपुष्पैरधिवासितायां यस्याः शिखायामयमर्पणीयः ।
सैव प्रिया सम्प्रति दुर्लभा मे किमेनमस्रोपहतं करोमि ॥ ६५ ॥

(इत्युत्सृजति)

(नेपथ्ये)

वत्स ! गृह्यतां गृह्यताम् ।

सङ्गमनीय इति मणिः शैलसुताचरणरागयोनिरयम् ।
आवहति धार्यमाणः सङ्गममचिरात्प्रियजनेन ॥ ६६ ॥

राजा—(कर्ण दत्त्वा) को नु खलु मामेवमनुशास्ति ? (अवलोक्य) अये ! अनुकम्पते मां कश्चिन्मृगचारी मुनिर्भगवान् । भगवन् ! अनुगृहीतोऽस्मि अहमुपदेशाद्भवतः । (मणिमादाय) हंहो सङ्गमनीय !

तया वियुक्तस्य विलग्नमध्यया भविष्यसि त्वं यदि सङ्गमाय मे ।
ततः करिष्यामि भवन्तमात्मनः शिखामणिं बालमिवेन्दुमीश्वरः ॥ ६७ ॥

(परिक्रम्यावलोक्य च) अये ! किं न खलु कुसुमरहितामपि लतामिमां पश्यतो मे मनो रमते ? अथवा स्थाने मनोरमा ममेयम् । इयं हि—

तन्वी मेघजलार्द्रपल्लवतया धौताधरेवाश्रुभिः
शून्येवाभरणैः स्वकालविरहाद्विश्रान्तपुष्पोद्गमा ।
चिन्तामौनमिवास्थिता मधुलिहां शब्दैर्विना लक्ष्यते
चण्डीमामवधूय पादपतितं जातानुतापेव सा ॥ ६८ ॥

मन्दार के फूलों मे सुगन्धित मेरी प्रिया की जिस चोटी में इसे बाँधना चाहिए था, जब वही नहीं मिल रही है तब मैं इसे लेकर अपने आँसुओं से मलिन करके ही क्या करूँ ॥ ६५ ॥

(ऐसा कहकर उसे वहीं छोड़ देता है ।)

(नेपथ्य में)

वत्स ! इसे ले लो, ले लो ।

यह प्रिय से मिलाने वाली संगमनीय मणि है । यह पार्वती के चरणों की ललाई से बनी है । जो इसे धारण करता है, उसका अपने प्रियजन से शीघ्र संगम हो जाता है ॥ ६६ ॥

राजा—(कान लगाकर) इस प्रकार यह कौन मुझे आज्ञा दे रहा है ? **(देखकर)** अरे ! कोई मृग की भाँति वन में घूमने वाले भगवान् मुनि मेरे ऊपर कृपा कर रहे हैं । भगवन् ! आपके उपदेश से मैं अनुगृहीत हूँ । **(मणि को लेकर)** अरे संगमनीय मणि !

यदि मुझे तुम उस कृशोदरी से मिला दोगे तो मै तुम्हें अपने मुकुटमणि में उस प्रकार धारण करूँगा, जैसे शिवजी ने बालचन्द्रमा को अपने शेखर में स्थान दिया है ॥ ६७ ॥

(घूमकर और देखकर) अरे ! इस फूल रहित लता को देखते हुए मेरा मन न मालूम क्यों उत्सुक हो रहा है । अथवा इसे देखकर तो मेरे मन को सुख मिलना ही चाहिए । यह तो—

बादलों के जल मे गीले कोमल पत्तों के कारण यह उस सुन्दरी के समान दिखलायी दे रही है, जिसके ओठ आँसुओं से धुल गये हों । फूलने का समय न होने के कारण फूलों से रहित यह ऐसी लग रही है मानो इसने आभूषण उतार दिये हों । इस पर भौंरें नहीं गूँज रहे हैं, अतः यह ऐसी जान पडती

यावदस्यां प्रियानुकारिण्यां परिष्वङ्गप्रणयी भवामि।

लए पेक्ख विणु हिअएं भमामि । जइ विहिजोएं पुणि तहिं पाविमि ।
ता रण्णें विणु करेमि णिभंती । पुण णइ मेल्लुइं ताह कअंती ॥ ६९ ॥

[लते प्रेक्षस्व विना हृदयेन भ्रमामि । यदि विधियोगेन पुनस्तां प्राप्नोमि ।
तदारण्येन विना करोमि निर्भ्रान्तिम् । पुनर्न प्रवेशयामि तां कृतान्ताम् ॥]

(इति उपसृत्य लतामालिङ्गति। ततः प्रविशति तत्स्थान एव उर्वशी।)

राजा—(निमीलिताक्ष एव स्पर्शं रूपयित्वा) अये! उर्वशीगात्रसंस्पर्शादिव निर्वृतं मे शरीरम्। तथापि नास्ति विश्वासः। कुतः—

समर्थये यत्प्रथमं प्रियां प्रति क्षणेन तन्मे परिवर्ततेऽन्यथा ।
अतो विनिद्रे सहसाविलोचने करोमि न स्पर्शविभावितप्रियः ॥ ७० ॥

(शनैश्चक्षूंष्युन्मील्य) कथं सत्यमेव प्रियतमा ? (इति मूर्च्छितः पतति)

उर्वशी—(वाष्पं विसृज्य) समस्ससदु समस्ससदु महाराओ। [समाश्वसितु समाश्वसितु महाराजः।]

राजा—(संज्ञां लब्ध्वा) प्रिये! अद्य जीवितम्।

त्वद्वियोगोद्भवे तन्वि मया तमसि मज्जता ।
दिष्ट्या प्रत्युपलब्धासि चेतनेव गतासुना ॥ ७१ ॥

उर्वशी—अब्भंतरकरणाए मए प्पच्चक्खीकिदवुत्तंतो क्खु महाराओ। [अभ्यन्तरकरणया मया प्रत्यक्षीकृतवृत्तान्तः खलु महाराजः।]

है मानो इसने मौन व्रत लिया हो। इस प्रकार यह ऐसी लग रही है मानो यह क्रोध की हुई उर्वशी के समान पश्चात्ताप कर रही हो ॥ ६८ ॥

प्रिया के लक्षणों का अनुकरण करने वाली इस लता को गले मे लगा लूँ।

अरी लता! मैं यहाँ विना हृदय के घूम रहा हूँ। यदि दैवयोग से कहीं उसे पा जाऊँगा तो फिर उसे इस वन से दूर ले जाऊँगा और फिर उसे कभी इस वन में आने नहीं दूँगा ॥ ६९ ॥

(इस प्रकार पास जाकर लता को आलिंगन करता है। तदनन्तर
उसके स्थान पर उर्वशी का प्रवेश)

राजा—(आँख बन्द किये ही स्पर्श का अनुभव करके) अरे! उर्वशी के शरीरस्पर्श के समान मेरा शरीर सुखी हो गया, तो भी मुझे विश्वास नहीं हो रहा है। क्योंकि—

जिस वस्तु को मैं पहले अपनी प्रिया समझ लेता हूँ, वही क्षणभर में बदल जाती है। इस लता को छूने से तो मुझे अपनी प्यारी से मिलने के समान सुख मिल रहा है, अतः अब मैं आँखें खोलूँगा ही नहीं ॥ ७० ॥

(धीरे से आँखें खोलकर) अरे! यह तो सचमुच मेरी प्रियतमा है। (मूर्च्छित होकर गिर पड़ता है)

उर्वशी—(आँसू गिराकर) महाराज! धीरज धरिए, धीरज धरिए।

राजा—(होश में आकर) प्रिया! आज मैं फिर से जी गया।

तुम्हारे विरह रूपी अन्धकार में डूबते हुए मैंने सौभाग्य ने तुम्हें उसी प्रकार पाया है, जैसे मरे हुए व्यक्ति को पुनः प्राण मिल गये हों ॥ ७१ ॥

उर्वशी—मैंने अपनी भीतरी इन्द्रियों से महाराज की सभी बातें जान ली थीं।

राजा—अभ्यन्तरकरणयेति न खलु ते वचनार्थमवैमि।

उर्वशी—कहइस्सं। इदं दाव प्पसीददु महाराओ जं मए कोववसं गदाए एदं अवत्थंतरं पाविदो महाराओ। [कथयिष्यामि। एतत्तावत्प्रसीदतु महाराजो यन्मया कोपवशं गतया एतदवस्थान्तरं प्रापितो महाराजः।]

राजा—कल्याणि! न तावदहं प्रसादयितव्यः। त्वद्दर्शनादेव प्रसन्नबाह्यान्तःकरणोऽन्तरात्मा। तत्कथय कथमियन्तं कालमवस्थिता मया विना भवती।

मोरा परहुअ हंस रहंगो अलि गअ पव्वअ सरिअ कुरंगम ।
तुज्झह कारणे रण्णा भमंते को ण हु पुच्छिअ मइं रोअंते ॥ ७२ ॥

[मयूरः परभृता हंसो रथाङ्गः अलिर्गजः पर्वतः सरित्कुरङ्गमः ।
तव कारणेनारण्ये भ्रमता को न खलु पृष्टो मया रुदता ॥]

उर्वशी—एव्वं अंतक्करणपच्चक्खीकिदुवुत्तंतो महाराओ। [एवमन्तःकरणप्रत्यक्षीकृतवृत्तान्तो महाराजः।]

राजा—प्रिये! अन्तःकरणमिति न खल्ववगच्छामि।

उर्वशी—सुणादु महाराओ। पुरा भअवदा कुमारेण सासदे कुमारवदं गेण्हिअ अकलुसो णाम गंधमादणकच्छो अज्झासिदो। किदो अ एस विही। [शृणोतु महाराजः। पुरा भगवता कुमारेण शाश्वतं कुमारव्रतं गृहीत्वाकलुषो नाम गन्धमादनकच्छोऽध्यासितः। कृतश्चैष विधिः।]

राजा—क इव ?

उर्वशी—जा किल इत्थिआ इमं पदेसं प्पविसदि सा लदाभावेण परिणमिस्सदि त्ति। किदो अ अअं सावांतो गोरीचरणराअसंभवं मणिं विणा तदो ण मुच्चिस्सदि त्ति। तदो अहं गुरुसावसंमूढहिअआ देवदासमअं विसुमरिअ अगहिदाणुणआ इत्थिआजणपरिहरणीयं कुमारवणं प्पविट्ठा। प्पवेसानंतरं एव्व अ काणणोवंतवत्तिवासंतीलदाभाएण परिणदं मे रूवम्। [या किल स्त्री इमं प्रदेशं प्रविशति सा लताभावेन परिणंस्यतीति। कृतश्चायं शापान्तः गौरीचरणरागसम्भवमणिं विना ततो न मोक्ष्यत इति।

राजा—मैं तुम्हारे भीतरी इन्द्रिय शब्द का अर्थ नहीं समझ पाया।

उर्वशी—मैं उसका अर्थ बतलाती हूँ। महाराज! आप पहले मुझे क्षमा कर दीजिये, जो मैंने क्रोधित होकर आपकी यह दशा कर डाली।

राजा—कल्याणी! तुम मुझे प्रसन्न करने का प्रयत्न मत करो। तुम्हें देखने मात्र से ही मेरी अन्तरात्मा और बाहरी इन्द्रियाँ सब प्रसन्न हो गयी हैं। तो कहो, मेरे बिना आप इतने समय तक कहाँ रहीं।

मोर, कोयल, हंस, चकवा, भौंरा, हाथी, पहाड़, नदी तथा हिरन—तुम्हारे विरह के कारण रोते-रोते वन में घूमते हुए मैंने किससे तुम्हारे बारे में नहीं पूछ डाला॥ ७२॥

उर्वशी—मैंने अपनी भीतरी इन्द्रियों से महाराज की सब बातें जान ली थीं।

राजा—प्रिये! इस तुम्हारे अन्तःकरण शब्द का अर्थ मैं नहीं समझ पाया।

उर्वशी—महाराज! सुनिए, बहुत समय पहले भगवान् कुमार ने सदा के लिए ब्रह्मचर्य व्रत लेकर इस पवित्र गन्धमादन पर्वत पर डेरा डाला और यह नियम बना दिया·····

राजा—किस प्रकार का ?

उर्वशी—जो कोई स्त्री इस प्रदेश में प्रवेश करेगी वह लता के रूप में बदल जायेगी। परन्तु इस शाप की शान्ति का उन्होंने उपाय भी बतला दिया था कि पार्वतीजी के चरणों की लालिमा से

ततोऽहं गुरुशापसम्मूढहृदया देवतासमयं विस्मृत्यागृहीतानुनया स्वैरिणीव कुमारवनं प्रविष्टा। प्रवेशानन्तरमेव च काननोपान्तवर्तिवासन्तीलतासामान्येन परिणतं मे रूपम्।]

राजा—प्रिये! सर्वमुपपन्नम्—

श्रमसेदसुप्तमपि मां शयने या मन्यसे प्रवासगतम्।
सा त्वं प्रिये! सहेथाः कथं मदीयं चिरवियोगम् ॥७३॥

इदं तावत्कथितं त्वत्परिग्रहनिमित्तं मुनेरुपलभ्य मणिप्रभावादानीतो त्वमस्मानि.। (पूर्व कर्म दर्शयति)

उर्वशी—अम्मो, संगमणीओ अअं मणी। अदो क्खु महाराएण आलिंगिदमेत्त एव्व पढमं म्हि संवुत्ता। [अहो, सङ्गमनीयोऽयं मणिः। अतः खलु महाराजेनालिङ्गितमात्रैव प्रथममस्मि संवृत्ता।] (मणिमाहात्म्यं मूर्ध्नि वहति)

राजा—एवमेव सुन्दरि! क्षणमात्रं स्थीयताम्—

स्फुरता विच्छुरितमिदं रागेण मणेर्ललाटनिहितस्य।
श्रियमुद्वहति मुखं ते बालातपरक्तकमलस्य ॥७४॥

उर्वशी—पिअंवद! महंतो क्खु कालो तुए पट्ठाणदो णिग्गदस्स। कदाइ अग्गदस्संति मं परिसंकिदो। ता एहि णिवुत्तम्ह। [प्रियंवद! महान्खलु कालस्तव प्रतिष्ठानान्निर्गतस्य। कदाचिदग्रयिष्यन्ति मद्र प्रवृत्तयः। तदेहि निवर्तावहे।]

राजा—यदाह भवती।

(इत्युत्तिष्ठतः)

उत्पन्न होने वाली मणि से इस शाप का अन्त हो जायेगा। तो उस महान् शाप से मेरी बुद्धि ऐसी मारी गयी, जिससे मैं कार्तिकेय के नियम को भूल गयी और स्त्रीजनों के न जाने योग्य उस कुमारवन में चली गयी। प्रवेश करने के बाद ही वन के समीप रहने वाली वासन्तीलता के रूप में मैं बदल गयी।

राजा—प्रिये! अब मेरी समझ में सब बात आ गयी।

जब तुम मेरे सोकर सो जाने पर भी मुझे दूर गया हुआ-सा समझ जाती थी तब तुम मुझसे भला इतने दिनों तक अलग रहकर मेरे इस चिर-वियोग को कैसे सह सकती थी? ॥७३॥

देखो, तुम अभी जिस मणि की बात कह रही थी, वह तुमसे मिलन कराने वाला मणि मैंने है, जिस मणि से प्राप्त कर मैंने तुम्हें पा लिया। (ऐसा कहकर मणि को दिखलाता है)

उर्वशी—अरे! यही संगमनीय मणि है? इसीलिए महाराज के गले लगाते ही मैं आगे आकर सामने आ गयी हूँ। (मणि को लेकर सिर पर रखती है।)

राजा—सुन्दरी! थोड़ी देर इसी प्रकार रही रहो।

सिर पर रखी हुई इस मणि से चमकता हुआ सुन्दर मुखमण्डल प्रातःकाल के सूर्य से किरणों के समान चमकते हुए कमल के समान शोभा को धारण कर रहा है ॥७४॥

उर्वशी—अरे मदनभाग्ये! आपके प्रतिष्ठान नगर से आने पर बहुत समय बीत गया। अतः कहीं वहाँ कुछ विघ्न नहीं उपस्थित करने लगे। अतः चलिए लौट चलें।

राजा—जैसा आप कहती हैं।

(ऐसा कहकर दोनों उठते हैं)

उर्वशी—अध कधं महाराओ गंतुं इच्छदि ? [अथ कथं महाराजो गन्तुमिच्छति ?]

राजा—

अचिरप्रभाविलसितैः पताकिना सुरकार्मुकाभिनवचित्रशोभिना ।
गमितेन खेलगमने-विमानतां नय मां नवेन वसतिं पयोमुचा ॥ ७५ ॥

(नेपथ्ये)

पाविअसहअरिसंगमओ पुलअपसाहिअअंगअओ ।
सेच्छोपत्तविमाणओ विहरइ हंसजुआणओ ॥ ७६ ॥

[प्राप्तसहचरीसङ्गमः पुलकप्रसाधिताङ्गः ।
स्वेच्छाप्राप्तविमानो विहरति हंसयुवा ॥]

(इति निष्क्रान्तौ)

॥ इति चतुर्थोऽङ्कः ॥

उर्वशी—महाराज ! किस प्रकार जाना चाहते हैं ?

राजा—मैं चाहता हूँ कि बिजली की झंड़ियों वाले, इन्द्रधनुष के समान नये चित्रों से शोभित मेघ रूपी विमान पर सवार होकर ही मैं अपने नगर को पहुँचूँगा ॥ ७५ ॥

(नेपथ्य में)

अपनी प्रिया के मिल जाने से पुलकित शरीर वाला यह युवक हंस अपनी इच्छा से प्राप्त विमान पर प्रिया के साथ बैठकर विहार कर रहा है ॥ ७६ ॥

(दोनों चले जाते हैं।)

॥ चौथा अंक समाप्त ॥

पञ्चमोऽङ्कः

(ततः प्रविशति हृष्टो विदूषकः)

विदूषकः—हीं हीं भो, दिट्ठिआ चिरस्स कालस्स उव्वसीसहाओ णंदणवणप्पमुहेसु देवदारण्णेसु विहरिअ पडिणिवुत्तो पिअवअस्सो। पविसिअ णअरं दाणिं ससक्कारोवआरेहिं पकिदीहिं अणुरज्जंतो रज्जं करेदि। संताणत्तणं वज्जिअ ण किंचिं से हीणं। अज्ज तिहि विसेसो त्ति भअवदीणं गंगाजउणाणं संगमे देवीहिं सह किदाहिसेओ संपदं उवआरिअं पविट्ठो। ता जाव तत्तभवदो अलंकरीअमाणस्स अणुलेवणमल्ले अग्गभागी होमि। [हीं हीं भोः, दिष्टया चिरस्य कालस्योर्वशीसहायो नन्दनवनप्रमुखेषु देवतारण्येषु विहृत्य प्रतिनिवृत्तः प्रियवयस्यः। प्रविश्य नगरमिदानीं ससत्कारोपचारैः प्रकृतिभिरनुरज्यमानो राज्यं करोति। सन्तानत्वं वर्जयित्वा न किमप्यस्य हीनम्। अद्य तिथिविशेष इति भगवत्योर्गङ्गायमुनयोः सङ्गमे देवीभिः सह कृताभिषेकः साम्प्रतमुपकार्यां प्रविष्टः। तद्यावत्तत्रभवतोऽलङ्क्रियमाणस्यानुलेप-माल्येऽग्रभागी भवामि।]

(इति परिक्रामति)

(नेपथ्ये)

हद्धी हद्धी। दुऊलुत्तरच्छदे तालवेंटाधारे णिक्खिविअ णीअमाणो मए भट्टिणो अब्भंतरविलासिणीं मोलिरअणजोग्गो मणी आमिससंकिणा गिद्धेण अक्खित्तो। [हा धिक् हा धिक्। दुकूलोत्तरच्छदे तालवृन्ताधारे निक्षिप्य नीयमानो मया भर्तुरभ्यन्तरविलासिनीमौलिरत्नयोग्यो मणिरामिषशङ्किना गृध्रेणाक्षिप्तः।]

विदूषकः—(कर्णं दत्त्वा) अच्चाहिदं अच्चाहिदं। परमवहुमदो क्खु सो वअस्सस्स संगमणीओ णाम चूणामणी। अदो क्खु असमत्तणेवच्छो एव्व तत्तभवं आसणादो उट्ठिअ इदो आअच्छदि। जाव णं उवसप्पामि। [अत्याहितमत्याहितम्। परमबहुमतः खलु स वयस्यस्य सङ्गमनीयो नाम चूडामणिः। अतः खल्वसमाप्तनेपथ्य एव अत्रभवानासनादुत्थायेत आगच्छति। यावदेनमुपसर्पामि।]

(इति निष्क्रान्तः)

॥ प्रवेशकः ॥

(तदनन्तर प्रसन्न विदूषक का प्रवेश)

विदूषक—हीं हीं अरे! यह तो बड़े सौभाग्य की बात है कि नन्दनवन आदि प्रमुख देवताओं के उपवनों में उर्वशी के साथ विहार करके बहुत दिनों के बाद मेरे प्रियमित्र लौट आये हैं। इस समय नगर में प्रवेश करके प्रजावर्ग द्वारा किये गये सत्कार से प्रसन्न होकर राज्य करने लगे हैं। अब एक सन्तान को छोड़कर इन्हें किसी बात की कमी नहीं है। आज विशेष पर्व का दिन होने के कारण वे गंगा-यमुना के संगम में देवियों के साथ स्नान करके अभी रनिवास में गये हैं। वहाँ महाराज को अलंकृत किया जा रहा होगा। इसी बीच मैं भी वहाँ जाकर चन्दन, माला आदि में अपना हिस्सा बटा लूँ।

(यह कहकर घूमता है।)

(नेपथ्य में)

हाय, हाय धिक्कार है। ताड़ की पिटारी के भीतरी रेशमी (लाल) वस्त्र में मैंने महारानी के धारण करने योग्य माथे का मणि रखा था, उसे मांस का टुकड़ा समझकर गीध झपट कर ले गया।

(ततः प्रविशति सावेगपरिजनो राजा).

राजा—वेधक ! वेधक !

आत्मनो वधमाहर्ता क्वासौ विहगतस्करः ।
येन तत्प्रथमं स्तेयं गोप्तुरेव गृहे कृतम् ॥ १ ॥

किरातः—एसो एसो क्खु मुहकोडिलग्गहेमसुत्तेण मणिणा आलिहंतो विअ आआसं पडिब्भमदि। **[एष एष खलु मुखकोटिलग्नहेमसूत्रेण मणिनालिखन्निवाकाशं परिभ्रमति।]**

राजा—पश्याम्येनम्—

असौ मुखालम्बितहेमसूत्रं बिभ्रन्मणिं मण्डलचारशीघ्रः ।
अलातचक्रप्रतिमं विहङ्गस्तद्रागलेखावलयं तनोति ॥ २ ॥

किं नु खल्वत्र कर्तव्यम् ?

विदूषकः—(उपेत्य) भो ! अलं एत्थ घिणाए। अवराही सासणीओ। **[भोः ! अलमत्र घृणया। अपराधी शासनीयः।]**

राजा—सम्यगाह भवान्। धनुर्धनुस्तावत्।

यवनी—एसा अणियस्सं। **[एषाऽनेष्यामि।]** (इति निष्क्रान्ता)

राजा—वयस्य ! न दृश्यते स विहगाधमः। क्व नु खलु गतः ?

विदूषकः—भो ! इदो दक्खिणंतेण अवगदो सो सासणीओ कुणवभोअणो। **[भोः ! इतो दक्षिणान्तेनापगतः स शासनीयः कुणपभोजनः।]**

विदूषक—(कान लगाकर) यह तो बड़ा बुरा हुआ। उस मणि का तो हमारे मित्र बड़ा सम्मान करते थे। यह तो संगमनीय नामक चूडामणि था। इसलिए महाराज वेश-रचना को पूरा किये बिना ही आसन से उठकर इसी ओर आ रहे हैं। तब तक मैं भी उनके पास जाता हूँ।

(चला जाता है)

॥ प्रवेशक ॥

(उसके बाद घबराये हुए राजा का प्रवेश)

राजा—वेधक ! वेधक ! अपने से अपनी मौत को बुलाने वाला वह चोर-पक्षी कहाँ चला गया, जिसने सबकी रक्षा करने वाले के घर में ही यह पहली चोरी की ॥ १ ॥

किरात—अरे ! वह यह है। अपनी चोंच से सोने की सिकडी को पकडे हुए यह पक्षी मणि से आकाश में मानों कुछ लिख रहा हो, इस प्रकार घूम रहा है।

राजा—इसे मैं देख रहा हूँ। मणियुक्त सोने के डोरे को पकडे हुए यह पक्षी बड़े वेग से गोल-गोल चक्कर काटता हुआ ऐसा लग रहा है मानो आग की लौ को घुमाकर उसका घेरा-सा बना रहा हो ॥ २ ॥

अब इसके लिए क्या करना चाहिए ?

विदूषक—**(पास जाकर)** अरे ! इसके प्रति दया मत कीजिए। अपराधी को दण्ड देना ही चाहिए।

राजा—तुमने ठीक कहा। अरे ! धनुष, धनुष ले आओ।

यवनी—यह लाती हूँ। **(ऐसा कहकर चली जाती है।)**

राजा—मित्र ! वह नीच पक्षी नहीं दिखलायी दे रहा है। पता नहीं वह कहाँ चला गया ?

विदूषक—अरे ! वह यहाँ से दक्षिण की ओर गया है मांस खाने वाला। उसे दण्ड देना चाहिए।

राजा—(परिवृत्यावलोक्य च) दृष्ट इदानीम्—

प्रभापल्लवितेनासौ करोति मणिना खगः ।
अशोकस्तवकेनेव दिङ्मुखस्यावतंसकम् ॥ ३ ॥

यवनी—(चापहस्ता प्रविश्य) भट्टा ! एदं हत्थावावसहिदं सरासणं । [भर्तः ! एतद्धस्तावापसहितं शरासनम् ।]

राजा—किमिदानीं शरासनेन । वाणपथमतीतः स क्रव्यभोजनः । तथाहि—

आभाति मणिविशेषो दूरमिदानीं पतत्त्रिणा नीतः ।
नक्तंमिव लोहिताङ्कः परुषघनच्छेदसंयुक्तः ॥ ४ ॥

(कञ्चुकिनं विलोक्य) आर्य लातव्य !

कञ्चुकी—आज्ञापयतु देवः ।

राजा—मद्वचनादुच्यन्तां नागरिकाः । सायं निवासवृक्षाश्रयी विचीयतां स विहगदस्युरिति ।

कञ्चुकी—यदाज्ञापयति देवः । (इति निष्क्रान्तः)

विदूषकः—भो ! उवविसदु भवं संपदं । कहिं गदो सो रअणकुंभीलओ भवदो सासणादो मुच्चिस्सदि । [भोः ! उपविशतु भवान् साम्प्रतम् । क्वं गतः स रत्नकुम्भीरको भवतः शासनान्मोक्ष्यते ।]

राजा—(विदूषकेण सहोपविश्य) वयस्य !

रत्नमिति न मे तस्मिन्गणौ प्रियत्वं विहङ्गमाक्षिप्ते ।
प्रियया तेनास्मि सखे सङ्गमनीयेन सङ्गमितः ॥ ५ ॥

विदूषकः—णं परिगदत्थो म्हि किदो भवदा । [ननु परिगतार्थोऽस्मि कृतो भवता ।]

राजा—(घूमकर और देखकर) अब फिर दिखलायी दिया ।

चमकते हुए मणि को चोंच में लेकर इधर-उधर उडता हुआ यह पक्षी ऐसा लग रहा है, मानो अशोक के फूलों के गुच्छे ने दिशा के माथे पर चूडामणि बाँध रहा हो ॥ ३ ॥

यवनी—(हाथ में धनुष लिए प्रवेश कर) स्वामी ! यह हथरखा और धनुष ।

राजा—अब धनुष से क्या होगा ? वह मांसभोजी बाण की गतिसीमा से दूर चला गया । तो भी—

उस पक्षी द्वारा वह मणि दूर ले जाये जाने पर भी ऐसा लग रहा है, मानो रूखे बादल के टुकड़े के साथ रात को मंगलतारा चमका रहा हो ॥ ४ ॥

(कञ्चुकी को देखकर) आर्य लातव्य !

कञ्चुकी—महाराज ! क्या आज्ञा है ?

राजा—मेरी आज्ञा से सभी नगरवासियों से कह दो, सायंकाल जब वह चोरपक्षी अपने आवास वृक्ष के पास पहुँचे तब इसे खोज लें ।

कञ्चुकी—महाराज की जैसी आज्ञा । (ऐसा कहकर चला जाता है ।)

विदूषक—महाराज ! अब आप बैठ जाइए । वह रत्न का चोर आपके दंड से बचकर कहाँ जायेगा ?

राजा—(विदूषक के साथ बैठकर) मित्र !

उस पक्षी ने मेरा जो रत्न चुराया है, उसे मैं रत्न के कारण नहीं अपितु मैं उसका इसलिए आदर करता हूँ कि उस संगमनीय मणि ने ही मुझे मेरी प्रिया उर्वशी से मिलाया था ॥ ५ ॥

विदूषक—आपने मुझे इस रत्न के बारे में ठीक समझा दिया ।

(ततः प्रविशति सशरं मणिमादाय कञ्चुकी)

कञ्चुकी—जयतु जयतु देवः।

अनेन निर्भिन्नतनुः स वध्यो रोषेण ते मार्गणतां गतेन ।
प्राप्तापराधोचितमन्तरिक्षात्समौलिरत्नः पतितः पतत्री ॥ ६ ॥

(सर्वे विस्मयं रूपयन्ति)

कञ्चुकी—अद्भिः प्रक्षालितोऽयं मणिः कस्मै प्रदीयताम् ?

राजा—वेधक ! गच्छ। अग्निशुद्धमेनं कृत्वा पेटकं प्रवेशय।

किरातः—जं भट्टा आणवेदि। [यद्भर्ताज्ञापयति] (इति मणिं गृहीत्वा निष्क्रान्तः)

राजा—आर्य लातव्य ! जानीते भवान् कस्यायं बाण इति ?

कञ्चुकी—नामाङ्कितोऽयं दृश्यते। न तु मे वर्णविचारक्षमा दृष्टिः।

राजा—तेन हि उपनय शरं यावदहं निरूपयामि।

(कञ्चुकी तथा करोति। राजा नामाक्षराण्यनुवाच्य विचारयति।)

कञ्चुकी—यावदहं नियोगशून्यं करोमि। (इति निष्क्रान्तः)

विदूषकः—किंभवं विआरेदि ? [किं भवान्विचारयति ?]

राजा—शृणु तावत्प्रहर्तुर्नामाक्षराणि।

विदूषकः—अवहिदो म्हि। [अवहितोऽस्मि।]

राजा—श्रूयताम् (इति वाचयति)

(उसके बाद बाण के साथ मणि को लेकर कञ्चुकी का प्रवेश)

कञ्चुकी—महाराज की जय हो, जय हो।

इस मारने योग्य पक्षी को आपके क्रोध ने बाण का रूप धारण कर इसे मार डाला। तब यह अपने अपराध का उचित दण्ड पाकर इस रत्न के साथ आकाश से नीचे गिर पडा ॥ ६ ॥

(सभी आश्चर्यचकित हो जाते हैं।)

कञ्चुकी—पानी से धोये गये इस मणि को किसे दिया जाय ?

राजा—वेधक ! इसे आग में शुद्ध करके पेटी में रख दो।

किरात—जैसी स्वामी की आज्ञा। **(मणि को लेकर चला जाता है)**

राजा—आर्य लातव्य ! तुम जानते हो यह किसका बाण है ?

कञ्चुकी—इसमें नाम लिखा हुआ दिखता है, किन्तु इन अक्षरों को पढने की शक्ति मेरी दृष्टि में तो नहीं है।

राजा—यदि ऐसा है तो बाण इधर लाओ, मैं ही पढता हूँ।

(कञ्चुकी वैसा ही करता है, राजा बाण पर लिखे हुए नाम के अक्षरों को पढकर सोचते हैं।)

कञ्चुकी—तब तक मैं चलकर अपना कार्य देखता हूँ। **(चला जाता है)**

विदूषक—आप क्या सोच रहे हैं ?

राजा—उस पक्षी को मारने वाले का नाम सुनो।

विदूषक—मैं सुनने के लिए सावधान हूँ।

राजा—सुनो। **(बाँचता है)**

उर्वशीसम्भवस्यायमैलसूनोर्धनुष्मतः ।
कुमारस्यायुषो वाणः प्रहर्तुर्द्विषदायुषाम् ॥७॥

विदूषकः—(सपरितोषम्।) दिट्ठिआ संताणेण वड्ढदि भवं। [दिष्ट्या सन्तानेन वर्धते भवान्।]

राजा—सखे! कथमेतत्? अन्यत्र नैमिषेयसत्रादवियुक्तोऽहमुर्वश्या। न च मया कदाचिदपि गर्भव्यक्तिरालक्षिता कुत एव प्रसूतिः? किन्तु—

आविलपयोधराग्रं लवलीदलपाण्डुराननच्छायम् ।
कानि दिनानि वपुरभूत्केवलमलसेक्षणं तस्याः ॥८॥

विदूषकः—मा भवं सव्वं माणुसीधम्मं दिव्वासु संभावेदु। प्पहावणिगूढाइं ताणं चरिदाइं। [मा भवान् सर्वं मानुषीधर्मे दिव्यासु सम्भावयतु। प्रभावनिगूढानि तासां चरितानि।]

राजा—अस्तु, तावदेवं यथा भवानाह। पुत्रसंवरणे तु किमिव कारणं तत्रभवत्याः?

विदूषकः—मा वुड्ढिं मं राआ परिहरिस्सदि त्ति। [मा वृद्धां मां राजा परिहरिष्यतीति।]

राजा—कृतं परिहासेन। चिन्त्यताम्।

विदूषकः—को देवदारहस्साइं तक्कइस्सदि? [को देवतारहस्यानि तर्कयिष्यति?]

(प्रविश्य कञ्चुकी)

कञ्चुकी—जयतु जयतु देवः। देव! च्यवनाश्रमात्कुमारं गृहीत्वा सम्प्राप्ता तापसी देवं द्रष्टुमिच्छति।

राजा—उभयमप्यविलम्बितं प्रवेशय।

यह वाण पुरूरवा और उर्वशी के धुनर्धारी पुत्र आयु नामक उस राजकुमार का है जो शत्रुओं की आयु का नाश कर देता है॥७॥

विदूषक—(सन्तोष के साथ) आपको पुत्रप्राप्ति की बधाई।

राजा—मित्र! पर ऐसा कैसे हुआ? नैमिषेय यज्ञ को छोडकर मैं कभी उर्वशी से अलग नहीं रहा और न मैंने कभी भी उर्वशी में गर्भ होने के लक्षण ही देखे, फिर यह बालक कैसे उत्पन्न हुआ? किन्तु—

अभी कुछ दिन पहले मैंने देखा था कि उसकी आँखें अलसायी रहती थीं, उसका मुख लवली के पत्तों के समान पीला पड़ गया था और उसके स्तनों की घुंडियाँ (चूचुक) साँवली पड गयीं थीं॥८॥

विदूषक—आप सामान्य स्त्रियों वाली बातों की तुलना अप्सराओं से न करें। उनके चरित्र दैवी प्रभाव से छिपे रहते हैं।

राजा—अच्छा जैसा आप कहते हैं यदि वैसा ही मान लिया जाय तो पुत्र को छिपाने में उर्वशी का क्या अभिप्राय होगा?

विदूषक—मुझे वृद्धा समझकर महाराज कहीं छोड़ न दे?

राजा—बहुत हो गया हास-परिहास से, ध्यान से सोचो।

विदूषक—भला देवताओं की बातों का रहस्य कौन जान सकता है?

(कञ्चुकी का प्रवेश)

कञ्चुकी—महाराज की जय हो, जय हो। महाराज! च्यवन ऋषि के आश्रम से एक कुमार को साथ लिये हुए एक तपस्विनी आयी हैं। वे आपका दर्शन करना चाहती हैं।

राजा—दोनों को ही शीघ्र भीतर ले आओ।

कञ्चुकी—यदाज्ञापयति देवः।

(इति निर्गम्य चापहस्तेन कुमारेण तापस्या च सह प्रविष्टः।)

कञ्चुकी—इत इतो भगवती। (सर्वे परिक्रामन्ति)

विदूषकः—(विलोक्य) किं णु क्खु सो एसो तत्तभवं खत्तिअकुमारओ जस्स णामंकिदो गिद्धलक्खवेधी अद्धणाराओ। तह हि बहुअरं भवदो अणुकरेदि। [किं नु खलु स एष तत्रभवान्क्षत्रियकुमारको यस्य नामाङ्कितो गृध्रलक्ष्यवेधी नाराचः। तथा हि बहुतरं भवतोऽनुकरोति।]

राजा—स्यादेवम्। अतः खलु—

बाष्पायते निपतिता मम दृष्टिरस्मिन् वात्सल्यबन्धि हृदयं मनसः प्रसादः।
सञ्जातवेपथुभिरुज्झितधैर्यवृत्तिरिच्छामि चैनमदयं परिरब्धुमङ्गैः ॥ ९ ॥

कञ्चुकी—भगवति! एवं स्थीयताम्।

(तापसीकुमारौ स्थितौ)

राजा—अम्ब! अभिवादये।

तापसी—*महाभाग! सोमवंसवित्थारइत्तओ होहि।* (*आत्मगतम्*) *अम्हो, अणाचक्खिदो* वि विण्णादो एव्व इमस्स राएसिणो आउसो अओरसो संबंधो। (प्रकाशम्) जाद प्पणम दे गुरुं। [महाभाग! सोमवंशविस्तारयिता भव। अहो, अनाख्यातोऽपि विज्ञात एवास्य राजर्षेरायुषश्च औरसः सम्बन्धः। जात! प्रणम ते गुरुम्।]

(कुमारश्चापगर्भमञ्जलिं बद्ध्वा प्रणमति)

राजा—वत्स! आयुष्मान् भव।

कुमारः—(स्वगतम्)

काञ्चुकी—जैसी महाराज की आज्ञा।

(बाहर जाकर धनुषधारी कुमार तथा तापसी को साथ लेकर प्रवेश)

कञ्चुकी—देवी इधर से आइए, इधर से। (सभी घूमते हैं।)

विदूषक—(देखकर) कहीं यह वही क्षत्रियकुमार न हो जिसके नाम से युक्त वह गिद्ध पर चलाया हुआ बाण मिला है। इसका स्वरूप भी महाराज से मिलता-जुलता है।

राजा—ऐसा हो सकता है। अतएव इसे देखते ही मेरी आँखें भर आई हैं, हृदय में वात्सल्य रस उमड़ पड़ा है, जिससे मन प्रसन्न हो गया, मेरा शरीर अधीर होकर काँपने लगा है और मेरा मन कर रहा है कि इसे अपने अंगों से सटा लूँ॥ ९॥

कञ्चुकी—भगवती! यहाँ बैठिए।

(तपस्विनी तथा कुमार बैठते हैं।)

राजा—माताजी! मैं प्रणाम करता हूँ।

तापसी—महाभाग! आप चन्द्रवंश को बढाने वाले हों। (मन ही मन में) अरे! बिना बतलाये ही मालूम हो रहा है कि इस राजा तथा कुमार का सगा सम्बन्ध है। (प्रकट में) पुत्र! अपने पिताजी को प्रणाम करो।

(हाथ में धनुष लिये हुए ही कुमार हाथ जोड़कर प्रणाम करता है।)

राजा—वत्स! तुम दीर्घायु होओ।

कुमार—(मन ही मन)

यदि हार्दमिदं श्रुत्वा पिता ममायं सुतोऽहमस्येति ।
उत्सङ्गवर्धितानां गुरुषु भवेत् कीदृशः स्नेहः ॥ १० ॥

राजा—भगवति ! किमागमनप्रयोजनम् ?

तापसी—सुणादु महाराओ। एसो दीहाऊ आउ जादमेत्तो एव्व उव्वसीए किवि णिमित्तं अवेक्खिअ मम हत्थे णासीकिदो। जं खत्तिअकुमारअस्स जादकम्मादि विहाणं तं से भअवदा चवणेण असेसं अणुचिट्ठिदं। गहीदविज्जो धणुव्वेदे अहिविणीदो। [शृणोतु महाराजः। एष दीर्घायुरायुर्जातमात्र एव उर्वश्या किमपि निमित्तमवेक्ष्य मम हस्ते न्यासीकृतः। यत्क्षत्रियकुमारस्य जातकर्मादिविधानं तदस्य भगवता च्यवनेनाशेषमनुष्ठितम्। गृहीतविद्यो धनुर्वेदेऽभिविनीतः।]

राजा—सनाथः खलु संवृत्तः।

तापसी—अज्ज ! पुप्फसमिधकुसणिमित्तं इसिकुमारएहिं सह गदेण इमिणा अस्समविरुद्धं आअरिदं। [अद्य पुष्पसमित्कुशानिमित्तमृषिकुमारकैः सह गतेनानेनाश्रमविरुद्धमाचरितम्।]

विदूषकः—(सावेगम्) किं विअ ? [किमिव ?]

तापसी—गहीदामिसो किल गिद्धो पादवसिहरे णिलीअमाणो अणेण लक्खीकिदो वाणस्स। [गृहीतामिषः किल गृध्रः पादपशिखरे निलीयमानोऽनेन लक्ष्यीकृतो बाणस्य।]

(विदूषको राजानमवलोकयति)

राजा—ततस्ततः ?

तापसी—तदो उवलद्धवुत्तंतेण भअवदा चवणेण अहं समादिट्ठा—णिज्जादेहि एदं उव्वसीहत्थे णासं त्ति। ता इच्छामि देविं उव्वसिं पेक्खिदुं। [तत उपलब्धवृत्तान्तेन भगवता च्यवनेनाहं समादिष्टा—निर्यातयैनमुर्वशीहस्ते न्यासमिति। तदिच्छामि देवीमुर्वशीं प्रेक्षितुम्।]

जब केवल यह सुनकर ही कि ये मेरे पिता है और मैं इनका पुत्र हूँ, इतना प्रेम उमड़ रहा है, तब उन बालको को अपने माता-पिता के प्रति कितना प्रेम होता होगा, जो उन्हीं की गोद में पलकर बडे होते होंगे ॥ १० ॥

राजा—भगवती ! आपका कैसे यहाँ आगमन हुआ ?

तापसी—सुनिए महाराज ! जब यह दीर्घायु 'आयु' उत्पन्न हुआ तभी उर्वशी ने कुछ कारण सोचकर मेरे पास इसे धरोहर के रूप में रख दिया था। इस क्षत्रिय राजकुमार के जातकर्म आदि समस्त संस्कार भगवान् च्यवन मुनि ने किये । पढ-लिख चुकने के बाद यह धनुर्विद्या में निपुण है।

राजा—तब तो यह सनाथ हो चुका है।

तापसी—आज फूल, समिधा तथा कुश लाने के लिए जब यह ऋषिकुमारों के साथ जा रहा था तब इसने आश्रम के नियम से विपरीत काम कर डाला।

विदूषक—(घबराकर) कैसा ?

तापसी—मांस का टुकडा लिया हुआ एक गीध पेड की चोटी पर छिपा था, उसे इसने अपने बाण से मार डाला।

(विदूषक राजा की ओर देखता है।)

राजा—उसके बाद ?

तापसी—इस समाचार को सुनकर भगवान् च्यवन ने मुझे आदेश दिया कि इस उर्वशी की धरोहर को उसे लौटा दो। तो मैं देवी उर्वशी को देखना चाहती हूँ।

राजा—तेन ह्यासनमनुगृह्णातु भगवती।

(तापसी उपनीत आसन उपविशति)

राजा—आर्य लातव्य! आहूयतामुर्वशीम्।

कञ्चुकी—यदाज्ञापयति देवः। (इति निष्क्रान्तः)

राजा—(कुमारमवलोक्य) एहि एहि वत्स!

सर्वाङ्गीणः स्पर्शः सुतस्य किल तेन मामुपगतेन ।
आह्लादयस्व तावच्चन्द्रकरश्चन्द्रकान्तमिव ॥ ११ ॥

तापसी—जाद! णदेहि पिदरम्। [जात! नन्दय पितरम्।]

(कुमारो राजानमुपगम्य पादग्रहणं करोति)

राजा—(कुमारमालिङ्ग्य पादपीठे चोपवेश्य) वत्स! इतस्तव पितुः प्रियसखं ब्राह्मणमशङ्कितो वन्दस्व।

विदूषकः—किंति संकिस्सदि? णं अस्समवासपरिचिदो एव्व साहामिओ। [किमिति शङ्क्ष्यते? नन्वाश्रमवासपरिचित एव शाखामृगः।]

कुमारः—(सस्मितम्) तात वन्दे।

विदूषकः—सोत्थि भवदो। बड्ढदु भवं। [स्वस्ति भवतः। वर्धतां भवान्।]

(ततः प्रविशत्युर्वशी कञ्चुकी च)

कञ्चुकी—इत इतो देवी।

उर्वशी—(कुमारमवलोक्य) को णु क्खु एसो सवाणासणो पादपीठे सअं महाराएण संजमीअमाणसिहंडओ चिट्ठदि? (तापसीं दृष्ट्वा) अम्मो! सच्चवदी सूइदो अअं मे पुत्तओ आऊ।

राजा—तब तक आप आसन को सुशोभित कीजिए।

(तापसी दिये गये आसन पर बैठ जाती है)

राजा—आर्य लातव्य! उर्वशी को बुलाओ।

कञ्चुकी—महाराज की जैसी आज्ञा। **(ऐसा कहकर चला जाता है)**

राजा—(कुमार को देखकर) पुत्र! इधर आओ, इधर आओ।

कहा जाता है कि पुत्र का स्पर्श करते ही सम्पूर्ण शरीर सुखी हो जाता है। अतः तुम भी मेरे समीप आकर मुझे भी वैसा ही आनन्द दो जैसे चन्द्रमा की किरणें चन्द्रकान्त मणि को आनन्दित करती है॥ ११॥

तापसी—पुत्र! अपने पिताजी को सुखी करो।

(कुमार राजा के पास जाकर राजा के पैर छूता है।)

राजा—(कुमार का आलिंगन कर चरणों के पास स्थित आसन पर बैठाकर) बेटा! अपने पिता के प्रियमित्र इन ब्राह्मण को भी निःशंक होकर प्रणाम करो।

विदूषक—शंका किस बात की? आश्रम में रहते समय इनका परिचय वानरों से तो हुआ ही होगा।

कुमार—(मुस्कराकर) तात! प्रणाम।

विदूषक—तुम्हारा कल्याण हो, तुम फूलो-फलो।

(तदनन्तर उर्वशी और कञ्चुकी का प्रवेश)

कञ्चुकी—देवी! इधर से आइए, इधर से।

महंतो क्खु संवुत्तो। [**को नु खल्वेष सबाणासनः पादपीठे स्वयं महाराजेन संयम्यमानशिखण्डकस्तिष्ठति? अहो! सत्यवतीसूचितोऽयं मे पुत्रक आयुः। महान् खलु संवृत्तः।**]

(इति सहर्ष परिक्रामति)

राजा—(उर्वशीं दृष्ट्वा) वत्स!

इयं ते जननी प्राप्ता त्वदालोकनतत्परा।
स्नेहप्रस्रवनिर्भिन्नमुद्वहन्ती स्तनांशुकम्॥ १२॥

तापसी—जाद! एहि। पच्चुग्गच्छ मादरं। [**जात! एहि। प्रत्युद्गच्छ मातरम्।**] (इति कुमारेण सह उर्वशीमुपसर्पति।)

उर्वशी—अंब! पादवंदणं करेमि। [**अम्ब! पादवन्दनं करोमि।**]

तापसी—वच्छे! भत्तुणो बहुमदा होहि। [**वत्से! भर्तुर्बहुमता भव।**]

कुमार—अम्ब! अभिवादये।

उर्वशी—(कुमारमुन्नमितमुखं परिष्वज्य) वच्छ! पिदरं आराधइत्तओ होहि। (राजानमुपेत्य) जेदु जेदु महाराओ। [**वत्स! पितरमाराधयिता भव। जयतु जयतु महाराजः।**]

राजा—स्वागतं पुत्रवत्यै। इत आस्यताम्। (इत्यर्धासनं ददाति)

(उर्वशी उपविशति। सर्वे यथोचितमुपविशन्ति।)

तापसी—वच्छे! एसो गहीदविज्जो आऊ संपदं कवअहरो संवुत्तो। ता एदस्स दे भत्तुणो समक्खं णिज्जादिदो हत्थणिक्खेवो। ता विसज्जेदुं इच्छामि। उवरुज्झइ मह अस्समधम्मो। [**वत्से! एष गृहीतविद्य आयुः साम्प्रतं कवचहरः संवृत्तः, तदेतस्य ते भर्तुः समक्षं निर्यातितो हस्तनिक्षेपः। तद्विसर्जयितुमिच्छामि। उपरुध्यते ममाश्रमधर्मः।**]

उर्वशी—(**कुमार को देखकर**) यह हाथ में धनुष-बाण लिये कौन है, जिसे अपने पादपीठ पर बैठाकर महाराज स्वयं उसके केशों को सँवार रहे हैं। (**तापसी को देखकर**) अरे! सत्यवती को देखकर समझ में आया है कि यह मेरा पुत्र आयु है। यह तो बहुत बड़ा हो गया।

(अत्यन्त प्रसन्न होकर घूमती है।)

राजा—(**उर्वशी को देखकर**) पुत्र! ये तुम्हारी माताजी आ गयी, जो तुम्हारी ओर टकटकी लगाये देख रही है और जिनकी चोली तुम्हारे प्रेम के कारण टपकते हुए दूध से भीग रही है॥ १२॥

तापसी—पुत्र! यहाँ आओ, आगे बढ़कर माता का स्वागत करो। (**कुमार को लेकर उर्वशी से मिलने के लिए आगे बढ़ती है।**)

उर्वशी—माताजी! आपको मैं प्रणाम करती हूँ।

तापसी—अपने स्वामी की प्यारी बनी रहो।

कुमार—माताजी! प्रणाम करता हूँ।

उर्वशी—(**कुमार के मुख को उठाकर आलिंगन कर**) बेटा! पिता की सेवा करने वाले बनो। (**राजा के पास जाकर**) महाराज की जय हो, जय हो।

राजा—पुत्रवती का स्वागत है। यहाँ बैठिए। (**अपने आसन का आधा भाग उसे देता है।**)

(उर्वशी बैठती है। शेष सभी यथास्थान बैठते हैं।)

तापसी—पुत्री! यह आयु सभी विद्याओं को पढ चुका है। अब यह कवच धारण करने योग्य हो गया है। अतः मैं तुम्हारी इस धरोहर को तुम्हारे स्वामी को सौंप रही हूँ। अब मैं यहाँ से जाना भी चाहती हूँ, क्योंकि मेरे आश्रम के कार्यों में बाधा पड रही है।

उर्वशी—चिरस्स अज्जं देक्खिअ अहिअदरं अवितिण्हम्हि। ण सक्कणोमि विसज्जिदुं। अण्णय्यं उण उवरोहिदुं। ता गच्छदु अज्जा पुणो दंसणाअ। [चिरस्यार्या दृष्ट्वाऽधिकतरमवितृष्णास्मि। न शक्नोमि विसृष्टुम्। अन्याय्यं पुनरुपरोद्धुम्। तद्गच्छत्वार्या पुनर्दर्शनाय।]

राजा—अम्ब! भगवते च्यवनाय मां प्रणिपातय।

तापसी—एव्वं भोदु। [एवं भवतु।]

कुमारः—आर्ये! सत्यं यदि निवर्तसे मामप्याश्रमं नेतुमर्हसि।

राजा—अयि वत्स! उषितं त्वया पूर्वस्मिन्नाश्रमे। द्वितीयमध्यासितुं तव समयः।

तापसी—जाद! गुरुअणो वअणं अणुचिट्ठ। [जात! गुरोर्वचनमनुतिष्ठ।]

कुमारः—तेन हि—

यः सुप्तवान्मदङ्के शिखण्डकण्डूयनोपलब्धसुखः।
तं मे जातकलापं प्रेषय मणिकण्ठकं शिखिनम् ॥ १३ ॥

तापसी—(विहस्य) एव्वं करेमि। [एवं करोमि।]

उर्वशी—भअवदि! पादवंदणं करेमि। [भगवति! पादवन्दनं करोमि।]

राजा—भगवति! प्रणमामि।

तापसी—सोत्थि भोदु तुम्हाणम्। [स्वस्ति भवतु युष्मभ्यम्।]

(इति निष्क्रान्ता)

राजा—(उर्वशीं प्रति) कल्याणि!

अद्याहं पुत्रिणामग्र्यः सत्पुत्रेणामुना तव।
पौलोमीसम्भवेनेव जयन्तेन पुरन्दरः ॥ १४ ॥

उर्वशी—इतने समय के बाद आपके दर्शन हुए हैं, अभी आपको देखकर मन भी नहीं भरा, अतः आपको छोडने का मन नहीं कर रहा है। आपको रोकना भी उचित नहीं है, तो आप जायें, फिर दर्शन दीजियेगा।

राजा—भगवान् च्यवन मुनि से मेरा प्रणाम कहियेगा।

तापसी—ऐसा ही होगा।

कुमार—आर्ये! यदि सचमुच यहाँ से लौट रही हैं तो मुझे भी आश्रम में लेते जाइये।

राजा—अरे बेटे! तुम ब्रह्मचर्य आश्रम में तपोवन में रह चुके हो, अब तुम्हारा समय गृहस्थाश्रम में रहने का है।

तापसी—पुत्र! पिता की आज्ञा का पालन करो।

कुमार—यदि ऐसा ही है तो आप मेरे उस बडे पंखों वाले मणिकण्ठक नामक मोर को यहाँ भेज दीजियेगा, जिसे मेरी गोद में सोकर मेरे हाथों से खुजलाये जाने का सुख मिल चुका है॥ १३॥

तापसी—(हँसकर) अच्छा भेज दूँगी।

उर्वशी—भगवती! मैं आपके चरणों में प्रणाम करती हूँ।

राजा—भगवती! मैं प्रणाम करता हूँ।

तापसी—तुम सबका कल्याण हो।

(ऐसा कहकर चली जाती है।)

राजा—(उर्वशी के प्रति) कल्याणी! तुम्हारे इस पुत्र के कारण आज मैं सत्पुत्रवालों में उस प्रकार अग्रगण्य हो गया हूँ जैसे इन्द्राणी से उत्पन्न जयन्त के कारण देवराज इन्द्र॥ १४॥

(उर्वशी स्मृत्वा रोदिति)

विदूषकः—(विलोक्य सावेगम्) भो! किं णु क्खु संपदं अत्तहोदी एक्कवदे अस्सुमुही संवुत्ता। [भोः! किं नु खलु साम्प्रतमत्रभवती एकपदे अश्रुमुखी संवृत्ता।]

राजा—(सावेगम्)

किं सुन्दरि! प्ररुदितासि ममोपनीते वंशस्थितेरधिगमान्महति प्रमोदे ।
पीनस्तनोपरिनिपातिभिरानयन्ती मुक्तावलीविरचनां पुनरुक्तिमश्रैः ॥ १५ ॥

(इति अस्या वाष्पं प्रमार्ष्टि)

उर्वशी—सुणादु महाराओ। प्पढमं उण पुत्तदंसणसमुत्थेण आणंदेण विसुमरिद म्हि। दाणिं महिंदसंकित्तणेण सुमरिओ समओ मह हिअअं आआसेदि। [शृणोतु महाराजः। प्रथमं पुनः पुत्रदर्शनसमुत्थेनानन्देन विस्मृतास्मि। इदानीं महेन्द्रसङ्कीर्तनेन स्मृतः समयो मम हृदयमायासयति।]

राजा—कथ्यतां समयः।

उर्वशी—अहं पुरा महाराअगहीदहिअआ गुरुसावसम्मूढा महिंदेण आणत्ता। [अहं पुरा महाराजगृहीतहृदया गुरुशापसम्मूढा महेन्द्रेण आज्ञापिता।]

राजा—किमिति ?

उर्वशी—जदा सो मे पिअसहो राएसी तुइ समुप्पण्णस्स वंसकरस्स मुहं पेक्खिस्सदि तदा तुए भूओ वि मम समीवं आअंतव्वं त्ति। तदो मए महाराअविओअभीरुदाए जादमेत्तो एव्व विज्जागमणिमित्तं भअवदो चवणस्स अस्समे एसो पुत्तओ अज्जाए सच्चवदीए हत्थे अप्पआसं णिक्खित्तो। अज्ज पिदुणो आराहणसमत्थे संवुत्तो त्ति कलअंतीए ताए णिज्झादिदो एसो मे दीहाऊ आऊ। ता एत्तिओ मे महाराएण सह संवासो। [यदा स मे प्रियसखो राजर्षिस्त्वयि समुत्पन्नस्य वंशकरस्य मुखं प्रेक्षिष्यते तदा त्वया भूयोऽपि मम समीपमागन्तव्यमिति। ततो मया महाराजवियोगभीरुतया जातमात्र एव विद्यागमनिमित्तं

(उर्वशी कुछ स्मरण कर रोने लगती है।)

विदूषक—(देखकर घबराकर) अरे! यह क्या हो गया, जो अचानक ही आपकी आँखों में आँसू आ गये हैं।

राजा—(घबराकर) सुन्दरी! तुम ऐसे आनन्द के अवसर पर रुदन कर रही हो जब मेरे वंश को बढ़ाने वाला मुझे सुयोग्य पुत्र मिला हो। तुम अपने पीन स्तनों पर गिरने वाले आँसुओं से पुनरुक्त दोष की भाँति दूसरी हार ही लड़ी क्यों बना रही हो ? ॥ १५ ॥

(ऐसा कहकर उसके आँसुओं को पोंछता है।)

उर्वशी—महाराज! सुनिए। पहले तो मैं पुत्रदर्शन के आनन्द से सब कुछ भूल गयी थी। उसके बाद जो आपने पुरन्दर का नाम लिया तो मुझे एक पुरानी बात याद हो आयी, जो मेरे हृदय को पीड़ा पहुँचा रही है।

राजा—कहिए, वह बात क्या है ?

उर्वशी—बहुत दिन पहले आपसे प्रेम करने के कारण भरत मुनि ने मुझे शाप दे दिया था। उस शाप से मैं बहुत घबरा गयी, तब देवराज इन्द्र ने मुझे आज्ञा दी थी।

राजा—कैसी आज्ञा दी थी ?

उर्वशी—यही कि तुम्हारे प्रिय मित्र राजर्षि जब तुमसे उत्पन्न हुए अपने वंश चलानेवाले पुत्र का मुख देख लेंगे तब तुम्हें फिर मेरे पास आ जाना चाहिए। इसलिए जैसे ही मुझे यह बालक उत्पन्न

भगवतश्च्यवनस्याश्रमे एष पुत्रक आर्यायाः सत्यवत्या हस्तेऽप्रकाशं निक्षिप्तः। अद्य पितुराराधनसमर्थः संवृत्त इति कलयन्त्या तया निर्यातित एष मे दीर्घायुरायुः। तदेतावान्मे महाराजेन सह संवासः।]

(सर्वे विषादं नाटयन्ति। राजा मोहमुपगच्छति।)

विदूषकः—अब्वम्हण्णं अब्वम्हणं। [अब्रह्मण्यमब्रह्मण्यम्।]

कञ्चुकी—समाश्वसितु समाश्वसितु महाराजः।

राजा—(समाश्वस्य सनिःश्वासम्) अहो! सुखप्रत्यर्थिता दैवस्य।

आश्वासितस्य मम नाम सुतोपलब्ध्या सद्यस्त्वया सह कृशोदरि विप्रयोगः ।
व्यावर्तितातपरुजः प्रथमाभ्रवृष्ट्या वृक्षस्य वैद्युत इवाग्निरुपस्थितोऽयम् ॥ १६ ॥

विदूषकः—अअं सो अत्थो अणत्थाणुबंधो संवुत्तो। संपदं तक्केमि अत्तभवदा वक्कलं गेण्हिअ तवोवणं गंदव्वं त्ति। [अयं सोऽर्थोऽनर्थानुबन्धः संवृत्तः। साम्प्रतं तर्कयाम्यत्रभवता वल्कलं गृहीत्वा तपोवनं गन्तव्यमिति।]

उर्वशी—मं वि मंदभाइणिं किदविणअस्स पुत्तस्स लाभाणंतरं सग्गारोहणेण अवसिदकज्जं विप्पओअमुहिं महाराओ समत्थइस्सदि। [मामपि मन्दभागिनीं कृतविनयस्य पुत्रस्य लाभानन्तरं स्वर्गारोहणेनावसितकार्यां विप्रयोगमुखीं महाराजः समर्थयिष्यति।]

राजा—सुन्दरि! मा मैवम्—

न हि सुलभवियोगा कर्तुमात्मप्रियाणि प्रभवति परवत्ता शासने तिष्ठ भर्तुः ।
अहमपि तव सूनावद्य विन्यस्य राज्यं विचरितमृगयूथान्याश्रयिष्ये वनानि ॥ १७ ॥

हुआ वैसे ही मैंने इस डर से इस नवजात शिशु को भगवान् च्यवन के आश्रम में विद्याप्राप्ति के निमित्त आर्या सत्यवती के पास धरोहर रख छोड़ा था। क्योंकि यदि आप इसे देख लेते तो मेरा आपका वियोग हो जाता। आज पिता की सेवा के योग्य हो गया है, ऐसा विचार कर इस दीर्घायु आयु को मेरे पास भेज दिया। इसलिए आज तक आप ही के साथ मेरा सहवास काल है।

(सब दुःखी हो जाते हैं। राजा मूर्च्छित हो जाते हैं।)

विदूषक—यह तो वड़ा वुरा हुआ, वडा वुरा हुआ।

कञ्चुकी—महाराज! धैर्य रखिए, धैर्य रखिए।

राजा—(आश्वस्त होकर लम्बी साँस लेते हुए) अरे! मेरा भाग्य मुझे सुखी नहीं होने देता।

आज ही पुत्र को पाकर मैं आश्वस्त हुआ था। हे कृशोदरी! शीघ्र ही तुमसे मेरा बिछोह होने जा रहा है। यह तो ठीक ऐसा ही हुआ जैसे पहली वर्षा से शीतल हुए पेड पर अचानक बिजली गिर पड़ी हो॥ १६॥

विदूषक—मुझे तो लगता है अब अनर्थों का क्रम चालू हो गया है। अब मैं सोचता हूँ कि कहीं आपको वल्कल धारण कर तपोवन न जाना पडे।

उर्वशी—मुझ अभागिन के लिए भी महाराज यही सोचते होंगे कि पढे-लिखे पुत्र को पा जाने से इसका काम हो गया, इसीलिए अब यह मुझे छोडकर स्वर्ग को चली जा रही है।

राजा—सुन्दरी! ऐसा मत कहो।

जिस पराधीनता के कारण तुम मुझे छोडकर जा रही हो, उससे मनचाही वस्तु तो मिल नहीं सकती। इसलिए तुम अपने स्वामी (इन्द्र) की आज्ञा का पालन करो। मैं भी तुम्हारे पुत्र को आज राज्यभार सौंपकर इधर-उधर घूमने वाले हरिणों के झुंड वाले वनों का आश्रय लूँगा॥ १७॥

कुमारः—नार्हति तातः पुङ्गवधारितायां धुरि दम्यं नियोजयितुम्।

राजा—अयि वत्स! मा मैवम्—

शमयति गजानन्यान्गन्धद्विपः कलभोऽपि सन्
भवति सुतरां वेगोदग्रं भुजङ्गशिशोर्विषम्।
भुवमधिपतिर्बालावस्थोऽप्यलं परिरक्षितुं
न खलु वयसा जात्यैवायं स्वकार्यसहो भरः ॥१८॥

आर्य लातव्य!

कञ्चुकी—आज्ञापयतु देवः।

राजा—मद्वचनादमात्यपरिषदं ब्रूहि सम्भ्रियतामायुषो राज्याभिषेक इति।

कञ्चुकी—यदाज्ञापयति देवः। (इति दुःखितो निष्क्रान्तः)

(सर्वे दृष्टिविघातं रूपयन्ति)

राजा—(आकाशमवलोक्य।) किं नु खलु निरभ्रे विद्युत्सम्पातः।

उर्वशी—(विलोक्य) अम्मो, भअवं णारदो। [अहो! भगवान् नारदः।]

राजा—(निपुणमवलोक्य।) अये भगवान् नारदः। य एषः—

गोरोचनानिकषपिङ्गजटाकलापः संलक्ष्यते शशिकलामलवीतसूत्रः।
मुक्तागुणातिशयसम्भृतमण्डनश्रीः हेमप्ररोह इव जङ्गमकल्पवृक्षः ॥१९॥

अर्घ्यं तावदस्मै।

कुमार—पिताजी! रथ के जिस जुए को बड़ा बैल खींचता हो, उसे छोटे बछड़े के कन्धे पर डाल देना उचित नहीं है।

राजा—बेटा! ऐसा मत कहो। जैसे ऊँची जाति का हाथी का बच्चा भी दूसरे (सामान्य) हाथियों को पछाड़ देता है और सँपोले का विष भी बड़े साँप के विष जैसा ही तीक्ष्ण वेग वाला होता है, वैसे ही बालक होने पर भी राजा का पुत्र समुचित विधि से पृथ्वी की रक्षा कर सकता है। क्योंकि अपने कर्तव्य का पालन करने की शक्ति अवस्था से नही अपितु जाति से ही हो जाती है॥ १८॥

आर्य लातव्य!

कञ्चुकी—महाराज! आज्ञा कीजिए।

राजा—मेरी ओर से मन्त्रिपरिषद् को सूचना दे दो कि 'आयु' के राज्याभिषेक का समुचित प्रबन्ध किया जाय।

कञ्चुकी—महाराज की जैसी आज्ञा। (दुःखी होकर चला जाता है।)

(सभी की आँखें चकाचौंध हो जाती हैं।)

राजा—(आकाश की ओर देखकर) अरे! बादलों से रहित आकाश में यह बिजली कैसी?

उर्वशी—(देखकर) अरे! ये तो भगवान् नारद हैं।

राजा—(ध्यान से देखकर) अरे! भगवान् नारद, जो गोरोचन के सदृश पीली जटाओं वाले, कन्धे पर चन्द्रकला के समान जनेऊ पहने, गले में मोतियों की माला धारण किये ऐसे चले आ रहे हैं जैसे कोई चलता-फिरता कल्पवृक्ष ही हो॥ १९॥

इनके लिए पूजा की सामग्री ले आओ।

उर्वशी—(यथोक्तमादाय) इअं भअवदे अरिहणा। [इयं भगवतेऽर्हणा।]

(ततः प्रविशति नारदः। सर्व उत्तिष्ठन्ति)

नारदः—विजयतां विजयतां मध्यमलोकपालः।

राजा—(उर्वशीहस्तादर्घ्यमादायावर्ज्य च) भगवन्नभिवादये।

उर्वशी—भअवं! प्पणमामि। [भगवन्! प्रणमामि।]

नारदः—अविरहितौ दम्पती भूयास्ताम्।

राजा—(आत्मगतम्) अपि नामैवं स्यात्। (कुमारमाश्लिष्य प्रकाशम्) वत्स! भगवन्तमभिवादयस्व।

कुमारः—भगवन्! और्वशेय आयुः प्रणमति।

नारदः—आयुष्मानेधि।

राजा—अयं विष्टरोऽनुगृह्यताम्।

नारदः—तथा। (इत्युपविष्टः)

(सर्वे नारदमनूपविशन्ति)

राजा—(सविनयम्) भगवन्! किमागमनप्रयोजनम्?

नारदः—राजन्! श्रूयतां महेन्द्रसन्देशः।

राजा—अवहितोऽस्मि?

नारदः—प्रभावदर्शी मघवा वनगमनाय कृतबुद्धिं भवन्तमनुशास्ति।

उर्वशी—(सब सामग्री लाकर) यह भगवान् की पूजा की सामग्री है।

(इसी बीच नारद का प्रवेश। सब खड़े हो जाते हैं।)

नारद—मध्यमलोक की रक्षा करने वाले महाराज की जय हो, जय हो।

राजा—(उर्वशी के हाथ से पूजा की सामग्री लेकर और पूजा करके) भगवन्! आपः प्रणाम करता हूँ।

उर्वशी—भगवन्! मैं आपको प्रणाम करती हूँ।

नारद—तुम दोनों पति-पत्नी का कभी विछोह न हो।

राजा—(मन ही मन) यदि नारद के आशीर्वाद के अनुरूप हो जाता? (कुमार को गले लगाकर प्रकट में) बेटा! भगवान् नारद को प्रणाम करो।

कुमार—भगवन्! उर्वशी का पुत्र आयु आपको प्रणाम करता है।

नारद—तुम्हारी आयु बड़ी हो।

राजा—देवर्षि! इस आसन को पवित्र कीजिए।

नारद—अच्छी बात है। (बैठ जाते हैं)

(नारद के बैठने के बाद सब बैठ जाते हैं।)

राजा—(विनम्रता के साथ) भगवन्! कैसे आने का कष्ट किया?

नारद—राजन्! महेन्द्र के सन्देश को सुनिए।

राजा—मैं सावधान होकर सुन रहा हूँ।

नारद—अपने प्रभाव से सब कुछ देखने वाले देवराज इन्द्र ने वन जाने के लिए दृढनिश्चय वाले आपके लिए कहलवाया है।

राजा—किमाज्ञापयति ?

नारदः—त्रिकालदर्शिभिर्मुनिभिरादिष्टो महान्सुरासुरसङ्गरो भावी। भवाँश्च सांयुगीनः सहायो नः। तेन न त्वया शस्त्रं संन्यस्तव्यम्। इयं चोर्वशी यावदायुस्तव सहधर्मचारिणी भवत्विति।

उर्वशी—(अपवार्य) अम्महे, सल्लं विअ मे हिअआदो अवणीदं। [अहो! शल्यमिव मे हृदयादपनीतम्।]

राजा—परवानस्मि देवेश्वरेण।

नारदः—युक्तम्—

त्वत्कार्यं वासवः कुर्यात्त्वं च तस्येष्टमाचरेः ।
सूर्यः समेधयत्यग्निमग्निः सूर्यं च तेजसा ॥ २० ॥

(आकाशमवलोक्य) रम्भे! उपनीयतां स्वयं महेन्द्रेण सम्भृतः कुमारस्यायुषा यौवराज्याभिषेकः।

(प्रविष्टा यथोक्तहस्ताऽप्सरसः)

अप्सरसः—भअवं! इमे अभिसेअसम्भारा। [भगवन्नेतेऽभिषेकसम्भाराः।]

नारदः—उपवेश्यतामयमायुष्मान्भद्रपीठे।

रम्भा—इदो वच्छ। [इतो वत्स।] (इति कुमारं भद्रपीठ उपवेशयति)

नारदः—(कुमारस्य शिरसि कलशमावर्ज्य) रम्भे! निर्वर्त्यतां शेषो विधिः।

रम्भा—(यथोक्तं निर्वर्त्य) वच्छ! पणम भअवंतं पिदरो अ। [वत्स! प्रणम भगवन्तं पितरौ च।]

(कुमारो यथाक्रमं प्रणमति)

राजा—उन्होंने क्या आज्ञा दी है?

नारद—त्रिकालदर्शी मुनियों ने कहा है कि महान् देवासुर-संग्राम होने वाला है। युद्ध में आप कुशल हैं और हम लोगों के आप सहायक हैं। इसलिए आप अभी शस्त्रों को न छोड़े। यह उर्वशी जीवन भर आपकी संगिनी रहेगी।

उर्वशी—(हटकर) अरे! मेरे हृदय से तो काँटा जैसे निकल गया।

राजा—मैं तो देवराज इन्द्र का सेवक ही हूँ।

नारद—ठीक ही है। जैसे सूर्य अपने तेज़ से अग्नि की शक्ति को बढ़ाता है और अग्नि सूर्य को, वैसे ही इन्द्र तुम्हारा कार्य करें और तुम इन्द्र का कार्य करो॥ २०॥

(आकाश की ओर देखकर) रम्भा! स्वयं इन्द्र ने कुमार आयु के युवराज बनने के उत्सव के लिए जो-जो सामग्री भेजी है, वह सब ले आओ।

(ऊपर कही हुई सामग्री लेकर अप्सराएँ आती हैं।)

अप्सराएँ—महाराज! अभिषेक की सामग्री आ गई।

नारद—आयुष्मान् को भद्रासन पर बैठाओ।

रम्भा—पुत्र! इधर आओ। (कुमार को भद्रपीठ पर बैठाती है।)

नारद—(कुमार के सिर पर अभिषेक करके) रम्भा! शेष विधि भी कर दो।

रम्भा—(विधिपूर्वक अभिषेक करके) पुत्र! नारदजी को और अपने माता-पिता को प्रणाम करो।

(कुमार क्रम से प्रणाम करता है।)

नारदः—स्वस्ति भवते।

राजा—कुलधुरन्धरो भव।

उर्वशी—पिदुणो आराहओ होहि। [पितुराराधको भव।]

(नेपथ्ये वैतालिकद्वयम्)

वैतालिकौ—विजयतां युवराजः।

प्रथमः— अमरमुनिरिवात्रिर्ब्रह्मणोऽत्रेरिवेन्दु-
बुंध इव शिशिरांशोर्बोधनस्येव देवः ।
भव पितुरनुरूपस्त्वं गुणैर्लोकिकान्तै-
रतिशयिनि समस्ता वंश एवाशिषस्ते ॥ २१ ॥

द्वितीयः— तव पितरि पुरस्तादुन्नतानां स्थितेऽस्मिन्
स्थितिमति च विभक्ता त्वय्यनाकम्पधैर्ये ।
अधिकतरमिदानीं राजते राजलक्ष्मी-
र्हिमवति जलधौ च व्यस्ततोयेव गङ्गा ॥ २२ ॥

अप्सरसः—(उर्वशीमुपेत्य) दिट्ठिआ प्पिअसही पुत्तस्स जुवराअसिरीए भत्तुणो अविरहेण अ बइढदि। [दिष्ट्या प्रियसखी पुत्रस्य युवराजश्रिया भर्तुरविरहेण च वर्धते।]

उर्वशी—णं साहारणो एसो अब्भुदयो। (कुमारं हस्ते गृहीत्वा) एहि वच्छ ! जेट्ठमादरं अभिवंदेहि। [ननु साधारण एषोऽभ्युदयः। एहि वत्स ! ज्येष्ठमातरमभिवन्दस्व।]

(कुमारः प्रतिष्ठते)

राजा—तिष्ठ ! सममेव तत्रभवत्याः समीपं यास्यामस्तावत्।

नारद—आपका कल्याण हो।

राजा—कुल के भार को धारण करने वाले बनो।

उर्वशी—पिता के आज्ञाकारी बनो।

(नेपथ्य में दो वैतालिक)

दोनों वैतालिक—युवराज की विजय हो।

पहला वैतालिक—तुम अपने पिता के वैसे ही सुयोग्य पुत्र बनो जैसे ब्रह्माजी के अमर मुनि अत्रि हुए, अत्रि के चन्द्रमा हुए, चन्द्रमा के बुध, बुध के पुरूरवा हुए हैं और तुम पिता के अनुरूप कमनीय गुणों वाले बनो। तुम्हारे इस अनुपम वंश के लिए यही आशीर्वाद उचित है॥ २१ ॥

दूसरा वैतालिक—तुम्हारे पिता ऊँचे लोगों में श्रेष्ठ है, उन्हीं के तुम साहसी एवं मर्यादापालक पुत्र हो। तुम दोनों (पिता-पुत्रों) में समान भक्ति रखने वाली यह राज्यलक्ष्मी वैसे ही शोभित होती है, जैसे हिमालय और समुद्र में भक्ति रखने वाली गंगा शोभा देती है॥ २२ ॥

अप्सराएँ—**(उर्वशी के पास जाकर)** सखी उर्वशी! पुत्र के यौवराज्याभिषेक और सदा पति के साथ रहने की तुम्हें बधाई है।

उर्वशी—यह सौभाग्य तो हम-तुम दोनों का समान जैसा ही है। **(कुमार का हाथ पकड़कर)** आओ पुत्र! बड़ी माताजी को प्रणाम करो।

(कुमार जाने के लिए तैयार होता है।)

राजा—रुको, हम सब साथ ही देवी के समीप चलते हैं।

नारदः— आयुषो यौवराज्यश्रीः स्मारयत्यात्मजस्य ते ।
अभिषिक्तं महासेनं सैनापत्ये मरुत्वता ॥ २३ ॥

राजा—अनुगृहीतोऽस्मि मघवता।

नारदः—भो राजन्! किं ते भूयः प्रियमुपकरोतु पाकशासनः ?

राजा—यदि मे मघवा प्रसन्नः किमतः परमिच्छामि। तथापि इदमस्तु—

(भरतवाक्यम्)

परस्परविरोधिन्योरेकसंश्रयदुर्लभम् ।
सङ्गतं श्रीसरस्वत्योर्भूतयेऽस्तु सदा सताम् ॥ २४ ॥

अपि च—

सर्वस्तरतु दुर्गाणि सर्वो भद्राणि पश्यतु ।
सर्वः कामानवाप्नोतु सर्वः सर्वत्र नन्दतु ॥ २५ ॥

(इति निष्क्रान्ताः सर्वे)

॥ इति पञ्चमोऽङ्कः ॥

॥ सम्पूर्णमिदं श्रीकालिदासकृतं विक्रमोर्वशीयं नाम त्रोटकम् ॥

नारद—तुम्हारे पुत्र आयु का यह यौवराज्याभिषेक उस अभिषेकोत्सव का स्मरण दिला रहा है, जिसमें इन्द्र ने कार्तिकेय को सेनापति बनाया था॥ २३ ॥

राजा—यह सब देवराज इन्द्र की ही मुझ पर कृपा है।

नारद—हे राजन्! इन्द्र आपकी और क्या भलाई करें।

राजा—यदि इन्द्र मेरे ऊपर प्रसन्न है तो इससे बढ़कर और मुझे क्या चाहिए? फिर भी मैं चाहता हूँ कि—

(भरतवाक्य)

जो लक्ष्मी और सरस्वती सदा परस्पर विरोधभाव से रहती हैं, जिनका एक स्थान पर रहना दुर्लभ है, सज्जनों के कल्याण के लिए ये दोनों एक साथ रहने लगें॥ २४॥

और भी—सभी कष्टों से दूर हों, सबका भला हो, सबके मनोरथ पूरे हों और सभी चारों ओर आनन्दित रहें॥ २५॥

(सब चले जाते हैं।)

॥ पाँचवाँ अंक समाप्त ॥



'नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम्'

मालविकाग्निमित्रम्

डॉ० रमाशंकर पाण्डेय

पात्र-परिचय

पुरुष-पात्र

सूत्रधार	: नाटक का प्रबन्धक।
पारिपार्श्वक	: सूत्रधार का सहायक।
अग्निमित्र	: विदिशा-नरेश (नायक)।
वाहतक	: अग्निमित्र का मन्त्री।
गौतम	: विदूषक (राजा का मित्र)।
मौद्गल्य	: कञ्चुकी (वृद्ध ब्राह्मण)।
गणदास	: नाट्याचार्य।
हरदत्त	: नाट्याचार्य।
सारस	: कुब्ज (धारिणी का भृत्य)।
वैतालिक	: स्तुतिगायक।

स्त्री-पात्र

मालविका	: माधवसेन की बहन (नायिका)।
धारिणी	: अग्निमित्र की पटरानी।
इरावती	: अग्निमित्र की दूसरी रानी।
कौशिकी	: (परिव्राजिका) माधवसेन के सचिव सुमति की विधवा बहन।
वकुलावलिका	: धारिणी की दासी (मालविका की सखी)।
मधुकरिका	: मालिन।
कौमुदिका	: दासी।
समाहितिका	: परिव्राजिका की सेविका।
निपुणिका	: इरावती की दासी।
जयसेना	: प्रतिहारी।
मदनिका ज्योत्स्निका	: माधवसेन द्वारा भेजी गई शिल्पी दासियाँ।

अन्य पात्र

यज्ञसेन	: विदर्भ का राजा।
माधवसेन	: यज्ञसेन का चचेरा भाई (मालविका का भाई)।
सुमति	: माधवसेन का सचिव।
वसुमित्र	: अग्निमित्र का पुत्र।
पुष्यमित्र	: अग्निमित्र का पिता।
वीरसेन	: धारिणी का भाई (सेनापति)।
मौर्यसचिव	: मौर्यवंशियों का मन्त्री (यज्ञसेन का साला)।
धुवसिद्धि	: विषवैद्य।
वसुलक्ष्मी	: राजकुमारी (अग्निमित्र की पुत्री)।
माधविका	: भू-गृह में नियुक्त सेविका।
चन्द्रिका	: रानी इरावती की दासी।

॥ श्रीः ॥

मालविकाग्निमित्रम्

प्रथमोऽङ्कः

एकैश्वर्ये स्थितोऽपि प्रणतबहुफले यः स्वयं कृत्तिवासाः
कान्तासम्मिश्रदेहोऽप्यविषयमनसां यः परस्ताद् यतीनाम्।
अष्टाभिर्यस्य कृत्स्नं जगदपि तनुभिर्बिभ्रतो नाभिमानः
सन्मार्गालोकनाय व्यपनयतु स वस्तामसीं वृत्तिमीशः ॥ १ ॥

(नान्द्यन्ते)

सूत्रधारः—अलमतिविस्तरेण (नेपथ्याभिमुखमवलोक्य)। मारिष ! इतस्तावत्।

(प्रविश्य)

पारिपार्श्विकः—भाव ! अयमस्मि।

सूत्रधारः—अभिहितोऽस्मि विद्वत्परिषदा—'कालिदासग्रथितवस्तु मालविकाग्निमित्रं नाम नाटकमस्मिन्वसन्तोत्सवे प्रयोक्तव्यमि'ति। तदारभ्यतां सङ्गीतकम्।

पारिपार्श्विकः—मा तावत्। प्रथितयशसां भाससौमिल्लकविपुत्रादीनां प्रबन्धानतिक्रम्य वर्तमानकवेः कालिदासस्य क्रियायां कथं बहुमानः।

अपने भक्तों को मनोवांछित फल देने के लिए अपने पास अपार भाण्डार होते हुए भी जो केवल हाथी की खाल ओढ कर ही अपना काम चला लेते हैं, अपने आधे शरीर में अपनी पत्नी गौरी को बसाये रहने पर भी जो संसार के भोगों से अपना मन दूर हटाये रहते हैं और अपने आठों रूपो से सम्पूर्ण संसार का पालन करते हुए भी जो अभिमान को पास फटकने नहीं देते, ऐसे संसार के स्वामी शङ्कर भगवान्, पाप की ओर ले जाने वाली आप लोगों की बुद्धि को इस प्रकार नष्ट कर दें कि आप लोगों का मन अच्छे कार्यों के सम्पादन में उन्मुख हो जाय ॥ १ ॥

(नान्दीपाठ के अनन्तर)

सूत्रधार—नान्दीपाठ के विस्तार की आवश्यकता नहीं। **(नेपथ्य की ओर देखकर)** अरे भाई मारिष ! इधर तो आओ।

पारिपार्श्विक—**(प्रवेश कर)** आर्य ! यह मै आ गया हूँ।

सूत्रधार—विद्वानों की सभा ने मुझसे कहलाया है कि वसन्तोत्सव के अवसर पर महाकवि कालिदास द्वारा विरचित 'मालविकाग्निमित्र' नाटक का ही अभिनय किया जाय। अतएव चलकर संगीत का कार्य प्रारम्भ करो।

पारिपार्श्विक—नहीं, यह उचित नहीं है। भास, सौमिल्लक और कविपुत्र जैसे महान् प्रसिद्ध

सूत्रधारः—अयि ! विवेकविश्रान्तमभिहितम्। पश्य—

पुराणमित्येव न साधु सर्वं न चापि काव्यं नवमित्यवद्यम्।
सन्तः परीक्ष्यान्यतरद्भजन्ते मूढः परप्रत्ययनेयबुद्धिः॥ २॥

पारिपार्श्विकः—आर्यमिश्राः प्रमाणम्।

सूत्रधारः—तेन हि त्वरतां भवान्।

शिरसा प्रथमगृहीतामाज्ञामिच्छामि परिषदः कर्तुम्।
देव्या इव धारिण्याः सेवादक्षः परिजनोऽयम्॥ ३॥

(निष्क्रान्तौ)

॥ प्रस्तावना ॥

(ततः प्रविशति वकुलावलिका)

बकुलावलिका—आणत्तम्हि देवीए धारिणीए। अइरप्पउत्तोवदेसं छलिअं णाम णट्टुअं अंदरेण कीरिसी मालविअ त्ति णट्टाअरिअं अज्जगणदासं पुच्छिदुं। ता दाव संगीदसालं गच्छम्हि। (इति परिक्रामति) [**आज्ञप्तास्मि देव्या धारिण्या। अचिरप्रवृत्तोपदेशं छलिकं नाम नाट्यमन्तरेण कीदृशी मालविकेति नाट्याचार्यमार्यगणदासं प्रष्टुम्। तत्तावत्सङ्गीतशालां गच्छामि।**]

(ततः प्रविशत्याभरणहस्ता कौमुदिका)

बकुलावलिका—(कौमुदिकां दृष्ट्वा) हला कोमुदीए ! कुदो दे दाणिं इअं धीरदा, जं समीवेण वि अदिक्कमंती इदो दिट्ठिं ण देसि। [**सखि कौमुदिके ! कुतस्त इदानीमियं धीरता, यत्समीपेनाप्यतिक्रामन्तीतो दृष्टिं न ददासि।**]

कवियों के नाटकों को छोड़कर आप आजकल के इस वर्तमान कवि कालिदास के नाटक को इतना महत्त्व क्यों दे रहे हैं ?

सूत्रधार—अरे, यह बात तो तुमने अपनी बुद्धि को विश्राम देकर कही है। देखो—

पुराने होने से ही न तो सब अच्छे हो जाते हैं, न नये होने से सब बुरे हो जाते हैं। समझदार लोग तो दोनों के गुण-दोषों की पूर्ण रूप से विवेचना करके उनमें से जो अच्छा होता है, उसे अपना लेते हैं और जिनके पास अपनी समझ नहीं होती है, उन्हें तो जैसा दूसरे समझा देते हैं, उसे ही वे ठीक मान लेते हैं॥ २॥

पारिपार्श्विक—आपका विचार प्रमाण-सम्पन्न है।

सूत्रधार—अतएव आप शीघ्रता करें।

सभा ने मुझे पहले से ही जो आज्ञा दे रखी है, उसका मैं वैसे ही आदर के साथ पालन करना चाहता हूँ जैसे आदर से यह स्वामिनी-भक्त दासी अपनी स्वामिनी महारानी धारिणी की आज्ञा का पालन करने के लिए इधर चली आ रही है॥ ३॥

(दोनों का प्रस्थान)

॥ प्रस्तावना ॥

(तदनन्तर बकुलावलिका का प्रवेश)

बकुलावलिका—देवी की आज्ञा है कि नाटकाचार्य गुरु गणदास के समीप जाकर पूछो कि छलिक नृत्य में मालविका ने कैसी प्रगति की है ? इसलिए रंगशाला की ओर चलूँ। (**घूमती है**)

(हाथ में आभूषण लिये कौमुदिका का प्रवेश)

बकुलावलिका—(**कौमुदिका को देखकर**) अरी कौमुदिका ! आज इतनी गम्भीर क्यों दिखलाई दे रही हो ? जो पास से ही जाती हुई इधर देखती भी नहीं।

कौमुदिका—अम्हो बउलावलिआ। सहि! देवीए इदं सिप्पिसआसादो आणीदं णागमुद्दासणाहं अंगुलीअअं सिणिद्धं णिज्झाअंती तुह उवालंभे पडिदम्हि। [अहो बकुलावलिका। सखि! देव्या इदं शिल्पिसकाशादानीतं नागमुद्रासनाथमङ्गुलीयकं स्निग्धं निध्यायन्ती तवोपालम्भे पतितास्मि।]

बकुलावलिका—(विलोक्य) ठाणे सज्जदि दिट्ठी। इमिणा अंगुलीअएण उब्भिण्णकिरणकेसरेण कुसुमिदो विअ दे अग्गहत्थो पडिभादि। [स्थाने सज्जति दृष्टिः। अनेनाङ्गुलीयकेनोद्भिन्नकिरणकेसरेण कुसुमित इव तेऽग्रहस्तः प्रतिभाति।]

कौमुदिका—हला, कहिं पत्थिदासि ? [सखि! कुत्र प्रस्थितासि ?]

बकुलावलिका—देवीए एव्व वअणेण णट्टाआरिअं अज्जगणदासं पुच्छिदुं, उवदेसग्गहणे कीरिसी मालविए त्ति। [देव्या एव वचनेन नाट्याचार्यमार्यगणदासं प्रष्टुमुपदेशग्रहणे कीदृशी मालविकेति।]

कौमुदिका—सहि! ईरिसेण वावारेण असंणिहिदा वि सा कहं भट्टिणा दिट्ठा! [सखि! ईदृशेन व्यापारेणासन्निहितापि सा कथं भर्त्रा दृष्टा।]

बकुलावलिका—आं, सो जणो देवीए पास्सगदो चित्ते दिट्ठो। [आम्, स जनो देव्याः पार्श्वगतश्चित्रे दृष्टः।]

कौमुदिका—कहं विअ ? [कथमिव ?]

बकुलावलिका—सुणु। चित्तसालं गदा देवी जदा पच्चग्गवण्णरागं चित्तलेहं आआरिअस्स आलोअंती चिट्ठदि भट्टा अ उवट्ठिदो। [शृणु। चित्रशालां गता देवी यदा प्रत्यग्रवर्णरागां चित्रलेखामाचार्यस्यालोकयन्ती तिष्ठति भर्ता चोपस्थितः।]

कौमुदिका—तदो तदो। [ततस्ततः।]

बकुलावलिका—उवआराणंतरं एक्कासणोवविट्ठेण भट्टिणा चित्तगदाए देवीए परिअणमज्झगदं आसण्णदारिअं देक्खिअ देवी पुच्छिदा। [उपचारानन्तरमेकासनोपविष्टेन भर्त्रा चित्रगताया देव्याः परिजनमध्यगतामासन्नदारिकां दृष्ट्वा देवी पृष्टा।]

कौमुदिका—अरे! तुम हो बकुलावलिका। सखी! अभी स्वर्णकार के यहाँ से महारानी की यह नागमुद्राजटित अँगूठी लाई हूँ। उसी को मैं ध्यान से देख रही थी कि तुमने शीघ्र ही मुझे उलाहना दे दिया।

बकुलावलिका—(देखकर) वास्तव में बडी सुन्दर वस्तु पर तुम्हारी दृष्टि पडी है। इस अँगूठी से केसर के समान जो किरणें निकल रही हैं, उससे तुम्हारी हथेली मानो खिल उठी है।

कौमुदिका—क्यों सखी! तुम किधर जा रही थी ?

बकुलावलिका—मैं भी महारानी धारिणी की आज्ञा से नाट्याचार्य गणदास से यह पूछने जा रही थी कि मालविका की नाट्यशिक्षा कैसी चल रही है ?

कौमुदिका—सखी! इस प्रकार शिक्षा-कार्य में तल्लीन रहने के कारण परोक्षावस्था में होते हुए भी उस मालविका को महाराज अग्निमित्र ने कैसे देख लिया ?

बकुलावलिका—अरे! वह चित्र में महारानी के पास बैठी हुई थी, उसी को महाराज ने देख लिया।

कौमुदिका—कैसे ?

बकुलावलिका—सुनो। जब महारानी चित्रशाला में पहुँचकर चित्रकला के आचार्य के हाथ के बनाये हुए गीले चित्रों को देख रही थीं, उसी समय स्वामी भी वहाँ पहुँच गये।

कौमुदिका—तब, तब।

कौमुदिका—किं ति ? [किमिति ?]

बकुलावलिका—अपुव्वा इअं दारिआ देवीए आसण्णा आलिहिदा किं णामहेए त्ति। [अपूर्वेयं दारिका देव्या आसन्ना आलिखिता किन्नामधेयेति।]

कौमुदिका—आकिदिविसेसेसु आअरो पदं करेति। तदो तदो। [आकृतिविशेषेष्वादरः पदं करोति। ततस्ततः।]

बकुलावलिका—तदो अवहीरिअवअणो भट्टा संकिदो देवीं पुणो वि अणुवंधिदुं। तदो कुमारीए वसुलच्छीए आअक्खिदं—'अज्ज, एसा मालविए' त्ति। [ततोऽवधीरितवचनो भर्ता शङ्कितो देवीं पुनरप्यनुवन्धुम्। ततः कुमार्या वसुलक्ष्म्या आख्यातम्— 'आर्य! एषा मालविके'ति।]

कौमुदिका—(सस्मितम्) सरिसं खु वालभाअस्स। अदो अवरं कहेहि। [सदृशं खलु वालभावस्य। अतोऽपरं कथय।]

बकुलावलिका—किं अण्णं। संपदं मालविआ सविसेसं भट्टिणो दंसणपहादो रक्खीअदि। [किमन्यत्। साम्प्रतं मालविका सविशेषं भर्तुर्दर्शनपथाद्रक्ष्यते।]

कौमुदिका—हला! अणुचिट्ठ अत्तणो णिओअं। अहं वि एदं अंगुलीअअं देवीए उवणइस्सं। (इति निष्क्रान्ता) [सखि! अनुतिष्ठात्मनो नियोगम्। अहमप्येतदङ्गुलीयकं देव्यै उपनेष्यामि।]

बकुलावलिका—(परिक्रम्यावलोक्य) एसो णट्टाअरिओ संगीदसालादो णिग्गच्छदि। जाव से अत्ताणं दंसेमि। (इति परिक्रामति) [एष नाट्याचार्यः सङ्गीतशालातो निर्गच्छति। यावदस्मै आत्मानं दर्शयामि।]

(प्रविश्य)

गणदासः—कामं खलु सर्वस्यापि कुलविद्या बहुमता। न पुनरस्माकं नाट्यं प्रति मिथ्यागौरवम्। तथाहि—

बकुलावलिका—अभिवादन-व्यवहार हो चुकने पर महाराज भी महारानी के साथ एक ही आसन पर बैठ गए। तब चित्र में बनी हुई महारानी की दासियों में पास ही खड़ी हुई कन्या को देखकर महाराज ने देवी से पूछा।

कौमुदिका—क्या ?

बकुलावलिका—कि चित्र में देवी के पास बैठी हुई यह कौन सुन्दर दासी है ?

कौमुदिका—सुन्दरता की ओर सबका हृदय आकृष्ट हो ही जाता है। हाँ, तो फिर क्या हुआ ?

बकुलावलिका—देवी को चुप देखकर महाराज के मन में शङ्का उत्पन्न हो गई। उन्होंने फिर वही प्रश्न दुहराया। इसी बीच कुमारी वसुलक्ष्मी बोल उठी—आर्य! यह मालविका है।

कौमुदिका—(मुस्कराती हुई) यह तो बाल्य-काल के अनुरूप ही है। हाँ, तो फिर क्या हुआ ?

बकुलावलिका—और कोई बात नहीं है। उसी दिन से मालविका को महाराज की दृष्टि से विशेष रूप से अलग रखा जाता है अर्थात् उस पर कड़ा पहरा लगा दिया गया है।

कौमुदिका—अच्छा सखी! जाओ तुम भी अपना काम करो और मैं भी जाकर यह अँगूठी महारानी को दे आती हूँ। (चली जाती है)

बकुलावलिका—(घूमकर और देखकर) नाट्याचार्यजी तो संगीतशाला से निकले आ रहे हैं। मैं चलकर इनसे मिल लूँ। (घूमती है)

देवानामिदमामनन्ति मुनयः शान्तं क्रतुं चाक्षुषं
रुद्रेणेदमुमाकृतव्यतिकरे स्वाङ्गे विभक्तं द्विधा।
त्रैगुण्योद्भवमत्र लोकचरितं नानारसं दृश्यते
नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधकम्॥ ४॥

बकुलावलिका—(उपेत्य) अज्ज! वंदामि। [आर्य! वन्दे।]

गणदासः—भद्रे! चिरं जीव।

बकुलावलिका—अज्ज! देवी पुच्छदि—अवि उवदेसग्गहणे णादिकीलिस्सदि वो सिस्सा मालविए त्ति। [आर्य! देवी पृच्छति—अप्युपदेशग्रहणे नातिक्लिश्नाति वः शिष्या मालविकेति।]

गणदासः—भद्रे! विज्ञाप्यतां देवी परमनिपुणा मेधाविनी चेति। किं बहुना—

यद्यत्प्रयोगविषये भाविकमुपदिश्यते मया तस्यै।
तत्तद्विशेषकरणात्प्रत्युपदिशतीव मे बाला॥ ५॥

बकुलावलिका—(आत्मगतम्) अदिक्कमती विअ इरावदिं पेक्खामि। (प्रकाशम्) किदत्था दाणिं वो सिस्सा जाए गुरुअणो एवं तुस्सदि। [अतिक्रामन्तीमिवेरावतीं पश्यामि। कृतार्थेदानीं वः शिष्या यस्या गुरुजन एवं तुष्यति।]

गणदासः—भद्रे! तद्विधानामसुलभत्वात्पृच्छामि। कुतो देव्या तत्पात्रमानीतम्।

बकुलावलिका—अत्थि देवीए वण्णावरो भादा वीरसेणो णाम। सो भट्टिणा णम्मदातीरे अंतवालदुग्गे ठाविदो। तेण सिप्पाहिआरे जोग्गा इअं दारिए त्ति भणिअ भइणीए देवीए उवाअणं

(प्रवेश करके)

गणदास—यों तो सभी अपनी वंशपरम्परागत विद्या को सबसे अच्छा समझते हैं, परन्तु हम लोग जो अपनी विद्या का इतना अभिमान करते हैं, वह झूठा नहीं। क्योंकि—

नाट्यशास्त्र के प्रवर्तक भरतादि मुनि लोगों का कहना है कि नाट्य देवताओं की आँखों को सुहाने वाला यज्ञ है। स्वयं महादेव शङ्कर ने पार्वती से विवाह करके अपने अर्द्धनारीश्वर अंग में इसके दो भाग कर लिये हैं। एक ताण्डव और दूसरा लास्य। इसमें सत्त्व, रज और तम तीनों गुण दिखलाई पड़ते हैं और अनेक रसों से सम्पन्न मानवों के चरित्र भी दिखलाई पडते हैं। अतएव भिन्न-भिन्न रुचि वाले लोगों के लिए प्रायः नाटक ही एक ऐसा उत्सव है, जिसमें सबको एक-सा आनन्द मिलता है॥ ४॥

बकुलावलिका—(समीप जाकर) आर्य! तुम्हें नमस्कार है।

गणदास—कल्याणमयि! आयुष्मती हो।

बकुलावलिका—महोदय! महारानी धारिणी आपसे पूछती हैं कि मेरी परिचारिका और आपकी शिष्या मालविका संगीत-शिक्षा के ग्रहण करने में आपको अधिक कष्ट तो नहीं देती है?

गणदास—भद्रे! महारानी से कह देना कि वह बड़ी चतुर और समझदार और शिक्षाग्राहिका बुद्धि से सम्पन्न है। अधिक क्या कहें—

मैं जो-जो भाव उसे सिखलाता हूँ उन्हें जब वह और भी सुन्दरता के साथ करके दिखलाने लगती है तब ऐसा जान पडता है मानों वह उल्टे मुझे ही सिखा रही है॥ ५॥

बकुलावलिका—(मन ही मन) जान पडता है कि यह इरावती को तो पछाड़ ही देगी। (प्रकट) धन्य है आपकी वह शिष्या जिसके गुरु उससे इतने प्रसन्न हैं।

गणदास—भद्रे! ऐसे शिष्य दुर्लभ होते हैं, आसानी से नहीं मिलते। इसलिए मैं तुमसे पूछता हूँ कि ऐसी योग्य बाला रानी को कहाँ से मिली?

पेसिदा। [अस्ति देव्या वर्णावरो भ्राता वीरसेनो नाम। स भर्त्रा नर्मदातीरेऽन्तपालदुर्गे स्थापितः। तेन शिल्पाधिकारे योग्येयं दारिकेति भणित्वा भगिन्या देव्या उपायनं प्रेषिता।]

गणदासः—(आत्मगतम्) आकृतिविशेषप्रत्ययादेनामनूनवस्तुकां सम्भावयामि। (प्रकाशम्) भद्रे! मयापि यशस्विना भवितव्यम्। यतः—

पात्रविशेषे न्यस्तं गुणान्तरं व्रजति शिल्पमाधातुः।
जलमिव समुद्रशुक्तौ मुक्ताफलतां पयोदस्य॥ ६॥

वकुलावलिका—अज्ज! कहिं दाणिं वो सिस्सा। [आर्य! कुत्रेदानीं वः शिष्या।]

गणदासः—इदानीमेव पञ्चाङ्गाभिनयमुपदिश्य मया विश्रम्यतामित्यभिहिता दीर्घिकावलोकन-गवाक्षगता प्रवातमासेवमाना तिष्ठति।

वकुलावलिका—तेण हि पुणो अणुजाणादु मं अज्जो। जाव से अज्जस्स परितोसणिवेदणेण उस्साहं वड्ढेमि। [तेन हि पुनरनुजानातु मामार्यः। यावदस्या आर्यस्य परितोषनिवेदनेनोत्साहं वर्धयामि।]

गणदासः—दृश्यतां सखी। अहमपि लब्धक्षणः स्वगृहं गच्छामि।

(इति निष्क्रान्तौ)

॥ मिश्रविष्कम्भकः ॥

(ततः प्रविशत्येकान्तस्थितपरिजनो मन्त्रिणा लेखहस्तेनान्वास्यमानो राजा)

राजा—(अनुवाचितलेखममात्यं विलोक्य) वाहतक! किं प्रतिपद्यते वैदर्भः?

अमात्यः—देव! आत्मविनाशम्।

वकुलावलिका—महारानी के वीरसेन नामक एक दूर के भाई हैं। उन्हें महाराज ने नर्मदातट वाले अन्तपाल दुर्ग की सुरक्षा का काम सौंप रखा है। उन्होंने ही अपनी बहिन धारिणी देवी के पास इस कन्या को यह कहलाकर भेज दिया है कि यह गाने-बजाने का काम भलीभाँति सीख सकेगी।

गणदास—(मन ही मन) पर रूप-रंग से तो यह किसी ऊँचे घराने की जान पड़ती है। (प्रकट में) भद्रे! मुझे भी यशस्वि होना चाहिए। क्योंकि—

सिखाने वाले की कला उत्तम शिष्य के पास पहुँचकर उसी प्रकार विकसित हो जाती है जैसे बादल का जल समुद्र की सीपों में पहुँच कर मोती बन उठता है॥ ६॥

वकुलावलिका—आर्य! आपकी शिष्या इस समय कहाँ है?

गणदास—अभी उसे पाँचों अंगों का अभिनय सिखाकर मैंने उसे थोड़ा विश्राम करने को कहा है। अतएव वह उस खिड़की पर वायु सेवन करती हुई बैठी है, जहाँ से बावली दिखलाई पड़ती है।

वकुलावलिका—आर्य! आप मुझे आज्ञा दीजिए कि मैं उसे यह कहकर उत्साहित करूँ कि गुरुदेव उससे इतने प्रसन्न हैं।

गणदास—अपनी सखी को देखो, मैं भी अवकाश प्राप्त कर अपने घर जा रहा हूँ।

(दोनों चले जाते हैं)

॥ मिश्रविष्कम्भक ॥

(तब महाराज प्रवेश करते हैं, जिनके परिजन एक ओर बैठे हैं और मन्त्री समीप में हाथ में पत्र लिये बैठे हैं)

राजा—(मन्त्री द्वारा पढ़ लेने पर देखकर) वाहतक! विदर्भ के राजा क्या चाहते हैं?

अमात्य—देव! अपना सत्यानाश।

राजा—सन्देशमिदानीं श्रोतुमिच्छामि।

अमात्यः—इदमिदानीमनेन प्रतिलिखितम्—पूज्येनाहमादिष्टः—'भवतः पितृव्यपुत्रः कुमारो माधवसेनः प्रतिश्रुतसम्बन्धो ममोपान्तिकमुपसर्पन्नन्तरा त्वदीयेनान्तपालेनावस्कन्द्य गृहीतः। स त्वया मदपेक्षया सकलत्रसोदर्यो मोक्तव्य' इति। एतन्नु वो विदितं यत्तुल्याभिजनेषु राज्ञां वृत्तिः। अतोऽत्र मध्यस्थः पूज्यो भवितुमर्हति। सोदरा पुनरस्य ग्रहणविप्लवे विनष्टा। तदन्वेषणाय प्रयतिष्ये। अथवा अवश्यमेव माधवसेनो मया पूज्येन मोचयितव्यः। श्रूयतामभिसन्धिः—

मौर्यसचिवं विमुञ्चति यदि पूज्यः संयतं मम श्यालम्।
मोक्ता माधवसेनस्ततो मया बन्धनात्सद्यः॥७॥

इति।

राजा—(सरोषम्) कथं कार्यविनिमयेन मयि व्यवहरत्यनात्मज्ञः। वाहतक! प्रकृत्यमित्रः प्रतिकूलकारी च मे वैदर्भः। तद्यातव्यपक्षे स्थितस्य पूर्वसङ्कल्पितसमुन्मूलनाय वीरसेनमुखं दण्डचक्रमाज्ञापय।

अमात्यः—यदाज्ञापयति देवः।

राजा—अथवा किं भवान्मन्यते?

अमात्यः—शास्त्रदृष्टमाह देवः।

अचिराधिष्ठितराज्यः शत्रुः प्रकृतिष्वरूढमूलत्वात्।
नवसंरोपणशिथिलस्तरुरिव सुकरः समुद्धर्तुम्॥८॥

राजा—अब उनका सन्देश सुनना चाहता हूँ।

अमात्य—उन्होंने उत्तर में लिखा है—'आपने जो मुझे यह आज्ञा दी थी कि आपके चचेरे भाई कुमार माधवसेन पहले से निश्चित किये सम्बन्ध के अनुसार मुझसे अपनी बहिन का ब्याह करने के लिए जब चले आ रहे थे तब बीच में ही आपके राज्य की सीमा के रक्षकों ने उन्हें पकड़ कर बाँध लिया है। उन्हें आप मेरे कहने से स्त्री और बहिन के साथ छोड दीजिए।' इस सम्बन्ध में मुझे यह कहना है कि आप महान् हैं और आप यह पूर्णरूप से जानते हैं कि समवंशीय राजाओं के झगड़े किस प्रकार निपटाने चाहिए। अतः आप इसमें बीच-बचाव कर सकते हैं। इसी झंझट में माधवसेन की बहिन कहीं खो गई है। मैं उसे खोजने का प्रयत्न करूँगा। यदि आप भी माधवसेन को मुक्त करना चाहते हैं तो यह शर्त मान लीजिए—

आदरणीय आप यदि मेरे साले मौर्यसचिव को, जो आपका बन्दी है, छोड़ दें तो मैं भी माधवसेन को शीघ्र बन्धन-मुक्त कर दूँगा॥७॥

राजा—(क्रोध के साथ) क्या यह धृष्ट मुझसे इस प्रकार बदला लेने का व्यवहार करना चाहता है? देखो वाहतक! यह विदर्भ का राजा स्वभाव से ही मेरा शत्रु है, जो मेरे विपरीत ही कार्य करता है। अतः वीरसेन के नायकत्व में जितनी सेना है, उसे आज्ञा दो कि जाकर उसे जड़ से उखाड फेंके, क्योंकि हम लोगों का संकल्प है कि ऐसे दुष्ट शत्रु को उखाड फेंकना ही उचित है।

अमात्य—जैसी महाराज की आज्ञा।

राजा—पर इसमें आपकी क्या सम्मति है?

अमात्य—महाराज ने तो पहिले ही शास्त्र की बात कह दी है कि—

जो शत्रु अभी नया-नया राज्यसिंहासन पर बैठा हो और जो पूर्णरूप से प्रजा में अपनी जड़ न जमा सका हो, वह नये रोपे हुए दुर्बल पौधे के समान बड़ी सरलता के साथ उखाड़ा जा सकता है॥८॥

राजा—तेन ह्यवितथं तन्त्रकारवचनम्। इदमेव वचनं निमित्तमुपादाय समुद्योज्यतां सेनाधिपतिः।

अमात्यः—तथा। (इति निष्क्रान्तः)

(परिजनो यथाव्यापारं राजानमभितः स्थितः)

(प्रविश्य)

विदूषकः—आणत्तो म्हि तत्तभवदा रण्णा— गोदम! चिंतेहि दाव उवाअं। जह मे जदिच्छादिट्ठप्पदिकिदी मालविआ पच्चक्खदंसणा होदि त्ति। मए अ तं तहा किदं दाव से णिवेदेमि। (इति परिक्रामति) [आज्ञप्तोऽस्मि तत्रभवता राज्ञा— गौतम! चिन्तय तावदुपायम्। यथा मे यदृच्छादृष्टप्रतिकृतिर्मालविका प्रत्यक्षदर्शना भवतीति। मया च तत्तथा कृतं तावदस्मै निवेदयामि।]

राजा—(विदूषकं दृष्ट्वा) अयमपरः कार्यान्तरसचिवोऽस्माकमुपस्थितः।

विदूषकः—(उपगम्य) वड्ढदु भवं। [वर्धतां भवान्।]

राजा—(सशिरःकम्पम्) इत आस्यताम्।

(विदूषक उपविष्टः)

राजा—अपि कच्चिदुपेयोपायदर्शनि व्यापृतं ते प्रज्ञाचक्षुः।

विदूषकः—पओअसिद्धिं पुच्छ। [प्रयोगसिद्धिं पृच्छ।]

राजा—कथमिव।

विदूषकः—(कर्णे) एव्वमिव। [एवमिव।]

राजा—साधु वयस्य! निपुणमुपक्रान्तम्। इदानीं दुरधिगमसिद्धावप्यस्मिन्नारम्भे वयमाशंसामहे। कुतः—

राजा—तब तो शास्त्र की बात यहाँ पर सत्य ज्ञात हो रही हैं। अतः शास्त्र के इसी वचन के आधार पर सेनापति को तैयार करो।

अमात्य—अच्छी बात है। **(यह कहकर चला जाता है)**

(सम्पूर्ण सेवक राजा के चारों ओर खड़े हुए अपना-अपना काम कर रहे हैं)

(प्रवेश कर)

विदूषक—मुझे महाराज ने आज्ञा दी थी कि गौतम! कोई ऐसा उपाय सोचं निकालो कि जिस मालविका को मैंने अचानक चित्र में देख लिया है उसे मैं अपनी आँखों से तो देख पाऊँ। मैंने उसके लिए जो उपाय निकाला है, चलकर उसे अभी महाराज को बतलाता हूँ। **(घूमता है)**

राजा—**(विदूषक को देखकर)** ये हमारे अन्य कार्य के सहायक सचिव आ गये।

विदूषक—**(पास पहुँच कर)** महाराज की जय हो।

राजा—**(सिर हिलाकर)** आओ यहाँ बैठो।

(विदूषक बैठ जाता है)

राजा—ज्ञान-नेत्रसम्पन्न आपने मालविका-मिलन के लिए कोई उपाय सोचा?

विदूषक—कार्य-सिद्धि के विषय में पूछिये, उपाय क्या पूछ रहे हैं?

राजा—कैसे?

विदूषक—**(कान में)** इस प्रकार।

राजा—वाह मित्र! तुमने बड़ी चतुराई का काम किया है। यह कार्य तो अत्यन्त कठिन है, परन्तु तुमने जैसा आरम्भ किया है, उससे कुछ-कुछ आशा हो चली है। क्योंकि—

अर्थ सप्रतिबन्धं प्रभुरधिगन्तुं सहायवानेव।
दृश्यं तमसि न पश्यति दीपेन विना सचक्षुरपि॥ ९॥

(नेपथ्ये)

अलं बहु विकत्थ्य। राज्ञः समक्षमेवावयोरधरोत्तरयोर्व्यक्तिर्भविष्यति।

राजा—(आकर्ण्य) सखे! त्वत्सुनीतिपादपस्य पुष्पमुद्भिन्नम्।

विदूषकः—फलं वि अइरेण देक्खिस्ससि। [**फलमप्यचिरेण द्रक्ष्यसि।**]

(ततः प्रविशति कञ्चुकी)

कञ्चुकी—देव! अमात्यो विज्ञापयति। अनुष्ठिता प्रभोराज्ञा। एतौ पुनर्हरदत्तगणदासौ—

उभावभिनयाचार्यौ परस्परजयैषिणौ।
त्वां द्रष्टुमुद्यतौ साक्षाद् भावाविव शरीरिणौ॥ १०॥

राजा—प्रवेशय तौ।

कञ्चुकी—यदाज्ञापयति देवः। (इति निष्क्रम्य ताभ्यां सह प्रविश्य) इत इतो भवन्तौ।

गणदासः—(राजानं विलोक्य) अहो, दुरासदो राजमहिमा—

न च न परिचितो न चाप्यरम्यश्चकितमुपैमि तथापि पार्श्वमस्य।
सलिलनिधिरिव प्रतिक्षणं मे भवति स एव नवो नवोऽयमक्ष्णोः॥ ११॥

हरदत्तः—महत्खलु पुरुषाकारमिदं ज्योतिः। तथाहि—

कठिन कार्यों में जब कोई सहायक मिल जाय तो समझ लेना चाहिए कि अब कार्य हो जायगा। क्योंकि आँखों वाला मनुष्य भी अन्धकार में बिना दीपक के कुछ नहीं देख सकता॥ ९॥

(नेपथ्य में)

अधिक बकवाद न करो। अभी महाराज के सामने ठीक-ठीक पता चल जायेगा कि हम दोनों में कौन छोटा है और कौन बड़ा?

राजा—(**सुनकर**) मित्र! तुम्हारे नीति-वृक्ष में फूल निकल आये।

विदूषक—शीघ्र ही फल भी देखिएगा।

(तब कञ्चुकी प्रवेश करता है)

कञ्चुकी—देव! मन्त्रीजी का कथन है कि आपकी आज्ञा का पालन हो गया। अभिनय के आचार्य हरदत्त और गणदास—

आपस में एक-दूसरे पर विजय प्राप्त करने के इच्छुक होकर आपसे मिलने के लिए बाहर स्थित इस प्रकार ज्ञात हो रहे हैं मानों स्वयं नाटक के भाव ही शरीर धारण करके चले आये हों॥ १०॥

राजा—दोनों को भीतर प्रवेश कराओ।

कञ्चुकी—महाराज की जो आज्ञा। (**बाहर निकलकर दोनों के साथ प्रवेश करके**) इधर से आइए आपलोग, इधर से।

गणदास—(**राजा को देखकर**) वाह, महाराज का तेज भी अद्वितीय है। इनके पास तक पहुँचना कठिन बात हो रही है। क्योंकि—

ऐसी बात नहीं है कि इनसे पहिले से परिचय न हो या ये देखने में भयंकर लग रहे हों, फिर भी न जाने क्यों मुझे इनके पास जाते हुए भय लग रहा है। समुद्र के समान ज्यों के त्यों रहते हुए भी ये मेरी आँखों को पल-पल में नवीन से दिखलाई पड़ रहे हैं॥ ११॥

हरदत्त—पुरुष के रूप में राजा का तेज सचमुच महान् प्रभावशाली है। क्योंकि—

द्वारे नियुक्तपुरुषाभिमतप्रवेशः सिंहासनान्तिकचरेण सहोपसर्पन्।
तेजोभिरस्य विनिवर्तितदृष्टिपातैर्वाक्यादृते पुनरिव प्रतिवारितोऽस्मि॥ १२॥

कञ्चुकी—एष देवः। उपसर्पतां भवन्तौ।

उभौ—(उपेत्य) विजयतां देवः।

राजा—स्वागतं भवद्भ्याम्। (परिजनं विलोक्य) आसने तावदत्रभवतोः।

(उभौ परिजनोपनीतयोरासनयोरुपविष्टौ)

राजा—किमिदं शिष्योपदेशकाले युगपदाचार्याभ्यामत्रोपस्थानम् ?

गणदासः—देव ! श्रूयताम्। मया सुतीर्थादभिनयविद्या सुशिक्षिता। दत्तप्रयोगश्चास्मि। देवेन देव्या च परिगृहीतः।

राजा—वाढं जाने। ततः किम् ?

गणदासः—सोऽहममुना हरदत्तेन प्रधानपुरुषसमक्षमयं मे न पादरजसापि तुल्य इत्यधिक्षिप्तः।

हरदत्तः—देव ! अयमेव प्रथमं परिवादकरः— 'अत्रभवतः किल मम च समुद्रपल्वलयोरिवान्तरमि' ति। तदत्रभवानिमं मां च शास्त्रे प्रयोगे च विमृशतु। देव एव नौ विशेषज्ञः प्राश्निकः।

विदूषकः—समत्थं पइण्णादं। [समर्थं प्रतिज्ञातम्।]

गणदासः—प्रथमः कल्पः। अवहितो देवः श्रोतुमर्हति।

यद्यपि द्वारपाल ने मुझे यहाँ तक पहुँचा दिया है और मैं इनके सिंहासन के पास रहने वाले कञ्चुकी के साथ ही भीतर भी आया हूँ फिर भी इनके तेज से मेरी आँखें इतनी चकित हो गई हैं मानों विना रोके ही मैं वढने से रोक दिया गया हूँ॥ १२॥

कञ्चुकी—ये महाराज हैं, आप लोग आगे वढ़ें।

दोनों—(आगे आकर) देव की जय हो।

राजा—आप दोनों का स्वागत है। (सेवक को देखकर) आप लोगों के लिए आसन तो लाओ।

(सेवक के लाये हुए आसनों पर दोनों बैठते हैं)

राजा—कहिए, यह तो शिष्यों को पढाने का समय है। इस समय आप दोनों आचार्य एक साथ कैसे आ पहुँचे ?

गणदास—सुनिए देव! मैंने वड़े योग्य गुरु से विद्या सीखी है और इतने दिनों से सिखा भी रहा हूँ। महाराज और महारानी के द्वारा मैं सम्मानित भी हुआ हूँ।

राजा—यह तो मैं जानता हूँ, तो फिर क्या हुआ ?

गणदास—आज इन हरदत्तजी ने प्रधान राजपुरुष के समक्ष यह कहकर अपमानित किया है कि मैं इनकी पदधूलि के समान भी नहीं हूँ।

हरदत्त—इन्होंने ही सर्वप्रथम मेरी निन्दा करते हुए कहा कि इनमें और मुझमें समुद्र और गड्ढे का-सा अन्तर है। अव आप इन्हें और मुझे नाटचशास्त्र तथा अभिनय कर्म में जाँच कर लें। आप ही हम दोनों के प्रश्नों द्वारा गुण निश्चित करने वाले परीक्षक हैं।

विदूषक—उचित कहा।

गणदास—ठीक है। आप सावधान होकर सुनें।

राजा—तिष्ठ तावत्। पक्षपातमत्र देवी मन्यते। तदस्याः पण्डितकौशिकीसहितायाः समक्षमेव न्याय्यो व्यवहारः।

विदूषकः—सुट्ठु भवं भणादि। [सुष्ठु भवान्भणति।]

आचार्यौ—यद्देवाय रोचते।

राजा—मौद्गल्य! अमुं प्रस्तावं निवेद्य पण्डितकौशिक्या सार्धमाहूयतां देवी।

कञ्चुकी—यदाज्ञापयति देवः। (इति निष्क्रम्य सपरिव्राजिकया देव्या सह प्रविष्टः) इत इतो भवती।

धारिणी—(परिव्राजिकां विलोक्य) भअवदि! हरदत्तस्स गणदासस्स अ संरंभं कहं पेक्खसि। [भगवति! हरदत्तस्य गणदासस्य च संरम्भे कथं पश्यसि।]

परिव्राजिका—अलं स्वपक्षावसादशङ्क्या। न परिहीयते प्रतिवादिनो गणदासः।

धारिणी—जइ वि एवं तह वि राअपरिग्गहो पहाणत्तणं उवहरदि। [यद्यप्येवं तथापि राजपरिग्रहः प्रधानत्वमुपहरति।]

परिव्राजिका—अयि, राज्ञीशब्दभाजनमात्मानमपि चिन्तयतु भवती। पश्य—

अतिमात्रभासुरत्वं पुष्यति भानोः परिग्रहादनलः।
अधिगच्छति महिमानं चन्द्रोऽपि निशापरिगृहीतः॥ १३॥

विदूषकः—अइ, उणट्ठिदा देवी पीठमद्दिअं पंडिअकोसिइं पुरोकरिअ तत्तभोदी धारिणी। [अयि! उपस्थिता देवी पीठमर्दिकां पण्डितकौशिकीं पुरस्कृत्य तत्रभवती धारिणी।]

राजा—पश्याम्येनाम्। यैषा—

मङ्गलालङ्कृता भाति कौशिक्या यतिवेषया।
त्रयी विग्रहवत्येव सममध्यात्मविद्यया॥ १४॥

राजा—अभी ठहरो। यदि हम निर्णय करेंगे तो देवी समझेंगी कि मैंने पक्षपात किया है, अतएव उनके और विदुषी कौशिकी के सामने ही निर्णय किया जाना चाहिए।

विदूषक—आप ठीक कह रहे हैं।

दोनों—जैसा देव उचित समझें।

राजा—मौद्गल्य! यह प्रस्ताव कहकर पण्डिता कौशिकी के साथ रानी को बुला लाओ।

कञ्चुकी—महाराज की जो आज्ञा। (निकलकर परिव्राजिका सहित देवी के साथ प्रवेश करता है) इधर से आइए देवी इधर से।

धारिणी—(परिव्राजिका को देखकर) भगवती! हरदत्त और गणदास के विवाद में आप किसकी विजय सोचती हैं?

परिव्राजिका—आप अपने पक्ष के पराजय की बात न सोचिए। गणदास अपने प्रतिवादी से कुछ कम नहीं है।

धारिणी—यद्यपि यह ठीक है तथापि राजा की कृपा जिस पर होगी वह जीत जायेगा।

परिव्राजिका—आप भी स्मरण रखें कि आप भी महारानी हैं। देखिए—

जिस प्रकार सूर्य की कृपा से अग्नि में बहुत चमक आ जाती है, वैसे ही रात की कृपा पाकर चन्द्रमा में भी बहुत चमक आ जाती है॥ १३॥

विदूषक—अहा! महारानी धारिणीजी संगिनी पण्डिता कौशिकी को साथ लिये हुए इधर चली आ रही हैं।

राजा—इनको देखता हूँ। जो यह—

परिव्राजिका—(उपेत्य) विजयतां देवः।

राजा—भगवति ! अभिवादये।

परिव्राजिका—

महासारप्रसवयोः सदृशक्षमयोर्द्वयोः।
धारिणीभूतधारिण्योर्भव भर्ता शरच्छतम्॥ १५॥

धारिणी—जेदु जेदु अज्जउत्तो। [जयतु जयत्वार्यपुत्रः।]

राजा—स्वागतं देव्यै। (परिव्राजिकां विलोक्य) भगवति ! क्रियतामासनपरिग्रहः।

(सर्व उपविशन्ति)

राजा—भगवति ! अत्रभवतोर्हरदत्तगणदासयोः परस्परं विज्ञानसङ्घर्षिणोर्भगवत्या प्राश्निक-पदमध्यासितव्यम्।

परिव्राजिका—(सस्मितम्) अलमुपालम्भेन। पत्तने सति ग्रामे रत्नपरीक्षा ?

राजा—नैतदेवम्। पण्डितकौशिकी खलु भगवती, पक्षपातिनावहं देवी च।

आचार्यौ—सम्यगाह देवः। मध्यस्था भगवती नौ गुणदोषतः परिच्छेत्तुमर्हति।

राजा—तेन हि प्रस्तूयतां विवादः।

परिव्राजिका—देव ! प्रयोगप्रधानं हि नाट्यशास्त्रम्। किमत्र वाग्व्यवहारेण। कथं वा देवी मन्यते।

देवी—जइ मं पुच्छसि तदा एदाणं विवादो एव्व ण मे रोअदि। [यदि मां पृच्छसि तदैतयोर्विवाद एव न मे रोचते।]

संन्यासिनी वेशवाली कौशिकी के साथ वस्त्रों और आभूषणों से सुसज्जित महारानी ऐसी ज्ञात होती है मानों अध्यात्मविद्या के साथ शरीरधारिणी वेदत्रयी चली आ रही हो॥ १४॥

परिव्राजिका—(**समीप जाकर**) महाराज की जय हो।

राजा—भगवती ! मैं आपको प्रणाम करता हूँ।

परिव्राजिका—सैकडों वर्षों तक महातेजस्वियों को उत्पन्न करने वाली उन पृथ्वी और धारिणी देवी के आप स्वामी बने रहें जिनमें सहन करने की शक्ति एक समान है॥ १५॥

धारिणी—जय हो, आर्यपुत्र की जय हो।

राजा—देवी का स्वागत है। (**परिव्राजिका की ओर देखकर**) आइए बैठिए भगवती।

(**सभी बैठते हैं**)

राजा—भगवती आचार्य हरदत्त और गणदास अभिनय कला का विवाद लेकर आये हैं। इन दोनों में कौन योग्य हैं ? इसके निर्णय के लिए आप मध्यस्थ बनें।

परिव्राजिका—(**मुस्कराकर**) आप मुझे अपमानित न करें। भला नगर के रहते हुए कहीं रत्न की परीक्षा गाँव में की जाती है।

राजा—नहीं ऐसी बात नहीं है। आप विदुषी हैं, मुझे और देवी को पक्षपाती भी कहा जा सकता है।

दोनों आचार्य—महाराज ने ठीक कहा। निष्पक्ष भगवती ही हम लोगों के गुण-दोष की परीक्षा कर सकेंगी।

राजा—आप लोग शास्त्रार्थ प्रारम्भ करें।

परिव्राजिका—महाराज ! नाट्यशास्त्र तो अभिनय है। केवल वाग्विवाद से क्या लाभ ? देवी का क्या विचार है ?

देवी—यदि मुझसे पूछा जाय तो मुझे इनका विवाद अच्छा नहीं लगता।

गणदासः—देवि ! न मां समानविद्यया परिभवनीयमवगन्तुर्महसि।

विदूषकः—भोदि ! पेक्खामो उअरंभरिसंवादं। किं मुहा वेअणदाणेण एदेणं। [भवति ! पश्याम उदरम्भरिसंवादम्। किं मुधा वेतनदानेनैतेषाम् ?]

देवी—णं कलहप्पिओसि। [ननु कलहप्रियोऽसि।]

विदूषकः—मा एव्वं। चण्डि ! अण्णोण्णकलहप्पिआणं मत्तहत्थीणं एक्कदरस्सिं अणिज्जिदे कुदो उवसमो ? [मैवम्। चण्डि ! अन्योन्यकलहप्रिययोर्मत्तहस्तिनोरेकतरस्मिन्ननिर्जिते कुत उपशमः ?]

राजा—ननु स्वाङ्गसौष्ठवातिशयमुभयोर्दृष्टवती भगवती।

परिव्राजिका—अथ किम् ?

राजा—तदिदानीमतः परं किमाभ्यां प्रत्याययितव्यम्।

परिव्राजिका—तदेव वक्तुकामास्मि।

श्लिष्टा क्रिया कस्यचिदात्मसंस्था सङ्क्रान्तिरन्यस्य विशेषयुक्ता।
यस्योभयं साधु स शिक्षकाणां धुरि प्रतिष्ठापयितव्य एव॥ १६॥

विदूषकः—सुदं अज्जेहिं भअवदीए वअणं। एसो पिंडितत्थो उवदेसदंसणादो णिण्णओ त्ति। [श्रुतमार्याभ्यां भगवत्या वचनम्। एष पिण्डितार्थ उपदेशदर्शनान्निर्णय इति।]

हरदत्तः—परमभिमतं नः।

गणदासः—देवि ! एवं स्थितम्।

देवी—जदा उण मंदमेधा सिस्सा उवदेसं मलिणेंति तदा आअरिअस्स ण दोसो। [यदा पुनर्मन्दमेधा शिष्या उपदेशं मलिनयन्ति तदाऽऽचार्यस्य न दोषः।]

गणदास—देवी ! आप यह न समझें कि मैं नाट्यविद्या में किसी से हार जाऊँगा।

विदूषक—तो देवी ! इन दोनों पेटुओं का कार्य देख ही क्यों न लिया जाय ? नहीं तो इन्हें वेतन देकर पालने से क्या लाभ ?

देवी—तुम्हें तो कलह ही अच्छा लगता है।

विदूषक—ऐसा न कहें। चण्डी ! इन दोनों झगडालू मदमत्त हाथियों में से जब तक एक की हार नहीं हो जायगी तब तक शान्ति कैसे होगी ?

राजा—भगवती ! आपने तो इन दोनों के अभिनय-चातुर्य को देखा ही होगा ?

परिव्राजिका—हाँ, देखा है मैंने।

राजा—तो इससे बढ़कर ये अपनी कुशलता का और क्या प्रमाण देंगे ?

परिव्राजिका—मैं बतलाना चाहती हूँ।

कोई गुणी ऐसे होते हैं जो अपने गुण को अपने आप भलीभाँति जानते हैं। कुछ ऐसे होते हैं जो अपने गुण दूसरों को सिखाने में चतुर होते हैं, परन्तु सच्चा गुणी वही है जिसमें ये दोनों बातें हों और ऐसा ही गुणी प्रतिष्ठा के योग्य होता है॥ १६॥

विदूषक—आप लोगों ने देवी का कथन सुन लिया न। उनके कथन का भाव यही है कि उपदेश-दर्शन से निर्णय हो जाय।

हरदत्त—यही मेरी इच्छा है।

गणदास—देवी ! हमको स्वीकार है। यही हो।

देवी—मन्दबुद्धि शिष्य यदि गुरु-ज्ञान को दूषित कर दे तो उसमें गुरु का क्या दोष ?

राजा—देवि ! एवमापठ्यते। 'विनेतुरद्रव्यपरिग्रहोऽपि बुद्धिलाघवं प्रकाशयती'ति।

देवी—(आत्मगतम्) कहं दाणिं। (गणदासं विलोक्य, जनान्तिकम्) अलं अज्जउत्तस्स उस्साहकारणं मणोरहं पूरिअ। विरम णिरत्थआदो आरंभादो। [कथमिदानीम्। अलमार्यपुत्रस्योत्साह-कारणं मनोरथं पूरयित्वा। विरम निरर्थकादारम्भात्।]

विदूषकः—सुट्ठु भोदी भणादि। भो गणदास ! संगीदपदं लंभिअ सरस्सईए उवाअणमोदआणं खादमाणस्स किं दे मुहणिग्गहेण विवादेण। [सुष्ठु भवती भणति। भो गणदास ! सङ्गीतपदं लब्ध्वा सरस्वत्या उपायनमोदकान् खादतः किं ते मुखनिग्रहेण विवादेन।]

गणदासः—सत्यम्, अयमेवार्थो देवीवाक्यस्य। श्रूयतामवसरप्राप्तमिदानीम्—

लब्धास्पदोऽस्मीति विवादभीरोस्तितिक्षमाणस्य परेण निन्दाम्।
यस्यागमः केवलजीविकायै तं ज्ञानपण्यं वणिजं वदन्ति॥ १७॥

देवी—अइरोवणीदा दे सिस्सा। अवरिणिट्ठिदस्स उवदेसस्स उण अण्णाय्यं पआसणं। [अचिरोपनीता ते शिष्या। अपरिनिष्ठितस्योपदेशस्य पुनरन्याय्यं प्रकाशनम्।]

गणदासः—अत एव मे निर्बन्धः।

देवी—तेण हि दुवे वि भअवदीए उवदेसं दंसेध। [तेन हि द्वावपि भगवत्यै उपेदशं दर्शयतम्।]

परिव्राजिका—देवि ! नैतन्न्याय्यम्। सर्वज्ञस्याप्येकाकिनो निर्णयाभ्युपगमो दोषाय।

देवी—(जनान्तिकम्) मूढे परिव्वाजिए ! मं जाग्गतिं वि सुत्तं विअ करेसि। (इति सासूयं परावर्तते) [मूढे परिव्राजिके ! मां जाग्रतीमपि सुप्तामिव करोषि।]

राजा—पण्डितों का तो यह कथन है कि यदि अध्यापक अधम शिष्य का चुनाव करता है तो यह उसकी बुद्धिहीनता है।

देवी—(मन ही मन) अब क्या किया जाय ? (गणदास की ओर देखकर, अलग से) अरे ! आर्यपुत्र की इच्छा मत पूर्ण करो; यह तो उनके प्रोत्साहन का कारण है। इस व्यर्थ के कार्य से रुको।

विदूषक—आप ठीक कहती हैं। हे गणदास ! जब तुम बैठे-बैठे संगीत के अध्यापक बने हुए सरस्वतीजी को चढाये हुए लड्डू खा ही रहे हो तब तुम्हें ऐसे विवाद से क्या प्रयोजन, जिससे सहज ही में पराजय हो जाय ?

गणदास—क्या देवी के कथन का यही अभिप्राय है ? इस प्रसंग में मुझे यही कहना है कि—

जो लोग अध्यापक का पद प्राप्त कर लेने पर शास्त्रार्थ करने से भागते हैं, दूसरों की की गई निन्दा को सहन कर लेते हैं और केवल पेट पालने के लिए विद्या पढाते हैं; ऐसे लोग पण्डित नहीं वरन् ज्ञान बेचने वाले बनिया है॥ १७॥

देवी—तुम्हारी शिष्या अभी थोड़े ही दिनों से तो शिक्षा ले रही है, अतः बिना परिपक्व हुए उसे नाट्य-प्रदर्शन के लिए लाना सचमुच बड़ा अन्याय होगा।

गणदास—इसी से मैं आग्रह कर रहा हूँ।

देवी—तब तुम दोनों शिक्षक कला-चातुर्य केवल भगवती को ही दिखलाओ।

परिव्राजिका—देवि ! यह उचित नहीं होगा। सर्वज्ञ व्यक्ति भी यदि अकेले निर्णय करना चाहता है तो उससे भूल हो सकती है।

देवी—(अलग से) अरी मूर्ख परिव्राजिके ! तू मुझ जागती हुई को भी सोती हुई बना देना चाहती हो ? (ईर्ष्या से मुँह फेर लेती है)

(राजा देवीं परिव्राजिकायै दर्शयति)

परिव्राजिका—

अनिमित्तमिन्दुवदने किमत्रभवतः पराङ्मुखी भवसि।
प्रभवन्त्योऽपि हि भर्तृषु कारणकोपाः कुटुम्बिन्यः॥ १८॥

विदूषकः—णं सकारणं एव्व। अत्तणो पक्खो रक्खिदव्वो। (गणदासं विलोक्य)। दिट्ठिआ कोवव्वाजेण देवीए परित्तादो भवं। सुसिक्खिदो वि सव्वो उवदेसदंसणेण णिण्हादो होदि। [ननु सकारणमेव। आत्मनः पक्षो रक्षितव्यः। दिष्ट्या कोपव्याजेन देव्या परित्रातो भवान्। सुशिक्षितोऽपि सर्व उपदेशदर्शनेन निष्णातो भवति।]

गणदासः—देवि! श्रूयताम्। एवं जनो गृह्णाति। तदिदानीम्—

विवादे दर्शयिष्यामि क्रियासङ्क्रान्तिमात्मनः।
यदि मां नानुजानासि परित्यक्तोऽस्म्यहं त्वया॥ १९॥

(इत्यासनादुत्थातुमिच्छति)

देवी—(स्वगतम्) का गई? (प्रकाशम्) पहवदि आआरिओ सिस्सजणस्स। [का गतिः? प्रभवत्याचार्यः शिष्यजनस्य।]

गणदासः—चिरमपदेशशङ्कितोऽस्मि। (राजानमवलोक्य) अनुज्ञातं देव्या। तदाज्ञापयतु देवः कस्मिन्नभिनयवस्तुनि प्रयोगं दर्शयिष्यामि।

राजा—यदादिशति भगवती।

परिव्राजिका—किमपि देव्या मनसि वर्तते, ततः शङ्कितास्मि।

देवी—भण वीसद्धं। पहवदि प्पहू अत्तणो परिअणस्स। [भण विस्रब्धम्। प्रभवति प्रभुरात्मनः परिजनस्य।]

(राजा परिव्राजिका को संकेत से रानी का भाव दिखाता है)

परिव्राजिका—हे चन्द्रमुखी! तुम बिना कारण ही महाराज से क्यों मुँह फेरे बैठी हो। जो कुलवन्ती नारियाँ होती हैं उन्हें यद्यपि अपने पतियों पर सभी अधिकार होते हैं, फिर भी जब उन्हें रूठना होता है तो वे कोई न कोई कारण निकाल कर ही पति से रूठती हैं॥ १८॥

विदूषक—कारण तो है ही। उन्हें अपने पक्ष की रक्षा करनी है। (**गणदास को देखकर**) आप भाग्यशाली हैं कि महारानी ने रूठने के बहाने आपको बचा लिया। सुशिक्षित व्यक्ति भी अपना कौशल दिखाकर ही पण्डित माने जाते हैं।

गणदास—देवी! सुनिए। इस प्रकार लोग दूसरा ही अर्थ लगायेंगे। तो अब—

मैंने अपने शिष्यों को अपनी विद्या कैसे सिखाई है? और आप यदि मुझे इस समय आज्ञा नहीं देंगी तो मैं यही समझूँगा कि आपने मुझे अपने यहाँ से निकाल दिया॥ १९॥

(अपने आसन से उठना चाहता है)

देवी—(**मन ही मन**) अब और उपाय ही क्या है? (**प्रकट में**) शिष्य पर तो आचार्य का ही अधिकार होता है।

गणदास—मैं बहुत देर से भयभीत था कि कहीं रानी रोक न दें। (**राजा को देखकर**) देवी ने आज्ञा दे दी है, अतः महाराज भी आज्ञा दें कि 'मैं कौन-सा' अभिनय दिखलाऊँ।

राजा—भगवती जो कहें।

परिव्राजिका—रानी के मन में कुछ कुण्ठा है, अतः मैं डर रही हूँ।

देवी—आप निडर होकर कहिए। राजा को अपने परिवार पर पूर्ण अधिकार है।

राजा—मम चेति ब्रूहि।

देवी—भअवदि! भणेदाणीम्। [भगवति! भणेदानीम्।]

परिव्राजिका—देव! शर्मिष्ठायाः कृतिं चतुष्पदोत्थं छलिकं दुष्प्रयोज्यमुदाहरन्ति। तत्रैकार्थसंश्रयमुभयोः प्रयोगं पश्यामः। तावता ज्ञायत एवात्रभवतोरुपदेशान्तरम्।

आचार्यौ—यदाज्ञापयति भगवती।

विदूषकः—तेण हि दुवे वि वग्गो पेक्खाघरे संगीदरअणं करिअ तत्तभवदो दूदं पेसअह। अहवा मुदंगसद्दो एव्व णो उत्थावइस्सदि। [तेन हि द्वावपि वर्गौ प्रेक्षागृहे सङ्गीतरचनां कृत्वा तत्रभवतो दूतं प्रेषयतम्। अथवा मृदङ्गशब्द एव न उत्थापयिष्यति।]

हरदत्तः—तथा। (इत्युत्तिष्ठति)

(गणदासो धारिणीमवलोकयति)

देवी—(गणदासं विलोक्य) विअई भोदु अज्जा। णं विजअब्भत्थिणी अहं अज्जस्स। [विजयी भवत्वार्यः। ननु विजयाभ्यर्थिन्यहमार्यस्य।]

(आचार्यौ प्रस्थितौ)

परिव्राजिका—इतस्तावदाचार्यौ।

आचार्यौ—(परिवृत्य) इमौ स्वः।

परिव्राजिका—निर्णयाधिकारे ब्रवीमि। सर्वाङ्गसौष्ठवाभिव्यक्तये विगतनेपथ्ययोः पात्रयोः प्रवेशोऽस्तु।

आचार्यौ—नेदमावयोरुपदेश्यम्। (इति निष्क्रान्तौ)

राजा—'मेरे ऊपर भी' यह भी कहें।

देवी—भगवती! अब आप कहें।

परिव्राजिका—महाराज! शर्मिष्ठा का बनाया हुआ चौपदों वाला छलिका नामक अभिनय अत्यन्त कठिन बतलाया जाता है। उसी के किसी एक भाव में दोनों का अभिनय देख लेंगे और उसी से यह पता चल जायगा कि आप लोगों ने अपने-अपने शिष्यों को कैसा सिखलाया है?

दोनों आचार्य—जैसी भगवती की आज्ञा।

विदूषक—तो आप दोनों नाट्यशाला में चलकर सब संगीत का साज जुटाइये और सब हो चुकने पर किसी दूत से यहाँ कहला दीजिएगा अथवा मृदंग की ध्वनि सुनकर ही हम लोग उठकर चले आयेंगे।

हरदत्त—अच्छी बात है। (उठता है)

(गणदास धारिणी की ओर देखता है)

देवी—(गणदास को देखकर) आपकी विजय हो। मैं सचमुच आपके विजय की अभिलाषिणी हूँ।

(दोनों आचार्य जाने को उद्यत)

परिव्राजिका—आचार्य इधर आइये।

दोनों शिक्षक—(लौटकर) हम दोनों आ गये।

परिव्राजिका—मुझे निर्णय का अधिकार मिला है, अतः मैं कहती हूँ कि पात्रों के सब अंगों के हावभाव स्पष्ट दिखलाई देने चाहिए, अतएव आप लोग अपने पात्रों को बहुत सजा-धजा कर न लाइयेगा।

दोनों आचार्य—यह बतलाने की आवश्यकता नहीं थी। (दोनों जाते हैं)

देवी—(राजानमवलोक्य) जइ राअकज्जेसु ईरिसी उवाअणिउणदा अज्जउत्तस्स तदो सोहणं भवे। [यदि राजकार्येष्वीदृश्युपायनिपुणता आर्यपुत्रस्य ततः शोभनं भवेत्।]

राजा—

अलमन्यथा गृहीत्वा न खलु मनस्विनि मया प्रयुक्तमिदम्।
प्रायः समानविद्याः परस्परयशःपुरोभागाः ॥ २० ॥

(नेपथ्ये मृदङ्गध्वनिः। सर्वे कर्ण ददति)

परिव्राजिका—हन्त। प्रवृत्तं सङ्गीतम्। तथा ह्येषा—

जीमूतस्तनितविशङ्किभिर्मयूरैरुद्ग्रीवैरनुरसितस्य पुष्करस्य।
निर्ह्रादिन्युपहितमध्यमस्वरोत्था मायूरी मदयति मार्जना मनांसि ॥ २१ ॥

राजा—देवि! तस्याः सामाजिका भवामः।

देवी—(स्वगतम्) अहो अविणओ अज्जउत्तस्स। [अहो अविनय आर्यपुत्रस्य।]

(सर्व उत्तिष्ठन्ति)

विदूषकः—(अपवार्य) भो! धीरं गच्छ। तत्तभोदी धारिणी विसंवादइस्सदि। [भोः! धीरं गच्छ। तत्रभवती धारिणी विसंवादयिष्यति।]

राजा— धैर्यविलम्बिनमपि त्वरयति मां मुरजवाद्यरागोऽयम्।
अवतरतः सिद्धिपथं शब्दः स्वमनोरथस्येव ॥ २२ ॥

(इति निष्क्रान्ताः सर्वे)

इति प्रथमोऽङ्कः।

देवी—(राजा को देखकर) यदि आर्यपुत्र अपने राज्य के प्रशासन में इतनी कुशलता व्यक्त करते तो अति सुन्दर होता।

राजा—देवी! तुम कुछ और न समझ बैठना। इसमें मेरा कोई हाथ नहीं है। देखो, जो लोग समान विद्या वाले होते हैं, वे कभी एक-दूसरे की उन्नति नहीं सह सकते हैं॥ २० ॥

(नेपथ्य में मृदंग का शब्द होता है। सभी सुनते हैं)

परिव्राजिका—अरे लो! उन्होंने तो संगीत छेड़ भी दिया। देखो—

मृदंग के शब्द को मेघगर्जन समझकर ये मोर ऊपर मुँह करके देखने लगे और दूर तक गूँजने वाली यह मध्यम स्वर से उठी हुई मायूरी नाम की ध्वनि मन को मदयुक्त बना रही है॥ २१ ॥

राजा—देवि! चलिए हम लोग भी दर्शक बनें।

देवी—(मन ही मन) शोक है, आर्यपुत्र भी कितने धृष्ट है?

(सभी उठ खड़े होते हैं)

विदूषक—(अलग से) मित्र! धीरे-धीरे चलिए। कहीं धारिणीजी अब भी गड़बड न कर दें।

राजा—मैं बहुत धीरे ही चल रहा हूँ, फिर भी मुरज से निकला हुआ राग मुझे इस प्रकार शीघ्रता से चला रहा है मानों मेरे ही मनोरथ का शब्द हो और वही मुझमें उतावली पैदा कर रहा है॥ २२ ॥

(सभी निकल जाते हैं)

पहला अंक समाप्त।

द्वितीयोऽङ्कः

(ततः प्रविशति सङ्गीतरचनायां कृतायामासनस्थो राजा सवयस्यो
धारिणी, परिव्राजिका विभवतश्च परिवारः)

राजा—भगवति ! अत्रभवतोराचार्ययोः प्रथमं कतरस्योपदेशं द्रक्ष्यामः।

परिव्राजिका—ननु समानेऽपि ज्ञानवृद्धभावे वयोवृद्धत्वाद् गणदासः पुरस्कारमर्हति।

राजा—तेन हि मौद्गल्य ! एवमत्रभवतोरावेद्य स्वनियोगमशून्यं कुरु।

कञ्चुकी—यदाज्ञापयति देवः। (इति निष्क्रान्तः)

(प्रविश्य)

गणदासः—देव ! शर्मिष्ठायाः कृतिर्लयमध्या चतुष्पदास्ति। तस्यास्तु छलिकप्रयोगमेकमनाः श्रोतुमर्हति देवः।

राजा—आचार्य ! बहुमानादवहितोऽस्मि।

(निष्क्रान्तो गणदासः)

राजा—(जनान्तिकम्) वयस्य !

नेपथ्यपरिगतायाश्चक्षुर्दर्शनसमुत्सुकं तस्याः।
संहर्तुमधीरतया व्यवसितमिव मे तिरस्करिणीम्॥ १॥

विदूषकः—(अपवार्य) उवट्ठिदं णअणमहु संणिहिदमक्खिअं अ। ता अप्पमत्तो दाणिं पेक्ख।
[उपस्थितं नयनमधु सन्निहितमक्षिकं च। तदप्रमत्त इदानीं पश्य।]

(संगीतशाला में विदूषक के साथ राजा, परिव्राजिका, रानी धारिणी और सम्पूर्ण राजपरिवार उपस्थित है)

राजा—देवी ! इन दोनों आचार्यों में से पहले किसका सिखाया हुआ नाटक देखा जाय ?

परिव्राजिका—यद्यपि दोनों का नाट्यज्ञान समान है फिर आचार्य गणदास अवस्था में बडे हैं, अतएव पहले इन्हीं को अवसर मिलना चाहिए।

राजा—अतः मौद्गल्य ! जाओ आचार्यों को यह बात कहकर अपना काम करो।

कञ्चुकी—महाराज की जो आज्ञा। **(चला जाता है)**

(गणदास का प्रवेश)

गणदास—शर्मिष्ठा ने मध्यलय में एक चतुष्पद गान की रचना की है। उसके छलिक नाम वाले अभिनय को सावधान होकर सुनें।

राजा—आचार्य ! मैं बड़े आदर से उधर ध्यान लगाये हूँ।

(गणदास चला जाता है)

राजा—**(अलग से)** मित्र !

परदे के पीछे जो मेरी प्रियतमा उपस्थित है उसे देखने के लिए मेरी आँखें इतनी अधीर है मानों पर्दे को फाड़ डालना चाहती हैं॥ १॥

विदूषक—**(अलग से)** आपकी आँखों के लिए मधु तो उपस्थित है किन्तु मधुमक्खी भी समीप में ही है, अतएव सावधानी से उधर देखियेगा।

(ततः प्रविशत्याचार्यप्रत्यवेक्ष्यमाणाङ्गसौष्ठवा मालविका)

विदूषकः—(जनान्तिकम्) पेक्खदु भवं। ण क्खु से पडिच्छंदादो परिहीअदि महुरदा। [**पश्यतु भवान्। न खल्वस्याः प्रतिच्छन्दात्परिहीयते मधुरता।**]

राजा—(अपवार्य) वयस्य!

चित्रगतायामस्यां कान्तिविसंवादशङ्कि मे हृदयम्।
सम्प्रति शिथिलसमाधिं मन्ये येनेयमालिखिता॥ २॥

गणदासः—वत्से! मुक्तसाध्वसा सत्त्वस्था भव।

राजा—(आत्मगतम्) अहो सर्वस्थानानवद्यता रूपविशेषस्य। तथाहि—

दीर्घाक्षं शरदिन्दुकान्ति वदनं बाहू नतावंसयोः
सङ्क्षिप्तं निबिडोन्नतस्तनमुरः पार्श्वे प्रमृष्टे इव।
मध्यः पाणिमितो नितम्बि जघनं पादावरालाङ्गुली
छन्दो नर्तयितुर्यथैव मनसि श्लिष्टं तथास्या वपुः॥ ३॥

मालविका—(उपगानं कृत्वा चतुष्पदवस्तु गायति)

दुल्लहो पिओ मे तस्सिं भव हिअअ णिरासं
अम्हो अपंगओ मे परिप्फुरइ किं वि वामओ।
एसो सो चिरदिट्ठो कहँ उण उवणइदव्वो
णाह मं पराहीणं तुइ परिगणअ सतिण्हम्॥ ४॥

[**दुर्लभः प्रियो मे तस्मिन् भव हृदय निराश-**
महो अपाङ्गो मे परिस्फुरति किमपि वामः।
एष स चिरदृष्टः कथं पुनरुपनेतव्यो
नाथ! मां पराधीनां त्वयि परिगणय सतृष्णाम्॥]

(आचार्य गणदास से निरीक्षित हावभाव वाली मालविका प्रवेश करती है)

विदूषक—(अलग) श्रीमान् देखिए। वह जिस प्रकार चित्र में सुन्दर थी उससे किसी प्रकार भी कम सुन्दर नहीं है।

राजा—(अलग) मित्र!

चित्र में इसकी सुन्दरता देखकर मेरा हृदय शंकित था कि वह वास्तव में इतनी सुन्दरी नहीं होगी। परन्तु साक्षात् रूप में इसे देखकर मैं समझता हूँ कि चित्रकार ने सावधानी से इसका चित्र नहीं बनाया॥ २॥

गणदास—पुत्रि! कम्पनविहीन होकर प्रकृतिस्थ हो जाओ।

राजा—(**मन ही मन**) इसके सम्पूर्ण अङ्गों की पवित्रता आश्चर्यजनक है। क्योंकि—

इसका बड़ी-बड़ी आँखों वाला, शरत्काल के चन्द्रमा की शोभा से सम्पन्न मुख, कन्धों पर कुछ झुकी हुई भुजाएँ, उन्नत एवं कठोर स्तनों से जकडी हुई छाती, पार्श्व परिमार्जित तुल्य, मुट्ठीभर की कटि, मोटी-मोटी जाँघें, झुकी हुई अंगुलियों वाले चरण हैं। ज्ञात होता है कि मानों इसका सम्पूर्ण शरीर इसके नाट्यगुरु गणदासजी के कहने पर ही गढा गया होगा॥ ३॥

मालविका—(**पहले आलाप भर कर चार पदों वाला गाना गाती है**)

दुर्लभ है वह मेरा प्रियतम हृदय छोड़ उसकी आशा।
वामापाङ्ग फड़कता मेरा अतः बँध रही कुछ आशा।

(ततो यथारसमभिनयति)

विदूषकः—(जनान्तिकम्) भो वअस्स ! चउप्पदवत्थुअं दुवारीकरिअ तुइ उवट्ठाविदो अप्पा तत्तहोदीए। [भो वयस्य ! चतुष्पदवस्तुकं द्वारीकृत्य त्वय्युपस्थापित आत्मा तत्रभवत्या।]

राजा—सखे ! एवमेव ममापि हृदयम्। अनया खलु—

जनमिममनुरक्तं विद्धि नाथेति गेये वचनमभिनयन्त्या : स्वाङ्गनिर्देशपूर्वम्।
प्रणयगतिमदृष्ट्वा धारिणीसन्निकर्षादहमिव सुकुमारप्रार्थनाव्याजमुक्तः ॥ ५ ॥

(मालविका गीतान्ते निष्क्रमितुमारब्धा)

विदूषकः—भोदि ! चिट्ठ। किं वि वो विसुमरिदो कम्मभेदो। तं दाव पुच्छिस्सं। [भवति! तिष्ठ। किमपि वो विस्मृतः कर्मभेदः। तं तावत्प्रक्ष्यामि।]

गणदासः—वत्से ! क्षणमात्रं स्थित्वोपदेशविशुद्धा यास्यसि।

(मालविका निवृत्य स्थिता)

राजा—(आत्मगतम्) अहो ! सर्वास्ववस्थासु चारुता शोभान्तरं पुष्यति। तथाहि—

वामं सन्धिस्तिमितवलयं न्यस्य हस्तं नितम्बे
कृत्वा श्यामाविटपसदृशं स्रस्तमुक्तं द्वितीयम्।
पादाङ्गुष्ठालुलितकुसुमे कुट्टिमे पातिताक्षं
नृत्तादस्याः स्थितमतितरां कान्तमृज्वायतार्धम् ॥ ६ ॥

बहुत काल का देखा प्रियतम कैसे उसको अपनाऊँ ?
पराधीन अपने को प्रियतम ! तुझमें तृषित गिना पाऊँ ॥ ४ ॥

(गीत के भाव के अनुसार अभिनय करती है)

विदूषक—(अलग) हे मित्र ! इन्होंने तो इस चार चरण वाले गीत के बहाने आप पर अपने को न्यौछावर कर डाला।

राजा—मित्र ! मेरा भी हृदय यही समझ रहा है कि इसने—

"हे नाथ ! इस स्नेहासक्त व्यक्ति को अपनी ही समझो" गीत गाते हुए अपनी ओर संकेत करके जो अभिनय किया है; वह इसीलिए कि महारानी धारिणी को पास देखकर इसने समझ लिया कि प्रेम दिखलाने का कोई दूसरा उपाय तो है नहीं, अतएव एक सुकुमार युवक से प्रेमभिक्षा माँगने के भाव वाला यह गीत गाकर इसने सचमुच मुझसे ही सब कुछ कहा है ॥ ५ ॥

(गा चुकने पर मालविका चली जाना चाहती है)

विदूषक—ठहरिये देवी ! आप बीच में कुछ भूल गई हैं, वही मैं पूछना चाहता हूँ।

गणदास—वत्से ! थोड़ी देर रुक जाओ और जब यहाँ सब लोग पूर्ण रूप से जान लें कि तुमने ठीक से नाट्य सीख लिया है, तभी जाना।

(मालविका लौटकर खड़ी हो जाती है)

राजा—(मन ही मन) अहा ! सम्पूर्ण दशाओं में रमणीयता दूसरी ही शोभा का पोषण करती है—

इसने अपना बाँयाँ हाथ अपने नितम्ब पर रख लिया है, अतएव हाथ का कड़ा पहुँचे पर रुक कर चुप हो गया है। दूसरा हाथ श्यामा की डाली के समान ढीला लटका हुआ है। आँखें नीची करके पैर के अँगूठे से धरती पर बिखरे हुए फूलों को सरका रही है। इस प्रकार खड़ी होने से ऊपर का शरीर

देवी—णं गोदमवअणं वि अज्जो हिअए करेदि। [ननु गौतमवचनमप्यार्यो हृदये करोति।]

गणदासः—देवि ! मा मैवम्। देवप्रत्ययात्सम्भाव्यते सूक्ष्मदर्शिता गौतमस्य। पश्य—

मन्दोऽप्यमन्दतामेति संसर्गेण विपश्चितः।
पङ्कच्छिदः फलस्येव निकषेणाविलं पयः॥ ७॥

(विदूषकं विलोक्य) तच्छृणुमो वयं विवक्षितमार्यस्य।

विदूषकः—(गणदासं विलोक्य) कोसिइँ दाव पुच्छ। पच्छा जो मए कम्मभेदो दिट्ठो तं भणिस्सं। [कौशिकीं तावत्पृच्छ। पश्चाद्यो मया कर्मभेदो दृष्टस्तं भणिष्यामि।]

गणदासः—भगवति ! यथादृष्टमभिधीयतां गुणो वा दोषो वेति।

परिव्राजिका—यथादृष्टं सर्वमनवद्यम्। कुतः—

अङ्गैरन्तर्निहितवचनैः सूचितः सम्यगर्थः
पादन्यासो लयमनुगतस्तन्मयत्वं रसेषु।
शाखायोनिर्मृदुरभिनयस्तद्विकल्पानुवृत्तौ
भावो भावं नुदति विषयाद्रागबन्धः स एव॥ ८॥

गणदासः—देवः कथं वा मन्यते।

राजा—वयं स्वपक्षशिथिलाभिमानाः संवृत्ताः।

गणदासः—अद्य नर्तयितास्मि। कुतः—

उपदेशं विदुः शुद्धं सन्तस्तमुपदेशिनः।
श्यामायते न युष्मासु यः काञ्चनमिवाग्निषु॥ ९॥

लम्बा और सीधा हो गया है। नाचने के समय भी यह ऐसी सुन्दर नहीं लगती थी जैसी अब लग रही है॥ ६॥

देवी—क्या आर्य गणदास भी गौतम की बात सच मान रहे हैं।

गणदास—देवि ! ऐसा मत समझिए। राजा के साथ रहने से गौतम भी सूक्ष्मदर्शी हो गया है। देखिए—

चतुर मनुष्यों के सहवास से मूर्ख मनुष्य भी चतुर हो जाते हैं। जैसे निर्मली के संसर्ग से दूषित जल भी स्वच्छ हो जाता है॥ ७॥

(विदूषक को देखकर) हम भी तो सुनें कि आर्य क्या पूछना चाहते थे।

विदूषक—**(गणदास को देखकर)** आप पहिले कौशिकीजी से पूछ लीजिये, मैं पीछे बतलाऊँगा कि भूल कहाँ हुई है ?

गणदास—भगवती ! आपने जहाँ जैसा गुण या दोष देखा हो सब कुछ बतला दीजिये।

परिव्राजिका—मैंने तो जो कुछ देखा सभी निर्दोष एवं पवित्र पाया। क्योंकि—

गीत की सभी बातों का ठीक-ठीक अर्थ अंगों के अभिनय से पूर्णरूप से दिखा दिया गया। इनके पैर भी लय के साथ-साथ चल रहे थे। फिर गीत के रस में भी वे तन्मय हो गई थीं। हस्त-सञ्चालन द्वारा किया गया अभिनय सुकुमार था। उसके अनेक प्रकार एक-दूसरे की सहायता करते रहे, सर्वत्र समान राग का दृश्य बना रहा॥ ८॥

गणदास—देव ! आप इसे कैसा समझते हैं ?

राजा—मैंने अपने पक्ष का अभिमान छोड़ दिया।

गणदास—आज मैं वस्तुतः नृत्यकला का पण्डित हुआ हूँ। क्योंकि—

देवी—दिट्ठिआ अपरिक्खदाराहणेण अज्जो वड्ढइ। [दिष्ट्याऽपरीक्षकाराधनेनार्यो वर्धते।]

गणदासः—देवीपरिग्रह एव मे वृद्धिहेतुः। (विदूषकं विलोक्य) गौतम! वदेदानीं यत्ते मनसि वर्तति।

विदूषकः—पढमोवदेसदंसणे पढमं बम्हणस्स पूजा कादव्वा। सा णं वो विसुमरिदा। [प्रथमोपदेशदर्शने प्रथमं ब्राह्मणस्य पूजा कर्तव्या। सा ननु वो विस्मृता।]

परिव्राजिका—अहो! प्रयोगाभ्यन्तरः प्रश्नः।

(सर्वे प्रहसिताः। मालविका स्मितं करोति)

राजा—(आत्मगतम्) उपात्तसारश्चक्षुषा मे स्वविषयः। यदनेन—

स्मयमानमायताक्ष्याः किञ्चिदभिव्यक्तदशनशोभि मुखम्।
असमग्रलक्ष्यकेसरमुच्छ्वसदिव पङ्कजं दृष्टम्॥ १०॥

गणदासः—महाब्राह्मण! न खलु प्रथमं नेपथ्यदर्शनमिदम्। अन्यथा कथं त्वां दक्षिणीयं नार्चयिष्यामः।

विदूषकः—मए णाम सुक्खघणगज्जिदे अंतरिक्खे जलपाणं इच्छिदा चादआइदं। अहवा पंडितसंतोसपच्चआ णं मूढा जादी। जदि अत्तहोदीए सोहणं भणिदं तंदो इमं से पारितोसिअं पअच्छामि। (इति राज्ञो हस्तात्कटकमाकर्षति) [मया नाम शुष्कघनगर्जितेऽन्तरिक्षे जलपानमिच्छता चातकायितम्। अथवा पण्डितसन्तोषप्रत्यया ननु मूढजातिः। यतोऽत्रभवत्या शोभनं भणितं तत इदं ते पारितोषिकं प्रयच्छामि।]

जिस प्रकार आग में डालने से सोना काला नहीं पड़ता, वैसे ही जिस शिक्षक के सिखाने में किसी प्रकार की त्रुटि न हो, उसे ही सच्ची शिक्षा कहते हैं॥ ९॥

देवी—सौभाग्य से परीक्षा द्वारा सभा को प्रसन्न करने के कारण आपको वधाई है।

गणदास—देवि! आपकी कृपा ही मेरे श्रेय का कारण है। (विदूषक को देखकर) गौतम! इस समय जो आपके मन में हो, उसे बतलाइए।

विदूषक—सर्वप्रथम परीक्षा देने के समय ब्राह्मण की पूजा की जाती है, वह आप लोगों के द्वारा भूल गई।

परिव्राजिका—आश्चर्य है, क्या नाट्यकला के भीतर की बात पूछी है?

(सब हँसते हैं। मालविका मुस्कराती है)

राजा—(मन ही मन) मेरे नेत्रों को इच्छित वस्तु देखने को प्राप्त हो गई? क्योंकि—

आज मेरी आँखों को विशाल नेत्रोंवाली के मुस्कराते हुए उस मुख का दर्शन मिल गया है जिसमें कुछ-कुछ दाँत दिखलाई पड़ रहे थे और जो उस खिलते हुए कमल के समान जान पड़ता है, जिसके केसर पूर्णरूप से न दिखलाई दे रहे हों॥ १०॥

गणदास—अरे ब्राह्मणाधम! हम लोग पहली बार तो नाटक दिखा नहीं रहे हैं। ऐसा होता तो तुम्हारे जैसे पेटपूजा पर जीने वाले की हम अच्छी पूजा करते।

विदूषक—तो क्या मैं कोरे गर्जनशील बादलों से प्यास मिटाने की आशा करने वाला पपीहा ही बना रह गया? परन्तु मेरे समान मूर्खों की तो ऐसी बात है कि यदि पण्डितों को सन्तोष हुआ तो मानों हमें भी सन्तोष हो गया। जब भगवती कौशिकी ने इसे सुन्दर बता दिया है तो मैं भी तुम्हें यह पारितोषिक दे डालता हूँ। (राजा के हाथ से कंगन खींचता है)

देवी—चिट्ठ दाव। गुणंतरं अजाणंती किं णिमित्तं तुम आहरणं देसि। [तिष्ठ तावत्। गुणान्तरमजानन् किन्निमित्तं त्वमाभरणं ददासि।]

विदूषकः—परकेरअंति करिअ। [परकीयमिति कृत्वा।]

देवी—(आचार्य विलोक्य) अज्ज गणदास! णं दंसिदोवदेसा दे सिस्सा। [आर्य गणदास! ननु दर्शितोपदेशा ते शिष्या।]

गणदासः—वत्से! एहि गच्छाव इदानीम्।

(सहाचार्येण निष्क्रान्ता मालविका)

विदूषकः—(जनान्तिकम्) एत्तिओ मे मदिविहवो भवंतं सेविदुं। [एतावान्मे मतिविभवो भवन्तं सेवितुम्।]

राजा—अलमलं परिच्छेदेन। अहं हि—

भाग्यास्तमयमिवाक्ष्णोर्हृदयस्य महोत्सवावसानमिव।
द्वारपिधानमिव धृतेर्मन्ये तस्यास्तिरस्करिणीम्॥ ११॥

विदूषकः—(जनान्तिकम्) दलिद्दो विअ आदुरो वेज्जेण ओसदं दीअमाणं इच्छसि। [दरिद्र इवातुरो वैद्येनौषधं दीयमानमिच्छसि।]

(प्रविश्य)

हरदत्तः—देव! मदीयमिदानीं प्रयोगमवलोकयितुं क्रियतां प्रसादः।

राजा—(आत्मगतम्) अवसितो दर्शनार्थः। (दाक्षिण्यमवलम्ब्य प्रकाशम्) ननु पर्युत्सुका एव वयम्।

हरदत्तः—अनुगृहीतोऽस्मि।

देवी—ठहरो। अन्य अभिनय देखे बिना अभी इसे आभूषण क्यों दे रहे हो?

विदूषक—दूसरे का है, यह समझ कर दे रहा हूँ।

देवी—(आचार्य को देखकर) आर्य गणदास! कहिये, आपकी शिष्या अपना अभिनय दिखा चुकी?

गणदास—आओ पुत्रि! हम लोग चलें।

(आचार्य के साथ मालविका चली जाती है)

विदूषक—(राजा से अलग) जहाँ तक मेरी बुद्धि की पहुँच थी वहाँ तक तो मैंने आपका काम कर दिया।

राजा—रहने दो, अपनी बुद्धि की सीमा बतलाने की आवश्यकता नहीं।

मैं मालविका के प्रस्थान को अपने नेत्रों के सौभाग्य-सूर्य का अस्तमय, हृदय के महोत्सव की समाप्ति और धैर्य के मार्ग का बन्द हो जाना समझता हूँ॥ ११॥

विदूषक—(अलग) वाह दरिद्र रोगी की भाँति वैद्य से बिना मूल्य दवा चाहते हो?

(प्रवेश कर)

हरदत्त—महाराज! अब मेरे द्वारा शिक्षित अभिनय भी देखने की कृपा करें।

राजा—(मन ही मन) जो देखना था वह तो देख ही चुके (उदारता दिखाने के लिए प्रकट रूप से) हम लोग तो देखने के लिए उत्सुक ही हैं।

हरदत्त—मुझ पर आपकी महती कृपा है।

(नेपथ्ये)

वैतालिकः—जयतु जयतु देवः। उपारूढो मध्याह्नः। तथाहि—

पत्रच्छायासु हंसा मुकुलितनयना दीर्घिका पद्मिनीनां
सौधान्यत्यर्थतापाद्बलभिपरिचयद्वेषिपारावतानि ।
बिन्दुक्षेपान्पिपासुः परिसरति शिखी भ्रान्तिमद्वारियन्त्रं
सर्वैरुग्रैः समग्रैस्त्वमिव नृपगुणैर्दीप्यते सप्तसप्तिः॥ १२॥

विदूषकः—अविहा अविहा। अम्हाणं उण भोअणवेला उवट्ठिदा। अत्तभवदो उइदवेलादिक्कमे चिइच्छआ दोसं उदाहरंति। (हरदत्तं विलोक्य) हरदत्त! किं दाणिं भणसि। [अविधा अविधा। अस्माकं पुनर्भोजनवेलोपस्थिता। अत्रभवत उचितवेलातिक्रमे चिकित्सका दोषमुदाहरन्ति। हरदत्त! किमिदानीं भणति।]

हरदत्तः—अस्ति वचनस्यान्यस्यावकाशोऽत्र ?

राजा—तेन हि त्वदीयमुपदेशं श्वो वयं द्रक्ष्यामः। विरमतु भवान्।

हरदत्तः—यदाज्ञापयति देवः। (इति निष्क्रान्तः)

देवी—णिव्वट्ठेदु अज्जउत्तो मज्जणविहिं। [निर्वर्तयत्वार्यपुत्रो मज्जनविधिम्।]

विदूषकः—भोदि! विसेसेण पाणभोअणं तुवरावेहि। [भवति! विशेषेण पानभोजनं त्वरय।]

परिव्राजिका—(उत्थाय) स्वस्ति भवते। (इति सपरिजनया देव्या सह निष्क्रान्ता)

विदूषकः—भो वअस्स! ण केवलं रूवे सिप्पे वि अदुदीआ मालविआ। [भो वयस्य! न केवलं रूपे शिल्पेऽप्यद्वितीया मालविका।]

राजा—वयस्य!

अव्याजसुन्दरीं तां विधानेन ललितेन योजयता।
परिकल्पितो विधात्रा बाणः कामस्य विषदिग्धः॥ १३॥

किं बहुना। सखे! चिन्तयितव्योऽस्मि।

(नेपथ्य में)

वैतालिक—जय हो देव की जय हो। दोपहर हो गया है। क्योंकि—

बावलियों में कमल की पंखुड़ियों की छाया में हंस आँख मूँदकर विश्राम कर रहे हैं। धूप से भवन ऐसा तप गया है कि छज्जों पर कबूतर तक नहीं बैठ रहे हैं। चलते हुए रहट से उछलती हुई पानी की बूँदें पीने के लिए मोर उसके चारों ओर चक्कर काट रहे हैं और सूर्य अपनी सब किरणें लेकर उसी प्रकार चमक रहा है जैसे आप अपने सम्पूर्ण राजसी गुणों से चमक रहे हैं॥ १२॥

विदूषक—अरे रे! अब तो हम लोगों के भोजन का समय हो गया है। वैद्यों का कथन है कि समय पर भोजन न करने से बड़ी हानि होती है। (हरदत्त को देखकर) कहो हरदत्त! क्या कहते हो?

हरदत्त—अब कुछ कहने की बात ही कहाँ रह जाती है?

राजा—तो अब आपका प्रदर्शन हम लोग कल देखेंगे। आप जाकर विश्राम करें।

हरदत्त—श्रीमान् की जैसी आज्ञा। (निकल जाता है)

देवी—तो आर्यपुत्र! अब चलकर आप स्नान करें।

विदूषक—देवी! अब शीघ्र भोजन-पानी का कुछ उत्तम प्रबन्ध कराइये।

परिव्राजिका—(उठकर) आपका कल्याण हो। (सेविकाओं और रानी के साथ चली जाती है)

विदूषक—मित्र! सुन्दरता में ही नहीं कला में भी मालविका अद्वितीय है।

राजा—वयस्य!

विदूषकः—भवदा वि अहं। दिढं विपणिकंदू विअ मे उअरब्भंतरं दज्झइ। [**भवताप्यहम्। दृढं विपणिकन्दुरिव मे उदराभ्यन्तरं दह्यते।**]

राजा—एवमेव भवान् सुहृदर्थेऽपि त्वरताम्।

विदूषकः—गहीददक्खिणोम्हि। किं तु मेहावलीणिरुद्धा जोण्हा विअ पराहीणदंसणा तत्तहोदी मालविआ। भवं वि सूणापरिसरचरो विअ गिद्धो आमिसलोलुओ भीरुओ अ। अच्चंतादुरो विअ कज्जसिद्धिं पत्थंतो मे रोअसि। [**गृहीतदक्षिणोऽस्मि। किं तु मेघावलीनिरुद्धा ज्योत्स्नेव पराधीनदर्शना तत्रभवती मालविका। भवानपि सूनापरिसरचर इव गृध्र आमिषलोलुपो भीरुकश्च। अत्यन्तातुर इव कार्यसिद्धिं प्रार्थयमानो मे रोचसे।**]

राजा—कथमनातुरो भविष्यामि—

सर्वान्तःपुरवनिताव्यापारप्रतिनिवृत्तहृदयस्य।
सा वामलोचना मे स्नेहस्यैकायनीभूता॥ १४॥

(इति निष्क्रान्ताः सर्वे)

इति द्वितीयोऽङ्कः।

अकृत्रिम सुन्दरी उस मालविका की विधाता ने ललितकलाएँ क्या दे दीं मानों काम के बाणों को विषाक्त बना दिया॥ १३॥

मित्र! अब अधिक क्या कहूँ, तुम जाकर मेरी कुछ चिन्ता करो।

विदूषक—आप भी मेरी चिन्ता कीजिये। मेरा पेट इस समय हलवाई के तावे की भाँति अत्यन्त सन्तप्त है।

राजा—तुम भी अपने मित्र के लिए अब कोई उपाय शीघ्र ही सोच निकालो।

विदूषक—उसके लिए तो मैं पहले ही आपसे दक्षिणा पा चुका हूँ, किन्तु मेघावृत चन्द्रिका के समान मालविका के दर्शन भी तो पराधीन ही है। आप भी मांस बेचने वाले व्याध के घर पर मँडराने वाले गिद्ध के समान उस पर ललचाये हुए भी हैं और साथ ही डरते हैं। इतनी व्यग्रता के साथ मुझे काम करने को कहते हुए आप बडे अच्छे लगते हैं।

राजा—मैं किस प्रकार शान्त हो सकूँगा।

अन्तःपुर की सभी रमणियों के हावभाव से मेरा हृदय फिर गया है। अब तो सुलोचना मालविका ही मेरे स्नेह की एकमात्र अधिकारिणी रह गई है॥ १४॥

(इस प्रकार सभी निकल जाते हैं)

दूसरा अङ्क समाप्त।

तृतीयोऽङ्कः

(ततः प्रविशति परिव्राजिकायाः परिचारिका समाहितिका)

समाहितिका—आणत्तम्हि भअवदीए—'समाहिदिए! देवस्स उवावणत्थं बीअऊरअं गेण्हिअ आअच्छ' त्ति। ता जाव पमदवणपालिअं महुअरिअं अण्णेसामि। (परिक्रम्यावलोक्य) एसा तवणीआसोअं ओलोअंती महुअरिआ चिट्ठदि। ता जाव णं उवसप्पामि। [**आज्ञप्तास्मि भगवत्या—'समाहितिके! देवस्योपवनस्थं बीजपूरकं गृहीत्वागच्छे'ति। तद्यावत्प्रमदवनपालिकां मधुकरिकाम-न्विष्यामि। एषा तपनीयाशोकमवलोकयन्ती मधुकरिका तिष्ठति। तद्यावदेनामुपसर्पामि।**]

(ततः प्रविशति उद्यानपालिका)

समाहितिका—(उपसृत्य) महुअरिए! अवि सुहो दे उज्जाणव्वावारो। [**मधुकरिके! अपि सुखस्त उद्यानव्यापारः।**]

मधुकरिका—अम्हो समाहिदिआ। सहि! सागदं दे। [**अहो समाहितिका। सखि! स्वागतं ते।**]

समाहितिका—हला! भगवदी आणवेदि—'अरित्तपाणिणा अम्हारिसजणेण तत्तहोदी देवी देक्खिदव्वा। ता बीअपूरएण सुस्सूसिदुं इच्छामि' त्ति। [**सखि! भगवत्याज्ञापयति—'अरिक्तपाणिना-स्मादृशजनेन तत्रभवती देवी द्रष्टव्या। तद्बीजपूरकेण शुश्रूषितुमिच्छामी'ति।**]

मधुकरिका—णं संणिहिदं बीजपूरअं। कहेहि दाव अण्णोण्णसंघरिसिदाणं णट्टाअरिआणं उवदेसं देक्खिअ कदरो भअवदीए पसंसिदो। [**ननु सन्निहितं बीजपूरकम्। कथय तावदन्योन्यसङ्घर्षित-योर्नाट्याचार्ययोरुपदेशं दृष्ट्वा कतरो भगवत्या प्रशंसितः।**]

समाहितिका—दुवे वि किल आगमिणा पओअणिउणा अ। किंतु सिस्साए मालविआए गुणविसेसेण गणदासस्स उवदेसो पसंसिदो। [**द्वावपि किलागमिनौ प्रयोगनिपुणौ च। किन्तु शिष्याया मालविकाया गुणविशेषेण गणदासस्योपदेशः प्रशंसितः।**]

(तदनन्तर परिव्राजिका की दासी समाहितिका प्रवेश करती है)

समाहितिका—भगवती कौशिकी ने मुझे आज्ञा दी है कि समाहितिका जाओ, महाराज के उपवन से एक विजौरिआ नीबू तो ले आओ। तो चलूँ प्रमदवन की मालिन मधुरिका का पता लगाऊँ। (**घूमकर देखकर**) अरे! सुनहले अशोक की ओर टकटकी लगाये यह क्या खड़ी है। तो चलूँ इसके पास।

(उसके बाद मालिन मधुकरिका प्रवेश करती है)

समाहितिका—(**पास जाकर**) कहो मधुकरिका! तुम्हारे उपवन का काम तो ठीक-ठीक चल रहा है न?

मधुकरिका—अरे! तुम हो समाहितिका! आओ सखी आओ, तुम्हारा स्वागत है।

समाहितिका—सखी! भगवती कौशिकी ने कहा है कि हमें रिक्तहस्त महारानी से मिलने नहीं जाना चाहिए, अतः एक नीबू ही उपहार के रूप में लेकर उनसे मिल लूँगी।

मधुकरिका—लो, नीबू तो पास ही है। हाँ, यह तो बतलाओ कि वह जो दोनों नाट्याचार्यों का विवाद चल रहा था, उनमें से भगवती ने किस आचार्य की प्रशंसा की?

समाहितिका—यों तो दोनों ही नाट्यशास्त्र के पण्डित और अभिनय-कला में चतुर है, परन्तु गणदास ने अपनी शिष्या मालविका को इतनी उत्तम शिक्षा दी है कि उसे देख लेने पर गणदास ही दोनों में प्रशंसित हुए।

मधुकरिका—अह मालविआगदं कोलीणं कीरिसं सुणीअदि ? [**अथ मालविकागतं कौलीनं कीदृशं श्रूयते ?**]

समाहितिका—बाढं किल तस्सिं साहिलासो भट्टा। किंदु केवलं देवीए धारिणीए चित्तं रक्खंतो अत्तणो पहुत्तणं दंसेदि। मालविआ वि इमेसु दिअसेसु अणुहूदमुत्ता विअ मालदीमाला मिलाणा लक्खीअदि। अदो अवरं ण जाणे। विसज्जेहि मं। [**बाढं किल तस्यां साभिलाषो भर्ता। किन्तु केवलं देव्या धारिण्याश्चित्तं रक्षन्नात्मनः प्रभुत्वं दर्शयति। मालविकाप्येषु दिवसेष्वनुभूतमुक्तेव मालतीमाला म्लाना लक्ष्यते। अतः परं न जाने। विसृज माम्।**]

मधुकरिका—एदं साहावलंबिदं बीअपूरअं गेण्ह। [**एतच्छाखावलम्बितं बीजपूरकं गृहाण।**]

समाहितिका—तह। (इति नाट्येन बीजपूरकं गृहीत्वा) हला! तुमं वि अदो पेसलदरं साहुजणसुस्सूसाए फलं पावेहि। (इति प्रस्थिता) [**तथा। सखि! त्वमप्यतः पेशलतरं साधुजनशुश्रूषायाः फलं प्राप्नुहि।**]

मधुकरिका—हला! समं जेव्व गच्छम्ह। अहं वि इमस्स चिराअमाणकुसुमोग्गमस्स तवणीआसोअस्स दोहलणिमित्तं देवीए णिवेदेमि। [**सखि! सममेव गच्छावः। अहमप्यस्य चिरायमाणकुसुमोद्गमस्य तपनीयाशोकस्य दोहदनिमित्तं देव्यै निवेदयामि।**]

समाहितिका—जुज्जइ। अहिआरो खु तुह। [**युज्यते। अधिकारः खलु तव।**]

(निष्क्रान्ते)

॥ प्रवेशकः ॥

(ततः प्रविशति कामयमानावस्थो राजा विदूषकश्च)

राजा—(आत्मानं विलोक्य)

शरीरं क्षामं स्यादसति दयितालिङ्गनसुखे
भवेत्सासं चक्षुः क्षणमपि न सा दृश्यत इति।

मधुकरिका—मालविका के सम्बन्ध में ये कैसी-कैसी बातें सुनने में आ रही हैं ?

समाहितिका—हाँ, इधर महाराज मालविका के विषय में अत्यधिक अनुरक्त हो गये हैं, किन्तु केवल महारानी धारिणी का मन रखने के लिए स्पष्ट रूप से प्रेम दिखलाते हैं। इधर इन दिनों मालविका भी पहनकर उतारी गई मालतीमाला के समान म्लान होती जा रही है। इससे अधिक मैं कुछ नहीं जानती। अब मुझे छुट्टी दो।

मधुकरिका—इस डाल पर लटकते हुए बीजपूरक फल को ले लो।

समाहितिका—अच्छा। (**नीबू तोड़ने का अभिनय करके**) सखी! तुम्हें सज्जन लोगों की सेवा करने का फल इससे भी उत्तम मिले। (**यह कहकर चली जाती है**)

मधुकरिका—सखी! दोनों साथ ही चलें। मुझे भी चलकर महारानीजी से निवेदन करना है कि यह सुनहरा अशोक अभी तक फूल नहीं रहा है, इसके फूलने का उपाय किया जाना चाहिए।

समाहितिका—ठीक, यह तो तुम्हारा कर्तव्य ही है।

(दोनों चली जाती हैं)

॥ प्रवेशक ॥

(विदूषक के साथ कामपीड़ित अवस्था में राजा प्रवेश करते हैं)

राजा—(**अपनी ओर देखकर**)

प्रियतमा को हृदय से न लगा सकने के कारण मेरे शरीर का सूखते जाना सम्भव है। उसे क्षणभर

तया सारङ्गनेत्र्या त्वमसि न कदाचिद्विरहितं
प्रसक्ते निर्वाणे हृदय परितापं व्रजसि किम्?॥ १॥

विदूषकः—अलं भवदो धीरं उज्झिअ परिदेविदेण। दिट्ठा मए तत्तहोदीए मालविआए पिअसही बउलावलिआ। सुणाविदा अ अत्थं जो भवदा संदिट्ठो। **[अलं भवतो धीरतामुज्झित्वा परिदेवितेन। दृष्टा मया तत्रभवत्या मालविकायाः प्रियसखी बकुलावलिका। श्राविता चार्थं यो भवता सन्दिष्टः।]**

राजा—ततः किमुक्तवती।

विदूषकः—विण्णावेहि भट्टारअं— 'अणुगहीदम्हि इमिणा णिओएण। किंदु सा तवस्सिणी देवीए अहिअं रक्खंतीए णाअरक्खिदो विअ णिही ण सुहं समासादइदव्वा। तह वि जइस्सं'। **[विज्ञापय भट्टारकम्— 'अनुगृहीतास्म्यनेन नियोगेन। किन्तु सा तपस्विनी देव्याऽधिकं रक्षन्त्या नागरक्षित इव निधिर्न सुखं समासादयितव्या। तथापि यतिष्ये'।]**

राजा—भगवन् सङ्कल्पयोने! प्रतिबन्धवत्स्वपि विषयेष्वभिनिवेश्य किं तथा प्रहरसि यथा जनोऽयं न कालान्तरक्षमो भवति। (सविस्मयम्)—

क्व रुजा हृदयप्रमाथिनी क्व च ते विश्वसनीयमायुधम्।
मृदु तीक्ष्णतरं यदुच्यते तदिदं मन्मथ दृश्यते त्वयि॥ २॥

विदूषकः—णं भणामि तस्सिं साहणिज्जे कज्जे किदो मए उवाओवक्खेओ। ता पज्जवत्थावेदु भवं अप्पाणं। **[ननु भणामि तस्मिन्साधनीये कार्ये कृतो मयोपायोपक्षेपः। तत्पर्यवस्थापयतु भवानात्मानम्।]**

राजा—अथेमं दिवसशेषमुचितव्यापारविमुखेन चेतसा क्व नु खलु यापयामि।

के लिए भी देख न सकने के कारण आँखों का अश्रुपूर्ण भी होना सम्भव है। परन्तु मेरे हृदय! तुम तो कभी भी उस मृगाक्षी प्रियतमा से अलग नहीं हुए, हृदय को शीतल करनेवाली वह प्रियतमा तो साथ ही रही, फिर तुम क्यों सन्तप्त हो रहे हो?॥ १॥

विदूषक—आप धैर्य का परित्याग करके विलाप न करें। सौभाग्य से मुझे मालविका की प्रिय सखी बकुलावलिका मिल गई और मैंने उससे आपका सन्देश कह दिया।

राजा—इस पर उसने क्या कहा?

विदूषक—उसने कहा—स्वामी से निवेदन कर देना कि मुझ पर यह काम सौंपकर स्वामी ने मुझ पर बडी कृपा की है, परन्तु वह बेचारी महारानी की वैसे ही कड़ी देखरेख में है, जैसे साँप की देखरेख में कोई निधि हो। यद्यपि वह सहज ही प्राप्य नहीं है फिर भी मैं यत्न करूँगी।

राजा—हे भगवन् कामदेव! विघ्नपूर्ण विषय में अनुराग उत्पन्न करके तुमने इस प्रकार प्रहार करना आरम्भ कर दिया कि मैं अति व्यग्र हूँ। (**आश्चर्य के साथ**)

हे कामदेव! कहाँ तो हृदय को मसल देने वाला यह काम-सन्ताप और कहाँ तुम्हारे विश्वसनीय फूलों के बाण। यह कहावत तो तुम पर पूर्णरूप से घटित होती है कि जो जितने कोमल दिखलाई पड़ते हैं, वे उतने ही कठोर होते हैं॥ २॥

विदूषक—महाराज! मैंने आपका मनोरथ पूर्ण करने के लिए सभी उपाय कर दिये हैं, अतएव आप धैर्य रखें।

राजा—अब इस शेष दिन को करणीय कार्यकलाप से विमुख चित्त से मैं कहाँ बिताऊँ?

विदूषकः—अज्ज एव्व पढमावदारसुहआणि रत्तकुरवआणि उवाअणं पेसिअ णववसंतावदारव्ववदेसेण इरावदीए णिउणिआमुहेण पत्थिदो भवं—'इच्छामि अज्जउत्तेण सह दोलाहिरोहणं अणुहविदुं' त्ति। भवदा वि से पडिण्णादं। ता पमदवणं एव्व गच्छम्ह। [**अद्यैव प्रथमावतारसुभगानि रक्तकुरबकाण्युपायनं प्रेष्य नववसन्तावतारव्यपदेशेनेरावत्या निपुणिकामुखेन प्रार्थितो भवान्—'इच्छाम्यार्यपुत्रेण सह दोलाधिरोहणमनुभवितुमि'ति। भवताप्यस्यै प्रतिज्ञातम्। तत्प्रमदवनमेव गच्छावः।**]

राजा—न क्षममिदम्।

विदूषकः—कहं विअ ? [**कथमिव ?**]

राजा—वयस्य! निसर्गनिपुणाः स्त्रियः। कथमन्यसङ्क्रान्तहृदयमुपलालयन्तमपि ते सखी न मां लक्षयिष्यति। अतः पश्यामि—

उचितः प्रणयो वरं विहन्तुं बहवः खण्डनहेतवो हि दृष्टाः।
उपचारविधिर्मनस्विनीनां न तु पूर्वाभ्यधिकोऽपि भावशून्यः॥ ३॥

विदूषकः—णारिहदि भवं अंतेउरट्ठिदं दक्खिण्णं एक्कपदे पिट्ठदो कादुं। [**नार्हति भवानन्तःपुरस्थितं दाक्षिण्यमेकपदे पृष्ठतः कर्तुम्।**]

राजा—(विचिन्त्य) तेन हि प्रमदवनमार्गमादेशय।

विदूषकः—इदो इदो भवं। [**इत इतो भवान्।**]

(उभौ परिक्रामतः)

विदूषकः—णं एदं पमदवणं पवणबलचलाहिं पल्लवंगुलीहिं तुवरेदि विअ भवंतं पवेसिदुं। [**नन्वेतत्प्रमदवनं पवनबलचलाभिः पल्लवाङ्गुलीभिस्त्वरयतीव भवन्तं प्रवेष्टुम्।**]

राजा—(स्पर्शं रूपयित्वा) अभिजातः खलु वसन्तः। सखे! पश्य—

विदूषक—आज तो सर्वप्रथम कुसुमित अभिनव कुरवक कुसुम भेजकर नवीन वसन्तागमन की सूचना के व्याज से रानी इरावती ने निपुणिका द्वारा कहलवाया है कि मैं आर्यपुत्र के साथ झूला झूलने का आनन्द लेना चाहती हूँ। आपने भी स्वीकार किया है, अतः प्रमदवन ही चलना चाहिए।

राजा—नहीं, ऐसा करना उचित नहीं होगा।

विदूषक—क्यों ?

राजा—मित्र! स्त्रियाँ स्वभाव से ही चतुर हुआ करती हैं। मेरा हृदय अन्य रमणी में अनुरक्त है। मेरे अनुराग प्रदर्शित करने पर भी वह क्या यह ताड़ न लेगी ? देखो—

प्रणय का परित्याग उचित है, उसके अनेक कारण हो सकते हैं; किन्तु चतुर रमणियों के निकट पहले की अपेक्षा अधिक होने पर भी प्रेमविहीन व्यवहार भला नहीं लगता है॥ ३॥

विदूषक—पर इस प्रकार अन्तःपुर की रानियों के प्रेम का एकाएक अनादर कर देना भी उचित नहीं होगा।

राजा—(चिन्ता करके) तब प्रमदवन के मार्ग को बतलाओ।

विदूषक—आप इधर से आइए इधर से। (दोनों घूमते हैं)

विदूषक—महाराज! यह प्रमदवन वायुवेग से प्रकम्पित पल्लवस्वरूप अपनी अंगुलियों से शीघ्र प्रवेश करने के लिए मानों बुला रहा है।

राजा—(वायुस्पर्श के सुख का अभिनय करते हुए) सचमुच वसन्त आ पहुँचा है। देखो मित्र!

उन्मत्तानां श्रवणसुभगैः कूजितैः कोकिलानां
सानुक्रोशं मनसिजरुजः सह्यतां पृच्छतेव।
अङ्के चूतप्रसवसुरभिर्दक्षिणो मारुतो मे
सान्द्रस्पर्शः करतल इव व्यापृतो माधवेन॥४॥

विदूषकः—पविस णिव्वुदिलाहाअ। [प्रविश निर्वृतिलाभाय।]

(उभौ प्रविशतः)

विदूषकः—अवहाणेण दिट्ठिं देहि। एदं क्खु भवंतं विअ विलोहइदुकामाए पमदवणलच्छीए जुवदीवेसलज्जावइत्तिअं वसंतकुसुमणेवत्थं गहीदं। [अवधानेन दृष्टिं देहि। एतत्खलु भवन्तमिव विलोभयितुकानया प्रमदवनलक्ष्म्या युवतिवेषलज्जापयितृकं वसन्तकुसुमनेपथ्यं गृहीतम्।]

राजा—ननु विस्मयादवलोकयामि—

रक्ताशोकरुचा विशेषितगुणो बिम्बाधरालक्तकः
प्रत्याख्यातविशेषकं कुरबकं श्यामावदातारुणम्।
आक्रान्ता तिलकक्रिया च तिलकैर्लग्नद्विरेफाञ्जनैः
सावज्ञेव मुखप्रसाधनविधौ श्रीर्माधवी योषिताम्॥५॥

(उभौ नाट्येनोद्यानशोभां निर्वर्णयतः)

(ततः प्रविशति पर्युत्सुका मालविका)

मालविका—अविण्णादहिअअं भट्टारअं अहिलसंदी अप्पणो वि दाव लज्जेमि। कुदो विहवो सिणिद्धस्स सहीजणस्स इमं वुत्तंतं आचक्खिदुं। ण जाणे अप्पडिआरगरुअं वेअणं केत्तिअं कालं मअणो मं णइस्सदि त्ति। (इति कतिचित्पदानि गत्वा) आ, कहिं क्खु पत्थिदम्हि? (इति स्मृतिमभिनीय)

मतवाले कोकिलों की कानों को सुहानेवाली कूकों में मानों वसन्तऋतु मुझ पर दया दिखलाते हुए पूछ रहा हो—क्यों प्रेम की पीडा सही जा रही है? इधर खिली हुई आम्रमंजरियों के गन्ध में बसा हुआ दक्षिण पवन मेरे शरीर को स्पर्श करता हुआ ऐसा ज्ञात होता है मानों वसन्त ने अपना सुखद हाथ मेरे ऊपर रख दिया हो॥४॥

विदूषक—शान्ति-लाभ के लिए प्रमदवन में चला जाय।

(दोनों का प्रवेश)

विदूषक—सावधान होकर देखें। यह प्रमदवन-शोभा आपको लुभाने के लिए ही युवतियों के शृङ्गार को लजाने वाले वासन्ती पुष्पों से सजकर उपस्थित है।

राजा—मैं आश्चर्यपूर्वक इस प्रमदवन को देख रहा हूँ।

रक्ताशोक पुष्प की लालिमा से रमणियों के बिम्बसदृश अधर पर लगा हुआ अलक्तक तिरस्कृत हो रहा है। श्यामश्वेत अरुण रंग से युक्त कुरबक पुष्प के द्वारा कपोलस्थ चित्र पराजित हो रहा है। कज्जल सदृश संलग्न भ्रमरवाले पुन्नाग के पुष्प ललाटस्थ तिलक को पराजित कर रहे हैं। ज्ञात होता है कि यह वसन्तशोभा स्त्रियों के प्रसाधन की अवज्ञा कर रही है॥५॥

(दोनों अभिनयपूर्वक उद्यान को देखने लगते हैं)

(तत्पश्चात् उत्कण्ठिता मालविका का प्रवेश)

मालविका—महाराज की मनोदशा का मुझे बिलकुल ज्ञान नहीं है। ऐसी दशा में उनके प्रति अभिलाषा करती हुई मुझे स्वयं लज्जा हो रही है। मुझ में इतनी शक्ति भी नहीं है कि मैं अपनी प्यारी

आदिट्ठम्ह देवीए—'मालविए! गोदमचापलादो दोलापरिब्भट्टाए सरुजौ मह चलणौ। तुमं दाव गदुअ तवणीआसोअस्स दोहलं णिवट्टेहि त्ति। जइ सो पंचरत्तब्भंतरे कुसुमं दंसेदि तदो अहं अहिलासपूरइत्तअं पसादं दावइस्सं त्ति। ता जाव णिओअभूमिं पढमं गदा होमि दाव अणुपदं मह चलणालंकारहत्थाए वउलावलिआए आअंदव्वं। ता परिदेवइस्सं ताव वीसद्धं मुहुत्तअं। (इति परिक्रामति) [अविज्ञातहृदयं भर्तारमभिलषन्त्यात्मनोऽपि तावल्लज्जे। कुतो विभवः स्निग्धस्य सखीजनस्येमं वृत्तान्तमाख्यातुम्। न जानेऽप्रतिकारगुरुकां वेदनां कियन्तं कालं मदनो मां नेष्यतीति। आः, कुत्र खलु प्रस्थितास्मि। आदिष्टास्मि देव्या—'मालविके! गौतमचापलाद्दोलापरिभ्रष्टायाः सरुजौ मम चरणौ। त्वं तावद्गत्वा तपनीयाशोकस्य दोहदं निर्वर्तये'ति। यद्यसौ पञ्चरात्राभ्यन्तरे कुसुमं दर्शयति, ततोऽहमभिलाषपूरयितृकं प्रसादं दापयिष्यामीति। तद्यावन्नियोगभूमिं प्रथमं गता भवामि तावदनुपदं मम चरणालङ्कारहस्तया बकुलावलिकयाऽऽगन्तव्यम्। तत्परिदेवयिष्ये तावद्विस्रब्धं मुहूर्तकम्।]

विदूषकः—(दृष्ट्वा) ही ही। वअस्स! एदं खु सीहुपाणुव्वेजिदस्स मच्छंडिआ उवणदा। [आश्चर्यमाश्चर्यम्। वयस्य! एतत्खलु सीधुपानोद्वेजितस्य मत्स्यण्डिकोपनता।]

राजा—अये! किमेतत्?

विदूषकः—एसा णादिपरिक्खिदवेसा ऊसुअवअणा एआइणी मालविआ अदूरे वट्टदि। [एषा नातिपरिष्कृतवेषोत्सुकवदनैकाकिनी मालविकाऽदूरे वर्तते।]

राजा—(सहर्षम्) कथं मालविका?

विदूषकः—अह इं? [अथ किम्?]

राजा—शक्यमिदानीं जीवितमवलम्बयितुम्—

त्वदुपलभ्य समीपगतां प्रियां हृदयमुच्छ्वसितं मम विक्लवम्।
तरुवृतां पथिकस्य जलार्थिनः सरितमारसितादिव सारसात्॥ ६॥

सखियों से यह बात कह सकूँ। पता नहीं, कामदेव मुझे कब तक यह प्रेम की पीड़ा देता रहेगा? जिसकी कोई ओपधि भी नहीं है। (दो-चार कदम चलकर) अरे! मैं किधर चली जा रही हूँ? (याद करने का अभिनय करके) देवी ने मुझे आदेश दिया है कि मालविके! गौतम की चञ्चलता के कारण झूले पर से गिरने से मेरे पैर में चोट आ गई है। अतः मैं चलने में असमर्थ हूँ। तुम जाकर तपनीयाशोक की दोहदपूर्त्ति कर दो। यदि पाँच रात्रियों में उसमें फूल उग आया तो मैं तुम्हें यथेच्छ पुरस्कार दूँगी। जब तक मैं उस स्थान पर जाऊँगी तब तक बकुलावलिका भी चरणालङ्कार (नूपुरादि) लिये हुए वहाँ पहुँच जायेगी। जब तक वह नहीं आई रहेगी तब तक मैं दिल खोलकर रो लूँगी। (ऐसा कहकर घूमने लगती है)

विदूषक—(देखकर) आश्चर्य है, महान् आश्चर्य है। यह तो मदमत्त व्यक्ति के समक्ष मानों मिथ्री रखी हुई है।

राजा—अरे! यह क्या?

विदूषक—साधारण वेश में तथा उत्कण्ठित मुख लिये हुए अकेली मालविका अत्यन्त निकट ही विद्यमान है।

राजा—(प्रसन्नतापूर्वक) अरे! क्या मालविका यहाँ है?

विदूषक—और क्या?

राजा—अब जीवन धारण करने में समर्थ हो सकता हूँ।

अथ क्व तत्रभवती ?

विदूषकः—एसा तरुराइमज्झादो णिक्कंता इदो ज्जेव्व परिवट्टंती दीसइ। [एषा तरुराजिमध्यान्निष्क्रान्तेत एव परिवर्तमाना दृश्यते।]

राजा—(विलोक्य, सहर्षम्) वयस्य ! पश्याम्येनाम्—

विपुलं नितम्बदेशे मध्ये क्षामं समुन्नतं कुचयोः।
अत्यायतं नयनयोर्मम जीवितमेतदायाति॥ ७॥

सखे ! पूर्वस्मादतिमनोहरावस्थान्तरमुपारूढा तत्रभवती। तथा हि—

शरकाण्डपाण्डुगण्डस्थलेयमाभाति परिमिताभरणा।
माधवपरिणतपत्रा कतिपयकुसुमेव कुन्दलता॥ ८॥

विदूषकः—एसा वि भवं विअ मअणव्वाहिणा परामिट्टा भविस्सदि। [एषापि भवानिव मदनव्याधिना परामृष्टा भविष्यति।]

राजा—सौहार्दमेवं पश्यति।

मालविका—अअं सो ललिदसुउमालदोहलापेक्खी अगिहीदकुसुमणेवत्थो उक्कंठिदाए मह अणुकरेदि असोओ। जाव एदस्स पच्छाअसीदले सिलापट्टए णिसण्णा अप्पाणं विणोदेमि। [अयं स ललितसुकुमारदोहदापेक्षी अगृहीतकुसुमनेपथ्य उत्कण्ठिताया ममाऽनुकरोत्यशोकः। यावदस्य प्रच्छायशीतले शिलापट्टके निषण्णाऽऽत्मानं विनोदयामि।]

विदूषकः—सुदं भवदा उक्कंठिदम्हि त्ति तत्तहोदी मंतेदि। [श्रुतं भवता उत्कण्ठितास्मीति तत्रभवती मन्त्रयति।]

राजा—नैतावता भवन्तं प्रसन्नतर्क मन्ये। कुतः—

सारस पक्षी के कलरव से वृक्ष की झरमुट में छिपी नदीधारा को प्यासे पथिक की भाँति तुम्हारे आश्वासन पर अपनी प्रियतमा को समीप में प्राप्त कर मेरा यह उत्कण्ठित हृदय प्रफुल्लित हो उठा है॥ ६॥

तो श्रीमती मालविका कहाँ है ?

विदूषक—वह वृक्षसमूहों के बीच से होती हुई इधर ही आती हुई दिखलाई दे रही है।

राजा—(देखकर, प्रसन्नतापूर्वक) मित्र ! मैं इसको देखता हूँ।

यह मालविका स्थूल नितम्बोंवाली, पतली कमरवाली, उन्नत कुचों वाली और बड़ी-बड़ी आँखों वाली ज्ञात होती है, मानों मेरी जान ही चली आ रही है॥ ७॥

मित्र ! इसने तो पहले की अपेक्षा अत्यन्त रमणीय एक दूसरी ही अवस्था प्राप्त कर ली है। क्योंकि—

इसका कपोल शरकण्डे के समान पीतवर्ण, शरीर स्वल्पालङ्कारों से विभूषित है, ऐसा ज्ञात होता है मानों वसन्तऋतु में पीले पत्तों वाली तथा कतिपय पुष्पों से युक्त कुन्दलता हो॥ ८॥

विदूषक—यह मालविका भी आप ही के समान मदनताप से सन्तप्त होगी।

राजा—प्रणय ऐसा ही सोचता है।

मालविका—मनोरम और कोमल दोहद की प्रतीक्षा करनेवाला यह पुष्पहीन अशोक मुझ उत्कण्ठिता की ही अनुकृति कर रहा है। तब तक इसी की शीतल छाया में प्रस्तरखण्ड पर बैठकर अपने मन को बहलाऊँ।

विदूषक—सुना आपने। श्रीमती मालविका कहती है कि मैं उत्कण्ठित हूँ।

राजा—इतने ही से आपको मैं प्रमाणित अनुमानवाला नहीं मानता। क्योंकि—

वोढा कुरबकरजसां किसलयपुटभेदशीकरानुगतः।
अनिमित्तोत्कण्ठामपि जनयति मनसो मलयवातः॥ ९॥

(मालविकोपविष्टा)

राजा—सखे! इतस्तावदावां लतान्तरितौ भवावः।

विदूषकः—इरावदिं विअ अदूरे पेक्खामि। [इरावतीमिवादूरे प्रेक्षे।]

राजा—नहि कमलिनीं दृष्ट्वा ग्राहमवेक्षते मतङ्गजः। (इति विलोकयन् स्थितः)

मालविका—हिअअ! णिरवलंबणादो अदिभूमिलंघिणो दे मणोरहादो विरम। किं मं आआसिअ। [हृदय! निरवलम्बनादतिभूमिलङ्घिनो ते मनोरथाद्विरम। किं मामायास्य?]

(विदूषको राजानं वीक्षते)

राजा—प्रिये! पश्य वामत्वं स्नेहस्य—

औत्सुक्यहेतुं विवृणोषि न त्वं तत्त्वावबोधैकफलो न तर्कः।
तथापि रम्भोरु करोमि लक्ष्यमात्मानमेषां परिदेवितानाम्॥ १०॥

विदूषकः—संपदं भवदो णिस्संसअं भविस्सदि। एसा अप्पिदमअणसंदेसा विवित्ते णं वउलावलिआ उवट्ठिदा। [साम्प्रतं भवतो निःसंशयं भविष्यति। एषार्पितमदनसन्देशा विविक्ते ननु बकुलावलिकोपस्थिता।]

राजा—अपि स्मरेदसावस्मदभ्यर्थनाम्।

विदूषकः—किं दाणिं एसा दासीए दुहिदा तुह गुरुअं संदेसं विसुमरेदि। अहं दाव ण विसुमरेमि। [किमिदानीमेषा दास्या दुहिता तव गुरुकं सन्देशं विस्मरति। अहं तावन्न विस्मरामि।]

कुरवक के पराग में बसा हुआ तथा विकसित कोपलों से जलबिन्दुओं को उड़ा ले जाने वाला मलयपवन अकारण ही मन में इच्छा उत्पन्न कर देता है॥ ९॥

(मालविका बैठ जाती है)

राजा—मित्र! हम दोनों इधर लताकुञ्ज में छिप जायँ।

विदूषक—समीप में ही रानी इरावती के तुल्य (किसी को आती हुई) देख रहा हूँ।

राजा—प्रफुल्ल पद्मिनी देखकर गजराज मगर से नहीं डरता। **(देखता हुआ स्थित हो जाता है)**

मालविका—हृदय! तुम्हारी अभिलाषा व्यर्थ ही बहुत बढ गई है। तुम इसे छोड़ दो। मुझे व्यर्थ क्यों सताता है?

(विदूषक राजा की ओर देखता है)

राजा—प्रिये! प्रेम की विपरीत चाल तो देखो—

हे कदलीस्तम्भोरु! तुम उत्कण्ठा का कारण प्रकाशित नहीं करती हो, अनुमान कभी ठीक-ठीक पता नहीं बता सकता है, तथापि मैं तुम्हारे इन विलापों का लक्ष्य अपने को ही मानता हूँ॥ १०॥

विदूषक—आपका सन्देह अभी दूर हुआ जाता है। जिसके हाथ आपने सन्देश भेजा था वह बकुलावलिका भी यहाँ अकेले में मालविका के पास पहुँच गई है।

राजा—परन्तु उसको क्या मेरी बात स्मरण होगी।

विदूषक—जब तक मैं नहीं भूल पाया हूँ तब तक भला यह दासीपुत्री कहीं ऐसी आवश्यक बात भूल सकती है?

(प्रविश्य चरणालङ्कारहस्ता वकुलावलिका)

बकुलावलिका—अवि सुहं सहीए। [**अपि सुखं सख्याः।**]

मालविका—अम्हो बउलावलिआ उवट्ठिदा। सहि! सांअदं दे। उवविस। [**अहो बकुलावलिकोपस्थिता। सखि! स्वागतं ते। उपविश।**]

बकुलावलिका—(उपविश्य) हला! तुमं दाणिं जोग्गदाए णिउत्ता। ता एक्कं दे चलणं उवणेहि जाव सालत्तअं सणूउरं अ करेमि। [**सखि! त्वमिदानीं योग्यतया नियुक्ता। तस्मादेकं ते चरणमुपनय यावत्सालक्तकं सनूपुरं च करोमि।**]

मालविका—(आत्मगतम्) हिअअ! अलं सुहिदाए। उवट्ठिदो अअं विहवो। कहं दाणिं अत्ताणं मोचेअं। अहवा एदं एव्व मे मित्तुमंडणं भविस्सदि। [**हृदय! अलं सुखितया। उपस्थितोऽयं विभवः। कथमिदानीमात्मानं मोचयेयम्। अथवा एतदेव मे मृत्युमण्डनं भविष्यति।**]

बकुलावलिका—किं विआरेसि। ऊसुआ क्खु इमस्स तवणीआसोअस्स कुसुमोग्गमे देवी। [**किं विचारयसि। उत्सुका खल्वस्य तपनीयाशोकस्य कुसुमोद्गमे देवी।**]

राजा—कथमशोकदोहदनिमित्तोऽयमारम्भः ?

विदूषकः—किं णु क्खु जाणासि तुमं, मह कालणादो देवी मं अंतेउरणेवच्छेण योजइस्सदि त्ति। [**किं नु खलु जानासि त्वम्, मम कारणाद्देवी मामन्तःपुरनेपथ्येन योजयिष्यतीति।**]

मालविका—हला! मरिसेहि दाव णं। (इति पादमुपहरति) [**सखि! मर्षय तावदेनम्।**]

बकुलावलिका—अइ, सरीरअं सि मे। (इति नाट्येन चरणसंस्कारमारभते) [**अयि, शरीरमसि मे।**]

राजा—

चरणान्तनिवेशितां प्रियायाः सरसां पश्य वयस्य रागलेखाम्।
प्रथमामिव पल्लवप्रसूतिं हरदग्धस्य मनोभवद्रुमस्य॥ ११॥

(चरण का आभूषण हाथ में लेकर बकुलावलिका प्रवेश करती है)

बकुलावलिका—कहो सखी! आनन्द से तो हो ?

मालविका—अरे बकुलावलिका, तुम आ गई। सखी तुम्हारा स्वागत है। आओ, बैठो।

बकुलावलिका—(**बैठकर**) सखी! तुम्हें जो काम दिया गया है, उसके लिए तुम्हीं योग्य थी। अपना एक पैर इधर बढ़ाओ, मैं उसमें महावर लगाकर नूपुर पहना दूँ।

मालविका—(**मन ही मन**) मेरे हृदय! यह सम्मान देखकर तुम अधिक प्रसन्न मत होओ। यही तो वैभव प्राप्त हुआ। मैं अपने को कैसे छुड़ाऊँ ? अथवा यही हमारे मरण का शृङ्गार होगा।

बकुलावलिका—तुम क्या सोच रही हो ? इस सुनहले अशोक वृक्ष में फूलों के आने के लिए महारानी अत्यन्त उत्सुक हैं।

राजा—अच्छा, तो क्या यह सजावट अशोक के फूलने के लिए की जा रही है ?

विदूषक—तो क्या आप समझ बैठे थे कि महारानी ने मेरे लिए इसे रनिवास के सिंगारों से *सजाया होगा।*

मालविका—सखी! मुझे इसके लिए क्षमा करना। (**पैर आगे बढ़ाती है**)

बकुलावलिका—अरे! तुम तो मेरा ही शरीर हो। (**पैर रँगने का अभिनय करती है**)

राजा—मित्र! प्यारी मालविका के चरणों में महावर की जो गीली लकीर बनी है, वह ऐसी

विदूषकः—चलणाणुरूवो तत्तहोदीए अहिआरो उवक्खित्तो। [चरणानुरूपस्तत्रभवत्या अधिकार उपक्षिप्तः।]

राजा—सम्यगाह भवान्।

नवकिसलयरागेणाग्रपादेन बाला स्फुरितनखरुचा द्वौ हन्तुमर्हत्यनेन।
अकुसुमितमशोकं दोहदापेक्षया वा प्रणमितशिरसं वा कान्तमार्द्रापराधम्॥ १२॥

विदूषकः—पहरिस्सदि तत्तहोदी तुमं अवरद्धं। [प्रहरिष्यति तत्रभवती त्वामपराद्धम्।]

राजा—मूर्ध्ना प्रतिगृहीतं वचः सिद्धिदर्शिनो ब्राह्मणस्य।

(ततः प्रविशति युक्तमदा इरावती चेटी च)

इरावती—हञ्जे णिउणिए! सुणामि बहुसो मदो किल इत्थिआजणस्स विसेसमंडणं त्ति। अवि सच्चो एसो लोअवाओ। [चेटि निपुणिके! शृणोमि बहुशो मदः किल स्त्रीजनस्य विशेषमण्डनमिति। अपि सत्यं एष लोकवादः।]

निपुणिका—पढमं लोअवाओ एव्वं अज्ज सच्चो संवुत्तो। [प्रथमं लोकवाद एवाद्य सत्यः संवृत्तः।]

इरावती—अलं मयि सिणेहेण। कहेहि कुदो दाणिं ओगमिदव्वं दोलाघरं पढमं गदो भट्टा ण वेत्ति। [अलं मयि स्नेहेन। कथय कुतं इदानीमवगन्तव्यं दोलागृहं प्रथमं गतो भर्ता न वेति।]

निपुणिका—भट्टिणीए अखंडिदादो पणआदो। [भट्टिन्या अखण्डितात् प्रणयात्।]

इरावती—अलं सेवाए। मज्झत्थदं परिगाहिअ भणाहि। [अलं सेवया। मध्यस्थतां परिगृह्य भण।]

निपुणिका—वसंतोस्सवुवाअणलोलुवेण अज्जगोदमेण कहिअं तुवरदु भट्टिणी त्ति। [वसन्तोत्सवोपायनलोलुपेनार्यगौतमेन कथितं त्वरतां भट्टिनीति।]

दिखलाई पड़ रही है मानों महादेवजी के क्रोध से जले हुए कामदेव के वृक्ष में नई-नई कोपलें फूट आई हों॥ ११॥

विदूषक—जैसे इनके सुन्दर चरण हैं वैसा ही मधुर कार्य भी सौंपा गया है।

राजा—आपने यह बात अत्यन्त उचित कही।

चमकते हुए नखों वाले और नवीन कोपलों के समान पंजों वाले इस सुन्दरी मालविका के चरण या तो फूलने की इच्छावाले इस अनफूले अशोक वृक्ष पर पड़ने योग्य हैं या प्रेम में अपराध करने वाले नतमस्तक प्रियतम के सिर पर पड़ने योग्य है॥ १२॥

विदूषक—अपराध करने पर तुम प्रहार सहोगे।

राजा—सिद्ध ब्राह्मण का आदेश सिर आँखों पर है।

(तत्पश्चात् मदमत्त इरावती और चेटी का प्रवेश)

इरावती—निपुणिके! सुनती हूँ, मद नारियों का अलंकार है। क्या यह सत्य है?

निपुणिका—पहले यह कहावत थी, परन्तु आज तो यह बात सत्य हो गई है।

इरावती—मुझ पर स्नेह न दिखलाओ। कहो, यह कैसे ज्ञात होगा कि महाराज दोलागृह में पहले आ गये हैं या नहीं?

निपुणिका—आपको अपने अखण्डित प्रणय से।

इरावती—चाटुकारिता न कर। तटस्थ होकर बतलाओ।

इरावती—(अवस्थासदृशं परिक्रम्य) हंजे ! मदेण किलाअमाणं अत्ताणं अज्जउत्तस्स दंसणे हिअअं तुवरेदि। चलणा उण ण मह पसरंति। [चेटि! मदेन क्लाम्यमानमात्मानमार्यपुत्रस्य दर्शने हृदयं त्वरयति। चरणौ पुनर्न मम प्रसरतः।]

निपुणिका—णं संपत्ते म्ह दोलाघरं। [ननु सम्प्राप्ते स्वो दोलागृहम्।]

इरावती—णिउणिए! अज्जउत्तो एत्थ ण दीसदि। [निपुणिके! आर्यपुत्रोऽत्र न दृश्यते।]

निपुणिका—णं भट्टिणीए ओलोअदु। परिहासणिमित्तं कहिं वि अदिट्ठेण भत्तुणा होदव्वं। अम्हे वि पिअंगुलदापरिक्खित्तं असोअसिलापट्टअं पविसामो। [ननु भट्टिन्यवलोकयतु। परिहासनिमित्तं कुत्राप्यदृष्टेन भर्त्रा भवितव्यम्। आवामपि प्रियङ्गुलतापरिक्षिप्तमशोकशिलापट्टकं प्रविशावः।]

इरावती—तह। [तथा।]

निपुणिका—(विलोक्य) आलोअदु भट्टिणी चूदंकुरं विचिण्णंतीणं पिपीलिआहिं दंसिदं। [अवलोकयतु भट्टिनी चूताङ्कुरं विचिन्वत्योः पिपीलिकाभिर्दष्टम्।]

इरावती—कहं विअ एदं ? [कथमिवेदम् ?]

निपुणिका—एसा असोअपादंवच्छाआए मालविआए वउलावलिआ चलणालंकारं णिव्वट्टेदि। [एषाशोकपादपच्छायायां मालविकाया बकुलावलिका चरणालङ्कारं निर्वर्तयति।]

इरावती—(शङ्कां रूपयित्वा) अभूमी इअं मालविआए। कहं एत्थ तक्केसि। [अभूमिरियं मालविकायाः। कथमत्र तर्कयसि।]

निपुणिका—तक्केमि दोलापरिब्भंसिदाए सरुअचलणाए देवीए असोअदोहलाहिआरे मालविआ णिउत्तेति। अण्णहा कहं देवी सअं धारिअं णूउरजुअलं परिअणस्स अब्भणुजाणिस्सदि। [तर्कयामि दोलापरिभ्रष्टया सरुजचरणया देव्याऽशोकदोहदाधिकारे मालविका नियुक्तेति। अन्यथा कथं देवी स्वयं धारितं नूपुरयुगलं परिजनस्याभ्यनुज्ञास्यति।]

निपुणिका—वसन्तोत्सव के अवसर पर उपायन के लोभी विदूषक गौतम ने कहा है कि आप शीघ्रता कीजिए।

इरावती—(अवस्थानुकूल शीघ्रता करके) नशा से सन्तप्त मुझको आर्यपुत्र के दर्शन के लिए हृदय प्रेरित कर रहा है। किन्तु मेरे पैर उठते ही नहीं।

निपुणिका—अरे ! हम लोग दोलाघर तो आ गये।

इरावती—निपुणिके ! यहाँ पर आर्यपुत्र तो दिखलाई नहीं दे रहे हैं।

निपुणिका—श्रीमतीजी आप देखें। सम्भव है परिहास करने के लिए राजा कहीं पर छिपकर बैठे हों। हम लोग भी श्यामलतावेष्टित अशोक के नीचे प्रस्तरखण्ड पर बैठें।

इरावती—वैसा ही किया जाय।

निपुणिका—(देखकर) महारानीजी देखिए। हम लोग तो आम्रकोरकों को चुनना चाहती थी और इधर चींटियाँ काटने लगीं।

इरावती—यह बात कैसे ?

निपुणिका—अशोकतरु की छाया से बकुलावलिका मालविका के चरणों को अलंकृत कर रही है।

इरावती—(शङ्का प्रकट कर) यह तो मालविका के आने की जगह नहीं है। यहाँ वह क्यों आई ? क्या समझती हो ?

निपुणिका—मैं समझती हूँ कि झूला पर से गिरने के कारण देवी के पैर में चोट है। अतः

इरावती—महदी क्खु से संभावणा। [महती खल्वस्याः सम्भावना।]

निपुणिका—किं ण अण्णेसीअदि भट्टा। [किं नान्विष्यते भर्ता।]

इरावती—हला! ण मे चलणा अण्णदो पवट्टंति। मदो मं विआरेदि। आसंकिदस्स दाव अंतं गमिस्सं। (मालविकां निर्वर्ण्य, निरूप्यात्मगतम्) ठाणे क्खु कादरं मे हिअअं। [सखि! न मे चरणावन्यतः प्रवर्तेते। मदो मां विकारयति। आशङ्कितस्य तावदन्तं गमिष्यामि। स्थाने खलु कातरं मे हृदयम्।]

बकुलावलिका—(मालविकायै चरणं दर्शयन्ती) अवि रोअदि दे राअरेहाविण्णासो। [अपि रोचते ते रागरेखाविन्यासः।]

मालविका—हला! अत्तणो चलणं त्ति लज्जेमि णं पसंसिदुं। केण पसाहणकलाए अहिणीदासि। [सखि! आत्मनश्चरण इति लज्जे एनं प्रशंसितुम्। केन प्रसाधनकलायामभिनीतासि।]

बकुलावलिका—एत्थ क्खु भत्तुणो सीसम्हि। [अत्र खलु भर्तुः शिष्यास्मि।]

विदूषकः—तुवरेहि दाव णं गुरुदक्खिणाए। [त्वरय तावदेनां गुरुदक्षिणायै।]

मालविका—दिट्ठिआ ण गव्विदासि। [दिष्ट्या न गर्वितासि।]

बकुलावलिका—उवदेसाणुरूवा चलणा लंभिअ अज्ज दाव गव्विदा भविस्सं। (रागं विलोक्यात्मगतम्) हन्त, सिद्धो मे दप्पो। (प्रकाशम्) सहि! एक्कस्स दे चलणस्स अवसिदो राअणिक्खेवो। केवलं मुहमारुदो लंभइदव्वो। अहवा पवादं एदं ठाणं। [उपदेशानुरूपौ चरणौ लब्ध्वाद्य तावद् गर्विता भविष्यामि। हन्त, सिद्धो मे दर्पः। सखि! एकस्य ते चरणस्यावसितो रागनिक्षेपः। केवलं मुखमारुतो लम्भयितव्यः। अथवा प्रवातमेतत्स्थानम्।]

राजा—सखे! पश्य—

आर्द्रालक्तकमस्याश्चरणं मुखमारुतेन शोषयितुम्।
प्रतिपन्नः प्रथमतरः सम्प्रति सेवावकाशो मे॥ १३॥

उन्होंने अशोक-दोहद के लिए मालविका से कहा है। अन्यथा वह देवी के चरणों के नूपुर कैसे धारण करती?

इरावती—इस बात की विशेष सम्भावना है।

निपुणिका—महाराज ही को क्यों न ढूँढा जाय?

इरावती—सखी! मेरे चरण आगे नहीं बढ रहे हैं। इधर नशा भी मुझे विकृत बना रहा है। पहले सन्देह दूर कर लूँगी। (मालविका को देखकर और समझकर मन ही मन) मेरा हृदय कातर हो रहा है।

बकुलावलिका—(मालविका को उसका पैर दिखाकर) रागलेखा अच्छी ज्ञात हो रही है?

मालविका—सखी! अपने चरणों की प्रशंसा करने में लज्जा हो रही है। यह प्रसाधनकला तुम्हें किसने सिखाई है?

बकुलावलिका—अरी! यह कला तो मैंने स्वयं महाराज से सीखी है।

विदूषक—गुरुदक्षिणा चुकाने में शीघ्रता करो।

मालविका—भाग्यवश तुम अभिमान नहीं करती हो।

बकुलावलिका—शिक्षा को सफल करने योग्य चरणों के प्राप्त हो जाने से अब गर्व कर सकूँगी। (राग को देखकर मन ही मन) हमारा अभिमान सिद्ध हो गया। (प्रकट) एक चरण का रँगना समाप्त हो गया, केवल फूँक लगानी है। अथवा इस स्थान पर हवा तो चल ही रही है अर्थात् बिना मुँह से फूँक मारे भी वह प्राकृतिक हवा से अपने आप सूख जायेगी।

राजा—मित्र! देखो—

विदूषकः—कुदो दे अणुसओ। एदं भवदा चिरक्कमेण अणुभविदव्वं। [**कुतस्तेऽनुशयः। एतावद्भवता चिरक्रमेणानुभवितव्यम्।**]

बकुलावलिका—सहि! अरुणसतपत्तं विअ सोहदि दे चलणं। सव्वहा भत्तुणो अंकपरिवट्टिणी होहि। [**सखि! अरुणशतपत्रमिव शोभते ते चरणम्। सर्वथा भर्तुरङ्कपरिवर्तिनी भव।**]

(इरावती निपुणिकामवेक्षते)

राजा—ममेयमाशीः।

मालविका—हला! मा अवअणीअं मंतेहि। [**सखि! मा अवचनीयं मन्त्रयस्व।**]

बकुलावलिका—मंतइदव्वं एव्व मंतिदं मए। [**मन्त्रयितव्यमेव मन्त्रितं मया।**]

मालविका—पिआ क्खु अहं तव। [**प्रिया खल्वहं तव।**]

बकुलावलिका—ण केवलं मह। [**न केवलं मम।**]

मालविका—कस्स वा अण्णस्स। [**कस्य वान्यस्य।**]

बकुलावलिका—गुणेसु अहिणिवेसिणो भत्तुणो वि। [**गुणेष्वभिनिवेशिनो भर्तुरपि।**]

मालविका—अलीअं मंतेसि। एदं एव्व मइ णत्थि। [**अलीकं मन्त्रयसे। एतदेव मयि नास्ति।**]

बकुलावलिका—सच्चं तुइ णत्थि। भत्तुणो किसेसु सुंदरपांडुरेसु दीसइ अंगेसु। [**सत्यं त्वयि नास्ति। भर्तुः कृशेषु सुन्दरपाण्डुरेषु दृश्यतेऽङ्गेषु।**]

निपुणिका—पढमं गणिदं विअ हदासए उत्तरं। [**प्रथमं गणितमिव हताशाया उत्तरम्।**]

बकुलावलिका—अणुराओ अणुराएण परिक्खिदव्वो त्ति सुअणवअणं पमाणीकरेहि। [**अनुरागोऽनुरागेण परीक्षितव्य इति सुजनवचनं प्रमाणीकुरु।**]

गीले अलक्तक से भींगे हुए इसके चरण को मुँह की फूँक से शुष्क बनाने का यह प्रथम सुअवसर उपस्थित हुआ है॥ १३॥

विदूषक—आपको इसका दुःख क्यों हो रहा है? यह तो आपको धीरे-धीरे बहुत दिनों तक भोगना होगा।

बकुलावलिका—सखी! रक्तकमल सदृश तुम्हारे चरण सुशोभित हैं। तुम महाराज की अंकशायिनी बनो।

(इरावती निपुणिका की ओर देखती है)

राजा—यही तो मेरा आशीर्वाद है।

मालविका—सखि! अनर्गल बातें न कहा करो।

बकुलावलिका—जो कहना चाहिए, वही तो मैं कह रही हूँ।

मालविका—मैं तुम्हारी प्रियतमा जो हूँ।

बकुलावलिका—तुम केवल मेरी ही प्रिया नहीं हो।

मालविका—और किस दूसरे की प्रिया हूँ।

बकुलावलिका—तेरे गुणों पर प्रसन्न हुए महाराज की भी।

मालविका—तू असत्य कहती है। मुझ पर उनका प्रेम नहीं है।

बकुलावलिका—वस्तुतः तुममें नहीं है। वह तो महाराज के दुर्बल तथा विरह से पाण्डुवर्ण अंगों में है।

निपुणिका—हताश बकुलावलिका का उत्तर गणित के समान (तर्कसम्मत) है।

बकुलावलिका—अपने अनुराग से दूसरे के अनुराग को जानना चाहिए। विद्वानों के इस कथन को प्रमाण मानों।

मालविका—किं अत्तणो छंदेण मंतेसि। [**किमात्मनश्छन्देन मन्त्रयसि।**]

बकुलावलिका—णहि णहि। भत्तुणो क्खु एदाइँ पणअमिदुलाइँ अक्खराइँ वत्तंतरिदाइँ। [**नहि नहि। भर्तुः खल्वेतानि प्रणयमृदुलान्यक्षराणि वक्त्रान्तरितानि।**]

मालविका—हला! देवीं चिंतिअ ण मे हिअअं विस्ससदि। [**सखि! देवीं चिन्तयित्वा न मे हृदयं विश्वसिति।**]

बकुलावलिका—मुद्धे! भमरसंपादो भविस्सदि त्ति वसंतावदारसव्वस्सं किं ण चूदप्पसवो ओदंसिदव्वो। [**मुग्धे! भ्रमरसम्पातो भविष्यतीति वसन्तावतारसर्वस्वं किं न चूतप्रसवोऽवतंसितव्यः।**]

मालविका—तुमं दाव दुज्जादे गच्छतस्स सहायिणी होहि। [**त्वं तावद् दुर्जाते गच्छतः सहायिनी भव।**]

बकुलावलिका—विमद्दसुरही बउलावलिआ क्खु अहं। [**विमर्दसुरभिर्बकुलावलिका खल्वहम्।**]

राजा—साधु बकुलावलिके! साधु।

भावज्ञानानन्तरं प्रस्तुतेन प्रत्याख्याने दत्तयुक्तोत्तरेण।
वाक्येनेयं स्थापिता स्वे निदेशे स्थाने प्राणाः कामिनां दूत्यधीनाः॥ १४॥

इरावती—हञ्जे! पेक्ख कारिदं एव्व बउलावलिआए एदस्सिं पदं मालविआए। [**सखि! पश्य कारितमेव बकुलावलिकयैतस्मिन्पदं मालविकायाः।**]

निपुणिका—भट्टिणि! अहिआरस्स उइदो उवदेसो। [**भट्टिनि! अधिकारस्योचित उपदेशः।**]

इरावती—ठाणे क्खु संकिदं मे हिअअं। गहीदत्था अणंतरं चिंतइस्सं। [**स्थाने खलु शङ्कितं मे हृदयम्। गृहीतार्थानन्तरं चिन्तयिष्यामि।**]

बकुलावलिका—एसो दुदीओ वि दे णिव्वुत्तपरिकम्मा चलणो। जाव णं सणूउरं करेमि। (इति नाट्येन नूपुरयुगलमामुच्य) हला! उट्ठेहि। असोअविआसइत्तअं देवीए णिओअं अणुचिट्ठ।

मालविका—यह सब अपने मन से गढकर कह रही हो।

बकुलावलिका—नहीं नहीं। महाराज की यह कोमल प्रणय कथा दूसरे के मुँह से सुनी गई है।

मालविका—महारानी धारिणी के सम्बन्ध में सोचकर मेरा हृदय विश्वास नहीं करता है।

बकुलावलिका—अरी पगली! आम्रमंजरी पर अनेक भ्रमर टूटने लगेंगे यही सोचकर क्या लोग भौंरों के भय से वसन्तावतार सर्वस्व आम्रमञ्जरी को धारण नहीं करते?

मालविका—इस विपत्ति के अवसर पर तुम्हारा ही सहारा है।

बकुलावलिका—घर्षण से अधिक सुगन्ध देने वाली मैं बकुलावलिका हूँ। स्वभाव से चतुर मैं विपत्ति आने पर—अपने धैर्यबल मे अधिक ज्ञानप्रकाशन कर सकती हूँ।

राजा—धन्य हो बकुलावलिका धन्य हो।

इस समय इसके हृदय की ठीक-ठीक स्थिति का अध्ययन करके, मेरे प्रेम का प्रस्ताव करके तथा इसके निषेध करने पर, उसे समुचित उत्तर देकर जो तुमने इस मालविका को अपने अधिकार में कर लिया है, इससे मुझे विश्वास हो गया है कि प्रेमियों के प्राण दूतियों की ही मुट्ठी में रहते हैं॥ १४॥

इरावती—सखी! देखो— बकुलावलिका ने मालविका को ठीक कर लिया।

निपुणिका—महारानी! जैसा आदेश मिला है उसका पालन कर रही है।

इरावती—मेरा सन्देह ठीक ही है। पहिले भलीभाँति जान लूँ तब बाद में प्रतिकार करूँगी।

[एष द्वितीयोऽपि ते निर्वृत्तपरिकर्मा चरणः। यावदेनं सनूपुरं करोमि। हला ! उत्तिष्ठ। अशोकविकासयितृकं देव्या नियोगमनुतिंठ।]

(उभे उत्तिष्ठतः)

इरावती—सुदो देवीए णिओओ। होदु दाणिं। [श्रुतो देव्या नियोगः। भवत्विदानीम्।]

बकुलावलिका—एसो उवारूढराओ उअभोअक्खमो पुरदो दे वट्टइ। [एष उपारूढराग उपभोगक्षमः पुरतस्ते वर्तते।]

मालविका—(सहर्षम्) किं भट्टा। [किं भर्ता।]

बकुलावलिका—(सस्मितम्) ण दाव भट्टा। एसो असोअसाहावलंबी पल्लवगुच्छओ। ओदंसेहि णं। [न तावद्भर्ता। एषोऽशोकशाखावलम्बी पल्लवगुच्छः। अवतंसयैनम्।]

(मालविका विषादं नाटयति)

विदूषकः—सुदं भवदा। [श्रुतं भवता।]

राजा—सखे ! पर्याप्तमेतावता कामिनाम्—

अनातुरोत्कण्ठितयोः प्रसिद्ध्यता समागमेनापि रतिर्न मां प्रति।
परस्परप्राप्तिनिराशयोर्वरं शरीरनाशोऽपि समानुरागयोः ॥ १५ ॥

(मालविका रचितपल्लवावतंसा पादमशोकाय प्रहिणोति)

राजा—वयस्य !

आदाय कर्णिकिसलयमस्मादियमत्र चरणमर्पयति।
उभयोः सदृशविनिमयादात्मानं वञ्चितं मन्ये ॥ १६ ॥

बकुलावलिका—तुम्हारा यह दूसरा चरण भी रँग दिया गया। अब इसमें नूपुर भी पहना दूँ। **(दोनों नूपुरों के पहनाने का अभिनय करके)** सखी ! उठो। अशोक को विकसित करनेवाले महारानी के आदेश का पालन करो।

(दोनों उठती हैं)

इरावती—देवी की आज्ञा तो सुन ली। अच्छा, अब यह हो जाये।

बकुलावलिका—सुराग तथा तुम्हारे उपभोग योग्य यह तेरे आगे है।

मालविका—**(हर्ष से)** क्या महाराज !

मालविका—**(मुस्कराकर)** महाराज नहीं, अशोकशाखावलम्बी पल्लवगुच्छ, इसे कान में पहन ले।

(मालविका विषाद का अभिनय करती है)

विदूषक—आपने सुना।

राजा—कामिजनों के लिए इतना ही पर्याप्त है।

जहाँ एक मिलने के लिए व्याकुल हो और दूसरा मिलना ही न चाहता हो, वहाँ उनका मिलना न मिलना बराबर है। परन्तु जहाँ दोनों मिलने के लिए अधीर हों और दोनों एक-दूसरे के मिलने से हाथ धो बैठ हों, वहाँ प्राण भी दे देना पड़े तो बुरा नहीं है ॥ १५ ॥

(मालविका पत्तों का गुच्छा कान पर लटकाकर अशोक पर पाद-प्रहार करती है)

राजा—मित्र !

इस मालविका ने अशोक से पल्लव लेकर उस पर चरणन्यास किये। दोनों में समान विनिमय हुआ। कोई घाटे में नहीं रहा ॥ १६ ॥

बकुलावलिका—हला ! णत्थि दे दोसो। णिग्गुणो अअं असोओ जइ कुसुमोब्भेदमंधरो भवे जो दे चलणसक्कारं लंभिअ। [सखि! नास्ति ते दोषः। निर्गुणोऽयमशोको यदि कुसुमोद्भेदमन्थरो भवेत् यस्ते चरणसत्कारं लम्भितः।]

राजा— अनेन तनुमध्यया मुखरनूपुराराविणा
नवाम्बुरुहकोमलेन चरणेन सम्भावितः।
अशोक यदि सद्य एव मुकुलैर्न सम्पत्स्यसे
वृथा वहसि दोहदं ललितकामिसाधारणम्॥ १७॥

सखे ! वचनानुसरणपूर्वकं प्रवेष्टुमिच्छामि।

विदूषकः—एहि, णं परिहासइस्सं। [एहि, एनां परिहासयिष्यामि।]

(उभौ प्रवेशं कुरुतः)

निपुणिका—भट्टिणि भट्टिणि ! भट्टा एत्थ पविसदि। [भट्टिनि भट्टिनि ! भर्ताऽत्र प्रविशति।]

इरावती—एदं मम पढमं चिंतिदं हिअएण। [एतन्मम प्रथमं चिन्तितं हृदयेन।]

विदूषकः—(उपेत्य) भोदि ! जुत्तं णाम अत्तभवदो पिअवअस्सो अअं असोओ णं वामपादेण ताडिदुं ? [भवति ! युक्तं नाम अत्रभवतः प्रियवयस्योऽयमशोको ननु वामपादेन ताडयितुम्।]

उभे—(ससम्भ्रमम्) अहो भट्टा। [अम्हो भर्ता।]

विदूषकः—वउलावलिए ! गहीदत्थाए तुए अत्तहोदी ईरिसं अविणअं करंती कीस णं णिवारिदा। [बकुलावलिके ! गृहीतार्थया त्वयात्रभवतीदृशमविनयं कुर्वन्ती कस्मान्न निवारिता।]

(मालविका भयं रूपयति)

निपुणिका—भट्टिणि ! पेक्ख। किं पउत्तं अज्जगोदमेण। [भट्टिनि ! पश्य। किं प्रवृत्तमार्यगौतमेन।]

बकुलावलिका—सखी ! यह अशोक तुम्हारे द्वारा पाद-प्रहार से सम्मानित किया गया, उस पर भी यदि पुष्पित नहीं होता तो वह उसकी ही अगुणज्ञता है; तुम्हारा इसमें कोई दोष नहीं।

राजा—इस कृशोदरी मालविका ने कमल-कोमल सनूपुर चरणों द्वारा तुम्हारा सम्मान किया, उस पर भी तुम तत्काल विकसित नहीं हुए। तब तो ललितकामियों के समान दोहद-धारण व्यर्थ ही करते हो॥ १७॥

मित्र ! कुछ कहने का अवसर पाकर प्रवेश करना चाहता हूँ।

विदूषक—आइये, इससे हँसी करता हूँ।

(दोनों प्रवेश करते हैं)

निपुणिका—स्वामिनी ! स्वामिनी ! महाराज आ रहे हैं।

इरावती—यह तो मैं पहले ही जान गई थी।

विदूषक—(पास जाकर) कहिये देवी ! क्या हमारे प्रिय मित्र महाराज के उपस्थित रहने पर अशोक वृक्ष पर वामचरण से प्रहार करना उचित होगा ?

दोनों—(घबराकर) अरे महाराज !

विदूषक—क्यों बकुलावलिके ! तुम तो सब कुछ जानती थी फिर भी ऐसे अनुचित आचरण से तुमने इसे रोका नहीं, क्यों ?

(मालविका भय का अभिनय करती है)

निपुणिका—महारानी ! देखिए गौतम का अनर्थ।

इरावती—कहं क्खु ब्रह्मबंधू अण्णहा जीविस्सदि। [कथं खलु ब्रह्मबन्धुरन्यथा जीविष्यति।]

बकुलावलिका—अज्ज ! एसा देवीए णिओअं अणुचिट्ठदि। एदस्सिं अदिक्कमे परवदी इअं। पसीददु भट्टा। (इत्यात्मना सहैनां प्रणिपातयति) [आर्य! एषा देव्या नियोगमनुतिष्ठति। एतस्मिन्नतिक्रमे परवतीयम्। प्रसीदतु भर्ता।]

राजा—यद्येवमनपराधासि। उत्तिष्ठ भद्रे ! (हस्तेन गृहीत्वैनामुत्थापयति)

विदूषकः—जुज्जइ देवी एत्थ माणइदव्वा। [युज्यते देव्यत्र मानयितव्या।]

राजा—(विहस्य)

किसलयमृदोर्विलासिनि कठिने निहतस्य पादपस्कन्धे।
चरणस्य न ते बाधा सम्प्रति वामोरु! वामस्य॥ १८॥

(मालविका लज्जां नाटयति)

इरावती—अहो, णवणीदकप्पहिअओ अज्जउत्तो। [अहो, नवनीतकल्पहृदय आर्यपुत्रः।]

मालविका—बउलावलिए ! एहि। अणुट्ठिदं अत्तणो णिओअं देवीए णिवेदेम्ह। [बकुलावलिके! एहि। अनुष्ठितमात्मनो नियोगं देव्यै निवेदयावः।]

बकुलावलिका—विण्णावेहि भट्टारं विसज्जेहि त्ति। [विज्ञापय भर्तारं विसर्जयेति।]

राजा—भद्रे ! यास्यसि। मम तावदुत्पन्नावसरमर्थित्वं श्रूयताम्।

बकुलावलिका—अवहिदा सुणाहि। आणवेदु भट्टा। [अवहिता शृणु। आज्ञापयतु भर्ता।]

राजा— धृतिपुष्पमयमपि जनो बध्नाति न तादृशं चिरात्प्रभृति।
स्पर्शामृतेन पूरय दोहदमस्याप्यनन्यरुचेः॥ १९॥

इरावती—(सहसोपसृत्य) पूरेहि पूरेहि। असोओ कुसुमं ण दंसेदि। अअं उण पुप्फदि एव्व। [पूरय पूरय। अशोकः कुसुमं न दर्शयति। अयं पुनः पुष्पत्येव।]

इरावती—यह नीच ब्राह्मण भला कैसे जीयेगा ?

बकुलावलिका—महाराज ! यह मालविका महारानी धारिणी की आज्ञा का पालन कर रही है। इस अपराध में यह पराधीन है। आप प्रसन्न हों। (अपने साथ उसे भी प्रणत करती है)

राजा—यदि ऐसी बात है तब तुम निर्दोष हो, उठो। (हाथ पकड़कर उसे उठाता है)

विदूषक—यहाँ यह ठीक है। देवी की गौरव-रक्षा करनी ही है।

राजा—(हँसकर) ओ विलासिनी ! ओ वामोरु ! तुमने अपने कोमल चरण से कठिन अशोक की जड़ में प्रहार किया है, उसमें कोई कष्ट नहीं हुआ ? ॥ १८॥

(मालविका लज्जा का अभिनय करती है)

इरावती—अहा ! आर्यपुत्र का हृदय नवनीत के समान कोमल है।

मालविका—बकुलावलिके ! आओ। देवी से कह दें कि आदेश का पालन हो गया।

बकुलावलिका—महाराज से गमन करने की आज्ञा ले लें।

राजा—कल्याणि ! जाओ; केवल हमारी एक प्रार्थना सुन लो।

बकुलावलिका—सावधान होकर सुनें। महाराज ! कहिए।

राजा—यह व्यक्ति भी चिरकाल से धैर्य-सुमन को धारण नहीं कर सका है, अतः अनन्यासक्त इस जन का मनोरथ भी चरणस्पर्श रूप अमृत से पूर्ण कर दो॥ १९॥

इरावती—(शीघ्र समीप आकर) पूर्ण करो, पूर्ण करो। अशोक फूल नहीं देता है, किन्तु महाराज तो अभी से फूलते जा रहे हैं।

(सर्वे इरावतीं दृष्ट्वा सम्भ्रान्ताः)

राजा—(अपवार्य) वयस्य ! का प्रतिपत्तिरत्र।

विदूषकः—किं अण्णं ! जंघाबलं एव्व। [किमन्यत् ? जङ्घाबलमेव।]

इरावती—बउलावलिए ! तुए साहु उवक्कंतं। दाणिं सफलब्भत्थणं करेहि अज्जउत्तं। [बकुलावलिके ! त्वया साधूपक्रान्तम्। इदानीं सफलाभ्यर्थिनं कुर्वार्यपुत्रम्।]

उभे—पसीददु भट्टिणी। काओ अम्हे भत्तुणो पणअपरिग्गहस्स। (इति निष्क्रान्ते।) [प्रसीदतु भट्टिनी। के आवां भर्तुः प्रणयपरिग्रहस्य।]

इरावती—अविस्ससणीआ पुरिसा। अत्तणो वंचणवअणं पमाणीकरिअ आक्खित्ताए वाहजणगीदगहीदचित्ताए विअ हरिणीए एदं ण विण्णादं मए। [अविश्वसनीयाः पुरुषाः। आत्मनो वञ्चनावचनं प्रमाणीकृत्याक्षिप्तया व्याधजनगीतगृहीतचित्तयेव हरिण्येतन्न विज्ञातं मया।]

विदूषकः—(जनान्तिकम्) भो, पडिपज्जेहि किं पि उत्तरं। कम्मग्गहीदेण वि कुंभीलएण संधिच्छेदे सिक्खिओम्मि त्ति वत्तव्वं होदि। [भो, प्रतिपद्यस्व किमप्युत्तरम्। कर्मगृहीतेनापि कुम्भीलकेन सन्धिच्छेदे शिक्षितोऽस्मीति वक्तव्यं भवति।]

राजा—सुन्दरि ! न मे मालविकया कश्चिदर्थः। मया त्वं चिरयसीति यथाकथञ्चिदात्मा विनोदितः।

इरावती—विस्ससणीओसि। ण मए विण्णादं ईरिसं विणोदवुत्तंतं अज्जउत्तेण उवलद्धं त्ति। अण्णहा दुक्खभाइणीए एव्वं ण करीअदि। [विश्वसनीयोऽसि। न मया विज्ञातमीदृशं विनोदवृत्तान्तमार्यपुत्रेणोपलब्धम् इति। अन्यथा दुःखभागिन्येवं न क्रियते।]

विदूषकः—मा दाव अत्तभोदो दक्खिण्णस्स उवरोहं करेहि। समावदिट्ठेण देवीए परिचारिआइत्थिआजणेन संकहावि जइ वारीअदि एत्थ तुमं एव्व पमाणं। [मा तावदत्रभवतो दाक्षिण्यस्योपरोधं कुरु। समीपदृष्टेन देव्याः परिचारिकास्त्रीजनेन सङ्कथापि यदि वार्यते अत्र त्वमेव प्रमाणम्।]

(इरावती को देखकर सभी सकपका जाते हैं)

राजा—(अलग से) मित्र ! क्या युक्ति है ?

विदूषक—और क्या युक्ति है ? केवल (जाँघों का बल) भागना ही एक उपाय है।

इरावती—बकुलावलिके ! तुमने तो अच्छा काम किया। अब महाराज को पूर्णमनोरथ कर दो।

दोनों (मालविका, बकुलावलिका)—महारानी प्रसन्न हों। भला हम कौन होती हैं महाराज की साध पूर्ण करनेवाली ? (दोनों निकल जाती हैं)।

इरावती—वस्तुतः पुरुष विश्वासपात्र नहीं होते। मैं क्या जानती थी कि जिस प्रकार व्याधों के मनोरम संगीत को सुनकर हरिणी सुध-बुध खोकर जाल में फँस जाती है उसी प्रकार मैं भी इनकी चिकनी-चुपड़ी बातों पर विश्वास करके इनके फन्दे में फँस जाऊँगी।

विदूषक—(राजा से धीरे-धीरे) कुछ तो उत्तर दीजिए। चोरी में पकड़ा गया चोर कह देता है कि मैं सेंध नहीं लगा रहा था बल्कि सेंध की विद्या सीख रहा था।

राजा—सुन्दरि ! मालविका से मुझे कोई प्रयोजन नहीं। तुम यहाँ आने में विलम्ब कर रही थी, अतएव मैं किसी प्रकार अपना मन बहला रहा था अर्थात् मनोरञ्जन कर रहा था।

इरावती—तुम पर विश्वास नहीं। मैं नहीं जानती थी कि आर्यपुत्र ने ऐसी विनोद की सामग्री पा ली है, अन्यथा मैं अभागिन ऐसा नहीं करती।

इरावती—णं संकहा णाम होदु। किं त्ति अत्ताणं आआसइस्सं ? (इति रुषा प्रस्थिता।] [ननु सङ्कथा नाम भवतु। किमित्यात्मानमायासयिष्यामि ?]

राजा—(अनुसरन्) प्रसीदतु भवती।

(इरावती रसनासन्धारितचरणा व्रजत्येव)

राजा—सुन्दरि ! न शोभते प्रणयिनि जने निरपेक्षता।

इरावती—सठ ! अविस्ससणीअहिअओसि। [शठ ! अविश्वसनीयहृदयोऽसि।]

राजा—

शठ इति मयि तावदस्तु ते परिचयवत्यवधीरणा प्रिये।
चरणपतितया न चण्डि तां विसृजसि मेखलयापि याचिता॥ २०॥

इरावती—इअं पि हदासा तुमं एव्व अणुसरदि। (इति रसनामादाय राजानं ताडयितुमिच्छति।) [इयमपि हताशा त्वामेवानुसरति।]

राजा—वयस्य ! इयमिरावती—

बाष्पासारा हेमकाञ्चीगुणेन श्रोणीबिम्बादप्युपेक्षाच्युतेन।
चण्डी चण्डं हन्तुमभ्युद्यता मां विद्युद्दाम्ना मेघराजीव विन्ध्यम्॥ २१॥

इरावती—किं मं एव्व भूओ वि अवरद्धं करेसि ? [किं मामेव भूयोऽप्यपराद्धां करोषि ?]

राजा—(सरसनं हस्तमवलम्बयति)

अपराधिनि मयि दण्डं संहरसि किमुद्यतं कुटिलकेशि।
वर्द्धयसि विलसितं त्वं दासजनायाद्य कुप्यसि च॥ २२॥

विदूषक—आप महाराज की समानानुरागता पर आक्षेप न करें। महारानी की परिचारिकाओं से, जो पास में उपस्थित हो, बातचीत भी यदि निषिद्ध है तो यह तो आप ही जानें।

इरावती—वार्तालाप होवे, मैं क्यों बीच में पड़ूँगी ? (क्रोध के साथ चली जाती है)

राजा—(पीछे-पीछे जाते हुए) देवी प्रसन्न हो जाइए।

(इरावती पैर में फँसी हुई तगड़ी को घसीटती हुई चली जाती है)

राजा—प्रेयसि ! अपने प्रियतम की उपेक्षा करना तुम्हें शोभा नहीं देता।

इरावती—अरे शठ ! मुझे तुम्हारा तनिक भी विश्वास नहीं है।

राजा—तुमने शठ कहकर जो मेरा अनादर किया है, वह तो कोई नयी बात नहीं है। परन्तु हे चण्डि ! जब तुम्हारी तगड़ी भी तुम्हारे चरणों पर गिरकर क्षमा माँग रही है तब भी तुम क्या अपना क्रोध न छोड़ोगी ? ॥ २० ॥

इरावती—यह अभागिनी भी तुम्हारे ही समान है। (यह कहकर राजा पर मेखला-प्रहार करना चाहती है)

राजा—मित्र ! यह इरावती—

मेघमाला जिस प्रकार विद्युन्माला से विन्ध्यपर्वत को प्रताडित करती है उसी प्रकार सक्रोध एवं साश्रुनयना यह इरावती उपेक्षापूर्वक पतित मेखला से मेरे ऊपर प्रहार करना चाह रह रही है॥ २१॥

इरावती—आप पुनः मुझको क्रुद्ध बनाकर अपराध करवाना चाह रहे हैं क्यों ?

राजा—(मेखला युक्त हाथ को पकड़ लेता है)

अरे कुञ्चित केशकलापवाली ! मुझ अपराधी के लिए प्रस्तुत दण्ड को क्यों रोक रही हो ? एक ओर तो तुम लीला-विशेष को बढ़ा रही हो और इधर मुझ सेवक पर क्रोध भी कर रही हो॥ २२॥

नूनमिदमनुज्ञातम्। (इति पादयोः पतति)

इरावती—ण क्खु इमे मालविआचलणा जा दे हरिसदोहलं पूरयिस्संति। (इति निष्क्रान्ता सह चेटया।) [न खल्विमौ मालविकाचरणौ यौ ते हर्षदोहदं पूरयिष्यतः।]

विदूषकः—उट्ठेहि। अकिदप्पसादोऽसि। [उत्तिष्ठ। अकृतप्रसादोऽसि।]

राजा—(*उत्थायेरावतीमपश्यन्*) *तत्कथं गतैव प्रिया ?*

विदूषकः—वअस्स ! दिट्ठिआ इमस्स अविणअस्स अप्पसण्णा गदा एसा। ता वअं सिग्घं अवक्कमाम, जाव अंगारओ रासिं विअ अणुवंकं परिगमणं ण करेदि। [वयस्य ! दिष्ट्याऽनेनाविनयेनाप्रसन्ना गतैषा। तद्वयं शीघ्रमपक्रामामः, यावदङ्गारको राशिमिवानुवक्रं प्रतिगमनं न करोति।]

राजा—अहो ! मदनस्य वैषम्यम्—

मन्ये प्रियाहृतमनास्तस्याः प्रणिपातलङ्घनं सेवाम्।
एवं हि प्रणयवती सा शक्यमुपेक्षितुं कुपिता॥ २३॥

(इति निष्क्रान्तः सह वयस्येन)

इति तृतीयोऽङ्कः।

तो आपने मेरी बात मान ली है। (ऐसा कहकर चरणों पर गिरता है)

इरावती—ये मालविका के चरण नहीं है, जो तुम्हारे मनोरथ को पूर्ण करेंगे। (ऐसा कहकर दासी के साथ निकल जाती है)

विदूषक—उठिए। रानी का अनुग्रह नहीं प्राप्त कर सके।

राजा—(उठकर और इरावती को नहीं देखते हुए) क्या प्रियतमा चली ही गई ?

विदूषक—मित्र ! भाग्यवश इस अपराध से अप्रसन्न होकर चली गई है। जब तक जिस प्रकार मंगलग्रह वक्र भाव मे दूसरी राशि में आता है, उसी प्रकार फिर वह रानी नहीं आ जाती तभी तक हम लोग निकल चलें।

राजा—आश्चर्य है ! कामदेव की विपरीत कृति बड़ी ही विलक्षण है।

प्रियतमा मालविका ने मेरे हृदय को आकृष्ट कर लिया है, अतएव इरावती की अप्रसन्नता को मैं उपकार ही मान रहा हूँ। क्योंकि वह इरावती क्रुद्ध है, उसकी उपेक्षा करके भी कुछ समय तक रहा जा सकता है॥ २३॥

(राजा मित्र विदूषक के साथ निकल जाता है)

तीसरा अङ्क समाप्त।

चतुर्थोऽङ्कः

(ततः प्रविशति पर्युत्सुको राजा प्रतीहारी च)

राजा—(आत्मगतम्)

तामाश्रित्य श्रुतिपथगतामाशया बद्धमूलः
सम्प्राप्तायां नयनविषयं रूढरागप्रवालः।
हस्तस्पर्शैर्मुकुलित इव व्यक्तरोमोद्गमत्वात्
कुर्यात् कान्तं मनसिजतरुर्मां रसज्ञं फलस्य॥ १॥

(प्रकाशम्) सखे गौतम!

प्रतीहारी—जेदु जेदु भट्टा। असंणिहिदो गोदमो। [जयतु जयतु भर्ता। असन्निहितो गौतमः।]

राजा—(आत्मगतम्) आः मालविकावृत्तान्तज्ञानाय मया प्रेषितः।

(प्रविश्य)

विदूषकः—वड्ढदु भवं। [वर्धतां भवान्।]

राजा—जयसेने! जानीहि तावत् क्व देवी धारिणी सरुजचरणत्वाद्विनोद्यत इति।

प्रतीहारी—जं देव आणवेदि। (इति निष्क्रान्ता) [यद्देव आज्ञापयति।]

राजा—गौतम! को वृत्तान्तस्तत्रभवत्यास्ते सख्याः?

विदूषकः—जो विडालगहीदाए परहुदिआए। [यो विडालगृहीतायाः परभृतिकायाः।]

(तदनन्तर उत्कण्ठित राजा और प्रतीहारी का प्रवेश)

राजा—(मन ही मन) अपनी प्रेयसी मालविका से सम्बद्ध बातों से बढी हुई आशा ही जिसकी जड़ है, प्रियतमा के दर्शन से उत्पन्न अनुराग ही जिसके पल्लव हैं तथा उसके करकिसलयों के स्पर्श से उत्थित रोमाञ्च ही जिसके पुष्प है, वह प्रेम का वृक्ष ही मुझे रसका स्वामी बनाकर अपने फल के रसास्वादन का अवसर दे॥ १॥

(प्रकट) मित्र गौतम!

प्रतीहारी—जय हो, महाराज की जय हो। गौतमजी यहाँ नहीं हैं।

राजा—(मन ही मन) अरे! मैंने ही तो उनको मालविका के समाचार को जानने के लिए भेजा है।

विदूषक—(प्रवेश कर) आपको वधाई है।

राजा—जयसेना! आओ देखो तो, देवी धारिणी अपना चोट लगा हुआ पैर लिये कहाँ जी बहला रही है?

प्रतीहारी—जैसी महाराज की आज्ञा। (निकल जाती है)

राजा—गौतम! तुम्हारी सखी मालविका के क्या समाचार हैं?

विदूषक—वही जो बिल्ली के पंजे में पड़ी हुई कोयल का होता है।

राजा—(सविषादम्) कथमिव ?

विदूषकः—सा क्खु तवस्सिणी तए पिंगलच्छीए सारभांडभूघरए गुहाए विअ णिक्खित्ता। [सा खलु तपस्विनी तया पिङ्गलाक्ष्या सारभाण्डभूगृहे गुहायामिव निक्षिप्ता।]

राजा—ननु मत्सम्पर्कमुपलभ्य ?

विदूषकः—अह इं ? [अथ किम् ?]

राजा—क एवं विमुखोऽस्माकम्, येन चण्डीकृता देवी ?

विदूषकः—सुणादु भवं। परिव्वाजिआए मे कहिदं। हिओ किल तत्तहोदी इरावदी रुअक्कंत-चलणं देविं सुहपुच्छिआ आअदा। [शृणोतु भवान्। परिव्राजिकया मे कथितम्। ह्यः किल तत्रभवती-रावती रुजाक्रान्तचरणां देवीं सुखपृच्छिकाऽऽगता।]

राजा—ततस्ततः।

विदूषकः—तदो सा देवीए पुच्छिदा— 'किं णु ओलोइदो वल्लहजणो'त्ति। ताए उत्तं—'भंदो वो उवआरो जं परिजणे संकंतं वल्लहत्तणं ण जाणीअदि'। [ततः सा देव्या पृष्टा—'किं न्ववलोकितो वल्लभजन' इति। तयोक्तम्— 'मन्दो व उपचारः यत्परिजने सङ्क्रान्तं वल्लभत्वं न ज्ञायते'।]

राजा—अहो ! निर्भेदादृतेऽपि मालविकायामयमुपन्यासः शङ्क्यति।

विदूषकः—तदो ताए अणुवंधिज्जमाणा सा भवदो अविणअं अंतरेण परिगदत्था किदा देवी। [ततस्तयानुबन्ध्यमाना सा भवतोऽविनयमन्तरेण परिगतार्था कृता देवी।]

राजा—(साश्चर्यम्) अहो दीर्घरोषता तत्रभवत्याः। अतः परं कथय।

विदूषकः—किं अवरं। मालविआ वउलावलिआ अ पादालवासं णिगलपदीओ अदिट्ठसुज्जपादं णागकण्णआओ विअ अणुहोंति। [किमपरम्। मालविका बकुलावलिका च पातालवासं निगडपद्यावदृष्टसूर्यपादं नागकन्यके इवानुभवतः।]

राजा—(दुःखी होकर) किस प्रकार ?

विदूषक—बेचारी तपस्विनी मालविका को क्रूरकर्मा पीली आँखों वाली दासी ने स्वर्णाभूषण पात्र रखे जाने वाले भूमिगृह की गुफा में बन्द कर दिया है।

राजा—मेरे प्रेम की बात जानने के कारण ही बन्द किया होगा।

विदूषक—और क्या ?

राजा—ऐसा कौन हमारा शत्रु है, जिसने देवी को इतना क्रुद्ध बना दिया ?

विदूषक—आप सुनिए। मुझसे परिव्राजिकाजी कह रही थीं कि कल पैर में चोट खाई हुई देवी धारिणी से कुशल-मंगल पूछने इरावती वहाँ गई थीं।

राजा—तब क्या हुआ ?

विदूषक—तब उनसे महारानी ने पूछा—कहो, प्रियतम से इधर भेंट हुई थी ? इस पर उन्होंने कहा—अब उन्हें प्रियतम न कहिए। क्या आप नहीं जानतीं कि वे अब दासियों से प्रेम करने लगे हैं ?

राजा—यद्यपि बात स्पष्ट नहीं कही गई, फिर भी ज्ञात होता है कि मालविका को लक्ष्य करके कहा है।

विदूषक—इसके पश्चात् महारानी धारिणी के आग्रह करने पर इरावती ने आपको बचाते हुए सारी कथा उनसे कह दी।

राजा—(आश्चर्य के साथ) उसका क्रोध इतने दिनों तक रहा। आगे बतलाओ।

राजा—कष्टं कष्टम्।

मधुरस्वरा परभृता भ्रमरी च विबुद्धचूतसङ्गिन्यौ।
कोटरमकालवृष्ट्या प्रबलपुरोवातया गमिते॥ २॥

अप्यत्र कस्यचिदुपक्रमस्य गतिः स्यात्।

विदूषकः—कहं भविस्सदि? जं सारभांडघरव्वावारिदा माहविआ देवीए संदिट्ठा—'मह अंगुलीअअमुद्दिअं अदेक्खिअ ण मोत्तव्वा तुए हदासा मालविआ बउलावलिआ अ'त्ति [**कथं भविष्यति? यत्सारभाण्डगृहव्यापारिता माधविका देव्या सन्दिष्टा—'ममाङ्गुलीयकमुद्रिकामदृष्ट्वा न मोक्तव्या त्वया हताशा मालविका बकुलावलिका चे'ति।**]

राजा—(निःश्वस्य सपरामर्शम्) सखे! किमत्र कर्तव्यम्?

विदूषकः—(विचिन्त्य) अत्थि एत्थ उवाओ। [**अस्त्यत्रोपायः।**]

राजा—क इव?

विदूषकः—(सदृष्टिक्षेपम्) को वि अदिट्ठो सुणिस्सदि। कण्णे दे कहेमि (इत्युपश्लिष्य कर्णे) एव्वं विअ। (इत्यावेदयति) [**कोऽप्यदृष्टः श्रोष्यति। कर्णे ते कथयामि। एवमिव।**]

राजा—(सहर्षम्) सुष्ठु। प्रयुज्यतां सिद्धये।

(प्रविश्य)

प्रतीहारी—देव! पवादसअणे देवी णिसण्णा रत्तचंदणधारिणा परिअणहत्थगदेण चलणेण भअवदीए कहाहिं विणोदिज्जमाणा चिट्ठदि। [**देव! प्रवातशयने देवी निषण्णा रक्तचन्दनधारिणा परिजनहस्तगतेन चरणेन भगवत्या कथाभिर्विनोद्यमाना तिष्ठति।**]

राजा—तस्मादस्मत्प्रवेशयोग्योऽयमवसरः।

विदूषक—और क्या कहूँ? मालविका और बकुलावलिका के चरणों में बेडियाँ डाल दी गई और सूर्यकिरण-दर्शन से वञ्चित वे दोनों नागकन्या के समान पातालवास का अनुभव कर रही है।

राजा—अत्यन्त कष्ट है।

बौरे हुए आम के साथ रहनेवाली मधुरभाषिणी कोयल और भ्रमरी दोनों को प्रचण्ड पुरवाई और असमय की वर्षा ने पेड़ के कोटर में बन्द कर दिया॥ २॥

अब उन्हें छुड़ाने का कोई उपाय हो सकता है या नहीं।

विदूषक—उपाय क्या होगा? निचले भाण्डारगृह की रक्षिका माधविका को देवी ने यह कह दिया है कि मालविका और बकुलावलिका को बिना मेरी अँगूठी देखे कभी न छोड़ना।

राजा—(**लम्बी साँस लेकर और कुछ सोचकर**) मित्र! अब क्या किया जाय?

विदूषक—(**सोचकर**) एक उपाय है।

राजा—क्या उपाय?

विदूषक—(**इधर-उधर देखकर**) कोई छिपकर सुन न रहा हो? आइए कान में कहूँ। (**कान के पास लगकर**) यह हो सकता है। (**कान में कह देता है**)

राजा—(**प्रसन्न होकर**) ठीक है। प्रयोजन सिद्धि के लिए काम में लग जाओ।

प्रतीहारी—(**प्रवेश कर**) महाराज! इस समय महारानी पवनपूर्ण भवन में पलंग पर बैठी हुई हैं, उनके पैर में लाल चन्दन लगा हुआ है, दासियाँ पैर सँभाले हैं और परिव्राजिकाजी कथा सुनाकर उनका मनोरंजन कर रही है।

राजा—तो मुझे वहाँ जाने का अच्छा अवसर है।

विदूषकः—भो गच्छदु भवं। अहं वि देविं पेक्खिदुं अरित्तपाणी भविस्सं। [भो गच्छतु भवान्। अहमपि देवीं द्रष्टुमरिक्तपाणिर्भविष्यामि।]

राजा—जयसेनायास्तावदस्मद्रहस्यं विदितं कुरु।

विदूषकः—तह। (इति कर्णे) एव्वं विअ होदि। (इत्यावेद्य निष्क्रान्तः) [तथा। एवमिव भवति।]

राजा—जयसेने ! प्रवातशयनमार्गमादेशय।

प्रतीहारी—इदो इदो देवो। [इत इतो देवः।]

(ततः प्रविशति शयनस्था देवी परिव्राजिका विभवतश्च परिवारः)

देवी—भअवदि ! रमणिज्जं कहावत्थु। तदो तदो। [भगवति ! रमणीयं कथावस्तु। ततस्ततः।]

परिव्राजिका—(सदृष्टिक्षेपम्) देवि ! अतः परं पुनः कथयिष्यामि। अत्रभवान्विदिशेश्वरः सम्प्राप्तः।

देवी—अम्हो भट्टा। (इत्युत्थातुमिच्छति) [अहो भर्ता।]

राजा—अलमलमुपचारयन्त्रणया—

अनुचितनूपुरविरहं नार्हसि तपनीयपीठिकालम्बि।
चरणं रुजा परीतं कलभाषिणि ! मां च पीडयितुम्॥ ३॥

धारिणी—जेदु जेदु अज्जउत्तो। [जयतु जयत्वार्यपुत्रः।]

परिव्राजिका—विजयतां देवः।

राजा—(परिव्राजिकां प्रणम्योपविश्य) देवि ! अपि सह्या वेदना।

विदूषक—आप चलिए। मैं भी हाथ में कुछ उपहार लेकर महारानी को देखने आ रहा हूँ।

राजा—जयसेना को भी अपनी सब बातें समझा दो।

विदूषक—अच्छा। (जयसेना के कान से लगकर) देखो, ऐसा करना होगा। (सब कुछ बताकर चला जाता है)

राजा—जयसेना ! प्रवातशयनकक्ष का मार्ग दिखलाओ।

प्रतीहारी—इधर से आइए महाराज; इधर से।

(पलँग पर बैठी हुई देवी तथा पास में बैठी परिव्राजिका और अनेक दासियों का प्रवेश)

देवी—श्रीमतीजी ! कथा अत्यन्त मनोरम है। इसके आगे ?

परिव्राजिका—(चारों ओर देखकर) देवी ! शेष दूसरे समय में कहूँगी। यह विदिशानाथ आ रहे हैं।

देवी—क्या महाराज ! (इतना कहकर उठना चाहती है)

राजा—स्वागत करने के लिए उठकर कष्ट करने की क्या आवश्यकता है—

हे मधुरभाषिणि ! देवि ! यही तो अनुचित हो रहा है कि तुम्हारे ये चरण नूपुर से रहित होकर इस क्षुद्र स्वर्णपीठ पर पड़े हैं। अब इस समय उठने की चेष्टा द्वारा इन चरणों के साथ मुझे भी मत सताओ॥ ३॥

धारिणी—जय हो, आर्यपुत्र की जय हो।

परिव्राजिका—आपकी विजय हो देव।

राजा—(परिव्राजिका को प्रणाम करके बैठते हुए) देवी ! कुछ पीड़ा कम हुई ?

धारिणी—अज्ज अत्थि मे विसेसो। [अद्यास्ति मे विशेषः।]

(ततः प्रविशति यज्ञोपवीतवद्धाङ्गुष्टः सम्भ्रान्तो विदूषकः)

विदूषकः—परित्ताअदु परित्ताअदु भवं। सप्पेण म्हि दट्ठो। [परित्रायतां परित्रायतां भवान्। सर्पेणास्मि दष्टः।]

(सर्वे विषण्णाः)

राजा—कष्टं कष्टम्। क्व भवान्परिभ्रान्तः ?

विदूषकः—देविं देक्खित्तं त्ति आआरपुप्फग्गहणकारणादो पमदवणं गदो म्हि। [देवीं द्रक्ष्यामीत्याचारपुष्पग्रहणकारणात्प्रमदवनं गतोऽस्मि।]

धारिणी—हद्धी हद्धी। अहं एव्व वम्हणस्स जीविदसंसअणिमित्तं जादम्हि। [हा धिक्! हा धिक्! अहमेव ब्राह्मणस्य जीवितसंशयनिमित्तं जातास्मि।]

विदूषकः—ता हिं असोअत्थवअकालणादो पसारिदो दक्खिणहत्थो। तदो कोडरणिग्गदेण सप्परूवेण कालेण दट्ठो म्हि। णं एदाणि दुवे दंसणपदाणि। (इति दंशं दर्शयति) [तस्मिन्नशोकस्तवक-कारणात्प्रसारितो दक्षिणहस्तः। ततः कोटरनिर्गतेन सर्परूपेण कालेन दष्टोऽस्मि। नन्वेते द्वे दंशनपदे।]

परिव्राजिका—तेन हि दंशच्छेदः पूर्वकर्मेति श्रूयते। स तावदस्य क्रियताम्—

छेदो दंशस्य दाहो वा क्षतेर्वा रक्तमोक्षणम्।
एतानि दष्टमात्राणामायुष्याः प्रतिपत्तयः॥ ४॥

राजा—सम्प्रति विषवैद्यानां कर्म। जयसेने! ध्रुवसिद्धिः क्षिप्रमानीयताम्।

प्रतीहारी—जं देवो आणवेदि। (इति निष्क्रान्ता) [यद्देव आज्ञापयति।]

विदूषकः—अहो, पावेण मिच्चुणा गहीदो म्हि। [अहो, पापेन मृत्युना गृहीतोऽस्मि।]

धारिणी—हाँ, आज तो बहुत कम है।

(अपने हाथ के अंगूठे को जनेऊ से बाँधे हुए व्याकुल विदूषक का प्रवेश)

विदूषक—बचाइए महाराज! बचाइए! मुझे साँप ने काट लिया है।

(सभी लोग दुःखित हो जाते हैं)

राजा—कष्ट है। आप कहाँ घूम रहे थे?

विदूषक—महारानी का दर्शन करूँगा, ऐसा सोचकर कुछ उपहारस्वरूप फूल लेने के लिए प्रमदवन चला गया था।

धारिणी—हाय मुझे धिक्कार है। मैं ही इस ब्राह्मण की मृत्यु का कारण हूँ।

विदूषक—वहाँ अशोक के गुच्छे को तोड़ने के लिए दाहिना हाथ फैलाया, तब बिल से निकलकर कालरूप साँप ने मुझे काट लिया। ये दोनों दंशन चिह्न हैं। (दंशन दिखाता है)

परिव्राजिका—दंश वाले स्थान का छेदन पहला काम कहा गया है। यही इसके लिए भी करना चाहिए।

दंश-स्थान का छेदन, दाह और रक्तमोक्षण, ये सभी उपचार सर्पदष्ट लोगों के जीवन के उपाय माने गये हैं॥ ४॥

राजा—इस समय विष-वैद्य की आवश्यकता है। जयसेने! शीघ्र ध्रुवसिद्धि को बुलाओ।

प्रतीहारी—जो आज्ञा। (ऐसा कहकर चली जाती है)

विदूषक—हाय पापी मृत्यु ने मुझे पकड़ लिया।

राजा—मा कातरो भूः। अविषोऽपि कदाचिद् दंशो भवेत्।

विदूषकः—कहं ण भाइस्सं ? सिमसिमाअंति मे अंगाइँ। (इति विषवेगं रूपयति।) [कथं न भेष्यामि ? सिमसिमायन्ति मेऽङ्गानि।]

धारिणी—हा, दंसिदं असुहं विआरेण। अवलम्बथ बम्हणं। [हा, दर्शितमशुभं विकारेण। अवलम्बध्वं ब्राह्मणम्।]

(परिव्राजिका ससम्भ्रममवलम्बते)

विदूषकः—(राजानं विलोक्य) भो! भवदो बाल्लादो वि पिअवअस्सो म्हि। तं विआरिअ अपुत्ताए मे जणणीए जोगक्खेमं वहेहि। [भोः ! भवतो बाल्यादपि प्रियवयस्योऽस्मि। तं विचार्यापुत्राया मे जनन्या योगक्षेमं वह।]

राजा—मा भैषीर्गौतम ! स्थिरो भव। अचिरात्त्वां वैद्यश्चिकित्सिष्यति।

(प्रविश्य)

जयसेना—देव ! आणाविदो धुवसिद्धी विण्णावेदि—इह एव्व आणीअदु सो गोदमो त्ति। [देव! आज्ञापितो ध्रुवसिद्धिर्विज्ञापयति— इहैवानीयतां स गौतम इति।]

राजा—तेन हि प्रतिगृहीतमेनं तत्रभवतः सकाशं प्रापय।

जयसेना—तहा। [तथा।]

विदूषकः—(देवीं विलोक्य) भोदि ! जीवेअं वा ण वा। जं मए अत्तभवंतं सेवमाणेण दे अवरद्धं तं मरिसेहि। [भवति! जीवेयं वा न वा। यन्मयात्रभवन्तं सेवमानेन तेऽपराद्धं तन्मृष्यस्व।]

धारिणी—दीहाऊ होहि। [दीर्घायुर्भव।]

(निष्क्रान्तौ विदूषकः प्रतीहारी च)

राजा—घबराओ मत। कौन जाने साँप विषैला न भी हो।

विदूषक—क्यों न डरूँगा ? मेरे अंग-अंग जकडे जा रहे हैं। (विष चढने का अभिनय करता है)

धारिणी—हाय हाय ! इसकी दशा तो बिगडती जा रही है। इस ब्राह्मण को कोई सँभालो।

(परिव्राजिका भ्रम के साथ पकड़ लेती है)

विदूषक—(राजा की ओर देखकर) महाराज ! मैं बाल्यकाल से ही आपका प्रिय मित्र हूँ, इसका विचार कर मेरी पुत्रहीना माता की देखभाल कीजिएगा।

राजा—गौतम ! भयभीत न होओ। शीघ्र ही वैद्य महाराज आकर तुम्हारी चिकित्सा प्रारम्भ कर देंगे।

(प्रवेश करके)

जयसेना—आपका आदेश प्राप्त करके ध्रुवसिद्धि वैद्यराज ने कहा कि गौतम को यहीं लाया जाय।

राजा—तब गौतम को अवलम्ब देकर ध्रुवसिद्धि के पास ले जाओ।

जयसेना—ठीक है।

विदूषक—(देवी की ओर देखकर) श्रीमति ! मैं जीवित रहूँगा या नहीं, कोई निश्चय नहीं। यदि राजा की सेवा करने के कारण आपके प्रति मुझसे कुछ अपराध हो गया हो तो क्षमा कीजिएगा।

धारिणी—चिरञ्जीवी हो।

(विदूषक और प्रतीहारी निकल जाते हैं)

राजा—प्रकृतिभीरुस्तपस्वी ध्रुवसिद्धिमपि यथार्थनामानं सिद्धिमन्तं न मन्यते।

(प्रविश्य)

जयसेना—जेदु जेदु भट्टा। ध्रुवसिद्धी विण्णावेदि— उदकुंभविहाणेण सप्पमुद्दिअं किं पि कप्पिदव्वं। तं अण्णेसीअदु त्ति। [जयतु जयतु भर्ता। ध्रुवसिद्धिर्विज्ञापयति—उदकुम्भविधानेन सर्पमुद्रितं किमपि कल्पयितव्यम्। तदन्विष्यतामिति।]

धारिणी—इदं सप्पमुद्दिअं अंगुलीअअं। पच्छा मम हत्थे देहि णं। (इत्यङ्गुलीयकं ददाति) [इदं सर्पमुद्रितमङ्गुलीयकम्। पश्चान्मम हस्ते देह्येतत्।]

(प्रतिहारी गृहीत्वा प्रस्थिता)

राजा—जयसेने ! कर्मसिद्धावाशु प्रतिपत्तिमानय।

प्रतीहारी—जं देवो आणवेदि। (इति निष्क्रान्ता) [यद्देव आज्ञापयति।]

परिव्राजिका—यथा मे हृदयमाचष्टे तथा निर्विषो गौतमः।

राजा—भूयादेवम्।

(प्रविश्य)

जयसेना—जेदु देवो भट्टा। णिवुत्तविसवेगो गोदमो मुहुत्तेण पकिदित्थो संवुत्तो। [जयतु देवो भर्ता। निवृत्तविषवेगो गौतमो मुहूर्तेन प्रकृतिस्थः संवृत्तः।]

धारिणी—दिट्ठिआ वअणीआदो मुत्तम्हि। [दिष्ट्या वचनीयान्मुक्तास्मि।]

प्रतीहारी—एसो उण वाहतओ अमच्चो विण्णवेदि— राअकज्जं वहु मंतिदव्वं दंसणेण अणुग्गहं इच्छामि त्ति। [एष पुनर्वाहतकोऽमात्यो विज्ञापयति— राजकार्यं वहु मन्त्रयितव्यं दर्शनेनानुग्रह-मिच्छामीति।]

राजा—भयशील, अकिञ्चन ब्राह्मण ध्रुवसिद्धि की चिकित्सा में भी अविश्वास करता है।

(प्रवेश कर)

जयसेना—महाराज की जय हो। ध्रुवसिद्धि ने कहा है कि उदकुम्भविधान के अनुसार नागमुद्रा की आवश्यकता होगी, अतः नागमुद्रा का अन्वेषण कराया जाय।

धारिणी—यह नागमुद्रायुक्त अँगूठी है। पश्चात् मुझे लौटा देना। (ऐसा कहकर अँगूठी दे देती है)

(प्रतीहारी अँगूठी लेकर जाती है)

राजा—जयसेना ! कार्य सिद्ध हो जाने पर शीघ्र सूचना देना।

प्रतीहारी—महाराज की जो आज्ञा। (निकल जाती है)

परिव्राजिका—मेरा हृदय तो कह रहा है कि गौतम का विष उतर गया।

राजा—ऐसा ही होवे।

(प्रवेश करके)

जयसेना—महाराज की जय हो। गौतम का विष थोडी ही देर में उतर गया और वे शीघ्र ही स्वस्थ हो गये।

धारिणी—भाग्यवश मैं लोकापवाद से मुक्त हो गई।

प्रतीहारी—मन्त्री वाहतक ने कहलवाया है कि राजकार्य की वहुत-सी वातों पर विचार करना है। अतः आपके दर्शन की कृपा चाहता हूँ।

धारिणी—गच्छदु अज्जउत्तो कज्जसिद्धीए। [गच्छत्वार्यपुत्रः कार्यसिद्धये।]

राजा—देवि ! आतपाक्रान्तोऽयमुद्देशः। शीतक्रिया चास्या रुजः प्रशस्ता। तदन्यत्र नीयतां शयनम्।

देवी—बालिगाओ ! अज्जउत्तवअणं अणुचिट्ठह। [बालिकाः ! आर्यपुत्रवचनमनुतिष्ठत।]

परिजनः—तह। [तथा।]

(निष्क्रान्ता देवी परिव्राजिका परिजनश्च)

राजा—जयसेने ! मां गूढेन पथा प्रमदवनं प्रापय।

जयसेना—इदो इदो देवो। [इत इतो देवः।]

राजा—जयसेने ! ननु समाप्तकाम्यो गौतमः।

जयसेने—अह इं ? [अथ किम् ?]

राजा— इष्टाधिगमनिमित्तं प्रयोगमेकान्तसाध्यमपि मत्वा।
सन्दिग्धमेव सिद्धौ कातरमाशङ्कते हृदयम्॥ ५॥

(प्रविश्य)

विदूषकः—वड्ढदु भवं। सिद्धाणि दे मंगलकम्माणि। [वर्धतां भवान्। सिद्धानि ते मङ्गलकर्माणि।]

राजा—जयसेने ! त्वमपि स्वं नियोगमशून्यं कुरु।

जयसेना—जं देवो आणवेदि। (इति निष्क्रान्ता) [यद्देव आज्ञापयति।]

राजा—गौतम ! क्षुद्रा माधविका। न खलु किञ्चिद्विचारितमनया।

विदूषकः—देवीए अंगुलीअअमुद्दिअं देक्खिअ कहं विआरेदि। [देव्या अङ्गुलीयकमुद्रां दृष्ट्वा कथं विचारयति।]

धारिणी—जाइए आर्यपुत्र ! राज्यकार्य सम्भालिए।

राजा—देवी ! यह स्थान धूप से व्याप्त है। ऐसे रोग में शीतलता उचित होती है। अतः अपनी शय्या अन्यत्र उठवा ले जाइये।

देवी—बालिकाओ ! आर्यपुत्र की आज्ञा का पालन करो।

परिजन—अच्छा।

(महारानी, परिव्राजिका और दासियाँ चली जाती हैं)

राजा—जयसेने ! मुझे गुप्तमार्ग से प्रमदवन ले चलो।

जयसेना—इधर से आइये देव ! इधर से।

राजा—जयसेने ! क्या गौतम ने अपना कार्य पूर्ण कर लिया।

जयसेना—और क्या !

राजा—इच्छित वस्तु पाने के लिए अत्यन्त उपाय करके भी कार्य-सिद्धि के विषय में लोगों का हृदय शङ्कापूर्ण ही बना रहता है॥ ५॥

(प्रवेश करके)

विदूषक—महाराज ! आपकी वृद्धि हो। आपके मंगलकार्य सिद्ध हो गये।

राजा—जयसेने ! तुम भी अपना कार्य पूर्ण करो।

जयसेना—जो आज्ञा। (ऐसा कहकर निकल जाती है)

राजा—गौतम ! मालविका मूर्ख है। उसने कुछ अनिष्ट के लिए तो नहीं सोचा।

राजा—न खलु मुद्रामधिकृत्य ब्रवीमि। एतयोर्द्वयोः किन्निमित्तो मोक्षः। किं वा देव्याः परिजनमतिक्रम्य भवान्सन्दिष्ट इत्येवमनया प्रष्टव्यम् ?

विदूषकः—णं पुच्छिदो म्हि। पुणो मंदस्स मे तस्सिं पच्चुप्पण्णा मदी। [ननु पृष्टोऽस्मि। पुनर्मन्दस्य मे तस्मिन्प्रत्युत्पन्ना मतिः।]

राजा—कथ्यताम्।

विदूषकः—भणिदं मए। देव्वचिंतएहिं विण्णाविदो राआ— 'सोवसग्गं वो णक्खत्तं'। ता अवस्सं सव्ववंधमोक्खो करीअदु त्ति। [भणितं मया। दैवचिन्तकैर्विज्ञापितो राजा— 'सोपसर्गं वो नक्षत्रम्'। तदवश्यं सर्ववन्धमोक्षः क्रियतामिति।]

राजा—(सहर्षम्) ततस्ततः।

विदूषकः—तं सुणिअ देवीए इरावदीए चित्तं रक्खंतीए राआ किल मोएदि त्ति अहं संदिट्ठो त्ति। तदो जुज्जदि त्ति ताए एव्वं संपादिदो अत्थो। [तच्छ्रुत्वा देव्या इरावत्याश्चित्तं रक्षन्त्या राजा किल मोचयतीत्यहं सन्दिष्ट इति। ततो युज्यत इति तयैवं सम्पादितोऽर्थः।]

राजा—(विदूषकं परिष्वज्य।) सखे ! प्रियोऽहं खलु तव।

नहि बुद्धिगुणेनैव सुहृदामर्थदर्शनम्।
कार्यसिद्धिपथः सूक्ष्मः स्नेहेनाप्युपलभ्यते ॥ ६ ॥

विदूषकः—तुवरदु भवं। समुद्दघरए सहीसहिदं मालविअं ठाविअ भवंतं पच्चुग्गदो म्हि। [त्वरतां भवान्। समुद्रगृहे सखीसहितां मालविकां स्थापयित्वा भवन्तं प्रत्युद्गतोऽस्मि।]

राजा—अहमेनां सम्भावयामि। गच्छाग्रतः।

विदूषकः—एदु भवं। (परिक्रम्य) एदं समुद्दघरं। [एतु भवान्। इदं समुद्रगृहम्।]

विदूषक—देवी की मुद्रिका देख लेने पर वह कर ही क्या सकती थी।

राजा—मैं अँगूठी की वात नहीं पूछता हूँ। क्या कहकर तुमने उन दोनों को मुक्त कराया। उसने पूछा होगा कि इतने सेवकों के रहते हुए देवी ने आप ही को क्यों भेजा ?

विदूषक—यह तो पूछा ही था। किन्तु मुझ मूर्ख की उस समय प्रत्युत्पन्न वुद्धि हो गई।

राजा—कहो।

विदूषक—मैंने कहा कि ज्योतिषियों ने महाराज से कहा है कि आपके ग्रह अनिष्टकारी हैं, अतएव इस समय सभी वन्दियों को मुक्त करा दीजिए।

राजा—(प्रसन्नतापूर्वक) तव क्या हुआ ?

विदूषक—ऐसा सुनकर देवी धारिणी ने इरावती का मन रखने के लिए अपने किसी परिजन को न भेजकर मुझे भेजा है, जिससे इरावती यह समझे कि राजा ही मुक्त कर रहे हैं।

राजा—(गौतम का आलिंगन करके) मित्र ! मैं निश्चय ही तुम्हारा प्रिय हूँ।

केवल वुद्धि के वल से ही कोई अपने मित्रों का कार्य नहीं कर देता। अपने सिर कोई काम लेकर उसे अन्त तक निभा देना सचमुच ऐसा कठिन होता है कि वह तभी पूरा हो पाता है जव काम करने वाला अपने मित्र से पूर्ण स्नेह भी करता हो ॥ ६ ॥

विदूषक—आप शीघ्रता करें। मैं समुद्रगृह में मालविका और वकुलावलिका को वैठाकर आपके समीप आया हूँ।

राजा—चलो, मैं उसे अपना दर्शन देकर सम्मान करूँगा। चलो आगे-आगे।

विदूषक—आप आइये। (घूमकर) यह है समुद्रगृह।

राजा—(साशङ्कम्) वयस्य! एषा कुसुमावचयव्यग्रहस्ता सख्यास्ते परिचारिका चन्द्रिका सन्निकृष्टमागच्छति। इतस्तावदावां भित्तिगूढौ भवावः।

विदूषकः—अहो, कुंभीलएहिं कामुएहिं च परिहरणीआ क्खु चंदिआ। [अहो, कुम्भीलकैः कामुकैश्च परिहरणीया खलु चन्द्रिका।]

(उभौ यथोक्तं कुरुतः)

राजा—गौतम! कथं नु ते सखी मां प्रतिपालयति। एहि। एनां गवाक्षमाश्रित्य विलोकयावः।

विदूषकः—तह। [तथा।]

(उभौ विलोकयन्तौ तिष्ठतः)

(ततः प्रविशति मालविका वकुलावलिका च।)

वकुलावलिका—सहि! पणम भट्टारं। [सखि! प्रणम भर्तारम्।]

मालविका—णमो दे। [नमस्ते।]

राजा—शङ्के मे प्रतिकृतिं निर्दिशति।

मालविका—(सहर्षं द्वारमवलोक्य सविषादम्) हला! मं विप्पलंभेसि। [सखि! मां विप्रलम्भयसि।]

राजा—हर्षविषादाभ्यामत्रभवत्याः प्रीतोऽस्मि—

सूर्योदये भवति या सूर्यास्तमये च पुण्डरीकस्य।
वदनेन सुवदनायास्ते समवस्थे क्षणादूढे॥ ७॥

बकुलावलिका—णं एसो चित्तगदो भट्टा। [नन्वेष चित्रगतो भर्ता।]

उभे—(प्रणिपत्य) जेदु भट्टा। [जयतु भर्ता।]

राजा—(शङ्का सहित) मित्र! तुम्हारी सखी इरावती की दासी चन्द्रिका फूल चुनती हुई इधर ही चली आ रही है। चलो, इस दीवार के पीछे छिप जायें।

विदूषक—हाँ, चोरों और जारों को चन्द्रिका से बचते ही रहना चाहिए।

(दोनों दीवार के पीछे छिप जाते हैं)

राजा—गौतम! तुम्हारी सखी मालविका हमारी प्रतीक्षा किस प्रकार करती है? आओ, वातायन से उसे देखें।

विदूषक—बहुत ठीक।

(दोनों देखते हुए बैठ जाते हैं)

(तत्पश्चात् मालविका और बकुलावलिका दोनों प्रवेश करती हैं)

बकुलावलिका—सखी! स्वामी को प्रणाम करो।

मालविका—आपको प्रणाम है।

राजा—जान पड़ता है यह मेरा चित्र दिखा रही है।

मालविका—(प्रसन्नता से द्वार को देखकर दुःख के साथ) सखि! तुमने मुझे धोखा दिया।

राजा—प्रियतमा मालविका के इस हर्ष और विषाद से बड़ी प्रसन्नता हुई। सूर्योदय और सूर्यास्त के समय में कमल की जो दो अवस्थाएँ होती है, इस सुमुखी मालविका के मुख ने एक ही क्षण में उन दोनों अवस्थाओं को धारण कर लिया॥ ७॥

बकुलावलिका—पर चित्र में भी तो स्वामी ही हैं।

दोनों—(प्रणाम करती हुई) स्वामी की जय हो।

राजा—अविश्वसनीयत्वात्सख्यास्तव।

विदूषकः—अत्तहोदीए अअं कहं तुह अविस्सासो। [अत्रभवत्यामयं कथं तवाविश्वासः।]

राजा—श्रूयताम्—

पथि नयनयोः स्थित्वा स्थित्वा तिरोभवति क्षणात्
सरति सहसा बाह्वोर्मध्यं गतापि सखी तव।
मनसिजरुजा क्लिष्टस्यैवं समागममायया
कथमिव सखे! विसब्धं स्यादिमां प्रति मे मनः॥ ११॥

बकुलावलिका—सहि! बहुसो क्खु भट्टा विप्पलद्धो। ता तुए अत्ता विस्ससणिज्जो करीअदु। [सखि! बहुशः किल भर्ता विप्रलब्धः। तत्त्वयात्मा विश्वसनीयः क्रियताम्।]

मालविका—सहि! मह उण मंदभग्गाए सिविणसमाअमो वि भट्टिणो दुल्लहो आसि। [सखि! मम पुनर्मन्दभाग्यायाः स्वप्नसमागमोऽपि भर्तुर्दुर्लभ आसीत्।]

बकुलावलिका—भट्टा, कहेदु से उत्तरं। [भर्ता, कथयत्वस्या उत्तरम्।]

राजा— उत्तरेण किमात्मैव पञ्चबाणाग्निसाक्षिकम्।
तव सख्यै मया दत्तो न सेव्यः सेविता रहः॥ १२॥

बकुलावलिका—अणुगहीदम्हि। [अनुगृहीतास्मि।]

विदूषकः—(परिक्रम्य सत्रासम्) वउलावलिए! एसो वालासोअरुक्खस्स पल्लवाइं लंघेदि हरिणो। एहि, णिवारेम णं। [बकुलावलिके! एष बालाशोकवृक्षस्य पल्लवानि लङ्घयति हरिणः। एहि, निवारयाम एनम्।]

बकुलावलिका—तह। [तथा।] (इति प्रस्थिता)

राजा—तुम्हारी सखी पर विश्वास नहीं हो रहा है, इसलिए।

विदूषक—उन पर आपको विश्वास क्यों नहीं हो रहा है?

राजा—सुनो।

तुम्हारी सखी मालविका अभी सामने आती है और अभी छिप जाती है, भुजपाश से सहसा खिसक पड़ती है। मुझ कामपीडित प्रेमी के प्रति इस प्रकार की प्रवंचना के करते रहने पर भी उस पर विश्वास कैसे किया जाय?॥ ११॥

बकुलावलिका—सखी! तुमने महाराज को अनेक वार धोखा दिया, अब भी अपने को महाराज का विश्वासपात्र बनाओ।

मालविका—सखी! मैं बहुत बड़ी भाग्यहीना हूँ। मेरे लिए स्वामी का स्वप्न-संगम भी दुर्लभ हो रहा है।

बकुलावलिका—महाराज, इसका उत्तर दीजिये।

राजा—उत्तर देने की कोई आवश्यकता नहीं। मैंने कामाग्नि को साक्षी रखकर तुम्हारी सखी के लिए अपना शरीर ही सौंप दिया। जो गुप्त रूप से सेवा करता है, उसे सेव्य बनाना उचित नहीं॥ १२॥

बकुलावलिका—मैं अनुगृहीत हूँ।

विदूषक—(घूमकर व्यग्रता से) बालाशोक के पल्लवों को मृगशावक चर रहा है। आओ, उसे बचावें।

बकुलावलिका—ठीक है। (चली जाती है)

राजा—वयस्य ! एवमेवास्मिन् रक्षणक्षणेऽवहितेन त्वया भवितव्यम्।

विदूषकः—एव्वं वि गोदमो संदिसेअदि। [एवमपि गौतमः सन्दिश्यते।]

बकुलावलिका—(परिक्रम्य) अज्ज गोदम ! अहं अप्पआसे चिट्ठामि। तुमं दुवाररक्खओ होहि। [आर्य गौतम ! अहमप्रकाशे तिष्ठामि। त्वं द्वाररक्षको भव।]

विदूषकः—जुज्जदि। [युज्यते।]

(निष्क्रान्ता बकुलावलिका)

विदूषकः—इमं दाव फलिहक्खंभं अस्सिदो होमि। (इति तथा कृत्वा) अहो सुहप्फरिसदा सिलाविसेसस्स। (इति निद्रायते) [इमं तावत्स्फटिकस्तम्भमाश्रितो भवामि। अहो सुखस्पर्शता शिलाविशेषस्य।]

(मालविका ससाध्वसा तिष्ठति)

राजा— विसृज सुन्दरि सङ्गमसाध्वसं तव चिरात्प्रभृति प्रणयोन्मुखे।
परिगृहाण गते सहकारतां त्वमतिमुक्तलताचरितं मयि॥ १३॥

मालविका—देवीए भएण अत्तणो वि पिअं कादुं ण पारेमि। [देव्या भयेनात्मनोऽपि प्रियं कर्तुं न पारयामि।]

राजा—अयि ! न भेतव्यम्।

मालविका—(सोपालम्भम्) जो ण भाअदि सो मए भट्टिणीदंसणे दिट्ठसामत्थो भट्टा। [यो न बिभेति स मया भट्टिनीदर्शने दृष्टसामर्थ्यो भर्ता।]

राजा—दाक्षिण्यं नाम बिम्बोष्ठि ! नायकानां कुलव्रतम्।
तन्मे दीर्घाक्षि ! ये प्राणास्ते त्वदाशानिबन्धनाः॥ १४॥
तदनुगृह्यतां चिरानुरक्तोऽयं जनः। (इति संश्लेषमुपजनयति)

राजा—इस रहस्य को छिपाने में सावधान रहना।

विदूषक—क्या इस प्रकार गौतम को भी बताना होगा।

बकुलावलिका—(घूमकर) आर्य गौतम ! मैं छिपी हूँ, तुम द्वार पर प्रहरी बने रहो।

विदूषक—उचित है।

(बकुलावलिका निकल जाती है)

विदूषक—इस स्फटिक पत्थर के स्तम्भ का आश्रय लूँ। अहो ! इस शिलाखण्ड का स्पर्श कितना सुखद है ? (ऐसा कहकर सो जाता है)

(मालविका डरकर खड़ी रहती है)

राजा—सुन्दरि ! तुम मिलन-भय को छोड़ दो। मैं बहुत दिनों से तुम्हारे लिए उत्कण्ठित हूँ। मुझ आम्रवृक्ष पर तुम माधवीलता बनकर लिपट जाओ॥ १३॥

मालविका—देवी के भय से अपने मन का मनोरथ भी नहीं पूर्ण कर सकती हूँ।

राजा—अरे ! डरना नहीं चाहिए।

मालविका—(उलाहना सहित) आप नहीं डरते हैं, यह मैं इरावती के समक्ष देख चुकी हूँ।

राजा—हे बिम्बोष्ठि ! दाक्षिण्य उत्तम नायकों का कुलव्रत है। किन्तु हे विशाललोचने ! हमारे ये प्राण तुम्हारी आशा पर ही निर्भर हैं॥ १४॥

अतएव इस चिरप्रणयी पर दया करो। (ऐसा कहकर राजा आलिंगन करता है)

(मालविका नाट्येन परिहरति)

राजा—(आत्मगतम्) रमणीयः खलु नवाङ्गनानां मदनविषयावतारः। तथा हीयम्—

हस्तं कम्पयते रुणद्धि रसनाव्यापारलोलाङ्गुलीः
स्वौ हस्तौ नयति स्तनावरणतामालिङ्ग्यमाना बलात्।
पातुं पक्ष्मलनेत्रमुन्नमयतः साचीकरोत्याननं
व्याजेनाप्यभिलाषपूरणसुखं निर्वर्तयत्येव मे॥ १५॥

(ततः प्रविशतीरावती निपुणिका च)

इरावती—हंजे णिउणिए! सच्चं तुमं परिगदत्था चंदिआए। समुद्दघरअलिंदसइदो एआई अज्जगोदमो दिट्ठो त्ति। [हञ्जे निपुणिके! सत्यं त्वं परिगतार्था चन्द्रिकया। समुद्रगृहालिन्दशयित एकाकी आर्यगौतमो दृष्ट इति।]

निपुणिका—अण्णहा कहं भट्टिणीए विण्णावेमि। [अन्यथा कथं भट्टिन्यै विज्ञापयामि।]

इरावती—तेण हि तहिं एव्व गच्छम्ह, संसआदो मुत्तं पिअवअस्सं पुच्छिदुं अ। [तेन हि तत्रैव गच्छामः, संशयान्मुक्तं प्रियवयस्यं प्रष्टुं च।]

निपुणिका—सावसेसं विअ भट्टिणीए वअणं। [सावशेषमिव भट्टिन्या वचनम्।]

इरावती—अण्णं अ चित्तगदं अज्जउत्तं पसादेदुं। [अन्यच्च चित्रगतमार्यपुत्रं प्रसादयितुम्।]

निपुणिका—अह दाणिं कहं णु भट्टा एव्वं अणुणीअदि ? [अथेदानीं कथं नु भर्तैवमनुनीयते ?]

इरावती—मुद्धे! जारिसो चित्तगदो णं तारिसो एव्व अण्णसंकंतहिअओ अज्जउत्तो। केवलं उवआरादिक्कमं पमज्जिदुं अअं आरंभो। [मुग्धे! यादृशश्चित्रगतो ननु तादृश एवान्यसङ्क्रान्तहृदय आर्यपुत्रः। केवलमुपचारातिक्रमं प्रमार्जितुमयमारम्भः।]

(मालविका भंगी-विशेष से पृथक् हो जाती है)

राजा—(मन ही मन) नवाङ्गनाओं का कामविषयोद्रेक वास्तव में अत्यन्त मनोहर होता है। क्योंकि यह मालविका—

हाथ कँपाती है, करधनी खोलने के लिए तत्पर अँगुलियों को रोकती है। बलपूर्वक आलिंगन किये जाने पर अपने दोनों हाथों से स्तनमण्डल को ढँक लेती है। घनी बरौनी वाले नयनों से युक्त सुन्दर मुख को चूमने के लिए ऊपर उठाने पर मुँह घुमा लेती है। परिणामस्वरूप वह अपने निरोध के बहाने हमारी अभिलाषा को पूर्ण कर रही है॥ १५॥

(तब इरावती और निपुणिका प्रवेश करती हैं)

इरावती—अरी निपुणिके! चन्द्रिका ने तुमको सत्य ही सूचना दी। समुद्रगृह के द्वार पर बाह्यप्रदेश में सोये हुए आर्य गौतम दिखलाई दे रहे हैं।

निपुणिका—यदि ऐसी बात न होती तो आपसे मैं क्यों कहती ?

इरावती—अतएव मैं वहीं पर जा रही हूँ। सर्पदष्ट गौतम मरा या जीवित है, इसका पता भी चल जायगा तथा उससे कुछ बातें भी करूँगी।

निपुणिका—आपका वचन अपूर्ण-सा है। ज्ञात होता है कि आप कुछ और कहना चाहती हैं।

इरावती—हाँ, और यही कि चित्रगत महाराज को प्रसन्न भी करना है।

निपुणिका—तो आप चलकर महाराज ही को क्यों नहीं मना लेतीं ?

इरावती—अरी पगली! दूसरों से प्रेम करने वाले आर्यपुत्र हमारे लिए वैसे ही हैं जैसे उनका

निपुणिका—इदो इदो भट्टिणी। [**इत इतो भट्टिनी।**]

(उभे परिक्रामतः)

(प्रविश्य)

चेटी—जेदु जेदु भट्टिणी। भट्टिणि! देवी भणादि— ण मे मच्छरस्स एसो कालो। तेण क्खु बहुमाणं वड्ढेदुं वअस्साए सह णिअलबंधणे किदा मालविआ। जइ अणुमण्णसि अज्जउत्तस्स पिअं कादुं तहा करेमि। जं तुह इच्छिअं तं मे भणाहि त्ति। [**जयतु जयतु भट्टिनी। भट्टिनि! देवी भणति— न मे मत्सरस्यैष कालः। तेन खलु बहुमानं वर्धयितुं वयस्यया सह निगडबन्धने कृता मालविका। यद्यनुमन्यसे आर्यपुत्रस्य प्रियं कर्तुं तथा करोमि। यत्तवेष्टं तन्मे भणेति।**]

इरावती—णाअरिए! विण्णावेहि देवीं— 'का वअं भट्टिणीं णिओजेदुं। परिअणणिग्गहेण दंसिदो मइ अणुग्गहो। कस्स वा पसादेण अअं जणो वड्ढदि' त्ति। [**नागरिके! विज्ञापय देवीम्— 'का वयं भट्टिनीं नियोजयितुम्। परिजननिग्रहेण दर्शितो मय्यनुग्रहः। कस्य वा प्रसादेनायं जनो वर्धत' इति।**]

चेटी—तह। [**तथा।**] (इति निष्क्रान्ता)

निपुणिका—(परिक्रम्यावलोक्य च) भट्टिणि! एसो दुवारुद्देसे समुद्दघरअस्स विपणिगदो विअ बलीवद्दो अज्जगोदमो आसीणो एव्व णिद्दाअदि। [**भट्टिनि! एष द्वारोद्देशे समुद्रगृहस्य विपणिगत इव बलीवर्द आर्यगौतम आसीन एव निद्रायते।**]

इरावती—अच्चाहिदं। ण क्खु सावसेसो विसविआरो हवे। [**अत्याहितम्। न खलु सावशेषो विषविकारो भवेत्।**]

निपुणिका—पसण्णमुहवण्णो दीसइ। अवि अ धुवसिद्धिणा चिइच्छिदो। त से असंकणिज्जं पावं। [**प्रसन्नमुखवर्णो दृश्यते। अपि च ध्रुवसिद्धिना चिकित्सितः। तदस्याशङ्कनीयं पापम्।**]

चित्र। उस दिन मैंने उनके मनाने पर भी जो उनकी बात न मानने की धृष्टता की, उसी के परिमार्जन के लिए प्रयत्नशील हूँ।

निपुणिका—देवीजी इधर से इधर से।

(दोनों घूमती हैं)

(प्रवेश करके)

चेटी—महारानी की जय हो। देवी ने कहा है—मेरे लिए विरोध का समय नहीं है। तुम्हारी ही इच्छा को देखकर मैंने सखी सहित मालविका को बन्दीगृह में रखवा दिया है। यदि तुम कहो तो आर्यपुत्र का प्रिय कार्य करूँ। तुम्हारी जो इच्छा हो मुझसे कहो।

इरावती—नागरिका! तुम देवी से कहना कि देवी को आदेश देनेवाली मैं कौन होती हूँ? अपने जन को बन्दी बनाकर मुझ पर कृपा की गई और किसके द्वारा मैं अनुगृहीत हूँगी?

चेटी—जो आज्ञा। **(चली जाती है)**

निपुणिका—**(देखकर)** यह समुद्रगृह के द्वार पर गौतम बाजारू बैल की तरह बैठे-बैठे सो गया है।

इरावती—यह तो बड़ा बुरा हुआ। कहीं सर्पदंशोत्पन्न विष का विकार शेष न रह गया हो।

निपुणिका—परन्तु इसका मुखवर्ण तो प्रसन्न है और जब ध्रुवसिद्धि ने इसके विष की दवा की है तो कोई घबड़ाने की बात नहीं है।

विदूषकः—(उत्स्वप्नायते) भोदि मालविए! [भवति मालविके!]

निपुणिका—सुदं भट्टिणीए। कस्स एसो अत्तणिओअसंपादणे विस्ससणिज्जो हदासो। सव्वकालं इदो एव्व सोत्थिवाअणमोदएहिं कुक्खिं पूरिअ संपदं मालविअं सिविणावेदि। [श्रुतं भट्टिन्या। कस्यैष आत्मनियोगसम्पादने विश्वसनीयो हताशः। सर्वकालमित एव स्वस्तिवाचनमोदकैः कुक्षिं पूरयित्वा साम्प्रतं मालविकां स्वप्नायते।]

विदूषकः—इरावदीं अदिक्कमंती होहि। [इरावतीमतिक्रामन्ती भव।]

निपुणिका—एदं अच्चाहिदं। इमं भुअंगभीरुअं बम्हबंधुं इमिणा भुअंगकुडिलेण दंडकट्ठेण खंभंतरिदा भाअइस्सं। [एतदत्याहितम्। इमं भुजङ्गभीरुं ब्रह्मबन्धुमनेन भुजङ्गकुटिलेन दण्डकाष्ठेन स्तम्भान्तरिता भीषयिष्यामि।]

इरावती—अरिहदि एव्व किदग्घो उवद्दवस्स। [अर्हत्येव कृतघ्नः उपद्रवस्य।]

(निपुणिका विदूषकस्योपरि दण्डकाष्ठं पातयति)

विदूषकः—(सहसा प्रबुध्य) अविहा अविहा। भो वअस्स! सप्पो मे उवरि पडिदो। [अविधा अविधा। भो वयस्य! सर्पो मे उपरि पतितः।]

राजा—(सहसोपसृत्य) सखे! न भेतव्यं न भेतव्यम्।

मालविका—(अनुसृत्य) भट्टा! मा दाव सहसा णिक्कम। सप्पो त्ति भणीअदि। [भर्तः! मा तावत्सहसा निष्क्राम। सर्प इति भण्यते।]

इरावती—हद्धि हद्धि। भट्टा इदो एव्व धावदि। [हा धिक् हा धिक्। भर्ता इत एव धावति।]

विदूषकः—(सप्रहासम्) कहं दंडकट्ठं एदं। अहं उण जाणे जं मए केदईकंटएहिं डंसं करिअ सप्पस्स उवरि अअसो किदं तं मे फलिदं त्ति। [कथं दण्डकाष्ठमेतत्। अहं पुनर्जाने यन्मया केतकीकण्टकैर्दंशं कृत्वा सर्पस्योपर्ययशः कृतं तन्मे फलितमिति।]

विदूषक—(स्वप्न में प्रलाप करता हुआ) हे देवि मालविके!

निपुणिका—देवी ने सुना? अपना कार्य सिद्ध कराने के लिए इस अभागे का कौन विश्वास करेगा? सदा तो यह आपके दिये हुए पूजा के मोदकों से उदरपूर्ति करता है और आज स्वप्न में इसे मालविका सूझ रही है।

विदूषक—इरावती को पराजित करनेवाली बनो।

निपुणिका—यह तो बड़ा बुरा हुआ। खम्भे के पीछे खड़ी होकर सर्प से भयभीत इस ब्राह्मणाधम को सर्पतुल्य वक्र लाठी से उठाती हूँ।

इरावती—ऐसे कृतघ्न के साथ ऐसी ही कुचाल करनी चाहिए।

(निपुणिका विदूषक के ऊपर लाठी गिरा देती है)

विदूषक—(शीघ्र जगकर) हाय! हाय मित्र! मेरे ऊपर साँप गिर पडा है।

राजा—(शीघ्र समीप आकर) डरो मत, डरो मत।

मालविका—(पीछा करती हुई) देव! आप बाहर न जायँ, साँप की बात कही जा रही है।

इरावती—हाय हाय! महाराज यहीं से दौड़े चले आ रहे हैं।

विदूषक—(अत्यधिक हँसी के साथ) यह तो लाठी है। मुझे ज्ञात हुआ कि मैंने केतकी कण्टक से चिह्न बनाकर जो सर्प को मिथ्या अपवाद लगाया था, उसी का फल मुझे यह मिल रहा है।

(प्रविश्य पटाक्षेपेण)

बकुलावलिका—मा दाव भट्टा पविसदु। इह कुडिलगई सप्पो विअ दीसदि। [**मा तावद्भर्ता प्रविशतु। इह कुटिलगतिः सर्प इव दृश्यते।**]

इरावती—(स्तम्भान्तरिता राजानं सहसोपेत्य) अवि णिव्विग्घमणोरहो दिवासंकेदो मिहुणस्स। [**अपि निर्विघ्नमनोरथो दिवासङ्केतो मिथुनस्य।**]

(सर्वे इरावतीं दृष्ट्वा सम्भ्रान्ताः)

राजा—प्रिये! अपूर्वोऽयमुपचारः।

इरावती—बउलावलिए! दिट्ठिआ दूच्चाहिआरविसआ संपुण्णा दे पइण्णा। [**बकुलावलिके! दिष्ट्या दूत्याभिसारविषया सम्पूर्णा ते प्रतिज्ञा।**]

बकुलावलिका—पसीददु भट्टिणी। किं मए किदं त्ति देवो पुच्छिदव्वो। ददुरा वाहरंति त्ति किं देवो पुहवीएँ वरिसिदुं विरमदि। [**प्रसीदतु भट्टिनी। किं मया कृतमिति देवः प्रष्टव्यः। दर्दुरा व्याहरन्तीति किं देवः पृथिव्यां वर्षितुं विरमति।**]

विदूषकः—मा दाव। भोदीए दंसणमत्तेण अत्तभवं पणिवादलंघणं विसुमरिदो। तुमं उण अज्ज वि पसादं ण गेण्हसि। [**मा तावत्। भवत्या दर्शनमात्रेणात्रभवान्प्रणिपातलङ्घनं विस्मृतः। त्वं पुनरद्यापि प्रसादं न गृह्णासि।**]

इरावती—कुविदा दाणिं अहं किं करिस्सं। [**कुपितेदानीमहं किं करिष्यामि।**]

राजा—एवमेतदस्थाने कोप इत्यनुपपन्नं त्वयि। तथा हि—

कदा मुखं वरतनु कारणादृते तवागतं क्षणमपि कोपपात्रताम्।
अपर्वणि ग्रहकलुषेन्दुमण्डला विभावरी कथय कथं भविष्यति॥ १६॥

(पर्दा हटाते हुए प्रवेश कर)

बकुलावलिका—महाराज! आप मत आवें, यहाँ पर टेढा साँप है।

इरावती—**(खम्भे की आड़ से शीघ्र जाकर)** युगल दम्पति का यह दिवाभिसार तो निर्विघ्न समाप्त हुआ?

(सभी इरावती को देखकर भय से चकित हो जाते हैं)

राजा—प्रिये! तुम्हारा यह प्रीति-व्यवहार तो बड़ा विचित्र है।

इरावती—बकुलावलिके! महाराज के अभिसार से सम्बद्ध तुम्हारी प्रतिज्ञा सौभाग्य से पूर्ण हो गई।

बकुलावलिका—महारानी आप प्रसन्न हो। मैंने क्या किया है? यह आप राजा से पूछ लीजिए। मेढक टर्र-टर्र बोलते है; क्या इसी के लिए मेघ पृथ्वी पर जलवृष्टि के लिए रुक जाते हैं।

विदूषक—ऐसा नहीं। तुम्हारे दर्शन से ही महाराज तुम्हारे द्वारा किये गये अपमान को भूल गये, किन्तु तुम अभी भी प्रसन्न नहीं हो रही हो।

इरावती—मैं महाराज पर क्रुद्ध होकर ही क्या कर सकती हूँ?

राजा—इस प्रकार बिना अवसर के ही क्रोध कर बैठना आप को शोभा नहीं देता। देखिये—

अवसरशून्य अयोग्य स्थान में क्रोध करना तुम्हें शोभा नहीं देता। हे रमणीय गात्रि! बिना कारण के तुमने कब क्रोध का प्रकाशन किया? अर्थात् कदापि नहीं। पूर्णिमा के बिना ही राहु-ग्रहण से चन्द्रमण्डल कलुषित हो जाय, ऐसी बात किस रात्रि में भला होती है? ॥ १६॥

इरावती—अट्ठाणे त्ति सुट्ठु वाहरिदं अज्जउत्तेण। अण्णसंकंतेसु अम्हाणं भाअहेएसु जइ उण कुप्पेअं तदो णं अहं हस्सा भवेअं। [अस्थान इति सुष्ठु व्याहृतमार्यपुत्रेण। अन्यसङ्क्रान्तेष्वस्माकं भागधेयेषु यदि पुनः कुप्येयं ततो नन्वहं हास्या भवेयम्।]

राजा—त्वमन्यथा कल्पयसि। अहं पुनः सत्यमेव कोपस्थानं न पश्यामि। कुतः—

नार्हति कृतापराधोऽप्युत्सवदिवसेषु परिजनो बन्धम्।
इति मोचिते मयैते प्रणिपतितुं मामुपगते च॥ १७॥

इरावती—णिउणिए! गच्छ। देवीं विण्णावेहि—दिट्ठो भवदीए पक्खवादो णं अज्ज त्ति। [निपुणिके! गच्छ। देवीं विज्ञापय— दृष्टो भवत्याः पक्षपातो नन्वद्येति।]

निपुणिका—तह। [तथा।] (इति निष्क्रान्ता)

विदूषकः—(आत्मगतम्) अहो! अणत्थो संपडिदो। वंधणव्भट्टो गिहकवोदो विडालिआए आलोए पडिदो। [अहो! अनर्थः सम्पतितः। बन्धनभ्रष्टो गृहकपोतो विडालिकाया आलोके पतितः।]

निपुणिका—(प्रविश्यापवार्य) भट्टिणि! जदिच्छादिट्ठाए माहविआए आचक्खिदं—एव्वं क्खु एदं णिव्वुत्तं त्ति (इति कर्णे कथयति।) [भट्टिनि! यदृच्छादृष्टया माधविकयाख्यातम्— एवं खल्वेतन्निर्वृत्तमिति।]

